नवतितमोऽध्यायः

नैपालतीर्थेषु विरूपाक्षस्य यात्रा दुर्गातीर्थमहिमा च

लोमहर्षण उवाच

श्रुत्वा चैतां कथां दिव्यां मुमुदे कुम्भजो भृशम्[1] । वाग्वत्याः किल माहात्म्यं तेषां मुक्तिं तथाद्भुताम्[2] ॥१॥
भक्त्या स्कन्दं प्रणम्यादौ चापृच्छत् कुम्भजो मुदा । नेपालस्यैव माहात्म्यं हिताय ज्ञानिनां तथा ॥२॥

अगस्त्य उवाच

भगवन् सर्ववित् ! स्कन्द ! त्वत्प्रसादाच्छ्रुतं मया । माहात्म्यञ्चैव वाग्वत्याश्चाद्भुतं पापनाशकम् ॥३॥
भूयोऽहं श्रोतुमिच्छामि माहात्म्यं त्वत्तः कार्तिक । अन्यासां सरितां तत्त्वं तीर्थानाञ्च विशेषतः ॥४॥
लिङ्गानाञ्च समुद्भूतिं[3] तेषां नेपालजन्मनाम् । चतुःषष्टिप्रसंख्यानां माहात्म्यं हि तथा पुनः ॥५॥
प्रकाशितानि लिङ्गानि केन केन च कानि च । कैः कैर्लब्धो वरश्चेति केषामाराधनाद् विभो[4] ॥६॥
तत्तत्तीर्थेषु च स्नानात्कियन्ति च फलानि च । लब्धानि कैः कदा स्कन्द स्थानप्रमाणमेव च ॥७॥
स्नातव्यञ्च कदा काले केषु केषु दिनेषु च[5] । तीर्थयात्रादिकं सर्वं वद मे शङ्करात्मज ॥८॥

स्कन्द उवाच

अहो धन्यतमोऽगस्त्य ! यद्बुद्धिरीदृशी तव । तत्कथानौप्रवेशेन भवाब्धिं तारयेद्यया ॥९॥
नैपालानाञ्च लिङ्गानां तीर्थानाञ्च विशेषतः । शृणु वक्ष्यामि तत्सर्वं माहात्म्यञ्च यथाऽभवत् ॥१०॥
पूर्वोक्तो यो द्विजोऽगस्त्य विरूपाक्षोऽभिधानकः । अन्तर्वेद्यां नगर्यां स कुले महत्यजायत ॥११॥

अध्याय – ९०

नैपालतीर्थहरूमा विरूपाक्षको यात्रा र दुर्गातीर्थको महिमा

लोमहर्षणले भने – वाग्वतीको माहात्म्यले युक्त भएको वृत्तान्त र तिनीहरू मुक्त भएको कथा सुनेर अगस्त्य मुनि अत्यन्त प्रसन्न हुनुभयो । त्यसपछि उहाँले भक्तिपूर्वक कार्तिक स्वामीलाई नमस्कार गर्नुभयो र ज्ञानीहरूको हितका निमित्त प्रसन्न हुँदै नेपालको माहात्म्य सोध्नुभयो ॥१–२॥

अगस्त्य मुनिले भन्नुभयो – हे सर्वज्ञ ! हे भगवान् स्कन्द ! हजुरको अनुग्रहबाट मैले पापनाश गर्ने अचम्म लाग्दो वाग्वतीको माहात्म्य सुनें । म फेरि हजुरबाट अरू नदीहरूको र विशेष गरी तीर्थहरूको तत्त्व तथा नेपालमा पैदा भएका चौंसट्ठी लिङ्गहरूको माहात्म्य सुन्न चाहन्छु । कसले, कुन–कुन लिङ्गलाई प्रकाशित गऱ्यो ? यी लिङ्गहरूको आराधना गरेर हे प्रभु ! क–कसले वर पाए ? ती–ती तीर्थमा स्नान गर्नाले के कस्तो फल पाइन्छ ? हे कार्तिक स्वामी ! कहिले क–कसले के–के फल पाए ? तिनीहरूको स्थानको प्रमाण कति हो ? त्यो पनि सुन्न चाहन्छु । हे कार्तिक स्वामी ! कुन–कुन समयमा र कुन दिनमा स्नान गर्नुपर्छ ? तीर्थयात्रा आदि गर्नुपर्छ ? त्यो सबै मलाई बताउनुहोस् ॥३–८॥

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! तिमी धन्य रहेछौ, किनभने तिम्रो यस्तो बुद्धि छ, जुन बुद्धिले कथारूपी डुङ्गामा प्रवेश गराएर संसाररूपी समुद्र तार्छ । नेपालभित्र रहेका लिङ्गहरूको विशेष गरी तीर्थहरूको सबै माहात्म्य जस्तो छ, त्यस्तै म बताउँछु, सुन्नुहोस् । हे अगस्त्य मुनि ! विरूपाक्ष नाम गरेको ब्राह्मण अन्तर्वेदी नाम गरेको नगरमा ठूलो कुलमा पैदा भयो भनेर मैले पहिले बताएको थिएँ ॥९–११॥

---

१. भृशं मुमोद कुम्भज इति न.सं.पु.पाठः ।
२. तथाद्भुतम् इति न.सं.पु.पाठः ।
३. समुद्भूतम् इति न.सं.पु.पाठः ।
४. कैः कैर्लब्ध वरञ्चैव तेभ्यश्चाराधनाद्विभो इति न.सं.पु.पाठः ।
५. कस्मिन्कस्मिन् हि काले च स्नातव्यं यद्दिनेषु च इति न.सं.पु.पाठः ।

पूर्वजन्मविपाकेन पापाचारोऽभवद्धि सः । मातृगमनसंलग्नः[६] सुरापानरतोऽनिशम् ॥१२॥
मांसाहारी त्वनाचारी वेश्यागमनतत्परः । जातिभ्रष्टोऽन्वयैस्त्यक्तो वेदशास्त्रविवर्जितः ॥१३॥
किञ्चित्कालान्तरेऽसौ हि देशाद्विनिर्ययौ मुने । त्यक्त्वा प्रियां प्रियं गोत्रं व्रीडया व्यथितो द्विजः ॥१४॥
भ्रमति स्म क्षितौ देशान्निर्जनः[७] कुष्ठपीडितः । हिमाद्रिं प्राप्तवान् भ्रान्त्वा[८] देशाद्देशं वनाद्वनम् ॥१५॥
त्रिकूटानाञ्च मध्ये स प्राप्तवान् कुलपीठकम् । उवाह यत्र गम्भीरं लीलावती च कौशिकी ॥१६॥
तत्राऽऽस्ते चाऽऽदिलिङ्गं वै सर्वलोकैः प्रपूजितम् । लोकवाञ्छाप्रदं नित्यं पूजकानाञ्च भक्तितः ॥१७॥
तत्रैव गाधिपुत्रस्य विश्वामित्रस्य चाऽऽश्रमः । ततस्तटञ्च कौशिक्या अगमद्रोगपीडितः ।
ध्यात्वा प्लवन् स्थितं तत्र ददर्श नेमुनिं हि सः ॥१८॥
तत्र संध्यावसानेऽसौ चाऽऽगमच्च तदन्तिकम् । प्रणनाम हि तं भक्त्या मेदिन्यामश्रु मोचयन् ॥१९॥
प्रेक्ष्य कुष्ठाङ्कितं विप्रं भक्तियुक्तं सुनिर्जनम् । व्याचष्टे नेमुनिस्तस्मै पृच्छन्[९] करुणया गिरा ॥२०॥

नेमुनिरुवाच

कोऽसि भवानिहैकाकी[१०] कुतश्चाऽत्र समागतः । निर्जने विपिने भीष्मे सिंहशार्दूलसेविते ॥२१॥
कथं त्वं कुष्ठवान् रोगी मालिन्यदूषिताननः[११] । यज्ञसूत्रोपवीताङ्ग ईदृशी ते दशा कथम् ॥२२॥

त्यो पूर्वजन्ममा गरेको कर्मले गर्दा पापी भयो । त्यो मातृगामी र सुरापायी थियो । सधैं मासु खान्थ्यो, दुराचारहरू गर्थ्यो, वेश्यागमन गर्थ्यो, जातिभ्रष्ट भएको थियो, वेदशास्त्रबाट ऊ वर्जित हुन पुग्यो । त्यसैले दाजुभाइहरूले उसलाई त्यागिदिए । केही समय बितेपछि लाजले भुतुक्क भएर त्यो ब्राह्मण आफ्नी पत्नी र प्यारो वंशलाई छोडेर देशबाट बाहिर निस्कियो ॥१२-१४॥

कुष्ठरोगले पीडित भएर त्यो ब्राह्मण पृथ्वीतलमा घुम्न थाल्यो । एक देशबाट अर्को देश, एक वनबाट अर्को वन नाघ्दै त्यो हिमालय पर्वतमा पुग्यो । त्यो ब्राह्मण त्रिकूट पर्वतहरूको बीचमा रहेको कुलपीठक नाम गरेको पर्वतमा पुग्यो । त्यहाँ लीलावती र कौशिकी नदी ठूलो वेगले बगेका छन् । भक्तिपूर्वक पूजा गर्ने प्राणीहरूको इच्छा पूर्ण गराउने र सम्पूर्ण प्राणीहरूद्वारा पूजित भगवान्‌को आदिलिङ्ग त्यहाँ रहेको छ ॥१५-१७॥

त्यसै कोशीनदीको तीरमा रहेको गुफामा तपस्या गरेर बस्ने गाधिमुनिका छोरा विश्वामित्रको आश्रम छ । त्यसपछि रोगले पीडित भएको त्यो ब्राह्मण कोशी नदीको तीरमा पुग्यो । उसले स्नान गरेपछि ध्यान गरेर बसिरहेका नेमुनिलाई देख्यो । सन्ध्या समय बितेपछि त्यो ब्राह्मण नेमुनिको नजिकै गयो र भक्तिपूर्वक पृथ्वीमा आँसु खसाल्दै उनलाई नमस्कार गऱ्यो । कुष्ठरोगले ग्रस्त भएको, एक्लो, भक्तिले युक्त भएको त्यस ब्राह्मणलाई देखेर दयाको भावना राख्दै नेमुनिले उसलाई सोधे ॥१८-२०॥

नेमुनिले भन्नुभयो - तिमी को हौ ? एक्लै सिंह, बाघहरू बसेको यस्तो निर्जन डरलाग्दो वनमा कहाँबाट आइपुग्यौ ? तिमी कसरी कुष्ठरोगले ग्रस्त भयौ ? तिम्रो मुख किन मलिन छ ? शरीरमा जनै धारण गर्ने ब्राह्मण भएका तिम्रो यस्तो दुर्दशा कसरी भयो ? ॥२१-२२॥

---

६. मातृगमनसंभूतः कश्चित् इति न.सं.पु.पाठः ।
७. क्षितिदेशान्निर्जनः इति न.सं.पु.पाठः ।
८. लङ्घ्य इति न.सं.पु.पाठः ।
९. प्रष्टुम् इति न.सं.पु.पाठः ।
१०. भवान् समेकाकी इति न.सं.पु.पाठः ।
११. मलिनैः संयुताननः इति न.सं.पु.पाठः ।

विरूपाक्ष उवाच

तात मुने हि पापात्मा विरूपाक्षाऽभिधानकः । धर्मशर्मसुतोऽहञ्च धर्मकर्मविवर्जितः ॥२३॥
श्रोत्रियाणां कुले जातो[१२] भ्रष्टाचारो भवाम्यहम् । दैवयोगविपाकेन विपुलं पापमाचरम्[१३] ॥२४॥
महापापविलिप्ताङ्गो व्रणी कुष्ठी सुविह्वलः । परिभ्रम्य क्षितौ[१४] देशान् दिष्टेनैवमिहागतः ॥२५॥
कस्माच्चाऽत्र विमुच्येऽहं पापैस्तात[१५] सुदुःसहैः । सुनिर्मलः कथं कायो मे भविष्यति तद्वद ॥२६॥
पापानलप्रदग्धोऽहं दुःखार्णवनिमज्जकः । उपदेशकृपारज्जुबन्धैरुद्धयतां विभो ॥२७॥

सिद्धर्षिरुवाच

सत्यमुक्तं त्वया वत्स पापात्मा पापकृद् भवान् । पूर्वजन्मविपाकेन पापाचारो न संशयः ॥२८॥
तत्पापानां विनाशाय कुरु तीर्थाटनं ध्रुवम् । ततः पापानि नश्यन्ति तीर्थजलनिषेवणात्[१६] ॥२९॥
दर्शनाच्चैव लिङ्गानां मुच्यते बहुपातकैः । स्पर्शनात्तैश्च पापैस्त्वं न लिप्यसे पुराकृतैः[१७] ॥३०॥

विरूपाक्ष उवाच

कस्मिन्तीर्थे मुने पूर्वं स्नानं कार्यं कदा कथम्[१८] । स्पृश्यते सर्वविल्लिङ्गं कथं प्रपूज्यते मया ॥३१॥
विधिना केन लिङ्गानि स्नाप्यानि पूज्यते कथम् । अञ्जसा सर्वमेवैतत्[१९] वदाऽऽर्य ! शुभदेशक ॥३२॥

विरूपाक्षले भने – हे मुनि ! म पापाचारी छु, विरूपाक्ष नाम भएको धर्मशर्माको म पुत्र हुँ, धर्मकर्मबाट म पतित भएको छु। हे मुनि ! म वैदिक कुलमा जन्मिएर पनि दैवको खटनले गर्दा ठूलो पाप गर्ने भ्रष्यचारी भएको छु। मेरा सबै अङ्ग अतिशय पापले लिप्त भएका छन्, घाउ नै घाउ छ, कुष्ठरोग लागेको छ, आत्तिएको छु। देशहरू घुम्दै भाग्यले म यहाँ आइपुगेँ। हे तात ! कसरी यो व्यक्ति खपिनसक्नु यो पापबाट मुक्त हुन्छ ? कसरी मेरो यो शरीर पापरहित बन्छ ? त्यो कुरा मलाई बताउनुहोस्। हे विभु ! म पापको आगामा पिल्सिएको छु र दुःखरूपी समुद्रमा डुबेको छु, उपदेशको कृपारूपी डोरीले बाँधेर मलाई उद्धार गर्नुहोस्॥२३-२७॥

सिद्धऋषिले भन्नुभयो – हे बाबु ! तिमीले साँचो कुरा बतायौ, तिमी पापी नै हौ, पापाचारी हौ, पूर्वजन्मको कर्मले गर्दा तिमी पापी भयौ, यसमा शङ्का छैन। हे ब्राह्मण ! ती पाप नाश गर्नका लागि तीर्थभ्रमण गर। तीर्थको जल स्पर्श गर्नाले सबै पापहरू नाश हुन्छन्। कुनै पनि मानिस शिवलिङ्गहरूको दर्शन गर्नाले अनेकथरी पापहरूबाट मुक्त हुन्छ। तिमील शिवलिङ्गको स्पर्श गर, त्यसबाट तिमी पूर्वजन्मका सबै पापहरूबाट मुक्त हुनेछौ॥२८-३०॥

विरूपाक्षले भने – हे शुभचिन्तक मुनि ! कुन तीर्थमा विधिपूर्वक पहिले कसरी स्नान गर्नुपर्छ ? हे सर्वज्ञ ! लिङ्गहरूको कसरी स्पर्श गर्नुपर्छ ? कसरी लिङ्गको मैले पूजा गर्ने ? कुन विधिले लिङ्गहरूलाई स्नान गराउने र पूजा गर्ने ? हे शुभ उपदेशक ! यो सब विधि मलाई यथार्थ बताउनुहोस्॥३१-३२॥

---

१२. श्रोत्रियकुले प्रसूतोऽपि इति न.सं.पु.पाठः ।
१३. महत्पापाचरो मुने इति न.सं.पु.पाठः ।
१४. क्षितिम् इति न.सं.पु.पाठः ।
१५. कस्माच्च मुच्चये पापैरहं तात इति न.सं.पु.पाठः ।
१६. तीर्थजलस्पृशाद् द्विज इति न.सं.पु.पाठः ।
१७. तेषाञ्च स्पर्शनात् पापै लिप्यते न पुराकृतैः इति न.सं.पु.पाठः ।
१८. स्नायते विधिवत् कथम् इति न.सं.पु.पाठः ।
१९. एतत्सर्वमञ्जसा मह्यम् इति न.सं.पु.पाठः ।

नेमुनिरुवाच

स्नायात् तीर्थजले[२०] चाऽऽदौ विभूत्या लेपयेत्तनुम्। कृत्वा सन्ध्याञ्च रुद्राक्षी भक्त्या लिङ्गं प्रपूजयेत्[२१] ॥३३॥

सायं दत्त्वा प्रदीपांश्च कृत्वा जागरणं पुनः[२२]। श्रोतव्या खलु मन्तव्या तत्कथा भावतस्त्वया ॥३४॥

अत्रैव च मम क्षेत्रे बहुतीर्थानि[२३] सन्ति च। सहस्राणि तथांशैश्च तिस्रःकोट्योऽर्धकोटिभिः ॥३५॥

चतुःषष्टिश्च लिङ्गानि क्षेत्रेऽस्मिन् सन्ति मे सदा। देवदानवगन्धर्वैरर्चितानि वराप्तये ॥३६॥

नेपाले पुण्यभूमौ च मम नाम्नाभिधानके। देव्याः प्रसादतो वत्स ! ज्ञेयात् पुण्यतरं स्थलम् ॥३७॥

एतस्यां स्नायतां वत्स ! कौशिक्यां प्राक् च भक्तितः। समर्चयादिलिङ्गं त्वं ततोऽन्यत्र प्रगच्छ वै ॥३८॥

यत्र यत्र स्थितं तीर्थं तत्र तत्राप्लवं कुरु। तत्र तत्र स्थितं लिङ्गं भक्त्या प्रपूजयानिशम् ॥३९॥

तत्रोषित्वा निशामेकां भक्तिभावैर्हरात्मना। भविष्यसि सुनिष्पापो लब्धकामो नरोत्तमः ॥४०॥

स्कन्द उवाच

इत्याकर्ण्य वचस्तस्य विरूपाक्षो हि नेमुनेः। स्नातुं प्रचक्रमेऽगस्त्य वाक्येन विधिवद्यथा ॥४१॥

माघकृष्णचतुर्दश्यां मघर्क्षेण च संयुजि[२४]। भक्त्या सस्नौ स तत्तीर्थे दुर्गाख्ये स्वस्पृहाप्रदे ॥४२॥

उपदेशं समादाय पञ्चोपचारकैर्मुनिः। आनर्च स च तन्मन्त्रैरादिलिङ्गं सुभक्तितः ॥४३॥

दत्त्वा दीपं निशायां स रुद्रजापी विनिद्रकः। अपृच्छन्नेमुनिं भक्त्या माहात्म्यं तीर्थलिङ्गयोः ॥४४॥

नेमुनिले भन्नुभयो - सर्वप्रथम स्नान गरेर शरीरमा भस्मलेपन गरी रुद्राक्ष धारण गरेर सन्ध्यावन्दन गरी भक्तिपूर्वक लिङ्गमा पूजा गर्नुपर्दछ। साँझमा बत्ती बालेर जागरण गरी तिमीले भक्तिभावनापूर्वक लिङ्गहरूको कथा सुन्ने र मनन गर्ने काम गर्नुपर्छ। यहीं मेरा क्षेत्रमा साढे तीन करोड पन्ध्रसय तीर्थहरू छन्। यस क्षेत्रमा देवता, दानव र गन्धर्वले वर प्राप्तिका लागि पूजा गरिएका चौसट्ठी लिङ्गहरू छन् ॥३३-३६॥

हे बाबु ! मेरो नामले प्रसिद्ध भएको पुण्यभूमि नेपालमा पनि देवीका प्रसादले अनेक पुण्यस्थलहरू पैदा भएका छन् भन्ने कुरा बुझ। हे बाबु ! पहिले तिमी भक्तिपूर्वक यो कौशिकी नदीमा स्नान गर, अनि आदिलिङ्गको भक्तिपूर्वक पूजा गर, त्यसपछि तिमी अन्यत्र जाऊ। जहाँ जहाँ तीर्थ छन्, त्यहाँ त्यहाँ स्नान गर। ती ठाउँमा रहेका लिङ्गहरूको सधैं भक्तिपूर्वक पूजा गर। ती तीर्थहरूमा भक्तिभावका साथ आफ्नो आत्मामा भगवान् शिवलाई धारण गरेर बस, तिमी निष्पाप अनि मनोरथ पूर्ण भएका भक्त बन्नेछौ ॥३७-४०॥

कार्तिक स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! ती विरूपाक्ष नेमुनिको यस्तो कुरा सुनेर विधिपूर्वक नेमुनिको निर्देशनअनुसार ती तीर्थमा गएर स्नान गर्न थाले। उनले माघ कृष्ण चतुर्दशीको मघा नक्षत्रले युक्त भएको दिन आफ्नो इच्छा पूर्ण गरिदिने दुर्गातीर्थ नाम गरेको तीर्थमा स्नान गरे। नेमुनिको उपदेश अनुसार पञ्चोपचार विधिले उनले शिवमन्त्र उच्चारण गर्दै भक्तिपूर्वक आदिलिङ्गलाई पूजा गरे। रातिमा बत्ती बालेर रुद्रको मन्त्र जप्दै जागरण गरे, अनि उनले तीर्थ र लिङ्गको माहात्म्य नेमुनिसित सोधे ॥४१-४४॥

---

२०. तीर्थे च स्नायते इति न.सं.पु.पाठः।

२१. प्रपूजय इति न.सं.पु.पाठः।

२२. प्रदीपानि कृतजागरणेन च इति न.सं.पु.पाठः।

२३. समम् इति न.सं.पु.पाठः।

२४. संयुते इति न.सं.पु.पाठः।

विरूपाक्ष उवाच

कर्तव्यं धीमतां कर्म दानधर्मोपवासकम् । तेनैव सफलं कर्म श्रुतिभिरिति चोदितम्[२५] ॥४५॥
श्रोतव्यञ्च सतां वाक्यं सम्यगुक्तं हि धीमता । कर्तव्यं निश्चितं[२६] तस्माच्छ्रोत्रा तद्धर्मकर्मणोः ॥४६॥
पूर्वञ्च श्रोतुकामोऽहं तत्तत्तीर्थप्रशंसनम् । तत्तल्लिङ्गस्य माहात्म्यं तत्त्वञ्चैव मुनीश्वर ॥४७॥
सुनद्यां केन पूर्वञ्च सुस्नातं विधिवन्मुने । किं फलं तेन संलब्धं स्नातकेन वदाशु मे ॥४८॥

सिद्धर्षिरुवाच

स्नातव्यमेकचित्तेन द्वन्द्वभावं विसृज्य च[२७] । गङ्गाभावेन तीर्थेऽस्मिन्सफलं तस्य कर्म च ॥४९॥
आजन्म स्वकृतैः पापैः समहापातकादिभिः । मुच्यते तत्क्षणादेव चैतत्तीर्थजलाप्लवात् ॥५०॥
पूर्वजन्मकृतैः पापैर्मुच्यते तत्क्षणात्तथा । लिङ्गप्रदर्शनात्सर्वो भुक्तिं मुक्तिं लभेत वै[२८] ॥५१॥
देव्याः स्वेदोद्भवायाश्च लीलावत्याश्च सङ्गमे । स्नानतः सर्ववाञ्छादं दुर्गातीर्थमुदाहृतम् ॥५२॥
यं यञ्च काङ्क्षितं कामं स्नात्वा तत्राऽऽशु भक्तितः । लब्धं लोकैः सुखं तत्तद्[२९] देव्याः प्रसादतो द्विज ॥५३॥
देवैः स्नातं पुरा तस्मिन् युद्धे जयाप्तये भृशम्[३०] । दैत्यैः सदार्चितं लिङ्गं निजे जयमहोत्सवे[३१] ॥५४॥
दानवैश्च तथा भूयः स्वात्मनो विजयोत्सवे[३२] । दुर्गातीर्थे मुदा स्नात्वा चाऽऽदिलिङ्गं प्रपूजितम् ॥५५॥
लब्धवराश्च ते तस्माद्युयुधुश्च परस्परम् । देव्याः खड्गप्रपूताङ्गैर्लब्धं दैत्यैः परं पदम् ॥५६॥
देवा निष्कण्टकं राज्यञ्चक्रुः स्वर्गे चिरं मुदा । देव्या हतेषु दैत्येषु शक्रमुखा भृशं द्विज ॥५७॥

विरूपाक्षले भने – बुद्धिमान्ले दान, धर्म, उपवास आदि कर्म गर्नुपर्छ, त्यसैबाट कर्म सफल हुन्छ भनेर श्रुतिहरूले भनेका छन् । विद्वान्हरूले र सज्जनहरूले भनेको कुरालाई सुन्नुपर्छ र त्यसपछि तदनुसार धर्म, कर्म गर्नुपर्छ । हे मुनीश्वर ! पहिले म ती–ती तीर्थको माहात्म्य सुन्न चाहन्छु, त्यसपछि यो लिङ्गको माहात्म्य र तत्त्व सुन्दछु । यस उत्तम तीर्थमा कसले विधिपूर्वक स्नान गऱ्यो र त्यसले के फल पायो ? मलाई बताउनुहोस् ।४५–४८॥

सिद्धऋषिले भने – यस तीर्थमा गङ्गाको भाव गरेर द्वन्द्वलाई छोडी एकचित्त भएर स्नान गर्नुपर्छ । त्यसका सबै कर्म सफल हुन्छन् । यस तीर्थमा स्नान गर्नाले जन्मभर आफूले गरेका महापातकहरू र सामान्य पापबाट तुरुन्तै मानिस मुक्त हुन्छ । लिङ्गको स्पर्श गर्नाले सबै प्राणीहरू पूर्वजन्ममा गरेका पापहरूबाट तुरुन्त मुक्त हुन्छन्, भुक्ति, मुक्ति र मनोकामनालाई प्राप्त गर्न सक्दछन् । देवीको पसिनाबाट पैदा भएको कौशिकी नदी र लीलावतीको सङ्गममा स्नान गर्नाले मात्र पनि सकल मोरथ पूरा गर्ने दुर्गातीर्थ रहेको छ ॥४९–५२॥

हे ब्राह्मण ! जुन जुन कामना गरेर मानिसले त्यहाँ भक्तिपूर्वक स्नान गरे, तिनीहरूले देवीको अनुग्रहद्वारा त्यो त्यो कामना पूर्ण गरेका छन् । त्यो तीर्थमा पहिले देवताहरूले दैत्यहरूसित ठूलो युद्ध गर्ने वर प्राप्तिका लागि स्नान गरे र आफ्नो विजयको आकाङ्क्षा राखेर लिङ्गको पूजा गरे । फेरि दानवहरूले पनि आफ्नो विजय प्राप्तिका लागि दुर्गातीर्थमा स्नान गरेर आदिलिङ्गको अर्चना गरे । वर पाएका देवता र दानवहरूले परस्पर युद्ध गरे । देवीका खड्गको प्रहारले पवित्र अङ्ग भएका दैत्यहरू परमपदमा पुगे । हे ब्राह्मण ! देवीले दैत्यहरूमाथि प्रहार गरेपछि इन्द्र आदि गरिएका देवताहरूले स्वर्गमा धेरै समयसम्म आनन्दसित निष्कण्टक राज्य गरे ॥५३–५७॥

---

२५. कीर्तितम् इति न.सं.पु.पाठः ।
२६. कर्तव्यं निश्चितम् इति न.सं.पु.पाठः ।
२७. विसर्जयन् इति न.सं.पु.पाठः ।
२८. भुक्तिमुक्तिस्पृहां लभेत् इति न.सं.पु.पाठः ।
२९. तन्तम् इति न.सं.पु.पाठः ।
३०. योद्धुं वराप्तये भृशम् इति न.सं.पु.पाठः ।
३१. स्वकीयजयमुत्सवैः इति न.सं.पु.पाठः ।
३२. जयमुत्सवैः इति न.सं.पु.पाठः ।

सिद्धर्षयोऽमराश्चैव पिशाचोरगराक्षसाः। स्नात्वा ह्यपूजयन् लिङ्गं भक्तिपूर्वं सनातनम् ॥५८॥
अवापुस्ते सुसिद्धिं वै स्नात्वा च[३३] कौशिकीजले। आदिलिङ्गं प्रपूज्याऽऽशु सम्पूर्णसिद्धमानसाः ॥५९॥
शैलान् स्रष्टुं रहो ब्रह्मा दध्यौ पुरात्र शङ्करम्। ततः समुद्भवं लिङ्गमादिलिङ्गमुदाहृतम् ॥६०॥
कश्चित् विप्रो विमुक्तः प्रागत्रैव हि शृणु द्विज। अन्तर्वेद्यां समुद्भूतो भ्रष्टो नाम द्विजाधमः ॥६१॥
पञ्चभिः पातकैर्ग्रस्तः पूर्वजन्मविपाकतः। स्त्रीनरद्विजगोबालहिंसाभिरभवज्जुकः ॥६२॥
अत्रैव च महत्तीर्थं दुर्गाख्यं सुफलप्रदम्। दैवादपि समागत्य चाऽपश्यद् भक्तिवर्जितः ॥६३॥
चौरवृत्तिं समासाद्य चाऽस्पृशल्लिङ्गमुत्तमम्। तल्लिङ्गाक्तविभूतिञ्चाऽलेपयत् स[३४] ललाटके ॥६४॥
एतत्तीर्थजलं पूर्वं तन्नैवेद्यमशन् पपौ। ततो भ्रष्टस्तटे तस्थौ तन्निशायां हिमार्दितः ॥६५॥
फाल्गुनस्यासिते पक्षे चाऽमावास्यामहानिशि। पञ्चत्वं प्राप्तवान् भ्रष्टस्तत्पूर्वमस्पृशच्छिवम् ॥६६॥
ततश्च शिवदूतास्त[३५] यानेन लोकमैश्वरम्। निन्युस्ततो द्विजो भ्रष्टो रुद्रस्यानुचरोऽभवत् ॥६७॥
तस्मादपि च धीमद्भिश्चतुर्दश्यां महातिथौ। स्नानञ्च प्रथमं कार्यमर्चनीयः ततः शिवः[३६] ॥६८॥
सर्वपर्वसु यत्नेन स्नातव्यं विधिवद् बुधैः। हव्यकव्यार्चनन्तत्र चाऽन्यत्कोटिगुणं फलम् ॥६९॥
कुष्ठी स्नात्वाऽऽदिलिङ्गं यो भक्त्या प्रेक्ष्य प्रपूजति। कुष्ठजन्म परित्यज्य रुद्रलोके वसेत्सुखम् ॥७०॥
एतद्धि तुभ्यं कथितं महत्त्वमाद्याख्यलिङ्गस्य तथा च नद्योः।
तीर्थं हि योगे सुफलप्रदं वै भीमेश्वरो यत्र विरूप गच्छ ॥७१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे विरूपाक्षतीर्थयात्रायां दुर्गातीर्थादिलिङ्गयोर्माहात्म्यं नाम नवतितमोऽध्यायः ॥९०॥

सिद्धऋषिहरू, देवताहरू, पिशाचहरू, सर्पहरू तथा राक्षसहरूले स्नान गरेर सनातन रूपमा रहेको यस लिङ्गको भक्तिपूर्वक पूजा गरे। कौशिकी नदीको जलमा स्नान गर्ने सिद्धहरूले आदिलिङ्गको पूजा गरेर तुरुन्त सिद्धि प्राप्त गरे। अघि ब्रह्माले पहाडहरूको सृजना गर्नका लागि एकान्तमा भगवान् शङ्करको ध्यान गर्नुभएको थियो। त्यसैबाट पैदा भएको हुँदा यस लिङ्गलाई आदिलिङ्ग भनिएको हो। हे ब्राह्मण ! अन्तर्वेदी भन्ने ठाउँमा जन्मिएको अधम, भ्रष्ट नाम गरेको कुनै ब्राह्मण यसै ठाउँमा मुक्त भएको थियो, सुन ॥५८–६१॥

पूर्वजन्ममा स्त्रीहत्या, नरहत्या, द्विजहत्या, गोहत्या र बालहत्या जस्ता अपराध गरेका कारण पाँचवटा पापले ग्रस्त भयो। त्यसै ठाउँमा दुर्गा नाम गरेको पुण्यदायी तीर्थ छ। दैवसंयोगले त्यहाँ आएर त्यसले भक्ति नै नभईकन पनि त्यस तीर्थको दर्शन गऱ्यो। चोर्ने नियतले त्यसले त्यो उत्तम लिङ्गलाई स्पर्श गऱ्यो। त्यस लिङ्गमा लागेको विभूति निधारमा टाँसियो। त्यहाँको नैवेद्य खाएर उसले यो तीर्थको जल पियो। त्यसपछि त्यो भ्रष्ट हिउँले पीडित भएर रातभरि त्यसै नदीको तटमा बस्यो। फागुन महिनाको कृष्णपक्ष अमावास्याको राती त्यो भ्रष्ट त्यसै ठाउँमा मऱ्यो। त्यसभन्दा पहिले उसले शिवजीलाई छोएको थिएन ॥६२–६६॥

त्यसपछि शिवजीका दूतहरूले यानद्वारा उसलाई शिवलोक लगे। त्यसै समयदेखि त्यो भ्रष्ट ब्राह्मण शिवजीको अनुचर भयो।त्यसैले बुद्धि भएका मानिसहरूले चतुर्दशीको महातिथिमा यस ठाउँमा पहिले स्नान गर्नुपर्छ र त्यसपछि शिवजीको पूजा गर्नुपर्छ। सबै पर्वमा विद्वान्हरूले यहाँ आएर स्नान गर्नुपर्छ। हव्य, कव्य तथा पूजा गर्नुपर्छ। त्यसो गऱ्यो भने अन्य तीर्थमा भन्दा करोडौं गुणा बढी फल प्राप्त हुन्छ। कुष्ठरोग लागेको कुनै व्यक्तिले आदिलिङ्गको भक्तिपूर्वक दर्शन गरेर पूजा गऱ्यो भने कुष्ठजन्मलाई छोडेर त्यो रुद्रलोकमा सुखपूर्वक बस्न पाउँछ। हे विरूपाक्ष ! तिमीलाई मैले आदिलिङ्ग र दुई नदीको माहात्म्य बताएँ। ती दुई नदीको सङ्गम तीर्थमा सम्पूर्ण फल दिने भीमेश्वर महादेव बस्नुभएको छ, त्यहाँ जाऊ ॥६७–७१॥

परामबा वाग्वादिनी भगवतीको असीम अनुकम्पाबाट पोरकनी पाल्पा निवासी पतिव्रताशिरोमणि स्वर्गीय माताश्री दिव्यलक्ष्मी ढकाल र सज्जनमुकुटमणि स्वर्गीय पिताश्री चूडामणि ढकालका कनिष्ठ पुत्र नेपाल संस्कृत विश्वविद्यालय सेवा आयोगका अध्यक्ष प्रा. डा. वेणीमाधव ढकालद्वारा नरहरिनामक भाषानुवादसहित सम्पादित हिमवत्खण्डको चौसट्ठीलिङ्ग प्रकरणमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा दुर्गातीर्थ र आदिलिङ्गको माहात्म्यनामक नब्बेऔं पूरा भयो।

---

३३. स्नातकाः इति न.सं.पु.पाठः।
३४. विभूत्या च आलेपि तत् इति न.सं.पु.पाठः।
३५. शिवदूतैः सः इति न.सं.पु.पाठः।
३६. कार्यमर्चनीयं ततः शिवम् इति न.सं.पु.पाठः।

एकनवतितमोऽध्यायः

भीमेश्वरतीर्थयात्रा तन्माहात्म्यञ्च

स्कन्द उवाच

दुर्गातीर्थे मुदा स्नात्वा प्रजहौ कुष्ठजं रुजम्। ततः कुष्ठाद्विमुक्तोऽसौ तद्व्रणैश्च घटोद्भव ॥१॥
वन्येन पारणां कृत्वा विरूपाक्षोऽगमत्पुनः। सिद्धर्षिभिः समं यत्र भीमेश्वरो विराजते ॥२॥
तस्माद्धि दिशि कौवेर्यां त्रियोजने घटोद्भव। ताम्रचूडाचलस्याधः नद्योः सुसङ्गमो बभौ ॥३॥
माघकृष्णस्य पूर्णायां देवतीर्थे यथाविधि। सस्नौ स कौशिकीनद्योः[१] सङ्गमे देवसेविते ॥४॥
स्नात्वाऽसौ विधिवल्लिङ्गं भक्त्याऽऽनर्च विरूपदृक्। दीपं दत्वा मुनिं रात्रौ चाऽपृच्छत्तत्प्रशंसनम् ॥५॥

विरूपाक्ष उवाच

मुनीश मुनिशार्दूल तीर्थतत्त्वविशारद। भवतीच्छा मदीया सा कर्तुं प्रश्नं[२] दयाकर ॥६॥
भीमेश्वर इति ख्यातो भवता तत्र मे विभो। तदुद्भवकथां पुण्यां मां श्रावय[३] मुनीश्वर ॥७॥
फलं प्रलभ्यते येन श्रोतव्यं प्राक् च भक्तितः। भीमेश्वरस्य तीर्थस्य माहात्म्यं वद मेऽधुना ॥८॥

नेमुनिरुवाच

शुम्भासुरभयाद् देवाश्चाऽत्रैव हि प्रदुद्रुवुः। कौशिक्योश्च[४] द्वयोर्मध्ये सस्नुः श्रान्ताः पराजिताः ॥९॥
तस्माच्च देवतीर्थञ्च विख्यातं भुवि दुर्लभम्। स्नात्वा शतगुणं पुण्यं प्राप्नुयादन्यतः फलम्[५] ॥१०॥
ततश्चाऽऽवाहयन् रुद्रं देवास्त्रिभुवनेश्वरम्। भक्तिभिश्च स्तवैश्चाऽत्र दानवाद् भयविह्वलाः ॥११॥
तदोद्भूतमिदं लिङ्गं हरवक्त्रं भयङ्करम्। अव्यक्तं सर्वलोकानां देवमध्ये विराजितम् ॥१२॥

अध्याय – ९१

विरूपाक्षको भीमेश्वरतीर्थयात्रा र त्यसको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि त्यो ब्राह्मण दुर्गातीर्थमा स्नान गरेर कुष्ठरोग र त्यसका खटिराबाट मुक्त भयो। सिद्धऋषिहरूका साथ जहाँ भीमेश्वर बस्नुभएको थियो, त्यसै ठाउँमा वनका कन्दमूलहरू पारायण गरेर विरूपाक्ष गए। त्यसै ठाउँको तीन योजन उत्तरपट्टि ताम्रचूड नाम गरेको पहाडको तलतिर दुईवटा नदीको सङ्गम छ। माघ कृष्ण पूर्ण भएको दिन दुईवटा कोशीको सङ्गमस्थल भएको, देवताद्वारा सेवित त्यस देवतीर्थमा ती ब्राह्मणले स्नान गरे। त्यसपछि ती विरूपाक्षले त्यहाँ विधिपूर्वक लिङ्गको सभक्ति पूजा गरे, रातमा बत्ती बाले, त्यस तीर्थको माहात्म्य ऋषिसँग सोधे ॥१-५॥

विरूपाक्षले भन्यो – तीर्थको तत्त्व जान्ने हे मुनिश्रेष्ठ ! दयाका खानी भएका हे मुनीश्वर ! म तपाईंसित प्रश्न गर्न चाहन्छु। भीमेश्वर नामले प्रसिद्ध तीर्थका बारेमा तपाईंले अघि भन्नुभएको थियो। त्यसको उत्पत्ति, त्यसको कथा र त्यो सुन्नाले पहिले जे जस्तो फल प्राप्त भयो, त्यो र भीमेश्वर तीर्थको माहात्म्य मलाई बताउनुहोस् ॥७-८॥

नेमुनिले भन्नुभयो – शुम्भ नाम गरेको दैत्यको डरले देवताहरू स्वर्ग छोडेर यसै दुई कोशीको बीचमा भागेर आएका थिए। त्यस समयदेखि पृथ्वीमा दुर्लभ भएको यो तीर्थ देवतीर्थको नामले प्रसिद्ध भयो। त्यहाँ स्नान गर्नाले अन्यत्रभन्दा सय गुणा बढी पुण्य प्राप्त हुन्छ। त्यसपछि राक्षसको डरले आत्तिएका देवताहरूले तीनै लोकका अधिपति रुद्रभगवान्को भक्तिपूर्वक स्तुति गरेर आवाहन गरे। त्यस अवसरमा सबै प्राणीहरूले नदेख्ने र देवताहरूको बीचमा रहेको शिवजीको मुखको आकार भएको डरलाग्दो लिङ्ग पैदा भयो ॥९-१२॥

---

१. **सस्नौ कौशिकयोर्विप्रः इति न.सं.पु.पाठः।**
२. **भवतीच्छाम्यहं चात्र प्रश्नं त्वयि इति न.सं.पु.पाठः।**
३. **तस्यैव चोद्भवञ्चैव तत्कथञ्च इति न.सं.पु.पाठः।**
४. **कौशिकयोः इति न.सं.पु.पाठः।**
५. **संलभेदन्यतः फलम् इति न.सं.पु.पाठः।**

आविर्भूतस्ततो लिङ्गात् त्रिभुवनेश्वरो द्विज। वरदानाय देवेभ्यो भीमरूपोऽभयप्रदः ॥१३॥
व्याजहार तदा तेभ्यो वचनं हितभाषितम्। भासयँश्च[६] दिशो भाभिर्दन्तानां व्यक्तरोचिषाम् ॥१४॥

भीमेश्वर उवाच

मा कुरुत भयं देवा दैत्येभ्यश्चैव शत्रुतः। प्रतीकारा भविष्यन्ति शृणुध्वं यच्च मद्वचः[७] ॥१५॥
जप्यन्तामत्र मन्त्रास्ते जयकामनया ध्रुवम्[८]। कौशिक्योः सङ्गमे चाऽत्र स्नात्वा दैत्यान् विनाशितुम् ॥१६॥
हनिष्यति ततो देवी दानवान् युद्धदुर्मदान्। एकाकिनी स्थिता शैले चेतोऽधो गिरिशेखरे[९] ॥१७॥
आगमिष्यन्ति चेत्तत्र भवदन्वेषणाय[१०] च। निधनत्वं गमिष्यन्ति मद्दृष्टिपातनात् पुनः ॥१८॥

नेमुनिरुवाच

भाषमाणे परे[११] भीमे देवैः सह मिथो द्विज। देवेभ्यो वरदे तीर्थे रुद्रं समस्तुवन् सुराः[१२] ॥१९॥
कालको नाम दैत्योऽसौ चाऽऽजगामाऽत्र सत्त्वरम्। दशकोटिरथैः सार्द्धं देवानन्वेषयन् भृशम् ॥२०॥
सिंहनादं भृशञ्चक्रुस्ते बाणवृष्टिना सह[१३]। अवमानं प्रकुर्वन्तो भीमेश्वरं सुरेषु ते ॥२१॥
ददृशुर्दानवान् देवाः सिंहनादैः समन्वितान्। समायातास्तदा योद्धुं बाणवृष्टिं प्रवृष्य च।
भूयो भयान्विता देवा जग्मुस्तच्छरणं शिवम् ॥२२॥
पुरा व्याघ्राच्च सिद्धाद्रौ पशुपतिं मृगा इव। तुष्टुवुस्ते ततो देवा वचोभिर्भयगद्‌गदैः ॥२३॥

त्यसपछि त्यस लिङ्गबाट अभय दान दिने, डरलाग्दो रूप भएका, तीनै लोकका स्वामी शङ्कर भगवान् देवताहरूलाई वर दिन प्रकट हुनुभयो। त्यसपछि तेजिला दाँतका प्रकाशले दिशाहरूलाई उज्यालो तुल्याउँदै भगवान् शङ्करले देवताहरूलाई हितकारी वचन भन्नुभयो ॥१३–१४॥

भीमेश्वरले भन्नुभयो – हे देवता हो ! दैत्य शत्रुदेखि डर नमान, त्यसको प्रतीकार हुनेछ, मेरो कुरा तिमीहरू सुन। दैत्यहरूलाई नाश गर्नका निमित्त कौशिकी नदीको सङ्गममा स्नान गरेर विजयको चाहना राखी स्थिर भएर मन्त्र जप। त्यसपछि यसै स्थानभन्दा तल रहेको पहाडको शिखरमा एक्लै बस्नुहुने देवीले युद्धले मातेका राक्षसहरूलाई मार्नुहुनेछ। यदि तपाईंहरूलाई खोज्दै ती दैत्यहरू आए भने मेरो दृष्टिमा परेर ती सबै मर्नेछन् ॥१५–१८॥

नेमुनिले भन्नुभयो – हे ब्राह्मण ! यसरी भीमेश्वर महादेवले देवताहरूसित कुराकानी गरेपछि त्यसै वरदायक देवतीर्थमा उनीहरूले भगवान् शङ्करको स्तुति गरे।त्यसपछि कालक नाम गरेको दैत्य दश करोड रथहरू लिएर देवताहरूलाई खोज्दै तुरुन्त त्यहाँ आइपुग्यो। ती दानवहरूले भीमेश्वर महादेव र देवताहरूको अपमान गरेर बाण वर्षाउँदै ठूलो सिंहनाद गरे। देवताहरूले सिंहनाद गर्दै बाण वर्षा गरेर लड्नका लागि सुरिएर आउन लागेका दानवहरूलाई देखे अनि डरले आत्तिएका देवताहरू भगवान् शिवको शरणमा गए। पहिले सिद्धपर्वतमा बाघदेखि डराएका मृगहरू जसरी पशुपतिको शरणमा गएका थिए, त्यसरी नै भयविह्वल भएका ती देवताहरू शिवजीको शरणमा गए र महादेवको प्रार्थना गर्न थाले ॥१९–२३॥

---

६. भाषयँश्च इति न.सं.पु.पाठः।
७. वः शृणध्वञ्च मद्वचः इति न.सं.पु.पाठः।
८. मन्त्राणि जयकामेन निश्चलम् इति न.सं.पु.पाठः।
९. अस्मादधोऽद्रिशेखरे इति न.सं.पु.पाठः।
१०. भवदन्वेषणेन इति न.सं.पु.पाठः।
११. एवं संभाषणे इति न.सं.पु.पाठः।
१२. पुनः इति न.सं.पु.पाठः।
१३. वाणवृष्टिं प्रवर्षयन् इति न.सं.पु.पाठः।

रक्ष रक्ष महादेव ! सङ्कटस्थान् स्वकिङ्करान्। अत्रोत्पन्नं भयं नश्च शत्रुतो दैत्यकिल्बिषात् ॥२४॥
नस्त्राहि रुद्र चैतस्मात्[१४] शत्रुसागरविप्लवात्। नमो रुद्राय देवाय देवानां पतये नमः ॥२५॥
शत्रुपापविनाशाय भक्तवत्सल ! ते नमः। इत्येतद्वचनं तेषां समाकर्ण्य महेश्वरः ॥२६॥
ददर्श दैत्यसैन्यञ्च हर्षोत्फुल्लविलोचनः। सम्प्रेक्ष्य दानवान् रुद्रः क्रोधेनैव मुमूर्च्छ च ॥२७॥
नादयन् स्यन्दनस्थान्[१५] तान् विबुधसैन्यविद्रवान्। रूपं दधार भीमं स सर्वलोकभयावहम् ॥२८॥
ततो देवासुरास्त्रस्ताः सम्प्रेक्ष्य भीमरूपिणम्। ततो ददर्श भीमोऽयं तृतीयेक्षणवह्निना ॥२९॥
दैत्यान् सन्दहतोन्मील्य वेगतो[१६] महदर्चिषा। दैत्यान् ददाह तद्वह्निर्हरनेत्रोद्भवोऽद्भुतः ॥३०॥
क्रोधोन्मीलेक्षणोद्भूतः प्रजज्वाल महच्छिखः। ज्येष्ठे मासे वने भूमौ दावो गुल्मं भृशं यथा ॥३१॥
चकार भस्मसाद्वह्निः सन्दह्य दानवान् द्विज। निहतेषु ततो देवा दैत्यसैन्येषु सर्वशः ॥३२॥
भीमेश्वरप्रसादात्ते जहुश्च तद्भयं तदा। कृत्वा च दण्डवद्देहान् हर्षप्रफुल्लमानसाः ॥३३॥
भीमेश्वरं प्रणेमुस्ते दूरतः सर्वतो दिशः। तं प्रेक्ष्य देवता भीमं प्रज्वलन्तं[१७] स्वतेजसा ॥३४॥
चेतोभिरन्तरे त्रस्ता रुषा भृशं भयावहम्। तुष्टुवुर्देवता भीमं वचोभिस्त्रिविधैस्ततः ॥३५॥
शनैःशनैरूपागत्य दिग्भ्यो भक्त्या समन्ततः। ॐ नमो भीमरूपाय भीमेश्वराय वै नमः ॥३६॥
दैत्येन्धनदाहकाय[१८] नेत्रोज्ज्वलाङ्गिने नमः। ॐ नमो रौद्ररूपाय रौद्रदेहाय ते नमः ॥३७॥
भयङ्कराय शत्रूणां रौद्रतेजोऽङ्गिने नमः। रक्ष रक्ष महादेव ! सदास्मान् शत्रुतो विभो ॥३८॥

हे महादेव ! सङ्कटमा परेका हामी सेवकहरूलाई रक्षा गर्नुहोस्, रक्षा गर्नुहोस्। पापी दैत्यशत्रुहरूबाट हामीलाई ठूलो डर उत्पन्न भएको छ। हे रुद्र ! शत्रुरूपी समुद्रको विपत्तिमा डुबेका हामीलाई यिनीहरूबाट रक्षा गर्नुहोस्। रुद्रदेवलाई नमस्कार छ। देवताका स्वामीलाई नमस्कार छ। हे भक्तवत्सल ! शत्रुरूपी पापलाई नाश गर्ने हजुरलाई नमस्कार छ ॥२४–२६॥

महादेवले देवताहरूको यो वचन सुनेर हर्षले ठूला-ठूला आँखा पार्दै दैत्यका सेनाहरूलाई हेर्नुभयो। दानवहरूलाई देखेर भगवान् रुद्र अत्यन्त क्रुद्ध हुनुभयो। त्यसपछि रुद्रले दानवलाई देखेर रथमा रहेका देवताका सैन्यलाई भगाउने ती दानवहरूका प्रति शब्द गर्नुभयो, रीसले क्रुद्ध भएर भगवान् रुद्रले डरलाग्दो रूप धारण गर्नुभयो। त्यो रूप देखेर देवता र दैत्यहरू डराए। त्यसपछि भीमेश्वरले ठूलो ज्वाला भएको तेस्रो आँखाको अग्निले दैत्यलाई हेर्नुभयो। शिवजीको आँखाबाट उत्पन्न भएको त्यो आश्चर्यजनक ठूलो अग्निले आफ्नो ज्वाला फैलाएर दैत्यहरूलाई डढायो। जसरी जेठ महिनामा वनमा लागेको डढेलोले रुख, लहरा आदिलाई डढाउँछ, त्यसरी नै शिवजीको क्रोधले गर्दा आँखाबाट पैदा भएको महाज्वालाले दानवहरूलाई डढायो ॥२७–३१॥

हे द्विज ! त्यसपछि सम्पूर्ण दानवहरूलाई अग्निले खरानी तुल्यायो, सबै दानवहरूका सेना मरेपछि देवताहरू भीमेश्वरको अनुग्रहबाट सर्वात्मना डरबाट मुक्त भए। उनीहरूले हर्षले विभोर भएर आफ्नो शरीरलाई दण्डआकार तुल्याएर टाढैबाट भीमेश्वरलाई चारै दिशातिर फर्किएर नमस्कार गरे। रीसले अत्यन्त डरलाग्दा भएका र आफ्नो तेजले बलिरहेका भीमेश्वर महादेवलाई देखेर भित्रभित्रै डराएका देवताहरूले बिस्तारै त्यहाँ आएर तीनै किसिमका भक्तियुक्त वचनको प्रयोग गर्दै सबै दिशाबाट स्तुति गरे ॥३२–३५½॥

भीमरूपलाई नमस्कार छ, भीमेश्वरलाई नमस्कार छ, दैत्यरूपी दाउरालाई डढाउने आँखाबाट निस्किएको अग्निले गर्दा उज्यालो अङ्ग भएका ईश्वरलाई नमस्कार छ। रौद्ररूपलाई नमस्कार छ, डरलाग्दो शरीर लिने हजुरलाई नमस्कार छ। शत्रुलाई भय पैदा गर्ने रौद्र तेजयुक्त शरीर भएका ईश्वरलाई नमस्कार छ। हे महादेव ! हे विभु ! शुम्भ आदि समुद्रको तरङ्गजस्तै डरलाग्दो भएका राक्षस शत्रुहरूदेखि हामीलाई रक्षा गर्नुहोस् ॥३६–३८½॥

---

१४. त्राहि रुद्र ! न एतेभ्यः इति न.सं.पु.पाठः।
१५. नादयं स्तान् रथस्थान् इति न.सं.पु.पाठः।
१६. प्रज्वलमानेन प्रोन्मील्य इति न.सं.पु.पाठः।
१७. ज्वलमानम् इति न.सं.पु.पाठः।
१८. दैत्येन्धनप्रदग्धाय इति न.सं.पु.पाठः।

शुम्भमुखाऽसुराम्भोधिमहाकल्लोलभीषणात्[१९] ।

भीमेश्वर उवाच

मा मा सुरा बिभीयन्तामत्र शुम्भासुराद् ध्रुवम् ॥३९॥
यूयं भीमं यतः प्राप्तास्त्यज्यन्तां तद्भयानि च। अद्य विलयमेष्यन्ति दानवा बलदर्पिताः ॥४०॥
देव्याः खड्गाग्निना दग्धा गमिष्यन्ति रसातले[२०] । प्राप्तव्यं तेन चावश्यं तपःफलं पुराकृतम् ॥४१॥
फलात्तत्तपसस्तस्य चाद्यैव वित्थ भो सुराः। देव्या हतेऽधुना शुम्भे ससैन्ये युधि चात्र वै ॥४२॥
रसातले गते यूयं भुञ्जीध्वं त्रिदिवं सुखम्।

नेमुनिरुवाच

इत्युक्त्वान्तर्दधे लिङ्गे भीमेश्वरस्तदा द्विज ॥४३॥
दर्शयन् स्वं सुराँस्तत्र चाविर्भूतो यतः पुरा। देवाश्च प्रययुः स्वर्गञ्चक्रू राज्यं सुखं मुदा ॥४४॥
देव्या हतेऽसुरे शुम्भे ससैन्ये च रसाङ्गते। एवं बहुविधा लोका विमुक्ताश्चात्र सङ्कटात् ॥४५॥
एतल्लिङ्गं पुरा ज्ञात्वा भक्त्यार्चनैः स्तवैस्तथा। शृणु विप्र ! माहात्म्यञ्च देवतीर्थस्य साम्प्रतम् ॥४६॥
मुक्तः कश्चिन्नरः पूर्वं तद् वृत्तान्तं हि चात्र भोः। आसीत् कश्चिद् द्विजः श्राद्धं शान्ते पितरि भक्तितः ॥४७॥
कृत्वा च बहुवारं स भोजनं कृतवान् पुनः। बहुधाशनदोषेण कौलयोनावजायत[२१] ॥४८॥
शूकरोऽभूदसौ विप्रः शैलकन्दरवासकृत्[२२] ।

भीमेश्वरले भन्नुभयो – हे देवता हो ! शुम्भ राक्षसदेखि नडराओ, किनभने तिमीहरूले भीमेश्वरलाई प्राप्त गरेका छौ। त्यसैले त्यो सबै डर तिमीहरू छोड। आज नै बलले मातेका दैत्यहरू देवीको तरवारको आगाले डढेर रसातलमा जानेछन्, यसमा शङ्का छैन। पहिले उसले गरेको तपस्याको फल पाउनु थियो, पायो। त्यस तपस्याको फल आज नै समाप्त भयो भन्ने कुरा हे देवता हो ! तिमीहरू बुझ। अब देवीले सेनाले सहित भएको शुम्भ दैत्यलाई पृथ्वीमा भएको युद्धमा मार्नुभयो। अब तिमीहरू स्वर्गमा गएर सुखभोग गर ॥३९–४२॥

नेमुनिले भन्नुभयो – हे ब्राह्मण ! यति भनेर भीमेश्वर महादेवले आफ्नो स्वरूप देवताहरूलाई देखाउँदै जहाँबाट पैदा हुनुभएको थियो, त्यसै लिङ्गमा अन्तर्धान हुनुभयो। देवीले सेनासहित भएको शुम्भ दैत्यलाई मारेर पृथ्वीतिर लागेपछि देवताहरू स्वर्ग गए र सुखपूर्वक राज्य गर्न थाले। अघि यसरी धेरैथरी प्राणीहरू यस लिङ्गको महत्त्व बुझी भक्तिपूर्वक पूजा र स्तुति गरेर सङ्कटबाट मुक्त भएका थिए। हे ब्राह्मण ! अब देवतीर्थको माहात्म्य सुन– कुनै मानिस यहाँ अघि मुक्त भएको थियो, त्यो वृत्तान्त पनि सुन। कुनै बाहुनले बाबु मरेपछि यहाँ आएर धेरैपटक श्राद्ध गरी बारम्बार भोजन गऱ्यो। धेरै खाएको दोषले गर्दा यो बाहुन वनेलको योनिमा पैदा भएर सुँगुर भयो र पहाडका गुफामा बस्न थाल्यो ॥४३–४८½॥

---

१९. शुम्भमुखासुरेणाब्धिमहत्कल्लोलभीषणात् इति न.सं.पु.पाठः।
२०. दग्धाङ्गा रसारले न संशयः इति न.सं.पु.पाठः।
२१. कोलयोनिसमुद्भवः इति न.सं.पु.पाठः।
२२. शैलगुहाप्रसेवितः इति न.सं.पु.पाठः।

भ्रमन्नित्यं पिपासार्तः क्षुधापीडितविग्रहः ॥४९॥
दैवयोगेन कोलोऽसौ दर्भशैलं समागमत्। म्लेच्छो ददर्श कश्चित्तं दर्भवदद्रिशेखरे ॥५०॥
वृक्षमूलमुत्खनन्तं भक्षयन्तं फलानि च। सशरञ्च धनुर्धृत्वा चाभिदुद्राव शूकरम् ॥५१॥
निचखान शरं म्लेच्छः कोलपृष्ठे भृशं द्विज ॥५२॥
लक्ष्यीकृत्याऽऽशु तं म्लेच्छस्तन्मांसाशनलालसः। कोलोऽपि तमभिप्रेक्ष्य दुद्राव गिरिशेखरात्।
अभिदुद्राव तं लुब्धः कोलो यत्र गतो[२३] द्रुतम् ॥५३॥
भूयो हन्तुमियेषाऽसौ तद्व्रणेनाप्यलोडितम्। जलं पातुं पिपासार्त्तः शूकरोऽसौ व्रणाङ्कितः ॥५४॥
जलमुद्दिश्य दुद्राव शरपीडां च तां[२४] सहन्। देवतीर्थन्ततः प्राप्य चापिबत्तज्जलं सुखम् ॥५५॥
शूकरोऽपि च तत्तीर्थे व्रणश्रमेण पीडितः। पञ्चत्वं प्राप्तवान् कोलो देवतीर्थजलं पिबन् ॥५६॥
तत्तटे प्रवसन्भीतः शरक्षतप्रपीडितः। तत्तीर्थजलपानेन तत्तटे निधनात्पुनः ॥५७॥
श्रोत्रियस्य कुले जातो द्विजोऽसौ वेदपारगः। विरक्तोऽभूद् द्विजोऽसौ च दैवयोगात्पुनर्द्विज ॥५८॥
अत्रागमत्स चैकाकी भ्रान्त्वा[२५] तीर्थानि भूरिशः। विप्रोऽसौ निर्जनः सस्नौ निधनादत्र पुण्यतः ॥५९॥
कोलजन्मा पुरा भूयो देवतीर्थजलं स्पृशन्[२६]। माघकृष्णचतुर्दश्यां शिवभक्तो द्विजोत्तमः ॥६०॥
एतत्तीर्थे मुदा स्नात्वा लिङ्गान्तिकं तदागमत्। श्रद्धधानोऽत्र स स्नात्वा[२७] चैतल्लिङ्गमपूजयत् ॥६१॥
भक्त्या स्तवैश्च मन्त्रैश्च रुद्रशर्मा मुदाऽन्वितः। ददौ वरं शिवस्तस्मै दिव्यरूपं त्रिलोचनम् ॥६२॥
त्रिशूलं डमरुं श्रेष्ठं गणत्वञ्च वरस्रजम्[२८]।

घुम्दाघुम्दै तिर्खा र भोकले पीडित भएको त्यो सुँगुर दैवसंयोगले गर्दा कुशैकुश भएको पहाडमा पुग्यो। त्यो कुश भएको पहाडको शिखरमा रुखको जरै उखेलेर फल खान थालेको सुँगुरलाई कुनै म्लेच्छले देख्यो। त्यसपछि त्यो सुँगुरको मासु खान लोभिएको म्लेच्छ बाणसहित भएको धनुषलाई धारण गरी सुँगुरतिर दौडियो र त्यस म्लेच्छले सुँगुरको पिठ्यूँमा कसेर बाण हान्यो। त्यो देखेर सुँगुर पनि पहाडको शिखरबाट दौडियो। त्यो व्याधा जता–जता सुँगुर गयो, त्यतै–त्यतै खूबसित दौडियो। रक्ताम्य भएको त्यस सुँगुरलाई मार्ने इच्छा गर्‍यो ॥४९–५३½॥

तिर्खा र घाउले आत्तिएको त्यो सुँगुर पानी पिउनका लागि बाणबाट भएको पीडालाई सहँदै पानी भएतिर दौडियो। घाउ र परिश्रमले पीडित भएको त्यो सुँगुरले देवतीर्थमा पुगेर त्यहाँको पानी आनन्दसित पियो। बाणबाट लागेको घाउले पीडित भएको र डराएको त्यो सुँगुर देवतीर्थको पानी पिएर त्यसको तीरमा बस्दा–बस्दै मर्‍यो। त्यो तीर्थको पानी पिएर त्यसै तीरको तटमा मरेको हुँदा त्यो सुँगुर वैदिक ब्राह्मणको कुलमा जन्मियो र वेदमा पारङ्गत भयो ॥५४–५७½॥

हे ब्राह्मण ! त्यसपछि त्यो बाहुन विरक्त भयो, दैवसंयोगले अनेकौं तीर्थ घुम्दै एक्लै त्यो यसै ठाउँमा आइपुग्यो। त्यस बाहुनले एक्लै त्यस ठाउँमा आएर स्नान गर्‍यो। पहिले बँदेलजन्ममा प्राप्त भएको त्यो ब्राह्मण माघ महिनाको कृष्णपक्षको चतुर्दशीका दिन देवतीर्थको जल स्पर्श गरेको हुँदा शिवभक्त भयो। त्यस तीर्थमा आनन्दसित स्नान गरेर त्यो लिङ्गको नजिकै गयो र भक्तिपूर्वक स्तुति र मन्त्रको उच्चारण गर्दै रुद्रशर्माले त्यस लिङ्गलाई प्रसन्न भएर पूजा गर्‍यो। त्यसलाई शिवजीले दिव्य स्वरूप, तीन वटा आँखा, त्रिशूल, डमरु, उत्तम माला र गणेश्वरको पदवी दिनुभयो ॥५८–६२½॥

---

२३. कोलं यत्र गतम् इति न.सं.पु.पाठः।
२४. तथा इति न.सं.पु.पाठः।
२५. भ्राम्य इति न.सं.पु.पाठः।
२६. देवतीर्थजलस्पृशात् इति न.सं.पु.पाठः।
२७. स्नायी इति न.सं.पु.पाठः।
२८. वरस्रजं गणेश्वरम् इति न.सं.पु.पाठः।

ततश्च शिवदूतास्ते[२९] व्योम्नः शिवानुशासनात् ॥६३॥
सर्वोपकरणं शैवं यानमत्र समानयन्। आदध्यू रुद्रशर्माणं तद्याने शिवदूतकाः ॥६४॥
सम्मानमादरं चक्रुर्द्वितीयं[३०] शङ्करं यथा। व्योम्नि दुन्दुभयो नेदुर्नानावाद्यैः समं तदा ॥६५॥
ववृषुः[३१] कुसुमासारा देवकन्याकरेरिताः। आसीन्नादस्तदा व्योम्नि धन्येति साधु साध्विति ॥६६॥
शूलिनं त्रीक्षणं प्रेक्ष्य डमरुमुण्डधारिणम्। ततोऽनयँश्च यानस्थं ते दूताः शिवमन्दिरम् ॥६७॥
गीतवाद्यमहोल्लासै रुद्रकन्याभिसेवितम्। स एव प्रमथश्रेष्ठस्तद्दिनादभवद् द्विज ॥६८॥
रुद्रस्यानुचरः शूली यदृच्छयागमत्सदा। देवतीर्थस्य माहात्म्यं भीमेश्वरस्य भक्तिवित् ॥६९॥
दुर्लभं भुवि जानीहि चेदृशमसतां सदा। स्नात्वा चात्रैव यः कश्चिदेतल्लिङ्गं प्रपूजति ॥७०॥
एतल्लोकं[३२] समुत्सृज्य शिवलोकं स गच्छति ॥७१॥

भूयो व्रज त्वं हि मया च सार्द्धं दिशि प्रतीच्याञ्च त्रियोजनान्ते।
काफीश्वरो यत्र विराजतेऽतः सुवर्णतीर्थेन समं हि नित्यम् ॥७२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां भीमेश्वरदेवतीर्थयोर्माहात्म्यं नाम एकनवतितमोऽध्यायः ॥९१॥

त्यसपछि शिवको आज्ञा अनुसार शिवका दूतहरूले आकाशबाट यस ठाउँमा सम्पूर्ण सुविधाले युक्त भएको शिवको यान लिएर आए। शिवदूतले रुद्रशर्मालाई बडो सम्मानका साथ आदर गर्दै दोस्रा शङ्कर नै हुन् कि भने भैँ गरी यानमा बसाले। त्यसबेला आकाशमा विभिन्न बाजाहरूका साथ दमाहा बजे। देवताका कन्याहरूको हातबाट खसेका फूलका वर्षाहरू बर्सिए। त्रिशूल लिएका, तीन आँखा भएका, डमरु र मुण्डमाला धारण गर्ने ती ब्राह्मणलाई देखेर आकाशमा धन्य, साधु साधु जस्ता आवाजहरू आउन थाले ॥६३–६६॥

गाना, बजाना र ठूलो उत्सव गरेर रुद्रका कन्याहरूले सुसेवित विमानमा अवस्थित त्यस ब्राह्मणलाई शिवदूतहरूले शिवजीको मन्दिरमा लगे। हे ब्राह्मण ! त्यसै दिनदेखि त्यो ब्राह्मण अकस्मात् सदाका लागि शिवजीका गणहरूमा श्रेष्ठ त्रिशूलधारी अनुचर भयो र आफ्नो इच्छानुसार अन्य तीर्थतर्फ लाग्यो। हे भक्तिज्ञ ! देवतीर्थ र भीमेश्वर महादेवको यस्तो माहात्म्य पृथ्वीमा दुष्टका लागि सधैँ दुर्लभ छ भनेर जान। यस तीर्थमा स्नान गरेर जसले यस लिङ्गको पूजा गर्छ, त्यो व्यक्ति यस संसारलाई छोडेपछि शिवलोक जान्छ ॥६७–७०॥

त्यसपछि तिमी मसितै हिँड, त्यसको पश्चिमतिर तीन योजन पर काफीश्वर महादेव सुवर्णतीर्थका साथै सधैँ विराजमान हुनुहुन्छ ॥७१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भीमेश्वर र देवतीर्थको माहात्म्यनामक एकान्नब्बेऔँ अध्याय पूरा भयो।

---

२९. शिवदूताश्च इति न.सं.पु.पाठः।
३०. आद्रियन् बहुमान्यैश्च द्वितीयम् इति न.सं.पु.पाठः।
३१. ववर्षुः इति न.सं.पु.पाठः।
३२. इहलोकम् इति न.सं.पु.पाठः।

द्विनवतितमोऽध्यायः

काफीश्वरशिवलिङ्गसुवर्णतीर्थयोर्महिमा

स्कन्द उवाच

देवतीर्थे ततः स्नात्वा कुष्ठव्रणैर्विमुक्तवान्। अभूद्धि बलवान् किञ्चिद्विरूपाक्षो घटोद्भव ॥१॥
भूयो जगाम विप्रोऽसौ याम्यायां दिशि भक्तिमान्[1]। मुनिना सह भक्त्या वै यत्र काफीश्वरो विभुः ॥२॥
माघकृष्णद्वितीयायां सुवर्णतीर्थमाव्रजत्। सस्नौ विप्रो हि तत्तीर्थे भक्त्याऽभ्यर्च्य सुसङ्गमे ॥३॥
तस्मिन्तीर्थे मुदा स्नात्वा भक्त्या पञ्चोपचारकैः। आनर्च विधिवल्लिङ्गं काफीश्वरं प्रमाणतः ॥४॥
सम्पूज्य तन्निशायां स तीर्थस्नायी च तत्त्वतः। महिमानमपृच्छत्त[2] तत्तीर्थलिङ्गयोर्मुनिम् ॥५॥

विरूपाक्ष उवाच

मुने मयात्र संस्नातं स्वर्णतीर्थेऽधुना विभो। त्वत्प्रसादाद्यथाशक्ति चैतल्लिङ्गं हि पूजितम् ॥६॥
सुवणीर्थमाहात्म्यं काफीश्वरप्रभोरपि। गौरवं श्रोतुमिच्छामि सिद्धर्षे ! करुणां कुरु[3] ॥७॥
उद्भूतञ्च कथं लिङ्गं नद्याश्चैव तथा पुनः। केन प्रकाशितं लिङ्गं को मुक्तोऽत्र वद प्रभो ॥८॥

सिद्धर्षिरुवाच

पूर्वजन्मविपाकेन कफरोगी ह्यभूद् द्विजः। तस्मात्कफीति विख्यातो नित्यकर्मविलङ्घनात् ॥९॥
धर्मकर्मरतो नित्यं कफी योगीश्वरः सदा। तस्य पुत्रो मुनिश्रेष्ठः काफीति भुवि विश्रुतः ॥१०॥
दानधर्मरतो नित्यं सर्वविद्याविशारदः। तीर्थस्नायी सुयोगीशो ह्यभूत्काफी मुनीश्वरः ॥११॥
भ्रामं भ्रामं[4] क्षितिं सर्वां तीर्थानि प्रतिमां पुनः। हिमवन्तं समागत्य निर्जनत्वं स लब्धवान्[5] ॥१२॥

अध्याय – ९२

काफीश्वर शिवलिङ्ग र सुवर्णतीर्थको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! देवतीर्थमा स्नान गरी ती ब्राह्मण विरूपाक्ष कुष्ठरोगजन्य घाउबाट मुक्त भई र केही बलिया भए ॥१॥ त्यसपछि मुनिलाई साथमै लिएर जहाँ काफीश्वर भगवान् बस्नुहुन्थ्यो, ज्यादै दक्षिणतिर रहेको त्यसै ठाउँमा विरूपाक्ष गए ॥२॥ माघ कृष्ण द्वितीया तिथिका दिन ती ब्राह्मण सुवर्णतीर्थमा पुगे। त्यहाँ पुगेर ती ब्राह्मणले सुन्दर सङ्गम भएको तीर्थलाई भक्तिपूर्वक पूजा गरेर स्नान गरे ॥३॥ त्यस तीर्थमा आनन्दसित स्नान गरेर उनले नमस्कार गर्दै काफीश्वर भगवान्को लिङ्गलाई विधिपूर्वक पञ्चोपचारद्वारा पूजा गरे ॥४॥ उनले तीर्थमा स्नान गरेर साँझ परेपछि मुनिलाई सत्कार गरे अनि त्यस तीर्थको र लिङ्गको माहात्म्य सोधे ॥५॥

विरूपाक्षले भने – हे मुनि ! हजुरको अनुग्रहले गर्दा मैले अहिले यस तीर्थमा स्नान गर्ने मौका पाएँ र शक्ति अनुसार यस लिङ्गको पूजा गरेँ ॥६॥ हे तात ! म काफीश्वर नामले प्रसिद्ध भएको यस लिङ्गको र विशेष गरी यस तीर्थको माहात्म्य सुन्न चाहन्छु ॥७॥ हे प्रभो ! यो लिङ्ग र नदीको उत्पत्ति कसरी भयो ? कसले यस लिङ्गलाई प्रकाशित गर्‍यो ? यस लिङ्गको आराधनाबाट को मुक्त भयो ? मलाई बताउनुहोस् ॥८॥

सिद्धर्षिले भने – पूर्वजन्मका कुकृत्यले गर्दा कुनै बाहुन कफका रोगी भए, आफ्नो नित्य कर्म छोडेका हुँदा तिनी कफी नामले संसारमा प्रसिद्ध भए ॥९॥ सधैँ धर्मकर्ममा संलग्न योगीहरूका स्वामी कफीका छोरा काफी नामले संसारमा प्रसिद्ध भए ॥१०॥ काफी सधैँ दान र धर्ममा संलग्न हुन्थे। सम्पूर्ण विद्या जानेका थिए। तीर्थमा स्नान गर्थे। मुनीश्वर काफी योगीमा उत्कृष्ट थिए ॥११॥ सम्पूर्ण तीर्थ र देवताको मूर्ति भएको पृथ्वीतलमा घुम्दै उनी एक्लै हिमालय पर्वतमा पुगे ॥१२॥

---

१. याम्ये दिशि महत्तरे इति न.सं.पु.पाठः। २. तन्माहात्म्यमपृच्छत्तम् इति न.सं.पु.पाठः।
३. एतत्तीर्थस्य माहात्म्यं लिङ्गस्य च विशेषतः। श्रोतुमिच्छाम्यहं तात काफीश्वर इति श्रुतम्, इति न.सं.पु.पाठः।
४. भ्राम्यमाणः इति न.सं.पु.पाठः। ५. प्राप्तवानत्र निर्जनः इति न.सं.पु.पाठः।

स्वर्णक्लिन्ना नदी श्रेष्ठा शैलवती तथा परा। तयोश्च सङ्गमे वत्स ! स्वर्णतीर्थमुदाहृतम् ॥१३॥
तत्र सस्नौ मुदा भक्त्या विधिवन्मुनिपुङ्गवः। तेजस्वी चाभवद्विप्रः सुवर्णाभः सुनिर्मलः ॥१४॥
संप्रेक्ष्य स्वां तनुं दिव्यां तपः काङ्क्षितवान् तदा। धनुषां शतदूरे स आरोहत् ककुदाचलम्[६] ॥१५॥
शैलशृङ्गे रहः स्थानं मत्वा योगस्थलं द्विज। दध्यौ स योगमाश्रित्य[७] समाधिना महेश्वरम् ॥१६॥
सहस्राब्दं स्थितो योगी निश्चलस्वान्तविग्रहः। अभूत्स स्थावरः सत्ये वाल्मीककीटमन्दिरम् ॥१७॥
सहस्राब्दान्तरे रौद्रं[८] वरदानाय योगिने। समुद्भूतं महालिङ्गं ककुदग्रे तदग्रतः ॥१८॥
फाल्गुनपूर्णिमान्ते च निशामध्ये व्यवस्थितम्। तेजसां पुञ्जमेनं हि[९] प्रेक्ष्येशं स मुमोद च ॥१९॥
व्याजहार वचस्तस्मै लिङ्गमूर्त्तिस्तपस्विने। तपस्विन्निह मां पश्य त्वं दिव्यविग्रहो भव ॥२०॥
समाकर्ण्य च तद्वाक्यमुन्मीलितेक्षणो मुनिः। ददर्श स पुरो लिङ्गं स्वात्मनो दिव्यविग्रहम्[१०] ॥२१॥
प्रहर्षितो मुनिर्लिङ्गमानर्च विविधार्हणैः। तुष्टाव च मुहुर्भक्त्या कायहृद्वचनैस्तदा ॥२२॥
आविर्भूतस्ततो रुद्रो व्यक्तरूपश्च सायुधः। उवाच वचनं भूयो मुनिं[११] त्रिभुवनेश्वरः ॥२३॥

काफीश्वर उवाच

तुष्टोऽहं तपसा काफिन्निश्चलेनेदृशेन ते। ददाम्यहं वरं तुभ्यं शृणु चैकाग्रमानसः ॥२४॥
त्रिनेत्रो भव दिव्यस्त्वं मद्विग्रहश्चतुर्भुजः। सुश्रियं डमरुं शूलं मुण्डमालां गृहाण वै ॥२५॥
अद्यादि मम लोके त्वं स्थास्यसि वै मया सह। ईदृशं ते तपो यस्मात्तस्मात्काफिन् सुभक्तितः ॥२६॥

सुवर्णमय नदी र शैलवती नाम गरेकी अर्की नदी त्यहाँ रहेकी छन्। हे बाबु ! ती दुईको सङ्गमस्थललाई स्वर्णतीर्थ भनिएको छ, मुनिश्रेष्ठ ती ब्राह्मणले प्रसन्न भएर सभक्ति विधिपूर्वक त्यस तीर्थमा स्नान गरे। त्यसपछि ती ब्राह्मण सुनको जस्तै कान्ति भएका तेजस्वी र निर्मल बने ॥१३-१४॥

उनले आफ्नो शरीरलाई दिव्यस्वरूप भएको देखेर तपस्या गर्ने विचार गरे। उनी त्यसपछि चार सय हात पर रहेको ककुद पर्वतमा चढे। पहाडको शिखरमा रहेको एकान्तस्थललाई योगस्थलका लागि उपयुक्त ठानेर त्यहाँ उनले समाधि लगाए र भगवान् शङ्करको ठूलो ध्यान गरे। सत्ययुगमा आफ्नो सम्पूर्ण इन्द्रिय र शरीरलाई स्थिर गराएर हजार वर्षसम्म तपस्या गर्दा उनी धमिराको गोलाका रूपमा स्थावर बने। हजार वर्षपछि उनको अगाडि ती योगीलाई वरदान दिनका लागि भगवान् शङ्कर महालिङ्गको रूप लिएर प्रादुर्भाव हुनुभयो। त्यसपछि फाल्गुन पूर्णिमाको बिहानीपखको रातमा आफ्नो अघिल्तिर तेजको थुप्रो रहेको देखेर उनी अत्यन्त प्रसन्न भए ॥१५-१९॥

त्यसपछि लिङ्गमूर्ति भगवान् शङ्करले ती तपस्वीलाई भन्नुभयो - हे तपस्वी ! यता मलाई हेर, तिमी दिव्य शरीरका बन। त्यो कुरा सुनेर आँखा खोलेका ती ऋषिले आफ्नो अगाडि दिव्यस्वरूपमा अवस्थित लिङ्गलाई देखे। त्यसपछि ती ऋषिले विभिन्न पूजासामग्रीद्वारा त्यस लिङ्गको पूजा गरे। शरीर, हृदय र वचनले बारम्बार भक्तिपूर्वक स्तुति पनि गरे। त्यसपछि भगवान् रुद्र हतियार साथमा लिएर प्रकट हुनुभयो र तीनै लोकका मालिक शङ्करले ती मुनिलाई फेरि भन्नुभयो ॥२०-२३॥

काफीश्वरले भन्नुभयो - हे काफी ! तिम्रो यस्तो निश्चल तपस्याबाट म सन्तुष्ट भएँ, एकाग्र भएर सुन। म तिमीलाई वर दिन्छु। तिम्रा तीनवटा आँखा होऊन्, चारवटा हात बनून्, मेरोजस्तै दिव्य शरीर बनोस्, तिमी लक्ष्मी, डमरु, त्रिशूल र मुण्डमाला ग्रहण गर। हे काफी ! तिमीले भक्तिपूर्वक यस्तो तपस्या गर्‍यौ, त्यसैले तिमी आजदेखि मसितै मेरो लोकमा रहन पाउनेछौ ॥२४-२६॥

---

६. ककुदाद्रिं समारुहत् इति न.सं.पु.पाठः।
७. दध्यौ योगं महत्तत्र इति न.सं.पु.पाठः।
८. रुद्रः इति न.सं.पु.पाठः।
९. पुञ्जमेतद्धि इति न.सं.पु.पाठः।
१०. स्वात्मनं दिव्यरूपिणम् इति न.सं.पु.पाठः।
११. तस्तै इति न.सं.पु.पाठः।

सिद्धर्षिरुवाच

इत्युक्त्वाऽन्तर्दधे तं स चैतल्लिङ्गं प्रदर्शयन्। दत्त्वा वरं विभुस्तस्मै दिव्यं देव सुदुर्लभम् ॥२७॥
एतल्लिङ्गे विलीनेऽजे शिवदूतास्तदाऽऽययुः। शैवं सूर्यप्रभं दिव्यं वहन्तस्ते विमानकम्[१२] ॥२८॥
समास्थायाशु तं याने प्रमथा हि तदाज्ञया। निन्युः शिवपुरं दिव्यं वाद्यगीतमहोत्सवैः ॥२९॥
एतत्तीर्थस्य माहात्म्यं भूयः शृणु विरूपधृक्। विमुक्ता त्रिपुरा काचित्तीर्थस्यास्यैव कारणात् ॥३०॥
पूर्वजन्मविपाकेन परनिन्दनकारणात्[१३]। कुरूपा नाम चासीत्सा म्लेच्छपत्नी मलीमसा ॥३१॥
एकदा दिवसे सा वै फलमूलानि सर्वशः। अन्वेषयन्ती सम्प्राप तस्मिन् तीर्थे स्पृहामयी[१४] ॥३२॥
फाल्गुने मास्यमावास्यां निराहारा तृषार्दिता। अलाभे चाशने सा वै चैतत्तीर्थञ्च निर्जना ॥३३॥
जलं पातुं गता तीरे तत्तीर्थजलमर्शने[१५]। शिलाप्रस्खलिताङ्घ्री सा व्यलोडयज्जलं द्रुतम् ॥३४॥
निमज्जिता च तत्तीरे कम्पदेहा मुहुर्मुहुः[१६]। समुत्थायागमत्कष्टात् कुरूपेह तटे द्विज ॥३५॥
ततो ददर्श देहं स्वं कुरूपावयवं पुनः। षोडशाब्दान्वितं रूपं सौन्दर्यञ्च शुभाननम् ॥३६॥
विमृश्य मनसा सा च जलबिम्बं ददर्श तम्। षोडशाब्दान्वितं रूपं सौन्दर्यञ्च शुभाननम् ॥३७॥
प्रेक्ष्य चन्द्राननं रूपं सर्वसौन्दर्यविग्रहम्। भृशं प्रहर्षिता सा स्वं मेने कृतार्थमात्मना ॥३८॥
ततोऽगमद् गृहं सा वै हर्षसम्पूर्णमानसा। अन्याशनानि चाऽऽदाय सुन्दरी हर्षलीलया[१७] ॥३९॥

सिद्धर्षिले भने – यति कुरा भनेर वर दिएपछि भगवान् शङ्कर ती ऋषिहरूलाई देवताले पनि दर्शन गर्न नपाउने दिव्य शरीरको दर्शन दिएर अन्तर्धान हुनुभयो। यस लिङ्गमा भगवान् शङ्कर विलीन हुनुभएपछि सूयजस्तै तेजिलो शिवजीको यान लिएर शिवजीका दूतहरू आकाशमार्गबाट त्यहाँ आए। प्रमथ आदि शिवका गणले भगवान् शङ्करको आज्ञानुसार ती मुनिलाई यानमा राखेर गान, बजान आदि उत्सव गर्दै दिव्य शिवपुरमा लगे ॥२७–२९॥

हे विरूपाक्ष ! यो तीर्थको माहात्म्य फेरि सुन – कुनै त्रिपुरा नाम गरेकी स्त्री यसै तीर्थको कारणले गर्दा मुक्त भएकी थिई। पूर्वजन्ममा अर्काको निन्दा गरेर कमाएको कुकृत्यले गर्दा त्यो म्लेच्छकी पत्नी कुरूप तथा पापी थिई। कुनै दिन त्यो म्लेच्छपत्नी फलफूल खोज्दै स्वेच्छानुसार त्यसै तीर्थमा आइपुगी। फागुन महिनाको औँसीका दिन केही खानेकुरा नपाएर भोक तथा प्यासले आत्तिएर त्यो स्त्री एक्लै यस तीर्थमा आइपुगी। त्यसपछि त्यो स्त्री जल पिउन त्यस तीरमा गई। त्यस तीर्थको पानी छुन खोज्दा ढुङ्गामा चिप्लिएर पानीमा डुब्न पुगी ॥३०–३४॥

हे ब्राह्मण ! पानीमा डुबेकी त्यो स्त्री बारम्बार काँप्दै बडो कष्टका साथ उठेर तटमा गई। त्यसपछि उसले आफ्नो कुरूप शरीर तत्कालै सोह्र वर्षको सौन्दर्यले युक्त भएको र सुन्दर मुखले सुसम्पन्न युवतिका रूपमा परिणत भएकी देखे। मनमनै विचार गरेर पानीमा हेर्दा उसले सोह्र वर्षको रूप र सौन्दर्यले युक्त भएको राम्रो मुखको बिम्ब देखी। चन्द्रमाको जस्तो मुख, रूप र सम्पूर्ण सौन्दर्यले युक्त भएको शरीरलाई देखेर त्यो स्त्री अत्यन्त प्रसन्न भई र आफूलाई कृतकृत्य ठानी। त्यसपछि हर्षले पूर्ण चित्त भएर त्यो सुन्दरी स्त्री अरू खानेकुरा लिएर लीला गर्दै तुरुन्त घर पुगी ॥३५–३९॥

---

१२. व्योम्नो यानं समावहन् इति न.सं.पु.पाठः।
१३. परनिन्दाविदूषणात् इति न.सं.पु.पाठः।
१४. प्राप्तवन्ती च तत्तीर्थमन्वेषयन्ती स्पृहागतिः इति न.सं.पु.पाठः।
१५. तत्तीर्थजलसंस्पृशे इति न.सं.पु.पाठः।
१६. मुहुः पुनः इति न.सं.पु.पाठः।
१७. आदायान्यशनान्याशु सा सुन्दरी च लीलया इति न.सं.पु.पाठः।

भृत्या ऊचुः

ददृशुस्ताञ्च तद्भृत्याः पतिपुत्रान्वयास्तदा। मत्वा वानस्पतीं देवीं चित्रं प्राप्ता व्यलोकयन् ॥४०॥
उपहारकरास्तस्या अभिजग्मुर्द्रुतं मुदा। प्रणेमुस्तां हि ते तत्र पृच्छन्ति स्म शिवं पुनः ॥४१॥
स्वागतं देवि ! भद्रं ते चाऽस्ति देहेषु सद्मसु। इहाऽऽगताऽसि भो भद्रे यदृच्छया स्वलीलया ॥४२॥
का त्वं कल्याणि ! सुश्रोणि दैवी वा चाऽसुरी तु वा। राज्ञः कन्यापि वा गेहाद् दिग्भ्रान्त्यात्र समागता ॥४३॥
अथवा किमु भद्राय दीनवनौकसाञ्च नः। भवत्यत्रागता साक्षात्[१८] वनलक्ष्मीर्हि वा वद ॥४४॥

कुरूपोवाच

नाहं देवी पुनर्लक्ष्मी राज्ञः कन्याऽऽसुरी न च। भ्रान्त्या चात्र गता नाहं कुरूपाऽहं प्रभो गुरो ॥४५॥
प्राकृततां[१९] कथं प्राप्ताः यूयं प्रभो गुरो सुत। मां हि कथं न जानीथा वनात्समागतां ध्रुवम् ॥४६॥
अन्वेषितुं फलान्यार्या चाहं वनङ्गताऽधुना। अलाभे फलमूलानां[२०] पुनरत्रागता गृहम् ॥४७॥

भृत्या ऊचुः

ईदृशं यौवनं ते भो रूपसौन्दर्यसंयुतम्। मधुरा च वचःशैली[२१] कथं त्वं मानुषी भवेः ॥४८॥
सुवर्णाभा तनुस्ते च मृगशावकलोचने। पीनोत्तुङ्गस्तनौ साध्वि कुरूपा त्वं कथं भवेः[२२] ॥४९॥
ईदृशीं सुन्दरीं नारीं स्त्रीरत्नं भुवि दुर्लभम्। न चाऽदर्शाम हे[२३] क्वाऽपि त्वादृशीं वनसुन्दरीम् ॥५०॥
सर्वलक्षणसम्पूर्णां सौन्दर्यगुणसंयुताम्। राज्यलक्ष्मीं न सन्देहो निर्णयामो वयमहो[२४] ॥५१॥

उसका नोकर, पति, छोरा र सन्तानहरूले वनकी देवीलाई जस्तै गरी उसलाई देखेर छक्क परेर हेरे। हातमा उपहार लिएर तिनीहरू दौडिदै त्यस स्त्रीका अगाडि आएर नमस्कार गरे। अनि उनीहरूले कुशल प्रश्न गरे र भन्न लागे - हे देवी ! तपाईंलाई स्वागत छ, तपाईंको शरीर र घरमा सञ्चै त छ ? हे भद्रे ! तपाईं यहाँ आफ्नो इच्छानुसार लीला गर्दै आउनुभएको छ। हे कल्याणी ! तपाईं को हुनुहुन्छ ? देवी हुनुहुन्छ वा राक्षसनी हुनुहुन्छ ? अथवा राजाकी छोरी हुनुहुन्छ ? घरबाट दिग्भ्रम भएर यहाँ आउनुभएको छ। अथवा हामी दुःखी वनवासीको कल्याणका निमित्त तपाईं वनलक्ष्मी भएर यहाँ आउनुभएको छ ? बताउनुहोस् ॥४०-४४॥

कुरूपाले भनी - म देवी होइन, लक्ष्मी पनि होइन, राजाकी छोरी पनि होइन, राक्षसी पनि होइन, भुक्किएर यहाँ आएकी पनि होइन, हे प्रभु ! हे गुरु ! म कुरूपा हुँ। तपाईंहरू कसरी अज्ञानी हुनुभयो ? हे प्रभु ! हे छोरा ! मलाई किन चिन्नुहुन्न ? म निश्चय नै वनबाट आएकी कुरूपा हुँ। म फलफूल खोज्न वनमा गएकी थिएँ, फल तथा कन्दमूल नपाएर फर्किएर म फेरि घरमै आएकी छु ॥४५-४७॥

भृत्यहरूले भने - तपाईंको यस्तो युवावस्था, रूप, सौन्दर्य कसरी भयो ? मीठो बोली तपाईंको कसरी बन्यो ? तपाईं कसरी सुन्दरी हुनुभयो ? तपाईंको शरीर सुनको जस्तो छ, आँखा मृगका बच्चाका जस्ता छन्, स्तन साह्रा र अग्ला छन्। हे कुरूपा ! कसरी तपाईं यस्ती हुनुभयो ? संसारमा नै दुर्लभ भएको तपाईंजस्तो स्त्रीरत्न वनसुन्दरी नारीलाई हामीले कहीँ पनि देखेका छैनौँ। सम्पूर्ण लक्षणले युक्त भएकी सौन्दर्य गुणले सम्पन्न हजुरलाई हामीले राज्यलक्ष्मी भनेर निर्णय गरेका छौँ, यसमा सन्देह छैन ॥४८-५१॥

---

१८. अत्रागता भवन्ती वै इति न.सं.पु.पाठः।
१९. प्राकृतं ताम् इति न.सं.पु.पाठः।
२०. फलमूलानि इति न.सं.पु.पाठः।
२१. मधुरां तव वाचोक्तिम् इति न.सं.पु.पाठः।
२२. भवेत् इति न.सं.पु.पाठः।
२३. न च दृष्यमहे इति न.सं.पु.पाठः।
२४. सन्देहस्त्वां निर्णयामहे इति इति न.सं.पु.पाठः।

कुरूपोवाच

तस्मिंश्च सङ्गमे नद्योः शृणुत घटनां शुभाम्[२५] । अस्यूतनोश्च[२६] सौन्दर्यं यतो लब्धं मयाऽधुना ॥५२॥
तज्जलस्पर्शनाद्देहसौन्दर्यं स्फुटितं त्विदम्[२७] । नाहं देवी तथा राज्ञी कुरूपाख्या न संशयः ॥५३॥
जलं पातुं तृषार्ताऽहं गता तत्र नदीतटे । विलोडिता सचैला च ग्रावस्खलितपादतः ॥५४॥
ईदृशस्य शरीरस्य[२८] वाञ्छाऽस्ति भवतां यदि । स्नानार्चनानि यूयं भो कुरुध्वं तत्र साम्प्रतम् ॥५५॥

सिद्धर्षिरुवाच

तस्मिन्काले विरूपाक्ष ! तेषां सम्भाषणे मिथः । व्योम्नः समाययुर्दूताः शङ्करयानवाहकाः ॥५६॥
आदध्युस्त्वरितं तत्र कुरूपां सान्वयां हि ते । आनिन्यू रुद्रलोकं तां तरसा गमनेन च ॥५७॥

विरूपाक्ष उवाच

तद्भृत्या रुद्रलोकं ते तया सार्द्धं कथं गताः । दानधर्माप्लवैर्हीनाः शैवयानगता मुदा ॥५८॥
ज्ञानधर्मविहीनेषु[२९] कथं सन्तुष्टवान् विभुः । अहमेतच्छ्रोतुमना[३०] चित्रं मे हृदि जायते ॥५९॥

सिद्धर्षिरुवाच

आदिगङ्गामहातीर्थे पार्वती च तपस्विनी[३१] । तस्या देहोद्भवः स्वेदः[३२] कौशिकीत्यभिधीयते ॥६०॥
सन्पीड्य पाणिमानीता[३३] भर्त्रा सा तद्गृहाद्यदा । आदिगङ्गां विलङ्घ्य स्वमुपतीर्थं गृहं पथि ॥६१॥
राधशुक्लतृतीयायां सा सस्नौ तत्र भावतः । ययौ भर्त्रा सह गेहं सर्वपापैर्विवर्जिता ॥६२॥
तत्पुण्यभावितात्मा सा चाऽपरतीर्थदर्शनात्[३४] । पुण्यदेहाऽभवत्सा वै तद्धि सम्भाषणात्किमु ॥६३॥

कुरूपाले भनी – जुन नदीको सङ्गममा स्नान गरेर मैले यस्तो शरीर र सौन्दर्यलाई प्राप्त गरें त्यस नदीको सङ्गमको विषयमा ध्यान दिएर सुन्नुहोस्। त्यसै नदीको जलस्पर्श गर्दा मेरो यो शरीर सुन्दर बन्यो भन्ने कुरा बुझ्नुहोस्। म देवी होइन, रानी पनि होइन, म त कुरूपा हुँ, यसमा शङ्का छैन। तिर्खाएर पानी पिउन म त्यस नदीको तटमा गएकी थिएँ। ढुङ्गामा गोडा चिप्लिएर लुगैसित पानीमा पछारिएँ। यदि तपाईंहरूलाई पनि यस्तै शरीरको आकाङ्क्षा छ भने तपाईंहरू त्यहाँ गएर अहिले नै डुबुल्की मारी पूजाआज गर्नुहोस् ॥५२–५५॥

सिद्धर्षिहरूले भने – हे विरूपाक्ष ! जब तिनीहरू परस्परमा कुराकानी गर्दै थिए, त्यसबैला शिवजीको यान लिएर दूतहरू आकाशबाट त्यहाँ आइपुगे। उनीहरूले त्यस कुरूपालाई तुरुन्त यानमा राखेर सपरिवार तीव्र गतिले शिवलोकमा लगे ॥५६–५७॥

विरूपाक्षले भने – तिनका नोकरहरू त्यो स्त्रीका साथै दान, धर्म, स्नान नगरीकन पनि शैवयानमा चढेर कसरी रुद्रलोक गए ? ज्ञान र धर्म नभएका ती भृत्यहरूसित भगवान् कसरी सन्तुष्ट हुनुभयो ? यो कुरा म सुन्न चाहन्छु। हृदयमा मलाई अचम्म लागेको छ ॥५८–५९॥

सिद्धर्षिले भने – आदिगङ्गा सबैभन्दा ठूलो तीर्थ हो, सबैभन्दा ठूली तपस्विनी पार्वती हुन्, तिनको शरीरबाट पैदा भएको पसिनालाई कौशिकी भनेर भन्दछन्। त्यस कुरूपालाई त्यसको पतिले विवाह गरेर घरमा ल्याउँदा उसले बाटमा पर्ने आदिगङ्गा नाम गरेको नजिकको तीर्थलाई नाघेर घरमा गएकी थिई। त्यस तीर्थमा वैशाख महिनाको शुक्लपक्षको तृतीयाका दिन उसले भक्तिपूर्वक स्नान गरी त्यसपछि ऊ सम्पूर्ण पापबाट मुक्त भएर पतिका साथै घरमा आई। त्यसै पुण्यले गर्दा पवित्र आत्मा भएकी कुरूपा अर्को तीर्थको स्पर्शले गर्दा झन् पवित्र भई, धेरै के भनूँ ? ॥६०–६३॥

---

२५. शृणुध्वं श्रवणङ्गताः इति न.सं.पु.पाठः ।
२६. इमां तनुञ्च इति न.सं.पु.पाठः ।
२७. मे त्विदं विदुः इति न.सं.पु.पाठः ।
२८. ईदृशेन शरीरेण इति न.सं.पु.पाठः ।
२९. ज्ञानधर्मविहीनानाम् इति न.सं.पु.पाठः ।
३०. एतच्छ्रोतुमनाऽहञ्च इति न.सं.पु.पाठः ।
३१. तपस्विनी च पार्वती इति न.सं.पु.पाठः ।
३२. देहोद्भवं स्वेदम् इति न.सं.पु.पाठः ।
३३. पाणिं पीड्य समानीता इति न.सं.पु.पाठः ।
३४. तीर्थसंस्पृशात् इति न.सं.पु.पाठः ।

तज्जलस्पर्शनाद् भूयः कुरूपाऽभूद्विकिल्बिषा। पूर्वजन्मकृतान् पापानभूत्सन्त्यज्य सुन्दरी ॥६४॥
तस्याः संस्पर्शनाद् भृत्याश्चाभूवन् ते विकिल्विषाः। सम्भाषणात् ततस्तस्याः शैवं तेऽपि गता किल॥६५॥
विशेषेणाऽत्र देशे च ह्येतल्लिङ्गप्रदर्शनात्। तल्लिङ्गस्पर्शनात् भूयश्चाऽऽभाषणाद्[३५] विशेषतः ॥६६॥
अकृतान्यपि पुण्यानि पापानि च यथा नरैः। प्राप्यन्ते कर्मणा येन तद्यथा च वदाम्यहम्[३६] ॥६७॥
देशे क्षेत्रे कुले मर्त्यैः फलांशास्त्रियुगे द्वयोः। एकग्रामे प्रलभ्यन्ते चैककृतापराधतः ॥६८॥
विशेषेण च भूर्यत्र प्रोक्तं भगवता पुरा। कलौ तु केवलं कर्त्ता फलभुक् पापपुण्ययोः ॥६९॥
अकृतेऽपि हि संसर्गदिकस्थानस्थितेरपि। संसर्गदोषतो मर्त्यः पुण्यपापानि चाऽऽप्नुयात् ॥७०॥
फलांशं प्राप्नुयान्मर्त्यो यथावत्पुण्यपापयोः। फलार्द्धं प्राप्नुयाद् भार्या भर्तुश्चैव तथाविधम् ॥७१॥
तस्मात्सर्वप्रयत्नेन सतां[३७] सङ्गं समाचरेत्। यतश्च प्राप्नुयात्पुण्यं ज्ञानं भद्रं स्पृहां सतीम्[३८] ॥७२॥
तस्याः पुण्यप्रभावेण स्पर्शाच्च भाषणादपि[३९]। स्नानैर्ज्ञानैर्विहीनैस्तैर्लब्धः स्वर्गः ह्यनुत्तमः[४०] ॥७३॥

काफीश्वरस्यैव हि ते माहात्म्यं स्वर्णादितीर्थस्य निमेषतो वै।
प्रोक्तञ्च तुभ्यं निखिलञ्च भूयो दान्तेश्वरो यत्र च गच्छतात्त्वम् ॥७४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे विरूपाक्षतीर्थयात्रायां काफीश्वरस्वर्णतीर्थयोर्माहात्म्यं नामैकाधिकद्विनवतितमोऽध्यायः ॥९२॥

फेरि त्यस जलको स्पर्शले गर्दा त्यो कुरूपा पूर्वजन्मको पापबाट मुक्त भएर सुन्दरी बन्न पुगी। त्यसलाई छोएको हुनाले उसका नोकरहरू पनि पापबाट मुक्त भए। त्यससित कुराकानी गरेको हुँदा उनीहरू पनि शिवलोक पुगे। विशेष गरेर यो देशमा यो लिङ्गको दर्शन गर्नाले, यो लिङ्ग छुनाले र कुराकानी गर्नाले दान, धर्म आदि काम नगरीकन पनि कसरी पुण्य प्राप्त हुन्छ, त्यो सुनाउँछु॥६४-६७॥

सत्य, त्रेता र द्वापरयुगमा एउटाले गरेको पुण्य वा अपराधको फल देश, गाउँ र टोलका सबै मनुष्यहरूले भोग्नुपर्दथ्यो। यस विषयमा भगवान् शङ्करले धेरै कुरा अघि भन्नुभएको छ। कलियुगमा भने पाप र पुण्यको फल जसले गर्छ, त्यसले मात्रै भोग्नुपर्छ। नगरे पनि एकै ठाउँमा बसेको संसर्गजन्य दोषले गर्दा मानिसहरूले पुण्य र पाप प्राप्त गर्दछन् अर्थात् पापीसँगको सम्पर्क भयो भने पाप र पुण्यात्मासँगको सम्पर्क भयो भने पुण्य प्राप्त हुन्छ॥६८-७०॥

मानिसले जस्तो पाप र पुण्य गरेको छ, त्यसै अनुसारको फल पाउँछ। पतिले गरेका पुण्य वा पापको आधा पत्नीले भोग्नुपर्छ, त्यस्तै पत्नीले गरेको पुण्य र पापको आधा फल पतिले भोग्नुपर्छ। त्यसैले सकेसम्म प्रयास गरेर सज्जनहरूसित मात्रै सङ्गत गर्नुपर्छ किनभने त्यसो गर्नाले पुण्य, ज्ञान र कल्याणको प्राप्तिका साथै आफूले चाहेको कामना सधैँ पूर्ण गर्न सकिन्छ। सत्सङ्गतिको पुण्यको प्रभाव र सज्जनहरूसँगको कुराकानी र स्पर्शले गर्दा स्नान तथा ज्ञानविना पनि तिनीहरूले उत्तम स्वर्गलाई प्राप्त गरेका छन्॥७१-७३॥

मैले तिमीलाई काफीश्वर र विशेष गरी स्वर्णादि तीर्थको महत्त्व सबै बताएँ। अब तिमी जहाँ दान्तेश्वर भगवान् रहनुभएको छ, त्यस ठाउँमा जाऊ॥७४॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा काफीश्वर र स्वर्णतीर्थको माहात्म्यनामक बयान्नब्बेऔँ अध्याय पूरा भयो।

---

३५. तस्यां लिङ्गस्पृशायां वै चाभाषणाद् इति न.सं.पु.पाठः।
३६. निशामये इति न.सं.पु.पाठः।
३७. सद्भिः इति न.सं.पु.पाठः।
३८. ज्ञानः भद्रस्पृहां सदा इति न.सं.पु.पाठः।
३९. चाभाषणस्पृशादपि इति न.सं.पु.पाठः।
४०. लब्धं स्वर्गमनुत्तमम् इति न.सं.पु.पाठः।

त्रिनवतितमोऽध्यायः

कश्यपेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

स्वर्णतीर्थे ततः स्नात्वा सुवर्णाभप्रभायुतः। दिव्यकलेवरो विप्रः सुप्रभावोऽभवत्पुनः ॥१॥
भूयो जगाम विप्रेशस्तेनर्षिणा समन्तदा। कश्यपेशो[1] हि यत्रास्ते त्रियोजने हि वारुणे ॥२॥
सस्नौ भक्त्या विरूपाक्षः तीर्थे हि काश्यपे वरे। पञ्चोपचारकैर्दिव्यैः कश्यपेशमपूजयत् ॥३॥
माघकृष्णतृतीयायां पूजकः कश्यपेश्वरम्। अपृच्छन्नेमुनिं विप्रस्तन्माहात्म्यं महानिशि ॥४॥

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल भूदेवेश्वर सन्ततम्। भवतः श्रोतुमिच्छामि[2] माहात्म्यं तीर्थलिङ्गयोः ॥५॥
समुद्भूतं कथं[3] लिङ्गमेतद्वद मुनीश्वर। तीर्थस्य चास्य माहात्म्यमेते केन प्रकाशिते ॥६॥

सिद्धर्षिरुवाच

संसस्नौ कश्यपः पूर्वमस्मिन्तीर्थे मुदा द्विजः। रवौ दिने वृषेऽर्कस्थे शुभकृष्णाष्टमीतिथौ[4] ॥७॥
अत्र स्थितः परं[5] दध्यौ महासमाधिना शिवम्। चराचरञ्जगत्स्रष्टुं शङ्करं कश्यपो मुदा ॥८॥
संवत्सरं तदा व्याप्य सर्वजीवसिसृक्षया। दध्यौ परात्परं भक्त्या कश्यपो मुनिसत्तमः ॥९॥
तत्सङ्क्रान्त्यां समुद्भूतमेतल्लिङ्गं महानिशि। तत्समान्तेऽर्चिते देवे ध्यानस्थे कश्यपे तदा ॥१०॥

अध्याय ९३

कश्यपेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो– त्यसपछि ती ब्राह्मणले स्वर्णतीर्थमा स्नान गरे। उनको कान्ति सुनको जस्तो भयो। दिव्य शरीरले युक्त भएका ती ब्राह्मण अत्यन्त प्रभावशाली भए। त्यसपछि ती ब्राह्मण ती ऋषिलाई साथमा लिएर पश्चिमतिर तीन योजन पर जहाँ कश्यपेश्वर भगवान् हुनुहुन्थ्यो, त्यसै ठाउँमा गए। ती विरूपाक्षले त्यस उत्तम काश्यप तीर्थमा स्नान गरे र उनले दिव्य पञ्चोपचार विधिबाट कश्यपेश्वर भगवान्को पूजा गरे। माघ कृष्ण तृतीयाका दिन कश्यपेश्वर भगवान्को पूजा गरेर बेलुका ती ब्राह्मणले ऋषिसित कश्यपेश्वरको माहात्म्य सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! हे ब्राह्मणका स्वामी ! हजुरलाई बारम्बार नमस्कार छ। म यो तीर्थ र लिङ्गको माहात्म्य सुन्न चाहन्छु। यो लिङ्गको उत्पत्ति कसरी भएको हो ? यो तीर्थको माहात्म्य के छ ? यिनीहरूलाई कसले प्रकाशित गरेका हुन् ? हे मुनीश्वर ! बताउनुहोस् ॥५–६॥

सिद्धऋषिले भने – वृष राशिमा सूर्य गएको बेला आइतबार कृष्ण अष्टमी तिथिको मङ्गलमय दिनमा अघि कश्यप नाम गरेका ब्राह्मणले यस तीर्थमा आएर आनन्दसित स्नान गर्नुभएको थियो। यहाँ बसेर सम्पूर्ण चराचर जगत् लाई सृष्टि गर्ने सामर्थ्य प्रदान गर्ने वरप्राप्तिका लागि कश्यप ऋषिले ठूलो समाधि लगाएर भगवान् शङ्करको ध्यान गर्नुभएको थियो ॥७–८॥

मुनिश्रेष्ठ कश्यप ऋषिले सम्पूर्ण जीवको सृष्टि गर्ने विचार लिएर भक्तिपूर्वक एक वर्षसम्म परभन्दा पर रहेका भगवान्को ध्यान गर्नुभएको थियो। एक वर्षपछि कश्यप ऋषि भगवान् शिवमा ध्यानमग्न भएको अवस्थामा त्यसै सङ्क्रान्ति अर्थात् ज्येष्ठ सङ्क्रान्तिको अँध्यारो रातमा यो लिङ्गको प्रादुर्भाव भयो ॥९–१०॥

---

१. कश्यपेश्वरः इति न.सं.पु.पाठः।
२. भवति श्रोतुमिच्छामः इति न.सं.पु.पाठः।
३. कथं समुद्भवम् इति न.सं.पु.पाठः।
४. कृष्णाष्टम्यां तिथौ शिवे इति न.सं.पु.पाठः।
५. अत्रस्थो हि वरम् इति न.सं.पु.पाठः।

आविर्भूतः शिवः साक्षात्तन्निशायां वरं ददौ। तदीप्सितं विरूपाक्ष ! भक्ताय कश्यपाय हि[६] ॥११॥
लब्ध्वा वरं तदा रुद्रात् ससर्ज कश्यपो जगत्[७]। एतल्लिङ्गप्रसादाद्वै चराचरञ्चतुर्विधम् ॥१२॥
तदानीं[८] देवताः सिद्धा ऋषयश्चाऽप्सरोगणाः। सस्नुः स्वर्गादिहाऽऽगत्य चाऽस्मिन्तीर्थे समां प्रति ॥१३॥
पूजयन्ति स्म ते[९] भक्त्या चैतल्लिङ्गं दिवौकसः[१०]। स्वं स्वं लोकं ययुस्तस्मात् प्रार्थयन्तः[११] स्वकान्वरान् ॥१४॥
एतत्तीर्थस्य माहात्म्यं लिङ्गस्य च विरूपदृक्। भूतपूर्वं प्रवक्ष्यामि कथां कामपि तां शृणु[१२] ॥१५॥
आसीत्कश्चिन्नरः पूर्वं धर्माधर्माविवेकतः। रक्तविकारदोषेण[१३] नपुंसकोऽभवत्पुरा ॥१६॥
अन्त्यजसदृशो म्लेच्छश्चाऽमर्षी सर्वभुक् तदा। लोकनिन्द्योऽन्वयैस्त्यक्तः पशुक्रीडनतत्परः ॥१७॥
स कदाचिद्धि कालान्ते पञ्चविंशतियोजने। अत्रैव प्राप्तवान् म्लेच्छो दैवयोगेन संभ्रमन् ॥१८॥
ददर्श कश्यपञ्चाऽत्र जटाकलापिनं तदा। पूजयन्तं मुदैनं सः तत्सूक्तं प्रजपन् रहः ॥१९॥
एतत्तीर्थसमालोकाद्[१४] लिङ्गप्रदर्शनाद्धि सः। ज्ञानवानभवन्म्लेच्छः सन्तस्थौ चैवमेव च ॥२०॥
शनैः शनैरुपासृत्य कश्यपस्यान्तिकं हि सः। प्रणनाम मुनिं साक्षाद् ब्रह्माणमपरं द्विज ॥२१॥
मूर्ध्ना प्रणम्य भूमौ तं दण्डवत्पापविग्रहः। साक्षाद् ब्रह्माङ्गजं म्लेच्छो व्याजहार वचस्तदा ॥२२॥

नपुंसक उवाच

दुःखार्णवे च संसारे मददृष्टं भृशं सदा। भ्रमयतीह मां तात निन्दामलीमसैर्युतम् ॥२३॥
कथम्मोक्ष्याम्यहं तात चैतन्निन्द्यं कलेवरम्। न जानामि च तद्धेतुं वद मे ब्रह्मणः सुत ॥२४॥

हे विरूपाक्ष ! त्यस रातमा प्रादुर्भाव भएर साक्षात् भगवान् शङ्करले भक्त कश्यपलाई उनले इच्छा गरेको वर दिनुभयो। भगवान् शङ्करबाट वर प्राप्त गरेर यस लिङ्गको प्रभावले गर्दा कश्यपले चारैथरी जगत्को सृजना गर्नुभयो। त्यसबेला यस तीर्थमा देवता, सिद्ध, ऋषि र अप्सराहरूले स्वर्गबाट आएर वर्ष दिनसम्म आनन्दसित स्नान गरेका थिए। ती देवताहरूले भक्तिपूर्वक यस लिङ्गको आनन्दसित पूजा गरे र आफूलाई इच्छा लागेको वर मागेर सहर्ष आ–आफ्नो लोकमा गए ॥११–१४॥

हे विरूपाक्ष ! अघि कुनै व्यक्ति मुक्त भएको घटनासँग सम्बद्ध यस तीर्थ र लिङ्गको माहात्म्य छ, बताउँछु, सुन। अघि कुनै मानिस थियो। उसले धर्म र अधर्मको विवेक नगर्दा रगतमा विकार पैदा भएको दोषले ऊ नपुंसक बन्यो। त्यो म्लेच्छ चाण्डालजस्तो थियो। कसैलाई पनि सहदैनथ्यो, सबैथोक खान्थ्यो, लोकमा उसको निन्दा भएको थियो, परिवारले छाडिदिएका थिए र ऊ पशुक्रीडामा उद्यत थियो। केही समयपछि त्यो म्लेच्छ पच्चीस योजन पर रहेको यस ठाउँमा दैवसंयोगले घुम्दै आइपुग्यो। आनन्दसित जटाधारी शिवको मन्त्र जप्दै एकान्तमा उहाँको पूजा गरिरहेका कश्यपलाई उसले देख्यो। तीर्थ र लिङ्गको दर्शन गर्नासाथ त्यो म्लेच्छ ज्ञानी भयो र त्यसै ठाउँमा उभियो। हे द्विज ! त्यसपछि त्यो म्लेच्छ बिस्तारै–बिस्तारै कश्यपको नजिकै आयो र अर्का साक्षात् ब्रह्माजस्ता मुनिलाई नमस्कार गऱ्यो। ब्रह्माका मानसपुत्र कश्यप ऋषिलाई त्यस म्लेच्छले भूमिमा पापमय शरीरलाई दण्डजस्तै तुल्याएर शिरले नमस्कार गऱ्यो र भन्यो ॥१५–२२॥

नपुंसकले भन्यो – हे तात ! दुःखरूपी समुद्रमा यस संसारमा निन्दा र पापले ग्रस्त भएको मलाई अदृष्टले बारम्बार घुमाइराखेको छ। हे ब्रह्माजीका छोरा कश्यप ! म यो निन्द्य शरीरबाट कसरी मुक्ति पाउँछु ? मुक्तिको कारण मैले थाहा पाउन सकिनँ, मलाई बताइदिनुहोस् ॥२३–२४॥

---

६. कश्यपाय हि भक्तिने इति न.सं.पु.पाठः।
७. रुद्राज्जगत्ससर्ज कश्यपः इति न.सं.पु.पाठः।
८. अद्यापि इति न.सं.पु.पाठः।
९. मुदा इति न.सं.पु.पाठः।
१०. सुराश्च ते इति न.सं.पु.पाठः।
११. प्रार्थ्य इति न.सं.पु.पाठः।
१२. भूतपूर्वं प्रवक्ष्यामि कश्चिन्मुक्तो हि तत्छृणु इति न.सं.पु.पाठः।
१३. रक्तांशुकसमेनैव इति न.सं.पु.पाठः।
१४. तीर्थमालोकनादेनम् इति न.सं.पु.पाठः।

कश्यप उवाच

अवश्यं भवितव्यं तत्प्राप्तव्यं हि पुरा कृतम् । मा दुःखी भव भो वत्स पुण्यापुण्यं हि यत्कृतम् ॥२५॥
पुराकृतं हि यत्तद्धि शुभाशुभं नपुंसक । इहैव तेन भोक्तव्यं तत्तद्देहेन वै समम् ॥२६॥
इहैव यत्कृतं येन तत्तद्भोक्ष्यति तत्परे । कर्त्तव्यं मङ्गलञ्चातो दैवं भद्रं[१५] भवेद्यतः ॥२७॥
मया चेदं हि कर्तव्यमकर्तव्यमिदं तथा । इति विवेकहीनो यो मूढात्मा स हि वै श्रुतः ॥२८॥
पूर्वजन्मनि भो वत्स भवता[१६] चरितञ्च यत् । धर्माधर्मविवेकेन तस्मान्नपुंसको भवान् ॥२९॥
अस्मिन् तीर्थे नर ! स्नाहि चैतल्लिङ्गं प्रपूजय । अनेनैव शरीरेण त्वं तस्मान्मोक्ष्यसे ध्रुवम् ॥३०॥
पुरुषत्वञ्च वा स्त्रीत्वं लब्धुकामेन चेतसा । लभेताऽत्र कृतस्नानः स्त्रीपुंसोः ताञ्च तां तनुम्[१७] ॥३१॥

सिद्धर्षिरुवाच

आकर्ण्य तद्वचो म्लेच्छो मत्वा तथ्यं तदात्मनः । पुरुषं तमनुध्यायन् हृदा सस्नौ नदीजले[१८] ॥३२॥
निमज्ज्योन्मज्ज्य सर्वाङ्गं हस्ताभ्यां घर्षयन्तदा । निममज्ज पुनस्तत्र विचिन्त्य पुंस्त्वमेव तत्[१९] ॥३३॥
जलादुत्तीर्य सोऽप्याशु ददर्श स्वां तनुं द्विज । मुमुदे[२०] च भृशं प्रेक्ष्य चाऽऽत्मानं पुरुषोत्तमम् ॥३४॥
एतल्लिङ्गं मुदा भक्त्या चाऽपूपुजत्समर्हणैः । आषाढस्याऽसिताष्टम्यामन्तर्हितश्च कश्यपः ॥३५॥
उषित्वा तन्निशां तत्र शिव शिवेति संवदन् । विल्वपत्रैस्तमभ्यर्च्य विनिद्रः पुरुषोत्तमः ॥३६॥
प्रातः स्नात्वा शिवं भूयश्चाऽभ्यर्च्य विधिवद्धि सः । पारणं कृतवान् वन्यं भक्त्या निवेद्य शूलिने ॥३७॥
ततोऽगमन्मुदा युक्तः स्वगृहं पुरुषोत्तमः । तत्र तस्थौ सुखं विप्ररूपेण मोहयन् स्त्रियः ॥३८॥

कश्यपले भने – हे बाबु ! अघि गरेको पुण्य र अपुण्यको फल अवश्य भोग गर्नुपर्छ, तिमी दुःख नमान । हे नपुंसक ! पूर्वजन्ममा गरेको खराब र असल कर्मको फल त्यस व्यक्तिले त्यही शरीरद्वारा भोग गर्नुपर्छ । जसले यहाँ जे काम गरेको छ, त्यसै कर्मको फल अर्को जुनीमा उसले भोग गर्नुपर्छ । त्यसैले सधैँ कल्याण हुने काम गर्नुपर्छ, त्यसो भएपछि दैवले पनि उसको कल्याण गर्छन् । मैले यो काम गर्नुहुन्छ र यो काम गर्नुहुँदैन भन्ने विवेक जसलाई हुँदैन त्यसलाई मूढात्मा भनिन्छ ॥२५–२८॥

हे बाबु ! तिमीले पूर्वजन्ममा धर्म र अधर्मको विवेकै नगरीकन काम गऱ्यौ, त्यसैले गर्दा तिमी नपुंसक भयौ । त्यसैले तिमी त्यस तीर्थमा स्नान गर र यो लिङ्गको पूजा गर । तिमी यसै शरीरले नपुंसकत्वबाट मुक्ति पाउनेछौ । स्त्री अथवा पुरुष बन्ने चाहना हृदयदेखि नै राखेर यस ठाउँमा स्नान गर्ने व्यक्तिले स्त्री अथवा पुरुषको शरीर पाउन सक्छ ॥२९–३१॥

सिद्धऋषिले भने – म्लेच्छले ती ऋषिको कुरा सुनेर त्यसलाई आफ्नो वास्तविकता सम्झी हृदयले शिवरूप पुरुषको कामना गर्दै त्यस तीर्थमा स्नान गऱ्यो । त्यसले कहिले उत्रने र कहिले डुबुल्की मार्दै सम्पूर्ण अङ्गलाई त्यस तीर्थमा हृदयले पुरुषको शरीर पाउने इच्छा राखेर हातले सम्पूर्ण शरीर माड्दै जलमा आकाण्ठ निमग्न भयो । जलबाट बाहिर आएपछि उसले आफ्नो शरीरलाई सुन्दर पुरुषका रूपमा देख्यो र अत्यन्त आनन्दित भयो ॥३२–३४॥

त्यसपछि उसले आषाढ कृष्ण अष्टमीका दिन त्यस लिङ्गलाई विभिन्न पूजासामग्रीद्वारा भक्तिपूर्वक पूजा गऱ्यो । कश्यप ऋषि अन्तर्धान हुनुभयो । त्यस ठाउँमा शिव–शिव भनेर उसले रात बितायो । बेलपत्रले भगवान् शङ्करलाई पूजा गरेर रातभर जाग्राम बस्यो । बिहान फेरि स्नान गरेर शिवजीलाई उसले विधिपूर्वक पूजा गऱ्यो, वनका फलहरू भगवान् शङ्करलाई चढाएर व्रतको पारायण गऱ्यो । त्यसपछि त्यो उत्तम मानिस खुसी हुँदै आफ्नो घर गयो, ब्राह्मणको रूप लिएर स्त्रीजातिहरूलाई मोहित तुल्याउँदै आनन्दसित त्यहाँ बस्न थाल्यो ॥३५–३८॥

---

१५. भद्रो दैवः इति न.सं.पु.पाठः ।
१६. त्वया हि इति न.सं.पु.पाठः ।
१७. अत्र स्नानाल्लभेत्सोऽपि स्त्रीपुंसोस्तच्च तत्तनुम् इति न.सं.पु.पाठः ।
१८. समत्र वै इति न.सं.पु.पाठः ।
१९. भाव्य पुंसस्तनुं हृदा इति न.सं.पु.पाठः ।
२०. मुमोद इति न.सं.पु.पाठः ।

ततः क्वचित्स कालान्ते पञ्चत्वं प्राप्तवान् पुनः । सार्वभौमपतिर्भूत्वा चाऽभुनक् मेदिनीं सुखम् ॥३९॥
सहस्राब्दं सुखं भुक्त्वा तदन्ते च मृतः पुनः । श्रोत्रियस्य कुले जातो वेदशास्त्रविशारदः ॥४०॥
देशिकः सर्वशास्त्रज्ञो वेदवेदाङ्गतत्त्ववित् । विरक्तो निर्गतो गेहात्तीर्थान्तराय वै तदा ॥४१॥
जलाप्लवाद्धि तीर्थेऽस्मिंल्लिङ्गार्चनप्रभावतः । अत्रैव प्राप्तवान् विप्रः स्नात्वा तीर्थेषु भूतले ॥४२॥
आषाढ्यां पूर्णिमायां सः पूर्वाषाढर्क्षसंयुजि । स्नात्वा तीर्थोत्तमे भक्त्या चैतल्लिङ्गमपूपुजत् ॥४३॥
भूत्वा रात्रौ विनिद्रः स नक्तञ्चकार पारणम् । निवेद्याजाय नैवेद्यं वन्यं पुष्पोपहारकैः ॥४४॥
अवततार तद्यानं व्योम्नो दूतैः समं निशि । ववृषुः पुष्पपत्राणि[२१] लाजासारं समन्ततः ॥४५॥
तमास्थायाऽऽशु ते याने निन्युः शिवपुरं मुदा । वाद्यगीतमहोल्लासैरप्सरोगणसेवितम् ॥४६॥
सैवाऽभवद् गणश्रेष्ठो रुद्रस्याऽनुचरोऽनिशम् । जीवन्मुक्तोऽभवद् विप्रश्चैतल्लिङ्गप्रभावतः ॥४७॥
स्नात्वाऽस्मिन्नत्र या नार्यो लिङ्गमर्चन्ति चेतसा । विचिन्त्य पौरुषं स्वाङ्गं[२२] भवेयुः पुरुषा हि ताः ॥४८॥
प्रादुर्भूता विरूपाक्ष ! पुरुषाश्च तथाविधाः । नार्यो भूताऽबला भूयः पुमांसश्च न संशयः ॥४९॥
यः स्नात्वाऽत्र बुधो लिङ्गं प्रपूजयति भक्तितः । पूर्वजातिं परिज्ञाय रुद्रलोकं प्रगच्छति ॥५०॥
भूयोऽगच्छद्विरूपाक्षः यत्रास्ते स्फटिकेश्वरः । अवाच्यां योजनैकस्मिन्[२३] कान्तितीर्थेन वै समम् ॥५१॥
माहात्म्यमुक्तं प्रवरं मया ते[२४] तीर्थोत्तमस्यैव च शूलिनो हि ।
तत्कश्यपेशस्य विरूपनेत्र ! वक्ष्यामि चान्यं खलु तत्र पुण्यम् ॥५२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां कश्यपेश्वरमाहात्म्यं नाम त्रिनवतितमोऽध्यायः ॥९३॥

अनि त्यो मानिस केही समय बितेपछि दिवङ्गत भयो र अर्को जन्ममा चक्रवर्ती राजा भएर सम्पूर्ण पृथ्वीलाई आनन्दसित भोग गऱ्यो । हजार वर्षसम्म सुखभोग गरेर अन्त्यमा फेरि त्यो मऱ्यो । त्यसपछि वेदशास्त्रको ज्ञाता भएर वैदिक ब्राह्मणको कुलमा पैदा भयो । देश–विदेशको कुरा जान्ने, सम्पूर्ण शास्त्रको ज्ञाता, वेद–वेदाङ्गको तत्ववेत्ता त्यो ब्राह्मण विरक्त भएर तीर्थाटनका निमित्त घरबाट निस्कियो । यस तीर्थको जलमा स्नान गरेको र यस लिङ्गको पूजा गरेको प्रभावले गर्दा पृथ्वीमा रहेका सम्पूर्ण तीर्थहरूमा स्नान गरेर ब्राह्मण फेरि यसै ठाउँमा आइपुग्यो ॥३९–४२॥

पूर्वाषाढा नक्षत्रले युक्त भएको असारको पूर्णिमाको दिन यस तीर्थमा स्नान गरेर त्यस ब्राह्मणले भक्तिपूर्वक यस लिङ्गको पूजा गऱ्यो । त्यसले रातभर जाग्राम बसेर भगवान् शङ्करलाई वनमा पैदा भएका कन्दमूल, नैवेद्य र फूलहरू चढाएर व्रतको पारायण गऱ्यो । राति आकाशबाट दूतहरूले त्यहाँ विमानलाई ओह्राले, चारैतिर फूल र लाजाको वर्षा भयो । गाना, बजाना र ठूलो उत्सवका साथ अप्सराहरूद्वारा सुसेवित त्यस ब्राह्मणलाई ती शिवका दूतहरूले तुरुन्त यानमा राखेर शिवजीको लोकमा लगे । यसै लिङ्गको प्रभावले गर्दा जीवन्मुक्त भएर त्यो ब्राह्मण शिवजीका भक्त र गणका श्रेष्ठ सदस्य भए ॥४३–४७॥

जुन स्त्रीजातिले पुरुष हुन पाऊँ भन्ने चित्तले भावना गरेर यस तीर्थमा स्नान गरी यस लिङ्गको पूजा गर्छन्, तिनीहरू पुरुष हुन पाउँछन् । हे विरूपाक्ष ! त्यस किसिमका पुरुषहरू जीवन्मुक्त हुन्छन् र नारीहरू पुरुष हुन्छन्, यसमा सन्देह छैन । जुन विद्वान् मानिसले यहाँ स्नान गरेर भक्तिपूर्वक लिङ्गको पूजा गर्छ, त्यसले आफ्नो पूर्वजन्मको सबै कुरा थाहा पाउँछ र ऊ रुद्रलोक जान्छ । त्यसपछि विरूपाक्ष एक योजन पश्चिमतिर कान्तितीर्थका साथ जहाँ स्फटिकेश्वर महादेव रहनुभएको थियो, त्यसै ठाउँमा गए । हे विरूपाक्ष ! मैले तिमीलाई उत्तम तीर्थ र कश्यपेश्वर महादेवको माहात्म्य बताएँ, पुण्यदायक अरू पनि माहात्म्य बताउँछु ॥४८–५२॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा कश्यपेश्वरको माहात्म्यनामक त्रियान्नब्बेऔँ अध्याय पूरा भयो ।

---

२१. ववर्षुः पुष्पवर्षाणि इति न.सं.पु.पाठः ।
२२. भाव्य पुरुषतां स्वाङ्गम् इति न.सं.पु.पाठः ।
२३. योजनमात्रकेऽवाच्याम् इति न.सं.पु.पाठः ।
२४. प्रोक्तं मया ते माहात्म्यम् इति न.सं.पु.पाठः ।

चतुर्नवतितमोऽध्यायः

कान्तितीर्थस्फटिकेश्वरयोर्माहात्म्यम्

स्कन्द उवाच

तीर्थे च काश्यपे स्नात्वा विरूपाक्षो घटोद्भव। तेजस्वी समभूत्पूर्वं कुष्ठव्रणविवर्जितः ॥१॥
ततोऽगमद्विरूपाक्षो यत्राऽऽसीद् गोपदेश्वरः। कान्तितीर्थे मुदा स्नात्वा स्फटिकेशमपूजयत् ॥२॥
माघकृष्णचतुर्थ्यां स लिङ्गमभ्यर्च्य तन्निशि। पप्रच्छ नेमुनिं तत्त्वं तत्तीर्थलिङ्गयोर्मुने ॥३॥

विरूपाक्ष उवाच

नमस्ते भगवन् दान्त मुक्तिज्ञानप्रकाशक। भूयोऽहं[1] श्रोतुमिच्छामि माहात्म्यं तीर्थलिङ्गयोः ॥४॥
को मुक्तोऽभून्[2] मुने मर्त्य एतस्मिन् स्नातको विभो। लिङ्गार्चनात्तथा भूयः को मुक्तो वद मेऽधुना ॥५॥

सिद्धर्षिरुवाच

हिमवतः सुतश्चैष नाम्ना काकन्द एव च। स्फटिकैश्चन्द्रपाषाणै राजमानो ह्यभूद्गिरिः ॥६॥
एतत्पर्वतशृङ्गाच्च चन्द्रकान्तमणेः[3] पुरा। समुद्भूता नदी दिव्याः कन्दराल्लघुगामिनी ॥७॥
चन्द्रकान्तिर्नदीपुण्या हिमस्रवा तथापरा। तयोश्च सङ्गमे वत्स कान्तितीर्थमुदाहृतम् ॥८॥
एतत्तीर्थं विधिः प्रेक्ष्य मुमुदे[4] च भृशं द्विज। सस्नौ ततो मुदैतस्मिन् विधिवद्धि तदा सुखम् ॥९॥
विधाता जलमाप्लाव्य[5] चात्रैव ध्यातवान् विभुः। भक्त्या समाधिनात्मानं समाराधितवान् हरम् ॥१०॥
ततो लिङ्गं समुद्भूतं स्फटिकाश्ममयं शुभम्। आनर्च विधिवद्धाता भक्त्या पञ्चोपचारकैः ॥११॥
संपूज्य च ततो लिङ्गं धाताऽसौ विधिपूर्वकम्। समागमन्मुदा वत्स ! ब्रह्मलोकं सनातनम् ॥१२॥

अध्याय - ९४

कान्तितीर्थ र स्फटिकेश्वर वा गोपेश्वरको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! अघि विरूपाक्ष काश्यप तीर्थमा स्नान गरेर कुष्ठरोगबाट मुक्त भई तेजस्वी बनेका थिए। त्यसपछि विरूपाक्ष जहाँ गोपदेश्वर महादेव हुनुहुन्थ्यो, त्यहाँ गए। कान्तितीर्थमा आनन्दसित स्नान गरे र गोपदेश्वर वा स्फटिकेश्वर महादेवको पूजा गरे। माघ कृष्ण चतुर्थीको राति लिङ्गको पूजा गरेर। उनले त्यो तीर्थ र लिङ्गको तत्त्वका बारेमा नेमुनिसँग प्रश्न गरे ॥१-३॥

विरूपाक्षले भने – मुक्ति र ज्ञानलाई प्रकाशित तुल्याउने हे भगवन् ! हजुरलाई नमस्कार छ। म हजुरबाट यस तीर्थ र लिङ्गको माहात्म्य सुन्न चाहन्छु। यस तीर्थमा स्नान गरेर कुन मानिस मुक्त भयो ? यस लिङ्गको पूजा गर्नाले कसलाई मुक्ति मिल्यो ? हे प्रभु ! मलाई अब यो बताउनुहोस् ॥४-५॥

सिद्धर्षिले भने – काकन्द नाम गरेको स्फटिक र चन्द्रकान्तमणिले युक्त भएको पर्वत हिमालयको छोरो भएर पैदा भयो। यसै पहाडको टाकुरामा मणिमय गुफाबाट चन्द्रकान्ति नाम गरेको विस्तारै बग्ने दिव्य नदी पैदा भइन्। हे बाबु ! चन्द्रकान्ति नाम गरेको पवित्र नदी र हिमस्रवा नाम गरेकी अर्की नदीको सङ्गमलाई कान्तितीर्थ भनिएको छ। हे विप्र ! ब्रह्माजी यो तीर्थ देखेर अत्यन्त खुसी हुनुभयो। त्यसपछि उहाँले यस तीर्थमा आनन्द मान्दै विधिपूर्वक सुखसित स्नान गर्नुभयो। त्यसपछि ब्रह्माले यसै ठाउँमा स्नान गरेर भक्तिपूर्वक समाधि लगाई भगवान् शङ्करको ध्यान र आराधना गर्नुभयो। अनि त्यहाँ स्फटिक मणिले बनेको कल्याणदायक शिवलिङ्गको उत्पत्ति भयो। ब्रह्माजीले पञ्चोपचार विधिले सभक्ति त्यस लिङ्गको पूजा गर्नुभयो। हे बाबु ! त्यस लिङ्गलाई विधिपूर्वक पूजा गरेर ब्रह्माजी प्रसन्न हुँदै सनातन ब्रह्मलोक जानुभयो ॥६-१२॥

---

१. भूयो वः इति न.सं.पु.पाठः।
२. मुक्तोऽत्र इति न.सं.पु.पाठः।
३. एतत्पर्वतसानौ च चन्द्रकान्त्यमणेः पुरा। समुद्भवा, इति न.सं.पु.पाठः।
४. मुमोद इति न.सं.पु.पाठः।
५. जलाप्लाव्य ततो धाता इति न.सं.पु.पाठः।

सोमोऽपि च ततो ज्ञात्वा श्रुत्वा पितुर्मुखात्पुरा। म्लानदेहोऽगमत्तत्र मृगाङ्केन हतच्छविः ॥१३॥
ततो भक्त्याऽन्वितः सोमः संसस्नौ विधिपूर्वकम्। अपश्यत् स्वतनुं स्नात्वा कौमुदीललितच्छविम् ॥१४॥
यथा चाऽऽसीत्पुरा कान्तिः स्वदेहे निर्मले शुभे। आसीत्तद्द्विगुणा कान्तिर्मृगाङ्को मुमुदे भृशम् ॥१५॥
ततः सोमोऽपि काकन्दे समास्थायाऽत्र भक्तितः। आनर्च विधिवल्लिङ्गं पञ्चोपचारकैश्च सः ॥१६॥
स्फटिकेशस्तदा रुद्र आविर्भूतो विरूपदृक्। अवोचत्स शुभं वाक्यं सोमाय स्वात्मने विभुः ॥१७॥

स्फटिकेश्वर उवाच

तवाऽर्चनैश्च तुष्टोऽहं भक्तिभिश्च स्तवैर्विधो। वरं दास्येऽधुना तुभ्यं शृणु चैकाग्रमानसः[६] ॥१८॥
अद्यादि निर्मलो देहस्तव सोम ! भविष्यति। ज्योत्स्नाभिश्चैव संयुक्तः सर्वोपरि महाच्छविः ॥१९॥
लोकसाक्षी भवेः सोम ! लोकान् प्ररक्ष सन्ततम्। शीतलैः किरणैर्नित्यं मदंशस्त्वं न संशयः ॥२०॥
गच्छ सोम ! प्रसादान्मे व्योम्नि सञ्चर विज्वरः। अव्याहतगतिर्भूत्वा प्रपालय जगत्सुखम् ॥२१॥

सिद्धर्षिरुवाच

ततः समाययुर्देवाश्चात्र स्नातुं मुदाऽन्विताः। विमानैर्देवकन्याभिः समञ्च त्वरितं तदा ॥२२॥
प्रेक्ष्य चन्द्रमसा लब्धं जनास्त्वाह्लादनं वरम्। पूर्वस्य द्विगुणं शुभ्रं स्नातुमत्र समागताः ॥२३॥
स्नात्वा तत्र सुराश्चाऽन्ये लिङ्गमेतदपूपुजन्[७]। भक्त्योपचारकैर्दिव्यैः प्रार्थयन्तो[८] वरान् बहुन् ॥२४॥
सिद्धमनोरथाः सर्वे कान्तिसौन्दर्यविग्रहाः। ततो ययुश्च ते स्वर्गं हर्षविस्फुल्लमानसाः ॥२५॥
आसीत् कश्चिद् द्विजश्रेष्ठो धर्मदास इति श्रुतः। स कदाचिद्दिने चाऽत्र सम्प्राप्तवान् यदृच्छया ॥२६॥
स्नात्वा स्नात्वा च तीर्थेषु धर्मदासो रसातले। ज्ञात्वा प्रतिमां लिङ्गञ्च प्रपूजितुमिहाययौ ॥२७॥

मृगको चिह्नले गर्दा क्षीणकान्ति भएका चन्द्रमा पनि आफ्ना बाबुको मुखबाट त्यहाँको माहात्म्य सुनेर त्यस ठाउँमा गए। त्यसपछि चन्द्रमाले पनि भक्तिपूर्वक त्यस तीर्थमा स्नान गरे, अनि उनले चन्द्रिकाले गर्दा उज्यालो कान्ति भएको आफ्नो शरीरलाई देखे। जस्तो आफ्नो निर्मल शरीरमा अघि कान्ति थियो त्यसको दुई गुणा बढी कान्ति भयो। चन्द्रमा अत्यन्त प्रसन्न भए। त्यसपछि चन्द्रमाले पनि काकन्द नाम गरेको पर्वतमा बसेर सभक्ति विधिपूर्वक पञ्चोपचारले त्यस लिङ्गको पूजा गरे। हे विरूपाक्ष ! त्यसबेला स्फटिकेश्वर शङ्कर प्रकट हुनुभयो र आफ्नै आत्मा भएका चन्द्रमालाई भन्नुभयो ॥१३-१७॥

स्फटिकेश्वरले भन्नुभयो - हे चन्द्रमा ! तिम्रो पूजा, भक्ति र स्तुतिबाट म प्रसन्न भएँ, तिमीलाई वर दिन्छु, एकचित्त भएर सुन। हे चन्द्रमा ! आजदेखि तिम्रो शरीर निर्मल हुनेछ, सबैभन्दा बढी कान्तिले युक्त भएर सबैभन्दा माथि रहन पाउनेछौ। हे चन्द्रमा ! तिमी सबैका साक्षी बन, शीतल किरणहरूद्वारा प्राणीहरूको सधैं रक्षा गर, तिमी मेरै अंश हौ, शङ्का छैन। हे चन्द्र ! मेरो अनुग्रहले गर्दा नरोकिईकन सधैं तिमी तापरहित भएर आकाशमा भ्रमण गर, संसारको आनन्दसित पालना गर ॥१८-२१॥

सिद्धऋषिले भने - त्यसपछि यस ठाउँमा स्नान गर्न देवकन्याहरूका साथ विमान चढेर प्रसन्न हुँदै तुरुन्त देवताहरू आए। अघिको भन्दा दुई गुणा सेतो भएको आनन्ददायक वर चन्द्रमाले पाए भन्ने थाहा पाएर धेरै मानिसहरू यहाँ स्नान गर्न आए। त्यहाँ देवताहरूले स्नान गरेर भक्तिपूर्वक विभिन्न दिव्य पूजासामग्री लिएर धेरैथरी वर माग्दै यस लिङ्गको पूजा गरे। कान्ति र सौन्दर्यले युक्त भएर आफ्नो इच्छा पूर्ण गरी सबै देवताहरू हर्षले विभोर हुँदै स्वर्ग गए। धर्मदास नाम गरेको कुनै एउटा ब्राह्मण थिए, कुनै दिन ती आफूखुसी यस ठाउँमा आइपुगे। धर्मदास पृथ्वीमा रहेका विभिन्न तीर्थहरूमा स्नान गर्दै शिवको प्रतिमा र लिङ्ग छ भन्ने थाहा पाएर पूजा गर्न यहाँ आएका थिए ॥२२-२७॥

---

६. मनः समाहितः इति न.सं.पु.पाठः।
७. इदं लिङ्गमपूपुजन् इति न.सं.पु.पाठः।
८. प्रार्थयंश्च इति न.सं.पु.पाठः।

कान्तितीर्थे मुदा सस्नौ कुशहस्तो यथाविधि। अदर्शत् स्वां तनुं विप्रः कान्तियुक्तां यथा विधुः ॥२८॥
समालोक्य स्वमात्मानं विननाद भृशं द्विजः। समागत्य ततश्चाऽत्र चाऽपश्यदेनमीश्वरम् ॥२९॥
आश्विनपूर्णिमायां स चाऽश्विन्यृक्षेण संयुजि। अपूपुजल्लिङ्गमेतत् स्नातको भक्तिकृन्मुदा ॥३०॥
अपश्यत्कामधेनुं स व्रजन्तीं गगनेन वै। पदेनैकेन सम्पीड्य लिङ्गं पयःस्रवां निशि ॥३१॥
ततः प्रभृति लिङ्गं तद्विख्यातं गोपदेश्वरम्। मेने कृतार्थतां विप्रश्चाऽऽत्मानमात्मना तदा ॥३२॥
तन्निशायां मृतश्चाऽत्र प्राप्तकालो[१] द्विजोत्तमः। जप्यमाने तदात्मा वै लिङ्गार्चने च भक्तितः ॥३३॥
तमास्थाय ततो दूता याने निन्युः शिवालयम्। तालमृदङ्गगीतैस्तमप्सरोगणसेवितम् ॥३४॥
अद्याऽप्यसौ भवेद्विप्रः शङ्करानुचरोऽनिशम्। एतल्लिङ्गप्रसादाद्धि तीर्थस्य च विशेषतः ॥३५॥
एतल्लिङ्गञ्च येऽर्चन्ति कान्तितीर्थजलाप्लवाः। तपःकृष्णचतुर्दश्यां तेषां पुण्यफलं शृणु ॥३६॥
पूर्वजन्मार्जितैः पापैर्विमुच्यन्ते हि तत्क्षणात्। सार्वभौमा नृपा भूत्वा भुञ्जते सकलं सुखम् ॥३७॥
देहान्ते च शिवस्थानं ते यास्यन्ति विमानगाः। सेविताश्चाप्सरोभिश्च पुत्रभार्यासमन्विताः ॥३८॥
अतः पश्चिमदेशे च योजनादूर्ध्वदूरतः। गच्छ विरूपदृग् भूयो यत्र चण्डेश्वरो विभुः ॥३९॥
कन्दराया अधस्थानमुग्रतीर्थमुदाहृतम्। स्नातकस्तत्र चण्डेशपूजनादुद्रलोकभाक् ॥४०॥
रूपवती नदी श्रेष्ठा रुद्रावती तथापरा। सङ्गमे हि तयोर्दिव्यमुग्रतीर्थमुदाहृतम् ॥४१॥
एतद्धि तुभ्यं कथितं मया च धीमन्माहात्म्यं स्फटिकेश्वरस्य।
कान्त्याख्यतीर्थस्य विशेषतो वै चाऽऽधाय चित्ते कुरु तत्र भक्तिम् ॥४२॥
इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
कान्तितीर्थस्फटिकेश्वरयोर्माहात्म्यं नाम चतुर्नवतितमोऽध्यायः ॥९४॥

हातमा कुश लिएर विधिपूर्वक उनले प्रसन्न हुँदै कान्तितीर्थमा स्नान गरे। जसरी चन्द्रमा कान्तियुक्त भएका थिए, ती ब्राह्मणले आफ्नो शरीरलाई त्यस्तै कान्तिले सुसम्पन्न देखे। आफ्नो शरीरलाई सुन्दर देखेर ब्राह्मणले अत्यन्त खुसी भई उच्च स्वरले ॐकारको ध्वनि जगाए। त्यसपछि उनले यहाँ आएर भगवान् शङ्करलाई देखे। अश्विनीनक्षत्रले युक्त भएको आश्विन पूर्णिमाको दिन स्नान गरेर प्रसन्न हुँदै भक्तिपूर्वक तिनले यस लिङ्गको पूजा गरे ॥२८-३०॥

ती ब्राह्मणले राती एउटा पाउले लिङ्गलाई मिचेर दुध चुहाई आकाश मार्गले जान लागेकी कामधेनु गाईलाई देखे। त्यसै समयदेखि त्यस लिङ्गको नाम गोपदेश्वर भयो। ब्राह्मणले आफैँले आफैँलाई कृतार्थ ठाने। त्यसै रातमा लिङ्गको भक्तिपूर्वक पूजा गरेर जप्दाजप्दै लिङ्गात्मा भएका ती ब्राह्मण कालले गर्दा यसै ठाउँमा दिवङ्गत भए। अप्सराहरूका ताल, मादल र गानद्वारा सुसेवित ती ब्राह्मणलाई यानमा राखेर दूतहरूले शिवलोकमा लगे। आज पनि ती ब्राह्मण यो लिङ्ग र विशेषगरी तीर्थको कृपाले गर्दा सधैँ भगवान् शङ्करको अनुचर भएर बसेका छन्॥ ॥३१-३५॥

माघ कृष्ण चतुर्दशीका दिन कान्तितीर्थको जलमा स्नान गरेर जसले यस लिङ्गको पूजा गर्छन् तिनको पुण्यफल सुन्नुहोस्। तिनीहरू तुरुन्त पूर्वजन्ममा गरेका पापबाट मुक्त हुन्छन् र चक्रवर्ती राजा भएर सम्पूर्ण सुखभोग गर्न पाउँछन्। शरीरत्याग गरेपछि छोरा र पत्नीका साथै उनीहरू अप्सराद्वारा सेवित भएर यानमा चढी शिवलोक जान्छन् ॥३६-३८॥

कान्तितीर्थभन्दा पश्चिमतिर एक योजन पर जहाँ चण्डेश्वर भगवान् रहनुभएको छ, त्यस ठाउँमा जाऊ। गुफाको तलतिर उग्रतीर्थ छ, जसले त्यस तीर्थमा स्नान गरेर चण्डेश्वर भगवान् पूजा गर्छ, त्यो रुद्रलोकमा बस्न पाउँछ। त्यहाँ रूपवती र रुद्रावती नाम गरेका नदीहरू छन्। ती दुईको सङ्गमस्थलमा दिव्य तीर्थ छ, त्यसलाई उग्रतीर्थ भन्छन्। हे बुद्धिमान् ! मैले स्फटिकेश्वर र कान्तितीर्थको माहात्म्य तिमीलाई बताएँ। त्यसलाई भक्तिपूर्वक हृदयमा धारण गरेर त्यस ठाउँमा जाऊ ॥३९-४२॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा कान्तितीर्थ र स्फटिकेश्वरको माहात्म्यनामक
चौरान्नब्बेऔँ अध्याय पूरा भयो।

---

१. कालप्राप्तः इति न.सं.पु.पाठः।

पञ्चनवतितमोऽध्यायः

उग्रतीर्थ-चण्डेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

एवं सम्भाषितं वाक्यं नेमुनिना हितात्मना। समाकर्ण्य स तेजस्वी मुमुदे[1] च भृशं मुने ॥१॥
भूयो जगाम विप्रोऽसौ नेमुनिना समं मुने। यत्र चण्डेश्वरस्तस्थौ देव्या च प्रमथैः समम् ॥२॥
माघकृष्णस्य पञ्चम्यामुग्रतीर्थजलाप्लुतः। तन्निशायां विनिद्रोऽभूच्चण्डेश्वरमपूपुजत् ॥३॥
उषित्वा पूजकस्तत्र विप्रोऽसौ नेमुनिं मुनिम्। अपृच्छत्तीर्थमाहात्म्यं लिङ्गस्य चैव तत्त्वतः ॥४॥

विरूपाक्ष उवाच

भगवन् मुनिशार्दूल ! लोकधर्मप्रकाशकः। स्नातञ्च पूजितं लिङ्गं मयाऽत्र त्वत्प्रसादतः ॥५॥
एतल्लिङ्गं समुद्भूतञ्चैतत्तीर्थं कथं पुनः। केन प्रकाशितं लिङ्गं तीर्थञ्चैव तथा प्रभो ॥६॥
श्रोतुमिच्छाम्यहञ्चैतत्सर्ववार्ताविशारद। तयोः समुद्भवे तत्त्वं वद मे नेमुनेऽधुना ॥७॥

नेमुनिरुवाच

आसीत्कश्चित्पुरा विप्रश्च्यवनो नाम विश्रुतः। सत्यवादी जितक्रोधः सर्वसत्त्वदयापरः ॥८॥
स कदाचिद् द्विजः काले चात्रैव प्राप्तवान्मुनिः। आभ्रम्य सर्वतीर्थानि स्नातकस्तेषु सन्ततम् ॥९॥
उग्रतीर्थे मुदा सस्नौ च्यवनोऽयं यथाविधि। पितृदेवमुनीनाञ्च भक्त्या चकार तर्पणम्[2] ॥१०॥
विधिवदत्र स स्नात्वा चैतत्तीर्थे ह्यसौ द्विजः। स्कन्दगिरेरधः शृङ्गे[3] समचिन्तयदीश्वरम् ॥११॥
मौनी वाताशनो भूत्वा निराहारो जितेन्द्रियः। योगासनो निरालम्बश्चकाराऽत्र तपो भृशम् ॥१२॥

अध्याय - ९५

उग्रतीर्थ र चण्डेश्वरशिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! अर्काको सधैँ हित चाहने नेमुनिले भनेको वचनलाई सुनेर तेजस्वी विरूपाक्ष अत्यन्त खुसी भए। त्यसपछि ती विरूपाक्ष ब्राह्मण नेमुनिलाई साथमा लिएर जहाँ देवी र प्रमथगणका साथ चण्डेश्वर भगवान् बस्नुभएको थियो, त्यसै ठाउँमा गए। माघ कृष्ण पञ्चमीका दिन राती उग्रतीर्थमा स्नान गरेर त्यसै रातमा जाग्राम बसे र चण्डेश्वर महादेवको पूजा गरे। पूजा गरिसकेपछि ती ब्राह्मणले बसेर लिङ्गको र तीर्थको वास्तविक माहात्म्य नेमुनिसँग सोधे ॥१-४॥

विरूपाक्षले भने - हे भगवान् ! हे मुनिश्रेष्ठ ! हजुर सम्पूर्ण लोकधर्मको बारेमा व्याख्या गर्न सक्नुहुन्छ, हजुरको कृपाले गर्दा यस ठाउँमा रहेर मैले स्नान गरेँ, लिङ्गको पूजा गरेँ। सम्पूर्ण वृत्तान्त जान्न सक्ने हे नेमुनि ! यो लिङ्ग र यो तीर्थको उत्पत्ति कसरी भयो ? यो लिङ्ग र तीर्थलाई कसले प्रकाशित गऱ्यो ? तीर्थ र लिङ्गको उत्पत्तिको रहस्य म सुन्न चाहन्छु, मलाई त्यो रहस्य अब बताइदिनुहोस् ॥५-७॥

नेमुनिले भन्नुभयो - अघि सत्यवादी, रीसलाई जित्न सक्ने र सम्पूर्ण प्राणीहरूमाथि दया गर्न सक्ने च्यवन नाम गरेका कुनै ब्राह्मण थिए। ती ब्राह्मण कुनै समयमा सम्पूर्ण तीर्थहरू घुमेर तिनीहरूमा स्नान गर्दै यस ठाउँमा आइपुगे। च्यवन ऋषिले यस उग्रतीर्थमा आएर आनन्दसित विधिपूर्वक स्नान गरे। तिनले भक्तिपूर्वक पितृ, देवता र ऋषिलाई क्रमैले तर्पण दिए। च्यवन ऋषिले विधिपूर्वक यस तीर्थमा स्नान गरेर स्कन्द पर्वतभन्दा तल रहेको शिखरमा बसी भगवान् शिवको ध्यान गरे। जितेन्द्रिय, निराहारी, वायुपान गर्ने र मौनी भएर योगासन बाँधी निरालम्ब हुँदै उनले यस ठाउँमा खूब तपस्या गरे ॥८-१२॥

---

१. मुमोद इति न.सं.पु.पाठः। २. चकार तर्पणं भक्त्या पितृदेवमुनीन् क्रमात् इति न.सं.पु.पाठः।
३. सस्नौ इति न.सं.पु.पाठः।

एवं द्वादशवर्षं स योगीश्वरो हि निश्चलः। सांख्ययोगेन देहे स्वे ह्यचिन्तयत्परं शिवम् ॥१३॥
एतल्लिङ्गं समुद्भूतमीषे शुक्लाष्टमीदिने। आविर्भूतस्ततो रुद्रः सदेहः साम्प्रतं पुनः ॥१४॥
ततो योगीश्वरायेश इदं वचनमब्रवीत्। मयि भक्तिरतोऽसि त्वं तस्माद् दास्ये वरं शृणु ॥१५॥
यतो मम प्रिये स्नात्वा चोग्रतीर्थे मुदान्वितः। मां सुचिन्तितवानत्र च्यवन ! मुक्तिमाप्स्यसि[४] ॥१६॥
दत्त्वा वरं ततो रुद्रश्च्यवनाय स्वसेविने[५]। विद्योतयन् दिशो भाभिस्तल्लिङ्गेऽसौ तिरोदधे ॥१७॥
च्यवनं रुद्रदूता हि निन्युः शिवपुरं लघु। शैवे याने तमास्थाय रुद्रगणैः प्रसेवितम् ॥१८॥
कश्चित्कालान्तरे वीरश्चण्डो नाम महासुरः। अन्धकस्य सुतो वार्त्तां क्वचिच्छुश्राव भार्गवात् ॥१९॥
वार्तालापप्रसङ्गेन[६] चैतल्लिङ्गस्य सोऽसुरः। एतत्तीर्थस्य माहात्म्यं विमुक्तश्च्यवनः पुरा ॥२०॥
उपदेशं समादाय भक्त्या गुरोः प्रहर्षितः। उग्रतीर्थं समासाद्य मुदा सस्नौ तपोमनाः ॥२१॥
चैत्रशुक्लनवम्याञ्च चण्डासुरो महाबली। पूर्वोक्तविधिना चाऽत्र चोग्रतीर्थजलाप्लुतः ॥२२॥
तत्तीर्थे स्नातकश्चण्डो लिङ्गमेतदपूपुजत्। पञ्चोपचारकैर्भक्त्या जपार्चनमहोत्सवैः ॥२३॥
पांसुमुष्टिं सकृद् दत्त्वा[७] सन्तुष्टात्मा हि नित्यशः। तदग्रतोऽसुरो भूत्वा चाऽधोमुखः प्रतप्तवान् ॥२४॥
एवं तपश्चकाराऽसौ महोग्रं हि[८] दशाब्दकम्। एतल्लिङ्गाद्विनिर्गत्य व्याचष्ट वचनं शिवः ॥२५॥

बाह्र वर्षसम्म ती योगीश्वरले निश्चल भएर साङ्ख्य र योगको सिद्धान्त अनुसार आफ्नो शरीरमा शिवजीको ध्यान गरे। आश्विन महिनाको शुक्लपक्षको अष्टमीका दिन यस लिङ्गको प्रादुर्भाव भयो र त्यसपछि भगवान् रुद्र उत्पन्न हुनुभयो ॥१३-१४॥

भगवान् शङ्करले योगीश्वरलाई भन्नुभयो – तिमी मेरो भक्तिमा डुबेका छौ, त्यसैले तिमीलाई म वर दिन्छु, सुन। किनभने मेरो प्यारो यस उग्रतीर्थमा स्नान गरेर तिमीले मेरो ध्यान गऱ्यौ, त्यसैले हे च्यवन ! तिमी मुक्त होऊ। त्यसपछि आफ्ना भक्त च्यवनलाइ वरदान दिएर आफ्नो कान्तिद्वारा सम्पूर्ण दिशालाई उज्यालो पार्दै भगवान् रुद्र त्यसै लिङ्गमा अन्तर्धान हुनुभयो। शिवजीका दूतले रुद्रगणद्वारा सेवित च्यवन ऋषिलाई शिवको यानमा राखेर तुरुन्त शिवजीको लोकमा लगे। केही समयपछि अन्धक दैत्यको छोरो वीर चण्डले यो कुरा शुक्राचार्यबाट सुन्यो। कुरैकुराको प्रसङ्गमा त्यस राक्षसले यो लिङ्ग र तीर्थको माहात्म्य तथा च्यवन ऋषि अघि मुक्त भएका थिए भन्ने कुरा थाहा पायो ॥१५-२०॥

तपस्या गर्ने इच्छा भएको त्यस राक्षसले गुरुको उपदेश अनुसार खुसी हुँदै उग्रतीर्थमा पुगेर आनन्दसित स्नान गऱ्यो। चैत्र शुक्ल नवमीका दिन चण्डासुर नाम गरेको महाबली राक्षसले पूर्वोक्त विधिअनुसार यसै उग्रतीर्थको जलमा स्नान गऱ्यो। त्यस तीर्थमा स्नान गरेर चण्डासुरले पञ्चोपचार विधिद्वारा भक्तिपूर्वक जप, अर्चना र उत्सवका साथ यस लिङ्गको पूजा गऱ्यो। एक मुठ्ठी धूलो एकपटक मात्रै खाएर सधैं सन्तोषी बनेर त्यस लिङ्गको अगाडि उँधोमुन्टो लगाउँदै त्यस राक्षसले तपस्या गऱ्यो। यसरी त्यस राक्षसले दश वर्षसम्म उग्र तपस्या गऱ्यो। त्यसपछि भगवान् शिवले लिङ्गबाट निस्किएर त्यस राक्षसलाई भन्नुभयो ॥२१-२५॥

---

४. विमुक्तश्च्यवन ! भवेः इति न.सं.पु.पाठः।
५. स्वभक्तिने इति न.सं.पु.पाठः।
६. कथ्यमानप्रसङ्गेन इति न.सं.पु.पाठः।
७. भक्ष्य इति न.सं.पु.पाठः।
८. महोग्रेण इति न.सं.पु.पाठः।

रुद्र उवाच

सन्तुष्टस्तव भक्त्याऽहं तस्माद्दास्ये वरं हि ते। वरं वरय मत्तस्त्वं त्वदीप्सितञ्च साम्प्रतम् ॥२६॥
उग्रेण तपसा यस्मान्मत्तीर्थे स्नानतो यतः। स्वनाम सदृशं चार्य ![९] कठोरं तप्तवान्मयि ॥२७॥

चण्डासुर उवाच

नमो रुद्राय देवाय देवानां पतये नमः। उग्राय सूग्ररूपाय चोग्रवरप्रदाय च ॥२८॥
त्रिलोकानां प्रभुत्वं मे सर्वोन्नतपराक्रमः। देवासुरैस्तथाचाऽन्यैरवध्यत्वं प्रदीयताम् ॥२९॥
द्रवन्तु प्रेक्ष्य मां[१०] सर्वे युद्धे वापि सुरासुराः। मत्पतत्त्रिप्रहारैस्ते भवन्तु च भयान्विताः[११] ॥३०॥
मन्नाम्ना तव भूतेश नामाद्यादि भवेत्[१२] प्रभो। चण्डेश्वर इति ख्यातं कृतार्थः स्यान्ततो ह्यहम् ॥३१॥

नेमुनिरुवाच

ओमिति च प्रतिश्रुत्य तिरोधानं ययौ शिवः। एतल्लिङ्गे तदा विप्र ! वरं दत्त्वा स सेविने[१३] ॥३२॥
चण्डोऽपि प्रययौ स्वर्गं योद्धुं तत्र वरान्वितः। युयोध स सुरैः सार्द्धं भृशं मिथो जयैषिभिः ॥३३॥
विद्राव्य तरसा देवान् सप्तलोकान् परिभ्रमन्। तेभ्यो धनानि सङ्गृह्य[१४] सप्तपातालमागमत् ॥३४॥
तत्रापि सोऽजयल्लोकान्प्रेतानपि च[१५] पन्नगान्। आदाय तद्धनं चण्डो[१६] मेदिनीतलमागमत् ॥३५॥
सर्वांश्च मेदिनीपालानजयदत्र विक्रमैः। कोऽपि नास्तीति योद्धुं म इति चिन्ताकुलोऽभवत् ॥३६॥
यस्माल्लब्धो वरः[१७] पूर्वं तेन समं हि युद्धयते। कृत्वेति मनसा चण्डो चाऽत्रैवमगमत्पुनः ॥३७॥
सम्पूज्य विधिवल्लिङ्गं प्रार्थयामास शङ्करम्। युद्धं देहि विभो ! मह्यं भवता सह नाऽपरैः ॥३८॥

शङ्करले भन्नुभयो – म तिम्रो भक्तिबाट सन्तुष्ट भएको छु, त्यसैले तिमीलाई म वर दिन्छु। अब मसित तिमीलाई जे इच्छा लाग्छ, त्यो वर माग किनभने तिमीले मेरो तीर्थमा स्नान गरेर उग्र तपस्या गऱ्यौ, मलाई उद्देश्य गरेर आफ्नो जस्तो नाउँ छ, त्यस्तै कठोर तपस्या गऱ्यौ ॥२६–२७॥

चण्डासुरले भन्यो – उग्र किसिमको वर दिने उग्रभन्दा पनि उग्र रूप भएका देवताका पति रुद्रदेवलाई नमस्कार छ। म तीनै लोकको अधिपति हुन पाऊँ, मेरो सबैभन्दा ठूलो पराक्रम होस्, मलाई देवता, राक्षस र अरू कसैले पनि मार्न नसकून्– यही वर दिनुहोस्। लडाईंमा मलाई देखेर मेरो बाणको प्रहारले डराउँदै देवता र राक्षसहरू सबै भागून्। हे भगवान् शङ्कर ! आजदेखि मेरो नामबाट हजुरको चण्डेश्वर भन्ने नाम रहोस्। त्यति भयो भने म कृतार्थ हुनेछु ॥२८–३१॥

नेमुनिले भन्नुभयो – हे ब्राह्मण ! हुन्छ भनी भक्तलाई वर दिएर भगवान् शिव यसै लिङ्गमा अन्तर्धान हुनुभयो। वर पाएपछि चण्डासुर पनि युद्ध गर्नका लागि स्वर्ग गयो। जित्न चाहने देवताहरूका साथ उसले खूबसित युद्ध गऱ्यो। देवताहरूलाई जोडसित हराएर सात लोक घुम्दै तिनीहरूबाट सम्पत्ति लिएर त्यो पाताल गयो ॥३२–३४॥

त्यहाँ पनि उसले सबै प्राणीहरू, प्रेतहरू र सर्पहरूलाई जित्यो। त्यसपछि त्यो चण्डासुर तिनीहरूबाट सम्पत्ति लिएर पृथ्वीतलमा आयो। उसले आफ्नो पराक्रमद्वारा सम्पूर्ण राजाहरूलाई जित्यो, त्यसपछि मसँग लड्ने योद्धा अब कोही रहेन भनेर चिन्तित भयो। जसबाट अघि वर पाएको थिएँ, अब त्यसैसित लड्छु भन्ने मनमा लिएर चण्डासुर त्यसै ठाउँमा गयो। उसले विधिपूर्वक लिङ्गको पूजा गरेर भगवान् शङ्करसित प्रार्थना गऱ्यो – हे प्रभु ! मलाई हजुरसित लड्ने अवसर दिनुहोस्, अरूसित होइन ॥३५–३८॥

---

९. ते नाम्ना सदृशेनार्य इति न.सं.पु.पाठः।
१०. मां प्रेक्ष्य दुद्रुवुः इति न.सं.पु.पाठः।
११. चापि विभीषणान्विताः इति न.सं.पु.पाठः।
१२. चाद्यादि भवतु इति न.सं.पु.पाठः।
१३. स भक्तिने इति न.सं.पु.पाठः।
१४. अवलम्ब्य वसून् तेभ्यः इति न.सं.पु.पाठः।
१५. सोऽजयल्लोकान्प्रेतगणांश्च इति न.सं.पु.पाठः।
१६. तद्वसूंश्चण्डः इति न.सं.पु.पाठः।
१७. यस्माल्लब्धवरम् इति न.सं.पु.पाठः।

त्वत्प्रसादाद् गतो योद्धुं त्रैलोक्ये च मया विभो। योद्धा प्राप्तो न कुत्रापि तस्मादत्रागतस्त्वयि[१८] ॥३९॥
करौ कण्डूयमानौ मे युद्धलालसमानिनः। भवता सह योद्धव्यं नान्यैः समुत्सहे क्वचित् ॥४०॥

नेमुनिरुवाच

श्रुत्वा च पौरुषं वाक्यं लिङ्गात्समुद्भूतो हरः। क्रोधेन मूर्च्छितो विप्र भीमरूपभयावहः ॥४१॥
प्रलयानलसङ्काशः शूलमुद्यम्य सत्त्वरम्। युयोध तेन सार्द्धञ्च त्रासयन् सर्वजीविनः ॥४२॥
शूलपाणिं समुद्दिश्य चण्डस्तीक्ष्णशरैस्त्रिभिः। जघान त्वरितं रुद्रं सिंहनादं ननाद च ॥४३॥
अपतत्तत्कराच्छूलं भुवि क्षिप्रं हरः पुनः। जग्राह लघु तच्छूलं हन्तुमुद्यतवाँश्च तम् ॥४४॥
चिक्षेप तमुरोदेशे शूलं रुद्रो भृशं तदा। स शूरश्च व्रणांकोऽसौ पपात भुवि तत्क्षणात् ॥४५॥
अवदत्तत्र चण्डोऽसौ शिवशिवेति शङ्करम्। तन्नामग्रहणाद् भक्त्या मृतो नैव विरूपदृक् ॥४६॥
क्षणं यथा समुत्तीर्य प्रतस्थौ युद्धलालसः। भक्त्याभ्यर्च्य पुनर्लिङ्गं प्रार्थितवान् वरं मुहुः ॥४७॥
ततश्च प्रमथाश्चात्र समागत्य हिमालयात्। शस्त्रास्त्रेभ्यश्च तं रुद्ध्वा[१९] चिक्षिपुर्युगपद् भृशम् ॥४८॥
ववृषुश्च[२०] शरासारान् तस्योपरि समन्ततः। पुनर्जघ्नुश्च शस्त्रास्त्रैः प्रमथास्तमितस्ततः ॥४९॥
आदाय गण्डशैलान्[२१] स दुद्राव प्रमथान् प्रति। चिक्षेप त्वरितं चण्डः प्रमथेषु च[२२] तच्छिलाः ॥५०॥
उत्पाट्य शैलशृङ्गं[२३] स चण्डः क्रोधप्रमूर्च्छितः। अभिदुद्राव तत्सैन्यं समुद्यतकराचलः ॥५१॥
दुद्रुवुः प्रमथाः शीघ्रं तमालोक्य दिशो दश। सम्प्रेक्ष्य मत्तमातङ्गं मृगा इव भयाद्वने ॥५२॥

हजुरको कृपाले तीनै लोकमा युद्ध गर्न गएँ, कतै पनि मसँग लड्ने योद्धा प्राप्त भएन। यसैले हजुरसित आएँ। युद्धको चाहनाले मात चढेको हुँदा मेरा दुईवटा हात चिलाएका छन्, हजुरसित लडाइँ गर्छु, अरू कसैसित पनि गर्न चाहन्न ॥३९–४०॥

नेमुनिले भन्नुभयो – हे ब्राह्मण ! यस्तो कठोर वाक्य सुनेर शिवजी लिङ्गबाट उत्पन्न हुनुभयो र डरलाग्दो भएर क्रोधले मूर्च्छित हुनुभयो। प्रलयकालीन अग्निजस्तै भएका शिवजीले तुरुन्त त्रिशूल उठाएर सम्पूर्ण प्राणीहरूलाई त्रास पैदा गर्दै त्यस दैत्यसित युद्ध गर्नुभयो। शिवजीलाई ताकेर चण्डासुरले तीनवटा तीखा बाणले तुरुन्त हिर्कायो र सिंहनाद गर्‍यो। त्यस दैत्यको हातबाट फेरि शूल बज्रियो। त्यसपछि फेरि शिवजीले त्यसलाई मार्ने विचारले तुरुन्त त्रिशूल समात्नुभयो। भगवान् रुद्रले त्यसको छातीमा जोडसित त्रिशूल प्रहार गर्नुभयो। त्यो वीर राक्षस घायल भएर तुरुन्तै भुइँमा पछारियो ॥४१–४५॥

हे विरूपाक्ष ! त्यस ठाउँमा यस चण्डले भगवान् शङ्करलाई शिव शिव भनेर बोलायो। भक्तिपूर्वक भगवान्को नाम लिएको हुँदा त्यो राक्षस मरेन। एकछिनपछि उठेर फेरि लड्ने इच्छाले लिङ्गको पूजा गरेर बारम्बार प्रार्थना गर्‍यो। त्यसपछि हिमालयबाट प्रमथ गणहरू त्यहाँ आए। त्यस चण्डलाई रोकेर त्यसमाथि एकैचोटि शस्त्र तथा अस्त्रहरू प्रहार गरे। प्रमथ गणहरूले त्यस चण्डासुरमाथि चारैतिरबाट बाणहरूको वर्षा गरे। त्यसलाई यताउतिबाट शस्त्र अस्त्रले फेरि पनि हाने। त्यो चण्डासुर ढुङ्गाहरू लिएर प्रमथ गणहरूप्रति जाइलाग्यो। तुरुन्त त्यसले प्रमथगणहरूमाथि ढुङ्गा फ्याँक्यो। त्यो चण्डासुर रीसले मूर्च्छित हुँदै पहाडको थुम्को उखेलेर हातमा लिई प्रमथ आदि गरिएको गणहरूतर्फ जाइलाग्यो। जसरी वनमा उन्मत्त भएको हात्तीलाई देखेर मृगहरू डरले भाग्छन्, त्यसरी नै त्यस चण्डासुरलाई देखेर प्रमथ आदि गरिएका गण दशै दिशातिर तुरुन्त दगुरे ॥४६–५२॥

---

१८. चातश्चात्रगतस्त्वयि इति न.सं.पु.पाठः।
१९. शस्त्रास्त्राणि च तं रुध्य इति न.सं.पु.पाठः।
२०. ववर्षुश्च इति न.सं.पु.पाठः।
२१. गण्डशैलान् इति न.सं.पु.पाठः।
२२. प्रमथेभ्यश्च इति न.सं.पु.पाठः।
२३. शैलसानुम् इति न.सं.पु.पाठः।

युयुधुः प्रमथा भूयः सम्भूय तेन वै समम्। तत्सैन्येष्वसुरश्चण्डः शैलशृङ्गं[२४] समाक्षिपत् ॥५३॥
यूथीभूय ततः शैवा चाऽब्रुवन् शूलिनं पुनः। विमृश्य च मिथो विप्र ! तस्य नाशस्य कारणम् ॥५४॥

प्रमथा ऊचुः

एतल्लिङ्गमसौ पापः सम्पूज्य लब्धवान् वरम्। ततो लब्धवरश्चण्डोऽभवत् त्रैलोक्यजिद्विभो ॥५५॥
वरलाभाद् हि[२५] ते चण्डो युध्यति भवता समम्। अनेन च समं योद्धुं भुवि को विद्यते प्रभो ॥५६॥
तस्मात् साक्षाद् त्वया लिङ्गं द्रुतमुत्सार्यतां भुवः[२६]। अदर्शनाद् भवं तं स क्षीणवरो भविष्यति ॥५७॥

नेमुनिरुवाच

तथ्यं कृत्वा तदा रुद्रः प्रमथानां मुखेरितम्। अन्तर्दधे भुवि क्षिप्रं स्वतनुना समं विभुः ॥५८॥
असृजत् प्रमथानीके शरासारं समन्ततः। तमुद्दिश्याशु शस्त्रास्त्रैर्जघान च रुषा भृशम् ॥५९॥
असहच्च ततश्चण्डो बाणवृष्टिं गणेरिताम्। समुद्यम्य गदां क्रोधादभिदुद्राव तान् भृशम् ॥६०॥
ततस्तु गदया चण्डः प्रमथानीकमाशु च। अभिद्रुत्य च तान् देवान् कारयामास तत्क्षणात्[२७] ॥६१॥
चण्डगदाप्रहारेण रुधिराक्तकलेवराः[२८]। दुद्रुवुः प्रमथा भीत्या हिमवदद्रिगह्वरम्[२९] ॥६२॥
ततोऽपश्यद्दिशः सर्वा निरातङ्काः सुरैस्तदा। अन्वेषयद् हरञ्चण्डो योद्धुं तेन समं पुनः ॥६३॥
व्यक्ताङ्गेन समं लिङ्गं तिरोदधे क्षितौ द्रुतम्। अधावत्सिंहनादेन प्रेक्ष्याऽन्तिकं तमर्चितुम् ॥६४॥
भो भो विभो महेशान ! त्रिभुवनेश्वरोऽस्यपि। त्यक्त्वा युद्धं मया सार्द्धं पलायसे भवान् कुतः ॥६५॥

फेरि प्रमथगण जम्मा भएर त्यस चण्डासुरसित युद्ध गरे। चण्डासुरले पनि तिनीहरूमाथि पहाडका ढिस्काहरू फ्याँक्यो। त्यसपछि एकत्रित भएका शिवका गणहरूले परस्पर सल्लाह गरेर शङ्करलाई त्यसको बधको रहस्य बताए ॥५३-५४॥

प्रमथगणले भने - हे प्रभु ! त्यस पापी चण्डले त्यस लिङ्गको पूजा गरेर वर पाएको छ। यसैले गर्दा यो स्वर्ग, मर्त्य र पाताल तीनै लोकलाई जित्न समर्थ भएको छ। हजुरबाट वर पाएको हुँदा चण्डासुर हजुरसँग नै लड्न तयार भएको छ। हे प्रभु ! योसँग लड्ने संसारमा कोही पनि छैन। त्यसैले हजुरले यो लिङ्गलाई पृथ्वीबाट हटाउनुहोस्, शङ्करलाई नदेखेपछि यसले पाएको वर घटेर जानेछ ॥५५-५७॥

नेमुनिले भन्नुभयो - प्रमथगणहरूले भनेको वचनलाई सत्य सम्झिएर भगवान् रुद्र आफ्नो लिङ्गका साथै तुरुन्त पृथ्वीबाट अन्तर्धान हुनुभयो। रीसले मूर्च्छा परेको त्यस चण्डले चारैतिरबाट प्रमथगणहरूमाथि बाणहरूको वृष्टि गऱ्यो। प्रमथगणलाई ताकेर तुरुन्त रीसले जोडसित शस्त्र अस्त्रहरू प्रहार गऱ्यो। प्रमथगणहरूले हिर्काएको बाणको वर्षालाई सहेर रीसले गर्दा उज्याउँदै चण्डासुर प्रमथगणको सेनामाथि वेगपूर्वक जाइलाग्यो र प्रमथगणलाई तितरबितर पाऱ्यो ॥५८-६०॥

त्यसपछि चण्डासुरले गदा लिएर प्रमथगणहरूमाथि तुरुन्त प्रहार गऱ्यो। ती देवता र तिनीहरूका सेनालाई पनि तितरवितर तुल्यायो। चण्डको गदाको प्रहारले गर्दा रक्ताम्य शरीर भएका प्रमथगणहरू डरले हिमालय पर्वतको गुफातिर भागे। त्यसपछि चण्डले सम्पूर्ण दिशाहरूमा खोजी गर्दा देवता नभएको पायो र उसले लड्नका लागि भगवान् शङ्करको खोजी गऱ्यो। प्रकट भएको अङ्गका साथै शिवलिङ्ग पृथ्वीमा अन्तर्धान भयो भन्ने विचार गरेर त्यो चण्ड सिंहनाद गर्दै लिङ्गको पूजा गर्नका लागि दौडियो। हे भगवान् महेश्वर ! तीनै लोकका मालिक भएर पनि मसित लड्न छोडेर हजुर कता भाग्दै हुनुहुन्छ ? ॥६१-६५॥

---

२४. शैलसानुम् इति न.सं.पु.पाठः।
२५. लब्धवराद्धि इति न.सं.पु.पाठः।
२६. भवाँल्लिङ्गं समुपसर्प्यतां भुवि इति न.सं.पु.पाठः।
२७. तद्वाहिन्यामितस्ततः इति न.सं.पु.पाठः।
२८. रुधिरक्लिन्नदेहिनः इति न.सं.पु.पाठः।
२९. भीष्माद्धिमवदद्रिगह्वरम् इति न.सं.पु.पाठः।

इत्येतद्वचनं श्रुत्वा तत्कालं तेन चोदिता। विनिर्ययौ बिलाद्देवी चण्डरूपा भयङ्करी ॥६६॥
भीमा चतुर्भुजैर्युक्ता चण्डिका चण्डविक्रमा। ललज्जिह्वा त्रिनेत्रा सा सर्वाभरणभूषिता ॥६७॥
प्रेतस्था च महोग्रास्या खड्गचर्मकरोद्यता। रक्ता देहप्रभाश्यामा सा[३०] क्रोधेन प्रमूर्च्छिता ॥६८॥
व्याजहार पुनश्चण्डो विहस्य त्वरितं तदा। मत्वा पराक्रमैर्हीनं स्त्रीरूपं विदधे विभुः ॥६९॥
स्त्रीषु न प्रहरेच्छस्त्रैः कृत्वेति वा महाविभुः। तथापि प्रहरिष्यामि चास्त्रं भवति ! ते नमः ॥७०॥

देव्युवाच

किं कुरुषेऽधुना मूढ ममाग्रेऽसत्यवल्गनम्[३१]। दर्शयस्व बलं स्वं मे यदि चण्ड ! पराक्रमी ॥७१॥
मां न जानीहि हे मूढ ! दुर्बलां केवलां स्त्रियम्[३२]। अनेन मूढ ! रूपेण जगद्विनाशितं पुरा।
त्वां सान्वयं ध्रुवं हत्वा पास्यामि त्वदसृङ् मुदा ॥७२॥
ततो देवा मुदा स्वर्गे स्थास्यन्ति सुचिरं भृशम्।

नेमुनिरुवाच

ततो युद्धमभूत्तीव्रं सर्वलोकभयङ्करम् ॥७३॥
दिव्यवर्षशतं व्याप्य देव्याश्चण्डस्य वै भृशम्। ततो युयुधतुस्तौ तु प्रहारैरुपसर्पणैः ॥७४॥
गण्डशैलैश्च शस्त्रास्त्रैः प्रहरन्तौ च सानुभिः। क्रोधेन मूर्च्छितश्चण्डश्चाभिद्रुत्य धनुष्करः ॥७५॥
वाणवर्षञ्चकाराशु देव्युपरि समन्ततः। खड्गोद्यता तदा देवी प्रगृह्य तच्छिरोरुहम् ॥७६॥
सव्यकरेण खड्गेन चाच्छिनत्तस्य कन्धराम्। खड्गकपालहस्तां तां तद्रक्तोक्षितविग्रहाम् ॥७७॥
तुष्टुवुर्देवताः प्रेक्ष्य भीमास्यां क्रोधरूपिणीम्। चण्डिकायै महादेव्यै चण्डरूपे नमोऽस्तु ते ॥७८॥

त्यस चण्डले भनेको यो बोली सुनेर चण्डरूप लिएकी डरलाग्दी देवी तुरुन्त छिद्रबाट बाहिर निस्कनुभयो। उहाँ डरलाग्दो हुनुहुन्थ्यो, उहाँका चार हात थिए, डरलाग्दो पराक्रमले युक्त भएकी चण्डिकाको जिब्रो ज्यादै चञ्चल थियो, उहाँका तीन आँखा थिए र सम्पूर्ण गहना लगाउनुभएको थियो। चण्डिका प्रेतमाथि बस्नुभएको थियो, डरलाग्दो मुख थियो, हातमा तरवार र छाला लिनुभएको थियो, रातो र कालो मिसिएको उहाँको कान्ति थियो, चण्डिका क्रोधले मूर्च्छित हुनुभएको थियो। त्यसपछि फेरि चण्डले हाँसेर तुरुन्त भन्यो – आफूलाई निर्धो ठानेर भगवान्ले स्वास्नी मानिसको रूप लिनुभएछ। अथवा भगवान् शङ्करले स्वास्नी मानिससित यसले शस्त्र प्रहार गर्दैन भनेर यो रूप लिनुभएको होला, तर म शस्त्र प्रहार गर्छु। हे देवी ! हजुरलाई नमस्कार छ ॥६६–७०॥

देवीले भन्नुभयो – हे मूर्ख ! अहिले मसित किन बकबक गर्छस् ? हे चण्ड ! यदि तँ पराक्रमी छस् भने मलाई आफ्नो बल देखा। हे मूर्ख ! तँ मलाई खाली निर्धो आइमाई नठान्। हे मूर्ख ! यसै रूपले अघि संसारको प्रलय गरेकी थिएँ। सपरिवार तँलाई मारेर तेरो रगत आनन्दसित पिउनेछु, त्यसपछि देवताहरू स्वर्गमा गएर आनन्दसित धेरै समयसम्म बस्न पाउनेछन् ॥७१–७३॥

नेमुनिले भन्नुभयो – त्यसपछि चण्ड र देवीको सय वर्षसम्म सम्पूर्ण प्राणीलाई त्रास पैदा गर्ने ठूलो युद्ध भयो। त्यसपछि ती दुईले बाण, थुम्का, शस्त्र, अस्त्र फ्याँकाफ्याँक गरी युद्ध गरे। रीसले मूर्छा परेको त्यस चण्डले हातमा धनुष लिएर दौडदै गएर देवीमाथि चारैतिरबाट तुरुन्त बाण वर्षा गर्‍यो। तरवार लिएकी देवीले पनि दैत्यको शिरमा समातेर दाहिने हातको तरवारले त्यसको घाँटी छिनाल्नुभयो। तरवार र टाउको हातमा लिएकी, दैत्यको रगतले भिजेकी, डरलाग्दो मुख भएकी र क्रुद्ध चण्डिकालाई देखेर देवताहरूले स्तुति गरे ॥७४–७८॥

---

३०. श्यामप्रभादेहा तत् इति न.सं.पु.पाठः। ३१. न कथ्यसेऽधुना मूढ मेऽग्रे वितथवल्गणम् इति न.सं.पु.पाठः।
३२. त्वं स्त्रीमबलाञ्च केवलाम् इति न.सं.पु.पाठः।

चण्डदैत्यमहापापप्रणाशिन्यै नमो नमः । एवं स्तुत्वा सुरा देवीं पुष्पवर्षैः समर्हयन् ॥७९॥
ययुः स्वर्गं पुनर्विप्र ! हर्षपूरितमानसाः । सा देवी तद्बिले शीघ्रं विलीना च तदा पुनः ॥८०॥
गूढरूपा च साऽद्यापि भवेच्चण्डेश्वरी द्विज । अद्यापि च गणश्रेष्ठोऽभवच्चण्डो महाबली ॥८१॥
देव्याः खड्गप्रपूताङ्गोऽभवद् रुद्रप्रसादतः । अत्रैव पूजितं[33] लिङ्गं धनेश्वर इति श्रुतम् ॥८२॥
उग्रतीर्थे सुखं स्नात्वा भक्त्या विरूपदृक् पुनः ।

माहात्म्यमेतत् कथितं च गुह्यं[34] चण्डेश्वरस्यार्य भवत्समक्षे[35] ।
उग्राख्यतीर्थस्य कृता[36] प्रशंसा भक्तोऽसि तीर्थस्य पिनाकिनश्च[37] ॥८३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
चण्डेश्वरोग्रतीर्थयोर्माहात्म्यं नाम पञ्चनवतितमोऽध्यायः ॥९५॥

अत्यन्त रिसाहा स्वरूप भएकी हे महादेवी ! चण्डिके अजुरलाई नमस्कार छ। चण्ड नाम गरेको दैत्यरूपी पापलाई नाश गर्ने परमेश्वरीलाई नमस्कार छ, नमस्कार छ। यसरी देवताहरूले स्तुति गरेर देवीलाई फूल वर्षा गरे। हे ब्राह्मण ! त्यसपछि प्रसन्न चित्त भएर देवताहरू स्वर्ग गए। हे ब्राह्मण ! ती देवी तुरुन्त छिद्रमा विलीन हुनुभयो, तिनको रूप आज पनि गुप्त छ। चण्डेश्वरी भनेकी तिनै देवी हुनुहुन्छ। देवका खड्गको प्रहारबाट पवित्र अङ्ग भएको महाबली चण्ड रुद्रको कृपाले गर्दा आज पनि भगवान् शिवको गणमा श्रेष्ठ भएर रहेको छ। हे विरूपाक्ष ! उग्रतीर्थमा भक्तिपूर्वक स्नान गरेर धनेश्वर नामले प्रसिद्ध भएको शिवलिङ्गको पूजा गर ॥७९–८२½॥

हे सज्जन विरूपाक्ष ! मैले यो गुप्त चण्डेश्वरको माहात्म्य बताएँ। शिवजीको तीर्थको बारेमा तिम्रो ठूलो भक्ति छ, त्यसैले मैले तिमीलाई उग्रतीर्थको माहात्म्य पनि बताएँ ॥८३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा चण्डेश्वर र उग्रतीर्थको माहात्म्यनामक
पन्चान्नब्बेऔं अध्याय पूरा भयो।

---

३३. पूज्यताम् इति न.सं.पु.पाठः।
३४. एतच्च गुह्यं कथितं माहात्म्यम् इति न.सं.पु.पाठः।
३५. मया विरूपदृक् इति न.सं.पु.पाठः।
३६. पुनः इति न.सं.पु.पाठः।
३७ यस्मादिग्गिरिशे च तीर्थे इति न.सं.पु.पाठः।

षण्णवतितमोऽध्यायः

धनेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

उग्रतीर्थे ततः स्नात्वा चण्डेश्वरं प्रपूज्य च। उग्रेण तपसा युक्तो विरूपाक्षोऽभवत्पुरा ॥१॥
माघकृष्णशुभे पक्षे षष्ठ्यां पूजितवान् हरम्। धनेश्वरं महालिङ्गं भक्त्या पञ्चोपचारकैः ॥२॥
सम्पूज्य विधिवल्लिङ्गं तन्माहात्म्यं च नेमुनिम्। पप्रच्छ च तदुपत्ति[1] विरूपाक्षो घटोद्भव ॥३॥

विरूपाक्ष उवाच

नेमुने श्रोतुमिच्छामि चैतल्लिङ्गस्य सम्भवम्। धनेश इति नामोक्तं[2] भवता मेऽधुना विभो ॥४॥
केन प्रकाशितं लिङ्गं धनेश्वरं मुनीश्वर। तत्पूजनाद्विभोः केन प्रलब्धं किं फलं कदा ॥५॥

नेमुनिरुवाच

भृगुणा च पुरा तप्तं व्याप्य शतं समा द्विज। ततः समुद्भूतञ्चैतल्लिङ्गं तदा तदग्रतः ॥६॥
एतस्माच्च वरं लब्ध्वा जातश्चिरञ्जीवी[3] भृगुः। प्रवरोऽसौ मुनीनाञ्चाऽद्यापि चैव विरूपदृक् ॥७॥
आसीत्कश्चित्पुरा वैश्यः शिवदास इति श्रुतः। पूर्वजन्मन्यदानात् स दरिद्रोऽभून्निरन्तरम् ॥८॥
गोष्ठीभिर्वर्जितोऽसौ च पत्नीसुतादिभिस्तथा। श्वशुरभ्रातृभिर्नित्यं दरिद्रो दुःखितो भृशम् ॥९॥
सन्त्यज्य स्वकुलं देशं विरक्तो निर्गतः पुरात्। देशाद्देशान्तरं भ्रान्त्वा[4] चाऽर्थलुब्ध इहाऽऽगतः ॥१०॥
क्वचित्क्रतुमुनिं प्राप्य चाऽपृच्छत्तं धनोद्यमम्। व्याजहार क्रतुस्तस्मै धनहेतोर्विरागिणे[5] ॥११॥

अध्याय – ९६

धनेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – अघि विरूपाक्षले उग्रतीर्थमा स्नान गरेर चण्डेश्वरको पूजा गरी उग्र तपस्या गरेका थिए। माघ कृष्ण शुक्लपक्ष षष्ठीका दिन उनले भक्तिपूर्वक पञ्चोपचार विधिले धनेश्वर महादेवको महालिङ्गको पूजा गरे। हे अगस्त्य मुनि ! विरूपाक्षले विधिपूर्वक लिङ्गको पूजा गरिसकेपछि उनले नेमुनिलाई त्यस लिङ्गको उत्पत्तिको बारेमा प्रश्न गरे ॥१–३॥

विरूपाक्षले भने – हे नेमुनि ! धनेश्वरको बारेमा अहिले हजुरले मलाई जो बताउनुभयो, त्यस लिङ्गको उत्पत्तिका बारेमा म सुन्न चाहन्छु। त्यस लिङ्गलाई कसले प्रकाशित गऱ्यो ? त्यस लिङ्गको पूजा गरेर कसले कहिले के फल प्राप्त गऱ्यो ? ॥४–५॥

नेमुनिले भन्नुभयो – हे ब्राह्मण ! अघि त्यस ठाउँमा भृगु ऋषिले सय वर्षसम्म तपस्या गर्नुभएको थियो। त्यसपछि उहाँको अगाडि यो लिङ्ग प्रकट भएको हो। हे विरूपाक्ष ! यसै लिङ्ग भएको तीर्थबाट वर प्राप्त गरेर अहिले पनि भृगु चिरञ्जीवी भएर बस्नुभएको छ। पवित्रहरूमा पनि उहाँ अझ पवित्र हुनुहुन्छ। अघि शिवदास नाम गरेको कुनै वैश्य थियो। पूर्वजन्ममा दान नगरेको हुँदा त्यो सधैँ दरिद्र भयो। साथीहरूले उसलाई छोडे, पत्नी, छोरा, ससुरा, भाइ आदिले पनि उसलाई त्यागिदिए। दरिद्र भएको हुनाले ऊ अत्यन्त दुःखित भयो। त्यसपछि ऊ आफ्नो कुल तथा देशलाई छोडेर विरक्त भई नगरबाट निस्कियो। अर्थको कामनाले एक देशबाट अर्को देश घुम्दै त्यो यहाँ आइपुग्यो। कुनै धन कमाउन लागेका ऋतु नाम गरेका मुनिलाई भेटेपछि उसले सोध्यो। ऋतुपनि विरक्त भएको त्यस पुरुषलाई भन्न लागे ॥६–११॥

---

१. तमुद्भुतम् इति न.सं.पु.पाठः।
२. विख्यातः इति न.सं.पु.पाठः।
३. चिरञ्जीव्यभवद् इति न.सं.पु.पाठः।
४. भ्राम्य इति न.सं.पु.पाठः ॥
५. धनहेतोर्विरक्तिने इति न.सं.पु.पाठः।

निर्धनश्चेद्भवानत्र भक्त्याराधय शङ्करम्। स ते दास्यति पूर्णं स्वं वाञ्छितञ्च विदां वर ![६] ॥१२॥
आकर्ण्य तद्वचो वैश्य ऋतं मत्त्वा तदाशु च। चकाराऽत्र तपस्तीव्रं द्वादशाब्दं धनात्मना ॥१३॥
क्षुत्पिपासां परित्यज्य पञ्चाक्षरं जजाप सः। भक्त्या लिङ्गं समभ्यर्च्य श्रद्धया[७] स्नातकोऽनिशम्॥१४॥
राधकृष्णचतुर्दश्यां सम्पूजिते महानिशि। एतल्लिङ्गात्समुद्भूतो व्यक्तरूपो महेश्वरः ॥१५॥
उन्मील्य नेत्रे स्वेऽपश्यत्तुष्टाव च परिक्रमन्। ननाम दण्डवद् भक्त्या चाऽष्टाङ्गं भुवि पातयन्॥१६॥
आविर्भूतो हरो व्यक्तः पूर्णचन्द्रो यथार्णवे। उवाच वचनं रुद्रो भक्ताय निर्धनाय च[८] ॥१७॥

रुद्र उवाच

वरं वरय वैश्यार्य मत्तो[९] वाञ्छसि यद् वद। दास्याम्यहञ्च तत्सर्वं तेऽपि लोकसुदुर्लभम् ॥१८॥
तपसा ते कठोरेण प्रीतोऽहमधुना भृशम्। निर्वाणं वाऽपि भूतिं वा भक्त ! मां याचतां द्रुतम् ॥१९॥

वैश्य उवाच

निर्धनोऽहं महादेव ! प्राग्धनं देहि मे बहु। नृपत्वञ्च ततो देहि भोक्ष्यामि तद्यथेप्सितम् ॥२०॥
अन्ते ते सेवको भूत्वा विचरिष्यामि निर्भरम्। त्यक्तः स्वजातिभिर्लोकैर्दुःखदग्ध इति प्रभो ॥२१॥
धनेश्वर इति ख्यातो भवत्विति भवान् पुनः। एतल्लिङ्गं हि याचेऽहं त्वामेनञ्च वरं विभो ॥२२॥

नेमुनिरुवाच

ओमिति च प्रतिश्रुत्य चैतल्लिङ्गं तिरोदधे। दत्त्वा तस्मै वरं रुद्रस्तदीप्सितं धनं प्रभुः ॥२३॥
सोऽप्याययौ गृहं वैश्यः पूर्णमनोरथो द्विज। बहुधनं समादाय हर्षप्रफुल्लमानसः ॥२४॥

तपाईं यदि गरीब हुनुहुन्छ भने यस ठाउँमा बसेर भगवान् शङ्करको आराधना गर्नुहोस्। उहाँले तपाईंलाई इच्छा अनुसारको पूर्ण सम्पत्ति दिनुहुनेछ। त्यस वैश्यले ती मुनिले भनेको वचन सत्य ठानेर धन प्राप्त गर्ने इच्छाले बाह्र वर्षसम्म यहाँ बसेर तपस्या गऱ्यो। उसले भोक, प्यास सबै छोडेर पञ्चाक्षरी मन्त्र जप गऱ्यो। स्नान गरेर तीनै किसिमका भक्तिद्वारा उसले शिवलिङ्गको पूजा गऱ्यो ॥१२-१४॥

वैशाख कृष्ण चतुर्दशीको महारात्रिमा पूजा गरिसकेपछि त्यस लिङ्गबाट भगवान् शङ्कर प्रकट हुनुभयो। उसले आफ्ना आँखा खोलेर हेऱ्यो र प्रसन्न भयो। त्यसपछि परिक्रमा गर्दै उसले आठै अङ्ग भूमिमा भुकाएर दण्डवत् प्रणाम गऱ्यो। समुद्रमा पूर्ण चन्द्रमा प्रकट भएजस्तै उसका अगाडि रुद्र प्रकट हुनुभयो र त्यस दरिद्र भक्तलाई मीठो भाषामा भन्नुभयो ॥१५-१७॥

शङ्करले भन्नुभयो - हे वैश्य ! तिमी जे चाहन्छौ, त्यो वर मसित माग। सबै प्राणीहरूले प्राप्त गर्न नसक्ने सबै वर म तिमीलाई दिन्छु। हे भक्त ! तिम्रो कठोर तपस्याबाट म अहिले अत्यन्त प्रसन्न भएको छु। मुक्ति वा ऐश्वर्य जे चाहन्छौ, त्यो तुरुन्त माग। हे महादेव ! म गरीब छु, त्यसैले पहिले मलाई धेरै धन दिनुहोस्। त्यसपछि राजलक्ष्मी दिनुहोस्, इच्छा अनुसार भोग गर्नेछु। अन्त्यमा आफ्नो जातिका मानिसहरूले त्यागेपछि दुःखित भएर हजुरको सेवक हुँदै आनन्दसित घुम्नेछु। हजुरको यो लिङ्ग धनेश्वर नामले प्रसिद्ध होस्। हे प्रभु ! म हजुरसित यो पनि वर माग्छु ॥१८-२२॥

नेमुनिले भन्नुभयो - भगवान् शङ्कर पनि हुन्छ भनेर त्यस वैश्यलाई उसले चाहेअनुसारको धन दिई त्यसै दिन अन्तर्धान हुनुभयो। हे ब्राह्मण ! त्यसपछि मनोरथ पूर्ण भएको त्यो वैश्य पनि हर्षले चित्त गद्गद बनाएर धेरै सम्पत्ति लिई घर आयो ॥२३-२४॥

---

६. यदिच्छितञ्च विद्वर इति न.सं.पु.पाठः।
७. त्रिविधैः इति न.सं.पु.पाठः।
८. निःस्वाय भक्तिने मृदु इति न.सं.पु.पाठः।
९. यत्त्वम् इति न.सं.पु.पाठः।

यैर्यैस्त्यक्तः पुरा वैश्यो गोत्रैर्भृत्यैः स्वबान्धवैः। तिष्ठन्ति स्म हि तद्गेहे ते ते चाऽवन्तिकापुरे[१०] ॥२५॥
सार्वभौमपतिर्भूत्वा ततो वैश्योऽन्वयैः समम्। भुनक्ति स्म सुखं भोग्यं यावज्जीवं मुदान्वितः ॥२६॥
देहान्ते च ततोऽभूत्स रुद्रस्यानुचरः सुखी। प्रमथानां गणो भूत्वा प्रतिष्ठति शिवान्तिके ॥२७॥
धनेश्वरं येऽर्चयन्ति भक्त्या च विधिपूर्वकम्। धनिनस्ते भवेयुश्च सत्यमेतन्न संशयः ॥२८॥
इह लोके सुखं भुक्त्वा देहान्ते स प्राप्नुयात् शिवम्[११]। आजन्म स्वकृतैः पापैस्तत्क्षणान्मुच्यते हि सः ॥२९॥
अतो वारुणदेशे च गच्छ विरूपदृक् पुनः। धनुषां षट्सहस्रे च यत्राऽऽस्ते विकटेश्वरः ॥३०॥
द्रोणभूभृदधोभागे नित्यं विराजते विभुः। पुष्पतीर्थेन सार्द्धञ्च रुद्रवत्याश्च पश्चिमे ॥३१॥
स्नात्वा च तज्जले भक्त्या तमर्चय यथाविधि। विकटेशं महालिङ्गं ममाऽऽज्ञया विरूपदृक् ॥३२॥

एतन्माहात्म्यञ्च धनेश्वरस्य प्रोक्तञ्च तुभ्यं भविकं मयाऽऽर्य।
पृष्टो यतोऽहं विनयात्[१२] त्वया वै लिङ्गस्य नृणां विभवप्रदस्य ॥३३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहाम्ये विरूपाक्षतीर्थयात्रायां धनेश्वरमाहात्म्यं नाम षण्णवतितमोऽध्यायः ॥९६॥

अघि जुन–जुन कुल, नोकर र आफ्ना दाजुभाइले त्याग गरेका थिए, तिनीहरू उज्जयिनी नगरको त्यसै घरमा प्रजाजस्तै भएर बस्न थाले। त्यसपछि त्यस वैश्यले चक्रवर्ती राजा भएर आफ्ना वंशहरूको साथमा जीवनभर सुखपूर्वक सहर्ष राज्यभोग गऱ्यो। शरीरत्याग गरिसकेपछि त्यो वैश्य शिवजीको अनुचर भएर सुखपूर्वक बस्न थाल्यो। प्रमथगण बनेर शिवजीको नजिकै बस्यो। जसले सभक्ति विधिपूर्वक धनेश्वरको पूजा गर्छन्, ती व्यक्तिहरू धनी हुन्छन्, यसमा शङ्का छैन। यस लोकमा सुखभोग गरेर ती व्यक्ति मरेपछि शिवलोक पुग्छन्। जन्मभर गरेका आफ्ना पापबाट ती तुरुन्तै मुक्त हुन्छन् ॥२५–२९॥

हे विरूपाक्ष ! अब तिमी यहाँबाट पश्चिमतिर छ हजार धनु अर्थात् चौबीस हजार हात पर विकटेश्वर महादेव हुनुहुन्छ, त्यहाँ जाऊ। परमेश्वर द्रोणाचलको फेदीमा सधैं पुष्पतीर्थमा रुद्रावतीको पश्चिमपट्टि विराजमान हुनुभएको छ। हे विरूपाक्ष ! मेरो निर्देशन अनुसार त्यस तीर्थको जलमा स्नान गरेर भक्तिपूर्वक विधिअनुसार विकटेश्वर महालिङ्गको पूजा गर। हे सज्जन ! तिमीले अहिले मानिसहरूलाई ऐश्वर्य प्रदान गर्ने लिङ्गको बारेमा सोध्यौ। सबैको कल्याण गर्ने धनेश्वरको माहात्म्य मैले तिमीलाइ बताएँ ॥३०–३३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा धनेश्वरको माहात्म्यनामक छयान्नब्बेऔं अध्याय पूरा भयो।

---

१०. प्रजा वावन्तिकापुरे इति न.सं.पु.पाठः। ११. स शिवं लभेत् इति न.सं.पु.पाठः।
१२. पृष्टं यतो मामधुना इति न.सं.पु.पाठः।

सप्तनवतितमोऽध्यायः

पुष्पतीर्थयात्रामहिमा

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो मुनिना सह वै मुने। विकटेशो हि यत्राऽऽस्ते भक्त्या तमर्चितुं मुदा ॥१॥
स्नात्वा च रुद्रतीर्थं स विकटेशमपूपुजत्। भक्त्या पञ्चोपचारैश्च जितेन्द्रियो मुदाऽन्वितः ॥२॥
माघकृष्णस्य सप्तम्यां तमभ्यर्च्य महानिशि। विनिद्रोऽसौ ततो भूत्वा तन्नाम प्रजपन्मुहुः ॥३॥
ततो भूयो विरूपाक्षश्चाऽपृच्छन्नेमुनिं मुने। विकटेशसमुद्भूतिं माहात्म्यञ्च हृदा मुदा[1] ॥४॥

विरूपाक्ष उवाच

नेमुने मुनिशार्दूल सर्ववार्ताविशारद। एतल्लिङ्गस्य माहात्म्यं श्रोतुमिच्छाम्यहं ध्रुवम् ॥५॥
कथं समुद्भवश्चास्य लिङ्गं केन प्रसेवितम्। को मुक्तोऽभूत्पुरा चाऽत्र विकटेशं हृदा भजन्[2] ॥६॥

नेमुनिरुवाच

आसीन्म्लेच्छः पुरा कश्चित् विकटो नाम विश्रुतः। स कदाचिद्दिने विप्र मृगयायै गतो वनम्[3] ॥७॥
विलङ्घ्य कन्दरान् शैलान् मृगयाश्रमपीडितः। तृषार्त्तः पुष्पतीर्थे स पानीयञ्च पपौ सुखम् ॥८॥
अचिन्तयत्तदोदासो निःसारां[4] संसृतिं भवम्। धिङ् मम जीवितञ्चेह परहिंसासु लालसम् ॥९॥
परमांसाशने रक्ता हन्तुं समुद्यताः परान्। म्लेच्छाश्च बहवश्चेह निधनं तेऽपि सङ्गताः ॥१०॥
परमांसाशनैः पुष्टाश्चापि च धनिनः परे। तन्मांसैः पोषितो देहो विपदं चैष्यति ध्रुवम्[5] ॥११॥
तस्मान्न हन्मि जन्तून् हि चाऽद्यादि सत्यमेव च। चिन्तयामि शिवं साक्षाद्यावज्जीवमिहैव च ॥१२॥
ततश्च तारयिष्येऽहमिहाऽऽत्मानममूमघात्।

अध्याय – ९७

पुष्पतीर्थयात्राको महिमा

कार्तिक स्वामीले भन्नुभयो– त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ विकटेश्वर महादेव हुनुहुन्थ्यो, त्यसै ठाउँमा भक्तिपूर्वक उहाँको पूजा गर्न गए। उनले रुद्रतीर्थमा स्नान गरेर जितेन्द्रिय भई प्रसन्न हुँदै सभक्ति पञ्चोपचार विधिले विकटेश्वरको पूजा गरे। माघ कृष्ण सप्तमीको राती विकटेश्वरको पूजा गरेर बारम्बार उहाँको नाम जप्दै जाग्राम बसे। हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले प्रसन्न भएर भक्तिपूर्वक विकटेश्वर उत्पन्न हुनुभएको माहात्म्य नेमुनिसँग सोधे ॥१–४॥

विरूपाक्षले भने – सम्पूर्ण विषयका ज्ञाता हे मुनिश्रेष्ठ नेमुनि ! यो लिङ्गको माहात्म्य म सुन्न चाहन्छु। यस लिङ्गको उत्पत्ति कसरी भयो ? कसले यस लिङ्गको आराधना गर्‍यो ? अघि को मुक्त भयो ? विकटेश नाम कसरी प्रसिद्ध भयो ? ॥५–६॥

नेमुनिले भन्नुभयो – अघि विकट नाम गरेको एउटा म्लेच्छ थियो। हे ब्राह्मण ! कुनै दिन त्यो वनमा शिकार खेल्न गयो। शिकार खेल्दा गरेको परिश्रमबाट थाकेको त्यो म्लेच्छ गुफा र पहाडहरू नाघ्दै तिर्खाले व्याकुल भएर पुष्पतीर्थमा पुग्यो र त्यहाँ उसले आनन्दसित पानी पियो। विरक्त त्यस म्लेच्छले असार संसारको बारेमा विचार गर्दै भन्यो – अर्काको हिंसामा लोभिएको मेरो जीवनलाई धिक्कार छ। अर्काको मासु खाने काममा तत्पर भएर अरूलाई मार्ने धेरै म्लेच्छहरू पनि मरेर गए। अर्काको मासु खाएर पुष्ट भएका धनीहरू पनि थिए, तिनीहरू पनि मरेर गए। शिकार गरिएका पशुका मासुले पोसिएको मेरो यो शरीर पनि आपत्तिमा पर्नेछ। त्यसैले आजदेखि म जनावरहरूलाई मार्दिनँ, यसै ठाउँमा बसेर बाँचुञ्जेल साक्षात् शिवजीको ध्यान गर्दछु, अनि म यस ठाउँमा बसेर यस शरीरलाई पापबाट उद्धार गर्नेछु ॥७–१२॥

---

१. विकटेशसमुद्भूतं माहात्म्यं भक्तितो मुदा इति न.सं.पु.पाठः।
२. विकटेश इति श्रुतः इति न.सं.पु.पाठः।
३. मृगायां गतवान्वने इति न.सं.पु.पाठः।
४. चासारम् इति न.सं.पु.पाठः।
५. विपदेष्यत्ययं मम इति न.सं.पु.पाठः।

नेमुनिरुवाच

एवं विमृश्य सः स्वान्ते विरक्तश्चेतसा बहु ॥१३॥

तज्जलपानसुज्ञातो निश्चितवान्तदा द्विज । सन्त्यज्य कार्मुकं बाणं सस्नौ पुष्पवतीजले ॥१४॥

ततो द्रोणाचले क्रोडे तस्थौ विरक्तनिर्जनः । दध्यौ च द्वादशाब्दं स श्रुत्वैव कस्यचिनमुनेः[६] ॥१५॥

त्रिविधज्ञानयुग्भक्त्या[७] मन्त्रैःस्तवैर्विवर्जितः । पीड्यमानो[८]ऽनिलैर्दावैर्वृष्टिभिश्च तथा भृशम् ॥१६॥

क्षुत्तृट्पीडासहस्तेपे[९] गण्डग्राव इवाचले । ततो द्वादशवर्षान्ते लिङ्गं शिलामयं तदा ॥१७॥

तपःकृष्णतृतीयायां समुद्भूतं तदग्रतः । आविर्भूतस्ततो लिङ्गाच्छङ्करो भक्तशङ्करः ॥१८॥

वरदानाय तस्मै च तद्भक्त्या तोषितो विभुः । व्याचष्ट विकटं म्लेच्छं निजभक्तं[१०] तपस्विनम् ॥१९॥

तं श्रावयन् हितं वाक्यं सस्मितः[११] शङ्करो विभुः ।

शङ्कर उवाच

शृणु भक्त ! वरं दास्ये तपस्विने हि तेऽधुना ॥२०॥

तुष्टोऽहं तपसा ते च निर्विकारेण चेतसा । मत्पार्श्वगः सदा भूत्वा प्रमथनायको भव ॥२१॥

अतिप्रियः सखा मे[१२] त्वमनेन तनुना समम् । एतल्लिङ्गञ्च ते नाम्ना ख्यातिं यास्यति सन्ततम् ॥२२॥

विकटेश्वर इत्येवं लोकोऽद्यतो वदिष्यति ।

नेमुनिले भन्नुभयो – हे ब्राह्मण विरूपाक्ष ! त्यस तीर्थमा जल पिउनाले असल बुद्धि पलाएको त्या वैश्यले हृदयमा यस्तो धेरै कुरा सोच्यो । त्यसपछि धनुष बाणलाई त्याग गरेर त्यसले पुष्पवती नदीको पानीमा स्नान गऱ्यो अनि द्रोणाचलको बीचमा विरक्त भएर एक्लै बस्यो । कुनै ऋषिबाट उपदेश लिएर बाह्र वर्षसम्म त्यसले ध्यान गऱ्यो । शरीर, वचन तथा मन लगाएर ज्ञानी हुँदै भक्तिसाथ स्तोत्र र मन्त्र केही नजपी त्यस म्लेच्छले हावा, डढेलो, भोक र वर्षाले सताए तापनि तिनीहरूलाई सहेर पहाडमा ठूलो ढुङ्गा बसेझैं तपस्या गऱ्यो । बाह्र वर्ष बितेपछि माघ कृष्ण तृतीयाका दिन त्यसका अगाडि शिलामय एउटा लिङ्ग प्रादुर्भाव भयो । त्यसको भक्तिले सन्तुष्ट भएर त्यसलाई वर दिनका निमित्त भक्तवत्सल भगवान् शङ्कर त्यसै लिङ्गबाट पैदा हुनुभयो । आफ्नो भक्त तपस्वी विकट म्लेच्छलाई हित वचन सुनाउँदै मुसुक्क हाँसेर भगवान् शङ्करले भन्नुभयो ॥१३-१९॥

शङ्करले भन्नुभयो – हे भक्त ! सुन – तिमीले ठूलो तपस्या गऱ्यौ, तिमीलाई म वर दिन्छु । निर्विकार चित्तले गरेको तिम्रो तपस्याबाट म प्रसन्न भएँ । यो शशरीरजस्तै तिमी मेरा अत्यन्त प्यारा साथी छौ, प्रमथगणको नायक बनेर सधैं तिमी मेरो छेउमा बस । यो लिङ्ग तिम्रो नाउँबाट निरन्तर प्रसिद्ध हुनेछ । आजदेखि मानिसहरूले यस लिङ्गलाई विकटेश्वर भन्नेछन् ॥२०-२२॥

---

६. श्रुत्वा कश्चिन्मुनेर्मुखात्, इति न.सं.पु.पाठः ।

७. त्रिविधैर्ज्ञानयुग्भक्त्या इति न.सं.पु.पाठः ।

८. सह्यमानः इति न.सं.पु.पाठः

९. क्षुत्पिपासैः स तेपे वै इति न.सं.पु.पाठः ।

१०. स्वभक्तिने इति न.सं.पु.पाठः ।

११. स्मितेन इति न.सं.पु.पाठः ।

१२. अतिप्रियसखो मे इति न.सं.पु.पाठः ।

नेमुनिरुवाच

इत्येवं शङ्करस्तस्मै वरं दत्त्वा विरूपदृक् ॥२३॥
तं दर्शयन् स्वमात्मानमेतल्लिङ्गे तिरोदधे। तत्क्षणादाययुश्चाऽत्र प्रमथा हिमवद्गिरेः ॥२४॥
अभिषेकं ददुस्तस्मै मुहुर्वाद्यान्यवादयन्[१३]। हिमवन्तं ययुस्ते वै यत्र सिद्धेश्वरः स्थितः ॥२५॥
तं सहर्षं पुरोधाय देवं[१४] विमानगा द्विज। ततः प्रभृतिरेतद्वै विकटेश इति श्रुतः ॥२६॥
अत्राऽऽगत्य तदा स्वर्गाद्देवर्षिभिः प्रसेवितम्। योऽर्चीति भक्तितो मर्त्त्यश्चैतल्लिङ्गं मुदान्वितः ॥२७॥
सर्वैनोभिर्विनिर्मुक्तः स भवेन्मृगयाजयी। अत आग्नेयकाष्ठायां[१५] गच्छ विरूपदृक् पुनः ॥२८॥
यत्रेन्द्रेश्वर आस्ते स शचीतीर्थेन वै समम्।

स्नात्वा सुतीर्थप्रवरे पवित्रे तत्[१६] किल्विषं नश्यति कृच्छ्रसाध्यम्।
इन्द्रेश्वरं पूजय भक्तिभिस्तं निष्पापदेहो भव हे विरूपदृक्[१७] ॥२९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां पुष्पतीर्थविकटेश्वरयोर्माहात्म्यं नाम सप्तनवतितमोऽध्यायः ॥९७॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! इति भनेर भगवान् शङ्करले त्यसलाई वर दिनुभयो र आफ्नो स्वरूप त्यसलाई देखोएर त्यसै लिङ्गमा अन्तर्धान हुनुभयो। तुरुन्त हिमालय पहाडबाट प्रमथगणहरू यहाँ आएर बारम्बार आ–आफ्नो बाजा बजाउँदै त्यसलाई अभिषेक दिए। हे विरूपाक्ष ! त्यसपछि उनीहरू विकटलाई अगाडि लगाई सिद्धेश्वर भगवान् बस्नुभएको हिमालय पर्वतमा विमानमा चढेर गए। त्यसै समयदेखि यस तीर्थलाई विकटेश्वर भनियो ॥२३-२५।½।

यहाँ आएर स्वर्गबाट देवता र ऋषिहरूले विकटेश्वरको आराधना गरे। जसले भक्तिपूर्वक प्रसन्न भएर यो विकटेश्वर लिङ्गको पूजा गर्छ, त्यो मानिस शिकार खेल्दा लागेका सम्पूर्ण पापबाट मुक्त हुन्छ। हे विरूपाक्ष ! अब तिमी जहाँ शचीतीर्थको साथमा इन्द्रेश्वर रहनुभएको छ, त्यस आग्नेय दिशामा जाऊ। जुन असल तीर्थमा स्नान गर्नाले कष्टले मात्र हटाउन सकिने तिम्रा पापहरू सजिलै नाश हुनेछन्, त्यहाँ स्नान गरेर भक्तिपूर्वक इन्द्रेश्वरको पनि पूजा गर । त्यसो भएपछि तिम्रो शरीर पापबाट मुक्त हुनेछ ॥२६-२९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा पुष्पतीर्थ र विकटेश्वरको माहात्म्यनामक सन्तान्नब्बेऔं अध्याय पूरा भयो।

---

१३. स्ववाद्यं वादयन्मुहुः इति न.सं.पु.पाठः।
१४. विकटं तं पुरोधाय हर्षम् इति न.सं.पु.पाठः।
१५. आग्नेयदिशि च इति न.सं.पु.पाठः।
१६. हि यत्र ते, इति न.सं.पु.पाठः।
१७. भविता ततस्त्वम् इति न.सं.पु.पाठः।

अष्टनवतितमोऽध्यायः

प्राचीतीर्थेन्द्रेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

ततोऽगमद्विरूपाक्षः शचीतीर्थं समं तदा। मुदा नेमुनिना भक्त्या तत्र स्नातुं घटोद्भव ॥१॥
कृष्णाष्टम्याञ्च माघस्य शचीतीर्थं विरूपदृक्। सस्नौ भक्त्या महारात्रौ लिङ्गं पूजितवान् पुनः ॥२॥
निशि जागृतिमान् भूत्वा ज्ञानधर्मसमन्वितः। अपृच्छत्तीर्थमाहात्म्यं लिङ्गस्य तद्विशेषतः ॥३॥

विरूपाक्ष उवाच

भो सर्वविन्मुनिश्रेष्ठ ! श्रोतुमिच्छाम्यहं तव। एतत्तीर्थस्य माहात्म्यञ्चैतल्लिङ्गस्य वै पुनः ॥४॥
कथं तीर्थसमुद्भूतिः[१] केन प्रकाशितं पुरा। समुद्भूतमिदं लिङ्गं कथं[२] मुक्तश्च को वद ॥५॥

नेमुनिरुवाच

अहो धन्योऽसि वत्स ! त्वमीदृशं ते मनो यतः। पुराभूताञ्च तद्वार्तां शृणु वक्ष्यामि सादरम् ॥६॥
आसीद् ब्रह्मपुरी नाम्नी मिथिलायां विराजिता। तस्यां विराजते नित्यं गौतमो नाम तापसः ॥७॥
अहल्या नाम तत्पत्नी पतिव्रता प्रियंवदा। सर्वलक्षणसम्पूर्णा चाऽऽसीत्सर्वाङ्गसुन्दरी ॥८॥
सा कदाचिद्दिने साध्वी वाटिकायाञ्चचार वै[३]। एकाकिनी ऋतुस्नाता चिन्वन्ती कुसुमानि सा[४] ॥९॥
शक्रः समाययौ तत्र तां लोकितुं महामनाः। आकर्ण्य तद्गुणं सर्वं नारदात् त्रिदिवे ततः ॥१०॥
इन्द्रो ददर्श तां तत्र क्रीडन्तीं कुसुमैर्मुदा। चन्द्रवक्त्रां मृगाक्षीञ्च पीनपयोधरां[५] स्मिताम् ॥११॥

अध्याय – ९८

प्राचीतीर्थ र इन्द्रेश्वर शिवलिङ्गको महिमा

कार्तिकस्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर प्रसन्न हुँदै भक्तिपूर्वक स्नान गर्नका लागि शचीतीर्थमा गए। माघकृष्ण अष्टमीका दिन विरूपाक्षले शचीतीर्थमा स्नान गरे अनि त्यसै दिनको महारात्रिमा उनले भक्तिपूर्वक लिङ्गको पूजा गरे। ज्ञान र धर्मले युक्त भएका ती मुनिले राति जागा बसेर तीर्थ र विशेष गरी लिङ्गको महात्म्य मुनिसित सोधे ॥१–३॥

विरूपाक्षले भने – हे सर्वज्ञ मुनि ! यो तीर्थ र यो लिङ्गको महात्म्य हजुरबाट सुन्न चाहन्छु, यो तीर्थको उत्पत्ति कसरी भयो ? कसले यसलाई प्रकाशित गऱ्यो ? यो लिङ्ग कसरी पैदा भयो ? त्यसको आराधनाबाट को मुक्त भयो ? बताउनुहोस् ॥४–५॥

नेमुनिले भन्नुभयो – हे बाबु ! तिमी धन्य छौ, किनभने तिम्रो मनमा यस्तो कुरा पैदा भयो। यस विषयमा पुरानो एउटा कथा छ, बताउँछु, ध्यान दिएर सुन। मिथिलामा सुशोभित भएर रहेको ब्रह्मपुरी नाम गरेको शहर थियो। त्यहाँ गौतम नाम गरेका तपस्वी सधैं बस्नुहुन्थ्यो। मिठो बोल्ने, प्रतिव्रता, अहल्या नाम गरेकी उनकी पत्नी थिइन्। उनी सम्पूर्ण लक्षणले युक्त भएकी र सर्वाङ्ग सुन्दरी थिइन्। पतिव्रता ती अहल्या ऋतुस्नान गरेर फूल टिप्नका निमित्त एक्लै आनन्दसित बगैंचामा हिँडिरहेकी थिइन्। तिनताका स्वर्गमा उनको गुणको बखान नारदको मुखबाट सुनेर इन्द्र अहल्यालाई हेर्न त्यस बगैंचामा आए। फूलसित प्रसन्न हुँदै खेलिरहेकी, चन्द्रमाको जस्तो मुख र मृगका आँखाजस्ता आँखा भएकी, साह्रा स्तनहरू भएकी र मुसुक्क हाँस्ने अहल्यालाई इन्द्रले देखे ॥६–११॥

---

१. समुद्भवं तीर्थम् इति न.सं.पु.पाठः।
२. तस्मान् इति न.सं.पु.पाठः।
३. उपवने चचार वै इति न.सं.पु.पाठः।
४. पुष्पाण्यवचयन् मुदा इति न.सं.पु.पाठः।
५. गाढपयोधराम् इति न.सं.पु.पाठः।

शक्रो मुमोह तां प्रेक्ष्य चाऽचिन्तयत्ततः पुनः । एतया सह मे कामं भविष्यति कदा रतिः ॥१२॥
इति चिन्ताकुलः शक्रस्तस्थौ तत् कुटिरान्तिके[६] । तदा संवृत्य चाऽऽत्मानं रहो गवेषणातुरः[७] ॥१३॥
यदा निशात्रिभागेऽसौ ययौ स्नातुं हि गौतमः । उपकरणमादाय गङ्गायां निर्जनो द्विजः ॥१४॥
तदा शक्रः स्वमात्मानं मुनिरूपञ्च तद्दधौ । तस्याऽऽकृतितनुर्भूत्वा तत्कुटीरे[८] विवेश वै ॥१५॥
ततो व्याचष्ट शक्रस्तां प्रिये ! देहि रतिञ्च मे । कामदग्धोऽधुना चाऽहं ततः स्नात्वा[९] त्विहागतः ॥१६॥

अहल्योवाच

भगवन् ! प्रिय चाऽद्य त्वं कथं प्राकृततां गतः । एषा चेष्टा कदाऽप्यार्य न ते दृष्टा मया प्रभो ॥१७॥
भूत्वा मुनिवरो ब्राह्मे तीर्थप्रवञ्चकोऽधुना । स्नानं जपार्चनं त्यक्त्वा[१०] कामलुब्धोऽभवद् भवान् ॥१८॥

इन्द्र उवाच

मा मा त्वयाऽद्य वक्तव्यं वचनं कटुकञ्च मे । दातव्यः कामिने कामः कामिन्योक्तमिति श्रुतौ ॥१९॥
दत्त्वा क्षेमं प्राप्नुवन्ति नो हि चेदन्धलोचनाः । यदि ददासि मे कामं त्वां भस्मसात्करोमि न ॥२०॥

नेमुनिरुवाच

अहल्याऽऽशु ततस्तस्मै सुरतं प्रददौ पुरा । तच्छापभीषणत्रस्ता प्रकृतिं कलयन्त्यथ ॥२१॥
प्रत्यागतः पुनर्गेहं तिलं विस्मृतवान् मुनिः । गङ्गातीरादसौ विप्र ! तिलार्थञ्चैव गौतमः ॥२२॥
ततो ददर्श शक्रं स रतिनिर्वृत्तसंस्थितम् । भार्यामुत्तानपादां वै प्रेक्ष्य रुषा प्रमूर्च्छितः ॥२३॥
कृत्वेति किमिति प्रेक्ष्य चाऽहल्या च प्रधर्षिता । गवाक्षान्निर्ययौ शक्रस्तं प्रेक्ष्य धर्षितो द्रुतम् ॥२४॥
शापं ददौ मुनिस्ताभ्यां छन्दितोऽहं यतस्त्वया । अवज्ञा मे कृता यस्मात्तस्मात्त्वं प्रस्तरा भव ॥२५॥
मे पत्नी लुण्ठिता यस्माद् भगहेतोस्त्वया वृषन्[११] । त्वं सहस्रभगाङ्काङ्गी तस्माद् भवाद्यतः शठ ॥२६॥

इन्द्र ती अहल्यालाई देखेर मोहित भए र यस स्त्रीसित आनन्दसँग मेरो रतिक्रीडा कहिले होला भन्ने सोचे। त्यसपछि चिन्तित हुँदै इन्द्र त्यसै कुटीको नजिकै एकान्त स्थलको खोजीको क्रममा लुकेर बसे । जब रातको एक भाग बाँकी थियो, त्यसबखत गौतम ऋषि स्नानका सबै सामग्री लिएर एक्लै गङ्गामा स्नान गर्न गए। त्यसपछि इन्द्र ऋषिको रूप धारण गरेर गौतमको जस्तो अनुहार र शरीर लिई तिनको कुटीमा पसे । त्यसपछि अहल्यामा आसक्त भएका गौतम रूपधारी इन्द्रले भने – हे प्रिये ! म अहिले कामवासनाबाट दग्ध छु। त्यसैले ननुहाइकन यहाँ आएँ। मलाई रति देऊ ॥१२-१६॥

अहल्याले भनिन् – हे प्रभु ! हे भगवन् ! तपाईं आज कसरी यस्तो प्राकृत अर्थात् अज्ञानी पशुजस्तो बन्नुभयो ? हे आर्य ! तपाईंको यस्तो क्रियाकलाप यसअघि त देखेकी थिइनँ। आज तीर्थ ठगिया, मुनि भएर पनि ब्रह्ममुहूर्तमा गर्नुपर्ने काम तपाईंले छोड्नुभयो। स्नान, जप र पूजालाई छोडेर तपाईं कसरी कामुक बन्नुभयो ॥१७-१८॥

गौतमरूपधारी इन्द्रले भने – तिमीले मलाई यस्तो कटु बोली नबोल किनभने कामुक व्यक्तिलाई कामिनीले कामभोग दिनैपर्छ भनेर शास्त्रमा भनेको छ। हे अहल्या ! मलाई कामभोग दियौ भने तिम्रो कल्याण हुन्छ, यदि मलाई कामभोग दिदैनौ भने म तिमीलाई भस्म गर्छु ॥१९-२०॥

नेमुनिले भन्नुभयो– त्यसपछि तिनका सरापबाट डराएर अहल्याले नारीप्रकृति अंगालेर तुरुन्त रतिसुख दिइन्। हे ब्राह्मण ! विरूपाक्ष ! तिल बिर्सिएर गौतममुनि तिल लिनका लागि गङ्गाको तीरबाट कुटीमा फर्किए। त्यसपछि रतिक्रीडा सिध्याएर उभिइराखेका इन्द्र र खुट्टा उत्तानो पारेर सुतिरहेकी आफ्नी पत्नीलाई देखेर गौतममुनि रीसले मूर्च्छा परे। के गरेर बसेकी भनेर अहल्यालाई गौतमले झपारे। त्यो देखेर इन्द्र झ्यालको प्वालबाट निस्किएर तुरुन्त भागे। ऋषिले दुवैलाई सराप दिए – तैँले मलाई छलिस् र मेरो हेला गरिस्, त्यसकारण तैँले पत्थर हुनुपरोस्। हे इन्द्र ! कामुक भएर तैँले मेरी पत्नीलाई ठगिस्, त्यसैले तेरा शरीरभरि आजदेखि हजार योनीहरू बनून् ॥२१-२६॥

---

६. कुट्टिमान्तिके इति न.सं.पु.पाठः ।
७. रहान्वेषणतत्परः इति न.सं.पु.पाठः ।
८. तत्कुट्टिने इति न.सं.पु.पाठः ।
९. ततोऽस्नात्वा इति न.सं.पु.पाठः ।
१०. त्यज्य इति न.सं.पु.पाठः ।

नेमुनिरुवाच

ततः शक्रः सहस्रैश्च भगैः समन्वितस्तदा। स्वात्मानं प्रेक्ष्य निन्दाढ्यं व्यथितो ह्यगमद् गृहम् ॥२७॥
अवलोक्य शची शक्रं तद्विग्रहं भगाङ्कितम्। अपृच्छत्तस्य हेतुं तमाश्चर्येणैव दुःखिता ॥२८॥
अवोचदाशु तद्धेतुं तस्यै सर्वं पुरन्दरः। व्रीडया व्यथितः शश्वदभूनम्रमुखः श्वसन् ॥२९॥
हसन्ती तमुपश्रुत्य चाऽप्सरोभिः शची सह। करतालं मुदा चक्रुरन्या देव्यः स्मिताननाः ॥३०॥
व्याजहार वचः क्रुद्धा शची स्वान्तःसुदुःखिता। धिग्धिग्विभो ! यतः कार्यमीदृशं चेष्टितं तव ॥३१॥
त्यक्त्वा चाऽप्सरसः पत्नी ऋषेः सती प्रलुण्ठिता। मायया छन्दिता तस्माच्चेष्टां धिगस्तु ते शठ ॥३२॥

नेमुनिरुवाच

ततो बृहस्पतिं विप्र समाहूय शची तदा। पृच्छति स्म तदामन्त्र्य तस्य शापविमोचनम् ॥३३॥
गुरुश्चाऽपि तदाकर्ण्य व्याजहार शुभं वचः। तच्छापमोचनार्थाय शच्यै शक्राय साम्प्रतम् ॥३४॥

बृहस्पतिरुवाच।

विधेराज्ञां समादाय शक्रैतया समं मुने कुञ्जभूभृदधोभागे तत्र पुण्या क्षितिर्भवेत् ॥३५॥
लीलावती नदी श्रेष्ठा रुद्रावती तथापरा। तयोश्च सङ्गमे स्नात्वा चाऽऽराधय त्वमीश्वरम् ॥३६॥
तत्रैव स्नानमात्रेण निष्पापाङ्गो भविष्यसि। आराधनेन श्रीशम्भोरेष शापो[१२] विनश्यति ॥३७॥

नेमुनिरुवाच

ततः प्रणम्य धातारं तदाज्ञामाप्तवान् ध्रुवम्। अत्रागमत्तदा शक्रः शच्या सह च साम्प्रतम् ॥३८॥
सुस्नातौ हि शचीशक्रौ तीर्थेऽस्मिंस्तौ मुदान्वितौ[१३]। ततः शक्रः शिवं दध्यौ सा च तीर्थे शिवां पुनः ॥३९॥

नेमुनिले भन्नुभयो – त्यसपछि हजारौँ योनिले युक्त भएको आफ्नो शरीरलाई देखेर इन्द्र आफैलाई निन्दा गर्दै दुःखित भएर घर गए। योनि नै योनिले भरिएको शरीर भएका इन्द्रलाई देखेर आश्चर्य तथा दुःखित हुँदै इन्द्राणीले त्यसको कारण इन्द्रलाई सोधिन्। त्यसपछि लाजले खिन्न हुँदै बारम्बार निहुरोमुन्ट्यो लगाएर श्वास फेर्दै अहल्यासित भएका सबै कुराको वृत्तान्त इन्द्रले इन्द्राणीलाई तुरुन्तै भने। इन्द्रका कुरा सुनेर अप्रसराहरूका साथ इन्द्रको उपहास गरिरहेकी इन्द्राणीका कुरा सुनेर स्वर्गका अरू देवीहरूले सानन्द मुसुमुसु हाँस्दै ताली बजाए ॥२७–३०॥

अप्सराहरूका साथमा बसेकी इन्द्राणीले क्रुद्ध हुँदै इन्द्रलाई भनिन् – हे प्रभो ! हजुरलाई धिक्कार छ, किनभने हजुरले यस्तो नराम्रो काम गर्नुभयो। हे मूर्ख इन्द्र ! अप्सरा र आफ्नी पत्नी छँदाछँदै तिनलाई छोडेर मायाले छलेर पतिव्रता ऋषिपत्नीलाई उपभोग गर्न जानुभयो, तपाईंको क्रियाकलापलाई धिक्कार छ ॥३१–३२॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! त्यसपछि इन्द्राणीले बृहस्पतिलाई बोलाएर इन्द्रमाथि लागेको ऋषिको सराप छुट्यउने उपायको बारेमा सोधनी गरिन् ॥३३॥ त्यसपछि बृहस्पतिले पनि इन्द्रलाई त्यो सरापबाट मुक्त गराउनका लागि इन्द्राणीलाई भने ॥३३–३४॥

बृहस्पतिले भन्नुभयो – हे इन्द्र ! विधिको निर्देश अनुसार इन्द्राणीलाई साथैमा लिएर त्यो भाडीको तल्लो भागमा रहेको पवित्र स्थलमा गएर बस। त्यहाँ लीलावती र अर्को रुद्रावती नाम गरेको नदी छन्। ती दुईको नदीको सङ्गममा स्नान गरेर तिमी भगवान् शङ्करको आराधना गर त्यहाँ स्नान गर्ने वित्तिकै तिम्रा शरीरका अङ्गहरू पापबाट मुक्त हुनेछन्। शिवजीको आराधना गर्‍यौ भने तिम्रो सराप नाश हुनेछ ॥३५–३७॥

नेमुनिले भन्नुभयो – त्यसपछि इन्द्रले ब्रह्मालाई नमस्कार गरे। ब्रह्माको आज्ञा लिएर इन्द्र आफ्नी पत्नी इन्द्राणीका साथ यस ठाउँमा आए ॥३८॥ ती दुवे इन्द्र र इन्द्राणीले यस तीर्थमा बडो आदरका साथ प्रसन्न भएर स्नान गरे। त्यसपछि त्यस तीर्थमा बसेर इन्द्रले शिवजीको र इन्द्राणीले पार्वतीको ध्यान गरेका थिए ॥३८–३९॥

---

११. भवाद्यतस्त्वया इति न.सं.पु.पाठः।
१२. शम्भु च एतच्छापम् इति न.सं.पु.पाठः।
१३. मुदाद्रितौ इति न.सं.पु.पाठः।

आराधिता तया देवी भक्त्या तयोश्च सङ्गमे। आविर्भूता नदीरूपोवा पद्मावती सती[१४] ॥४०॥
अन्तरेण तयोस्तां वै सुप्रवाहां ददर्श सा। मेने कृतार्थमात्मानं दृष्ट्वा तां दिव्यचक्षुषा ॥४१॥
दिव्यैकाब्दान्तरे लिङ्गं समुद्भूतं तदग्रतः। आषाढीपूर्णिमायां वै चाऽऽर्द्रार्क्षसंयुजि द्विज ॥४२॥
वरदानाय भक्ताय चाञ्जसा सगुणो विभुः। तस्मादाविर्बभौ रुद्रः प्रोवाचाऽरं शचीपतिम्[१५] ॥४३॥

इन्द्रेश्वर उवाच

शच्या कृतं तपश्चात्र पद्मावतीसमुद्भवः। तयोश्च सङ्गमे शक्र ! शचीतीर्थन्ततोऽभवत् ॥४४॥
तत्र स्नाहि मुदा शक्र ! शचीतीर्थे च भक्तितः। ततो नश्यन्ति ते शापा एकं विना च सर्वशः ॥४५॥
गौरवान्मुनिशापस्य योनिश्चैका प्रतिष्ठति। ते ललाटे सदा शक्र ! देवराजस्ततः पुनः ॥४६॥
एतल्लिङ्गञ्च ते नाम्ना भविष्यति क्षितौ सदा। इन्द्रेश्वर इति ख्यातं लोकवाञ्छाफलप्रदम् ॥४७॥

नेमुनिरुवाच

ततः शक्रो वचः श्रुत्वा रुद्रोदितञ्च भक्तितः। परिक्रमन् स्तवै रुद्रं प्रणम्य च पुनः पुनः ॥४८॥
सस्नौ तत्र मुदा शक्रो निमज्योन्मज्ज्य भक्तितः। ज्येष्ठस्य पूर्णिमायाञ्च ब्राह्मे यथाविधि द्विज ॥४९॥
समुत्तीर्णो जलाच्छक्रश्चापश्यत्स्वतनुं पुनः। शापोद्भूतैर्भगैर्मुक्तो मुमुदे[१६] च भृशं मुहुः ॥५०॥
ततो ब्रह्मादयो देवाश्चात्रागत्य च सर्वशः। अभिषेकं ददुस्तस्मै नानावाद्यान्यवादयन्[१७] ॥५१॥
यानेन च समानिन्युः स्वर्गं शक्रञ्च देवताः। शच्या समं पुरोधाय हर्षविस्फुल्लमानसाः ॥५२॥
देवाश्च मुनयः सिद्धाश्चात्रागत्येन्द्रेश्वरं प्रति[१८]। एतस्मिन्भक्तितः स्नात्वा चार्चन्त्यद्यादिमीश्वरम् ॥५३॥

इन्द्राणीले भक्तिपूर्वक आराधना गरेपछि ती दुई नदीको सङ्गममा नदीरूप लिएर भगवती पद्मावती प्रकट हुनुभयो र बग्नुभयो। इन्द्र र इन्द्राणीको बीचबाट अत्यन्त सुन्दर प्रवाहले युक्त भएको नदीलाई इन्द्राणीले देखिन्। दिव्य दृष्टिबाट तिनलाई देखेर इन्द्राणीले आफूलाई कृतार्थ भएको ठानिन्। हे विरूपाक्ष ! दिव्य एक वर्ष पुगेपछि आर्द्रा नक्षत्रले युक्त भएको आषाढशुक्ल पूर्णिमाका दिन इन्द्रकै समुन्नेमा लिङ्ग प्रकट भयो। भक्तलाई वरदान दिनका निमित्त भगवान् शङ्कर सगुणस्वरूप लिएर त्यसै लिङ्गबाट पैदा हुनुभयो र इन्द्रलाई भन्नुभयो ॥४०-४३॥

इन्द्रेश्वर अर्थात् भगवान् शङ्करले भन्नुभयो - इन्द्राणीले यस ठाउँमा तपस्या गरिन्। त्यसेले पद्मावतीको प्रादुर्भाव भयो। हे इन्द्र ! यी दुई नदीको सङ्गममा शचीतीर्थ बन्यो। हे इन्द्र ! यस शचीतीर्थमा भक्तिपूर्वक स्नान गर। त्यसपछि एउटयलाई छोडेर अरू सम्पूर्ण सरापहरू नाश हुनेछन्। ऋषिको सराप ज्यादै महत्त्वपूर्ण भएको हुनाले हे देवराज इन्द्र ! तिम्रो निधारमा एउटा योनि सधैं रहन्छ। पृथिवीमा उत्पन्न भएको यो लिङ्ग तिम्रो नाउँले इन्द्रेश्वर भएर प्रसिद्ध हुनेछ, यसले प्राणीहरूले चाहेको फल उपलब्ध गराउनेछ ॥४४-४७॥

नेमुनिले भन्नुभयो - त्यसपटि इन्द्रले रुद्रको वचन सुनेर भक्तिपूर्वक रुद्रको परिक्रमा गरे, स्तुति गरे र बारम्बार प्रणाम गरे। हे विरूपाक्ष ! त्यस तीर्थमा इन्द्रले डुब्दै, उत्रँदै गरेर ज्येष्ठ पूर्णिमाको दिन ब्राह्ममुहूर्तमा विधिपूर्वक सभक्ति स्नान ग रे ॥४८-४९॥

जलबाट निस्किएका इन्द्रले आफ्नो शरीरलाई फेरि हेरे। सरापबाट पैदा भएका योनिबाट मुक्त भएको शरीरलाई देखेर उनी अत्यन्त प्रसन्न भए। त्यसपछि ब्रह्मा आदि गरिएका देवताहरूले सबैतिरबाट आएर विभिन्न किसिमका बाजाहरू बजाउँदै तिनलाई अभिषेक दिए ॥५१॥ हर्षले प्रसन्न चित्त भएका देवताहरूले इन्द्राणीका साथै इन्द्रलाई यानमा राखेर स्वर्गमा लगे। आज पनि देवता, मुनि र सिद्धहरूले यहाँ आएर स्नान गरी भक्तिपूर्वक इन्द्रेश्वरको सधैं आराधना गर्दछन् ॥५०-५३॥

---

१४. पद्मावती सती नदीरूपा चाऽऽविर्भूता उवाह सा, इति न.सं.पु.पाठः।
१५. रुद्रस्तस्मादुवाच सत्वरम् इति न.सं.पु.पाठः।
१६. मुमोद इति न.सं.पु.पाठः
१७. नानावाद्यं प्रवादयन् इति न.सं.पु.पाठः।
१८. सिद्धाश्चात्रागत्य स मां प्रति इति न.सं.पु.पाठः॥

कश्चिन्मुक्तो द्विजः पूर्वमत्रैव शृणु तत्कथाम्। श्रुतश्रवेति विख्यातो विरक्तो ह्यगमद् द्विज ॥५४॥
शचीतीर्थे मुदा स्नात्वा चेन्द्रेश्वरमपूपुजत्। भाद्रे च पूर्णिमायां स नक्तं जागृतवान् तदा ॥५५॥
तन्निशि शिवदूताश्च तमास्थायाशु पुष्पके। निन्युः शिवपुरं दिव्यं सेवमाना महोत्सवैः[१९] ॥५६॥
अद्यापि स भवेद् विप्रो रुद्रस्यानुचरोऽनिशम्। महापराक्रमैर्युक्तः प्रमथानां महत्तमः[२०] ॥५७॥
स्नात्वा योऽत्र नरो धीमन् शचीतीर्थे विरूपदृक्। पूजतीन्द्रेश्वरं भक्त्या तस्य पुण्यफलं शृणु ॥५८॥
सर्वपापैर्विनिर्मुक्तो द्विजन्मनि समर्जितैः। गत्वा शक्रपुरं रम्यमिन्द्रेण सह मोदते ॥५९॥
या काचिदबला भक्त्या स्नात्वा चात्र प्रपूजति। इन्द्राणीञ्च महादेवीं शच्या सह प्रमोदते ॥६०॥
पञ्चोपचारकैर्मर्त्यश्चैतल्लिङ्गं प्रपूजति। बहुपापानि सन्त्यज्य शिवलोकं स गच्छति ॥६१॥
अतो वारुणदेशे त्वं भूयो गच्छ विरूपदृक्। निकुञ्जाचलकूटेऽधो यत्र भालेश्वरो विभुः ॥६२॥
लीलावत्यां मुदा स्नात्वा तल्लिङ्गं पूजयानिशम्। ततोऽर्चनाद् विरूपाक्ष ! सुसिद्धिं प्राप्नुयाद् ध्रुवम् ॥६३॥

माहात्म्यमेतत्कथितं पवित्रं लिङ्गस्य चैतस्य मयाऽधुना ते।
शृण्वन्ति मर्त्याः प्रसभञ्च भक्त्या ते प्राप्नुवन्तीन्द्रपुरीं सुखाढ्याम् ॥६४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां शचीतीर्थेन्द्रेश्वरयोर्माहात्म्यं नाम अष्टनवतितमोऽध्यायः ॥९८॥

श्रुतश्रवा नाम गरेका कुनै ब्राह्मण अघि विरक्त भएर यहाँ आई तपस्या गरेर मुक्त भएका थिए। हे विरूपाक्ष ! त्यो वृत्तान्त सुन। उनले शचीतीर्थमा प्रसन्न भएर भाद्रशुल्क पूर्णिमाको दिन स्नान गरी इन्द्रेश्वरको पूजा गरे र रात्रीमा जाग्राम बसे। त्यसै रातमा शिवजीका दूतहरूले उनलाई तुरुन्त पुष्पक विमानमा राखेर विभिन्न उत्सव गर्दै शिवपुरमा लगे। आज पनि ती ब्राह्मण प्रथमगणहरूमा मुख्य तथा महापराक्रमी भएर सधैं शिवसेवकका रूपमा रहेका छन् ॥५४-५७॥

हे विरूपाक्ष ! बुद्धि भएको जुन मानिसले यस शचीतीर्थमा स्नान गरेर भक्तिपूर्वक इन्द्रश्वरको पूजा गर्छ, त्यसको पुण्यफल सुन। दुई जन्मसम्म लागेको सम्पूर्ण पापबाट मुक्त भएर त्यो व्यक्ति सुन्दर इन्द्र नगरीमा गएर इन्द्रका साथ आनन्दसित बस्न पाउँछ। जुन नारीले भक्तिपूर्वक यहाँ स्तुति गरेर इन्द्राणीको पूजा गर्छे त्यो इन्द्राणीका साथ आनन्दसित बस्न पाउँछे। जुन मानिसले पञ्चोपचार विधिबाट यो लिङ्गको पूजा गर्छ त्यो व्यक्ति सम्पूर्ण पापबाट मुक्तभएर शिवलोक जान्छ। हे विरूपाक्ष ! अब तिमी पश्चिमतिर जाऊ। त्यहाँ निकुञ्जाचलको शिखरमुनि भालेश्वर भगवान् बस्नुभएको छ। हे विरूपाक्ष ! लीलावतीमा स्नान गरेर त्यस लिङ्गको पूजा गर। त्यसो गर्नाले अवश्य सिद्धि प्राप्त हुनेछ ॥५८-६३॥

मैले यो पवित्र तीर्थ र लिङ्गको महात्म्य तिमीलाई बताएँ। जुन मानिसले भक्तिपूर्वक यो महात्म्य आनन्दसित सुन्दछन्, ती मानिसहरू सुखैसुखले भरिपूर्ण भएको इन्द्रनगरीमा जान पाउँछन् ॥६४॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा शचीतीर्थ र इन्द्रेश्वरको माहात्म्यनामक
अन्ठानब्बेऔं अध्याय पूरा भयो।

---

१८. महोत्सवैः प्रसेवयन् इति न.सं.पु.पाठः। १९. गरिष्ठान् इति न.सं.पु.पाठः।

नवनवतितमोऽध्यायः

गन्धर्वतीर्थभालेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयो ययौ विरूपाक्षो निकुञ्जाद्रिं घटोद्भव। शचीतीर्थे ततः स्नात्वा चैश्वर्यवान् विकिल्विषः ॥१॥
ततो गन्धर्वतीर्थेऽसौ स्नात्वा च विधिवत्पुनः। भालेश्वरं समानर्च निकुञ्जाचलशेखरे ॥२॥
माघकृष्णनवम्यां स सम्पूज्य जागृतो निशि[1]। पप्रच्छ तन्माहात्म्यञ्च नेमुनिं तीर्थलिङ्गयोः ॥३॥

विरूपाक्ष उवाच

मुनिशार्दूल विप्रेश भूयोऽपि भवतोऽधुना। एतल्लिङ्गस्य माहात्म्यं श्रोतुमिच्छाम्यहं विभो ॥४॥
तीर्थमेततद् विशेषेण केन प्रकाशितं पुरा। किं प्राप्तञ्च फलञ्चात्र वद सर्वं[2] मुनीश्वर ॥५॥

नेमुनिरुवाच

सती पञ्चत्वमापन्ना क्रुद्धा दक्षस्य हेतुतः। तच्छवञ्च समादाय रुद्रोऽभ्रमन्महीं पुरा ॥६॥
ततोऽपतच्च तद्देहाद् भालमत्राद्रिशेखरे। लिङ्गं तत्र समुभूतं[3] तस्माद्भालेश्वरः स्मृतः ॥७॥
भुक्तिमुक्तिप्रदः साक्षाद् गन्धर्वैः पूजितो भवः। दिव्यदेहो भवेन्मर्त्यश्चैतल्लिङ्गसमर्चनात्[4] ॥८॥
लीलावती नदी श्रेष्ठा सुखस्रवा तथाऽपरा। तयोर्हि सङ्गमे तीर्थे दिव्यदेहफलप्रदे ॥९॥
कदाचिद्दिवसे दुःखी स्वर्गाद् भ्रष्टः पुराऽभवत्। सुमुखो नाम गन्धर्वो रम्भाशापादिहाऽऽययौ ॥१०॥
फाल्गुनशुक्लपक्षस्य सप्तम्यां सुतिथौ मुदा[5]। दुःखातुरस्तदैकाकी सस्नौ तत्र यथासुखम् ॥११॥
ददर्श स्वां तनुं दिव्यां स्नानात्स सुन्दरीं वराम्। अपश्यद् गालवं दान्तं ध्यानस्थञ्च मुदा युतम्[6] ॥१२॥
सोऽपृच्छत्तं वपुर्नम्रः स्वर्गगमनहेतुकम्। प्राग्निवेद्य च स्वागांसि[7] रम्भाशापं त्रिविष्टपे ॥१३॥

अध्याय – ९९

गन्धर्वतीर्थ र भालेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष निकुञ्जादिमा गए। तिनले शचीतीर्थमा स्नान गरे र पापमुक्त भई ऐश्वर्यशाली बने। त्यसपछि यिनले गन्धर्वतीथृमा विधिपूर्वक स्नान गरे। निकुञ्जाचलको शिखरमा गएर फेरि उनले भालेश्वरको पूजा गरे। माघकृष्ण नवमीका दिन उनले पूजा गरेर राती जाग्राम बसे। उनले त्यस तीर्थ र लिङ्गको महात्म्य नेमुनिसित सोधे। विरूपाक्षले भने– हे मुनिश्रेष्ठ ब्राह्मण ! यो लिङ्गको महात्म्य म फेरि पनि अहिले सुन्न चाहन्छु। विशेष गरी यस तीर्थलाई कसले अघि प्रकाशित गऱ्यो ? कसले के फल पायो ? हे मुनिश्वर ! यो सबै यहाँ बताउनुहोस् ॥१–५॥

नेमुनिले भन्नुभयो– दक्षको कारणले गर्दा अघि रिसाएर सतीदेवी मरेकी थिइन्। उनको लास लिएर भगवान् शङ्कर पृथ्वीमा घुम्नुभएको थियो। त्यसैबेला उनको शरीरबाट यस पर्वतको शिखरमा निधार खस्यो। त्यहीं लिङ्ग पैदा भयो। त्यसैले यसको नाम भालेश्वर रहेको हो ॥६–७॥

हे विरूपाक्ष ! यस शिवलिङ्गलाई साक्षात् गन्धर्वहरूले पूजा गरे। यसको पूजा गर्नाले भुक्ति तथा मुक्ति प्राप्त हुन्छ, जसले यो लिङ्गको स्पर्श गर्छ त्यसको शरीर दिव्य हुन्छ। लीलावती नाम गरेकी श्रेष्ठ नदी र सुखस्रवा नाम गरेकी अर्की नदी छन्। ती दुई नदीको सङ्गममा यो तीर्थ छ। यसले मानिसलाई दिव्य शरीर प्रदान गर्दछ। कुनै बेला रम्भाको सराप परेर सुमुख नाम गरेको गन्धर्व स्वर्गबाट भ्रष्ट भएर दुःखित हुँदै यसै ठाउँमा आइपुग्यो। फाल्गुन शुक्लपक्षको सप्तमीका दिन दुःखी त्यस गन्धर्वले एक्लै त्यस ठाउँमा आनन्दसित स्नान गऱ्यो ॥८–११॥

त्यहाँ स्नान गरेपछि उसले आफ्नो शरीरलाई अत्यन्त सुन्दर देख्यो। उसले तयहाँ आनन्दसित ध्यानमा संलग्न भएका दानी गालव ऋषिलाई देख्यो। उसले स्वर्गमा भएको रम्भाको सराप र आफ्ना अपराधहरू ऋषिलाई निवेदन गऱ्यो र स्वर्ग जाने बाटोका बारेमा उसले ऋषिलाई नम्र भएर सोध्यो ॥१२–१३॥

---

१. पूज्य जातृतवान्निशि इति न.सं.पु.पाठः।
२. एतद्वद इति न.सं.पु.पाठः।
३. तत्रैव सम्भवं लिङ्गम्, इति न.सं.पु.पाठः।
४. ....स्पृशाद् द्विज इति न.सं.पु.पाठः।
५. च तिथौ वरे इति न.सं.पु.पाठः।
६. चालभन्मुदम् इति न.सं.पु.पाठः।
७. स्वामागासि इति न.सं.पु.पाठः।

सुमुख उवाच

भगवन्मुनिशार्दूल ! शापबद्धस्य मेऽधुना। रम्भाया व्यसनं स्वर्गे मद्व्यसनं निशामय ॥१४॥
शक्रस्य पुरतः स्वर्गे ननृतुश्चाऽप्सरोगणाः। तालैर्गीतैर्महोल्लासैर्नित्यं शक्रप्रतोषका ॥१५॥
एकदा दिवसे रम्भा नृत्ये बहुकलान्विते। मामुद्दिश्य च विव्वोकैः पस्पर्श सुस्मितानना[८] ॥१६॥
पुष्पधन्वा च मां तत्र पुष्पेषुभिर्जघान वै। तस्या भ्रूकार्मुकस्निग्धकटाक्षप्रेरितैर्भृशम् ॥१७॥
मुमोहाऽहन्ततः स्वान्ते कटाक्षव्रणचिह्नितः[९]। तल्लालसायुतश्चाहं कामतप्तोऽभवं तदा[१०] ॥१८॥
ततो नृत्यावसाने सा गृहान्तरं विवेश तत्। शक्रेण सह सम्मुद्य रम्भा विनिर्ययौ निशि ॥१९॥
याते चैवार्द्धरात्रे तां कामतुष्टामजानता[११]। सङ्गृह्य चुम्बिता प्रोच्य प्रिये स्वागतमस्तु ते[१२] ॥२०॥
क्रोधेन मूर्च्छिता रम्भा ततः शापं ददौ च मे। धिग्धिगिति तदा प्रोच्य[१३] प्राकृतोऽसि न मां स्पृश ॥२१॥
अहं सुमुख ! रे यस्माद् गृहीता च त्वयाऽधुना। अविचार्येन्द्रपत्नीयं मूढ ! कामातुरः कथम् ॥२२॥
मर्त्यलोकनिवासी त्वं भव गन्धर्व ! चाऽद्यतः। स्वर्गलोकं परित्यज्य शैलारण्यचरोऽनिशम् ॥२३॥
एतच्छापादिह प्राप्तः संवत्सरशतं गतम्। ततः प्रभृति चाऽद्यादि वनेचरो भवाम्यहम् ॥२४॥
कथं मोक्ष्यामि तच्छापाद्दुःखातुरो मुने ततः। तदुपायं वदार्याशु स्वर्गसोपानहेतुकम् ॥२५॥

गालव उवाच

एतच्छिलोच्चये लिङ्गं भक्त्याऽर्चय सुरात्मज। प्राप्य तस्मात्फलं स्वर्गं गमिष्यसि न संशयः ॥२६॥
अस्मिन्तीर्थेऽनिशं स्नात्वा तमर्चय हि भक्तितः। नाऽविर्भूतः शिवो यावत्ततः फलं प्रलप्स्यसे ॥२७॥

सुमुखले भन्यो – हे ऋषि ! सरापलेबाँधिएको मेरो र रम्भाको स्वर्गमा भएको आपत्तिको विषयमा सुन्नुहोस्। स्वर्गमा इन्द्रको अगाडि अप्सराहरू नाचिरहेका थिए। उनीहरूले ताल, गीत र उत्सवद्वारा सधैं इन्द्रलाई प्रसन्न तुल्याउँथे। एकदिन धेरै कलाले युक्त भएको नाचमा मुसुक्क हाँसेकी रम्भाले मलाई लक्ष्य गरेर शृङ्गारभावले हेरिन्। त्यसबेला कामदेवले पनि रम्भाको आँखीभौँरूपी धनुषबाट छुटेका फूलका बाणहरूले जोडसित हिर्काए। हे प्रभु ! हृदयमा लागेको घाउको चोटले गर्दा म मूर्च्छा परेँ। वैद्यको खोजी गर्ने लालसाले म त्यसको पछि लागेँ। नाच सकिएपछि रम्भा अर्को घरमा पसिन्। रम्भा रातमा इन्द्रलाई खुशी तुल्याएर बाहिर निस्किइन् ॥१४-१९॥

आधा रातमा भोगबाट तुष्ट भएर आएकी भन्ने नजानेर रम्भालाई समातेर मैले 'हे प्रिया ! तिमीलाई स्वागत छ' भन्दै चुम्बन गरेँ। रीसले मूर्च्छा परेकी रम्भाले 'नछोऊ, तिमीलाई धिक्कार छ' भन्दै पशुतुल्य भएको मलाई सराप दिई। हे मूर्ख सुमुख ! तैले यो इन्द्रकी पत्नी हो भन्ने विचारै नगरीकन कामातुर भएर मलाई अहिले यसरी आक्रमण गरिस् ? । हे गन्धर्व ! आजदेखि तैं स्वर्गलोक छाडेर मर्त्यलोकको बासिन्दा भएस्। त्यहाँ तैंले सधैंभरि पहाड र जङ्गलमा हिंड्नु परोस्। यही सरापले गर्दा म यहाँ आएको हुँ। सय वर्ष बितिसके। त्यसै समयदेखि आजसम्म वनेचर भएर बसेको छु।हे मुनि ! त्यसै सरापबाट दुःखित भएको छु, मेरो मुक्ति कसरी हुन्छ ? हे आर्य ! स्वर्गको भऱ्याङ भएको त्यो उपाय मलाई तुरुन्त बताइदिनुहोस् ॥२०-२५॥

गालवले भने – हे गन्धर्व ! यस पर्वतकोथुम्काको शिखरमा रहेको शिवलिङ्गको पूजा गर, त्यसबाट फल प्राप्त गरेर तिमी स्वर्ग जान सक्छौ, यसमा शङ्का छैन। यस तीर्थमा सधैं स्नान गरेर भक्तिपूर्वक भगवान् शिवको पूजा गर। जहाँसम्म शिवजी प्रकट हुनुहुन्न त्यहाँसम्म त्यस लिङ्गको पूजा गरिराख, अनि फल पाउनेछौ ॥२६-२७॥

---

८. समाप्रक्षत् स्मितानना इति न.सं.पु.पाठः।
९. व्रणाङ्किताच्चिरं विभो इति न.सं.पु.पाठः।
१०. तद्भिषग्लालसीभूतश्चान्वेषितश्च तद्गतिम् इति न.सं.पु.पाठः।
११. याते चैवार्द्धरात्रौ तां कामतुष्यमजानतः इति न.सं.पु.पाठः।
१२. संगृह्य चुम्बितोऽहं तां कृत्वेति स्वागतं प्रिये इति न.सं.पु.पाठः।
१३. प्रोक्त्वा इति न.सं.पु.पाठः।

नेमुनिरुवाच

तदाज्ञाञ्च समादाय गन्धर्वः प्रसभं द्विज। निकुञ्जाद्रेरधोभागे चैतल्लिङ्गमपूपुजत् ॥२८॥
फाल्गुने चासितेऽष्टम्यामेकाब्दान्ते महेश्वरः। आविर्बभूव चैतस्मिन् तं भक्तं प्रोक्तवान् यथा[१४] ॥२९॥

भालेश्वर उवाच

भो गन्धर्व वरं मत्तो वरय त्वं यथेप्सितम्। तुष्टोऽहमिह ते भक्त्या दास्यामि तद्वरं ध्रुवम् ॥३०॥

सुमुख उवाच

नमस्ते भगवन् रुद्र ! सर्वभूतदयाकर। भक्तानां वेदनाज्ञोऽसि भवन्तं किं वदाम्यहम् ॥३१॥
रम्भाशापेन चाऽत्राऽहं प्रेषितस्त्रिदिवाद्विभो। तत्स्थानं लब्धुकामोऽहं भवामि किङ्करो हि ते ॥३२॥
स्वर्गप्राप्तिवरं याचे हे विभो ! भवतो द्रुतम्। प्रभुत्वं नैव भूतेश ! स्वप्नलब्धं धनं यथा ॥३३॥

भालेश्वर उवाच

शप्तस्त्वञ्च यया[१५] वत्स ! क्रीडिष्यसि तया सह। स्वर्गे सुखं हि गन्धर्व ततो मे किङ्करो भव ॥३४॥

नेमुनिरुवाच

इति दत्त्वा वरं विप्र ! गन्धर्वाय तदा द्रुतम्। प्रदर्श्याङ्गं स्वकीयं तदेतल्लिङ्गे तिरोदधे ॥३५॥
ततो रुद्राज्ञया देवाश्चाऽत्राऽऽगत्य मुदान्विताः। विमाने तं समास्थाय निन्युते स्त्रिदिवं तदा ॥३६॥
रम्भा ददर्श तं स्वर्गे देवानाञ्च पुरोगतम्। सा सद्यो मुमुहे[१६] रम्भा प्रेक्ष्य यानागतं द्विज ॥३७॥
आलिलिङ्ग सभामध्ये कामातुराऽऽगतं[१७] हि सा। प्रोवाच सादरं दोर्भ्यां स्वागतं हे प्रियेति च ॥३८॥
तस्याश्चेष्टां तदालोक्य शक्रः क्रोधेन चाऽवदत्। देवेभ्यस्त्वरितं विप्र ! सुधर्मायां स्थितो यदा ॥३९॥

नेमुनिले भन्नुभयो– गन्धर्वले निकुञ्ज पर्वतको तल्लो भागमा रहेको यस लिङ्गलाई खूबसित पूजा गऱ्यो एक वर्षपुगेपछि फागुनकृष्ण अष्टमीका दिन यसै लिङ्गबाट भगवान् शङ्करको प्रार्दुभाव भयो र उहाँले आफ्नो भक्त त्यस गन्धर्वलाई भन्नुभयो ॥२८–२९॥

भालेश्वरले भन्नुभयो– हे गन्धर्व ! म तिम्रो भक्तिबाट सन्तुष्ट भएँ, मसित इच्छा लागेको वर माग, अवश्य म तिमीलाई चाहेको वर दिन्छु ॥३०॥

सुमुखले भने– हे भगवान् ! प्राणीमाथि दया गर्ने हे रुद्र ! हजुर भक्तको पीडा बुझ्नुहुन्छ, म हजुरलाई के भनूँ ? हे प्रभु ! रम्भाको सरापले गर्दा स्वर्गबाट म यहाँ आएको छु। म त्यही ठाउँलाई फेरि प्राप्त गर्न चाहन्छु। म हजुरको सेवक हुँ। हे सर्वव्यापक परमात्मा! अहिले म छिट्टै हजुरबाट स्वर्गप्राप्तिरूप वर माग्दछु। हे भूतेश ! मलाई सपनामा पाएको धनजस्तो स्वर्गको क्षणिक सम्प्रभुता चाहिएको छैन ॥३१–३३॥

भालेश्वरले भन्नुभयो– हे बाबु ! जसले तिमीलाई सराप दियो, त्यससित तिमी स्वर्गमा सुखपूर्वक खेल्न पाउनेछौ, तिमी मेरो सेवक बन ॥३४॥

नेमुनिले भन्नुभयो– हे विरूपाक्ष ! यसरी भगवान् शङ्करले गन्धर्वलाई तुरुन्त वरदान दिएर आफ्नो शरीर उसलाई देखाउँदै यसै लिङ्गमा अन्तर्धान हुनुभयो ॥३५॥

भगवान् शङ्करको निर्देशन अनुसार खुशी हुँदै देवताहरू यहाँ आएर त्यस गन्धर्वलाई विमानमा राखी स्वर्ग लगे। हे विरूपाक्ष ! यानमा बसेर देवताहरूको अगाडि लागी स्वर्गमा आएका गन्धर्वलाई देखेर रम्भा तुरुन्त मोहित भइन्। सभाकै बीचमा कामातुर भएर त्यस रम्भाले हे प्रिय ! हजुरलाई स्वागत छ भन्दै दुई हातले अङ्कमाल गरिन्। हे विरूपाक्ष ! सुधर्मा नाम गरेको सभामा बसेका इन्द्रले रम्भाको त्यस्तो गतिविधि देखेर रिसाउँदै देवताहरूलाई भन्न लागे ॥३६–३९॥

---

१४. तस्मै व्याचष्ट भक्तिने इति न.सं.पु.पाठः।
१५. सद्यो मुमोह सा इति न.सं.पु.पाठः।
१६. यया त्वं शापितो वत्स, इति न.सं.पु.पाठः।
१७. कामातुरा श्रुतम् इति न.सं.पु.पाठः।

इन्द्र उवाच

पश्यन्तु भो सुराश्चष्टां[१८] रम्भाया इह तस्य च। ममाऽध्यक्षे सभामध्ये तमालिङ्गति सा दृढम् ॥४०॥

अवजानाति सा नोऽत्र यतो देवास्ततो बहिः। यूयं निष्कासयध्वं तां मत्पुरात्तं पृथक् पृथक् ॥४१॥

बृहस्पतिरुवाच

मां कुप्यतां त्वया शक्र ! वरो दत्तो हि शम्भुना। प्राप्तव्यं तेन कुत्राऽपि चाऽवश्यं तपसः फलम् ॥४२॥

निकुञ्जाद्रौ पुरा चाऽस्मै दत्तो वरश्च शूलिना। एतस्याः शापतो दुःखात्तपः स्थिताय सेविने[१९] ॥४३॥

एतया सह सम्भोगं कृत्वा वर्षसहस्रकम्। भविष्यति ततश्चाऽसौ शङ्करानुचरः पुनः ॥४४॥

नेमुनिरुवाच

ततः शक्रे विकोपे स मुमुदे हि तया सह। व्याप्य सहस्रवर्षं स चाऽभूच्च प्रमथः पुनः ॥४५॥

एतद्धि कथितं विप्र ! भालेश्वरप्रशंसनम्[२०]। तीर्थस्यैव च माहात्म्यं सर्वाशापूरकस्य च[२१] ॥४६॥

एतल्लिङ्गं येऽर्चयन्ति स्नात्वा तीर्थे च भक्तितः। मनोभिरीप्सिताञ्चाऽऽशां लब्ध्वा गच्छन्ति शाङ्करम् ॥४७॥

भूयो विरूपाक्ष ! हि गच्छ चातो याम्यां दिशं योजनमात्रमर्द्धम्।
यत्र स्थितो गुप्तहरो गुहायां नद्याः प्रभायाः प्रभवो यतो वै ॥४८॥

इति श्रीस्कन्दपुराणे हिमवतखण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां भालेश्वरगन्धर्वतीर्थमाहात्म्यं नाम नवनवतितमोऽध्यायः ॥९९॥

इन्द्रले भने – हे देवता हो ! रम्भा र त्यस गन्धर्वको चरित्र यहाँ हेर। म अध्यक्ष भएर बसेको यो सभामा रम्भा त्यस गन्धर्वलाई खूबसित आलिङ्गन गरिरहेकी छ। हे देवता हो ! त्यसले हामीहरूको अपमान गरिरहेकी छ। त्यसैले मेरो शहरबाट ती दुईलाई अलग–अलग हुने गरी निकालिदेओ ॥४०–४१॥

बृहस्पतिले भन्नुभयो – हे इन्द्र ! तपाईं न रिसाउनुहोस्, त्यसलाई भगवान् शङ्करले वर दिनुभएको छ। जहाँ बसे तापनि तपस्या गर्ने व्यक्तिले तपस्याको फल पाउँछ नै। अघि निकुञ्ज पर्वतमा रम्भाको सरापबाट पीडित भएर तपस्यामा संलग्न त्यस भक्तलाई भगवान् शङ्करले वर दिनुभएको थियो। एक हजार वर्षसम्म यस रम्भासँग सहवास गरिसकेपछि यो गन्धर्व फेरि शङ्करको सेवक भएर बस्नेछ ॥४२–४४॥

नेमुनीले भन्नुभयो – त्यसपछि इन्द्रको रीस हरायो। त्यो गन्धर्वले रम्भाका साथ एक हजार वर्षसम्म रमण गरेपछि प्रथमगण बन्न पुग्यो। हे विरूपाक्ष ! मैले तिमीलाई सम्पूर्ण आशा पूर्ण गर्ने ऋद्ध स्वरूप भएका भालेश्वर भगवानको लिङ्ग र तीर्थको महात्म्य बताएँ। जसले भक्तिपूर्वक तीर्थमा स्नान गरेर भालेश्वर लिङ्गको पूजा गर्छन्, तिनीहरूले सम्पूर्ण कामना पूर्ण गरी शिवजीको लोकमा जान पाउँछन् ॥४५–४७॥

हे विरूपाक्ष ! जुन गुफामा भगवान् शङ्कर लुकेर बस्नुभएको छ, जहाँबाट प्रभा नाम गरेकी नदी प्रदा भएकी छन्, यहाँ देखि आधा योजन पर दक्षिण दिशामा रहेको त्यस ठाउँमा तिमी जाऊ ॥४८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवतखण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भालेश्वर र गन्धर्वतीर्थको माहात्म्यनामक
उनान्सयौं अध्याय पूरा भयो।

---

१८. **भक्तिने इति न.सं.पु.पाठः।**
१९. **तुभ्यं भालेश्वरस्य कोपिनः इति न.सं.पु.पाठः।**
२०. **भो देवा दृश्यतां, इति न.सं.पु.पाठः।**
२१. **सर्वाशासम्प्रदस्य च इति न.सं.पु.पाठः।**

शततमोऽध्यायः

सिद्धतीर्थगुप्तेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

स्नात्वा गन्धर्वतीर्थेऽसौ भालेश्वरमपूपुजत् । तत आशा प्रपूर्णाऽभून्मनसा चिन्तिता च या ॥१॥
ततोऽगमदितो याम्ये दिशि द्विक्रोशके मुने । विरूपाक्षः पुनः शीघ्रं नेमुनिना समं मुदा ॥२॥
कुञ्जाद्रिशेखरे लिङ्गमर्चयामास[1] भक्तितः । सिद्धतीर्थे मुदा स्नात्वा गुप्तेश्वरं प्रपूज्य च ॥३॥
एतत्तीर्थस्य माहात्म्यं लिङ्गस्य तद् विरूपदृक् । माघकृष्णदशम्यां स विनिद्रोऽपृच्छदादरात्[2] ॥४॥

विरूपाक्ष उवाच

नेमुने ! मुनिशार्दूल बहुवार्ताविशारद । एतत्कथं समुद्भूतं गुहायां लिङ्गमुत्तमम् ॥५॥
सरितश्च प्रभाख्यायास्त्वयोक्तायास्तथैव च । तयोश्चैव हि माहात्म्यं वद मे मुनिपुङ्गव ॥६॥

नेमुनिरुवाच

वृत्रासुरेण रुद्रोऽसौ चाऽभिद्रुतो भृशं पुरा । व्याजवृत्तिं समाविश्य तद्वरं च परीक्षितुम् ॥७॥
तद्भयाच्च महारुद्रश्चैतस्यां प्रविवेश वै । परिभ्रम्य रसां सर्वां सशैलवनकाननाम् ॥८॥
देहप्रभां सुविस्तार्य चैतत्पर्वतगह्वरे । रहसि[3] संस्थितो रुद्र एतस्यां निर्ज्जनो विभुः ॥९॥
प्रभायाः संभवो यस्मास्तस्मात्प्रभावती नदी । बहुकल्लोलिनी दिव्या सा प्रोवाहाऽनिशं शुभम् ॥१०॥
विष्णुना च हते दैत्ये शङ्करो हि विनिर्ययौ । एतल्लिङ्गं समास्थाय स्वमेकांशं ततोऽत्र च ॥११॥
देवर्षयस्तथा नागाः प्रमथा योगिनीगणाः । तदाऽऽगत्याऽत्र तिष्ठन्ति चाऽद्यादि सेवया विभोः ॥१२॥
प्रभावती नदी श्रेष्ठा शिलारसा तथाऽपरा । तयोश्च सङ्गमे विप्र ! सिद्धतीर्थमुदाहृतम् ॥१३॥

अध्याय - १००

सिद्धतीर्थ र गुप्तेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – विरूपाक्षले गन्धर्व तीर्थमा स्नान गरेर भगवान् भालेश्वरको पूजा गरे, त्यसपछि उनले मनमा जे चिताएका थिए, त्यो आशा पूर्ण भयो । त्यसपछि नेमुनिलाई साथमा लिएर विरूपाक्ष दक्षिणपट्टि दुई कोश पर रहेको क्षेत्रमा हर्षित हुँदै तुरुन्त गए । कुञ्जाद्रिको शिखरमा उनले भक्तिपूर्वक त्यस गुप्तेश्वर लिङ्गको पूजा गरे । प्रसन्न भएर उनले सिद्धतीर्थमा स्नान गरी गुप्तेश्वरको पूजा गरे । हे विरूपाक्ष ! उनले माघकृष्ण दशमीका दिन जाग्राम बसेर यो तीर्थ र लिङ्गको माहात्म्य नेमुनिसँग आदरपूर्वक सोधे ॥१-४॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ नेमुनि ! हजुर सबै कुराको ज्ञाता हुनुहुन्छ । गुफामा उत्तम लिङ्ग कसरी पैदा भयो ? यो कुरा बताउनुहोस् । हे मुनिश्रेष्ठ ! प्रभा नाम गरेकी नदी र तपाईंले भन्नुभएको अर्को नदीको सङ्गमको माहात्म्य मलाई बताउनुहोस् ॥५-६॥

नेमुनिले भन्नुभयो – अघि वृत्रासुरले भगवान् शङ्करलाई उहाँले दिएको वरको परीक्षाका लागि छल गरेर खुबसित लखेटेको थियो । त्यसको डरले गर्दा भगवान् शङ्कर पहाड, वन र जङ्गलले भरिएको सम्पूर्ण पृथ्वी घुमेर यसै गुफामा प्रवेश गर्नुभएको थियो । अघि भगवान् शङ्कर शरीरको तेजलाई विस्तार गरेर गुप्तरूप लिई एक्लै यस गुफामा बस्नुभएको थियो । भगवान्को प्रभाबाट उत्पन्न भएको हुनाले ठूलो तरङ्गले युक्त भएको दिव्य प्रभावती नदी पैदा भएर निरन्तर बगिरहेको छ ॥७-१०॥

विष्णुले वृत्रासुरलाई मारेपछि आफ्नो उक अंशले युक्त भएको शिवलिङ्ग यहाँ राखेर भगवान् शङ्कर निस्कनुभयो । देवता, ऋषि, नाग, प्रथमगण र योगिनीहरू त्यसबेला यहाँ आएर आजसम्म महादेवको सेवा गरेर बसेका छन् । हे विरूपाक्ष ! त्यहाँ प्रभावती नाम गरेकी नदीका साथ सिद्धरसा नदी छन् । ती दुईको सङ्गमलाई सिद्धतीर्थ भनिन्छ ॥११-१३॥

---

१. लिङ्गं पूजितवाँश्च, इति न.सं.पु.पाठः ।
२. विनिद्रोऽपृच्छदाद्रितः , इति न.सं.पु.पाठः ।
३. गुप्तेन, इति न.सं.पु.पाठः ।

आसीत् कश्चिद् द्विजः पूर्वं विद्याचौर्येण चाऽऽगसा। पुनर्जन्मन्यसौ वत्स बभूव[४] ब्रह्मराक्षसः ॥१४॥
क्षुत्पिपासातुरो रक्षः परिभ्रम्य महीतलम्। प्राप्तवान्तीर्थमेतत्स पपौ चात्र जलं सुखम् ॥१५॥
तज्जलस्पर्शनात्पानात्त्यक्तरक्षः कलेवरः। अभवद्विप्रदेहोऽसौ यथापूर्वं स राक्षसः ॥१६॥
ब्रह्मवर्चोज्ज्वलद्देहश्चाहिवन्मुक्तकञ्चुकः। जातिस्मरणविद्धात्मा श्रुतिशास्त्रविशारदः ॥१७॥
भरद्वाजमुनिं तत्र शिवदासो ददर्श तम्। प्रणम्य शिरसा भक्त्या पप्रच्छ मुक्तिहेतुकम् ॥१८॥
नमस्ते भगवन् तुभ्यमाजन्मोपप्लवस्त्वहम्। कथं भवाब्धिं गम्भीरं तरामि च वद प्रभो ॥१९॥

भरद्वाज उवाच

सत्यमुक्तं त्वया वत्स चैवमेव शरीरिणाम्। दुःखमूलो हि संसारस्तथाऽजस्रं[५] दिवौकसाम् ॥२०॥
अत एव सदा धीमान्संसारे सदुपासनात्। तारयेदात्मनात्मानं तद्दुःखं विनिवर्त्तते ॥२१॥
त्वमप्यत्र पुनः स्नात्वा गुप्तेश्वरं प्रपूजय। कुञ्जशैलगुहायां वै क्षिप्रं सिद्ध्यति ते फलम् ॥२२॥

नेमुनिरुवाच

भूयः स्नात्वा ततो विप्रः सिद्धतीर्थे हि भक्तितः। कुञ्जाद्रिं स समारुह्य तद्गुहां प्रविवेश च ॥२३॥
आनर्च विधिवल्लिङ्गं भक्त्या पञ्चोपचारकैः। उषित्वैकनिशां प्रातः तपःकृष्णकुहुं पुनः ॥२४॥
रुद्रदूताः समभ्येत्य रुद्राज्ञया च सत्वरम्। समास्थाय च याने तं निन्युर्लोकं शिवस्य च ॥२५॥

अघि कुनै शिवदास ब्राह्मण थिए। तिनले पूर्व जन्ममा विद्या चोरेका थिए। त्यसै अपराधले गर्दा ती ब्रह्मराक्षस भएर पैदा भए। भोक र प्यासले आत्तिएको त्यो ब्रह्मराक्षस पृथ्वीभरि घुम्दै यस तीर्थमा आइपुग्यो र त्यसले आनन्दसित जल पियो। त्यस तीर्थको जलको स्पर्श र जलपानले गर्दा राक्षसको शरीरलाई त्याग गरेर यो राक्षस ब्राह्मणको शरीर लिन पुग्यो ॥१४–१६॥

त्यसपछि ती ब्राह्मणको शरीर ब्रह्मतेजले गर्दा काँचुली छोडेको सर्पजस्तै उज्यालो भयो। तिनको आत्माले पूर्वजुनीको स्मरण गऱ्यो। ती ब्राह्मण श्रुति तथा शास्त्रका ज्ञाता शिवदास नामबाट प्रसिद्ध भए। त्यहाँ शिवदासले भरद्वाजमुनिलाई देखेर शिरले प्रणाम गरी भक्तिपूर्वक कसरी मुक्ति प्राप्त गर्न सकिन्छ भनी त्यसको कारण सोधे– हे भगवन् ! तपाईंलाई नमस्कार छ। म जन्मदेखि नै दुःखमा डुबेको छु। हे प्रभु ! कसरी गहिरो समुद्र तर्न सक्छु, मलाई बताइदिनुहोस् ॥१७–१९॥

भरद्वाजले भन्नुभयो – हे बाबु ! तिमीले साँचो भन्यौ, देहधारीहरको यस्तै स्थिति हुन्छ, संसार भनेकै दुःखको जड हो। देवताहरूको पनि नित्य यस्तै स्थिति हुन्छ। यसैले यहाँ बुद्धिमान्ले सत्‌को उपासनाबाट आफूले आफूलाई नै तार्नुपर्छ। त्यसो गऱ्यो भने संसारको त्यो दुःख हटेर जान्छ। तिमीले पनि यसै तीर्थमा स्नान गरेर कुञ्जशैलको गुफामा बसेका गुप्तेश्वर भगवान्‌को पूजा गर। यसो गऱ्यौ भने तिम्रो मनोरथ तुरुन्त सिद्ध हुनेछ ॥२०–२२॥

नेमुनिले भन्नुभयो – त्यसपछि ती शिवदास भक्तिपूर्वक सिद्धतीर्थमा स्नान गरेर कुञ्ज पर्वतमा आरोहण गरे अनि त्यो गुफामा प्रवेश गरे। एक रात त्यहाँ बसेर माघे औंसीका दिन बिहान विधिपूर्वक सभक्ति पञ्चोपचार विधिले उनले शिविलिङ्गको पूजा गरे। भगवान् शङ्करको निर्देशन अनुसार रुद्रका दूतहरू त्यहाँ आएर तुरुन्त तिनलाई यानमा राखेर शिवजीको लोकमा लगे ॥२३–२५॥

---

४. चाभूच्च, इति न.सं.पु.पाठः।

५. संसारस्त्वाप्यजस्रम् , इति न.सं.पु.पाठः।

सिद्धतीर्थे च यः स्नात्वा कुब्जशैलं च लङ्घयन्[६] । पूजयति च यदा लिङ्गं रुद्रलोकं प्रगच्छति ॥२६॥
गुप्तेश्वरस्य माहात्म्यं मया प्रोक्तं पुनः शृणु[७] । मुकुन्दाद्रिनितम्बं च गच्छ तत्त्वं वदामि ते ॥२७॥
भूयो व्रज त्वं हि विरूपदृग्वै पूर्वोत्तरे योजनदूरदेशे[८] ।
यत्र स्थितो विप्र तिलेश्वरोऽसौ तीर्थं मनःश्रीरितिनामकं च[९] ॥२८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये तीर्थयात्रायां सिद्धतीर्थगुप्तेश्वरयोर्माहात्म्यं नाम शततमोऽध्यायः ॥१००॥

जसले सिद्धतीर्थमा स्नान गरेर कुब्ज पर्वतमा चढी यस लिङ्गको जब पूजा गर्छ त्यो व्यक्ति रुद्रलोक जान पाउँछ । गुप्तेश्वरको माहात्म्य मैले तिमीलाई बताएँ । अब मुकुन्दपर्वतको फेदीको महिमा बताउँछु, तिमी त्यहाँ जाऊ ॥२६-२७॥

हे विरूपाक्ष ! अब तिमी यहाँबाट चारकोस टाढा रहेको ईशान दिशामा जाऊ । हे ब्राह्मण ! त्यहाँ कुलेश्वर महादेव रहनुभएको छ, त्यहाँ मनश्री नामको तीर्थ रहेको छ ॥२८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा सिद्धतीर्थ र गुप्तेश्वरको माहात्म्यनामक सयौं अध्याय पूरा भयो ।

परास्बा वाग्वादिनी भगवतीको असीम अनुकम्पाबाट पोरकनी पाल्पा निवासी पतिव्रताशिरोमणि स्वर्गीय माताश्री दिव्यलक्ष्मी ढकाल र सज्जनमुकुटमणि स्वर्गीय पिताश्री चूडामणि ढकालका कनिष्ठ पुत्र नेपाल संस्कृत विश्वविद्यालय सेवा आयोगका अध्यक्ष प्रा. डा. वेणीमाधव ढकालद्वारा गरिएको महर्षि वेदव्यासरचित स्कन्दमहापुराणअन्तर्गत हिमवत्खण्डको
अभिनव सम्पादन एवं नरहरिनामक नेपाली भाषानुवादमा
चौसट्ठीलिङ्ग प्रकरण पूरा भयो ।

---

६. **समारुहन्, इति न.सं.पु.पाठः ।**
७. **प्रोक्तमिति पुनश्च ते, इति न.सं.पु.पाठः ।**
८. **योजनमात्रकेऽतः, इति न.सं.पु.पाठः ।**
९. **तीर्थं मनःश्रीस्वभिधानकञ्च, इति न.सं.पु.पाठः ।**

एकोत्तरशततमोऽध्यायः

मनःश्रीतीर्थगुप्तेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

सिद्धतीर्थे मुने स्नात्वा प्रेक्ष्य गुप्तेश्वरं द्विज। पूर्वजन्मकृतैर्पापैर्मुक्तः स्याद् ज्ञानवान्नरः[१] ॥१॥
भूयोऽगमद्विरूपाक्षो नेमुनिना समं मुने। मुकुन्दगिर्यधोभागे यत्र तिलेश्वरो विभुः ॥२॥
स मनःश्रीमहातीर्थे सस्नौ भक्त्या विरूपदृक्। तिलेश्वरं समानर्च पञ्चोपचारकैर्मुदा ॥३॥
एकादश्याञ्च माघस्य कृष्णपक्षस्य कुम्भज। महत्या चैव तद्भक्त्या जजाप तन्मनुं निशि ॥४॥
उषित्वैकां निशान्तत्र शिवनाम पठन्पुनः। पप्रच्छ नेमुनिञ्चाऽसौ माहात्म्यं तीर्थलिङ्गयोः ॥५॥

विरूपाक्ष उवाच

मुनिशार्दूल त्वत्तोऽहं श्रोतुकामः सभक्तिकम्[२]। एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च विशेषतः ॥६॥
समुद्भूतं कथं[३] लिङ्गमेतत्कुण्डं पुनर्विभो। किं फलं प्राप्यते स्नानात्पूजनात् तद् वदाऽधुना[४] ॥७॥

नेमुनिरुवाच

आसीदाङ्गिरसो दान्तः पूर्वमत्र समाययौ। कुर्वन् तीर्थाटनं नूनं[५] स्नातस्तीर्थेषु सर्वशः ॥८॥
सङ्क्रान्त्यां माघशुक्लायां लिङ्गं तिलमयञ्च सः। संस्कृत्य विधिवद्भक्त्या समानर्च[६] बृहस्पतिः ॥९॥
मनोवतीजलेनेशं वागीश्वरत्वप्राप्तये[७]। अपूपुजन्मुदा भक्त्या गन्धपुष्पोपहारकैः ॥१०॥
तज्जलस्पर्शनादेव चाऽभूल्लिङ्गं शिलामयम्। तिलराशिकृतञ्चाऽपि सिद्धरससमागमात् ॥११॥

अध्याय - १०१

मनःश्री(मनोहरा)तीर्थ र गुप्तेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो– हे अगस्त्य मुनि मानिस सिद्धतीर्थमा स्नान गरेर गुप्तेश्वरको दर्शन गरेपछि पूर्वजन्ममा गरेका पापबाट मुक्त र ज्ञानी हुन्छ। त्यसपछि विरूपाक्ष जहाँ तिलेश्वर भगवान् बस्नुहुन्थ्यो, त्यस मुकुन्द पर्वतको फेदीमा नेमुनिलाई साथमा लिएर गए। विरूपाक्षले मनश्री महातीर्थमा भक्तिपूर्वक स्नान गरे र प्रसन्न भएर पञ्चोपचार विधिले तिलेश्वर महादेवको पूजा गरे। हे अगस्त्य मुनि ! माघकृष्ण एकादशीको दिन शिवजीप्रति ठूलो भक्ति राखेर राति उनले शिवमन्त्र जप गरे। एक रात त्यहाँ बसेर शिवजीको नाम जप्दै यिनले तीर्थ र लिङ्गको माहात्म्यको बारेमा नेमुनिसित सोधे ॥१-५॥

विरूपाक्षले भने – हे सर्वज्ञ मुनिश्रेष्ठ ! हे प्रभु ! यो लिङ्ग र विशेष गरी तीर्थको माहात्म्य हजुरबाट म सुन्न चाहन्छु। कसरी यो लिङ्ग र तीर्थकुण्डको प्रादुर्भाव भयो ? स्नान र पूजा गर्नाले कुन फल प्राप्त हुन्छ ? त्यो कुरा मलाई बताउनुहोस् ॥६-७॥

नेमुनिले भन्नुभयो– अघि अङ्गिराका छोरा बृहस्पति तीर्थयात्राका क्रममा सबै तीर्थमा स्नान गरेर यहाँ आइपुगेका थिए। माघशुक्ल सङ्क्रान्तिका दिन बृहस्पतिले तिलैतिलले बनेको लिङ्गलाई संस्कार गरेर सभक्ति विधिपूर्वक पूजा गरे। विद्यारूपी सम्पत्तिको प्राप्तिका निमित्त बृहस्पतिले मणिमतीको जलले स्नान गराएर चन्दन, फूल आदि सामग्रीहरूले भगवान् शङ्करको पूजा गरे। सिद्धरस मिसिएको त्यस नदीको जलको स्पर्शले गर्दा तिलको थुप्रो लगाएर बनाएको त्यो लिङ्ग शिलाको लिङ्ग बन्न पुग्यो ॥८-११॥

---

१. पूर्वजन्मकृतं यत्तज्ज्ञानवान्मुक्तसंशयः, इति न.सं.पु.पाठः।
२. सर्वज्ञ। श्रोतुकामस्त्वयि प्रभो, इति न.सं.पु.पाठः।
३. कथं समुद्भवम्, इति न.सं.पु.पाठः।
४. स्नानात्पूजनात्तद्वदस्व मे, इति न.सं.पु.पाठः।
५. चार्चति स्म, इति न.सं.पु.पाठः।
६. तीर्थयात्रां भ्रमन्नूनम्, इति न.सं.पु.पाठः।
७. वाग्विभवाय निश्चितः, इति न.सं.पु.पाठः।

मुमुदे स ततस्तीव्रं[८] लिङ्गं प्रेक्ष्य शिलामयम्। तिलकेशं महालिङ्गं सर्वयज्ञफलप्रदम् ॥१२॥
रूपं तस्य प्रवक्ष्यामि महापातकनाशनम्। एकवक्त्रं त्रिनेत्रञ्च कृत्तिवासश्चतुर्भुजम् ॥१३॥
नागयज्ञोपवीताङ्गं सर्वाभरणभूषितम्। व्योमप्रभं महाभीष्मं मुण्डमालागलावृतम् ॥१४॥
कपालं त्रिशिखं शक्तिं दधानं डमरुं भुजैः। महामङ्गलरूपेशं दक्षिणामूर्त्तिसंयुतम् ॥१५॥
त्रिनेत्रां द्विभुजां श्यामां मस्तके मुण्डधारिणीम्[९]। कालेश्वरीं महानीलां सर्वाभरणशोभनाम् ॥१६॥
शवश्रवणशस्ताङ्गां देवञ्च[१०] शक्तिसंयुतम्। जजाप तन्मनुं तीव्रं भावेनाऽहर्निशं तदा ॥१७॥
तृतीये दिवसे रुद्रो लिङ्गादाविर्बभूव हि। व्याचष्ट वरदानाय तं भक्तप्रवरं[११] विभुः ॥१८॥

तिलेश्वर उवाच

सन्तुष्टस्तपसा तेऽहं भक्त्या च जीव ! साम्प्रतम्। यद्विद्यते च ते कामो हृदि जानामि तद् ध्रुवम् ॥१९॥
त्वमत्र श्रद्धया वत्स ! समावाहय भारतीम्। आगमिष्यति सा नूनं स्थातुं कण्ठे तवाधुना ॥२०॥
त्यक्त्वा च भार्गवं सा वै त्रिविष्टपाच्च सत्त्वरम्। त्वयाऽऽहूता समायाति चाऽवश्यं बृहतां पते ॥२१॥
भविता सा द्रवीभूता किञ्चिद्धेतोस्ततश्च ताम्। पास्यसि करपुटेन वाक्पतिस्त्वं भविष्यसि ॥२२॥
भार्गवोऽपि पुनर्जीव ! तव शापेन वै तदा। प्राप्स्यति[१२] स द्रवत्वञ्च विमुक्तो मत्प्रसादतः ॥२३॥

नेमुनिरुवाच

इत्युपदिश्य रुद्रोऽयं जीवाय सत्वरं तदा। एतल्लिङ्गे तिरोधानं गतवान् दर्शयँश्च तम् ॥२४॥
ततश्चाऽऽवाहयज्जीवो भारतीमत्र सत्वरम्। स्नात्वा चैव मनोवत्यां श्रद्धया विधिवत्तदा ॥२५॥

सम्पूर्ण यज्ञको फल दिने तिलकेश्वर महादेवको लिङ्ग शिलामय भएको देखेर उनी अत्यन्त प्रसन्न भए। महापापलाई नाश गर्ने ती महादेवको स्वरूप म बताउँछु – उहाँका तीन आँखा थिए, एउटा मुख थियो, छालाको लुगा लगाउनु भएको थियो, चार हात थिए, नागको जनै शरीरमा लगाउनु भएको थियो, सम्पूर्ण गहनाले अलङ्कृत हुनुहुन्थ्यो, आकाशको जस्तो कान्ति थियो, अत्यन्त डरलाग्दो हुनुहुन्थ्यो, मुण्डमाला गलामा बेरिएको थियो, खप्पर त्रिशूल शक्ति र डमरु हातमा लिनुभएको थियो, अत्यन्त कल्याणमय उहाँको मूर्ति थियो, उहाँ दक्षिणामूर्तिसहित विराजमान हुनुभएको थियो ॥१३–१५॥

तीन आँखा र दुई हात भएकी, कपालमा झाँक्रो पालेकी, मुण्डमाला लगाएकी, सबै गहनाले सजिएकी, अत्यन्त कालो वर्णकी, काँधमा मुर्दा बोकेकी देवीले युक्त भएका महादेवको ध्यान गरी बृहस्पतिले त्यसबेला शिवजीको मन्त्र रातिदन खूबसित जप गरे। तेस्रो दिन भगवान् शङ्कर लिङ्गबाट प्रकट हुनुभयो र आफ्ना भक्त बृहस्पतिलाई वर दिनका निमित्त भन्न लाग्नुभयो ॥१६–१८॥

तिलेश्वरले भन्नुभयो – हे बृहस्पति ! तिम्रो तपस्या र भक्तिले म अहिले सन्तुष्ट भएँ, तिम्रो हृदयमा जस्तो इच्छा छ, त्यो मैले अवश्य जानेको छु। हे बाबु ! तिमी श्रद्धाका साथ भगवती सरस्वतीको आवाहन गर। निश्चय नै उनी तिम्रो कण्ठमा वास गर्न आउनेछिन्। हे बाबु ! तिमीले बोलाइसकेपछि सरस्वती शुक्राचार्यलाई छोडेर स्वर्गबाट तुरुन्त आउँनेछिन्। कुनै कारणबाट सरस्वती जलरूपा भएर पग्लिनेछिन्। त्यसपछि तिनलाई तिमीले अँजुलीले पिउनू अनि तिमी वाक्पति हुनेछौ। हे बृहस्पति ! शुक्राचार्य पनि त्यसबेला तिम्रो सरापले गर्दा तरल पदार्थ अर्थात् वीर्य वा शुक्र बन्नेछन् र मेरो कृपाबाट मुक्त हुनेछन् ॥१९–२३॥

नेमुनिले भन्नुभयो – भगवाने शङ्कर पनि यसरी बृहस्पतिलाई उपदेश दिएर आफ्नो स्वरूप उनलाई देखाउँदै यसै लिङ्गमा अन्तर्ध्यान हुनुभयो। त्यसपछि बृहस्पतिले मणिमतीमा स्नान गरेर सरस्वतीलाई विधिपूर्णक श्रद्धाले तुरुन्त आवाहन गरे ॥२४–२५॥

---

८. ततो मुमोद तीव्रोऽसौ, इति न.सं.पु.पाठः।
९. कृत्तमस्तकाम्, इति न.सं.पु.पाठः।
१०. देवेशम्, इति न.सं.पु.पाठः।
११. तस्मै स्वभक्तिने, इति न.सं.पु.पाठः।
१२. भविष्यति, इति न.सं.पु.पाठः॥

ततो वै भारती स्वर्गादत्राऽऽययौ मुदाऽन्विता। त्यक्त्वा च भार्गवं शीघ्रं स्थातुं तत्कण्ठदेशके ॥२६॥
अत्राऽऽगतायां भारत्यां सन्त्यज्य तं द्विजोत्तमम्। क्रोधेन मूर्च्छितः स्वर्गे भार्गवो दैत्यसद्गुरुः ॥२७॥
अवतरन्नसौ स्वर्गाद् व्योमस्थो भार्गवस्तदा। व्याजहार वचस्तस्यै शापं दातुञ्च सत्त्वरम् ॥२८॥

भार्गव उवाच

त्यक्त्वा मां त्वं कथं यासि भारति ! चाऽत्र साम्प्रतम्। स्थिरा चेत्यभिधानं ते कथं भवसि चञ्चला ॥२९॥
यस्मादिहागता ब्राह्मी जीवान्तिकं त्रिविष्टपात्। द्रवीभव त्वमद्यादि नदीरूपेण संवह[१३] ॥३०॥

नेमुनिरुवाच

क्रोधेन मूर्च्छिता भूयो भारती सा तदा द्विज। व्याचष्ट वचनं तस्मै शापं दातुं विरूपदृक् ॥३१॥

भारत्युवाच

रे रे भार्गव मां यस्माच्छपसि ह्यविवेकतः। तस्मात्त्वमपि चाऽत्रैव द्रवो भवतु साम्प्रतम् ॥३२॥

नेमुनिरुवाच

दत्त्वा शापं ततो ब्राह्मी द्रवरूपाऽभवत्तदा। कुण्डात्प्रतिसृताश्चाऽऽपस्तज्जा सरिदुवाह[१४] सा ॥३३॥
सोऽपि तदाऽभवद् विप्र ! द्रवरूपो हि भार्गवः। ततः कुण्डादुवाहाऽऽशु नदरूपो विरूपदृक् ॥३४॥
सस्मार भार्गवो रुद्रं तच्छापहरणाय च[१५]। कम्पिताङ्गो विरूपाक्ष ! तत्क्षणाद् भक्तितः पुनः ॥३५॥
एकांशञ्च परित्यज्य ययौ स्वर्गं द्रुतं पुनः। महादेवप्रसादात्स भक्त्या स्मृत्या च शूलिनः[१६] ॥३६॥
ततो बृहस्पतिर्दीनः समालोक्य च तां तदा। बभूव दुःखदग्धोऽसौ द्रवीभूतां विरूपदृक् ॥३७॥
तुष्टाव तां मुहुर्जीवस्त्रिविधैर्नतकन्धरः। प्रणम्य शिरसाष्टाङ्गैः परिक्रमन्पुनः पुनः ॥३८॥

अनि सरस्वती शुक्राचार्यलाई छोडेर बृहस्पतिको घाँटीमा बस्नका निमित्त प्रसन्न हुँदै स्वर्गबाट यहाँ आइन्। सरस्वती ब्राह्मणश्रेष्ठ शुक्राचार्यलाई छोडेर यहाँ आएपछि दैत्यका प्राण बनेका शुक्राचार्य क्रोधले मूर्च्छित भए। स्वर्गबाट उत्रन लागेका शुक्राचार्यले आकाशबाटै सरस्वतीलाई सराप दिनका लागि भन्न थाले ॥२७-२८॥

शुक्राचार्यले भने - हे सरस्वती ! तिमी मलाई छोडेर अहिले कसरी जाँदैछौ ? तिम्रो नाम स्थिरा हो, तिमी कसरी चञ्चला बन्न पुग्यौ ? हे सरस्वती ! जुन कारणले तिमी स्वर्गबाट झरेर बृहस्पतिको नजिकै गयौ, त्यसैकारणले गर्दा तिमी तरल बनी आजदेखि नदी भएर बग्नेछौ ॥२९-३०॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! सराप सुनेपछि सरस्वती रिसले भुतुक्क भइन् र शुक्राचार्यलाई सराप दिनका लागि भन्न थालिन् ॥३१॥

सरस्वतीले भनिन्- हे शुक्राचार्य ! विचारै नगरीकन तिमीले मलाई सराप दियौ, त्यसैले तिमी पनि अहिले नै तरल पदार्थ शुक्र बन ॥३२॥

नेमुनिले भन्नुभयो - यसरी सराप दिएर सरस्वती तरल पदार्थ अर्थात् जलरूपा बन्न पुगिन्। कुण्डबाट स्वच्छ जल निस्कियो। उनी नदीको रूपमा बगिन् ॥३३॥

हे विरूपाक्ष ! त्यसपछि शुक्राचार्य पनि तरल भए र तुरुन्तै नदको रूप लिएर कुण्डबाट बगे। अनि शुक्राचार्यले त्यो सराप हटाउनका लागि शरीर कँपाएर तुरुन्तै भक्तिपूर्वक रुद्रको स्मरण गरे। भगवान् शङ्करलाई भक्तिपूर्वक सम्झिएको हुनाले उहाँको कृपाले गर्दा एक अंश त्यहाँ छोडेर शुक्राचार्य तुरुन्तै स्वर्ग गए। हे विरूपाक्ष ! त्यसपछि सरस्वतीलाई तरल बनेको देखेर बृहस्पति अत्यन्त दुःखित भए। बृहस्पतिले काँध झुकाएर तीन किसिमका भक्तिद्वारा सरस्वतीलाई प्रसन्न तुल्याए, आठै अङ्ग र शिरले प्रणाम गरे, बारम्बार परिक्रमा गरे ॥३४-३८॥

---

१३. नदीभूत्वा प्रवाहय, इति न.सं.पु.पाठः।
१४. स्वच्छा नदी उवाह, इति न.सं.पु.पाठः।
१५. तच्छापापनयनाय च, इति न.सं.पु.पाठः।
१६. च शूलिनः स्मृतात्, इति न.सं.पु.पाठः।

बृहस्पतिरुवाच

ॐ नमो जलरूपिण्यै सरस्वत्यै नमो नमः । द्रवीभूते नमो ब्राह्म्यै भारत्यै वाक्प्रदे नमः ॥३९॥
देहि मे देहि वाग्भूतिं कण्ठमध्ये स्थिता भव । अद्यादि त्वत्प्रसादाद्वै भविताऽस्मि च गीष्पतिः ॥४०॥

नेमुनिरुवाच

तां प्रेक्ष्य दुःखितो जीवो गत्वा तदन्तिकं ततः । दक्षहस्तपुटेनाऽऽशु पपौ स तज्जलं सकृत् ॥४१॥
तज्जलपानमात्रेण कविर्जातो बृहस्पतिः[१७] । पूर्वाभ्यस्तवचोराशेः स्मर्ता शास्त्रनिधिर्बभौ[१८] ॥४२॥
भार्गवाय पुनः शापं ददौ तथा बृहस्पतिः । अम्बरस्थं समालोक्य कविं क्रोधेन संयुतम् ॥४३॥
रे भार्गव ! यतो ब्राह्मी द्रवीकृता ममाग्रतः । शुक्रो भव त्वमद्याऽऽशु गर्भवासं पुनर्विशन् ॥४४॥
तच्छापेन हराङ्गात्स समुत्पन्नः पुनर्द्विजः[१९] । ततः शुक्र इति ख्यातश्चाऽद्यापि दैत्यपूजितः ॥४५॥
तत्र स्नात्वा पुनर्जीवः सम्पूज्य च तमीश्वरम् । न्यवेदयच्च[२०] तद्वार्त्तामीश्वराय तदग्रतः ॥४६॥
व्याजहार ततस्तस्मै तद्धेतुज्ञस्तिलेश्वरः । शापस्यान्तं सरस्वत्याः शृणु वच्मि बृहस्पते ॥४७॥
एकसंवत्सरं दिव्यं द्रवीभूता प्रतिष्ठति । एकांशमत्र संस्थाय भविता सा हरिप्रिया ॥४८॥
सङ्गमे सा मनोवत्या प्रकृत्यङ्गवती यतः । ततो विष्णुप्रिया नित्यं भविष्यति न संशयः ॥४९॥
गच्छ यदृच्छया स्वर्गं देवान्तत्र प्रपालय । वाक्पतिं त्वां गुरुं देवाः पूजयिष्यन्ति ते सदा[२१] ॥५०॥

बृहस्पतिले भने – जलको रूप लिनेलाई नमस्कार छ, सरस्वतीलाई बारम्बार नमस्कार छ । तरल पदार्थ बन्ने हे देवी ! हजुरलाई नमस्कार छ, ब्राह्मीलाई नमस्कार छ, भारतीलाई नमस्कार छ । विद्या दिने हे देवी ! हजुरलाई नमस्कार छ । मलाई वाणीरूपी ऐश्वर्य दिनुहोस्, मेरो कण्ठमा आजदेखि तपाईं स्थिर भएर रहनुहोस्, म हजुरको कृपाले वाणीको अधिपति बन्न पाउँनेछु ॥३९–४०॥

नेमुनिले भन्नुभयो– जलरूपा सरस्वतीलाई देखेर दुःखित हुँदै बृहस्पति उनको नजिकै गए र दायाँ हातको खोँचोले सरस्वती नदीको जल एकपटक पिए । त्यो नदीको जल पिउने बित्तिकै बृहस्पति राम्रा कवि भए, सम्पूर्ण शास्त्ररूपी निधिका ज्ञाता बने, अघि जस्तै भए । फेरि बृहस्पतिले आकाशमा रहेका रिसाहा शुक्राचार्यलाई देखेर उनलाई सराप दिए । हे शुक्राचार्य ! मेरा अगाडि नै सरस्वतीलाई जलरूपा बनायौ, त्यसैले तिमीलाई आजदेखि गर्भमा बास गर्नुपरोस्, वीर्य बन्नुपरोस् । त्यसै सरापले गर्दा महादेवको अङ्गबाट फेरि शुक्राचार्यले जन्मनु पऱ्यो । त्यसैले दैत्यद्वारा पूजित उनलाई शुक्र भनियो ॥४१–४५॥

बृहस्पतिले फेरि स्नान गरेर भगवान् शङ्करको पूजा गरे र सरस्वती जल भएको कथा उहाँको अगाडि शिवजीलाई निवेदन गरे । त्यो सबै कुरा बुझेका तिलेश्वर भगवान्ले बृहस्पतिसँग भन्नुभयो– हे बृहस्पति ! सरस्वतीको सराप कसरी अन्त्य हुन्छ सुन, म बताउँछु । दिव्य एक वर्षसम्म तरल पदार्थ भएर सरस्वती यसै ठाउँमा बस्छिन् । त्यसपछि उनको एक अंशमात्र यहाँ रहनेछ, अरू अंशले युक्त भएकी सरस्वती विष्णुकी प्रियतमा भएर रहनेछिन् ॥४६–४८॥

उनी मनोवती नदीको सङ्गममा स्वभावले मात्र एक अङ्ग भएर बस्नेछिन् । त्यसपछि तिनी सधैँ विष्णुकी प्रियतमा बन्नेछिन्, यसमा शङ्का छैन । आफ्नो इच्छा अनुसार स्वर्गमा जाऊ, त्यहाँ देवताहरूलाई राम्रोसित पालना गर, ती देवताहरूले तिमीलाई वचनहरूका स्वामी अर्थात् गुरु भनेर सधैँ पूजा गर्नेछन् ॥४९–५०॥

---

१७. जीवोऽसौ सुकविरभूत्, इति न.सं.पु.पाठः ।
१८. सर्वशास्त्रनिधोर्विज्ञो यत्तदभ्यसितं पुरा, इति न.सं.पु.पाठः ।
१९. भूयश्च संभवो द्विज, इति न.सं.पु.पाठः ।
२०. निवेदति स्म, इति न.सं.पु.पाठः ।
२१. प्रोक्त्वा पूजिष्यन्ति सदा हि ते, इति न.सं.पु.पाठः ।

नेमुनिरुवाच

ततः स्वर्गं गतेऽस्मिन् वै चैकाब्दे च गते हि सा[२२]। सङ्गमे तु मनोवत्या प्रकृत्याऽभूत्सरस्वती ॥५१॥
द्विज ! तीर्थमिदं तस्मात् मनःश्रीरिति विश्रुतम्[२३]। सङ्गमे च मनोवत्या सर्वतीर्थोत्तमोत्तमम् ॥५२॥
तस्मात्सरस्वतीकुण्डात्पञ्चचापसमुत्तरे। मनःश्रीश्च महातीर्थं तत्राऽऽस्ते च विरूपदृक् ॥५३॥
एतत्कुण्डे पयःपानात्सर्वपापैर्विवर्जितः। बृहस्पतिसमो भूत्वा लोकैः सम्पूज्यते जनः ॥५४॥
तस्याञ्च स्नानमात्रेण लभेत मनःकामनाम्[२४]। मनसा यत्कृतं पापं विलीनमखिलं[२५] भवेत् ॥५५॥
मनसा चाऽर्जिता पूर्वं लिङ्गार्चनाय सा नदी। गुरुणा च[२६] समाराध्य तस्मान्मनोवती श्रुता ॥५६॥
सरस्वती महापुण्या मनोवती तथापरा। तयोश्च सङ्गमे तीर्थं मनःश्रीरिति विश्रुतम् ॥५७॥
रुद्रेणावाहिता गङ्गा कुण्डाद्विनिःसृता पुरा। रुद्रकुण्डमिति ख्यातं[२७] तस्माद्रुद्रान्तिके विदुः ॥५८॥
दशगङ्गासमा ज्ञेया तत्र स्नानात्फलं भवेत्[२८]। सौभाग्यमबला सद्यो रूपसौन्दर्यमाप्नुयात् ॥५९॥
अस्मिंश्च स्नानमात्रेण नरो भक्त्या विरूपदृक्। मनःश्रियं सुसम्पत्तिं यदीप्सितञ्च प्राप्नुयात्[२९] ॥६०॥
अस्मिन् तीर्थे बुधः स्नात्वा चैतल्लिङ्गं समर्हति। जन्मार्जितैनसा मुक्तो हरलोकं स गच्छति ॥६१॥
वाराणस्यां कृतं यावत् पुण्यं पापञ्च मानवैः[३०]। तावद्दशगुणञ्चाऽत्र पुण्यापुण्यञ्च लभ्यते[३१] ॥६२॥
द्वापरान्ते[३२] कलौ प्राप्ते चेहाऽऽगत्य दिशि क्षितौ। देवर्षयश्च तीर्थानि तस्थुरत्र सुगौरवात् ॥६३॥
तदारभ्याद्यपर्यन्तं क्षेत्रमेतत् महत्तमम्[३३]। शृणु चाऽत्र प्रवक्ष्यामि कश्चिन्मुक्तो वनेचरः ॥६४॥

नेमुनिले भन्नुभयो– त्यसपछि बृहस्पति स्वर्गमा गए। एक वर्ष बितेपछि ती सरस्वती मनोवतीको सङ्गममा स्वभावले उनकै अङ्ग भएर बसिन्। हे विरूपाक्ष ! त्यसै समयदेखि मनोवतीको सङ्गममा रहेको सबै तीर्थभन्दा पनि उत्तम यो तीर्थ मनःश्रीतीर्थ भनेर प्रसिद्ध भएको छ ॥५१–५२॥

हे विरूपाक्ष ! त्यस सरस्वतीकुण्डबाट बीस हात उत्तरतिर मनःश्री नाम गरेको ठूलो तीर्थ छ। जसले यस कुण्डमा गएर पानी पिउँछ, त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त हुन्छ, जनताबाट बृहस्पतिजस्तै ऊ सम्मानित हुन्छ। त्यहाँ स्नान गर्नाले मात्रै पनि इच्छा लागेको कामना अवश्य पूर्ण हुन्छ, मनले चिताएको सबै पाप नाश भएर जान्छ। अघि शिवजीको लिङ्गको पूजा गर्नका लागि बृहस्पतिले मनमनै आराधना गरेर तिनलाई उत्पन्न गराएका थिए। त्यसैले तिमी मनोवती नामले प्रसिद्ध भइन्। अत्यन्त पवित्र सरस्वती नदी र अर्को मनोवती नाम गरेकी नदीको सङ्गममा रहेको तीर्थ मनश्री नामले प्रसिद्ध छ। अघि गङ्गालाई शिवजीले आवाहन गर्नुभएको थियो। त्यसपछि उनी तिलेश्वर महादेवको नजिकै रहेको कुण्डबाट निस्केकी थिइन्। त्यसैले त्यो कुण्ड रुद्रकुण्ड नामले प्रसिद्ध भयो। त्यहाँ स्नान गर्नाले दशवटा गङ्गामा स्नान गरे बराबरको फल प्राप्त हुन्छ। नारीले स्नान गर्दछिन् भने सौभाग्य, रूप र सौन्दर्य प्राप्त गर्दछिन्। हे विरूपाक्ष ! जसले यस कुण्डमा भक्तिपूर्वक स्नान गर्दछ, त्यसले मनले चिताएको ऐश्वर्य, राम्रो सम्पत्ति जे चाहेको छ, त्यो अवश्य पाउँछ ॥५३–६०॥

जुन विद्वान्ले यस तीर्थमा स्नान गरेर यस लिङ्गको पूजा गर्छ त्यो व्यक्ति जन्मभरि गरेका पापबाट मुक्त भएर शिवलोक जान्छ। काशीमा स्नान गर्दा लाग्ने जति पनि पाप तथा धर्महरू छन्, त्यसको दश गुणा बढी पाप र धर्म मानिसले यहाँ पाउँछ। त्रेतायुगको केही समय बाँकी रहेको बेलादेखि कलियुगको प्रारम्भसम्म पृथ्वीको यस दिशामा देवता, ऋषि र तीर्थहरू आएर बडो गौरवका साथ बसेका थिए। यो क्षेत्र त्यसै समयदेखि अहिलेसम्म अत्यन्त गौरवशाली बनेको छ। यहाँ आएर कुनै वनडुलुवा आदिवासी मुक्त भएको छ, त्यो कुरा बताउँछु, सुन ॥६१–६४॥

---

२२. ततः स्वर्गं गतेऽसौ चैकाब्दञ्च गते हि सा, इति न.सं.पु.पाठः।
२३. तदादि द्विज ! तीर्थोऽयं मनःश्रीरिति विश्रुतः, इति न.सं.पु.पाठः।
२४. मनःकामं लभेद् ध्रुवम्, इति न.सं.पु.पाठः।
२५. तत्सर्वं विलयम्, इति न.सं.पु.पाठः।
२६. बृहस्पतिः, इति न.सं.पु.पाठः।
२७. रुद्रकुण्ड इति ख्यातः, इति न.सं.पु.पाठः।
२८. लभेत्, इति न.सं.पु.पाठः।
२९. लभेत् ध्रुवम्, इति न.सं.पु.पाठः।
३०. यावत्सन्ति पापेतराणि च, इति न.सं.पु.पाठः।
३१. कृत्याकृत्यं लभेन्नरः, इति न.सं.पु.पाठः।
३२. त्रेताशेषे, इति न.सं.पु.पाठः।
३३. एतत्क्षेत्रं गरिष्ठोऽभूत्तस्मात्प्रभृतिरद्यतः, इति न.सं.पु.पाठः।

आसीन्म्लेच्छः पुरा विप्र ! उलूको नाम विश्रुतः । प्राग्जन्ममातृदोषेण गृद्धाननो बभूव सः ॥६५॥
फलमूलाशनायार्य भ्रामं भ्रामं तदीप्सया[३४] । अत्रैव प्राप्तवान्म्लेच्छः सङ्क्रान्त्यां मकरस्य च ॥६६॥
ऋषिभिः पूजितं लिङ्गं प्रेक्ष्य म्लेच्छः प्रहर्षितः । संसस्नौ रुद्रकुण्डे सः तत्सङ्क्रान्त्यां विरूपदृक् ॥६७॥
आदाय तज्जलं म्लेच्छश्चाऽर्चतिस्म महेश्वरम् । फलपुष्पोपहारैश्च दीपं दत्त्वा च जागृतः ॥६८॥
विद्यमाने प्रदीपे च प्रोक्ते शिवशिवेति च । विनिद्रे सति तं द्रष्टुं[३५] शिवदूताः समाययुः ॥६९॥
तद्याने तं समास्थाय निन्युः शिवपुरं महत् । लिङ्गसंस्पर्शनात्पुण्यात्तत्स्नानादीशपूजनात् ॥७०॥
नीयमाने तदा म्लेच्छे गगनेऽद्भुतयानगे[३६] । प्रोचुर्मुनिगणास्तस्मै साधु साध्विति सादरम् ॥७१॥
भूयो गच्छ विरूपाक्ष ! यत्राऽसौ चम्पकेश्वरः । धनुषां द्विशते दूरे पश्चिमायामितो दिशि[३७] ॥७२॥
तस्मिन्तीर्थे पुनः स्नात्वा चम्पकेशं प्रपूजय । यावत्पुराकृतं पापं तत्सर्वं नश्यति ध्रुवम् ॥७३॥

विप्रेश ! भूयाः किल सावधानः, श्रुत्वा मदीयं वचनं त्वमस्मात् ।
खण्डादधः सानुतले हि गच्छ, विराजते यत्र स चम्पकेशः ॥७४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
मनःश्रीतीर्थतिलेश्वरयोर्माहात्म्यं नाम एकोत्तरशततमोऽध्यायः ॥१०१॥

हे ब्राह्मण विरूपाक्ष ! अघि उलूक नाम गरेको म्लेच्छ थियो । पूर्व जन्ममा आमामाथि गरेको अपराधले गर्दा त्यो गिद्धको जस्तो मुख लिएर जन्मियो । मकर सङ्क्रान्तिका दिन फल तथा कन्दमूलको खोजी गर्दै त्यो म्लेच्छ यसै ठाउँमा आइपुग्यो । हे विरूपाक्ष ! ऋषिहरूले लिङ्गलाई पूजा गरेको देखेर ऊ अत्यन्त प्रसन्न भयो । मकरसङ्क्रान्तिका दिन उसले रुद्रकुण्डमा स्नान गऱ्यो ॥६५-६७॥

त्यस कुण्डको जल र फलफूल तथा पूजा सामग्री लिएर त्यस म्लेच्छले बत्ती बाल्दै जाग्राम बसेर शिवजीको पूजा गऱ्यो । बत्ती बलिरहेको थियो, शिव-शिव भनेर त्यो म्लेच्छ जागा अवस्थामा रहेको थियो । त्यसैबेला शिवजीका दूतहरू त्यहाँ आइपुगे । लिङ्गको स्पर्श गरेको पुण्य, त्यहाँ गरेको स्नान र शिवजीको पूजाले गर्दा उनीहरूले त्यस म्लेच्छलाई त्यसै यानमा राखेर उत्तम शिवजीको लोकमा लगे ॥६८-७०॥

म्लेच्छलाई अद्भुत यानमा राखेर आकाशतिर लगेपछि मुनिहरूले त्यसलाई साधु साधु भनेर धन्यवाद दिए । हे विरूपाक्ष ! अब तिमी यहाँबाट पश्चिमतिर आठ सय हात पर जाऊ, जहाँ चम्पकेश्वर महादेव बस्नुभएको छ । त्यस तीर्थमा स्नान गरेर चम्पकेश्वर महादेवको पूजा गर, तिमीले अघि गरेका सम्पूर्ण पापहरू अवश्य नाश हुनेछन् ॥७१-७३॥

हे ब्राह्मण ! मेरो भनाइ सुनेर सावधान भई तिमी पर्वतखण्डको फेदीतिर मसँगै हिंड । त्यहाँ चम्पकेश्वर महादेव विराजमान हुनुभएको छ ॥७४॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा मनःश्रीतीर्थ र तिलेश्वरको माहात्म्यनामक
एकसय एकौं अध्याय पूरा भयो ।

---

३४. चान्वेषितुं तदिप्सया, इति न.सं.पु.पाठः ।
३५. चात्र संस्थानम्, इति न.सं.पु.पाठः ।
३६. म्लेच्छ अम्बरेऽद्भुतयानगे, इति न.सं.पु.पाठः ।
३७. चातो दिशि च वारुणे, इति न.सं.पु.पाठः ।

द्व्युत्तरशततमोऽध्यायः

सरस्वतीकुण्डतीर्थ-चम्पकेश्वरशिवलिङ्गयोर्महिमा

अगस्त्य उवाच

ततः सरस्वतीकुण्डे पीत्वा जलं विरूपदृक्। वाक्सिद्धश्चाभवद् भूयो[1] लिङ्गार्चनाद्विकिल्विषः ॥१॥
आकर्ण्य नेमुनेर्वाचं तन्माहात्म्यप्रसूचकम्। प्रहर्षितो विरूपाक्षः सत्कथामिव सज्जनः ॥२॥
नेमुनिना मुने ! सार्द्धं ययौ यत्र स्थितो हरः। धनुषां द्विशते दूरे वारुण्यां दिशि भावतः[2] ॥३॥
सरस्वत्यां मुदा स्नात्वा चम्पकेशमपूपुजत्। द्वादश्यां माघकृष्णस्य भक्तिभावेन वै द्विजः ॥४॥
जागृतवान्निशायां स दीपं दत्त्वा विरूपदृक्। ततोऽपृच्छच्च माहात्म्यं मुनिं लिङ्गसमुद्भवम् ॥५॥

विरूपाक्ष उवाच

समुद्भूतं कथं[3] लिङ्गमेतच्च मुनिसत्तम। श्रोतुमिच्छाम्यहं भूयो वद मे सर्वविद्विभो ॥६॥
माहात्म्यञ्चैव लिङ्गस्य केन प्रकाशितं पुनः। सेवितं केन तत्पूर्वं लब्धञ्च किं फलं मुने ॥७॥

नेमुनिरुवाच

आसीत् कृतयुगे विप्रो मनुर्नाम महातपाः। पूर्वजन्मविपाकेन विद्याहीनोऽभवद् द्विज ॥८॥
प्रतिपदि सकृद्विद्यां भ्रान्त्या पठन् गुरोर्मनुः। जन्मान्तरेऽपि तद्दोषाद्विद्यां विस्मृतवान् पठन् ॥९॥
बृहस्पतिमुखाच्छ्रुत्वा चेहैव प्राप्तवान् मुनिः। सारस्वते महाकुण्डे स्नात्वा पपौ जलं मुदा ॥१०॥
पीतमात्रे च तत्तोये ह्यधीतां पूर्वजन्मनि[4]। चतुःषष्टिकलां विद्यामदृष्टां बुबुधेऽपि सः ॥११॥

अध्याय – १०२

सरस्वतीकुण्डतीर्थ र चम्पकेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य ! त्यसपछि विरूपाक्षले सरस्वती कुण्डको जलपान गरे। पापबाट मुक्त भई लिङ्गको पूजा गरेकाले उनको वाक्सिद्धि भयो। जसरी सत्कथा सुनेर सज्जन आनन्दित हुन्छन्, त्यसरी नै त्यस कुण्डको माहात्म्य बताउने नेमुनिको वचन सुनेर विरूपाक्ष पनि अत्यन्त प्रसन्न भए। हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिई आठ सय हात पर पश्चिम दिशामा जहाँ भगवान् शङ्कर बस्नुहुन्थ्यो, त्यसै ठाउँमा गए। ती ब्राह्मणले सरस्वती कुण्डमा स्नान गरेर माघकृष्ण द्वादशीका दिन भक्तिपूर्वक चम्पकेश्वर भगवान्‌को पूजा गरे। विरूपाक्ष प्रसन्न भई बत्ती बालेर राति जाग्राम बसे। त्यस समयमा उनले नेमुनिसित त्यस लिङ्गको उत्पत्तिको कथा र माहात्म्य सोधे ॥१–५॥

विरूपाक्षले भने – हे सर्वज्ञ ऋषिश्रेष्ठ ! यस लिङ्गको उत्पत्ति कसरी भयो ? यस लिङ्गको के महत्त्व छ ? यस लिङ्गलाई कसले प्रकाशित गऱ्यो ? पहिले यसको आराधना कसले गऱ्यो र के फल पायो ? मलाई बताइदिनुहोस् ॥६–७॥

नेमुनिले भन्नुभयो– हे ब्राह्मण ! सत्य युगमा मनुनाम गरेका महातपस्वी ब्राह्मण थिए। पूर्वजन्मको कर्मले गर्दा उनी अज्ञानी भए। ती मनुले प्रतिपदाको दिन भुक्किएर गुरुबाट पढेकाले त्यसै दोषले गर्दा अर्को जन्ममा पढ्न लाग्दा उनले विद्या बिर्सिए ॥८–९॥

बृहस्पतिको निर्देशनअनुसार ती मुनि यसै ठाउँमा आए र प्रसन्नतापूर्वक सरस्वती महाकुण्डमा स्नान गरेर कुण्डको जल पिए। त्यहाँको जल पिउने बित्तिकै पूर्वजन्ममा पढेको तर यस जन्ममा साक्षात्कार नभएको विद्या र चौसट्ठी कलालाई उनले सम्झिए ॥१०–११॥

---

१. वाक्सिद्धिरभवद्, इति न.सं.पु.पाठः।
२. द्विशते सत्यसौ दूरे धनुषां दिशि पश्चिमे, इति न.सं.पु.पाठः।
३. कथं समुद्भवम्, इति न.सं.पु.पाठः।
४. पीतमात्रेण तोयं तदधीतां पूर्वजन्मनि, इति न.सं.पु.पाठः।

ततश्चाऽनर्च तल्लिङ्गं तिलेश्वरं स चाऽर्हणैः। अप्रार्थयद्वरं भक्त्या स्वात्मोद्धरणहेतुकम् ॥१२॥
व्याजहार तदा तस्मै तिलेश्वरो विरूपदृक्। भक्तिज्ञानार्चनैस्तुष्टः प्रकाशविग्रहौजसा ॥१३॥

तिलेश्वर उवाच

भो मनोऽतो हि वारुण्यां दिशि सरस्वतीतटे। तत्राराधय मां भक्त्या ततो मोक्षं प्रयास्यसि ॥१४॥

नेमुनिरुवाच

इत्युक्त्वान्तर्हिते लिङ्गे व्यक्तरूपे तदा पुनः। ततः समाययौ चात्र मनुर्मुदा विरूपदृक् ॥१५॥
सरस्वत्यां पुनः स्नात्वा तस्थौ चम्पकवृक्षकम्। तच्चम्पकोपहारैश्च भक्त्या स्वाराधयद् ध्रुवम् ॥१६॥
एकञ्च वत्सरं दिव्यं समाराधितवान् विभुम्। चाम्पकैः कुसुमैर्नित्यं धिया पठन् हि तन्मनुम् ॥१७॥
वैशाखे पूर्णिमायाञ्च चम्पकपुष्पसञ्चयात्। एतल्लिङ्गं समुद्भूतं तत्पूजान्तेऽपराह्णके ॥१८॥
ददर्श पुरतो लिङ्गमुपचम्पकवृक्षकम्। अर्चीति स्म मनुर्भक्त्या चम्पकैस्तं स्तवैर्मुदा ॥१९॥
तुष्टाव च मनुर्लिङ्गं परिक्रम्य पुनः पुनः। प्रणनाम तदाष्टाङ्गैस्त्रिविधोक्तैर्विरूपदृक् ॥२०॥
आविर्भूतस्तदा लिङ्गात् त्रिनेत्रः शूलधृक् विभुः। व्याजहार शुभं वाक्यं भक्ताय वरमर्पितुम्[५] ॥२१॥

चम्पकेश्वर उवाच

भो मनो मम भक्तस्त्वं वरं दास्यामि ते शृणु। अद्यादि त्वञ्चिरञ्जीव्याः स्वारोचिषो भविष्यसि ॥२२॥
बहुयुगं सुखं भोग्यं भुक्त्वा भोगान् यथेप्सितान्। यस्मात्त्वयार्चितोऽहं वै चम्पकैः कुसुमैः सदा ॥२३॥
वदिष्यन्तीति च मां तस्माल्लौकिकाश्चम्पकेश्वरम्। गच्छ मनोऽधुना स्वर्गं भुङ्क्ष्व तत्र यथेप्सितान् ॥२४॥
देवाश्च त्वां नमस्यन्ति मद्भक्तप्रवरं हृदा[६]।

त्यसपछि उनले विभिन्न पूजा सामग्रीद्वारा तिलेश्वर भगवान्‌को पूजा गरे। आफ्नो उद्धारका लागि उनले भक्तिपूर्वक वर मागे। हे विरूपाक्ष ! भगवान् तिलेश्वरले उनको भक्ति, ज्ञान र आराधनाबाट सन्तुष्ट भएर शरीरको तेज देखाउँदै उनलाई भन्न लाग्नुभयो ॥१२-१३॥

तिलेश्वरले भन्नुभयो – हे मनु ! यस ठाउँबाट पश्चिम दिशामा रहेको सरस्वती नदीको तटमा बसेर भक्तिपूर्वक मेरो आराधना गर, यसबाट तिमीले मोक्ष प्राप्त गर्नेछौ ॥१४॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यति भनेर भगवान्‌को व्यक्त रूप लिङ्गमा अन्तर्धान भयो। त्यसपछि प्रसन्न हुँदै मनु यस ठाउँमा आए। त्यसपछि उनी सरस्वती नदीमा स्नान गरी चाँपको रुखमुनि गएर बसे। उनले चाँपका फूलहरूद्वारा भक्तिपूर्वक चम्पकेश्वर महादेवको आराधना गरे। दिव्य एक वर्षसम्म नित्य भगवान् शङ्करको मन्त्र जप्दै उनले चाँपका फूलहरू चढाएर महादेवको आराधना गरे ॥१५-१७॥

वैशाख पूर्णिमाको दिन अपराह्नको समयमा पूजा सकिएपछि चाँपका फूलहरूको सञ्चयबाट यस लिङ्गको प्रादुर्भाव भयो। मनुले चाँपको रुखको नजिकै अगाडि लिङ्ग देखे। उनले प्रसन्न भएर चाँपका फूलहरूले त्यस लिङ्गको पूजा गरे र भक्तिपूर्वक स्तुति गरे। हे विरूपाक्ष ! मनुले लिङ्गलाई बारम्बार परिक्रमा गरेर प्रसन्न तुल्याए। अनि तीनै किसिमका भक्तिद्वारा आठै अङ्ग भुकाएर उनले नमस्कार गरे। त्यसपछि त्यस लिङ्गबाट तीन आँखा भएका त्रिशूलधारी भगवान् शङ्कर प्रकट हुनुभयो र आफ्नो भक्तलाई वरदान दिन शुभवाक्य बोल्नुभयो ॥१८-२१॥

चम्पकेश्वरले भन्नुभयो – ममाथि भक्ति राख्ने हे मनु ! तिमीलाई वर दिन्छु सुन– आजदेखि तिमी चिरञ्जीवी भयौ, तिमी स्वारोचिष नाम गरेका मनु हुनेछौ। तिमीले मलाई नित्य चाँपका फूलले पूजा गरेकाले तिमी धेरै समयसम्म इच्छा लागेका सुखभोग गर्न पाउनेछौ। हे मनु ! भक्तहरूले पनि मलाई चम्पकेश्वर भन्नेछन्। अब तिमी स्वर्ग गएर इच्छानुसारको भाग गर। मेरो भक्त तिमीलाई स्वर्गमा देवताहरूले सादर प्रणाम गर्नेछन् ॥२२-२४½॥

---

५. वरदानाय भक्तिने, इति न.सं.पु.पाठः।

६. मद्भक्तिनं समाद्रयन्, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्युक्त्वाऽन्तर्दधे लिङ्गं चाऽञ्जसा शाङ्करं[७] द्विज ॥२५॥

तिरोधानं गते रुद्रे सोऽपि ययौ त्रिविष्टपम्। कश्चित्कालान्तरे म्लेच्छो विशङ्कुर्नाम विश्रुतः ॥२६॥

प्रययौ मृगयारण्यमेकाकी च क्षुधाऽर्दितः। विलङ्घ्य पर्वतान् म्लेच्छस्तथा च बहुकन्दराः ॥२७॥

अत्रैव प्राप्तवान् विप्र क्षुधया पीडितो भृशम्। ददर्श मृगमेकञ्च तत्र चम्पककानने ॥२८॥

चरन्तं शाद्वले नूनं पिबन्तं तज्जलं मुहुः। हन्तुं प्रचक्रमेऽसौ हि विचरन्तं[८] महासुखम् ॥२९॥

सन्धाय तच्छरं ज्यायामुत्ससार शरं दृढम्। तूणोत्घातरवं श्रुत्वा चाऽपश्यच्चकितं दिशि ॥३०॥

बाणो धृतमृगो म्लेच्छं प्राघर्षच्चकितेक्षणम्। क्षिप्रं दुद्राव भीत्याऽसावधश्चम्पकशाखिनः ॥३१॥

एतल्लिङ्गं सुखं स्पृष्ट्वा[९] गुल्माच्छन्नतनुः स्थितः। स चिक्षेप शरं म्लेच्छस्तमुद्दिश्य द्रुतं ततः ॥३२॥

पपौ तद्रुधिरं बाणो भित्त्वाऽङ्गमविशत् क्षितिम्। मृगः[१०] पपात भूमौ स चैतल्लिङ्गसमीपतः ॥३३॥

अवतेरुस्ततो व्योम्नो यानहस्ता हि तद्गणाः। सन्त्यज्य तत्तनुञ्चाऽसौ दिव्याङ्गोऽभून्नरोत्तमः ॥३४॥

याने चाऽऽस्थाय तं दूता निन्युर्व्योम्नो हरालयम्। ततश्च शिवदूतानाञ्चेष्टां यानं मृगस्य च ॥३५॥

स म्लेच्छस्तादृशं रूपं प्रेक्ष्योन्मना बभूव ह[११]। अवधार्य ततश्चेष्टां किमित्यद्याऽद्भुतं भवत् ॥३६॥

स्पृट्ष्वा सरस्वतीतोयं तत्सर्वं ज्ञातवान् हि सः। ज्ञानयुक्तो विरक्तोऽभूद्विशङ्कुस्तं निरीक्ष्य च ॥३७॥

मयाऽद्य किं कृतं कर्म चेति चिन्ताकुलो भृशम्। सन्त्यज्य कार्मुकं तत्र विरक्तोऽभूत् पलायितः[१२] ।३८॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यति भनेर भगवान् शङ्कर तुरुन्त लिङ्गमा अन्तर्ध्यान हुनुभयो। शङ्कर अन्तर्ध्यान भएपछि मनु पनि स्वर्गतिर गए। केही समयपछि भोकले पीडित भएको विशङ्कुनाम गरेको म्लेच्छ एक्लै शिकार खेल्दै त्यहाँ आइपुग्यो। धेरै गुफाहरू चहार्दै पहाडहरू नाघ्दै अत्यन्त भोकाएको त्यो म्लेच्छ यसै ठाउँमा आइपुग्यो। त्यस म्लेच्छले त्यही चाँपको जङ्गलमा चरेर पानी पिउँदै गरेको एउटा मृगलाई देख्यो। त्यो म्लेच्छ धनुषमा बलियोसित बाण चढाएर आनन्दपूर्वक चरिरहेको त्यस मृगलाई प्रहार गर्न तयार भयो ॥२५–२९॥

धनुषबाट आएको आवाज सुनेर आश्चर्य मान्दै त्यस मृगले झस्केर यताउति हेर्‍यो। आफूलाई पक्रन आएको म्लेच्छलाई देखेर चञ्चल आँखा तुल्याउँदै त्यो मृग डरले चाँपको रुखमुनिबाट भाग्यो। त्यसपछि ऊ यस लिङ्गलाई स्पर्श गर्दै झाडीभित्र लुकेर बस्यो। त्यसपछि त्यस म्लेच्छले मृगलाई लक्ष्य गरेर बाण हान्यो। बाणले मृगको रगत पियो र अङ्ग छेडेर पृथ्वीभित्र दबियो ॥३०–३२॥

प्राण गएको त्यो मृग यसै लिङ्गको नजिकैबाट भुइँमा पछारियो। त्यसपछि त्यस मृगलाई लिन आकाशबाट यान लिएर शिवजीका गण ओर्लिए। मृगशरीर छोडेपछि त्यस मृगको शरीर दिव्य भयो। दूतहरूले त्यसलाई यानमा राखेर आकाशमार्गबाट शिवलोक लगे। त्यसपछि मृगको त्यस्तो रूप, यान र शिवजीका दूतहरूको क्रियाकलाप देखेर त्यो म्लेच्छ बडो उत्सुकताका साथ ती सबै क्रियाकलाप हेर्न थाल्यो। त्यसपछि आज यो कस्तो घटना भयो भन्दै आश्चर्यचकित भएको उसले सरस्वतीको जललाई स्पर्श गरेपछि त्यो घटनाको सबै रहस्य बुझ्यो। विशङ्कु त्यो घटना देखेर ज्ञानी र विरक्त भयो। त्यसपछि उसले 'मैले आज यो कस्तो कर्म गरेँ' भन्दै अत्यन्त चिन्तित भयो। विरक्त भएको उसले त्यो त्यसै ठाउँमा धनुष फ्याँकेर दौडियो। त्यसपछि उसले यस लिङ्गलाई हातले आलिङ्गन गरेर शिरले प्रणाम गर्‍यो ॥३३–३८॥

---

७. लिङ्गे चाञ्जसा शङ्ककः, इति न.सं.पु.पाठः।
८. सचरं तम्, इति न.सं.पु.पाठः।
९. स्पृश्य, इति न.सं.पु.पाठः।
१०. व्यसुः, इति न.सं.पु.पाठः।
११. ....मनाऽभवत्तदा, इति न.सं.पु.पाठः।
१२. ह्यत्र प्रधावित, इति न.सं.पु.पाठः।

तल्लिङ्गञ्च समालिङ्ग्य दोर्भ्यां मूर्ध्ना ननाम सः। कियत्कालान्तरे म्लेच्छः पञ्चत्वं प्राप्तवानिह ॥३९॥
वन्याशनो विरक्तोऽसौ चैतत्पूजनतत्परः। फाल्गुनकृष्णपक्षस्य चतुर्दश्यामिहाययुः[१३] ॥४०॥
शिवगणाश्च तं यानात्[१४] शिवलोकं समानयन्। सोऽभूद्रुद्रगणश्रेष्ठः प्रमथानां पुरोगमः ॥४१॥
एतल्लिङ्गस्य संस्पर्शात् पुण्यान्मृत्युवशात्पुनः।

विरूपाक्ष उवाच

चित्रं मे जायते स्वान्ते श्रुत्वैतन्मुनिसत्तम ॥४२॥
मृगस्य चरितं त्वत्तश्चासुभृतामनुत्तमम्। मृगतनुं परित्यज्य चाभूद्दिव्यकलेवरः ॥४३॥
कथमसौ विना धर्मं वद मे तद्विभोऽधुना।

नेमुनिरुवाच

नृतनुं प्राप्य राजासौ भूत्वापि मेदिनीपतिः ॥४४॥
न कृतवान् पुरा तत्र पशुपतेः प्रदर्शनम्। पशुयोनौ ततो जातो धर्मकेतुर्नृपोत्तमः[१५] ॥४५॥
यद्यपि कृतवान् दानं[१६] तदा च भूरिशो नृपः। लिङ्गस्य[१७] स्पर्शनात्पुण्याद् गतवान् रुद्रधामनि ॥४६॥
एकमन्वन्तरे चाऽसौ पशुपतिं हि द्रक्ष्यति। भूत्वा च मेदिनीपोऽसौ चतुर्वर्गफलाशनः ॥४७॥
निर्वाणञ्च ततो विप्र प्रयास्यति न संशयः। पूर्णिमायां हि यः स्नात्वा सरस्वत्यां समर्हणैः ॥४८॥
पूजयेत्[१८] लिङ्गमेतद्वै तस्य पुण्यफलं शृणु। पूर्वजन्मकृतैः पापैः स मुक्तो नाऽत्र संशयः ॥४९॥
सर्वमेधफलं प्राप्य रुद्रलोके महीयते।

वनका कन्दमूल फल खाई विरक्त भएको यसले शिवलिङ्गको पूजा गऱ्यो र केही समयपछि त्यो मऱ्यो। फाल्गुण कृष्ण चतुर्दशीका दिन शिवका गणहरू यहाँ आएर त्यसलाई यानमा राखेर शिवलोक लगे। मरेपछि यस लिङ्गको स्पर्श गरेको पुण्यको प्रभावले गर्दा त्यो म्लेच्छ प्रमथ आदि गरिएका शिवजीका गणहरूमा अग्रगामी भयो ॥३९–४१½॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! तपाईंले भनेको यो कुरा सुनेर मेरो हृदयमा आश्चर्य पैदा भएको छ। प्राणीहरूमा मृगको चरित्र अचम्म किसिमको छ। धर्म नगरीकन मृगको शरीरलाई छोडेर त्यस मृगले दिव्यशरीर कसरी प्राप्त गऱ्यो ? हे प्रभु ! यो कुरा मलाई अहिल्यै बताइदिनुहोस् ॥४२–४३½॥

नेमुनिले भन्नुभयो – यसले अघि मनुष्यजन्म पाएर पृथ्वीको स्वामी भए पनि पशुपतिको दर्शन गरेको थिएन। धर्मकेतु नाम गरेको त्यस राजाले धेरै दान दिए पनि भगवान् शङ्करको दर्शन नगरेको हुनाले पशुको योनिमा जन्म पायो। त्यस लिङ्गको स्पर्शबाट पैदा भएको पुण्यले गर्दा एक मन्वन्तरपछि पशुपतिको दर्शन पाएर त्यो स्वर्गलोक गयो। हे विरूपाक्ष ! धर्म, अर्थ, काम, मोक्ष चारै पुरुषार्थको भोग गरेर यो पृथ्वीको राजा हुनेछ। त्यसपछि यसको मुक्ति हुनेछ, यसमा शङ्का छैन ॥४४–४७½॥

जसले पूर्णिमामा सरस्वती नदीमा स्नान गरेर विभिन्न पूजासामग्रीले यस लिङ्गको पूजा गर्छ त्यसको पुण्य फल बताउँछु, सुन। पूर्णिमामा पूजा गर्ने व्यक्ति पूर्वजन्मका सम्पूर्ण पापबाट मुक्त हुन्छ र सम्पूर्ण यज्ञ गरेको फल प्राप्त गरेर ससम्मान रुद्रलोकमा बस्न पाउँछ ॥४८–४९½॥

---

१३. फाल्गुनकृष्णचतुर्दश्यां शिवगणा इहाययुः, इति न.सं.पु.पाठः।
१४. तमास्थाय च ते याने, इति न.सं.पु.पाठः।
१५. पशुयोन्युद्भुतस्तस्माद्धर्मकेतुर्नृपोत्तमः, इति न.सं.पु.पाठः।
१६. ददात्यपि बहून् दायान्, इति न.सं.पु.पाठः।
१७. लिङ्गे तत्, इति न.सं.पु.पाठः।
१८. पूजति, इति न.सं.पु.पाठः।

अतो वारुणदेशे त्वं भूयो गच्छ विरूपदृक् ॥५०॥

धनुषां त्रिसहस्रे च विदूरे साम्प्रतं द्विज । रामेश्वरं महालिङ्गं[१९] रामतीर्थेन वै समम् ॥५१॥

यत्र विराजते नित्यं बहुपुण्यफलप्रदम् ।

स्नात्वा च तीर्थे प्रसभं हि तत्र सम्पूजय त्वञ्च तमीश्वरं वै ।

यद्वाञ्छितं तद् हृदयेन नित्यं सम्प्राप्स्यसि श्रीवरमुत्तमञ्च ॥५२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां चम्पकेश्वरसरस्वतीकुण्डतीर्थयोर्माहात्म्यं नाम द्व्युत्तरशततमोऽध्यायः ॥१०२॥

हे विरूपाक्ष ! तिमी अब यहाँबाट पश्चिमतर्फ तीन हजार धनु अर्थात् बाह्र हजार हात पर धेरै पुण्यको फल दिने रामेश्वर महालिङ्ग रहेको ठाउँमा जाऊ ॥५०-५१½॥

तिमी त्यस तीर्थमा स्नान गरेर रामेश्वर महादेवको पूजा गर । त्यसपछि तिमीले आफ्नो इच्छाअनुसारको असल वर प्राप्त गर्नेछौ ॥५२॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा चम्पकेश्वर र सरस्वतीकुण्डतीर्थको माहात्म्यनामक एकसय दोस्रो अध्याय पूरा भयो ।

---

१९. रामेश्वरो महालिङ्गः, इति न.सं.पु.पाठः ।

त्र्युत्तरशततमोऽध्यायः

प्रभातीर्थ-रामेश्वरज्योतिर्लिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

प्रभातीर्थे मुदा स्नात्वा रामेश्वरमपूपुजत्। नानोपहारकैर्भक्त्या जागृतवान्निशि द्विजः ॥१॥
माघकृष्णत्रयोदश्यां भक्त्याऽपृच्छन्मुनिं तदा। तीर्थस्य चैव माहात्म्यं लिङ्गस्य च विशेषतः ॥२॥

विरूपाक्ष उवाच

एतत्तीर्थस्य माहात्म्यं लिङ्गस्य मुनिसत्तम। श्रोतुमिच्छाम्यहं त्वत्तो रामेश्वरस्य साम्प्रतम् ॥३॥
समुद्भूतं कथं[1] लिङ्गं रामेश्वरमितीरितम्। केन लब्धो वरश्चात्र पूर्वं कथय मेऽधुना ॥४॥

नेमुनिरुवाच

आसीद्वीरः पुरा वत्स जमदग्निमुनेः सुतः। पर्शुराम इति ख्यातः क्षत्रियाणां निकन्दकः ॥५॥
क्वचित् कालान्तरे वीरो विरक्तो निर्ययौ गृहात्। हते पितर्युदासीनः राज्ञा केनापि[2] हेतुतः ॥६॥
तीर्थयात्रां व्रजन् क्षोणीं श्रुत्वा जीवमुखाच्च्युताम्। अत्रैव प्राप्तवांश्चासावुदासीनो घने वने ॥७॥
प्रभावती नदी श्रेष्ठा तथेयञ्च सरस्वती। अनयोः सङ्गमे चात्र सस्नौ ऋषेः सुतस्तदा ॥८॥
पितुर्वैरान्तरं यावत्कामं कृत्वा हृदि ध्रुवम्। सस्नौ सोऽत्र महातीर्थे सङ्कल्प्य क्षत्रनाशनम् ॥९॥
जजाप रुद्रमन्त्रं स वीरेण चेतसा मुने। षण्मासाभ्यन्तरे लिङ्गं समुद्भूतं तदग्रतः ॥१०॥
तपःकृष्णचतुर्दश्यामर्द्धरात्रे समर्हणैः। विलोक्य[3] पुरतो लिङ्गं रामो ननाम भक्तितः ॥११॥
तुष्टाव च मुहुर्भक्त्या रोमाञ्चितः परिक्रमन्। आविर्भूतं ततो ब्राह्मे रूपं भैरवभीषणम्[4] ॥१२॥
तस्मै प्रोवाच विप्रेश ! गम्भीरवचनं तदा।

अध्याय-१०३

प्रभातीर्थ रामेश्वर ज्योतिर्लिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – त्यसपछि माघकृष्ण त्रयोदशीका दिन विरूपाक्षले प्रभातीर्थमा आनन्दसित स्नान गरेर भक्तिपूर्वक विभिन्न पूजासामग्रीहरूले रामेश्वर भगवान्‌को पूजा गरे। रातमा जाग्राम बसेर उनले तीर्थ तथा विशेषगरी त्यस लिङ्गको माहात्म्य नेमुनिसँग सोधे ॥१-२॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! म हजुरबाट यो तीर्थ र रामेश्वर लिङ्गको माहात्म्य सुन्न चाहन्छु। यो लिङ्गको उत्पत्ति कसरी भयो ? यसलाई रामेश्वर किन भनियो ? अघि कसले यहाँ वर पायो ? मलाई यो सबै बताउनुहोस् ॥३-४॥

नेमुनिले भन्नुभयो – हे बाबु ! अघि क्षत्रियजातिको मूल नै सखाप पार्ने जमदग्निका परशुराम नामका वीर छोरा थिए। कुनै समयमा, कुनै राजाले आफ्नो बाबुलाई कारणवश मारेपछि विरक्त भएका ती वीर घरबाट निस्किए। तीर्थयात्राको क्रममा पृथ्वी घुम्दा बृहस्पतिको मुखबाट निस्किएका कुरा सुनेर उदास भएका ती परशुराम यही बाक्लो जङ्गल भएको ठाउँमा आए। जमदग्नि ऋषिका पुत्र परशुरामले श्रेष्ठ प्रभावती र सरस्वती नदीको यसै सङ्गममा स्नान गरे ॥८॥ पितालाई मार्ने व्यक्तिको वैरशुद्धिको कामना गरी सम्पूर्ण क्षत्रियलाई नाश गर्न सकूँ भन्ने सङ्कल्प गर्दै उनले यस तीर्थमा स्नान गरे ॥५-९॥

हे अगस्त्य मुनि ! त्यसपछि दृढ भई परशुरामले मनमनै शिवजीको मन्त्रजप गरे। त्यसको छ महिनाभित्रै उनको अगाडि शिवलिङ्ग प्रकट भयो। माघ कृष्ण चतुर्दशीको मध्यरातमा पूजासामग्री लिएर पूजा गरिरहेका परशुरामले आफ्नो अगाडि शिवलिङ्गलाई देखेर भक्तिपूर्वक नमस्कार गरे। त्यसपछि प्रसन्न हुँदै रोमाञ्चित भएर उनले भक्तिपूर्वक बारम्बार शिवजीको परिक्रमा गरे। ब्रह्ममुहूर्त भएपछि डरलाग्दो भैरवको स्वरूप लिएर भगवान् शङ्कर उनको अगाडि प्रकट हुनुभयो। त्यसपछि भगवान्‌ले हे ब्राह्मण ! भनेर गम्भीर वचनका साथ उनलाई भन्नुभयो ॥१०-१२½॥

---

१. कथं समुद्भवम्, इति न.सं.पु.पाठः।
२. कश्चिन्नृपेण, इति न.सं.पु.पाठः।
३. संदृश्य, इति न.सं.पु.पाठः।
४ आविर्भूतस्ततो ब्राह्मे रूपो भैरवभीषणः, इति न.सं.पु.पाठः।

रुद्र उवाच

तपसा चैव ते भक्त्या वीरेण चरितेन वै ॥१३॥
अदेयमपि दातव्यं तुष्टो राम यतो ह्यहम् । वरं वरय मत्तस्त्वं परशुराम ! साम्प्रतम् ॥१४॥
ददाम्यहञ्च तत्सर्वं यत्ते मनसि विद्यते ।

परशुराम उवाच

नमस्ते भगवन् रुद्र ! लोकवाञ्छाफलप्रद ॥१५॥
भूतेश्वर नमस्तुभ्यं सर्वभूतदयाकर । व्यक्तायाव्यक्तदेवाय व्यक्ताव्यक्तविभूतये ॥१६॥
सर्वस्वान्तर्विदिऽजाय सर्वज्ञाय नमो नमः । परशुरामनामाहं पितुर्निधनकर्शितः ॥१७॥
भ्रामं भ्रामं[४] महीं सर्वां सम्प्राप्तोऽस्म्यत्र दैवत ! । पुराकृतविपाकेन लब्धं त्वद्दर्शनं विभो ॥१८॥
योगिनामपि दुष्प्रापं त्वत्कृपया न संशयः । अवमत्यापि विप्रो मे क्षत्रियेण हतः पिता ॥१९॥
ततस्तद्दुःखदग्धोऽहं तद्विमोचय मेऽधुना । अविरोधेन वैरेण हतः पिता मम प्रभो ॥२०॥
वैरान्तं तदहं गन्तुं वाञ्छामि त्वदनुग्रहात् । वैरान्तञ्च पितुर्यो हि न गच्छति कदापि च ॥२१॥
स एव नारकी प्रोक्तस्तस्य धिग्जीवनं पुनः । यस्य कातरता स्त्रीवत्कापुरुषः स एव च ॥२२॥
लोकनिन्द्यो भवेन्नूनं[५] मलीमसैर्युतोऽनिशम् । अपि कैतवमाश्रित्य हन्तव्यः पितृघातकः ॥२३॥
यदि चैवं कृतं तस्य[६] प्रतिष्ठा लोकपूजिता । यदि स्यान्मम वैरान्तं[७] यास्याम्यहं सुनिश्चितम् ॥२४॥
त्वत्प्रसादान्महादेव ! लब्ध्वा त्वत्तो ध्रुवं वरम् । निःक्षत्रियां करिष्यामि मेदिनीञ्चाऽपि सर्वशः ॥२५॥
क्षत्रियेण हतो यस्मान्मे पिता त्वत्प्रसादतः । कृपयसि मयि त्वञ्चेद् प्रयच्छ मे यदीप्सितम् ॥२६॥
एतद्वरञ्च याचे त्वां नान्यं वाञ्छाम्यहं विभो ।

शिवजीले भन्नुभयो – हे परशुराम ! तिम्रो तपस्या, भक्ति र वीरचरित्रबाट म प्रसन्न भएको छु। त्यसैले दिनै नहुने वर पनि म तिमीलाई दिन्छु। हे परशुराम ! अब तिमीले चाहेको वर मसित माग। तिम्रो मनमा लागेको जे छ त्यो सबै वरका रूपमा माग, म तिमीलाई सबै कुरा दिन्छु ॥१३-१४½॥

परशुरामले भन्नुभयो – हे भगवान् ! सम्पूर्ण प्राणीको इच्छाअनुरूप फल दिन सक्ने हे रुद्र ! हजुरलाई नमस्कार छ। सम्पूर्ण प्राणीमाथि दया गर्ने हे भूतेश्वर ! हजुरलाई नमस्कार छ। हजुर व्यक्त पनि हुनुहुन्छ, अव्यक्त पनि हुनुहुन्छ। व्यक्त तथा अव्यक्त दुवै खालको ऐश्वर्यले पनि युक्त हुनुहुन्छ। सम्पूर्ण प्राणीको हृदयको कुरा जान्ने कहिल्यै नजन्मने सर्वज्ञ हजुरलाई बारम्बार नमस्कार छ। परशुराम नाम गरेको म पिताको निधनले विरक्त भएर पृथ्वी घुम्दै दैवसंयोगले यहाँ आइपुगेको छु। पूर्वजन्मको कर्म तथा हजुरको कृपाले गर्दा मैले योगीहरूले पनि प्राप्त गर्न नसक्ने हजुरको दर्शन पाएँ। यसमा कुनै शङ्का छैन ॥१५-१८½॥

हे भगवन् ! क्षत्रियहरूले अपमान गरी मेरा ब्राह्मण पितालाई मारे। त्यस दुःखबाट म डढेको छु, अब मलाई त्यस दुःखबाट छुटाइदिनुहोस्। हे प्रभु ! वैरभावना नहुँदा पनि द्वेष गरी मेरा पितालाई मारियो। हजुरको अनुग्रहबाट म त्यो वैरसाधना गर्न चाहन्छु। जसले छोरो भएर बाबुको वैरीसँग वैरसाधना गर्दैन त्यो नरकमा पर्दछ। त्यो आइमाईजस्तै कातर हो, दुर्जन हो, त्यसको जीवनलाई धिक्कार छ। बारम्बार पापले युक्त भएको त्यस्तो व्यक्तिलाई लोकले निन्दा गर्दछ। त्यसैले छल गरेर भए पनि बाबुको हत्यारालाई मार्नैपर्छ। हे शङ्कर ! यदि वैरसाधना गर्ने हो भने लोकमा प्रतिष्ठा बढ्छ ॥१९-२३½॥

म निश्चय नै हजुरको अनुग्रहबाट वैरसाधना गर्न समर्थ हुनेछु। हे महादेव ! हजुरको कृपा प्राप्त गरी वर पाएँ भने म निश्चय नै सम्पूर्ण पृथ्वीलाई क्षत्रियहीन बनाउनेछु। हे प्रभु ! एउटा क्षत्रियले मेरो पिताको हत्या गरेको हुनाले हजुर ममाथि अनुग्रह गर्नुहुन्छ भने मैले चाहेको वर दिनुहोस्। म यही वर चाहन्छु, यसबाहेक मलाई अरू केही कुराको इच्छा छैन ॥२५-२६½॥

---

४. भ्राम्यमाणः, इति न.सं.पु.पाठः।
५. भवेत्सैव, इति न.सं.पु.पाठः।।
६. कृतस्तस्य, इति न.सं.पु.पाठः।
७. वैरान्ते मेऽप्यभूद् रुद्र, इति न.सं.पु.पाठः।

ईश्वर उवाच

एवमस्तु च कामं ते यत्ते मनसि विद्यते ॥२७॥
करिष्यसि ह्यवश्यं त्वं निःक्षत्रियामिमां रसाम् । प्राप्स्यसि त्वं महावीर पितुः शत्रौ जयं ध्रुवम् ॥२८॥
गच्छ परशुरामार्य ! मयि भक्तिरतोऽनिशम् ।

नेमुनिरुवाच

इत्युक्त्वा भैरवो लिङ्गे तिरोदधे विरूपदृक् ॥२९॥
भासयन् स्वप्रभाभिश्च दिशो दश तदा पुनः । रामोऽपि प्रययौ शीघ्रं मध्यदेशं मुदाऽन्वितः ॥३०॥
शङ्करस्य प्रसादात्स लब्ध्वा वरं स्ववाञ्छितम् । राजस्त्रीणां प्रचक्रेऽसौ क्रन्दनं बहुशो भृशम् ॥३१॥
हत्वा च क्षत्रियान्युद्धे मुनिपुत्रस्ततो रुषा । निःक्षत्रिया कृता तेन मेदिनी सह पर्वतैः ॥३२॥
एकविंशतिधाऽजस्रमेतल्लिङ्गप्रसादतः । लिङ्गमेवं समुद्भूतं[८] तन्माहात्म्यं तथैव च ॥३३॥
प्रभातीर्थस्य माहात्म्यं भूयः शृणु विरूपदृक् । सिञ्जीनाम्नी पुरा चाऽऽसीद् बलिदैत्यसुता प्रिया ॥३४॥
भगिनी वज्रनाभस्य कन्या सा चाविवाहिता । नारदस्य मुखाच्छ्रुत्वा चाऽत्राऽगमन्मुदा च सा ॥३५॥
सखीभिः परिवार्याऽऽशु स्नातुमत्र समर्हणैः ।
सा निस्तेजस्विनी हंसी चाऽन्तःपुरे सुकर्शिता ॥३६॥
सस्नौ चाऽत्र मुदा भक्त्या तीर्थं सम्पूज्य चाऽर्हणैः । प्रभासौन्दर्यरूपैश्च युक्तमिच्छुः स्वविग्रहम् ॥३७॥
कन्दर्पसमभर्तारं सस्नौ हृदि विभाव्य च । अत्रैव च समुद्भूता प्रभादेवी जलान्तरात् ॥३८॥
व्याजहार शुभं वाक्यं तां सा स्नानप्रतोषिता ।

भगवान् शङ्करले भन्नुभयो– हे परशुराम ! तिम्रो मनमा जे इच्छा छ, त्यही होस् । अवश्य नै तिमीले यस पृथ्वीलाई क्षत्रियरहित तुल्याउनेछौ । हे महावीर ! पिताको वैरसाधनामा तिमीले विजय प्राप्त गर्नेछौ । हे परशुराम ! तिमी जाऊ, सधैँ मेरो भक्त बन ॥२७–२८½॥

नेमुनिले भन्नुभयो – यति भनी भैरवरूप भगवान् शङ्कर स्वकीय कान्तिले दशै दिशालाई उज्यालो तुल्याउँदै त्यसै लिङ्गमा अन्तर्ध्यान हुनुभयो । परशुराम पनि भगवान् शङ्करबाट आफूले चाहेजस्तो वर पाएर प्रसन्न हुँदै तुरुन्त मध्यप्रदेशतिर लाग्नुभयो । भगवान् शङ्करको अनुग्रहबाट जमदग्नि ऋषिका छोरा परशुरामले पितृहत्याको आवेगले पृथ्वीलाई २१ पटकसम्म घुमेर सम्पूर्ण क्षत्रियहरूलाई मारदिनुभयो । पहाडहरूले युक्त भएकी पृथ्वी क्षत्रियरहित बनिन् । परशुरामद्वारा मारिएका राजाका स्त्रीहरू ज्यादै नै रुन कराउन थाले । यसरी यस रामेश्वर लिङ्गको उत्पत्ति भएको हो । हे विरूपाक्ष ! प्रभातीर्थ र यस लिङ्गको माहात्म्य म फेरि बताउँछु, सुन ॥३१–३३॥

अघि वज्रनाभकी बहिनी र बलिदैत्यकी अत्यन्त प्यारी सिञ्जीनाम गरेकी अविवाहिता छोरी थिइन् । उनले नारदको मुखबाट यस तीर्थको वैशिष्ट्य सुनेपछि प्रसन्न हुँदै सखीहरूका साथ विभिन्न सामग्रीहरू लिएर स्नान गर्न यस तीर्थमा आइन् ॥३४–३५½॥

अन्तःपुरमा बसेको हुनाले हंसीजस्तो उनमा तेज थिएन । त्यसैले त्यस्तो तेजको कामना गरी उनले विभिन्न सामग्रीद्वारा भक्तिपूर्वक तीर्थको पूजा गरेर त्यहाँ स्नान गरिन् । आफ्नो शरीर कान्ति र सौन्दर्यले युक्त होस् र कामदेवजस्तो पति पाइयोस् भन्ने इच्छा हृदयमा राखेर उनले स्नान गरिन् । त्यहाँ सिञ्जीले स्नान गरेको हुनाले प्रसन्न भएकी प्रभा नाम गरेकी देवी जलको बीचबाट प्रकट भइन् र तिनलाई शुभवचन बोल्न थालिन् ॥३६–३८½॥

---

८. एवं समुद्भवं लिङ्गम्, इति न.सं.पु.पाठः ।

प्रभादेव्युवाच

सिञ्जि ! यतो मयि स्नातं त्वया सङ्कल्पतेजसा[१०] ॥३९॥

इहागत्य यदर्थं वै सर्वमेतत्[११] प्रलप्स्यसे । संस्नाय मयि भूयस्त्वं रामेश्वरं प्रपूजय ॥४०॥

ततस्ते वाञ्छितं सर्वं तत्प्रसादाद् भविष्यति । मयि स्नानाद्यतः सिञ्जि ! मन्नाम्ना त्वं भविष्यसि ॥४१॥

प्रभावतीति विख्यातिर्भूयात्ते प्रभया युता ।

नेमुनिरुवाच

एवं दत्त्वा[१२] वरन्तस्यै साऽन्तर्दधे जले द्विज ॥४२॥

सागमत्सखीभिः सार्द्धं सुप्रभानगरं स्वकम् । अत्र स्नानात्ततः सिञ्जी प्रभया संयुताऽभवत् ॥४३॥

प्रभावतीति विख्याता लोकैर्जानपदान्वयैः । अभूत्प्रभावती लोके[१३] सा सर्वाधिकसुन्दरी ॥४४॥

भ्रातृणां बहुमान्या सा सर्वलक्षणसंयुता । विराजते नगर्यां सा सुप्रभायां निरन्तरम् ॥४५॥

लक्ष्मीमूर्त्तिश्च दैत्यानां देवासुरविमोहिनी । क्वचित्कालान्तरे विप्र ! प्रद्युम्नस्तां जहार वै ॥४६॥

श्रुत्वा तद्रूपसौन्दर्यं नारदवचनाद् द्रुतम् । अत्र स्नानात्पुनर्हंसी चैतल्लिङ्गसमर्हणात् ॥४७॥

लेभे कन्दर्पभर्त्तारं तेन सार्द्धं मुमोद सा ।

कश्चिन्मुक्तः पुरा म्लेच्छः शृणु चाऽत्र विरूपदृक् ॥४८॥

पूर्वजन्मविपाकेन दुर्बलोऽभूत्स निर्धनः । मुण्डो नामाऽतिवृद्धोऽसौ कम्पिताङ्गः सुदुर्बलः ॥४९॥

अन्नदानैर्विहीनः प्राक् पत्नीपुत्रविवर्जितः । दुःखातुरो विरक्तोऽभूत्यक्तकामस्वविग्रहः ॥५०॥

प्रभादेवीले भनिन् – हे सिञ्जी ! सङ्कल्प गरेर तिमीले मेरो तीर्थमा आएर स्नान गऱ्यौ । यसैले तिमीले चाहेको सबै कुरा पाउँछ्यौ । फेरि पनि मेरो जलमा स्नान गरेर रामेश्वरको पूजा गर । उहाँको कृपाले तिम्रो सबै इच्छा पूर्ण हुनेछ । हे सिञ्जी ! मेरो जलमा स्नान गरेको हुनाले तिम्रो नाम पनि मेरै नामबाट रहनेछ । कान्तिले युक्त भएकी तिमी प्रभावतीका नामले प्रसिद्ध हुनेछ्यौ ॥३९-४१½॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यति भन्दै तिनलाई वर दिएर ती देवी त्यसै जलमा अन्तर्ध्यान भइन् । ती प्रभावती पनि आफ्ना सखीहरूका साथ आफ्नो सुप्रभा नामक गरेको शहरमा गइन् । यस तीर्थमा स्नान गरेको हुनाले ती सिञ्जी तेजले युक्त बनिन् । सम्पूर्ण प्रजा र उनीहरूका वंशमा उनी प्रभावतीका नामले प्रसिद्ध भइन् । ती प्रभावती सबैभन्दा राम्री थिइन् । सम्पूर्ण लक्षण भएकी उनी भाइहरूका बीचमा पनि मान्य भइन् । देवता र राक्षसलाई मोहित तुल्याउने लक्ष्मीकी मूर्तिजस्तै सुशोभित उनी सधैँ सुप्रभा शहरमा बस्न लागिन् ॥४२-४५½॥

हे ब्राह्मण ! पछि कालान्तरमा नारदमुनिबाट प्रभावतीको रूप र सौन्दर्य थाहा पाएका श्रीकृष्णका पुत्र प्रद्युम्नले तिनलाई तुरुन्त अपहरण गरे । हाँसको जस्तो गति भएकी प्रभावतीले यसै ठाउँमा स्नान गरेर लिङ्गको पूजा गरेको हुँदा कामदेवलाई पतिका रूपमा पाई आनन्दपूर्वक रहिन् ॥४६-४७½॥

हे विरूपाक्ष ! पूर्वजन्मको कर्मले गर्दा निर्बल र दुर्बल भएको कुनै म्लेच्छ पनि पहिले यहाँ मुक्त भएको थियो । म तिमीलाई त्यसबारे बताउँछु, सुन । मुण्ड नाम गरेको त्यो म्लेच्छ अत्यन्त बूढो र दुर्बल थियो । यसका सबै अङ्गहरू काँप्थे । पत्नी र पुत्रहरूद्वारा पनि त्यागिएको यसले अघि अन्नदान गरेको थिएन । दुःखले विरक्त भएर सम्पूर्ण इच्छा र शरीरलाई समेत त्याग्न तयार भएको त्यो म्लेच्छ गुफा र पर्वत पार गर्दै यसै ठाउँमा आइपुग्यो ॥४९-५०½॥

---

९. स्नाता त्वया सङ्कल्पमानसा, इति न.सं.पु.पाठः ।
१०. एतत्सर्वम्, इति न.सं.पु.पाठः ।
११. दिश्य, इति न.सं.पु.पाठः ।
१२. सा च, इति न.सं.पु.पाठः ।

अत्रैव प्राप्तवान् म्लेच्छ उत्तीर्य कन्दराचलात् । एतल्लिङ्गमुतथ्येन स्नात्वाऽर्चितं ददर्श सः ॥५१॥
एतस्मिँश्च प्रभातीर्थे वृद्धेन मुनिना तदा । सोऽपि सस्नौ विरक्तेन हृदयेनाऽत्र साम्प्रतम् ॥५२॥
ददर्श स्वां तनुं भूयो हृष्टपुष्टां प्रहृष्टवान् । तज्जलेनैव लिङ्गञ्च पूजति स्म समर्हणैः ॥५३॥
उतथ्यस्य मुखाच्छ्रुत्वा भक्त्या पृष्टस्य सत्वरम् । अद्यैवाऽऽगत्य मे मृत्युर्नयतु मामिहैव तत् ॥५४॥
इति कृत्वा धिया वृद्धो लिङ्गं स्पृष्ट्वा ननाम हि । फाल्गुनस्य चतुर्दश्यां शुक्लपक्षस्य सोऽपि च ॥५५॥
पञ्चत्वं प्राप्तवानत्र चाऽर्द्धरात्रे विरूपदृक् । तमास्थाय च शैवास्ते याने च पुष्पके तदा ॥५६॥
निन्युः शिवपुरं दिव्यं रुद्रकन्याप्रसेवितम् । स एव चाऽभवच्छ्रेष्ठः प्रमथानां पुरोगमः ॥५७॥
अद्यापि विचरेन्नूनं रुद्रस्याऽनुचरोऽभवत् । चैत्रस्य पूर्णिमायां यः स्नात्वा लिङ्गं प्रपूजति ॥५८॥
याम्यं न दृश्यते तेन पातकैः प्रयुतेन च । अतस्त्रियोजने दूरे याम्यायां दिशि त्वं व्रज[१४] ॥५९॥
तत्र कालेश्वरश्चाऽऽस्ते कूटे कासुन्दभूभृतः ।

त्वं कालतीर्थे विधिवद्धि विप्र ! स्नात्वा च कालेश्वरमर्चयाऽऽशु ।
यद्वाञ्छितन्ते मनसा निशान्ते प्राप्नोषि शीघ्रं तदवश्यमार्य ॥६०॥

इति श्रीस्कन्दपुराणे हिमवतखण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
प्रभातीर्थरामेश्वरयोर्माहात्म्यं नाम त्र्युत्तरशततमोऽध्यायः ॥१०३॥

उसले उतथ्य नाम गरेका वृद्ध ऋषिले यस प्रभातीर्थमा स्नान गरेर लिङ्गको पूजा गर्न लागेको देख्यो । विरक्त हृदय भएको त्यस म्लेच्छले पनि यहाँ स्नान गऱ्यो । स्नान गरेपछि उसले आफ्नो शरीरलाई हृष्टपुष्ट भएको देख्यो र प्रसन्न भयो । उसले यसबारे भक्तिपूर्वक उतथ्य ऋषिलाई सोध्यो । लिङ्गका विषयमा ऋषिका मुखबाट निस्किएका पवित्र वचनलाई सुनेर उसले त्यसै ठाउँको जल र पूजासामग्रीले शिवलिङ्गको पूजा गऱ्यो । आज नै मृत्युले आएर मलाई लैजाओस् भन्ने कामना गरेर त्यस बूढो म्लेच्छले शिवलिङ्गलाई छोएर नमस्कार गऱ्यो ॥५१-५४½॥

हे विरूपाक्ष ! फाल्गुण शुक्ल चतुर्दशीका दिन मध्यरातमा त्यो म्लेच्छ मऱ्यो । त्यसलाई शिवदूतहरूले पुष्पक विमानमा राखेर रुद्रकन्याबाट सु-सेवित गराउँदै शिवलोकमा लगे । त्यसै दिनदेखि त्यो बूढो प्रमथगणहरूमा अग्रगण्य भई शिवको सेवक बनेर आजसम्म रहेको छ । जसले चैत्र पूर्णिमाको दिन स्नान गरेर रामेश्वर शिवलिङ्गको पूजा गर्छ त्यो अनेकौं पापले युक्त भए तापनि त्यसले यमलोक हेर्नुपर्दैन ॥५५-५८½॥

हे विरूपाक्ष ! अब तिमी यहाँबाट बाइकोश टाढा रहेको दक्षिण दिशातिर जाऊ । त्यहाँ कासुन्द पर्वतको शिखरमा कालेश्वर महादेव बस्नुभएको छ ॥५९॥ तिमीले कालतीर्थमा विधिपूर्वक स्नान गरेर कालेश्वर भगवान्को पूजा गर । रातको अन्त्यमा अर्थात् बिहानीपख मनले जे चिताउँछौ, त्यो अवश्य पाउनेछौ ॥५९-६०॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवतखण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा प्रभातीर्थ र रामेश्वरको माहात्म्यनामक
एकसय तेस्रो अध्याय पूरा भयो ।

---

१३. **याम्ये दिशि व्रज द्विज, इति न.सं.पु.पाठः ।**

चतुरधिकशततमोऽध्यायः

कालतीर्थकालेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

प्रभासंयुक्तदेहोऽसौ विरूपाक्षोऽभवत्पुनः। तत्तीर्थेऽगस्त्य ! संस्नानात्तत्पूजनाद्विकिल्विषः ॥१॥
भूयोऽगमद्विरूपाक्षस्तेनैव मुनिना समम्। यत्र कालेश्वरं लिङ्गं[1] कासुन्दशैलशैखरे ॥२॥
स्नात्वा च विधिवल्लिङ्गं कालतीर्थे ह्यपूपुजत्। ऋषेर्वाक्यप्रमाणेन भक्त्या पञ्चोपचारकैः ॥३॥
माघकृष्णचतुर्दश्यां भूत्वा च जागृतो निशि। पप्रच्छ तञ्च माहात्म्यं तत्तीर्थलिङ्गयोस्तदा ॥४॥

विरूपाक्ष उवाच

श्रोतुकामः पुनस्त्वत्तो मुनीनां प्रवर प्रभो। एतल्लिङ्गस्य संभूतिं[2] माहात्म्यमस्य साम्प्रतम् ॥५॥
एतत्तीर्थस्य माहात्म्यं श्रोतुमिच्छाम्यहं विभो। को मुक्तः स्नातको ह्यत्र वदैतत्सर्वविद्विभो ॥६॥

नेमुनिरुवाच

हिमवतः सुतः शैव उज्जयन्ताभिधानकः। तत्कुक्षेश्च समुद्भूता घर्घरा सरितां वरा ॥७॥
वैतरणगिरेः सानोः सम्भूता च नदीवरा। वैतरणीति विख्याता घर्घरा पूर्वदेशतः ॥८॥
तयोश्च सङ्गमे पूर्वं कालः सस्नौ मुदाऽन्वितः। कालः शैलं समारुह्य तमाराधितवान् हरम् ॥९॥
द्वादशवत्सरान्ते च ह्येतल्लिङ्गसमुद्भवः। पौषशुक्लनवम्याञ्च निशायामार्द्रया युजि ॥१०॥
तस्माल्लब्ध्वा वरं कालः कालान् कलयति प्रभुः। अद्यापि निर्भरञ्जन्तून् गर्भस्थानपि सर्वशः ॥११॥
कालेनाऽऽराधितं लिङ्गं कालेश्वरमिति श्रुतम्। स्नातञ्च तेन पूर्वं हि कालतीर्थं ततः स्मृतम् ॥१२॥

अध्याय – १०४

कालतीर्थ र कालेश्वर शिवलिङ्गको माहात्म्य

कुमारस्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि ती विरूपाक्ष त्यस रामेश्वरतीर्थमा स्नान तथा पूजा गर्नाले पापबाट मुक्त भएर तेजस्वी बने। पापमुक्त भई निर्मल बनेका विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ कालेश्वर भगवान् शङ्कर रहनुभएको थियो त्यसै कासुन्द पर्वतको उत्तम शिखरमा गए। ऋषिको निर्देशनबमोजिम उनले कालतीर्थमा स्नान गरेर विधिपूर्वक पञ्चोपचारविधिले कालेश्वरशिवलिङ्गको पूजा गरे। माघकृष्ण चतुर्दशीका दिन रातमा जाग्राम बसेर उनले नेमुनिसँग त्यस तीर्थ र लिङ्गको माहात्म्य सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! हे प्रभु ! अब म हजुरबाट फेरि यस लिङ्गको उत्पत्ति र माहात्म्य सुन्न चाहन्छु। सर्वज्ञ हे प्रभु ! यस तीर्थमा स्नान गरेर को मुक्त भयो ? म यो तीर्थको माहात्म्य सुन्न चाहन्छु, यो सबै बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो –हिमालयका उज्जयन्त नाम गरेका छोरा शिवका भक्त थिए। उनकै कोखबाट नदीहरूमा श्रेष्ठ घर्घरा नाम गरेकी नदी पैदा भइन्। घर्घराको पूर्वतर्फ रहेको वैतरण नाम गरेको पहाडको टाकुराबाट एउटी उत्तम नदी झरेकी हुँदा तिनलाई वैतरणी भनियो। पहिले कुनै समयमा ती दुई नदीको सङ्गममा कालले आनन्दपूर्वक स्नान गरेका थिए। उनले त्यहीं पहाडमा चढेर भगवान् शङ्करको आराधना गरे ॥७–९॥

बाह्र वर्षपछि आर्द्रा नक्षत्रले युक्त भएको पौषशुक्ल नवमीको रातमा यस कालेश्वर लिङ्गको प्रादुर्भाव भयो। कालेश्वरबाट वर प्राप्त गरेर भगवान् महाकालले गर्भमा समेत रहेका सम्पूर्ण प्राणीहरूको कालको गणना गर्नुहुन्छ। कालले आराधना गरेर प्रादुर्भाव भएको हुँदा यस लिङ्गको नाम कालेश्वर रहेको हो। ती कालले नै अघि यहाँ स्नान गरेको हुँदा यस तीर्थलाई कालतीर्थ भनियो ॥१०–१२॥

---

१ कालेश्वरो लिङ्गः, इति न.सं.पु.पाठः।

२ एतल्लिङ्गञ्च संभूतम्, इति न.सं.पु.पाठः।

शृणु विप्रेश ! वक्ष्यामि यद् वृत्तान्तं पुराऽभवत्। कश्चिन्म्लेच्छोऽत्र मुक्तो वै पापो रुद्रप्रसादतः ॥१३॥
लम्बकर्णाभिधानोऽसौ मृगयाजीवनोऽनिशम्। क्वचित्कालान्तरे चाऽत्र प्राप्तवान्मृगयां गतः ॥१४॥
यमं ददर्श तत्तीर्थे तर्पयन्तञ्जलान्तरे। एतल्लिङ्गमिहागत्य पूजयन्तं हि भक्तितः ॥१५॥
लम्बकर्णोऽपि तत्तीर्थे सस्नौ कौतूहलेन च। तथा महर्षिणा स्नातं सूर्यं दृष्ट्वा[३] पुनः पुनः ॥१६॥
आरुह्य तद्गिरिं म्लेच्छश्चैतल्लिङ्गं समार्चयत्[४]। तपःसितचतुर्दश्यां विनिद्रश्च तमर्हयन् ॥१७॥
बभूव ज्ञानवान् म्लेच्छो लिङ्गसंस्पर्शनात्पुनः। आजन्मसञ्चितैः पापैर्निर्मुक्तः स्नानतो द्विज ॥१८॥
रुद्रयानं समादाय चाऽऽययुः प्रमथा इह। रुद्रानुशासनाद्रक्ता नन्दिमुखास्तदा मुदा ॥१९॥
श्रद्दधानं शिवध्याने पूजयन्तं शिवं निशि। विदध्युस्ते विमाने तं बहुमान्यं च सादरम् ॥२०॥
शङ्खभेरीमृदङ्गैश्च तालझर्झरनिःस्वनैः। निषेवन्ते स्म तं देव्यः पुष्पासारैर्विमानगम् ॥२१॥
सेवितञ्चाप्सरोभिस्तमुद्धूतं चामरैश्च ते। निन्यू रुद्रपुरं व्योम्नश्चाऽत्राऽभिषिच्य तज्जलैः ॥२२॥
अद्यापि व्यचरत्तत्र समं रुद्रेण वै च सः। प्रमथानां गरिष्ठोऽभूल्लम्बकर्ण इति श्रुतः ॥२३॥
एतल्लिङ्गप्रसादात्स तीर्थस्नानैर्विशेषतः। सदेहः प्रमथश्रेष्ठश्चाऽभूद् रुद्रप्रियो द्विज ॥२४॥
कालरात्रिः समध्यास्ते शिवशक्तिः सदैव सा[५]। अगम्यं तत्र गन्तुञ्च ह्यपि देवैर्नरैः किमु ॥२५॥
तत्र गमनमात्रेण गच्छति स्वर्गमुत्तमम्। यदि पश्यति तां रौद्रीं सायुज्यं प्राप्नुयात् क्षणात् ॥२६॥

हे विरूपाक्ष ! पहिले कुनै समयमा घटेको घटना म तिमीलाई बताउँछु, सुन। भगवान् शङ्करका अनुग्रहले गर्दा एउटा कुनै पापी म्लेच्छ यस ठाउँमा आएर मुक्त भयो। लम्बकर्ण नाम गरेको त्यो म्लेच्छ सधैं शिकार खेलेर जीवन बिताउँथ्यो। शिकारका लागि निस्किएको त्यो म्लेच्छ कुनै समयमा यहाँ आइपुग्यो। त्यसले यस तीर्थको जलको बीचमा रहेर तर्पण दिँदै गरेका यमराजलाई देख्यो। त्यसपछि उसले लिङ्गको समीपमा आएर भक्तिपूर्वक यमराजले पूजा गरेको देख्यो। स्नान गरेर महर्षिले बारम्बार सूर्योपस्थापन गर्न लागेको दृश्य देखेर उत्सुक भएको त्यस लम्बकर्णले पनि यस तीर्थमा स्नान गऱ्यो ॥१३-१६॥

त्यस म्लेच्छले स्नान गरेपछि पहाडमा चढेर यस शिवलिङ्गको पूजा गऱ्यो। माघशुक्ल चतुर्दशीका दिन जाग्राम बसेर शिवलिङ्गको आराधना गऱ्यो। हे विरूपाक्ष ! त्यस म्लेच्छले यस लिङ्गको स्पर्श गरेको हुनाले तुरुन्त ऊ ज्ञानी भयो र यस तीर्थमा स्नान गरेको हुनाले जन्मदेखि लागेका पापबाट पनि ऊ मुक्त भयो। त्यसपछि भगवान् शङ्करको आज्ञाबमोजिम नन्दी आदि प्रमथ गणहरू प्रसन्न हुँदै शिवजीको यान लिएर यहाँ आए। शिवजीको ध्यानमा तत्पर भई रातमा शिवजीको पूजा गरेका कारण आदरणीय बनेको त्यस म्लेच्छलाई शिवका गणहरूले सत्कारपूर्वक विमानमा राखे। विमानमा बसेको त्यस म्लेच्छलाई शङ्ख, कर्नाल, मादल, ताल, झ्याँझरका स्वरहरूका साथ फूलको वर्षा गरेर देवीहरूले सेवा गरेका थिए ॥१७-२१॥

अप्सराहरूले चामर हल्लाउँदै त्यस म्लेच्छको सेवा गरे। प्रमथ आदि गणहरूले त्यस तीर्थको जलद्वारा उसलाई अभिषेक गरेर शिवपुरमा लगे। लम्बकर्ण नामले प्रसिद्ध त्यो म्लेच्छ आज पनि भगवान् शङ्करको सेवक बनेर त्यहाँ रहेको छ। हे विरूपाक्ष ! त्यस शिवलिङ्गको अनुग्रह र विशेष गरी तीर्थको स्नानको प्रभावले गर्दा त्यो लम्बोदर शरीरैसित प्रमथ गणमा उत्तम बन्न पुग्यो र शङ्करको प्रिय भक्त बन्यो। यस ठाउँमा कालरात्रीले पनि शक्तिले सम्पन्न भगवान् शङ्करको ध्यान गर्नुहुन्छ। देवताहरूलाई पनि त्यस ठाउँमा पुग्न कठिन छ भने मानिसको के कुरा ! त्यस ठाउँमा गयो भने मात्रै पनि उत्तम स्वर्ग प्राप्त हुन्छ। यदि ती कालरात्रिको दर्शन गरियो भने त तुरुन्तै ईश्वरमा विलीन भइन्छ ॥२२-२६॥

---

३. पश्य, इति न.सं.पु.पाठः। ४. समर्चितम्, इति न.सं.पु.पाठः।
५. शिवशक्ति समत्र सा, इति न.सं.पु.पाठः।

नमस्यतामिहाऽस्थाय कालरात्रिं महोदरीम् । दण्डवत्पातयित्वाङ्गं तत्फलं लप्स्यसे ध्रुवम् ॥२७॥
कालतीर्थे च यः स्नात्वा कालेश्वरं प्रपूजति । कालपाशैर्विनिर्मुक्तः कालेश्वरपुरं व्रजेत् ॥२८॥
दूरे तृतीये खलु योजने ते यत्र स्थितो विप्र नटेश्वरो वै ।
तत्र त्रिकूटाचलशेखरेऽसौ ब्रह्माख्यतीर्थेन समं प्रतीच्याम् ॥२९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
कालतीर्थकालेश्वरयोर्माहात्म्यं नाम चतुरधिकशततमोऽध्यायः ॥१०४॥

यहाँ बसेर ठूलो पेट भएकी ती कालरात्री महादेवीलाई साष्टाङ्ग दण्डवत् प्रणाम गर, त्यसको फल तिमी अवश्य पाउनेछौ । जसले कालतीर्थमा स्नान गरेर कालेश्वर भगवान्को पूजा गर्छ त्यो व्यक्ति कालको पाशबाट मुक्त भएर कालेश्वर अर्थात् भगवान् शङ्करको लोकमा जान्छ ॥२७-२८॥

हे ब्राह्मण विरूपाक्ष ! त्यस ठाउँबाट बाह्र कोस पश्चिममा रहेको त्रिकूट पर्वतको शिखरमा ब्रह्मतीर्थका साथ भगवान् नटेश्वर विराजमान हुनुहुन्छ ॥२९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा कालतीर्थ र कालेश्वरको माहात्म्यनामक
एकसय चौथो अध्याय पूरा भयो ।

पञ्चोत्तरशततमोऽध्यायः

ब्रह्मतीर्थनटारम्भेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

ततश्चाभूद्विरूपः सः सर्वसत्त्वदयाकरः। कालतीर्थे मुने स्नात्वा तत्रेश्वरसमर्हणात् ॥१॥
भूयोऽगमत्प्रतीच्यां स मुनिना तेन वै समम्। यत्र नृत्येश्वरं लिङ्गं त्रिकूटाद्रौ विराजते ॥२॥
ब्रह्मतीर्थे द्विजः स्नात्वा नृत्येश्वरमपूपुजत्। त्रिकूटाद्रिं समारुह्य वाचा वदन् शिवेति सः ॥३॥
माघकृष्णकुहौ रात्रौ पूजन्[1] जागृतवान् पुनः। अपृच्छत् स माहात्म्यं तं नेमुनिं तीर्थलिङ्गयोः ॥४॥

विरूपाक्ष उवाच

मुनीनां प्रवर ! श्रीमन् सर्ववृत्तान्तविद्विभो। श्रोतुकामः पुनश्चाऽहं त्वत्तः सर्वविदोऽधुना ॥५॥
एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च विशेषतः। केन प्रकाशितं पूर्वमस्माल्लब्धं पुरा फलम् ॥६॥
उद्भूतञ्च कथं लिङ्गमेतदचलशेखरे। केनैतदर्चितं पूर्वं ब्रूहि मे तद्विभोऽधुना ॥७॥

नेमुनिरुवाच

ब्रह्मविष्णुसहस्राक्षा हाहा हूहूश्च तुम्बुरुः। गन्धर्वकिन्नराश्चाऽत्र हरं द्रष्टुं समाययुः ॥८॥
अस्मिंस्तीर्थेऽमराः स्नात्वा चैतद्गिरिं समारुहन्। संतस्थुरत्र कूटे वै निशामेकां शिवस्मराः[2] ॥९॥
हा नाथ ! शङ्करार्येश क्व गतोऽस्यधुना विभो। दैत्यार्दितांश्च नस्त्यक्त्वा वदन्तश्च मुहुर्मुहुः ॥१०॥
व्याजहार विधिर्वाक्यं तदा तेभ्यो विरूपदृक्। निशि संसदि तान् प्रेक्ष्य तारकाच्च भयातुरान् ॥११॥

अध्याय – १०५

ब्रह्मतीर्थ र नटारम्भेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! कालतीर्थमा स्नान गरेर त्यहाँ रहेका भगवान् शङ्करको पूजा गरेपछि विरूपाक्ष सबै प्राणीका निमित्त दयालु बने। त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिई पश्चिम दिशातिर रहेको त्रिकूट नाम गरेको जुन पर्वतमा भगवान् नृत्येश्वर बस्नुहुन्थ्यो, त्यसै ठाउँमा गए। ब्राह्मण विरूपाक्षले ब्रह्मतीर्थमा पुगेर स्नान गरे। त्यसपछि उनले त्रिकूटाचलमा चढेर शिवजीको नाम उच्चारण गर्दै नृत्येश्वर (नटेश्वर) भगवान्को पूजा गरे। माघकृष्ण अमावास्याको रातमा भगवान् शङ्करको पूजा गरेर उनी जाग्राम बसे। त्यसपछि उनले नेमुनिसँग त्यस तीर्थ र लिङ्गको माहात्म्य सोधे ॥१–४॥

विरूपाक्षले भने – सम्पूर्ण वृत्तान्तका ज्ञाता हे मुनिश्रेष्ठ ! सर्वज्ञ हजुरसित म यो लिङ्गको र विशेष गरी तीर्थको माहात्म्य सुन्न चाहन्छु। हे प्रभु ! यस लिङ्गलाई पहिले कसले प्रकाशित गरेको थियो ? यसको आराधनाबाट अघि कसले फल पायो ? त्रिकूटपर्वतमा यस लिङ्गको उत्पत्ति कसरी भयो र पहिले यस लिङ्गको पूजा कसले गरेको थियो ? अब ती सबै कुरा मलाई बताउनुहोस् ॥५–७॥

नेमुनिले भन्नुभयो – ब्रह्मा, विष्णु, इन्द्र, हाहा, हूहू, तुम्बुरु, गन्धर्व र किन्नरहरू भगवान् शङ्करलाई हेर्न यहाँ आए ॥८॥ देवताहरूले यस तीर्थमा स्नान गरे र त्रिकूटाचलमा चढे। उनीहरू शिवजीको ध्यान गर्दै यस पर्वतको शिखरमा एक रात बसे। त्यसपछि उनीहरूले हे नाथ ! हे शङ्कर ! हे ईश्वर ! दैत्यबाट सताइएका हामीलाई छाडेर नजानुहोस् भन्दाभन्दै पनि हजुर अहिले कहाँ जानुभएको छ भनी प्रार्थना गरे। हे विरूपाक्ष ! तारक दैत्यको भयका कारण डराएका ती देवताहरूलाई राति ब्रह्माजीले सभामा भन्नुभयो ॥८–११॥

---

१. पूज्य, इति न.सं.पु.पाठः। २. शिवं स्मरन्, इति न.सं.पु.पाठः।

ब्रह्मोवाच

भो भो देवा ध्रुवं यूयं विषण्णवदनाः किमु। त्रैलोक्यान्वेषणे रक्तैः किञ्च कार्यं श्रमार्दितैः[३] ॥१२॥

सम्भजत शिवं साक्षात्पञ्चभूतात्मकं खलु। अस्ति पञ्चात्मकं यत्र तत्र शिवो न संशयः ॥१३॥

स्वैः स्वैर्वाद्यैस्तथा गीतैः सेवध्वं तं महेश्वरम्। भक्तिं सम्प्रेक्ष्य वो रुद्रश्चाऽत्रैवाऽऽविर्भविष्यति ॥१४॥

नेमुनिरुवाच

ब्रह्मणा प्रेरितं वाक्यं श्रुत्वा देवाः प्रहर्षिताः। सत्योक्तं तेन कृत्वेति चाऽपूपुजन् विधिं तदा ॥१५॥

ब्रह्मा चाऽताडयत्तालं मृदङ्गं तुम्बुरुस्तथा। विष्णुर्नान्दीं पठन्भक्त्या हाहा हूहूर्जगौ मुहुः ॥१६॥

तपःकृष्णचतुर्दश्यामर्द्धनक्तं तदा द्विज। एतल्लिङ्गं समुद्भूतं गीतवाद्यमहोत्सवैः ॥१७॥

आलोक्य देवताः लिङ्गं सम्भूतं पुरतः तदा[४]। आत्मानं मेनिरेऽत्यन्तं कृतार्थनिव साम्प्रतम् ॥१८॥

ततो देवा उपासन्ते चैतल्लिङ्गं महोत्सवैः। स्तवैर्वाद्यार्चनैर्गीतैर्हर्षविस्फुल्लमानसाः ॥१९॥

अस्मिन्काले पुनर्लिङ्गादुत्पत्य च मुदा भृशम्। अनर्तीच्चैव[५] रुद्रोऽसौ तेषां मध्ये महोत्सवैः ॥२०॥

प्रणेमुर्देवताः भक्त्या नृत्यन्तं तं मुहुर्मुदा। स्तवैर्गीतैस्तथा वाद्यैरसेवन्त नटेश्वरम् ॥२१॥

ततोऽब्रवीन्महादेवो देवेभ्यः प्रसभं द्विज। तेषां भक्त्या स्तवैर्गीतैर्नम्रवाद्यैः प्रहर्षयन् ॥२२॥

ब्रह्माजीले भन्नुभयो – हे देवता हो ! तिमीहरू किन अँध्यारो मुख लगाउँछौ ? धेरै परिश्रमका साथ तीनै लोकमा भगवान् शिवको खोजी गरिरहेका तिमीहरूले के पायौ ? तिमीहरू स्थिर भएर पृथ्वी, जल, तेज, आकाश र वायु रूप भएका साक्षात् शिवजीको आराधना गर। जहाँ ती पाँच कुरा छन्, शिवजी त्यहाँ अवश्य हुनुहुन्छ, यसमा कुनै शंका छैन। हामी आ–आफ्नो गीत तथा बाजाहरूद्वारा भगवान् शङ्करको सेवा गरौँ। हाम्रो भक्ति देखेर भगवान् शङ्कर यसै ठाउँमा प्रकट हुनुहुनेछ ॥१२–१४॥

नेमुनिले भन्नुभयो – ब्रह्माजीको यस्तो वचन सुनेर देवताहरू प्रसन्न भए र ब्रह्माजीको वचनलाई सत्य मानी उहाँको पूजा गरे। ब्रह्माजीले ताली बजाउनुभयो, तुम्बुरुले मादल बजाए, विष्णुले नन्दीपाठ पढ्नुभयो अनि हाहा र हूहूले भक्तिपूर्वक बारम्बार शङ्करको भजन गरे। माघकृष्ण चतुर्दशीका दिन आधा रातमा गीत, वाद्य र ठूलो उत्सव भइरहेको समयमा भगवान् शिवको नटेश्वर लिङ्गको प्रादुर्भाव भयो। देवताहरूले आफ्नो अगाडि लिङ्गको उत्पत्ति भएको देखी त्यस समयमा आफूहरू अत्यन्त कृतार्थ भएको ठाने ॥१५–१८॥

त्यसपछि हर्षले प्रसन्न चित्त भएका देवताहरूले स्तुति, वाद्य र पूजा गरी ठूलो उत्सवका साथ यस लिङ्गको उपासना गरे। यसरी ठूलो उत्सव भइरहेको समयमा त्यस लिङ्गबाट प्रकट भएर भगवान् रुद्र प्रसन्न हुँदै मज्जाले नाच्न थाल्नुभयो। स्तुति, गीत र वाद्यद्वारा नटेश्वर भगवान् शङ्करको आराधना गरिरहेका देवताहरूले नाच्न लाग्नुभएका भगवान् शङ्करलाई देखेर प्रसन्न हुँदै भक्तिपूर्वक बारम्बार नमस्कार गरे। त्यसपछि देवताहरूको भक्ति, स्तुति, गीत, नमस्कार र वाद्यवादनद्वारा खुसी हुनुभएका भगवान् शङ्करले उनीहरूलाई भन्नुभयो ॥१९–२२॥

---

३. त्रैलोक्यान्वेषयद्भिः किं कार्यं परिश्रमार्दितैः, इति न.सं.पु.पाठः। ४. पुरतः सम्भवं तदा, इति न.सं.पु.पाठः।

५. नरीनृत्यत, इति न.सं.पु.पाठः।

नृत्येश्वर उवाच

भवद्भिर्गीतवाद्यैश्च ह्यत्र देवाः प्रतोषिताः । नर्त्तितोऽहं मुदाऽत्यन्तं बहु सुखं महोत्सवैः ॥२३॥
युष्माभिर्नर्त्तितोऽद्याऽहं यतो भक्तिपुरःसरैः । तस्मात् सिध्यति कार्यं वो दानवान्मा बिभीयताम् ॥२४॥
नर्त्तनेन सकृद्यो मां वाद्यगीतैश्च सेवते । अद्यप्रभृति तञ्चाऽहं तारये दुःखसागरात् ॥२५॥
युष्माभिः सेविता लोकाश्चाऽऽरम्भान्मे नटस्य च । एतल्लिङ्गं वदिष्यन्ति नटारम्भ इतीह ते ॥२६॥
यः पश्यति नरो वामे लिङ्गमूर्तिञ्च भक्तितः । मुक्तो जन्मार्जितैः पापैर्मम लोकं स गच्छति ॥२७॥
ब्रह्मतीर्थे मुदा स्नात्वा चाऽऽरुह्यैनं गिरिं मुदा । स्पृशति[६] लिङ्गमेतद्यो मद्रूपोऽसौ न संशयः ॥२८॥

नेमुनिरुवाच

इत्युक्त्वाऽन्तर्हिते लिङ्गे महादेवे विरूपदृक् । देवाश्च प्रययुः स्वर्गं लब्धवराः गतज्वराः ॥२९॥
कश्चिद् द्विप्रः पुरा चाऽत्र निर्वाणं गतवान् शिवे । बहुपापान्वितोऽप्यार्य शृणु तच्च वदाम्यहम्[७] ॥३०॥
आसीत्पूर्वं द्विजश्रेष्ठो देवशर्मेति विश्रुतः । लोकपूज्यः श्रुतिज्ञोऽसौ नृपमान्यो द्विजोत्तमः ॥३१॥
युक्त आजन्म मालिन्याद्[८] बहुप्रतिग्रहैर्हि सः । महादानादिभिः सर्वैः पात्रापात्राविचारितैः[९] ॥३२॥
चतुरंशञ्च धर्माय देवाग्निभ्यां द्विजन्मने । अतिथये स्वभृत्याय द्वावंशौ तद्धनं स्मृतम् ॥३३॥
न दानाय न धर्माय न देवाय न चाऽग्नये । तद्धनमभवद्विप्र सञ्चयार्थं हि केवलम् ॥३४॥

नृत्येश्वरले भन्नुभयो – हे देवता हो ! तपाईंहरूले यहाँ गीत, वाद्य आदिद्वारा मलाई प्रसन्न तुल्याउनुभयो। तपाईंहरूले ठूलो उत्सव गरी आनन्दका साथ मलाई नचाएर अत्यन्त खुसी बनाउनुभएको छ। तपाईंहरूले भक्तिपूर्वक आज मलाई नचाउनुभएको हुनाले तपाईंहरूको कार्यसिद्धि हुनेछ, दानवहरूबाट नडराउनुहोस्। अबदेखि जुन व्यक्तिले नृत्य, वाद्य तथा गीतद्वारा एकपटक मात्रै भए पनि मेरो आराधना गर्दछ, त्यस्तो व्यक्तिलाई म यस दुःखरूपी सागरबाट पार लगाउनेछु। तपाईंहरूले मेरो यस नट्यवतारको प्रारम्भदेखि नै सेवा गर्नुभएको हुनाले मानिसहरूले सधैँ यस लिङ्गलाई नटरम्भेश्वर भन्नेछन् ॥२३–२६॥

जो व्यक्तिले बायाँतर्फ रहेको मेरो यस लिङ्गमय मूर्तिको भक्तिपूर्वक दर्शन गर्छ त्यो व्यक्ति जन्मभर गरेका पापबाट मुक्त भई मेरो लोकमा जान्छ। ब्रह्मतीर्थमा प्रसन्नतापूर्वक स्नान गरी यस पर्वतमा चढेर जसले मेरो यस लिङ्गलाई स्पर्श गर्छ त्यो मेरै स्वरूप हुन्छ, यसमा शङ्का छैन ॥२७–२८॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यति भनेर भगवान् शङ्कर त्यसै लिङ्गमा अन्तर्धान हुनुभयो। वर पाएपछि पीडाबाट मुक्त भएका देवताहरू पनि स्वर्गतिर गए हे विरूपाक्ष ! धेरै पाप गरेता पनि यस ठाउँमा आएर कुनै ब्राह्मण अघि शिवजीमा विलीन भएका थिए, त्यो कुरा म बताउँछु, सुन ॥२९–३०॥

अघि देवशर्मा नाम गरेका ब्राह्मणश्रेष्ठ थिए, उनको समाजमा आदर थियो, वेदमा उनी निपुण थिए। राजाले पनि उनलाई मान्दथे। द्विजातिमा उनको अग्रगण्य स्थान थियो। उनले जीवनभरि धेरै पात्र, अपात्र, विचार नगरीकन प्रत्यवाय लाग्ने ठूला–ठूला सम्पूर्ण दानहरू लिए। त्यस्तो धन चार भागमा एक भाग धर्मलाई दिनुपर्छ। दुई भाग देवता, अग्नि, ब्राह्मण, अतिथि र आफ्नो सेवकलाई दिनुपर्छ। अरू बाँकी रहेको मात्र उसको धन हुन्छ भनेर लेखिएको छ। त्यो दान न र्धका निमित्त भयो, न देवताले पाए, न त अग्निलाई मिल्यो। त्यो धन त सञ्चयका निमित्त मात्र भयो ॥३१–३४॥

---

६. स्पर्शति, इति न.सं.पु.पाठः। ७. वदाम्यहञ्च तत्, इति न.सं.पु.पाठः।
८. आजन्मपर्यन्तम्, इति न.सं.पु.पाठः। ९. पात्रापात्रविचारितैः,इति न.सं.पु.पाठः।

ततः कालान्तरैकस्मिन् पशुत्वं प्राप्तवान् द्विजः । तिर्यग्योनौ पुनश्चाऽसावजायत वनेचरः ॥३५॥
भूत्वाऽसौ मर्कटोऽजस्रं भूयो जन्मनि जन्मनि । भ्रमति स्म वनं घोरं षष्टिवर्षसहस्रशः ॥३६॥
क्षुत्पिपासातिशीतार्त्तो भ्रमति स्म वने मुहुः । प्रतिग्रहार्जिताऽदानात्तत्पापैर्लिप्तविग्रहः ॥३७॥
कदाचिद्दैवयोगेन ब्रह्मतीर्थे जलं पपौ । ज्येष्ठकृष्णाष्टमीयोगे दिनेऽम्भसि निमज्जितः ॥३८॥
ब्रह्मतीर्थे जले स्नात्वा स तत्पापैर्विमोचितः । त्रिकूटाद्रिं समारुह्य लिङ्गञ्च पाणिना स्पृशन् ॥३९॥
अजहात्तत्तनुं सोऽत्र लिङ्गस्पर्शनपुण्यतः । दिव्याङ्गोऽभूच्च निष्पापस्त्र्यक्षो डमरुशूलधृक् ॥४०॥
तस्मिन्नवसरे दूता रुद्रप्रचोदिता इह । सुरा ययुर्मुदात्यन्तं पुष्पकैर्यानपाणयः ॥४१॥
तं तद्याने समास्थाय निन्युः शिवपुरं हि ते । साधु साध्विति चादृत्य रुद्रकन्याप्रसेवितम् ॥४२॥
स एव ह्यभवद्विप्र रुद्रपार्श्वचरोऽनिशम् । प्रमथानां गरिष्ठोऽसौ महादेवप्रियः परः ॥४३॥
भूयो गच्छ विरूपाक्ष दूरे चेतः[१०] त्रियोजने । उद्दारकेश्वरस्तत्रोत्तरे कनखलान्तिके ॥४४॥
धर्मगङ्गा परा तत्र स्वच्छा चोवाह सन्ततम् । विष्णोर्घर्मात्समुद्भूता जाते युद्धे[११] सुरैः सह ॥४५॥

व्याघ्राचले तं हरमादरेण[१२] सम्पूजयार्याऽऽशु विरूपनेत्र ।
प्रलप्स्यसे त्वं प्रवरञ्च नूनमुदारबुद्धिञ्च कठोरलभ्याम् ॥४६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
ब्रह्मतीर्थनटारम्भेश्वरयोर्माहात्म्यं नाम पञ्चोत्तरशततमोऽध्यायः ॥१०५॥

केही समयपछि ती ब्राह्मण मरेर जङ्गलमा हिँड्ने पशुयोनिमा जन्म लिन पुगे । प्रत्येक जन्ममा बाँदर भएर ती ब्राह्मण साठी हजार वर्षसम्म डरलाग्दो जङ्गलमा बाम्बार घुमिरहेका थिए । प्रतिग्रहबाट आर्जन गरेको सम्पत्ति अरुलाई नदिएको हुँदा त्यसै पापले ग्रस्त शरीर भएका ती ब्राह्मण भोक, प्यास र ठण्डीले पीडित भएर बारम्बार जङ्गलमा घुम्दथे ॥३५–३७॥

कुनै दिन दैवसंयोगले ती ब्राह्मणले ब्रह्मतीर्थमा गएर पानी पिए । ज्येष्ठकृष्ण अष्टमीका दिन तिनले त्यहाँ स्नान गरे ॥३८॥ ब्रह्मतीर्थको जलमा स्नान गरेर ती पापबाट मुक्त भए । त्यसपछि त्रिकूटाचलमा चढेर हातले भगवान् शङ्करको लिङ्गलाई स्पर्श गरे । त्यसै लिङ्गको स्पर्श गरेका पुण्यको प्रभावले गर्दा उनले त्यो शरीर छोडे र पापमुक्त भएको दिव्य शरीर लिए । तिनका तीन आँखा थिए र तिनले डमरु, त्रिशूल धारण गरेका थिए । त्यसैबेला भगवान् शङ्करको निर्देशन अनुसार दिव्य शिवजीका दूतहरू पुष्पक विमान लिएर अत्यन्त प्रसन्न हुँदै यहाँ आइपुगे । तिनलाई त्यस यानमा राखेर धन्यवाद दिँदै रुद्रकन्याद्वारा सुसेवित गराएर आदरपूर्वक उनीहरूले शिवपुरमा लगे ॥३८–४२॥

हे विरूपाक्ष ! तिनै ब्राह्मण प्रमथगणहरूमा श्रेष्ठ भएर भगवान् शङ्करका सधैँ पार्श्ववर्ती भएर रहेका छन् । उनी भगवान् शङ्करका अत्यन्त प्रिय छन् । हे विरूपाक्ष ! अत्र तिमी यहाँबाट तीन योजन टाढा रहेको कनखल पर्वतको नजिकै जाऊ । त्यहाँ उद्दालकेश्वर भगवान् बस्नुभएको छ । राक्षससँग लडाइँ गर्दा भगवान् विष्णुको शरीरबाट निस्किएको पसिनाबाट पैदा भएकी धर्मगङ्गा नाम गरेकी स्वच्छ नदी त्यहाँ निरन्तर बगिरहेकी छन् । हे विरूपाक्ष ! व्याघ्राचल नाम गरेको पर्वतमा गएर तिमी आदरपूर्वक भगवान् शङ्करको पूजा गर । तिमीले बडो कष्टबाट प्राप्त गर्न सकिने उत्तम वर बुद्धि पाउनेछौ ॥४३–४६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा ब्रह्मतीर्थ र नटारम्भेश्वरको माहात्म्यनामक
एकसय पाँचौं अध्याय पूरा भयो ।

---

१०. चातो दूरे, इति न.सं.पु.पाठः ।
११. युध्यमाने, इति न.सं.पु.पाठः ।
१२. हरमाद्रयन्वै, इति न.सं.पु.पाठः ।

षडुत्तरशततमोऽध्यायः

उद्दालकेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

ब्रह्मतीर्थे सकृत् स्नात्वा तल्लिङ्गपूजनाद् द्विज । चित्ताह्लादननिष्पापोऽभवत् दिव्येक्षणो[1] मुने ॥१॥
भूयोऽगमत्समं तेन विरूपाक्षो घटोद्भव । यत्रोद्दालेश्वरश्चाऽऽस्ते व्याघ्रवद्गिरिशेखरे ॥२॥
माघासितद्वितीयायां रुद्रकुण्डजलाप्लुतः । अपूपुजद्धि तल्लिङ्गं भक्तिभावेन चाऽर्हणैः ॥३॥
उषित्वा तन्निशायां स पप्रच्छ नेमुनिं पुनः । तल्लिङ्गस्य च माहात्म्यं नत्वा च दण्डवद् भुवि ॥४॥

विरूपाक्ष उवाच

मुनीश ! त्वत्प्रसादाच्च नृत्येश्वरप्रसंशनम् । तीर्थानाञ्च तन्महत्त्वञ्च श्रुतं विस्मयकारकम्[2] ॥५॥
भूयोऽहं श्रोतुमिच्छामि चैतल्लिङ्गप्रशंसनम् । केन प्रकाशितं पूर्वं वदैतन्मुनिपुङ्गव ॥६॥

नेमुनिरुवाच

उद्दालमुनिना पूर्वं स्थापितमेतदैश्वरम् । वैशाखस्यैव सङ्क्रान्त्यां विधिनाऽत्र मुदा द्विज ॥७॥
अर्चति स्म मुनिश्रेष्ठ चैतल्लिङ्गं तदर्हणैः । भक्त्या च विधिवद्वीरः स मुक्तश्चाऽत्र शाङ्करे ॥८॥
उद्दालमुनिना पूर्वं स्थापितमेतदैश्वरम् ॥९॥
शृणु वै तस्य माहात्म्यं मुक्तः स्थूलोदरः पुरा । आसीत्कश्यपपुत्रो हि नाम्ना स्थूलोदरः स्मृतः ॥१०॥
बलिष्ठः सर्वदैत्येभ्यो नागणयत् सुरासुरान् । अनिवेद्य स्वयं भुक्तं मिष्टान्नं तेन सर्वदा ॥११॥

अध्याय – १०६

उद्दालकेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – एकपटक ब्रह्मतीर्थमा स्नान गरेर त्यहाँको लिङ्गको पूजा गर्नाले ती विरूपाक्ष अत्यन्त आनन्दित भएर पापबाट मुक्त भए र दिव्यदृष्टि पाए । हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर व्याघ्रवान् पर्वतको शिखरमा रहेको उद्दालकेश्वर भगवान्को नजिकै गए । माघकृष्ण द्वितीयाका दिन रुद्रकुण्डको जलमा स्नान गरेर विभिन्न पूजासामग्रीद्वारा उनले त्यस लिङ्गको पूजा गरे । राति जाग्राम बसेर उनले नेमुनिसित फेरि भूमिमा दण्डवत् लम्पसार पर्दै नमस्कार गरेर त्यस लिङ्गको महत्त्व सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनीश्वर ! हजुरको कृपाबाट मैले नृत्येश्वर भगवान्को र तीर्थको अत्यन्त अद्भुत महिमा सुनें, अब म यस लिङ्गको माहात्म्य सुन्न चाहन्छु । यसलाई अघि कसले प्रकाशित गर्‍यो ? हे मुनिश्रेष्ठ ! यो मलाई बताउनुहोस् ॥५ –६॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि उद्दाल नाम गरेका ऋषिले वैशाख सङ्क्रान्तिका दिन हर्षोल्लासका साथ यस ठाउँमा भगवान् शङ्करको यो लिङ्ग स्थापना गरेका थिए । ती मुनिश्रेष्ठले पूजासामग्री लिएर भक्तिपूर्वक यस लिङ्गको आराधना गरे । त्यसैले गर्दा ती वीर शङ्करमा गएर लीन भई मुक्त भए । अघि उद्दाल नाम गरेका ऋषिले यी भगवान्लाई स्थापना गरेका हुन् । तिनको माहात्म्य सुन । अघि उनको आराधना गरेर स्थूलोदर नाम गरेका व्यक्ति मुक्त भएका थिए ॥७–९½॥

स्थूलोदर नामले प्रसिद्ध कश्यपको छोरो थियो । ऊ सबै दैत्यभन्दा बलियो थियो । देवता र राक्षसहरूलाई ऊ गन्दैनथ्यो । आफ्ना मान्यजन र नोकरहरूलाई समेत नदिईकन ऊ मीठो खाने कुरा सधैं खाने गर्थ्यो । त्यसैले ऊ कुक्षिम्भर अर्थात् आफ्नो मात्र पेट पाल्ने भयो ॥१०–११॥

---

१. .....निष्पापश्चाभूद्दिव्येक्षणः, इति न.सं.पु.पाठः ॥ २. तथैवञ्च ह्यत्यद्भुतं श्रुतं विभो, इति न.सं.पु.पाठः ।

ज्येष्ठेभ्यश्चैव भृत्येभ्यस्तस्मात्कुक्षिम्भरोऽभवत्। तांस्तान्प्रलोभयन्नित्यं मिष्टान्नं भुक्तवान्सदा ॥१२॥
स्थूलोदरोऽभवत्सोऽपि बलीयांश्च कदाचन[३]। ततो मानसजैर्दोषैः कृशाङ्गः सोऽभवत्पुनः ॥१३॥
स्थूलोदरः शुष्कतनु[४]र्व्याधिपीडितविग्रहः। नारदस्य मुखाच्छ्रुत्वा सोऽत्रैव प्राप्तवान् द्विज ॥१४॥
गोपालेश्वरकामोऽपि प्रेक्ष्यैनमादरान्मुदा[५]। पूजयंश्च मुदा भक्त्या चोद्दालेशं समर्हणैः ॥१५॥
तपश्चकार चाऽत्राऽसौ द्वादशाब्दं भृशं द्विज। ततो महाबली दैत्यः सोऽभूत्[६] पूर्वचतुर्गुणः ॥१६॥
आत्मना स तदा मेने वरं लब्ध्वा कृतार्थताम्। लब्ध्वा तस्माद्वरं दैत्यः स्थूलोदरो महाबली ॥१७॥
पूर्ववैरञ्च संस्मृत्य हतान् दैत्यांश्च विष्णुना। विष्णुमावाहयच्चाऽत्र योद्धुं तेन समं तदा ॥१८॥
पूर्ववैररुषाविष्टः संस्मृत्य दानवान् हतान्[७]। युयोध विष्णुना सार्द्धं स्थूलोदरो भृशं द्विज ॥१९॥
तोमरैः परिघैर्बाणैः प्राहरत् स पुनः पुनः[८]। पूर्ववैरं स संस्मृत्य चाकर्ण्यमुद्धतैः शरैः ॥२०॥
गोपालस्याऽन्तमुद्दिश्य जघान लघुहस्तवान्। निचखान ह्युरोदेशे गोपालस्य सदा नवैः ॥२१॥
भल्लैस्तीक्ष्णमुखैर्बाणैर्जलौकाभिरिवाऽङ्गके। शार्ङ्गञ्चैव समुत्सृज्य सुदर्शनं समाददे ॥२२॥
गोपालश्च रुषाऽऽविष्टस्तदन्तिकं समाचरत्। गोपालोऽसौ ततः शीघ्रं समक्षिपत्सुदर्शनम् ॥२३॥
तस्य ग्रीवां समुद्दिश्य सूर्यप्रतिमतैजसम्। विद्योतयन् दिशः सर्वाः समागतं सुदर्शनम् ॥२४॥
उद्दालेशस्तमुत्प्रेक्ष्य पाशुपतास्त्रमक्षिपत्। ततः पाशुपतास्त्रं तं रक्षति स्म समन्ततः ॥२५॥
स्थूलोदरान्तिकं दिक्षु परिभ्रम्य द्रुतं मुहुः। तदस्त्रसंवृते चाऽभून्निष्प्रयत्नं सुदर्शनम् ॥२६॥
प्रत्यागतं हरेः पाणौ त्यक्त्वा स्थूलोदरं द्विज। घर्मः सुस्राव देहाच्च विष्णोः श्रमातुरस्य च ॥२७॥
उवाह पतति तस्मिन् नदीभूता सुनिर्मला। आविर्भूतस्ततो रुद्रः प्रत्यागते सुदर्शने ॥२८॥
व्याचष्टे वचनं तस्मै वरं दातुं तदा विभुः।

मान्यजन तथा भृत्यहरूलाई लोभ देखाएर ऊ सधैँ मिठाइ खाने गर्थ्यो। त्यसैले गर्दा उसको पेट अत्यन्त ठूलो भयो। केही समय बलियो मोटेघाटे देखिए पनि त्यसपछि भने मनमा भएका दोषले गर्दा ऊ क्रमशः दुब्लाउँदै गयो। पेट ठूलो भए तापनि रोगले गर्दा शरीर सुकेर गयो। नारदको वचन सुनेर त्यसै ठाउँमा आयो ॥१२-१४॥

हे विरूपाक्ष ! ऊ गोपालेश्वर जाने इच्छा हुँदाहुँदै पनि त्यसले त्यहाँ भक्तिपूर्वक विभिन्न पूजासामग्रीहरू लिएर उद्दारेश्वर भगवान्को पूजा गर्‍यो। बाह्र वर्षसम्म यसले खूबसित तपस्या गर्‍यो। त्यसपछि त्यो दैत्य पहिलेभन्दा चार गुणा बलियो भयो। त्यसले वर प्राप्त गरेर आफूलाई कृतार्थ भएको ठान्यो। उद्दालेश्वर भगवान्बाट वर प्राप्त गरेर महाबली स्थूलोदर त्यस राक्षसले विष्णुद्वारा मारिएका दैत्य र पुरानो वैरभावलाई सम्झियो। पुरानो वैरभावले युक्त भएको त्यस दानवले अघि दानवलाई मार्ने विष्णुसित लड्नका लागि विष्णुलाई यसै ठाउँमा आवाहन गर्‍यो ॥१५-१८॥

हे विरूपाक्ष ! पुराने इबी र रीसको आवेगमा परेको त्यो स्थूलोदर नाम गरेको दैत्यले भाला, फर्सा र बाणले बारम्बार हिर्काएर विष्णुसित लड्न थाल्यो। पुरानो वैरभावलाई सम्झेर त्यस दैत्यले कानसम्म बाण खिंचेर छिटेछिटे हात चलाई भगवान् विष्णुको हृदय ताकेर हान्यो। त्यसले भगवान् विष्णुको छातीमा भर्खर उद्याएका भाला र तीखा बाणहरू शरीरमा जुकाझैँ गरी छाड्यो ॥१९-२१॥

भगवान् विष्णुले पनि रिसाएर शार्ङ्ग धनु छाड्नुभयो र उसलाई लक्ष्य गरेर फ्याँक्न सुदर्शन चक्र लिनुभयो। भगवान् विष्णुले तुरुन्त त्यसको घाँटी ताकेर सूर्यजस्तै तेज भएको सुदर्शन चक्र छोड्नुभयो। त्यसपछि सबै दिशालाई उज्यालो पार्दै आउन लागेको सुदर्शनलाई देखेर उद्दालेश्वर भगवान्ले त्यसमाथि पाशुपतास्त्र प्रहार गर्नुभयो। त्यसपछि पाशुपतास्त्रले बारम्बार घुमेर चारैतिरबाट स्थूलोदरको रक्षा गर्‍यो। त्यस अस्त्रको अगाडि सुदर्शन चक्र निष्फल भयो। हे विरूपाक्ष ! त्यसपछि स्थूलोदरलाई छोडेर सुदर्शन चक्र भगवान्को हातमा आयो ॥२२-२६॥

परिश्रमले थाकेका विष्णुको शरीरबाट पसिना झर्‍यो। त्यसै पसिनाबाट सफा जल भएकी नदी बगिन्। सुदर्शन गएपछि भगवान् शङ्कर प्रकट हुनुभयो र त्यसलाई वर दिनका निमित्त उहाँले भन्नुभयो ॥२७-२८½॥

---

३. कञ्चिकाल बलीयसः, इति न.सं.पु.पाठः।
४. स्थूलोदरतनुः शुष्कः, इति न.सं.पु.पाठः।
५. प्रेक्ष्यैनमाद्रयन्मुदा, इति न.सं.पु.पाठः।
६. महाबलो दैत्यश्चाभूत्, इति न.सं.पु.पाठः।
७. प्राग्घातदानवेन च, इति न.सं.पु.पाठः।
८. प्रहारयत्पुनः पुनः, इति न.सं.पु.पाठः।

उद्दालेश्वर उवाच

स्थूलोदर वरं दास्ये शृणु तच्च वदामि ते ॥२९॥
त्वया चिरं यतस्तप्तं दीर्घञ्चानन्यचेतसा[९] । अद्यप्रभृति दैत्यानां सुराणाञ्च तथैव हि ॥३०॥
यक्षोरगपिशाचानां श्रेष्ठो भवामरो भव । मम पार्श्वचरो नित्यं भव प्रमथनायकः ॥३१॥
स्वेच्छागतिः पराबाधो सेवसे मां विरन्तरम्[१०] ।

नेमुनिरुवाच

इत्युक्त्वाऽन्तर्दधे रुद्रो विमानमानयंस्तदा ॥३२॥
आययुः शिवदूता वै तदाज्ञयेह सांप्रतम् । ततो देवगणा व्योम्नो ववृषुः[११] पुष्पसन्ततिम् ॥३३॥
प्रणेदुर्गीतवाद्यानि भेरीमृदङ्गझर्झरैः । ते तमास्थाय तद्याने निन्युः शिवपुरं परम् ॥३४॥
गीतवाद्यमहोल्लासै रुद्रकन्याप्रसेवितम् । स्थूलोदरो द्विजाद्यापि रुद्रस्यानुचरोऽभवत् ॥३५॥
सर्वभयं परित्यज्य रुद्रवद्विचरन्सदा । एतत्ते वर्णितं विप्र ! चोद्दालेशप्रशंसनम् ॥३६॥
संस्थापितोऽपि रुद्रोऽसौ स्वयम्भूवत्पराक्रमी । भूयो गच्छ विरूपाक्ष ! चोत्तरस्यामतो[१२] दिशि ॥३७॥
गोपालेशः शिवो यत्र पश्चिमे वाग्वतीतटे ।
यज्ञाभिधाने ऋतुजे हि कुण्डे स्नात्वाऽऽशु लिङ्गञ्च समर्चयेशम् ।
सौभाग्यकामो बहुकष्टलभ्यं लभस्व भाग्यञ्च विरूपनेत्र ॥३८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायामुद्दालकेश्वरमाहात्म्यं नाम षडुत्तरशततमोऽध्यायः ॥१०६॥

उद्दालकेश्वरले भन्नुभयो – हे स्थूलोदर ! म तिमीलाई वर दिन्छु, सुन – किनभने तिमीले मलाई एकचित्त भएर धेरै समयसम्म तपस्या गरेका छौ । आजदेखि तिमी दैत्य, देवता, यक्ष, सर्प र पिशाचहरूभन्दा पनि श्रेष्ठ बन, अमर बन । मेरो सधैं आसपासमा बस र प्रमथगणका नायक बन । इच्छा लागेको ठाउँमा तिमी जान सक्नेछौ, तिमीलाई कुनै पीडा हुनेछैन । हरबखत मेरो साथमा रहन पाउनेछौ ॥२९–३१॥

नेमुनिले भन्नुभयो – यति भनेर भगवान् शङ्कर अन्तर्धान हुनुभयो । शिवजीका दूतहरू भगवान् शङ्करको निर्देशन अनुसार विमान लिएर त्यहाँ आए । त्यसपछि देवताहरूले आकाशबाट फूलको वर्षा गरे, गीत गाए, कर्नाल, मादल, झ्याँझर आदि बाजाहरू बजाए । रुद्रका कन्याहरूद्वारा सुसेवित त्यस यानमा राखेर गीत, बाजा र उल्लासका साथ शिवका दूतहरूले उसलाई शिवपुरमा लगे ॥३४॥ आज स्थूलोदर सम्पूर्ण डरबाट मुक्त भएर भगवान् शङ्करजस्तै गरी हिँड्छ र भगवान् शङ्करको सेवक भएको छ ॥३२–३५॥

हे विरूपाक्ष ! मैले तिमीलाई उद्दालेश्वरको माहात्म्य बताएँ । यी स्थापना गरिएका भगवान् रुद्र पनि आफैंउत्पन्न भएका भगवान् रुद्रजस्तै पराक्रमी छन् । हे विरूपाक्ष ! अब जहाँ वाग्मतीको तटमा भगवान् गोपालेश्वर शिवजी रहनुभएको छ उत्तर दिशामा पर्ने त्यस ठाउँमा तिमी जाऊ । हे विरूपाक्ष ! यज्ञबाट उत्पन्न भएको यज्ञकुण्डमा स्नान गरेर फूर्तिसँग लिङ्गस्वरूप भएका महादेवलाई राम्ररी पूजा गर । सौभाग्यको चाहना राख्ने तिमीले धेरै परिश्रमबाट मात्र पाउन सकिने इच्छाअनुरूपको सौभाग्य अवश्य पाउनेछौ ॥३६–३८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा उद्दालेश्वरको माहात्म्यनामक
एकसय छैठौं अध्याय पूरा भयो ।

---

९. भूत्वा चानन्यमानस, इति न.सं.पु.पाठः ।
१०. मां सेवसि सन्ततम्, इति न.सं.पु.पाठः ।
११. ववर्षुः, इति न.सं.पु.पाठः ।
१२. चातो हि चोत्तरे, इति न.सं.पु.पाठः ।

सप्ताधिकशततमोऽध्यायः

गोपालव्याघ्रतीर्थ-गोपालेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

रुद्रकुण्डे ततः स्नात्वा विरूपाक्षो घटोद्भव। उदारधीरभूद् भूयो महाबलपराक्रमः ॥१॥
भूयोऽगमद्विरूपाक्ष ऋषिणाऽऽशु समन्ततः। गोपालाख्यः शिवो यत्र मर्कटाचलशेखरे ॥२॥
यज्ञकुण्डे पुनः स्नात्वा गोपालेशमपूपुजत्। प्रोषितवान्निशामेकां निराहारो जितेन्द्रियः ॥३॥
गोपालाख्ये महातीर्थे प्राक् सस्नौ स विरूपदृक्। ततोऽपूपुजद्धि तल्लिङ्गं तृतीयायां तपःसिते[1] ॥४॥
ततोऽपृच्छन्मुनिं विप्रो माहात्म्यं फलमेव च[2]। तीर्थयोश्चैव लिङ्गस्य भक्तिपूर्वं घटोद्भव ॥५॥

विरूपाक्ष उवाच

भगवन्मुनिशार्दूल ! ज्ञानचक्षुःप्रदायक। भूयोऽहं श्रोतुमिच्छामि चैतद् ब्रह्मविदांवर ॥६॥
कथमेतत्समुद्भूतं लिङ्गं त्रिदशपूजितम्। केन प्रकाशितं पूर्वं किं फलं पूजनाद् भवेत्[3] ॥७॥
तीर्थस्य चैव माहात्म्यं कुण्डस्य च विशेषतः। त्वद्दासायाऽधुना धीमन्तत्सर्वं वद मे विभो ॥८॥

नेमुनिरुवाच

हत्वा च दानवान् पूर्वं विष्णुः किल्विषवानभूत्। अनागसस्तथा कांश्चिद्धत्वा च योद्धुमागतान् ॥९॥
तद्दूषणप्रशान्त्यर्थं तीर्थयात्राञ्च सोऽकरोत्। परिभ्रम्य रसां सर्वामत्रैव प्राप्तवान् विभुः ॥१०॥
गोपदी च नदी पुण्या वाग्वती सुरपूजिता। तयोश्च सङ्गमे पुण्ये गोपालतीर्थमीरितम् ॥११॥

अध्याय - १०७

गोपालव्याघ्रतीर्थ र गोपालेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले रुद्रकुण्डमा स्नान गरेकाले उनी बुद्धिमान्, बलवान् र ठूलो पराक्रमशाली बने। त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिई गोपाल नाम गरेका शिवजी बस्नुभएको मर्कटयचलको शिखरमा गए। अनि उनले यज्ञकुण्डमा स्नान गरेर गोपालेश्वर भगवान्को पूजा गरेर इन्द्रियविजयी भई भोकै बसेर एक रात बिताए। पहिले विरूपाक्षले गोपालेश्वर नामक महातीर्थमा स्नान गरे। त्यसपछि उनले माघशुक्ल तृतीयाका दिन त्यस लिङ्गको पूजा गरे। हे अगस्त्य मुनि ! त्यसपछि भक्तिपूर्वक ती ब्राह्मणले नक्र अर्थात् नेमुनिसँग त्यस तीर्थ र लिङ्गको माहात्म्यबारे प्रश्न गरे ॥१-५॥

विरूपाक्षले भने - ज्ञानचक्षु दिने हे मुनिश्रेष्ठ ! हे ब्रह्मवेत्ता ! हजुरसित म फेरि यो माहात्म्य सुन्न चाहन्छु। देवताद्वारा पूजित यस लिङ्गको उत्पत्ति कसरी भयो ? सर्वप्रथम कसले यसलाई प्रकाशमा ल्यायो ? यसको पूजाबाट के फल प्राप्त हुन्छ ? हे प्रभु ! हे बुद्धिमान् मुनि ! यो तीर्थ र विशेष गरी कुण्डको माहात्म्य हजुरको सेवक मलाई सबै बताइदिनुहोस् ॥६-८॥

नेमुनिले भन्नुभयो - अघि युद्धमा अग्रसर नभएका निरपराध केही दानवलाई मारेर भगवान् विष्णु पापी बन्नुभएको थियो। त्यही दोषलाई हटाउन भगवान् विष्णुले तीर्थयात्रा गर्नुभयो। त्यसै क्रममा सम्पूर्ण पृथ्वी घुमेर भगवान् विष्णु यसै ठाउँमा आइपुग्नुभयो। पवित्र गोपदी नदी र देवताद्वारा पूजित वाग्मती नदीको पवित्र सङ्गममा जुन तीर्थ छ त्यसलाई गोपालतीर्थ भनिएको छ ॥९-११॥

---

१. तपःसिततृतीयके, इति न.सं.पु.पाठः। २. नक्रमेव च, इति न.सं.पु.पाठः। ३. लभेत्, इति न.सं.पु.पाठः।

दर्दश तत्र विष्णुस्तां कामधेनुं सुरार्चिताम्। तत्र स्नात्वा व्रजन्तीं वै द्रुतं[४] चित्राद्रिशेखरे ॥१२॥
विष्णुस्तत्र पुनः सस्नौ विशुद्धात्मा च सन्ततम्। अत्राऽगमत् समारुह्य चैनामन्वेषयन् हि ताम् ॥१३॥
भूयोऽपश्यच्च तां विष्णुः स्रवन्तीं क्षीरमादरात्। इतस्ततस्तदा भूमौ धारापातमिवाऽम्बुदः ॥१४॥
भाद्रकृष्णचर्तुदश्यां प्रस्राव्य क्षीरमत्र सा। ददर्श चाऽगतं विष्णुं स्नात्वा च त्वरितं तदा ॥१५॥
सापि तिरोदधे व्योम्नि विष्णुं प्रेक्ष्य च साम्प्रतम्। व्याजहार पुनर्विष्णुः प्रेक्ष्य व्योम्नि गतां हि ताम् ॥१६॥
क्व यास्यसि वदार्ये मे कस्माद्वाऽऽशु पलायसे। त्वाञ्च द्रष्टुमिहाऽऽयातो यतः पूतो भवाम्यहम् ॥१७॥

कामधेनुरुवाच

मां गां पालय भो विष्णो सिद्धकामो भविष्यसि। तस्याश्च पालनाल्लोके गोपाल इति विश्रुतः ॥१८॥
तत्रैव दृश्यतां लिङ्गं मूर्तिञ्चैवावयोः शिवाम्। खनित्वा च मृदं विष्णो लोकेप्सितफलप्रदम् ॥१९॥
प्रतीच्यां सम्मतं स्थानं तव तत्र भविष्यति। सेवनाच्चैव लिङ्गस्य[५] लब्ध्वा वरं यदीप्सितम् ॥२०॥
सेविष्यसे यतो लिङ्गं तव नाम्ना भविष्यति। गोपालेश्वरमित्याख्यं लोकोऽनिशं वदिष्यति ॥२१॥

नेमुनिरुवाच

आकर्ण्य तद्वचो विष्णुश्चखान मृत्तिकां तदा। अपश्यत्स महल्लिङ्गं सद्योभूतं महाप्रभुम् ॥२२॥
आनर्च विधिवल्लिङ्गं विष्णुर्भक्तिपुरस्सरम्। तुष्टाव सहसा रुद्रं परिक्रम्य पुनः पुनः ॥२३॥

भगवान् विष्णुले देवताद्वारा पूजित कामधेनुलाई त्यस तीर्थमा स्नान गरेर चित्रपर्वततिर जान लागेको देख्नुभयो। भगवान् विष्णुले फेरि त्यहाँ बारम्बार स्नान गर्नुभयो र आत्मालाई शुद्ध पार्नुभयो। त्यसपछि उहाँ ती कामधेनु गाईलाई खोज्दै चित्रपर्वतमा चढेर यहाँ आउनुभयो। जसरी मेघले मुसलधारे पानी वर्षा गर्छ त्यसरी नै यताउति दूध झार्दै हिँडेकी ती गाईलाई श्रद्धासित भगवान् विष्णुले हेर्नुभयो। भाद्रकृष्ण चतुर्दशीका दिन दूध चुहाउन लागेकी कामधेनुले स्नान गरेर छिटो-छिटो आउन लागेका विष्णुलाई देखिन् ॥१२-१५॥

विष्णुलाई देख्नासाथ कामधेनु पनि तुरुन्त आकाशमा विलीन भइन्। विष्णुले पनि आकाशमा जान लागेकी कामधेनुलाई देखेर भन्नुभयो। हे आर्ये ! तिमी कता जाँदैछ्यौ ? मलाई भन। के कारणले छिटो-छिटो भाग्दैछ्यौ ? पवित्र हुन्छु भन्ने भावनाले म तिम्रो दर्शन गर्न आएको छु ॥१६-१७॥

कामधेनुले भनिन्- हे विष्णु ! गाईको पालना गर्नुहोस्। गाईलाई पालना गर्नुभयो भने तपाईं संसारमा गोपाल नामले प्रसिद्ध हुनुहुनेछ। हे विष्णु ! त्यहाँ रहेको माटोलाई खन्नुहोस्। त्यसपछि ईप्सित फल दिन सक्ने कल्याणकारी शिवजीको लिङ्ग र मेरो मूर्ति भेट्नुहुनेछ। अनि त्यस लिङ्गको सेवा गर्नुहोस्, आफूले चाहेको वर पाउनुहुनेछ। त्यसदेखि पश्चिमपट्टि तपाईंको निवासस्थल हुनेछ। तपाईंले शिवलिङ्गको आराधना गरेपछि यस शिवलिङ्गलाई दुनियाँले सधैं गोपालेश्वर नामले पुकार्नेछन् ॥१८-२१॥

नेमुनिले भन्नुभयो- त्यो कुरा सुनेर विष्णुले त्यहाँको माटो खन्नुभयो। खन्दै जाँदा त्यहाँबाट अत्यन्त तेजस्वी ठूलो शिवजीको लिङ्ग भेटियो। त्यसपछि विष्णुले भक्तिका साथ विधिपूर्वक त्यस लिङ्गको पूजा गर्नुभयो र बारम्बार परिक्रमा गर्दै अनेक तरहले स्तुति गर्नुभयो ॥२२ -२३॥

---

४. एवम्, इति न.सं.पु.पाठः। ५. सेवयंश्चैव तल्लिङ्गम्, इति न.सं.पु.पाठः।

विष्णुरुवाच

नमो रुद्राय रौद्राय रौद्रैनसो विनाशिने। जगतां कालरूपाय कालिकापतये नमः ॥२४॥
संवर्त्तकाय कालाय कालाग्निभीषणाय च। सङ्कर्षिण्यम्बिके देवि ! कालशक्ते नमोऽस्तु ते ॥२५॥
प्रपालयंस्तदा तां गां मन्त्रैः पञ्चोपचारकैः। ततो यज्ञञ्चकाराऽसौ रुद्रहेतोर्महोत्सवैः ॥२६॥
अजुहोच्च हविर्वह्नौ[६] तन्मत्रैश्च प्रपूरितम्। आवाहयत्ततो गङ्गां स्नपनाय शिवस्य च ॥२७॥
त्वमिहाऽऽगच्छ हे गङ्गे चेत्युक्त्वा च तदा हरिः। प्रादुर्भूता ततो गङ्गा यज्ञकुण्डाच्छिवान्तिके ॥२८॥
यस्माच्च यज्ञगङ्गेति प्रख्याता भुवि दुर्ल्लभा। भूयोऽपूजत्तदा विष्णुरेतल्लिङ्गञ्च तज्जलैः ॥२९॥
प्रादुर्भूतः ततो रुद्रः[७] कालानलसमप्रभः। सर्वायुधसमुपेतः सर्वलोकाभयप्रदः ॥३०॥
दधानः सव्यके शक्तिं कालसङ्कर्षिणीं पराम्। व्यक्तशक्तियुतो रुद्र उवाच श्रीहरिं खलु ॥३१॥

गोपालेश्वर उवाच

तुष्टोऽहं ते हरे भक्त्या चैतज्जलैर्विशेषतः। अपीयमावयोर्मूर्त्तिस्तव नाम्ना भविष्यति ॥३२॥
गोपालेश्वर इत्यार्य यो वदिष्यति सन्ततम्। विमुक्तः सर्वपापेभ्यो मल्लोकं स गमिष्यति ॥३३॥
पश्यति य इहाऽऽगत्य त्वन्मूर्त्यां मिश्रितं हि माम्। तत्ततनुं परित्यज्य प्रमथनायको भवेत् ॥३४॥
गच्छ गोपाल ! मद्वाक्यात्प्रतीच्याञ्चैव दिश्यतः। ऋक्षवत्पर्वतस्याधः तत्र तिष्ठ हरे चिरम् ॥३५॥

विष्णुले भन्नुभयो – डरलाग्दा पापहरूलाई पनि नाश गर्ने भयानक स्वरूप भएका रुद्रलाई नमस्कार छ। संसारका काल भएका कालिकाका पतिलाई नमस्कार छ। कालाग्निजस्तै डरलाग्दा प्रलयकालीन काललाई नमस्कार छ। भक्तहरूको दुःखलाई खिच्ने हे अम्बिका देवी ! कालकी शक्ति भएकी हजुरलाई नमस्कार छ। त्यसपछि भगवान् विष्णुले ती गाई र पृथ्वीको रक्षा गर्नुभयो। अनेक किसिमका मन्त्र उच्चारण गर्दै उहाँले पञ्चोपचार विधिले शिवजीको पूजा गर्नुभयो। शिवजीलाई प्रसन्न बनाउन ठूलो उत्सव गर्दै यज्ञ गर्नुभयो। उहाँले मन्त्रोच्चारणपूर्वक अग्निमा हवन गर्नुभयो। त्यसपछि शिवजीलाई स्नान गराउनका लागि गङ्गाजीको आवाहन गर्नुभयो ॥२४–२७॥

हे गङ्गे ! हजुर यहाँ आउनुहोस् भनेर भगवान् विष्णुले भनेपछि यज्ञकुण्डबाट शिवजीको नजिकै गङ्गा उत्पन्न हुनुभयो।यसैले पृथ्वीमा दुर्लभ ती गङ्गा यज्ञगङ्गाको नामले प्रसिद्ध हुनुभयो। फेरि भगवान् विष्णुले यज्ञगङ्गाको जलले यस लिङ्गको पूजा गर्नुभयो। त्यसपछि सम्पूर्ण हतियारले सुसज्जित भएर सम्पूर्ण प्राणीहरूको मनमा भय उत्पन्न गर्दै प्रलयकालीन अग्निजस्तो कान्ति भएका भगवान् रुद्र प्रकट हुनुभयो। बायाँतिर कालसङ्कर्षिणी (काललाई पनि खिचेर ल्याउन सक्ने क्षमता भएकी) शक्तिलाई धारण गरेर प्रकट हुनुभएका भगवान् शङ्करले विष्णुलाई भन्नुभयो ॥२८–३१॥

गोपालेश्वरले भन्नुभयो – हे विष्णु ! तिम्रो भक्ति र विशेष गरी यो तीर्थको जलले गर्दा म अत्यन्त प्रसन्न भएँ, हामी दुबैको यो मूर्ति तिम्रो नाउँबाट प्रसिद्ध हुनेछ। हे आर्य ! जसले बारम्बार गोपालेश्वर भन्नेछ, त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त भएर मेरो लोकमा जानेछ। जो मानिसहरूले यहाँ आएर तपाईंको मूर्तिमा एकाकार भएको मेरो मूर्तिको दर्शन गर्नेछन्, तिनीहरूले आ–आफ्नो शरीर त्यागेपछि प्रमथगणका नायक हुन पाउनेछन्। हे गोपाल ! हे कृष्ण ! मेरो निर्देशन अनुसार तपाईं यहाँबाट पश्चिमतिर रहेको ऋक्षवान् पर्वतको फेदीमा गएर धेरै समयसम्म बस्नुहोस् ॥३२–३५॥

---

६. अजुहोद्धविषं वह्नौ, इति न.सं.पु.पाठः। ७. तत आविर्भवो रुद्रः, इति न.सं.पु.पाठः।

नेमुनिरुवाच

समाकर्ण्य वचो रुद्राद् गोपालस्त्वरितं ययौ। शिखरिण्युद्भवो यत्र तस्थौ तत्र मुदाऽन्वितः ॥३६॥
या स्वपादार्घ्यसम्भूता विष्णुस्मृताद्रिसम्भवा। सङ्गमे[८] विष्णुतीर्थाख्ये शिखरिणीसुगङ्गयोः ॥३७॥
हव्यकव्यार्चनं दानमक्षयं फलमश्नुते। देवासुरर्षिभिः सिद्धैर्नित्यमुपास्यते हरिः ॥३८॥
विष्णुतीर्थे च यः स्नात्वा विष्णुं गोपालरूपतः। प्रपश्यति मुदा भक्त्या विष्णुलोकं स गच्छति ॥३९॥
सङ्क्रान्त्यां पूणिमायां वा द्वादश्याञ्च विशेषतः। स्नातको विष्णुभक्तश्च विष्णुलोकं व्रजेत्परम् ॥४०॥
भूयः शृणु प्रवक्ष्यामि कश्चिन्मुक्तो द्विजाधमः। स्नात्वा गोपालतीर्थे च गोपालेश्वरदर्शनात् ॥४१॥
पूर्वजन्मविपाकेन सर्वाचारोऽभवद् द्विजः। ब्राह्मणो जातिमात्रेण क्रियाचाण्डालसन्निभः ॥४२॥
लोकैः स्वजातिभिस्त्यक्तः प्राकृतोऽसत्प्रतिग्रहात्। चौरवृत्तिं समासाद्य काञ्चीपुराद्विनिर्ययौ ॥४३॥
वनाद् वनं भ्रमन् देशान्[९] परद्रव्याण्युपाहरन्। अत्रैव प्राप्तवाञ्चौरो विलङ्घ्य पर्वतान् बहून् ॥४४॥
शिखरिणी नदी पुण्या यज्ञगङ्गा च या स्मृता। तयोर्हि सङ्गमे व्याघ्रतीर्थं गोपदीतीरजम्[१०] ॥४५॥
जलं पातुं स तत्रैव तृषार्तो गतवान् द्विजः। ज्येष्ठे सितदशम्यां स चौर्येण भ्रमणश्रमः ॥४६॥
जलान्तरं समाविश्य पपौ तोयं यथेप्सितम्। व्याघ्रो ददर्श तञ्चौरं जलमध्ये ह्यधोमुखम् ॥४७॥
उत्पपात ततो व्याघ्रस्तमुद्दिश्य द्रुतं तदा। शनैः शनैर्विनिःसृत्य निकुञ्जाद् वृक्षमूलतः।
पादाभ्याञ्च तन्निपीड्य चाऽधिकोत्पतनाद् बलात् ॥४८॥

नेमुनिले भन्नुभयो– भगवान् शङ्करको यस्तो वचन सुनेर विष्णु तुरुन्त जानुभयो र जहाँ नदीको उत्पत्ति भएको थियो, त्यसै ठाउँमा आनन्दसित बस्नुभयो। अघि ब्रह्माले अर्घ्य दिँदा आफ्नो पाउबाट यज्ञगङ्गाबाट पैदा भएकी थिइन्। यज्ञगङ्गा र विष्णुले सम्झना गरेकी शिखरिणी नदीको सङ्गममा विष्णुतीर्थ छ। जसले त्यहाँ देवताका निमित्त होम र पितृलाई सिधादान र पूजा गर्छ त्यसले अक्षय फल पाउँछ। भगवान् विष्णु, देवता, राक्षस, ऋषि र सिद्धका साथमा रहेर सधैँ भगवान् शङ्करको उपासना गर्नुहुन्छ। जसले विष्णुतीर्थमा स्नान गरेर गोपालमूर्ति भगवान् विष्णुको प्रसन्न हुँदै भक्तिपूर्वक दर्शन गर्छ त्यो व्यक्ति विष्णुलोक जान्छ। सङ्क्रान्ति, पूर्णिमा र विशेष गरी द्वादशीका दिन जसले स्नान गर्छ त्यो व्यक्ति विष्णुको भक्त भएर उत्तम विष्णुको लोकमा जान्छ ॥३६–४०॥

फेरि म बताउँछु, सुन– गोपालतीर्थमा स्नान गरेर गोपालेश्वरको दर्शन गर्नाले पहिले कुनै अधम ब्राह्मण पनि मुक्त भएको थियो। पूर्वजन्मको दोषले गर्दा त्यो ब्राह्मण मनपरी आचरण गर्ने, जातिले मात्र ब्राह्मण र कामले चाण्डालजस्तै थियो। पशुजस्तो आचरण गर्दै नराम्रो प्रतिग्रह लिएको हुँदा दाजुभाइले उसलाई आफ्नो समुदायबाट निकालिदिए। चोरीको व्यवसाय अँगालेर त्यो ब्राह्मण काञ्चीपुरबाट बाहिर निस्कियो। त्यो ब्राह्मण विभिन्न वन तथा देशहरू घुम्दै अर्काको सम्पत्ति चोर्दै धेरै पर्वतहरू नाघेर यसै ठाउँमा आइपुग्यो ॥४१–४४॥

शिखरिणी नाम गरेकी पवित्र नदी र यज्ञगङ्गा नामले प्रसिद्ध नदी तथा गोपदी नदीको सङ्गममा व्याघ्रतीर्थ छ। चोरी गर्दै हिँड्दा थकित भएको त्यो ब्राह्मण ज्येष्ठशुक्ल दशमीका दिन तिर्खाले आत्तिँदै पानी पिउनका लागि त्यसै ठाउँमा आइपुग्यो। पानीभित्र पसेर उसले भरपेट पानी खायो। पानीभित्र ऊँधोमुख लगाएर बसेको त्यस चोरलाई बाघले देख्यो। झाडीको रुखको फेदबाट निस्किएर बिस्तारै बिस्तारै त्यो बाघले त्यस ब्राह्मणलाई वेगसित झम्टियो ॥४५–४८॥

---

८. समाजे, इति न.सं.पु.पाठः।
९. भ्रममाणो वनं देशान्, इति न.सं.पु.पाठः।
१०. व्याघ्रो गोपद्या सह विश्रुतः, इति न.सं.पु.पाठः।

गण्डशैले पपाताऽऽशु व्याघ्रशिरो भृशं दृढम्। ग्रावाघाताद्विभेदाऽऽशु व्याघ्रशिरस्तदा द्विज ॥४९॥
तदङ्घ्रिपीडनात्सोऽपि व्यसुर्व्याघ्रोऽपि चाऽत्र तौ। तत्र चौरश्च देहान्ते समुद्भूतो द्विजोत्तमः ॥५०॥
तत्तीर्थे मृत्युमापन्नो विरक्तोऽत्र समागमत्। व्याघ्रो देहान्तरे चाऽपि ह्यभून्नृपोत्तमो द्विज ॥५१॥
विरक्तश्च पुनः सोऽपि राज्यं न्यस्य मुदात्मजे। कोशलं स परित्यज्य चैकाकी निर्ययौ बहिः ॥५२॥
सोऽपि ब्रह्मपुरं त्यक्त्वा विनिर्ययौ सुनिर्जनः। कतिचिद्योजनान्ते च वने तौ मिलितौ पथि ॥५३॥
पप्रच्छतुर्मिथो भद्रं को भवान्को भवानिति। ददौ प्रत्युत्तरं तस्मै कोशलाधिपतिर्ह्यहम् ॥५४॥
ब्रह्मपुरनिवासोऽहं रामशर्मेति वेत्थ माम्। एवं सम्भाष्य भूयस्तौ विरक्तेनैव चेतसा ॥५५॥
राज्यं सुखञ्च गार्हस्थ्यं किं स्यादिति प्रमाणकौ[११]। एवं सम्भाषमाणौ तौ सखित्वेन गतौ वनम् ॥५६॥
परिभ्रम्य महीं तौ च तीर्थमेतत्[१२] समागतौ। सस्नतुस्तौ च तत्तीर्थे गोपालाख्ये विरूपदृक् ॥५७॥
चेतसा सुविरक्तेन ब्राह्मणकोशलाधिपौ। स्नात्वा तत्र मुदा तौ हि चोत्तीर्य त्वरितं जलात् ॥५८॥
प्राकृतं बुबुधाते स्वं स्वस्वजातिं पुनर्द्विज। ततो व्याघ्राख्यतीर्थे तौ स्नातुञ्च जग्मतुः खलु ॥५९॥
स्नात्वा तत्र हि विप्रोऽसौ व्याचष्ट वचनं तदा।

रामशर्मोवाच

अत्राऽहं भवता पूर्वमुत्पात्याशु[१३] विहिंसितः ॥६०॥
व्याघ्ररूपेण राजेन्द्र सत्यमेतद्वदाम्यहम्। अत्रैव मृत्युमापन्नः सुधीमानुद्भवाम्यहम् ॥६१॥
राजदेहं समाश्रित्य ज्ञायते भवता च किम्[१४]।

दुईवटा खुट्टाले त्यस ब्राह्मणलाई झापड दिएर खूबसित बलपूर्वक उफ्रिंदा त्यस बलियो बाघको शिर तुरुन्त थुम्कामा पछारिन पुग्यो। हे अगस्त्य मुनि ! ढुङ्गामा बजारिएको हुँदा बाघको शिर तुरुन्त दुई टुक्रा भयो। बाघको झम्याइले गर्दा त्यो ब्राह्मण पनि मऱ्यो। त्यो चोर मरेपछि अर्को जन्ममा उत्तम ब्राह्मण भएर जन्मियो। त्यसै तीर्थमा मरेको हुँदा ऊ विरक्त हुँदै यहाँ आयो ॥४९-५१॥

हे अगस्त्य मुनि ! त्यो बाघ पनि मरेपछि अर्को जुनीमा कोशलदेशको राजा भयो। पछि विरक्त भई उसले त्यो राज्य खुसीसाथ आफ्नो छोरालाई दियो। त्यसपछि ऊ कोशल देशलाई छोडेर एक्लै बाहिर निस्कियो। त्यो ब्राह्मण पनि ब्रह्मपुर छोडेर एक्लै बाहिर आयो। केही योजन पर गएपछि जङ्गलको बाटोमा ती दुईको भेट भयो। तपाईं को हुनुहुन्छ ? तपाईं को हुनुहुन्छ ? भनेर दुबैले आपसमा कुशल प्रश्न गरे। राजाले म कोशल देशको राजा हुँ भनी त्यसलाई जवाफ दिए। ब्राह्मणले म ब्रह्मपुरमा बस्दछु, मलाई रामशर्मा भनेर बुझ भने ॥५२-५५॥

यस्तै कुरा गर्दै फेरि तिनीहरू विरक्त भएर राज्यसुख, घरजम भनेको केही होइन भन्दै वैराग्यका कुरा गर्दै पृथ्वीमा घुम्दै त्यसै तीर्थमा आइपुगे। हे विरूपाक्ष ! विरक्त भएका ती दुई ब्राह्मणले कोशल देशको त्यस गोपालतीर्थमा स्नान गरे प्रसन्न भएर त्यहाँ स्नान गरी पानीबाट बाहिर निस्किएपछि उनीहरूलाई आ-आफ्नो पूर्वजातिको स्मरण भयो। त्यसपछि ती दुबै व्याघ्रतीर्थमा स्नान गर्न गए। स्नान गरिसकेपछि ब्राह्मणले बाघलाई भन्नलागे ॥५६-६०॥

रामशर्माले भने - पहिले यसै ठाउँमा तपाईंले मलाई बाघको रूप लिएर उफ्रिँदै मार्नुभएको थियो, म साँचो कुरा भन्दैछु। यसै ठाउँमा मरेको हुँदा म बुद्धिमान् भएर जन्मिएँ। तपाईंले राजा भएर जन्मिनुभयो। के यो कुरा तपाईंलाई थाहा छ ? ॥६१-६२॥

---

११. प्रमाणितौ, इति न.सं.पु.पाठः।
१२. ह्येतत्तीर्थम्, इति न.सं.पु.पाठः।
१३. पूर्वुत्पपाशु, इति न.सं.पु.पाठः।
१४. किं त्वयाऽधुना, इति न.सं.पु.पाठः।

कोशलेश उवाच

यदुक्तं भवता सत्यमेवमेव न संशयः ॥६२॥
व्याघ्ररूपं समाश्रित्य मया व्यापादितो भवान्। भूत्वा वैश्यः पुरा चाऽहं मांसं भक्षितवान्यतः ॥६३॥
तद्दोषेण मया व्याघ्रदेहो लब्धः सुकिल्विषः। एवं दैववशाद्विप्र ! भवान् हतः पुरा मया ॥६४॥
क्षमस्व मम चाऽऽगांसि दैवदोषो न गण्यते।

नेमुनिरुवाच

एवं सम्भाष्य तौ भूयो विरक्तौ चाऽत्र जग्मतुः ॥६५॥
एतद्दर्शतुर्लिङ्गं चित्रेण मनसा तदा ॥६६॥
अर्चतः स्म मुदा लिङ्गं यज्ञगङ्गाजलैः पुनः। उपोष्य तौ निशामेकां शिवशिवेति प्रोचतुः[१५] ॥६७॥
अष्टम्याञ्च निशीथिन्यां शिवदूताः समाययुः। ते च तौ सादरञ्चाऽत्र ह्यवदन्साधुसाध्विति ॥६८॥
समास्थाय च तौ याने निन्युः शिवपुरं हि ते। उद्धूय चामरैः शुभ्रैर्गीतवाद्यैः प्रसेव्य च ॥६९॥
अलभत द्विजो[१६] मोक्षं सर्वसुखं परात्परम्। सोऽपि नृपोऽभवच्छ्रेष्ठः प्रमथानां पुरोगमः ॥७०॥
एतत्ते वर्णितं लिङ्गं तीर्थानाञ्च प्रशंसनम्। भूयो व्रज प्रतीच्यां त्वं भक्तिभावैर्द्वियोजने ॥७१॥
आस्ते चम्पेश्वरं लिङ्गं वज्रपर्वतशेखरे। ब्रह्मतीर्थे ततः स्नात्वा सम्पूजय तमीश्वरम् ॥७२॥
माहात्म्यमेतत्कथितं मया ते गोपालरुद्रस्य परात्परञ्च।
तथैव जानीहि पुनर्महत्त्वं[१७] चम्पेश्वरस्याऽऽर्य विरूपनेत्र ॥७३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां गोपालेश्वरगोपालव्याघ्रतीर्थयोर्माहात्म्यं नाम सप्ताधिकशततमोऽध्यायः ॥१०७॥

कोशल देशका राजाले भने – मैले बाघको रूप लिएर तपाईंलाई मारेको हुँ भन्ने तपाईंले जुन कुरा भन्नुभयो, त्यो सत्य हो, यसमा सन्देह छैन। मैले अघि वैश्य भएर धेरै मासु खाएँ। त्यसै दोषले गर्दा पापी बाघको शरीर लिएर म जन्मिएँ। हे ब्राह्मण ! दैवले गर्दा अघि मैले तपाईंलाई मारेँ, मेरा अपराधहरू क्षमा गर्नुहोस्, दैवले गरेका दोषको गणना गर्नुहुँदैन ॥६२–६५॥

नेमुनिले भन्नुभयो – यति भनेर विरक्त स्वभावका ती दुबै हिँडेर यहाँ आए। उनीहरूले आश्चर्यचकित हुँदै यस लिङ्गको दर्शन गरे। प्रसन्न भएर यज्ञगङ्गाको जलले ती दुईले लिङ्गको पूजा गरे। रातभरि शिव-शिव भन्दै जाग्राम बसे। माघशुक्ल अष्टमीको राति शिवका दूतहरू त्यहाँ आए। उनीहरूले ती दुबैलाई सम्मान गर्दै स्यावासी दिए। सेता चमर हम्केर गीत गाउँदै, बाजा बजाउँदै उनीहरूले विमानमा राखेर ती दुबैलाई शिवलोक लगे ॥६६–६९॥

ब्राह्मणले उत्तमभन्दा पनि उत्तम सुखले युक्त भएको मोक्ष पदवी प्राप्त गरे। राजा पनि प्रमथगणका प्रमुख भए। मैले तिमीलाई लिङ्ग र तीर्थको यो माहात्म्य बताएँ। अब तिमी श्रद्धापूर्वक दुई योजन पश्चिमतिर रहेको क्षेत्रमा जाऊ। त्यहाँ वज्रपर्वतको शिखरमा चम्पेश्वर भगवान्‌को लिङ्ग छ। ब्रह्मतीर्थमा स्नान गरेर भगवान् चम्पेश्वरको पूजा गर ॥६९–७२॥

हे विरूपाक्ष ! मैले तिमीलाई गोपालेश्वर भगवान् शङ्करको उत्तमभन्दा पनि उत्तम माहात्म्य बताएँ। चम्पेश्वर भगवान्‌को पनि त्यस्तै माहात्म्य छ भन्ने कुरा बुझ ॥७३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा गोपालेश्वर गोपालव्याघ्रतीर्थको माहात्म्यनामक एकसय सातौं अध्याय पूरा भयो।

---

१५. वदन्तौ शिवशिवेति च, इति न.सं.पु.पाठः।
१६. अलभद् ब्राह्मणः, इति न.सं.पु.पाठः।
१७. पुनर्माहात्म्यम्, इति न.सं.पु.पाठः।

अष्टाधिकशततमोऽध्यायः

ब्रह्मतीर्थचम्पेश्वरयोर्महिमा

स्कन्द उवाच

स्नात्वा तीर्थेष्वसौ विप्रो गोपालेश्वरपूजनात्। पूर्वजातिपरिज्ञानमलभत विकिल्विषः ॥१॥
ततोऽगमद्विरूपाक्ष ऋषिणा तेन वै समम्। तत्तत्कथां समाधाय हृदि चित्रञ्च भावयन् ॥२॥
ब्रह्मतीर्थे स वै स्नात्वा चम्पेश्वरमपूपुजत्। जजाप तन्मनुं धीरः तन्मनस्को घटोद्भव ॥३॥
माघशुक्लस्य पञ्चम्यां लिङ्गमभ्यर्च्य वै निशि। विप्रस्तयोर्माहात्म्यञ्च पप्रच्छ नेमुनिं पुनः[1] ॥४॥

विरूपाक्ष उवाच

मुनीश ! त्वत्प्रसादाच्च गोपालेशप्रशंसनम्। तीर्थानाञ्च तथैवं हि विस्मयद[2] मया श्रुतम् ॥५॥
भूयोऽहं श्रोतुमिच्छामि चैतल्लिङ्गप्रशंसनम्। केन प्रकाशितं पूर्वं वदैतन्मुनिपुङ्गव ॥६॥

नेमुनिरुवाच

आसीद्बाणासुरः पूर्वमत्र राज्यञ्चकार सः। शोणिताख्या पुरी दिव्या चैतस्यां सुचिरं द्विज ॥७॥
तत्सेवकोऽसुरः कश्चित्सुबाहुर्नाम विश्रुतः। नित्यं पुष्पोपहारञ्च राज्ञे चकार सादरम् ॥८॥
स कदाचिद्दिने चाऽत्र ददर्श चम्पकङ्कुजम्। सकोटरञ्च शाखाढ्यं प्रफुल्लं स्वर्णचम्पकम् ॥९॥
आरुरोह तदा दैत्यस्तद्वृक्षं सहसा द्विज। पुष्पाण्यवचितुं राज्ञे सुबाहुर्बाणवल्लभः ॥१०॥
अवचित्यावचित्यार्याऽस्थापयत्पुष्पभाजने। तदा ह्यसौ च पुष्पाणि आरुरोह तरौ पुनः[3] ॥११॥
पुष्पभाण्डं समुद्धृत्य वृक्षादवततार सः। यावत् स नाऽऽगतो भूमौ पुष्पभाण्ड[4] व्यकम्पत ॥१२॥

अध्याय – १०८

ब्रह्मतीर्थ र चम्पेश्वरको महिमा

कार्तिक स्वामीले भन्नुभयो – विरूपाक्षले तीर्थहरूमा नुहाएर गोपालेश्वरको पूजा गरेको हुँदा यिनलाई पूर्वजन्मको ज्ञान भयो र पापबाट मुक्त भए। त्यसपछि विरूपाक्ष ती–ती कथाहरू मनमा सम्झँदै आश्चर्य मान्दै नेमुनिलाई साथमा लिएर हिँडे। हे अगस्त्य मुनि ! उनले ब्रह्मतीर्थमा स्नान गरेर चम्पेश्वर भगवान्को पूजा गरे। शिवजीमा मन लगाउँदै उहाँको मन्त्र जपे। माघशुक्ल पञ्चमीका दिन लिङ्गको पूजा गरिसकेपछि राति ती विरूपाक्षले नेमुनिलाई फेरि त्यो तीर्थ र लिङ्गको माहात्म्य सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनीश्वर ! हजुरको कृपाबाट मैले गोपालेश्वर तथा ती तीर्थहरूको अद्भुत माहात्म्य सुनें। म फेरि यस लिङ्गको माहात्म्य सुन्न चाहन्छु। हे मुनिश्रेष्ठ ! यस लिङ्गलाई कसले प्रकाशित गरेको थियो ? यो सबै मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – अघि बाणासुर नाम गरेको राक्षस थियो। उसले शोणित नाम गरेको दिव्य शहरमा धेरै समयसम्म राज्य गर्‍यो। उसको सेवक सुबाहु नाम गरेको कुनै राक्षस थियो। उसले राजालाई सधैं आदरपूर्वक फूलको उपहार चढाउँथ्यो। कुनै दिन उसले यस ठाउँमा आएर चाँपको रुख देख्यो। टेड्का, हाँगा र पुष्पले भरिपूर्ण चम्पकवृक्ष र सुवर्णमय चम्पकपुष्प पनि देख्यो। हे विरूपाक्ष ! बाणासुरको प्रिय सुबाहु नाम गरेको दैत्य अचानक यहाँ आएर फूल टिप्नका लागि त्यस रुखमा चढ्यो। रुखको हाँगामा चढेर त्यस राक्षसले बारम्बार फूलहरू टिप्दै भाँडामा राख्न थाल्यो। त्यो भाँडो बोकेर रुखबाट तल ओर्लियो। भुइँमा नआइपुग्दै त्यो फूल राखेको भाँडो हल्लियो ॥७–१२॥

---

१. ह्यपृच्छन्नेमुनिं पुनः, इति न.सं.पु.पाठः।
२. अत्यद्भुतम्, इति न.सं.पु.पाठः।
३. वृक्षशाखां रुहत्पुनः, इति न.सं.पु.पाठः।
४. यावन्नावगतो भूमौ पुष्पं भाण्डं व्यलोभयत्, इति न.सं.पु.पाठः।

तत्पुष्पाणि च सर्वाणि प्राविशन् कोटरे तदा। अमर्षैः पूरितो दैत्यः प्रेक्ष्य पुष्पाणि सर्वदा ॥१३॥
रिक्तहस्तो ह्यसौ नित्यमाययौ भवनं स्वकम्। द्विधा त्रिधा चतुर्धा च पञ्चधा च[५] पुनः पुनः ॥१४॥
एकदा दिवसे दैत्यः प्रेक्ष्य पुष्पाणि कोटरे। दोर्भ्यामुद्धृत्य तद्वृक्षमुच्चखान रुषा भृशम् ॥१५॥
निःक्षिप्य वृक्षकं तत्र लिङ्गोत्तमं ददर्श सः। वृक्षस्य कोटराधःस्थमेतन् मनोहरं परम् ॥१६॥
अव्यक्तं तेजसा लिङ्गं दीपशिखेव सा निशि। दिशो भाभिर्भासयच्च भानुमच्च जगद्यथा ॥१७॥
ततोऽस्पृशत्तदा दैत्यश्चैतल्लिङ्गं सुदर्शनम्। ज्ञानवानभवद् भूयो भक्त्या ननाम तन्मुहुः ॥१८॥
अम्बरादाययुर्दूता रुद्रानुशासनाद् द्रुतम्। कुसुमपाणयश्चात्र समानेतुं तमेव च ॥१९॥
ते तमास्थाय तद्याने निन्युस्तद् शिवसद्गृहम्। वैशाखकृष्णपक्षस्य चतुर्दश्याञ्च तद्दिने ॥२०॥
सिषेविरे[६] गणा रौद्राः संवृष्य पुष्पसन्ततिम्। गीतवाद्यप्रमोदैस्तं मृदङ्गतालझर्झरैः ॥२१॥
सैष रुद्रगणश्रेष्ठश्चाऽभूद् भूयो विरूपदृक्। सुबाहुश्च सदेहोऽसौ रुद्रस्यानुचरोऽनिशम् ॥२२॥
भूयो वक्ष्यामि माहात्म्यं ब्रह्मतीर्थस्य वै शृणु। एतस्य च विशेषेण पुराऽभवद्यथा द्विज ॥२३॥
आसीद्विप्रः पुरा वत्स ! कौत्सुको नाम विश्रुतः। सर्वाङ्गकुष्ठवांश्चाभूत्पुराकृतविपाकतः ॥२४॥
अगम्यागमनात्पूर्वं कुष्ठरोगेण विप्लुतः। गुदशिश्नस्फुट्यर्त्तोऽभूत्पत्याः सख्याश्च मैथुनात् ॥२५॥
क्वचिद्विप्रमुखाच्छ्रुत्वा तीर्थाटनं द्विजोऽकरोत्। अगमद्दिशि कौबेर्यां नेपालं गन्तुमीप्सया ॥२६॥
स्नातुञ्च वाग्वतीतीर्थे कौत्सुकोऽसौ शनैः शनैः। अत्रैव प्राप्तवान् विप्रः शैथिल्यगमनः पुनः ॥२७॥
चन्द्रोपलाच्च सम्भूता चन्द्रकान्तिनदी श्रुता। रत्नकान्तिनदी श्रेष्ठा रत्नसमुद्भवा यतः ॥२८॥
तयोर्योगेऽत्र पूर्वस्मिन् संस्नातं ब्रह्मणा मुदा। ब्रह्मतीर्थमिति ख्यातं तस्मात्तीर्थोत्तमोत्तमम् ॥२९॥

सबै फूलहरू टेड्काभित्र परे। यसरी सबै फूल हराएको देखेर त्यो दैत्य अत्यन्त रिसायो। त्यो राक्षस रित्तो हात लिएर सधैँ आफ्नो घरमा फर्कन्थ्यो। दुई-तीन-चार पटकसम्म फेरि पनि बारम्बार यस्तै भयो। एकदिन दैत्यले टेड्काभित्र फूलहरू देख्यो। त्यसपछि अत्यन्त रिसाएर दुई हातले समातेर त्यो रुख उखेल्यो। रुखलाई भुइँमा राखेर हेर्दा रुखको टेड्काभित्र पींधमा रहेको अत्यन्त राम्रो शिवलिङ्ग उसले देख्यो ॥१३-१६॥

तेजले स्पष्टसँग नदेखिने त्यो शिवलिङ्ग रातमा बत्तीको ज्वालाजस्तो देखिन्थ्यो। सूर्यले संसारलाई जस्तै आफ्नो तेजले दिशाहरूलाई नै उज्यालो पार्दथ्यो। त्यसपछि त्यस दैत्यले अत्यन्त सुन्दर त्यस लिङ्गलाई स्पर्श गऱ्यो। त्यो ज्ञानी भयो, अनि उसले शिवलिङ्गलाई भक्तिपूर्वक बारम्बार प्रणाम गऱ्यो। शिवजीको निर्देशन अनुसार शिवका दूतहरू पुष्पकविमान लिएर त्यस दैत्यलाई लैजानका लागि आकाशबाट तुरुन्त यहाँ आए। वैशाख कृष्णपक्ष चतुर्दशीका दिन शिवदूतहरूले त्यसलाई विमानमा राखेर शिवलोकमा लगे। शिवका गणहरूले फूलको वर्षा गरे, गीत, मादल, ताल, झ्याँझर आदि बाजा बजाएर त्यस दैत्यको सेवा गरे। त्यही सुबाहु शरीरैसित भगवान् शङ्करको सधैँ सेवक बन्न पुग्यो। ऊ शिवका गणहरूमध्ये माथिल्लो दर्जामा बस्न पुग्यो ॥१७-२२॥

हे विरूपाक्ष ! विशेष गरी अघि यस लिङ्ग र ब्रह्मतीर्थको माहात्म्य म फेरि बताउँछु, सुन। हे बाबु ! अघि कौत्सुक नाम गरेका कुनै ब्राह्मण थिए। पूर्वजन्ममा गरेका नराम्रा कृत्यले गर्दा उनका सम्पूर्ण अङ्ग कुष्ठरोगले ग्रस्त भएका थिए। अघि अगम्या स्त्रीलाई गमन गर्नाले यिनलाई कुष्ठरोग लागेको थियो। साथीका स्त्रीहरूसँग सङ्गम गर्दा यिनका पछाडिका फिला र लिङ्गमा खटिरा आएका थिए। त्यसैले यी आत्तिएका थिए। कुनै ब्राह्मणको मुखबाट तीर्थाटन गर्दा पापनाश हुने र रोग निको हुने कुरा थाहा पाएर ती ब्राह्मणले तीर्थयात्रा गरे। नेपाल जाने इच्छाले उनी उत्तर दिशातिर लागे। हिँड्दा-हिँड्दै थाकेका ती कौत्सुक ब्राह्मण विस्तार-विस्तार वाग्मतीतीर्थमा स्नान गर्न यहाँ आइपुगे ॥२३-२७॥

अघि ब्रह्माजीले स्नान गर्न भनी प्रसन्न हुँदै चन्द्रकान्त मणिबाट पैदा गरिएका चन्द्रकान्ति नदी र रत्नबाट पैदा गरिएकी रत्नकान्ति नदीको रचना गर्नुभएको थियो। ती दुईको सङ्गमस्थलमा ब्रह्माजीले प्रसन्न भएर स्नान गर्नुभयो। त्यसैले यसलाई सबै तीर्थमा उत्तमतीर्थ ब्रह्मतीर्थ भनियो ॥२८ -२९॥

---

५. ह्येवमेव, इति न.सं.पु.पाठः। ६. असेवयन्, इति न.सं.पु.पाठः।

संसस्नौ कौत्सुकश्चात्र भक्तिपूर्वं यथाविधि । कुशहस्तश्च सङ्कल्प्य कुष्ठरोगं विनाशितुम्[७] ॥३०॥
निमज्ज्योन्मज्य तोयेऽत्र ददर्श स्वतनुं द्विजः । तत्तद्रोगैर्विनिर्मुक्तां मुक्तकञ्चुमहिं यथा ॥३१॥
जमदग्निं ततोऽपश्यत्तपस्यन्तं तदाऽत्र वै । उपागमदसौ तस्य युवावस्थो हि कौत्सुकः ॥३२॥
प्रणम्य तं मुनिं भक्त्या पप्रच्छ मुक्तिहेतुकम् । ब्रह्मतीर्थे द्विज ! स्नानान्नीरोगो ज्ञानवान्मुनिः ॥३३॥

कौत्सुक उवाच

केनोपायेन वै देहं तारये दुःखसागरात् । इमं मलीमसैर्युक्तं सुखदुःखपरिप्लुतम् ॥३४॥
असार इह संसारः सारवान् वा प्रतीयते[८] । धर्मविवर्जितैर्लोकैः कथं मोक्ष्यामि तद्वद ॥३५॥

जमदग्निरुवाच

अस्त्युपायः स्वदेहस्य तारकश्चेह[९] संसृते । ज्ञानवतां विशेषेण न मूर्खाणां कदापि च ॥३६॥
अतश्चोर्ध्वं स्थले रम्ये चम्पेश्वरो विराजते । तस्मिन्मुक्तोऽसुरः कश्चिद् वृक्षमूलाग्रदर्शनात्[१०] ॥३७॥
तमाराधय विप्राद्य सद्यः कामं च प्राप्स्यसि[११] । षडक्षरैर्मुदा भक्त्या विनिद्रमुपवासतः[१२] ॥३८॥

नेमुनिरुवाच

स्नातस्तद्वचसा विप्रो हृष्टचेता हि साम्प्रतम्[१३] । तमर्चितुं ययौ तत्र यत्र चम्पेश्वरो द्विज ॥३९॥
लिङ्गं ददर्श विप्रोऽसौ दीपशिखाकृतिं शिवम् । भासयन्तं दिशो भाभिर्जगद्भानुं जगत्प्रभुम् ॥४०॥
साष्टाङ्गैश्च प्रणम्यादावेनमभ्यर्च्य वै पुनः । तुष्टाव च परिक्रम्य वाचा गद्गदया मुदा ॥४१॥

यी ब्राह्मणले यहाँ कुश हातमा लिएर कुष्ठरोगलाई नाश गर्नका निमित्त सङ्कल्प गर्दै भक्तिपूर्वक विधिअनुसार स्नान गरे । यस तीर्थको जलमा ती ब्राह्मणले खूबसित निमज्जन र उन्मज्जन गरेर स्नान गरे । त्यसले गर्दा काँचुली फेरेको सर्पजस्तै बनेर यिनको शरीर रोगबाट मुक्त भयो । ती कौत्सुक नाम गरेका युवक ब्राह्मणले त्यसबेला त्यहाँ तपस्या गर्न लागेका जमदग्नि ऋषिलाई देखे र उनको नजिकै गए । ब्रह्मतीर्थमा स्नान गर्नाले रोगबाट मुक्त भएर ज्ञानी र मुनि बनेका ती ब्राह्मणले भक्तिपूर्वक जमदग्नि मुनिलाई नमस्कार गरेर मुक्तिको उपाय सोधे ॥३०–३३॥

कौत्सुक ब्राह्मणले भने– कुन उपायबाट दुःखरूपी सुमद्रबाट पाप तथा सुख र दुःखले ग्रस्त भएको यो शरीरलाई तार्न सक्छु ? यो संसार साररहित छ । धर्म नभएका मानिसहरूले यसलाई सारजस्तो ठान्दछन् । त्यसलाई म कसरी त्याग्न सक्छु ? त्यो उपाय बताउनुहोस् ॥३४–३५॥

जमदग्निले भने – ज्ञानी मानिसहरूका निमित्त संसारबाट आफूलाई तार्ने उपाय छ, तर त्यो उपाय मूर्खका लागि कहिल्यै पनि उपलब्ध हुँदैन । यहाँभन्दा माथि राम्रो स्थलमा चम्पेश्वर भगवान् बस्नुभएको छ । त्यसै रुखको फेदमा उहाँको दर्शन पाएर अघि कुनै राक्षस मुक्त भएको थियो । हे ब्राह्मण ! छवटा अक्षर भएको शिवमन्त्र उच्चारण गर्दै उपवास बसी प्रसन्न भएर भक्तिपूर्वक जागरण तथा व्रत गरेर चम्पेश्वर भगवान्को आराधना गर । तिम्रो सबै इच्छा पूर्ण हुनेछ ॥३६–३८॥

नेमुनिले भन्नुभयो– तदनुसार नै ब्रह्मतीर्थमा स्नान गरेर हर्षित हुँदै चम्पेश्वर भगवान्को पूजा गर्न ती ब्राह्मण गए । ती ब्राह्मणले बत्तीको ज्वालाजस्तै तेजिलो सबै दिशाहरूलाई उज्यालो तुल्याउने, संसारका सूर्य र संसारका स्वामी भगवान् शिवको लिङ्ग दर्शन गरे ॥४०॥ पहिले उनले भगवान्लाई साष्टङ्ग दण्डवत् गरे, बारम्बार पूजा गरे, परिक्रमा गरे र खुसीले गद्गद भएर उहाँको स्तुति गरे ॥४०–४१॥

---

७. कुष्ठोपसर्गनाशितुम्, इति न.सं.पु.पाठः ।
८. असारमिह संसारं सारमिव प्रतीतिनम्, इति न.सं.पु.पाठः ।
९. तारणमिह, इति न.सं.पु.पाठः ।
१०. वृक्षमूलाप्रदर्शनात् निखन्य च, इति न.सं.पु.पाठः ।
११. लभिष्यति, इति न.सं.पु.पाठः ।
१२. विनिद्रेणोपवासतः, इति न.सं.पु.पाठः ।
१३. हर्षितवाँश्च सांप्रतम्, इति न.सं.पु.पाठः ।

ॐ नमः प्रणवाख्याय त्रिमात्राय च शूलिने। निरञ्जनाय देवाय सत्त्वानां पतये नमः ॥४२॥
तेजोरूपाय रुद्राय तेजसां पतये नमः। तेजोमयाय लिङ्गाय जीवलिङ्गेश ते नमः ॥४३॥
एवं स्तुत्वा तमीशानं तेजोलिङ्गञ्च कौत्सुकः। निराहारश्च तन्मन्त्री व्रतं कर्त्तुं मनो दधे ॥४४॥
मधोः कृष्णत्रयोदश्यां ब्रह्मतीर्थे जलाप्लुतः। तन्निशायाञ्च भक्त्या स जागृतवान् हरात्मकः ॥४५॥
व्यक्तीकृत्य तनुं लिङ्गाद्वरं तस्मै ददौ निशि। यद्वाञ्छितं हृदा मत्तस्तल्लभस्व द्रुतं प्रिय ![१४] ॥४६॥
एवं दत्त्वा वरं तस्मै लिङ्गे तिरोदधे विभुः। व्योमवाणीं नादयन्ती पुष्पवृष्टिर्बभूव हि[१५] ॥४७॥
यानहस्तास्तदा दूता रुद्राज्ञयाऽऽययुर्द्रुतम्। गीतवाद्यमहोल्लासै रुद्रयशः प्रगाय च ॥४८॥
प्रणिन्युः शिवलोकं तं ते दूताः चादरान्मुहुः[१६]। आस्थाय पुष्पके व्योम्नो लोकैः साध्विति कीर्तितम्[१७] ॥४९॥
अद्यापि देवताः स्थानं न मुञ्चन्ति कदाचन। तिष्ठन्ति सेवमानास्ते[१८] चैतल्लिङ्गं विरूपदृक् ॥५०॥
ब्रह्मतीर्थे हि यः स्नात्वा पश्यति चैवमादरात्[१९]। सर्वैनसा विनिर्मुक्तः शिवलोकं व्रजेत्सुखम् ॥५१॥
भूयो गच्छ विरूपाक्ष ! वारुण्यां दिश्यतोऽधुना। उन्मत्तेशो हि तत्राऽऽस्ते स्वर्णतीर्थेन वै सह ॥५२॥
क्रोशैकमात्रे च ततो विदूरे स्नात्वा द्रुतं तत्र वरे च तीर्थे।
संपूजय त्वं खलु तद्धि लिङ्गं यद्वाञ्छितार्थं प्रलभस्व नूनम्[२०] ॥५३॥

इति श्रीस्कन्दपुराणे हिमवतखण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां ब्रह्मतीर्थचम्पेश्वरयोर्माहात्म्यं नामाष्टाधिकशततमोऽध्यायः ॥१०८॥

तीन मात्राले युक्त, प्रणम नाम भएका त्रिशूलधारी भगवान्लाई नमस्कार छ। निरञ्जन, सबै प्राणीका मालिक भएका देवतालाई नमस्कार छ। तेजोरूप लिने तेजका मालिक रुद्रलाई नमस्कार छ। हे जीवका लिङ्गेश्वर ! तेजोमय हजुरको लिङ्गलाई नमस्कार छ। यसरी कौत्सुक ब्राह्मणले तेजोलिङ्गको रूप लिने ती शङ्करको स्तुति गरेर निराहार बसी उहाँको मन्त्र जप्दै व्रत गर्ने विचार गरे। वैशाखकृष्ण त्रयोदशीका दिन ब्रह्मतीर्थको जलमा स्नान गरेर राति शिवस्वरूप धारण गरी भक्तिपूर्वक उनी जाग्राम बसे। त्यसपछि मध्यरातमा भगवान् शङ्कर त्यसै लिङ्गबाट प्रकट हुनुभयो र हे भक्त ! तिम्रो हृदयले जे चाहेको छ, त्यो वर तुरुन्त मबाट लेऊ भनेर ती ब्राह्मणलाई वर दिनुभयो ॥४२-४६॥

यसरी आकाशबाट आवाज निकाल्दै भगवान् शङ्करले ती ब्राह्मणलाई वर दिएर त्यसै लिङ्गमा अन्तर्धान हुनुभयो अनि पुष्पवृष्टि भयो। त्यसपछि भगवान् शङ्करको निर्देशन अनुसार गीत गाउँदै, बाजा बजाउँदै र भगवान् शङ्करको महत्त्व गाउँदै शिवजीका दूतहरू यान लिएर तुरुन्त आए। दुनियाँले धन्यवाद दिएका ती ब्राह्मणलाई पुष्पक विमानमा राखेर ती शिवदूतहरूले बारम्बार सम्मान गर्दै आकाशबाट शिवलोक लगे। हे विरूपाक्ष ! आजसम्म पनि त्यस ठाउँलाई कहिल्यै देवताले छोडेका छैनन्, यस लिङ्गको सेवा गरेर उनीहरू यसै ठाउँमा बस्छन् ॥४७-५०॥

जसले ब्रह्मतीर्थमा स्नान गरेर श्रद्धाका साथ यो चम्पकेश्वर शिवलिङ्गको दर्शन गर्छ त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त भएर आनन्दसित शिवलोक जान्छ। हे विरूपाक्ष ! अब तिमी यहाँबाट पश्चिम दिशातिर जाऊ। यहाँ स्वर्णतीर्थको नजिकै उन्मत्तेश्वर भगवान् रहनुभएको छ ॥५१-५२॥

एक कोस टाढा रहेको त्यस उत्तम तीर्थमा स्नान गरेर राम्रोसित त्यहाँ रहेको शिवलिङ्गको पूजा गर। तिमी आफूले चाहेजस्तो फल प्राप्त गर्न सक्नेछौ ॥५३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवतखण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा ब्रह्मतीर्थ र चम्पेश्वरको माहात्म्यनामक एकसय आठौं अध्याय पूरा भयो।

---

१४. मत्तस्तल्लभ्याद्भक्त ते द्रुतम्, इति न.सं.पु.पाठः।
१५. ववर्ष पुष्पवृष्टिश्च व्योम्नो वाणीं निनादयन्, इति न.सं.पु.पाठः॥
१६. चाद्रयन्मुहुः, इति न.सं.पु.पाठः।
१७. वादिनम्, इति न.सं.पु.पाठः।
१८. सेवयन्त्र, इति न.सं.पु.पाठः।
१९. चैवमाद्रयन्, इति न.सं.पु.पाठः।
२०. प्रलभेद्भवांस्तत्, इति न.सं.पु.पाठः।

नवाधिकशततमोऽध्यायः

सुवर्णतीर्थोन्मत्तेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

ब्रह्मतीर्थे पुनः स्नात्वा चम्पकेशमपूपुजत्। विंशजन्मार्जितैः पापैः प्रमुक्तो धार्मिको द्विजः ॥१॥
भूयोऽगमद्विरूपाक्षो मुनिना सह कुम्भज। यत्रोन्मत्तेश्वरं लिङ्गं श्रद्धासिक्तकलेवरः ॥२॥
स्वर्णतीर्थे ततः स्नात्वोन्मत्तेश्वरमपूजयत्[1]। तपःशुक्लस्य षष्ठ्यां स तन्निशायां प्रजागृतः ॥३॥
सोऽपृच्छन्नेमुनिं रात्रौ लिङ्गार्चनं विधाय च। तल्लिङ्गस्य च माहात्म्यं तीर्थस्यैव च भक्तितः ॥४॥

विरूपाक्ष उवाच

नेमुने ! ऋषिशार्दूल श्रोतुकामः पुनस्त्वयि। एतल्लिङ्गस्य तीर्थस्य माहात्म्यं भवति ध्रुवम् ॥५॥
एतत्कथं समुद्भूतमर्चनादस्य किं फलम्। तीर्थस्नानाद्विशेषेण वद मे सर्वविद्विभो ॥६॥

नेमुनिरुवाच

आसीत्पुरा द्विजः कश्चिद्विष्णुभक्त इति श्रुतः। अन्तर्वेद्याश्रमी धीरः सर्वशास्त्रविशारदः ॥७॥
विद्यामदेन नित्यं स लोकान्नाऽगणयद् भृशम्। अकुत्सत् सर्वलोकाँश्च विद्यामानी च विद्यया ॥८॥
धर्ममनिन्दल्लोकानां[2] देवार्चनं जलाप्लवम्। क्रियावाक्यप्रमाणात्स विद्यादम्भेन मोहितः ॥९॥
तत्पापेन विलिप्तोऽसौ चोन्मत्तोऽभूद्विरूपदृक्। निराचारः पुनर्भूत्वा सर्वभुगचरद् बहिः ॥१०॥
त्यक्तो ग्रामभवैर्लोकैः पित्रा पत्न्या सुतैस्तथा। भ्रातृभिर्बान्धवैश्चाऽसावस्पृश्योन्मत्तकस्त्विति ॥११॥
समुत्तीर्य महीं शैलानत्रैव प्राप्तवाँस्तदा। सर्वभुक् च स चोन्मत्तो देशात्प्रनिःसृतः स्वयम् ॥१२॥

अध्याय – १०९

सुवर्णतीर्थ र उन्मत्तेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यसपछि विरूपाक्षले ब्रह्मतीर्थमा स्नान गरेर चम्पकेश्वर भगवान्‌को पूजा गरे। यसबाट बीसौं जन्मसम्म गरेका पापबाट मुक्त भई विरूपाक्ष धर्मात्मा बने। हे अगस्त्य मुनि ! त्यसपछि नेमुनिलाई साथमा लिएर विरूपाक्ष श्रद्धापूर्वक उन्मत्तेश्वर भगवान्‌को लिङ्ग भएको ठाउँमा गए। त्यसपछि उनले स्वर्णतीर्थमा स्नान गरे, माघशुक्ल षष्ठीका दिन उन्मत्तेश्वर भगवान्‌को पूजा गरे। त्यस रात उनी जाग्राम बसे। राति लिङ्गको पूजा गरिसकेपछि उनले त्यस लिङ्ग र तीर्थको माहात्म्य भक्तिपूर्वक नेमुनिसँग सोधे ॥१–४॥

विरूपाक्षले भने – ऋषिश्रेष्ठ हे नेमुनि ! फेरि म हजुरसित यो लिङ्ग र तीर्थको माहात्म्य सुन्न चाहन्छु। यो लिङ्गको उत्पत्ति कसरी भयो ? यसको पूजा गरेर के फल पाइन्छ ? विशेष गरेर तीर्थमा स्नान गर्दा के हुन्छ ? हे प्रभु ! हजुर सबै जान्नुहुन्छ, मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – अघि विष्णुभक्त नाम गरेका कुनै ब्राह्मण थिए। अन्तर्वेदीमा आश्रम भएका ती ब्राह्मण सबै शास्त्रका ज्ञाता थिए। विद्याको घमण्डले गर्दा मानिसहरूलाई उनी पटक्कै गन्दैनथे। विद्याले मै हुँ भन्ने ती ब्राह्मण सबै मानिसहरूको निन्दा गर्दथे। विद्याको घमण्डले मातेका ती पण्डित मानिसहरूले गरेको धर्म, देवताको पूजा र तीर्थस्नानलाई पनि कर्मयोगको प्रमाण दिएर निन्दा गर्दथे ॥७–९॥

हे विरूपाक्ष ! अभिमान र परनिन्दाको पापले ग्रस्त यी पण्डित दुराचारी, सर्वभक्षी र उन्मत्त भएर घुम्नका लागि बाहिर निस्किए। गाउँले, बाबु, पत्नी, छोराछोरी, दाजुभाइ र आफ्ना समुदायका मानिसहरूले स्पर्श गर्न पनि अयोग्य भएको पागल भनेर ती पण्डितलाई निकालिदिए। सर्वभक्षी ती उन्मत्त ब्राह्मण देश छाडेर आफैं पनि निस्किए। पृथ्वीमा रहेका पर्वतहरू नाघ्दै त्यसबेला उनी यहाँ आइपुगे ॥१०–१२॥

---

१. स्नात्वा चोन्मत्तेश्वरमर्हितः, इति न.सं.पु.पाठः। २. अनिन्दद्धर्म लोकानाम्, इति न.सं.पु.पाठः।

चित्रकान्तिर्नदी पुण्या स्वर्णकूटाद्रिजा परा। सुवर्णप्रस्रवं तीर्थमाप्तस्तयोः सुसङ्गमे ॥१३॥
चित्तभ्रमणसोन्मत्तः स्वर्णतीर्थजलाप्लुतः। कार्त्तिकशुक्लपञ्चम्यामज्ञानतोऽपि साम्प्रतम् ॥१४॥
सुवर्णाभोऽभवद्देहः किञ्चिज्ज्ञानेन संयुतः। स्नानात्तस्य किञ्चिदूनो बभूव चित्तविभ्रमः[३] ॥१५॥
जलादुत्तीर्य तत्राऽसौ तस्थौ निरशनो द्विजः। शीतोष्णबाधां न्यक्कृत्य[४] वदन् शिवशिवेति च ॥१६॥
चित्तभ्रमेण विप्रोऽसौ तदाऽवददहर्निशम्। शिवशिवेति रुद्रेति नाथेति नाऽन्यधीः पुनः ॥१७॥
वैशाखपूर्णिमायाञ्च ह्यर्द्धरात्रे तदग्रतः। एतल्लिङ्गं समुद्भूतं स प्रोवाच[५] शिवेति वै ॥१८॥
प्रेक्ष्य स्पृष्ट्वा[६] ननामेशमुन्मत्तोऽसौ पुनः पुनः। चित्तभ्रमेण मुक्तोऽभूत्स्पर्शनात्तस्य दर्शनात् ॥१९॥
लिङ्गमानर्च भक्त्यैतद्विप्रेशः कुसुमैर्जलैः। अभूद्दिव्यतनुर्भूयः शिवज्ञानयुतः सुधीः ॥२०॥
ददौ तस्मै शिवः साक्षादेतल्लिङ्गाद्विनिःसृतः। सालोक्यपदवीं दिव्यां प्रमथानां गरीयसीम् ॥२१॥
अत्रागत्येशदूताश्च वाद्यगीतैः प्रसेवितम्। निन्युः शिवपुरं तं ते तद्यानेन महासुखम् ॥२२॥
उन्मत्तसेवया यस्मादेतल्लिङ्गसमुद्भवः। सर्वलोकैस्ततः प्रोक्तमुन्मत्तेश इति मुदा ॥२३॥
भूय एतस्य माहात्म्यं शृणु ध्रुवं विरूपदृक्। मुक्तः कश्चिज्जनश्चाऽत्र लिङ्गस्याऽस्य प्रसादतः[७] ॥२४॥
ददर्शाऽत्र मुनिं मैत्रं घुर्घुरो नाम राक्षसः। जपन्तञ्च जले स्नात्वा सलिलस्थं सुनिर्जनम् ॥२५॥
अधावद्राक्षसश्चाऽत्र ह्यवलोक्य च तं मुनिम्। हिंसात्मा हिंसितुं प्राप्तः शीघ्रं तं सत्त्वजीवनम्[८] ॥२६॥

त्यहाँ पवित्र चित्रकान्ति नाम गरेकी एउटी नदी छन् भने सुवर्णकूटबाट पैदा भएकी अर्की नदी छन्। ती दुबै नदीको सुन्दर सङ्गममा सुवर्णप्रस्रव नाम गरेको तीर्थ बनेको छ। चित्त भ्रमित भएको हुनाले पागलजस्तै भएका ती ब्राह्मणले कार्तिकशुक्ल पञ्चमीका दिन नजानीकन भए पनि स्वर्णतीर्थको जलमा स्नान गरे। नुहाएपछि उनको शरीर सुनौलो भयो, ज्ञान पनि पैदा भयो, चित्त घुमेर भएको बौलाहापनमा पनि केही कमी आयो ॥१३-१५॥

ब्राह्मण पानीबाट बाहिर निस्के, शिव-शिव भन्दै जाडो र गर्मीको पीडालाई सहेर निराहारै बसे। त्यसबेला ती बौलाहा ब्राह्मणले चित्तको विक्षेपका कारणले गर्दा दिनरात शिव-शिव, रुद्र हे नाथ ! भन्न थाले। त्यसबाहेक कतै उनको बुद्धि गएन। वैशाख पूर्णिमाको दिन आधारातमा उनको अगाडि यो लिङ्ग प्रादुर्भाव भयो। उनले शिव-शिव भनेर त्यसै लिङ्गलाई हेरे, स्पर्श गरे, बारम्बार नमस्कार गरे। यसरी यस लिङ्गको स्पर्श र दर्शनबाट उनको चित्तको भ्रान्ति हटेर गयो। ती ब्राह्मणले भक्तिपूर्वक फूल तथा जलले यस लिङ्गको पूजा गरे। त्यसले गर्दा उनको शरीर दिव्य भयो। शिवको ज्ञानले युक्त भएर ती ब्राह्मण विद्वान् भए ॥१६-२०॥

भगवान् शङ्करले यस लिङ्गबाट निस्किएर ती ब्राह्मणलाई प्रमथगणहरूमा सबैभन्दा माथिल्लो दिव्य गरिमामय सालोक्य पदवी दिनुभयो। यहाँ आएर भगवान् शङ्करका दूतहरूले बाजा बजाउँदै, गीत गाउँदै उनको सेवा गरेर आनन्दपूर्वक तिनलाई यानमा राखेर शिवपुरी लगे। उन्मत्त अर्थात् बौलाएको व्यक्तिले आराधना गरेको र त्यसैका लाग भगवान् शङ्करको आविर्भाव भएको हुँदा दुनियाँले त्यस शिवलिङ्गलाई उन्मत्तेश्वर भने ॥२१-२३॥

हे विरूपाक्ष ! म यस लिङ्गको माहात्म्य पुनः बताउँछु, सुन - यसै लिङ्गको कृपाले गर्दा अघि यसै ठाउँमा कुनै व्यक्ति मुक्त भएको थियो। यस ठाउँमा जलमा स्नान गरेर जलभित्रै उभिएर एकान्त स्थलमा जप गरिरहेका मैत्र ऋषिलाई घुर्घुर नाम गरेको राक्षसले देख्यो। हिंस्रक त्यो राक्षस सत्वगुणी ती मुनिलाई देखेर उनलाई मार्न तुरुन्त दौडियो ॥२४-२६॥

---

३. तदाल्पो वै चाभवच्चित्तविभ्रमः, इति न.सं.पु.पाठः।
४. शीतोष्णपीडनं सह्य, इति न.सं.पु.पाठः।
५. प्रोक्तो तस्मिन्, इति न.सं.पु.पाठः।
६. स्पृश्य, इति न.सं.पु.पाठः।
७. चैतल्लिङ्गप्रसादतः, इति न.सं.पु.पाठः।
८. अप्राप्तः शीघ्रं सत्त्वजीवनः, इति न.सं.पु.पाठः।

उन्ननाम करं रक्षः सङ्गृहीतुं मुनिं जले। जानुमात्रं जलं तीर्त्वा[९] स्वर्णतीर्थे च निश्चितम् ॥२७॥
तज्जलस्पर्शनाद्रक्षश्चाऽभूज्ज्ञानयुतस्तदा। अयं जनो मुनिश्रेष्ठो भवेद्धियेति निर्णयात्[१०] ॥२८॥
बध्वाऽञ्जलिं तदा तस्मै भक्त्या ननाम राक्षसः। नमोऽस्तु ब्रह्मदेवाय क्षमस्य मेऽपराधकम् ॥२९॥
व्याचष्ट वचनं तस्मै मैत्रो नाम मुनीश्वरः। तच्चेष्टाञ्च समालोक्य कृपार्द्रहृदयो द्विजः ॥३०॥

मैत्र उवाच

कश्चाऽऽगतो भवानत्र किमर्थं वद मेऽधुना[११]। ममैवाऽस्मिन्रहःस्थाने रहस्योपासके मयि[१२] ॥३१॥
अथवा क्षुत्पिपासार्त्तो जलं पातुमिहागतः। मां भोक्तुमथवा रक्षो वद मे तद्वतं तथा ॥३२॥

घुर्घुर उवाच

सत्यमेतद्विभो ! ब्रह्मन् यदुक्तं भवताऽधुना। सर्वविदा च तत्कर्त्तुमेवमेवमिहाऽऽगतः ॥३३॥
क्षुत्पिपासाप्रबद्धोऽहं मांसशोणितभुक् तदा। जात्या रक्षो महामूढः परपिण्डोपजीवनः ॥३४॥
भवतो दर्शनाच्चैव स्पर्शनादेतदम्भसः। तस्माज्जानाम्यहञ्चेदं संसारं समदं प्रभो ॥३५॥
कथं मोक्ष्याम्यहं तात ! चेमां तनुमसारतः। वदाधुना मुनिश्रेष्ठ ! संसारदुःखसागरात् ॥३६॥

मैत्र उवाच

एतत्तीर्थवरे स्नानं कुरु राक्षस ! साम्प्रतम्। तव पुरा कृतं पापं विनश्यति न संशयः ॥३७॥
एतल्लिङ्गं पुनर्भक्त्या चोन्मत्तेशं प्रपूजय। प्राप्स्यसि त्वं[१३] वरं तस्माद्यद्वाञ्छितञ्च कौणप ॥३८॥

त्यस राक्षसले स्वर्णतीर्थको पानीमा घुँडासम्म आउञ्जेल पसेर जलमा स्थिर भएर बसेका ऋषिलाई समात्न हात उठायो। त्यो जल छुनेबित्तिकै त्यो राक्षस ज्ञानी बन्न पुग्यो। यो मानिस अवश्य पनि श्रेष्ठमुनि हुनुपर्छ भन्ने उसको बुद्धिले निर्णय गऱ्यो। हात जोडेर त्यस राक्षसले भक्तिपूर्वक ती ऋषिलाई नमस्कार गऱ्यो। ब्रह्मदेवलाई नमस्कार छ, मेरो अपराध क्षमा गर्नुहोस् भन्यो। त्यसको क्रियाकलापलाई देखेर मैत्र नाम गरेका ती ऋषिको हृदय दयाले पग्लियो ॥२७–३०॥

मैत्र ऋषिले भने – हे राक्षस ! तिमी को हौ ? एकान्तस्थलमा उपासना गरेर बसिरहेको मेरो अगाडि किन आयौ ? भोक अथवा प्यासले आत्तियौ ? अथवा जल पिउन यहाँ आयौ ? अथवा मलाई खान आएका हौ ? जस्ताको तस्तै भन ॥३१–३२॥

राक्षस घुर्घुरले भन्यो – हे प्रभु ! हे ब्राह्मण ! हजुर सबै कुरा जान्नुहुन्छ, तपाईंले जे कुरा बताउनुभयो, त्यो सत्य छ। त्यही काम गर्न म यहाँ आएको हुँ। म भोक र प्यासले बाँधिएको थिएँ, म मासु तथा रगत खाने राक्षस जाति हुँ। म अत्यन्त मूर्ख छु, अर्काको शरीर भक्षण गरी प्राण धारण गरेको छु। हजुरको दर्शन र यो पानीको स्पर्शले गर्दा मदले युक्त यो संसार नाशवान् छ भन्ने कुरा मैले थाहा पाएँ। हे मुनिश्रेष्ठ ! असार संसाररूपी दुःखको समुद्रबाट यो शरीरलाई कसरी छुट्याउन सकिन्छ ? मलाई अहिले नै बताइदिनुहोस् ॥३३–३६॥

मैत्रले भने – हे राक्षस ! अब तिमी यस उत्तम तीर्थमा स्नान गर, तिम्रो अघि गरेको पाप नाश हुनेछ, यसमा शङ्का छैन। हे राक्षस ! त्यसपछि तिमीले भक्तिपूर्वक उन्मत्तेश्वर भगवान्को यस लिङ्गको पूजा गर। त्यसबाट तिमीलाई इच्छा लागेको वर प्राप्त हुनेछ ॥३७–३८॥

---

९. तीर्य, इति न.सं.पु.पाठः।
१०. निर्णयात्, इति न.सं.पु.पाठः।
११. समिहाधुना, इति न.सं.पु.पाठः।
१२ रहस्योपासिते सति, इति न.सं.पु.पाठः।
१३. लभिष्यसि, इति न.सं.पु.पाठः।

नेमुनिरुवाच

ऋषेरित्युपदेशं स समादायाऽऽशु सादरम् । प्रययौ राक्षसो नूनं स्नात्वाऽत्रैव विरूपदृक् ॥३९॥
फाल्गुनसितचतुर्थ्याञ्चैतल्लिङ्गमपूजयत्[१४] । वन्यैः पुष्पैः फलैस्तोयैरुदासीनश्च भक्तितः ॥४०॥
एकं संवत्सरं यावद्देतल्लिङ्गमपूपुजत् । ततः पञ्चत्वमापन्नः तीर्थेऽस्मिन्[१५] स विरूपदृक् ॥४१॥
अत्रैव प्रमथाः सर्वे सङ्गत्य[१६] हाटकैर्घटैः । अभिषेकं ददुस्तस्मै प्रमथत्वेन वै तदा ॥४२॥
आस्थाय पुष्पके याने प्रमथा राक्षसञ्च तम् । निन्युः शिवपुरं रम्यं रुद्रकन्याप्रसेवितम् ॥४३॥
स एव राक्षसो वत्स प्रमथानां बलोद्धतः । अभूदद्यापि वीरश्च रुद्रस्याऽनुचरोऽनिशम् ॥४४॥
भूयो व्रज विरूपाक्ष ! याम्यायां दिशि सादरम्[१७] । नन्दितीर्थेन वै सार्द्धं यत्राऽऽस्ते नन्दिकेश्वरः ॥४५॥

गत्वाऽऽशु तत्रैव वरे हि तीर्थे स्नानञ्च कुर्याः खलु वत्स भक्त्या ।
सम्पूजय त्वं वरनन्दिकेशं यद्वाञ्छितार्थं प्रलभस्व नूनम्[१८] ॥४६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायां सुवर्णतीर्थोन्मत्तेश्वरयोर्माहात्म्यं नाम नवाधिकशततमोऽध्यायः ॥१०९॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! ऋषिको त्यो उपदेश ग्रहण गर्दै त्यस राक्षसले त्यसै तीर्थमा भक्तिपूर्वक स्नान गऱ्यो। फाल्गुनशुक्ल चतुर्थीका दिन त्यस राक्षसले विरक्त भएर वनमा पैदा भएका फूल तथा फलले भक्तिपूर्वक यस लिङ्गको पूजा गऱ्यो ॥३९-४०॥

हे विरूपाक्ष ! एक वर्षसम्म त्यस राक्षसले यस लिङ्गको पूजा गऱ्यो र यसै ठाउँमा मऱ्यो । यसै ठाउँमा आएर प्रमथहरूले सुनका कलशद्वारा प्रमथगणको रूपमा त्यसलाई अभिषेक दिए। प्रमथगणहरूले त्यस राक्षसलाई राखेर रुद्रकन्याद्वारा सेवा गराउँदै सुन्दर शिवलोकमा लगे। हे बाबु ! प्रमथगणको बीचमा महाबली भएर रहेको त्यो वीर राक्षस आज पनि रुद्रको नित्यसेवक भएर बसिरहेको छ ॥४१-४४॥

हे विरूपाक्ष ! अब तिमी यहाँबाट दक्षिण दिशामा पर्ने त्यस नन्दितीर्थमा जाऊ जहाँ नन्दितीर्थका साथमा नन्दिकेश्वर भगवान् रहनुभएको छ ॥४५॥

हे बाबु ! त्यस उत्तम तीर्थमा तुरुन्त गएर तिमीले भक्तिपूर्वक स्नान गर अनि उत्तम नन्दिकेश्वर भगवान्को पूजा गर। त्यसो गर्नाले तिमीले चाहेको फल पाउनेछौ ॥४६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा सुवर्णतीर्थ र उन्मत्तेश्वरको माहात्म्यनामक
एकसय नवौं अध्याय पूरा भयो।

---

१४. .....लिङ्गञ्च समर्चितम्, इति न.सं.पु.पाठः ।
१५. अत्रैव, इति न.सं.पु.पाठः ।
१६. आगत्य, इति न.सं.पु.पाठः ।
१७. चेतो याम्ये दिशि ध्रुवम्, इति न.सं.पु.पाठः ।
१८. प्रलभेद्भवांस्तद्, इति न.सं.पु.पाठः ।

दशाधिकशततमोऽध्यायः

नन्दितीर्थनन्दिकेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

स्वर्णतीर्थे ततः स्नात्वा चोन्मत्तेशप्रपूजनात्। विरूपाक्षस्तदाऽगस्त्य ! चित्तोन्मादं जहौ खलु ॥१॥
ततोऽगमद्विरूपाक्षस्तेन सार्द्धं मुदा पुनः। धनुश्चतुःशते याम्ये यत्राऽऽस्ते नन्दिकेश्वरः ॥२॥
नन्दितीर्थे ततः स्नात्वा नन्दिकेश्वरमर्चयत्। भक्त्या पञ्चोपचारैः स तन्मन्त्रज्ञो हि ते मुने ! ॥३॥
तपःशुक्लस्य सप्तम्यामुपोष्य व्रतमाचरत्। रुद्रजापी शुचिर्भक्त्या विनिद्रो निशि पूजकः ॥४॥
व्यतीतायां निशायां स पप्रच्छ नेमुनिं पुनः। लिङ्गस्यैव च माहात्म्यं तीर्थस्य च घटोद्भव ॥५॥

विरूपाक्ष उवाच

संसारतारणज्ञार्य वद तत्त्वभृतां वर। श्रोतुकामः पुनश्चाहं त्वत्तः[1] सर्वविदोऽधुना ॥६॥
एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च विशेषतः। यथोद्भूते च ते पूर्वं केनैव हि प्रकाशिते ॥७॥

नेमुनिरुवाच

कैलाशे संस्थिते रुद्रे देव्या सह प्रवादिते। भृङ्ग्यविशद्रहः स्थाने भृङ्गरूपेण कैतवात् ॥८॥
तद्वार्त्ताञ्च समादाय भृङ्गी त्वरितमाययौ। जयायै कथयामास यदुक्तं शम्भुना रहः ॥९॥
तत्सर्वं ज्ञातवान् रुद्रो भृङ्गिणा छद्मना यतः। रहःस्थाने समाविश्य तद्वार्ता च हृता खलु[2] ॥१०॥
ततो विभू रुषाविष्टस्तदा भृशं विरूपदृक्। व्याजहार वचः शीघ्रं शापं दातुञ्च नन्दिने ॥११॥

ईश्वर उवाच

भृङ्गिणा छद्मना चाऽत्र रहःस्थानं प्रविश्य च। यत्तद्वार्त्तां समाहृत्य स्वपत्नीबोधिता[3] ध्रुवम् ॥१२॥
मद्द्वारपालकौ नित्यं भूत्वा परनिषेधकौ। प्रविष्टञ्च रहःस्थानं त्वत्सम्मतेन भृङ्गिणा ॥१३॥
भूत्वा निषेधको द्वास्थस्तं प्रवेशितवान्यतः। तस्माच्च मानुषो भूया भूमौ निवासकारकः ॥१४॥

अध्याय – ११०

नन्दितीर्थ र नन्दिकेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो– त्यसपछि स्वर्णतीर्थमा स्नान गरेर उन्मत्तेश्वर भगवान्‌को पूजा गरेपछि विरूपाक्षले चित्तको उन्मादलाई त्यागे। फेरि विरूपाक्ष प्रसन्न हुँदै नेमुनिलाई साथमा नै लिएर त्यहाँबाट आठ सय गज पर रहेको दक्षिण दिशामा अवस्थित नन्दिकेश्वर भगवान् रहनुभएको ठाउँमा गए। हे मुनि ! शिवमन्त्रका ज्ञाता विरूपाक्षले नन्दितीर्थमा स्नान गरे र नन्दिकेश्वर भगवान्‌को भक्तिपूर्वक पञ्चोपचार विधिले पूजा गरे। माघशुक्ल सप्तमीका दिन पवित्र भएर भगवान् शङ्करको मन्त्र जप्दै रातमा विरूपाक्षले उहाँको पूजा गरे। रातभरि जाग्राम बसेर व्रत गरे। हे अगस्त्य मुनि ! रात बितेपछि उनले नेमुनिसँग फेरि यस लिङ्ग र तीर्थको माहात्म्य सोधे ॥१–५॥

विरूपाक्षले भने – तपाईं संसारलाई तार्ने विधिका ज्ञाता हुनुहुन्छ, सम्पूर्ण तत्वज्ञहरूमध्ये श्रेष्ठ हुनुहुन्छ, सम्पूर्ण कुरा जान्ने हजुरसित फेरि म यस लिङ्गको र विशेष गरी यस तीर्थको माहात्म्य सुन्न चाहन्छु। यी तीर्थ र लिङ्ग कसरी उत्पन्न भएका थिए, यिनीहरूलाई पहिले कसले प्रकाशमा ल्याएको थियो ? त्यो सबै बताउनुहोस् ॥६–७॥

नेमुनिले भन्नुभयो – कैलाशको शिखरमा भगवान् शङ्कर भगवती पार्वतीका साथ वार्तालाप गरेर बस्नुभएको थियो। त्यसै एकान्तस्थलमा अचानक भमराको रूप लिएर भृङ्गी प्रवेश गरे। त्यसपछि भृङ्गी तुरुन्त बाहिर आए र उनले भगवान् शङ्करले एकान्तमा जे कुरा भन्नुभएको थियो त्यो वृत्तान्त जयालाई बताए। भगवान् शङ्करले एकान्तस्थलमा छद्मरूप लिएर प्रवेश गरेको भृङ्गीले यहाँको रहस्यमय वृत्तान्त लिएर गयो भन्ने कुरा थाहा पाउनुभयो। हे विरूपाक्ष ! त्यसबेला भगवान् शङ्कर धेरै रिसाउनुभयो र नन्दीलाई तुरुन्त सराप दिँदै भन्न थाल्नुभयो ॥८–११॥

भगवान्‌ले भन्नुभयो – छद्म रूपधारी भृङ्गीले यो एकान्तस्थलमा प्रवेश गरेर यहाँको सबै वृत्तान्त लिएर गयो र आफ्नी पत्नीलाई बतायो। तिमीहरू द्वारपाल बनेर अरुलाई भित्र प्रवेश गर्न नदिनका लागि बसेका थियौ। तिमीहरूको सम्मति अनुसार भृङ्गी यो एकान्त स्थानमा प्रवेश गर्‍यो। मेरो एकान्त कक्षमा अरुलाई आउन नदिन खटिएको ढोके भएर पनि तैँले भृङ्गीलाई प्रवेश गर्ने अवसर दिइस्। त्यसैले आजदेखि तैँ पृथ्वीमा बस्ने मनुष्य बन् ॥१२–१४॥

---

१. त्वयि, इति न.सं.पु.पाठः।
२. तद्वार्त्तां हृतवानिति, इति न.सं.पु.पाठः।
३. स्वपत्नीञ्चाब्रवीद्, इति न.सं.पु.पाठः।

नन्द्युवाच

मया न ज्ञायते सत्यं भृङ्गिचरित्रमीश्वर। तेन नोक्तं ममाऽग्रे च सत्यमेतन्न संशयः ॥१५॥
अनेन वञ्चितश्चाऽहं मायया वा महेश्वर। अत्र स्थितौ चिरं कालमावां जानीहि निश्चितम् ॥१६॥
मा मा शापो हि दातव्यस्तन्मेऽविजानते विभो। प्रोक्तं निरपराधाय न दत्तं लक्षणं श्रुतौ ॥१७॥

ईश्वर उवाच

तेन समं महाद्वारे त्वमपि संस्थितोऽसि वै। भृङ्गिणं कैतवस्थञ्च नन्दिन्! जानासि नो कथम्[४] ॥१८॥
तस्माद्दत्तो मया शापो नन्दिन् तुभ्यञ्च साम्प्रतम्। सङ्गदोषेण सर्वे हि[५] पापं पुण्यं प्रभुञ्जते ॥१९॥
तस्मात्सर्वप्रयत्नेन साधुसङ्गः प्रशस्यते। न विनश्यति मे शापो यावद् द्वादशवत्सरम् ॥२०॥
मणिमत्पर्वतस्याधो मणिभूमयशेखरे। मणिप्रभा नदी यत्र नन्दिन्! गच्छ हि राजते ॥२१॥
रत्नकान्तिनदी पुण्या स्वर्णप्रभा तथापरा। तयोश्च सङ्गमे नन्दिन् स्नात्वाऽऽराधय मां तदा ॥२२॥
मच्छापान्ते ततस्त्वं वै द्वारस्थो सम्भविष्यसि। गच्छ नन्दिन्! महीं क्षिप्रं यावद् द्वादशवत्सरम् ॥२३॥

नेमुनिरुवाच

समाययौ तदा नन्दी सत्वरं क्षितिमण्डलम्। परिभ्रम्य रसां तीर्थमत्रैव प्राप्तवान्मुने ॥२४॥
सस्नौ सुसङ्गमे नद्योर्नन्दी भक्त्या यथाविधि। रुद्राङ्काब्दव्यतीते च मधोः कृष्णाष्टमीदिने ॥२५॥
प्रोन्मज्ज्याशुजलान्नन्दी ददर्श स्वतनुं तदा। दिव्यरूपां यथापूर्वं तेजस्विनीं त्रिलोचनाम् ॥२६॥
स्नात्वा नन्दी च तत्तीरे दध्यौ शिवं परात्परम्। वृष्टिशीतानिलातापैः सोढ्वा पीडां निरन्तरम्[६] ॥२७॥
एकाब्दान्तेऽसिताष्टम्यां मधोस्तदग्रतो निशि। एतल्लिङ्गं समुद्भूतं ध्यायमानं समर्चितम् ॥२८॥
प्रेक्ष्य लिङ्गं समुद्भूतं स्तोतुं मनो दधे तदा। वाचा गद्गदया नन्दी लोमाञ्चनो हि हर्षकैः ॥२९॥

नन्दीले भने – हे ईश्वर! भृङ्गीको चरित्र मैले थाहा पाइनँ, यो कुरा सत्य हो। उनले मलाई यो कुरा भन्दै भनेनन्, यसमा शङ्का छैन। हे महेश्वर! यिनबाट अथवा मायाबाट हामी ठगियौँ। हामी बसेको धेरै समय भयो भन्ने कुरा हजुरले बुझ्नुपर्छ। हे प्रभु! यस विषयमा मलाई केही थाहा छैन, सराप नदिनुहोस्। गल्ती नभएको व्यक्तिलाई सराप दिनुहुँदैन भनेर वेदमा पनि भनिएको छ ॥१५-१७॥

भगवान्ले भन्नुभयो – हे नन्दी! मूल ढोकामा तँ पनि त्यसैसित बसेको थिइस्। छल गर्न लागेको त्यो भृङ्गीको बारेमा तैँले कसरी थाहा पाइनस्?। हे नन्दी! त्यसैले मैले अहिले तिमीलाई पनि सराप दिएँ किनभने सङ्गतको दोषले हुने पाप र पुण्य सबैले भोग्नुपर्छ। तसर्थ सकेसम्म सज्जनकै सङ्गति गर्नु उत्तम हुन्छ भनिएको छ। बाह्र वर्ष नपुगुञ्जेल मैले दिएको यो सरापको नाश हुँदैन ॥१८-२०॥

हे नन्दी! मणिमान् नामक पर्वतभन्दा तल मणिमय भूमि भएको पर्वतशिखरमा मणिप्रभा नाम गरेकी नदी विराजमान भएकी छन्। अब तिमी मणिको भूमिले बनेको त्यस शिखरमा जाऊ। हे नन्दी! रत्नकान्ति नाम गरेको पवित्र नदी र स्वर्णप्रभा नाम गरेकी अर्की नदी छन्। ती दुई नदीको सङ्गमस्थलमा ध्यान गरेर मेरो आराधना गर। हे नन्दी! मेरो सराप अन्त्य भएपछि फेरि तिमी द्वारपाल हुन पाउनेछौ। बाह्र वर्ष नबितुञ्जेल तिमी तुरुन्त पृथ्वीमा जाऊ ॥२१-२३॥

नेमुनिले भन्नुभयो – हे मुनि! त्यसपछि नन्दी तुरुन्त सम्पूर्ण पृथ्वीमण्डल घुम्दै यसै तीर्थमा आइपुगे। नन्दीले यी दुई नदीको सङ्गमस्थलमा बाह्र वर्ष बितेपछि वैशाखकृष्ण अष्टमीका दिन विधि अनुसार भक्तिपूर्वक स्नान गरे। त्यहाँ नन्दीले छिट्टै जलबाट उत्रेर आफ्नो शरीरलाई हेरे। उनले पहिले सराप नपरेको अवस्थामा आफ्नो शरीर जस्तो थियो त्यस्तै तीन आँखा भएको तेजस्वी दिव्य विग्रह देखे। नन्दीले स्नान गरेर त्यस तीरमा वर्षा, ठण्डी, हावा र गर्मीको पीडालाई सहँदै परभन्दा पनि पर रहेका शिवको ध्यान गरे। एक वर्ष पुगेपछि वैशाख महिनाको कृष्ण अष्टमी तिथिको रातमा ध्यान तथा पूजा गर्दागर्दै उनकै नजिकमा लिङ्गको प्रादुर्भाव भयो। लिङ्ग उत्पन्न भएको देखेर हर्षले रोमाञ्चित हुँदै नन्दीले गद्गद स्वर निकालेर स्तुति गर्न थाले ॥२४-२९॥

---

४. नन्दिन् वेत्सि कथन्न भोः, इति न.सं.पु.पाठः।

५. सर्वैश्च, इति न.सं.पु.पाठः।

६. सुपीडां सह्य वै भृशम्, इति न.सं.पु.पाठः।

नन्द्युवाच

ॐ पराय परमेशाय परापराय वै नमः। जीवेश्वराय जीवाय जीविनेऽङ्गाय वै नमः ॥३०॥
ध्यातव्याय धिया नित्यं ध्यानध्येयस्वरूपिणे[७]। अगम्याय च गम्याय सर्वेश्वर नमोऽस्तु ते ॥३१॥

नेमुनिरुवाच

स्तुतिपरे तदा तस्मिन् शिवदूताः समाययुः। विमानपाणयश्चात्र चानेतुं नन्दिनं मुने ॥३२॥
तमास्थाय विमाने ते निन्युः शिवपुरं द्रुतम्। गीतवाद्यमहोल्लासैः पुष्पवर्षैः प्रसेव्य च ॥३३॥
नन्दिना च पुरा स्नातं नन्दितीर्थमुदाहृतम्। सेवितो हि तथा तेन नन्दिकेश्वर ईरितः ॥३४॥
कश्चिन्म्लेच्छो विमुक्तोऽत्र भूयः शृणु विरूपदृक्। पूर्वजन्मविपाकेन सोऽभूदर्द्धतनुर्नृपः ॥३५॥
असमाप्तकृताद्धर्मात्पूर्वजन्मनि भूपतिः। अदक्षाय कृताद्दानात्ततोऽभूदर्द्धविग्रहः ॥३६॥
म्लेच्छपत्नी च तन्माता ददर्श स्वात्मजं तदा। शय्यायां तं प्रसूतञ्च प्रेक्ष्य दुःखातुरा च सा ॥३७॥
तमादाय द्रुतं रात्रावुदक्षिपत् वने बहिः[८]। उपहसन्ति लोका मां कृत्वेति प्रेक्ष्य मेऽर्भकम् ॥३८॥
ततः कश्चित्किरातोऽत्र मृगयायां समागमत्। ददर्श बालकं क्रुष्टं रुदन्तं निर्जने वने ॥३९॥
अचिन्तयत्तदा कण्डुः किमिति कस्य बालकः। क्षणं विचिन्त्य गेहं स्वं तमादाय ययौ तदा ॥४०॥
अपोषयत्तमाहृत्य स्वात्मजमिव सन्ततम्। स विन्यस्य प्रियायै च भवतु कोऽप्यपुत्रकः ॥४१॥
दिने दिने ववृधेऽसौ पुष्टाङ्गो वयसा युतः। आपञ्चविंशतिर्वर्षं[९] शय्यायां नाऽशयिष्ट सः ॥४२॥

नन्दीले स्तुति गर्दै भने – पर तथा अपर स्वरूप भएका परम परमेश्वरलाई नमस्कार छ। प्राणीका अङ्ग भएका जीवस्वरूप जीवेश्वरलाई नमस्कार छ। सधैँ बुद्धिद्वारा ध्यान गर्न योग्य, ध्यान र धारणामय शरीर लिने अगम्य तथा गम्यस्वरूप भएका सबैका अधिपति हजुरलाई बारम्बार नमस्कार छ ॥३०–३१॥

नेमुनिले भन्नुभयो – यसरी स्तुति गरेपछि विमान लिएर नन्दीलाई लैजानका लागि शिवजीका दूतहरू त्यहाँ आए। ती दूतहरूले उनलाई विमानमा राखेर गीत गाउँदै, बाजा बजाउँदै, फूल वर्षा गर्दै बडो उत्सवका साथ ससम्मान शिवलोक लगे। अघि नन्दीले स्नान गरेको हुँदा त्यसलाई नन्दितीर्थ भनियो। नन्दीले आराधना गरेको हुँदा त्यस लिङ्गको नाम नन्दिकेश्वर रह्यो। हे विरूपाक्ष ! अघि यहाँ पूर्वजन्मको कर्मले गर्दा आधा शरीर भएको कुनै म्लेच्छ जातिको राजा मुक्त भएको थियो। पूर्वजन्ममा त्यस राजाले अपूरो धर्म गरेको थियो। बायाँ हातले दान दिएको हुनाले उसको शरीर आधामात्र भएको थियो। त्यस म्लेच्छकी आमा ओछ्यानमा जन्मिएको त्यस्तो आफ्नो छोरालाई देखेर त्यसबेला अत्यन्त दुःखित र व्याकुल बनेकी थिई।दुनियाँले यस्तो मेरो छोरोको उपहास गर्नेछ भन्ने ठानेर उसले रातमा नै बाहिर जङ्गलमा लगेर आफ्नो छोरोलाई फालिदिई ॥३२–३८॥

त्यसपछि त्यहाँ कुनै किराति शिकार खेल्दै आयो। उसले एकलास वनमा कराई कराई रोइरहेको बालकलाई देख्यो। त्यसबेला त्यस किरातिले सोच्यो – यो के हो ? यो कसको बालक हो ? एकछिन विचार गऱ्यो र त्यस बालकलाई लिएर आफ्नो घर गयो। यो बालक यहाँ रहँदा कुनै मानिस पुत्रहीन बन्नेछ भनी त्यस बालकलाई आफ्नी पत्नीका हातमा सुम्पिदियो। त्यसपछि त्यसले आफ्नो छोरोजस्तै गरेर त्यसको पालनपोषण गऱ्यो ॥४१॥ दिनदिनै त्यो बालक बढ्दै गयो। उसका अङ्गहरू उमेरले गर्दा पुष्ट हुँदै गए। पच्चीस वर्षसम्म त्यस बालकले कहिल्यै पनि ओछ्यान छोडेन ॥३९–४२॥

---

७. ध्यानधारणदेहिने, इति न.सं.पु.पाठः।
८. रात्रावुत्क्षिपत्कानने बहिः, इति न.सं.पु.पाठः।
९. पञ्चविंशसमां यावत्, इति न.सं.पु.पाठः।

तद्वयोऽन्ते तदार्द्धाङ्गो जानुघर्षेण सञ्चरन्। ग्रामं ग्रामाद्बहिर्म्लेच्छः कष्टात्कष्टतरं द्विज ॥४३॥
एकदा दिवसे रात्रौ ददर्श हारीतं मुनिम्। नन्दितीर्थजले स्नातं[१०] नन्दीश्वरसमर्चकम् ॥४४॥
व्रजाम्यहञ्च तत्रैव तनुं प्रक्षालितुं जलैः। वैशाखपूर्णिमायां स इति कृत्वा मनो दधे ॥४५॥
घर्मार्त्त आययौ चात्र जले प्रक्षालितुं तनुम्। नन्दितीर्थञ्च सम्प्राप्तो हीनाङ्गोऽसौ[११] शनैः शनैः ॥४६॥
प्रक्षालितं स्वकं देहमर्धाङ्गं तज्जलैस्तदा। निमज्ज्योन्मज्ज्य तत्तीर्थे ददर्श स्वतनुं पुनः ॥४७॥
निष्पापो ज्ञानवान्भूत्वा विकिल्विषतनुः शुभः[१२]। पादेनैकेन संसारं समर्थो धावितुं पुनः ॥४८॥
ज्ञानासक्तस्ततोऽर्धाङ्गश्चात्रैत्य भक्तितो मुदा। अपूपुजज्जलैरेनं करेण संस्पृशञ्छिवम् ॥४९॥
तत आगत्य तद् दूतास्तमास्थाय विमानके। समानिन्युः पुरं शैवं वाद्यगीतैः प्रमोदितम् ॥५०॥
स एव प्रमथानाञ्च वरिष्ठोऽभूद् गणाधिपः। रुद्रपार्श्वचरो नित्यमेतल्लिङ्गप्रसादतः ॥५१॥
भूयो गच्छ ह्यतोऽधस्त्वं यत्र वै गोखुरेश्वरः। गोतीर्थस्य तटे दूरे क्रोशैकमात्रके द्विज ॥५२॥

तीर्थे गवामाप्लवनं कुरु त्वं सर्वोद्भवैनःपरिमुक्तदेहः।
सम्पूजयेशं प्रसभञ्च भक्त्या कामञ्च यत्प्राप्स्यसि वाञ्छितं ते ॥५३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
नन्दितीर्थनन्दिकेश्वरयोर्माहात्म्यं नाम दशाधिकशततमोऽध्यायः ॥११०॥

हे विरूपाक्ष ! पच्चीस वर्ष पुगेपछि आधा अङ्ग भएको त्यो बालक घुँडाले घस्रदै हिँड्न थाल्यो। बडो कष्टसँग त्यो एक गाउँबाट अर्को गाउँ हुँदै बाहिर गयो। एक दिन राति उसले नन्दितीर्थमा स्नान गरेर नन्दीश्वर भगवान्‌को पूजा गर्न लागेका हारित मुनिलाई देख्यो ॥४३-४४॥

वैशाखपूर्णिमाको दिन उसले म पनि जलले शरीरलाई पखाल्न त्यहाँ जान्छु भन्ने विचार गऱ्यो। आधा अङ्ग भएको यो पुरुष घामले आत्तिएर शरीर पखाल्नका लागि नन्दितीर्थमा आयो। त्यस अर्धाङ्गले यस तीर्थको जलले आफ्नो शरीरलाई जलमा डुब्दै उत्रदै गरी खूबसित पखाल्यो र त्यसपछि उसले आफ्नो शरीर हेऱ्यो। आफू पापरहित र ज्ञानी भएको उसले अनुभव गऱ्यो। पापमुक्त भई सुन्दर शरीर पाएको त्यो व्यक्ति एउटा खुट्टाले संसारभर दगुर्न सक्ने भयो ॥४५-४८॥

त्यसपछि नामले मात्र अर्धाङ्गी तर ज्ञानी बनेको त्यस पुरुषले प्रसन्न हुँदै भक्तिपूर्वक जलले शिवलिङ्गको पूजा गऱ्यो अनि हातले शिवजीको स्पर्श गऱ्यो। त्यसपछि शिवजीका दूतहरू आएर त्यसलाई विमानमा राखे। बाजा र मङ्गल गीतहरू बजाएर खुसी पार्दै त्यसलाई शिवलोकमा लगे। शिवलिङ्गको अनुग्रहबाट त्यही व्यक्ति प्रमथगणहरूको श्रेष्ठ नेता र सधैँ शिवजीको समीपमा बस्ने सेवक बन्यो ॥४९-५१॥

हे ब्राह्मण विरूपाक्ष ! अब तिमी यहाँबाट एक कोस टाढा रहेको गोखुरतीर्थको किनारमा अवस्थित गोखुरेश्वर क्षेत्रमा जाऊ। त्यहाँ गएर तिमी गोतीर्थमा स्नान गर। त्यसपछि तिम्रो शरीर सम्पूर्ण पापबाट मुक्त हुनेछ। त्यसपछि तुरुन्त भक्तिपूर्वक भगवान् शङ्करको पूजा गर, तिमीले जे चाहेका छौ त्यो फल पाउनेछौ ॥५२-५३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा नन्दितीर्थ र नन्दिकेश्वरको माहात्म्यनामक
एकसय दशौं अध्याय पूरा भयो।

---

१०. नन्दीतीर्थजलाप्लुत्य, इति न.सं.पु.पाठः।
११. संप्राप्तश्चार्धाङ्गोऽसौ, इति न.सं.पु.पाठः।
१२. तनुं शुभां विकिल्वषा, इति न.सं.पु.पाठः।

एकादशाधिकशततमोऽध्यायः

गोतीर्थगोखुरेश्वरशिवलिङ्गयोर्महमा

स्कन्द उवाच

नन्दितीर्थे ततः स्नात्वा तल्लिङ्गं पूजयन्मुने। सर्वजन्मोद्भवैः पापैरभिमुक्तो विरूपदृक् ॥१॥
भूयोऽगमत्समं तेन मुनिना स घटोद्भव। गोतीर्थस्य तटे सानौ यत्राऽऽस्ते गोखुरेश्वरः ॥२॥
माघशुक्लस्य चाऽष्टम्यां भक्तिपूर्वं घटोद्भव। गोतीर्थे स मुदा स्नात्वा गोखुरेशमपूपुजत् ॥३॥
सम्पूज्य विधिवल्लिङ्गं तन्निशायां च जागृतः[१]। ततः पप्रच्छ माहात्म्यं तल्लिङ्गतीर्थयोर्मुनिम् ॥४॥

विरूपाक्ष उवाच

गाखुरेशमिति प्रोक्तं भवता तत्र मे तदा। एतल्लिङ्गस्य नामाऽऽर्य माहात्म्यमस्य किं पुनः ॥५॥
गवां तीर्थस्य विप्रेश माहात्म्यञ्च विशेषतः। एते च[२] श्रोतुकामोऽहं वद मे मुनिपुङ्गव ॥६॥

नेमुनिरुवाच

बभूव कश्चिदाभीरो[३] गोरसैरुपजीवितः। गाश्च रक्षँस्तदा तस्थौ दधिकर्ण इति श्रुतः ॥७॥
तद्गावो रत्नकान्त्यां वै सस्नुर्दावप्रपीडिताः। वैशाखस्य तृतीयायां शुक्ले च कृत्तिकायुजि[४] ॥८॥
गाव उत्तीर्य नद्यास्ता गोष्ठेऽत्राऽऽगत्य वै तदा। दुग्धानि सुस्रुवुश्चाऽत्र पयस्विन्यः पृथक् पृथक् ॥९॥
उल्लेखयन्त्यश्च खुरैर्गावश्चरन्ति निर्भरम्। प्रस्राव्य दुग्धधारास्ता नित्यमेव पृथक् पृथक् ॥१०॥
अत्राऽधावत्स चाऽऽभीरः किमितीति वदन् हि तत्। प्रदर्शितुं तदा शीघ्रं समुत्थाय कुजाश्रयात् ॥११॥
मृदूल्लेखैः खुरैरत्र ददर्श लिङ्गमुत्तमम्। भूयश्चखान भूमिं स हस्तमात्रं लगुडकैः ॥१२॥

अध्याय - १११

गोतीर्थ र गोखुरेश्वर शिवलिङ्गको महमा

कुमार स्वामीले भन्नुभयो – त्यसपछि विरूपाक्षले नन्दितीर्थमा स्नान गरेर त्यस लिङ्गको पूजा गरे, अनि उनी जन्मभरि गरेका सम्पूर्ण पापबाट मुक्त भए। हे अगस्त्य मुनि ! त्यसपछि ती विरूपाक्ष नेमुनिलाई साथमा लिएर गोखुरेश्वर महादेव जहाँ बस्नुहुन्थ्यो, त्यसै पर्वतमा रहेको गोतीर्थको तटमा गए। हे अगस्त्य मुनि ! माघशुक्ल अष्टमीका दिनमा उनले गोतीर्थमा आनन्दपूर्वक स्नान गरेर भक्तिपूर्वक गोखुरेश्वर महादेवको पूजा गरे। त्यस लिङ्गको विधिपूर्वक पूजा गरेर उनी राति जाग्राम बसे। त्यसै समयमा उनले त्यो लिङ्ग र तीर्थसम्बन्धी माहात्म्य नेमुनिसँग सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! हजुरले मलाई जुन गोखुरेश्वरको कुरा बताउनुभएको थियो, त्यस लिङ्गको नाम के हो ? यसको महत्त्व के छ ? विशेष गरी गोतीर्थको के महत्त्व छ ? यी दुबै कुरा सुन्न चाहन्छु, मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – अघि गाईको दूध, दही आदिबाट जीविका चलाउने कुनै दधिकर्ण नाम गरेको अहीर त्यहाँ बस्थ्यो। ऊ सधैँ त्यहाँ गाई हेर्दथ्यो। डढेलोले आत्तिएका गाईहरूले कृत्तिका नक्षत्रले युक्त वैशाखशुक्ल तृतीयाका दिन त्यहाँ आएर रत्नकान्ति नदीमा नुहाए। ती गाईहरू नदी तरेर त्यसैबेला यस गोठमा आए। प्रशस्त दूध भएका ती गाईहरूले त्यहाँ बेग्लाबेग्लै स्थानमा दूध चुहाए। खुरहरूले खोस्रदै ती गाईहरू बेग्लाबेग्लै दूधका धाराहरू चुहाएर त्यहाँ खूबसित चर्ने गर्थे। यस्तो दृश्य देखेर त्यो अहीर 'के रहेछ हँ' भन्दै त्यो दृश्य हेर्नका लागि रुखको आश्रयस्थलमा उठेर दगुऱ्यो। खुरहरूले माटो खनिएको त्यस ठाउँमा उसले शिवलिङ्ग देख्यो। त्यसपछि उसले लौराले एक हातजति भुइँ खन्यो ॥७–१२॥

---

१. विनिद्रवान्, इति न.सं.पु.पाठः।
२. एतौ च, इति न.सं.पु.पाठः।
३. आसीत्कश्चिद्धि चाभीरः, इति न.सं.पु.पाठः।
४. वैशाखस्य तृतीयायां शुक्ले भे कृत्तिकायुते, इति न.सं.पु.पाठः।

गाः प्रदुह्याऽनिशं क्षीरं पत्रपुटे विरूपदृक् । नित्यं स्नापितवान् भक्त्या लिङ्गोपरि शिवात्मना ॥१३॥
क्वचित्कालान्तरेऽत्राऽसौ पञ्चत्वं प्राप्तवान् द्विज । सम्पूज्य गोरसैर्नित्यं यावज्जीवप्रधारणम् ॥१४॥
प्रमथाश्च समागम्य पुष्पके तं तदा दधुः । निन्युः शिवपुरं दिव्यं सवाद्यैः पुष्पवर्षणैः ॥१५॥
स एव प्रमथानाञ्च गरिष्ठोऽभूद्विरूपदृक् । गोरसैः स्नापितं लिङ्गं तत्पुण्यस्य प्रभावतः ॥१६॥
ऋषिभिश्च समागत्य चैतल्लिङ्गं समर्चितम् । नित्यं स्नात्वा गवां तीर्थे प्रोक्तश्च गोखुरेश्वरः ॥१७॥
भूयो गच्छ विरूपाक्ष ! यत्राऽऽस्ते पाण्डुकेश्वरः । ऋक्षतीर्थेन सार्द्धञ्च ऋषिवृन्दप्रसेवितः ॥१८॥
योजनार्धे ह्यतो दूरे ऋक्षवदद्रिसानुतः । तत्र गमनमात्रेण हृदेनसा विमुच्यते ॥१९॥

ऋक्षाभिधाने सहसा च तीर्थे स्नात्वा तमीशञ्च समर्चय त्वम् ।
रात्रौ विनिद्रो विधिवद्धि भूत्वा प्राप्नोषि कामं खलु यद् हृदिस्थम्[५] ॥२०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
गोतीर्थगोखुरेश्वरयोर्माहात्म्यं नामैकादशाधिकशततमोऽध्यायः ॥१११॥

हे विरूपाक्ष ! दिनदिनै दुनामा गाईको दूध दुहेर त्यसले त्यहाँ चढायो । शिवमा भक्ति राख्ने त्यस अहीरले शिवलिङ्गलाई बाँचुञ्जेल गोरसले स्नान गरायो । हे विरूपाक्ष ! बाँचुञ्जेल सधैँ गोरसले शिवलिङ्गको पूजा गरेको त्यो अहीर केही समयपछि मऱ्यो । बाजाका साथै फूलको वर्षा गरेर पुष्पक विमानमा राखी त्यसलाई प्रमथ आदि शिवगणहरूले शिवपुर लगे ॥१३-१५॥

हे विरूपाक्ष ! त्यसले गोरसले शिवजीको लिङ्गलाई स्नान गराएको थियो । त्यसै पुण्यको प्रभावले गर्दा त्यो अहीर प्रमथगणहरूको मुख्य भएर रह्यो । ऋषिहरूले आएर सधैँ गोतीर्थमा स्नान गरेर यस लिङ्गको पूजा गरे । त्यसैले यसलाई गोखुरेश्वर भनिएको हो ॥१६-१७॥

हे विरूपाक्ष ! अब तिमी जहाँ पाण्डुकेश्वर भगवान् ऋषिका समूहले सेवित भएर ऋक्षतीर्थमा बस्नुभएको छ, त्यसै ठाउँमा जाऊ । यहाँबाट दुई कोस टाढा ऋक्षवान् नाम गरेको पर्वत छ । त्यस पर्वतको फेदी हुँदै त्यहाँ जानाले मात्रै पनि मनबाट भएका सबै पापहरूबाट मुक्ति पाइन्छ । ऋक्ष नाम गरेको तीर्थमा स्नान गरेर तुरुन्त तिमीले भगवान् शङ्करको पूजा गर । रातमा विधिपूर्वक जाग्राम बसेर पूजा गऱ्यौ भने त्यस तीर्थबाट आफूले चाहेको फल तिमीले पाउनेछौ ॥१८-२०॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा गोतीर्थ र गोखुरेश्वरको माहात्म्यनामक
एकसय एघारौं अध्याय पूरा भयो ।

---

५. तत्ततो यत्, इति न.सं.पु.पाठः ।

द्वादशाधिकशततमोऽध्यायः

भद्रतीर्थपाण्डुकेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

गवां तीर्थे मुदा स्नात्वा गोखुरेशप्रपूजनात्। विंशत्या जन्मभिः प्राप्तैः पापैर्मुक्तो भवेज्जनः[1] ॥१॥
भूयोऽगमद्विरूपाक्षो मुनिना तेन वै सह। समाहृत्याऽऽशु तद्वाक्यं यत्रासीत् पाण्डुकेश्वरः ॥२॥
भद्रतीर्थजले स्नात्वा[2] पाण्डुकेशमपूपुजत्। तपःसितनवम्यां स भक्त्या पञ्चोपचारकैः ॥३॥
उपोष्याऽभ्यर्च्य तल्लिङ्गं तन्निशायां विरूपदृक्। पप्रच्छ नेमुनिं भूयो माहात्म्यं तीर्थलिङ्गयोः ॥४॥

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल ज्ञानदीपप्रकाशक। भवामि श्रोतुकामोऽहं माहात्म्यञ्च तयोः पुनः ॥५॥
एतल्लिङ्गस्य चोद्भूतिं तीर्थस्य च विशेषतः। प्रशंसनं मुने शीघ्रं वद मे सर्वविद् विभो ॥६॥

नेमुनिरुवाच

आसीत्पुरा द्विजश्रेष्ठः पाण्डुको नाम विश्रुतः। मरीचेरात्मजो धीरः सर्वसत्त्वदयापरः ॥७॥
परिभ्रम्य महीं पूर्णां तीर्थयात्रामटन्मुनिः। अत्रैव प्राप्तवान् वत्स ! विलङ्घ्य पर्वतान् तदा ॥८॥
रेविका च नदी पुण्या चाऽस्रवदद्रिसम्भवा। रेतोवती तथा श्रेष्ठा भद्रकूटसमुद्भवा ॥९॥
तयोरसौ हि सम्भेदे सस्नौ भद्रफलप्रदे। विधिना मुनिशार्दूल भद्रोपायेन चात्मनः ॥१०॥
भद्रतीर्थे सुविख्याते पुण्ये[3] स्नात्वा पुनर्द्विजः। अत्राऽऽराधितवान् रुद्रं जपोपहारकैस्तदा ॥११॥

अध्याय – ११२

भद्रतीर्थ र पाण्डुकेश्वर शिवलिङ्गको महिमा

कुमारस्वामीले भन्नुभयो – गोतीर्थमा स्नान गरेर गोखुरेश्वर महादेवको पूजा गर्‍यो भने बीस जन्मसम्म गरेका पापबाट मुक्त भएर मानिस धर्मात्मा बन्दछ। त्यसपछि विरूपाक्ष नेमुनिको वचन अनुसरण गर्दै उहाँलाई साथमा लिएर पाण्डुकेश्वर भगवान् रहनुभएको ठाउँमा गए। उनले पहिले भद्रतीर्थको जलमा स्नान गरेर माघशुक्ल नवमीका दिन भक्तिपूर्वक पञ्चोपचार विधिले पाण्डुकेश्वर भगवान्को पूजा गरे। विरूपाक्षले भोकै बसेर लिङ्गको पूजा गरेपछि राति त्यस तीर्थ र लिङ्गको बारेमा फेरि नेमुनिसित सोधे ॥१–४॥

विरूपाक्षले भने – ज्ञानको दियो फैलाउने हे मुनिश्रेष्ठ ! हजुरबाट म ती दुई तीर्थको माहात्म्य सुन्न चाहन्छु। यो लिङ्ग र विशेष गरी तीर्थको उत्पत्ति कसरी भयो ? सम्पूर्ण वृत्तान्त जान्ने हे प्रभु ! मलाई यिनीहरूको माहात्म्य तुरुन्त बताइदिनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – अघि पाण्डुक नाम गरेका कुनै उच्च कोटिका ब्राह्मण थिए। मरीचिका छोरा भएर जन्मिएका ती ब्राह्मण सम्पूर्ण प्राणीहरूमाथि दया गर्दथे। हे बाबु ! तीर्थयात्राको क्रममा सम्पूर्ण पृथ्वी घुमेर पर्वतहरू नाघ्दै ती ब्राह्मण यसै ठाउँमा आइपुगे। यहाँ ऋक्षवान् पर्वतबाट पैदा भएकी रेविका नाम गरेकी नदी छन्, त्यस्तै भद्रकूटबाट पैदा भएकी रेतोवती नाम गरेकी नदी छन् ॥७–९॥

हे मुनिश्रेष्ठ ! उनले कल्याणदायक फल दिने ती दुईको सङ्गमस्थलमा आफ्नो कल्याणको कामना गरेर विधिपूर्वक स्नान गरे। भद्रतीर्थ नाम गरेको तीर्थमा स्नान गरिसकेपछि उनले जप तथा पूजासामग्रीद्वारा भगवान् शङ्करको यहाँ नै आराधना गरे ॥१०–११॥

---

१. विंशज्जन्मार्जितैः पापैः प्रमुक्तो धार्मिको भवेत्, इति न.सं.पु.पाठः।
२. प्लाव्य, इति न.सं.पु.पाठः।
३. भद्रतीर्थ इतिख्यातस्तत्र, इति न.सं.पु.पाठः।

पौषकृष्णचतुर्दश्यां निशायां पाण्डुकः पुनः। विनिद्रः स्नातको भक्त्या जजाप तन्मनुं मुनिः ॥१२॥
तस्मादेतत्समुद्भूतं लिङ्गं त्रिभुवनेश्वरम्। अनेनाऽऽराधितं यस्मात्पाण्डुकेश्वरमाश्रुतम् ॥१३॥
अत्रैव च विमुक्तोऽभूदेतल्लिङ्गप्रपूजनात्। निर्वाणं प्राप्तवान् शम्भोः प्रसादादेव शूलिनः ॥१४॥
भूयः शृणु विरूपाक्ष मुक्तश्चाभूत्पुरा द्विज। शङ्कुकर्णो महादैत्यश्चैतदाप्तवरोत्तमः ॥१५॥
नारदवचनाच्चाऽसौ विन्ध्याचलादिहाऽऽगतः। एतत्तीर्थे मुदा स्नात्वा लिङ्गमेतदपूपुजत्[४] ॥१६॥
ददौ पाशुपतमस्त्रं रुद्रस्तस्मै वरोत्तमम्[५]। तद्भक्त्या तोषितोऽत्यन्तं त्रैलोक्यविजयाय च ॥१७॥
ततो वरं हि सम्प्राप्य[६] ह्यजयत्ककुभो द्रुतम्। कृत्वा राज्यञ्च चाऽत्रैव त्रिंशत्कोट्यसुरैः समम् ॥१८॥
जित्वा दिक्पालकानष्टौ सोऽगमत्त्रिदिवं पुनः। युयोध त्रिदशैः सार्द्धं विजयस्य समीहया[७] ॥१९॥
अभिद्रुत्य सुरानत्र शक्रपुरोगमान् द्विज। लुलुण्ठ सर्वशो द्रव्यमैरावतञ्च साम्प्रतम् ॥२०॥
द्रव्यान् प्रलुण्ठ्य नाकेऽसौ चाऽऽदायैरावतं पुनः। शङ्कुकर्णोऽसुरैः सार्द्धं त्वरितं स इहाऽऽययौ ॥२१॥
कतिचिद्वत्सरान् दैत्यश्चाऽत्र राज्यञ्चकार सः। ससुखं तद्वसु भुङ्क्त्वा दैत्यगणैः प्रसेवितः ॥२२॥
ततो देवा विरूपाक्ष ! ब्रह्माणं शरणं ययुः। न्यवेदयन् च[८] तच्चेष्टां त्वरितं विधयेऽमराः ॥२३॥
समाकर्ण्याऽऽशु तच्छेष्टां देवानां वचनं विधिः। भयदुःखेरितं तस्माद् व्याजहार शुभं वचः ॥२४॥

ब्रह्मोवाच

मा कुरुध्वं विषादं नु[९] त्रिदशास्तद्भयादपि। सर्वस्वलुण्ठनात्तस्माच्छक्रस्यैरावतस्य च ॥२५॥
तेनाऽवश्यं फलं देवाः प्राप्तव्यं तपसो द्रुतम्। पाण्डुकेशप्रसादाद्वै लब्धं फलमनुत्तमम् ॥२६॥
प्रतीकारा भविष्यन्ति कालान्ते त्रिदशा हि वः। विष्णोः प्रसादतः शक्र ऐरावतं लभेत सः[१०] ॥२७॥

पाण्डुकले पौषकृष्ण चतुर्दशीको रातमा स्नान गरेर जाग्राम बसी मौन बसी शिवजीको मन्त्र जपे। उनकै आराधनाबाट तीनै लोकका स्वामी भगवान् शङ्करको यो लिङ्ग प्रादुर्भाव भएको हो। पाण्डुकले आराधना गरेको हुँदा यस लिङ्गको नाम पाण्डुकेश्वर रहेको हो। भगवान् शङ्करको यस लिङ्गको पूजाको प्रभावले गर्दा पाण्डुक यसै ठाउँमा मुक्त भए। भगवान् शङ्करको अनुग्रहले ऊ शिवजीमा लीन भए ॥१२–१४॥

हे विरूपाक्ष ! अघि शङ्कुकर्ण नाम गरेको ठूलो दैत्य यसै लिङ्गको आराधनाबाट उत्तम वर प्राप्त गरी मुक्त भएको थियो, सुन। नारदको वचन सुनेर त्यो दैत्य विन्ध्याचल पर्वतबाट यहाँ आई त्यसले यस तीर्थमा प्रसन्न भएर स्नान गऱ्यो र भगवान् शङ्करको यस लिङ्गको पूजा गऱ्यो ॥१५–१६॥

भगवान् शङ्करले उसको भक्तिबाट अत्यन्त प्रसन्न भएर तीनै लोकको विजयका निमित्त उत्तम वरका रूपमा पाशुपतास्त्र दिनुभयो। भगवान् शङ्करबाट वर पाएर त्यसले तुरुन्त दिशाहरू जित्यो। उसले यहाँ तीस करोड राक्षसहरूका साथमा रही राज्य गऱ्यो। त्यो आठ दिक्पालहरूलाई जितेर त्यो स्वर्गतिर लाग्यो र स्वर्गलाई जित्ने इच्छाले उसले देवताहरूसँग युद्ध गऱ्यो ॥१७–१९॥

हे विरूपाक्ष ! उसले स्वर्गमा इन्द्र आदि गरिएका देवताहरूलाई लघारेर सबै सम्पत्ति र ऐरावत हात्तीसमेत लुटेर लियो। त्यो शङ्कुकर्ण स्वर्गमा द्रव्यहरू लुटेर ऐरावतलाई साथमा लिई राक्षसहरूका साथ तुरुन्त यहाँ आयो। त्यस दैत्यले यहाँ केही वर्ष सुखसँग दैत्यगणद्वारा सुसेवित भएर सम्पत्ति भोग गर्दै राज्य गऱ्यो। हे विरूपाक्ष ! त्यसपछि देवताहरू ब्रह्माजीको शरणमा गए। उनीहरूले तुरुन्त त्यस राक्षसको क्रियाकलाप ब्रह्माजीलाई निवेदन गरे ॥२०–२३॥

ब्रह्माजीले राक्षसबाट भयभीत र दुःखी बनेका देवताहरूको वचन सुनेर राक्षसका सबै क्रियाकलापहरूबारे अवगत भएपछि कल्याणकारक वचन बोल्नुभयो। हे देवता हो ! तिमीहरू त्यस राक्षसले इन्द्रको सम्पूर्ण सम्पत्ति र ऐरावत हात्ती लुट्यो भन्दै त्यसदेखि डराएर दुःखित नबन। हे देवता हो ! त्यसले तपस्या गरेको फल अवश्य पाउने नै थियो। पाण्डुकेश्वर भगवान्को कृपाबाट उसले उत्तम फल पाएको हो। हे देवता हो ! समय पुगेपछि प्रतीकारहरू हुनेछन्। विष्णुको अनुग्रहले इन्द्रले अवश्य पनि ऐरावत हात्ती पाउनेछन् ॥२४–२७॥

---

४. चैतल्लिङ्गमपूपुजत्, इति न.सं.पु.पाठः।
५. ददौ तस्मै तदा रुद्रः पाशुपतास्त्रं वरोत्तमम्, इति न.सं.पु.पाठः।
६. समालभ्य, इति न.सं.पु.पाठः।
७. तत्र जयस्य लिप्सया, इति न.सं.पु.पाठः।
८. निवेदन्ति स्म, इति न.सं.पु.पाठः।
९. मा मा विषादयध्वं नु, इति न.सं.पु.पाठः।
१०. शक्रः सत्यमैरावतं लभेत्, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्युक्त्वा च ततो देवान् ब्रह्मा चाऽन्तर्दधे दिवि। विष्णुं ततः पुरोधाय समाजग्मुश्च[११] निर्जराः ॥२८॥
युयुधुरसुरा देवाः परस्परजयैषिणः। शस्त्रास्त्रक्षेपणैस्तीव्रं स्वैः स्वैः सैन्यैः समावृताः ॥२९॥
ववृषुर्बाणवर्षाणि देवसैन्येषु दानवाः। अन्धीभूता दिशश्चाऽत्र खड्गैर्जघ्नुश्च देवताः ॥३०॥
उत्तीर्य शरजालाँश्च गरुडः क्रोधमूर्च्छितः। अद्रिसानुं द्रुमान् ग्रावान् समादायाऽम्बराद्ययौ ॥३१॥
स ववर्षाऽम्बरात्ताक्ष्र्यो दैत्यसैन्योपरि ध्रुवम्। चञ्चुपूर्णजलं तीव्रं पक्षवातेन पीडयन् ॥३२॥
पेतुर्भूमौ तदा दैत्या वज्रेणैव यथा द्रुमाः। व्यसवः पतिताः सर्वे दशानां कोटयः पुनः ॥३३॥
अवशिष्टाँश्च तान् शक्रः विष्णुश्चाऽन्ये सुराः पुनः। चक्राशनिशरैः खड्गैर्जघ्नुरामर्षणैर्द्रुतम् ॥३४॥
सम्प्रेक्ष्य पतितान् दैत्यान् शङ्कुकर्णो हि रुष्टवान्। अद्रिसानुं समादाय मायया व्योम्नि चाययौ ॥३५॥
तं प्रेक्ष्य विश्वकर्माऽऽशु देवानत्र न्यषेधयत्। दुद्रुवुर्देवताश्चाऽस्मात्त्यक्त्वा युद्धं दिशो द्रुतम् ॥३६॥
ततश्चिक्षेप देवेषु शङ्कुकर्णोऽद्रिशेखरम्। समागत्य पुनश्चाऽत्र चखान गिरिशेखरम्[१२] ॥३७॥
चिक्षेप स पुनः सानुं देवसैन्ये पुनः पुनः। चिक्षेप विष्णुमुद्दिश्य पाशुपतास्त्रमाशु च ॥३८॥
क्रोधाविष्टस्ततो विष्णुश्चिक्षेपाऽऽशु सुदर्शनम्। पाशुपतास्त्रमुद्दिश्य प्रज्वलद्[१३] गगने गतम् ॥३९॥
चक्रं पाशुपतास्त्रं ते युयुधतुर्विहायसि। जघ्नतुस्ते मिथश्चाऽस्त्रैः द्योतयती दिशोऽर्चिभिः ॥४०॥

नेमुनिले भन्नुभयो– यति भनेर ब्रह्मा आकाशमा अन्तर्धान हुनुभयो। देवताहरू पनि विष्णुलाई अगाडि लगाएर यहाँ आए। परस्पर विजयको आकाङ्क्षा राख्ने देवता र राक्षसहरू आ–आफ्ना सेनाले युक्त भएर शस्त्र तथा अस्त्रहरू खूबसित प्रहार गर्दै लड्न लागे। दानवहरूले देवताको सेनामाथि बाणहरूको वर्षा गरे भने देवताहरूले पनि तिनीहरूलाई तरवारले हिर्काए। यसरी युद्धले सम्पूर्ण दिशा अँध्यारा भए। बाणबाट उम्किएर गरुडले रीसले मूर्च्छित हुँदै पहाडका टाकुराहरू, वृक्षहरू र पत्थरहरू लिएर आकाशबाट आए ॥२८–३१॥

गरुडले दैत्यहरूको सेनामाथि थुम्काहरू फाले, पखेटाले हिर्काउँदै चुच्चामा राखेका पानीको वर्षा गरे। त्यसबेला वज्रप्रहारले रुख ढले जस्तै दश करोड दैत्यहरू प्राण छोडेर भूमिमा पछारिए। अत्यन्त क्रुद्ध भएर इन्द्र, विष्णु र अरु देवताहरूले बाँकी रहेका ती दैत्यहरूलाई चक्र, वज्र, बाण तथा खड्गले हिर्काए। दैत्यहरू त्यसरी ढलेको देखेर शङ्कुकर्ण रिसाएर मायाजाल रच्दै पहाडका टाकुराहरू बोकी आकाशमा आयो ॥३२–३५॥

त्यो देखेर सबै देवताहरू छिट्टै-छिट्टै युद्धस्थल छाडेर विभिन्न दिशातिर भाग्न थाले। देवताहरू भाग्न लागेको देखेर विश्वकर्माले उनीहरूलाई भाग्न दिएनन्। त्यसपछि शङ्कुकर्णले देवताहरूमाथि पहाडको टाकुरो फ्याँक्यो। फेरि आएर त्यसले अर्को पहाडको टाकुरो उखेल्यो। त्यसपछि उसले देवताका सेनामाथि बारम्बार पहाडका टाकुराहरूद्वारा प्रहार गऱ्यो। उसले विष्णुलाई लक्ष्य गर्दै तुरुन्त पाशुपतास्त्र छोड्यो ॥३६–३८॥

रिसाउँदै भगवान् विष्णुले पनि बल्दै आकाशमा उडेको पाशुपतास्त्रलाई लक्ष्य गरेर तुरुन्त सुदर्शनचक्र छोड्नुभयो। सुदर्शनचक्र र पाशुपतास्त्र आकाशमा लड्न थाले। आफ्नो कान्तिले दिशाहरूलाई उज्यालो पार्दै विभिन्न शस्त्रहरूद्वारा ती दुई हानाहान गर्न थाले ॥३९–४०॥

---

११. चात्राययुश्च, इति न.सं.पु.पाठः।
१२. उच्चखानाद्रिशेखरम्, इति न.सं.पु.पाठः।
१३. ज्वलन्तम्, इति न.सं.पु.पाठः।
१४. ते, इति न.सं.पु.पाठः।
१५. ... ज्वलनोदिते, इति न.सं.पु.पाठः।

दुद्राव देवसैन्यं तत्[१४] प्रेक्ष्य भयातुरं दिशः। प्रलयानलसङ्काशैरद्भुतज्वलनैर्युतम्[१५] ॥४१॥
ददर्श शङ्करो विष्णुर्जगद्धर्तुं समुद्यते। हाहाकारे जगद् भूतं क्षयकाले यथा पुरा ॥४२॥
ततो रुद्रश्च विष्णुश्च ह्युत्पेततुश्च पुष्करे। जगृहतुस्तदा ते हि स्वं स्वञ्चास्त्रं जगत्प्रभू ॥४३॥
भूयो हन्तुं द्रुतं दैत्यं प्रचक्रे विष्णुरव्ययः। ततो व्याचष्ट रुद्रो वै वचनं श्रीहरिं तदा ॥४४॥

रुद्र उवाच

भो विष्णो ! भवता चैष हन्तव्यो न कदापि च। मया दत्तो वरश्चास्मै चिरजीवी भवेति वै[१६] ॥४५॥
शक्रो धृत्वा[१७] स्वकं वाहं गच्छतु त्रिदिवं सुरैः। विष्णो ! गच्छ समं तेन दत्त्वाऽस्मै चाऽभिषेचनम्[१८] ॥४६॥

नेमुनिरुवाच

वचो निशम्य रुद्रस्य देवाश्च प्रमथास्तदा। अत्राऽऽययुर्मुदा वाद्यैः कर्तुं तस्याऽभिषेचनम्[१९] ॥४७॥
एतत्तीर्थजलैस्तस्मै जाम्बूनदघटोद्धृतैः। अभिषेकं ददुर्देवा गीतवाद्यैः समादृताः ॥४८॥
ऐरावतं समारुह्य ययौ शक्रः सुरैः सह। गरुडस्थो ययौ विष्णुर्वैकुण्ठञ्च विमानगैः ॥४९॥
शङ्कुकर्णं विमानस्थं निन्युः शिवपुरं परम्। प्रमथा गीतवाद्यैस्तं रुद्राज्ञया प्रसेव्य च ॥५०॥
एतल्लिङ्गप्रसादात् सोऽभवद्[२०] विरूपदृक् सुखी। अद्यापि शङ्कुकर्णोऽपि रुद्रस्याऽनुचरो गणः ॥५१॥
नारदाख्ये महातीर्थे चेतो याम्यदिशि[२१] व्रज। व्योमशृङ्गाद्रिसानौ त्वं स्नात्वा मुनिं समर्चय ॥५२॥
स्नानात्तत्र भवेत्[२२] पुण्यमश्वमेधाद्यदुद्भवम्। अपवित्रोऽपि यः स्नातो भवेद्धि संयतो द्रुतम् ॥५३॥

प्रलयकालको आगोझैं खूबसित बलिरहेका ती दुई अस्त्रलाई देखेर डरले आत्तिएका देवसैन्य विभिन्न दिशामा भाग्न थाल्यो। भगवान् विष्णु र शङ्करले संसारको संहारका लागि तयार भएका ती दुई अस्त्रलाई देख्नुभयो। अघि प्रलयकालमा जस्तै संसारमा हाहाकार मच्चियो। त्यसपछि भगवान् शङ्कर र विष्णु आकाशमा उफ्रनुभयो। संसारका स्वामी उहाँहरूले आ–आफ्नो अस्त्र समात्नुभयो। अविनाशी विष्णु दैत्यहरूलाई मार्न तुरुन्त तत्पर हुनुभयो। त्यसपछि भगवान् शङ्करले विष्णुलाई भन्नुभयो ॥४१–४४॥

शङ्करले भन्नुभयो – हे विष्णु ! यस दैत्यलाई मैले धेरै समयसम्म बाँच्ने वर दिएको हुनाले तपाईंले पनि यस दैत्यलाई कहिले पनि मार्न पाउनुहुन्न। इन्द्र आफ्नो वाहन लिएर देवताहरूका साथ स्वर्गमा जाऊन्। हे विष्णु ! यसलाई यसै ठाउँमा अभिषेक दिएर तपाईं पनि जानुहोस् ॥४५ –४६॥

नेमुनिले भन्नुभयो – यसरी भगवान् शङ्करले भनेको सुनेर देवता र प्रमथगणहरू खुसी हुँदै बाजा लिएर त्यस दैत्यलाई अभिषेक गर्न त्यहाँ आए। उनीहरूले गीत गाउँदै, बाजा बजाउँदै सुनका घडाहरूमा राखेका तीर्थका जलले ससम्मान त्यसको अभिषेक गरे। त्यसलाई अभिषेक दिएर ऐरावत हात्तीमा चढेर इन्द्र विमानचारी देवताहरूका साथ स्वर्ग गए। गरुडमा चढेका विष्णु पनि वैकुण्ठतिर जानुभयो। प्रमथगणहरूले भगवान् शङ्करको निर्देशन अनुसार गीत र बाजाद्वारा सम्मान गर्दै शङ्कुकर्णलाई विमानमा राखेर उत्तम शिवलोकमा लगे ॥४७–५०॥

यसै लिङ्गको अनुग्रहबाट शङ्कुकर्ण आज पनि सुखी भएर बसेको छ। जसले यस तीर्थमा स्नान गर्छ त्यो तुरुन्त जितेन्द्रिय बन्छ। हे विरूपाक्ष ! अब तिमी यहाँबाट दक्षिण दिशामा रहेको व्योमशृङ्ग नाम गरेको पहाडको टाकुरामा अवस्थित नारद महातीर्थमा जाऊ। त्यहाँ स्नान गरेर ऋषिको पूजा गर। त्यहाँ स्नान गऱ्यो भने अश्वमेध यज्ञ गर्दा प्राप्त हुने सबै यज्ञफल पाउन सकिन्छ। त्यहाँ स्नान गरे अपवित्र व्यक्ति पनि चाँडै नै बुद्धिमान् हुन्छ ॥५१–५३॥

---

१४. ते, इति न.सं.पु.पाठः।
१५. .....ज्वलनोदिते, इति न.सं.पु.पाठः।
१६. वरश्चाऽस्मिन् चिरञ्जीवी च मे पुनः
१७. गृह्य, इति न.सं.पु.पाठः।
१८. समञ्चात्र चास्मै तत्त्वाभिषेचनम्, इति न.सं.पु.पाठः।
१९. वाद्यैस्तस्मै समभिषेचितुम्, इति न.सं.पु.पाठः।
२०. स भवेत्, इति न.सं.पु.पाठः।
२१. चातो याम्ये दिशि, इति न.सं.पु.पाठः।
२२. लभेत्, इति न.सं.पु.पाठः।

भूयो गच्छ विरूपाक्ष ! चित्रकूटेश्वरो विभुः । अतो योजनदूरे च वारुण्यां[२३] दिशि सांप्रतम् ॥५४॥
स्नात्वा गालवतीर्थे त्वं कूटेश्वरं समर्चय । तत्रैव वाञ्छितं कामं प्राप्स्यसि त्वं[२४] न संशयः ॥५५॥
एतद्धि तुभ्यं कथितं मया वै माहात्म्यमेतस्य च शूलिनोऽद्य ।
भद्राख्यतीर्थस्य विशेषतश्च भूयश्च वक्ष्यामि च तत्र ते तत् ॥५६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
भद्रतीर्थपाण्डुकेश्वरयोर्माहात्म्यं नाम द्वादशाधिकशततमोऽध्यायः ॥११२॥

हे विरूपाक्ष ! अब तिमी यहाँबाट चार कोस टाढा पश्चिम दिशामा जहाँ चित्रकूटेश्वर भगवान् रहनुभएको छ, त्यहाँ जाऊ । त्यस स्थान पुगेर गालव तीर्थमा स्नान गरेर कूटेश्वर भगवान्को पूजा गर । त्यहाँ तिमीले चाहेको फल पाउनेछौ, यसमा शङ्का छैन । मैले तिमीलाई भगवान् पाण्डुकेश्वर शङ्करको माहात्म्य तथा विशेष गरी भद्रतीर्थको माहात्म्य बताएँ । रुद्रतीर्थको त्यो विशेष माहात्म्य म फेरि तिमीलाई भन्नेछु ॥५४-५६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भद्रतीर्थ र पाण्डुकेश्वरको माहात्म्यनामक एकसय बाह्रौं अध्याय पूरा भयो ।

---

२३. **वारुणे, इति न.सं.पु.पाठः ।** २४. **लभिष्यसि, इति न.सं.पु.पाठः ।**

त्रयोदशाधिकशततमोऽध्यायः

गालवतीर्थकूटेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

स्नात्वा तत्र विरूपाक्षः प्राप्तवान्[1] भद्रमात्मनः । प्रभुत्वं लब्धवान् भूयः पाण्डुकेशप्रसादतः ॥१॥
ततोऽगमद् द्विजोऽगस्त्य ! यत्र कूटेश्वरो विभुः । सस्नौ गालवतीर्थेऽसौ विधिवद् भक्तितो मुदा ॥२॥
तपःसिते दशम्याञ्च स्नात्वा तत्र विरूपदृक् । अत्र कूटं समारुह्य कूटेश्वरमपूपुजत् ॥३॥
सम्पूज्य विधिवल्लिङ्गं नक्तं भक्त्वा घटोद्भव । अपृच्छल्लिङ्गमाहात्म्यं तीर्थस्य नेमुनिं हि स ॥४॥

विरूपाक्ष उवाच

नमस्ते भगवन्भूयः सर्ववार्त्ताविशारद । भवतः श्रोतुकामोऽहं माहात्म्यमेतयोर्ध्रुवम् ॥५॥
समुद्भूतं कथं[2] लिङ्गं केन प्रकाशितं पुनः । तीर्थस्य च विशेषेण वद मे नेमुनेऽधुना ॥६॥

नेमुनिरुवाच

आसीत्पुरा मुनिर्विप्र ! गालवो नाम विश्रुतः । स्वेच्छया च तपः कर्तुमिहैव प्राप्तवाँस्तदा ॥७॥
नदी गण्डाद्रिसंभूता गण्डवतीति विश्रुता । श्वेतकान्तिर्नदी पुण्या तयोर्योगे महाफलम् ॥८॥
कृष्णाष्टम्याञ्च माघस्य सस्नौ तत्र यथाविधि । समुपास्य तदा सन्ध्यामारुहदेनमाशु च ॥९॥
तत्र स्नातं[3] मुदा पूर्वं गालवमुनिना द्विज । तस्माद् गालवतीर्थेति प्रोक्तञ्च मुनिभिः पुरा ॥१०॥
स्नातकश्चाऽत्र कूटं स चैतदारुह्य भक्तितः । आराधयन् शिवं तस्थौ श्रद्धया[4] गालवो द्विज ॥११॥

अध्याय – ११३

गालवतीर्थ र कूटेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यहाँ स्नान गरेर विरूपाक्षले आत्मकल्याण प्राप्त गरे भने पाण्डुकेश्वर भगवान्को अनुग्रहबाट उनी सामर्थ्यवान् भए । हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष कूटेश्वर भगवान् बस्नुभएको क्षेत्रमा गए । उनले त्यहाँ रहेको गालव तीर्थमा विधि अनुसार भक्तिपूर्वक स्नान गरे । माघशुक्ल दशमीका दिन त्यस तीर्थमा स्नान गरेर विरूपाक्षले त्यस पहाडको शिखरमा चढेर कूटेश्वर भगवान्को पूजा गरे । हे अगस्त्य मुनि ! उनले विधिपूर्वक भक्तियुक्त भई त्यस लिङ्गको पूजा गरिसकेपछि रातमा नेमुनिसित शिवलिङ्ग र तीर्थको माहात्म्यसम्बन्धी प्रश्न गरे ॥१–४॥

विरूपाक्षले भने – सम्पूर्ण वृत्तान्तका ज्ञाता हे नेमुनि ! म हजुरलाई फेरि पनि नमस्कार गर्छु । यस लिङ्गको उत्पत्ति कसरी भयो ? कसले यसलाई प्रकाशमा ल्यायो ? विशेष गरी यो तीर्थको महत्त्व के छ ? हे नेमुनि ! यी सबै कुरा म हजुरबाट सुन्न चाहन्छु, मलाई अहिले नै बताइदिनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि गालव नाम गरेका ऋषि थिए । उनी आफ्नो इच्छा अनुसार तपस्या गर्न यसै ठाउँमा आए । गण्ड पर्वतबाट निस्किएकी गण्डवती नामकी नदी छन् । त्यस्तै श्वेतकान्ति नाम गरेकी पवित्र अर्की नदी छन् । ती दुईको सङ्गममा पुण्य गरेको ठूलो फल प्राप्त हुन्छ । विरूपाक्षले माघकृष्ण अष्टमीका दिन त्यस तीर्थमा विधिपूर्वक स्नान गरे, सन्ध्यावन्दन गरे र तुरुन्त यस पर्वतमा आरोहण गरे । अघि गालव ऋषिले यस तीर्थमा स्नान गरेको हुनाले ऋषिहरूले यसलाई गालव तीर्थ भने । गालव ऋषिले यस तीर्थमा स्नान गरेर शिखरमा चढे । अनि शिवजीको आराधना गरेर यही ठाउँमा बसे ॥७–११॥

---

१. अलभत, इति न.सं.पु.पाठः ।
२. कथं समुद्भवम्, इति न.सं.पु.पाठः ।
३. स्नात्वा, इति न.सं.पु.पाठः ।
४. अत्रैव, इति न.सं.पु.पाठः ।

नवम्यां तन्निशायाञ्च लिङ्गस्यास्य समुद्भवः[५] । ध्यायमाने समभ्यर्च्य गालवे मुनिसत्तमे ॥१२॥
समालोक्य मुनिर्लिङ्गं भक्त्या पूजितवान् मुदा । स्तुत्वा परिक्रमन् भूयो ननामाङ्गैर्मुहुर्मुहुः ॥१३॥
ईश्वरेण वरस्तस्मै दत्तो मोक्षः सुदर्ल्लभः[६] । तद्भक्त्या तोषितेनार्य ह्यञ्जसा खलु शूलिना ॥१४॥
किञ्चित्कालान्तरे सोऽपि निर्वाणं लब्धवान्मुनिः । एतल्लिङ्गं तदद्यापि देवर्षिभिः प्रसेवितम् ॥१५॥
भुक्तिमुक्तिप्रदं साक्षात्पूजकेभ्यो न संशयः । शैलारोहणमात्रेण भूयः पापं विनश्यति ॥१६॥
गालवस्य च तीर्थे यः स्नात्वा पश्यति शूलिनम् । पञ्चजन्मार्जितैः पापैः स मुक्तो नात्र संशयः ॥१७॥
भूयः शृणु प्रवक्ष्यामि मुक्तः कश्चिन्नृपोत्तमः । जातिस्मरणमास्थाय लिङ्गस्यास्य प्रदर्शनात्[७] ॥१८॥
विराटाधिपतिर्भूपः सुदर्शन इति श्रुतः । यौवनस्थो[८] रतिप्रीतो राजसीं बुद्धिमाश्रितः ॥१९॥
स कदाचिद्दिने भूपो मृगयां गतवान् द्विज । स्वसैन्यैर्धन्विभिः सार्द्धं वनाद्वनान्तरं गतः ॥२०॥
ददर्श कृष्णसारं स चरन्तं गिरिशेखरे । आकर्णमुद्गतं बाणं हन्तुं प्रचक्रमे च तम् ॥२१॥
हयावतरणात् शब्दात् स ददर्श धनुर्धरम्[९] । लङ्घयित्वाऽभिदुद्राव कन्दराः पर्वतानपि[१०] ॥२२॥
नृपस्तदनु दुद्राव तं हन्तुञ्च वनाद्वनम् । अत्रैव प्राप्तवान् विप्र ! स मृगो नृपतिस्तथा ॥२३॥
उत्प्लवेनास्पृशल्लिङ्गमेतन्मृगश्च तद्भयात् । स जातिस्मरणं प्राप्य तस्मादुवाच सत्वरम् ॥२४॥

मुनिश्रेष्ठ गालव पूजा गरेर ध्यानमग्न भएको अवस्थामा नवमीको रातमा यस लिङ्गको प्रादुर्भाव भयो । लिङ्ग प्रकट भएको देखेर ऋषिले भक्तिपूर्वक प्रसन्न हुँदै पूजा गरे । त्यसपछि स्तुति गरेर बारम्बार परिक्रमा गर्दै उनले सबै अङ्ग झुकाएर नमस्कार गरे । भक्तिबाट प्रसन्न भएका त्रिशूलधारी भगवान् शङ्करले ती ऋषिलाई दुर्लभ मोक्ष प्रदान गर्नुभयो ॥१२-१४॥

केही समयपछि ती ऋषि मुक्त भए । देवताहरूले त्यस समयदेखि आजसम्म पनि यस लिङ्गको सेवा गर्दै आएका छन् । पूजा गर्ने व्यक्तिलाई यस लिङ्गले साक्षात् भुक्ति तथा मुक्ति दिन्छ, यसमा सन्देह छैन । यो पहाड चढ्यो भने मात्रै पनि पाप नाश हुन्छ । जसले गालव तीर्थमा स्नान गरेर यहाँ रहेका भगवान् शङ्करको दर्शन गर्छ त्यो पाँच जन्मसम्म गरेका पापबाट मुक्त हुन्छ, यसमा शङ्का छैन ॥१५-१७॥

म फेरि बताउँछु, सुन – कुनै उत्तम राजाले यस शिवलिङ्गको दर्शन गरेका थिए । त्यसबाट पूर्वजन्मको सबै वृत्तान्त थाहा पाएका उनी मुक्त भए । विराट् नाम गरेको राज्यमा सुदर्शन नाम गरेका युवक राजा थिए । शृङ्गार गर्न मन पराउने उनको बुद्धि राजसी प्रवृत्तिमा लागेको थियो । हे विरूपाक्ष ! कुनै दिन ती राजा शिकार खेल्न निस्किए । धनुर्धारी आफ्ना फौजहरूलाई साथमा लिएर उनी एक वनबाट अर्को वनमा गए ॥१८-२०॥

ती राजाले पहाडको टाकुरामा चर्न लागेको कृष्णसार मृग देखे । उनले धनुषलाई कानसम्म तानेर त्यसलाई बाणले हिर्काउन लागे । त्यस मृगले घोडाको आवाज सुनेर हेर्दा धनुष लिएका राजालाई देख्यो । त्यसपछि त्यो एउटा पर्वतबाट अर्को पर्वत हुँदै हाम फालेर गुफा भएका पर्वतहरूतिर भाग्यो । हे विरूपाक्ष ! राजा पनि त्यस मृगलाई मार्नका लागि एउटा वनबाट अर्को वन हुँदै पछिपछि दौडिए । यसपछि ती दुबै यही तीर्थमा आइपुगे । राजाको डरले उफ्रिएर भाग्दा मृगले शिवलिङ्गलाई छुन पुग्यो र उसले पूर्वजन्मको सबै वृत्तान्त थाहा पायो अनि राजालाई तुरुन्त भन्यो ॥२१-२४॥

---

५. ईश्वरेण वरं तस्मै दत्तं मोक्षं सुदुर्ल्लभम्, इति न.सं.पु.पाठः ।
६. एतल्लिङ्गं समुद्भवम्, इति न.सं.पु.पाठः ।
७. एतल्लिङ्गप्रदर्शनात्, इति न.सं.पु.पाठः ।
८. सुदर्शनो नाम विश्रुतः । युवावस्थो, इति न.सं.पु.पाठः ।
९. हयावतरनाच्छब्दात्सोऽप्यपश्यद्धनुर्धरम्, इति न.सं.पु.पाठः ।
१०. अभिदुद्राव लङ्घ्याद्रिं सकन्दरांश्च पर्वतान्, इति न.सं.पु.पाठः
११. तस्मादुवाच, इति न.सं.पु.पाठः ।

कृष्णसार उवाच

राजन् ! शृणु वचो मे त्वं हितप्रसूचकं तव। ततो विमृश्य माञ्चाऽत्र हनिष्यसि यथासुखम् ॥२५॥
पूर्वजन्मन्यहं राजा चाऽभवं कोशलाधिपः। तत्र राज्यं सुखञ्चक्रे सर्वभोग्यैर्महासुखम् ॥२६॥
एकदा दिवसे राजन् ! दोषहीनो[११] महामृगः। मया हतश्चरन् सानौ मृगयायां भवानिव ॥२७॥
तत्पापेन मृगो भूत्वा विचरामि वनाद्वनम्। सोऽपि धनुर्धरो भूत्वा हतवान् मां सहस्रधा ॥२८॥
एतल्लिङ्गप्रसादाद्वै जातिस्मरणतां गतः। उत्प्लवेन च केनापि नाहं दृष्टो हि तद्भयात्[१२] ॥२९॥
त्यक्त्वा चेमां तनुं राजन् ! गमिष्यामि परं पदम्। गालवाख्येऽधुना तीर्थे पश्य पश्य नृपोत्तम ॥३०॥

नेमुनिरुवाच

परिक्रम्य मृगो लिङ्गं मूर्ध्ना स्पृश्य ननाम च। अवतार शैलाद्वै गालवतीर्थमाशु च ॥३१॥
सोऽपि राजा ययौ शीघ्रं तद् द्रष्टुं तत्र कौतुकम्। निशम्य तद्वचश्चित्रं परित्यज्य स्वकार्मुकम् ॥३२॥
कश्चिन्म्लेच्छश्च तं तत्र मृगं जघान पत्रिणा। तत्तीर्थजलपाने वै पूर्ववैरधनुर्धरः ॥३३॥
वाणाघातव्रणैर्युक्तः[१३] पञ्चत्वं प्राप्तवान् मृगः। म्लेच्छस्तन्मांसमादाय स्वाश्रमं हि ययौ मुदा ॥३४॥
तत्तनुञ्च परित्यज्य प्राप्तवान् भूपविग्रहम्। अभूत्स वै विरूपाक्ष ! पूर्वत्रिगुणसुन्दरः ॥३५॥
आययुः शिवदूताश्च पुष्पकपाणयस्तदा। तमास्थाय च तद्याने निन्युः शिवपुरं महत् ॥३६॥
पुष्पवर्षैर्महच्चित्रैर्गीतवाद्यैर्महोत्सवैः। चामरैः सेवितं तञ्च[१४] नृपोऽपश्यद्धि यानगम् ॥३७॥
तमाश्चर्यं समालोक्य नृपोऽप्यसौ विरक्तवान्। एतत्तीर्थे द्रुतं स्नात्वा चात्रागमच्छिलोच्चये ॥३८॥
सुखं दुःखं जहौ राजा मृगस्य वचनात्तदा। राज्याङ्गानि विरज्यासौ[१५] कृत्वा सत्यञ्च तद्वचः ॥३९॥

कृष्णसार मृगले भन्यो – पूर्वजन्ममा म कोशल देशको राजा थिएँ। त्यहाँ मैले आनन्द र सुखसित सबै भोग्य पदार्थको भोग गर्दै राज्य गरेँ। हे राजन् ! एकदिन तपाईं जस्तै शिकार खेल्न गएको बेलामा मैले पर्वतको शिखरमा चरिरहेको निरपराध मृगलाई मारेँ। त्यही पापले गर्दा म मृग भएर म वन–वन डुलिरहेको छु। त्यस मृगले पनि धनुर्धारी भएर मलाई हजारौँ पटक मारिसक्यो। उफ्रिएर स्पर्श गर्दा यस शिवलिङ्गको अनुग्रहबाट मैले पूर्वजन्मको ज्ञान पाएँ। उहाँलाई मैले देखेको छैन। हे राजन् ! यो शरीरलाई छाडेर म अहिले नै यस गालव तीर्थमा उत्तम गति प्राप्त गर्नेछु, हेरिरहनुहोस् ॥२६–३०॥

नेमुनिले भन्नुभयो – त्यसपछि त्यस मृगले लिङ्गको परिक्रमा गर्‍यो, लिङ्ग स्पर्श गरेर शिरले प्रणाम गर्‍यो र तुरुन्त गालव तीर्थमा ओर्लियो। ती राजाले पनि उसको विचित्र वचन सुनेपछि त्यो रमाइलो दृश्य हेर्न राजा आफ्नो धनुष त्यहीँ मिल्काएर तुरुन्तै त्यहाँ आए। पूर्वजन्मको वैरी धनुर्धारी कुनै म्लेच्छले तीर्थमा गएर जल पिउन लागेको बेलामा त्यस मृगमाथि बाण प्रहार गर्‍यो। त्यो मृग बाणबाट लागेको घाउलाई सहन नसकेर मर्‍यो। म्लेच्छ त्यस मृगको मासु लिएर प्रसन्न हुँदै आफ्नो घरतिर लाग्यो ॥३१–३४॥

हे विरूपाक्ष ! त्यस मृगले त्यो शरीर छाडी राजाको शरीर लियो। त्यो अघिभन्दा तीन गुणा बढी सुन्दर भयो। शिवजीका दूतहरू पुष्पक विमान लिएर त्यहाँ आए। उसलाई त्यसै यानमा राखेर उत्तम शिवलोकमा लगे। ती राजाले फूलको वर्षा गरेर विचित्र किसिमका गीत गाउँदै, बाजा बजाउँदै ठूलो उत्सवका साथ चामर हल्लाएर त्यसलाई यानमा राखी लैजान लागेको देखे। आश्चर्यपूर्ण त्यो घटना देखेपछि राजा पनि विरक्त भए र तुरुन्त यस तीर्थमा स्नान गरेर उनी त्यस पर्वतको टाकुरामा आए। त्यसपछि राजाले मृगको वचनलाई सत्य ठानी सुखदुःख सबै छोडिदिए, विरक्त भएर राज्यका अङ्गहरूलाई पनि त्यागे ॥३५–३९॥

---

१२. निरपराधः, इति न.सं.पु.पाठः।
१३. उत्प्लवेनाहमेतद्भो स्पर्शितो न च दर्शितः, इति न.सं.पु.पाठः।
१४. वाणाघातव्रणासह्य, इति न.सं.पु.पाठः।
१५. चामरोद्भूयमानं तम्, इति न.सं.पु.पाठः।

एतल्लिङ्गं मुदा राजा भक्त्या च समुपासते। संसारं भाजनं ज्ञात्वा स्वप्नवत्सुखदुःखयोः ॥४०॥
सोऽपि पञ्चत्वमापन्नः चात्रैकाब्दान्तरे नृपः। समर्च्य श्रद्धया लिङ्गमस्मिन् तीर्थे सुसेवितम्[१६] ॥४१॥
स्वविग्रहविनिर्मुक्तं तद्याने प्रमथा द्रुतम्। आदरेण तमास्थाय निन्युः शिवपुरं परम् ॥४२॥
दुर्मुखः सुमुखस्तौ च ह्यभूतां रुद्रपार्श्वगौ। मृगाङ्गं नरदेहञ्च विमुच्याऽपूर्वविग्रहौ ॥४३॥
तौ माघशुक्लपञ्चम्यामेतल्लिङ्गप्रदर्शनात्। मृगनरतनू तस्मादभूतां प्रमथाधिपौ ॥४४॥
सुदुर्लभञ्च लोकानामेतल्लिङ्गस्य दर्शनम्। भुक्तिमुक्तिप्रदं साक्षाद् दर्शनात्स्पर्शनाद्धि तत् ॥४५॥
भूयो गच्छ विरूपाक्ष ! दिश्युदीच्यां च पर्यटन्[१७]। सार्द्धे च योजने दूरे यत्रास्ते चासितेश्वरः ॥४६॥
संस्नायासिततीर्थे त्वं सम्पूजयासितेश्वरम्। बहुयोजनञ्च त्वं गन्तु शक्तो भविष्यसि ध्रुवम् ॥४७॥
द्वादश्यां माघशुक्लस्य स्नातव्यं तत्र सर्वदा। जागरया[१८] ततो रुद्रः पूजनीयो महोत्सवैः ॥४८॥

प्रोक्तं माहात्म्यं खलु तेऽधुना श्रीकूटेश्वरस्यार्य विरूपनेत्र।
भूयश्च वक्ष्यामि माहात्म्यमन्यत् तत्रैव धीमन् ह्यसितेश्वरस्य ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां गालवतीर्थकूटेश्वरयोर्माहात्म्यं नाम त्रयोदशाधिकशततमोऽध्यायः ॥११३॥

उनले संसारलाई स्वप्नजस्तै सुख र दुःखको मुहान सम्झिएर भक्तिपूर्वक प्रसन्न हुँदै यस लिङ्गको उपासना गरे। सधैँ यस लिङ्गको पूजा गरेर समय बिताइरहेका ती राजा पनि एक वर्षपछि मरे। शरीरबाट मुक्त भएका ती राजालाई प्रमथ आदि गणहरूले तुरुन्त सम्मानपूर्वक यानमा राखेर उत्तम शिवलोकमा लगे ॥४०–४२॥

मृग र मान्छेको शरीरलाई त्याग गर्ने ती दुबै राजा र मृग दुर्मुख र सुमुख नाम भएका शिवजीका पार्श्ववर्ती बने। माघशुक्ल पञ्चमीका दिन यस लिङ्गको दर्शन गरेको हुँदा मृग र मानिसको शरीर धारण गर्ने ती दुई प्रमथगणका अधिपति बने। यो लिङ्गको दर्शन प्राणीहरूका निमित्त दुर्लभ छ। साक्षात् शिवको रूप भएको यस लिङ्गको दर्शन तथा स्पर्श गर्नाले भुक्ति तथा मुक्ति प्राप्त हुन्छ ॥४३–४५॥

हे विरूपाक्ष ! अब यहाँबाट उत्तर दिशामा छ कोस पर जहाँ असितेश्वर भगवान् रहनुभएको छ, त्यस ठाउँमा जाऊ। त्यस असिततीर्थमा स्नान गरेर तिमीले असितेश्वर लिङ्गको पूजा गर, तिमी धेरै योजन हिँड्न समर्थ हुनेछौ। माघशुक्ल द्वादशीका दिन त्यहाँ सधैँ स्नान गर्नुपर्छ। ठूलो उत्सवका साथ जाग्राम बसेर भगवान् शङ्करको पूजा गर ॥४६–४८॥

बुद्धिमान् हे विरूपाक्ष ! अहिले तिमीलाई कूटेश्वर महादेवको माहात्म्य बताएँ। अब म तिमीलाई असितेश्वर भगवान्को माहात्म्य बताउनेछु ॥४९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा गालवतीर्थ र कूटेश्वरको माहात्म्यनामक
एकसय तेह्रौं अध्याय पूरा भयो।

---

१६. विरक्तोऽसौ, इति न.सं.पु.पाठः।
१७. समिर्चितः सदैतद्धि सदा कालं प्रसेवयन्, इति न.सं.पु.पाठः।
१८. चातो दिशि समुत्तरे, इति न.सं.पु.पाठः।
१९. जागरेण, इति न.सं.पु.पाठः।

चतुर्दशाधिकशततमोऽध्यायः

असिततीर्थासितेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

पूर्वजन्मकृतं यत् तत् संस्मार स[1] विरूपदृक्। स्नानाद् गालवतीर्थेऽसौ कूटेश्वरप्रपूजनात् ॥१॥
भूयोऽगमद्विरूपाक्षो मुनिना तेन वै समम्। यत्राऽसितेश्वरं लिङ्गं विराजते घटोद्भव ॥२॥
स्नात्वा चाऽसिततीर्थेऽसौ चाऽसितेशमपूपुजत्। माघशुक्लत्रयोदश्यां जपैः स्तोत्रैः परिक्रमन् ॥३॥
उषित्वा च निशामेकां दत्त्वा दीपं स शूलिने। अपृच्छन्नेमुनिं विप्र ! माहात्म्यं तीर्थलिङ्गयोः ॥४॥

विरूपाक्ष उवाच

भगवन्मुनिशार्दूल कृपासिन्धो महातपाः। भूयश्च श्रोतुमिच्छामि माहात्म्यं भवतो ध्रुवम् ॥५॥
असितेश इति प्रोक्तं रुद्रस्यास्याभिधानकम्। कस्माच्च भवता धीमन् कथमेतद्वद प्रभो ॥६॥
तीर्थस्यास्य च माहात्म्यं रुद्रस्य च विशेषतः। केन प्रकाशिते ह्येते को मुक्तोऽत्र पुरा विभो ॥७॥

नेमुनिरुवाच

आसीत्पुराऽसितो नाम मुनिवरो विरूपदृक्। हिमवति तपःस्तप्तुं त्यक्त्वा काशीमिहागतः ॥८॥
शक्रवती नदी पुण्या स्नाता शक्रेण या पुरा। सङ्गमे भानुमत्याश्च सस्नौ प्रेक्ष्याऽसितो मुनिः ॥९॥
तस्मादसिततीर्थञ्च सर्वतीर्थोत्तमोत्तमम्। एतल्लिङ्गं तदा स्नात्वा स्थापितञ्च शिलामयम् ॥१०॥
कार्त्तिकस्यासिताष्टम्यां भक्त्या च विधिवत्पुनः। अत्र जजाप चैकाब्दमेतदभ्यर्च्य सन्ततम् ॥११॥
आविर्भूतस्ततो रुद्रश्चैतल्लिङ्गान्महानिशि। व्याचष्ट वचनं तस्मै वरं दातुं हरो द्विज ॥१२॥

अध्याय – ११४

असिततीर्थ र असितेश्वर शिवलिङ्गको महिमा

कुमारस्वामीले भन्नुभयो – विरूपाक्षले गालवतीर्थमा स्नान गरेर कूटेश्वर भगवान्को पूजा गरेपछि उनलाई आफूले पूर्वजन्ममा गरेका सम्पूर्ण कुराहरूको संस्मरण भयो। हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ असितेश्वर महादेवको लिङ्ग थियो, त्यसै ठाउँमा गए। असिततीर्थमा स्नान गरेर विरूपाक्षले माघशुक्ल त्रयोदशीका दिन जप, स्तोत्रपाठ र परिक्रमा गरेर असितेश्वर भगवान्को पूजा गरे। उनले त्यस रातमा जाग्राम बसेर भगवान् शङ्करको नाममा बत्ती बाले। हे अगस्त्य मुनि ! त्यसपछि उनले त्यस तीर्थ र लिङ्गको माहात्म्य नेमुनिसित सोधे ॥१–४॥

विरूपाक्षले भने – कृपाका समुद्र महातपस्वी हे मुनिश्रेष्ठ ! म फेरि हजुरबाट यस क्षेत्रको माहात्म्य सुन्न चाहन्छु। हे प्रभु ! असितेश्वर भगवान् शङ्करको नाम तपाईंले सुनाउनुभयो। उहाँको उत्पत्ति कसरी भएको हो ? यो तीर्थको माहात्म्य विशेष गरी शिवलिङ्गको माहात्म्य के छ ? कसले यिनीहरूलाई प्रकाशमा ल्यायो र अघि यहाँ दर्शन गरेर को मुक्त भयो ? यी सबै कुरा मलाई बताउनुहोस् ॥५–७॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! पहिले असित नाम गरेका कुनै ऋषि थिए। काशी छोडेर उनी हिमालयमा तपस्या गर्न यहाँ आए। यहाँ पहिले इन्द्रले स्नान गरेको शक्रवती नाम गरेकी पवित्र नदी छन्। असितमुनिले त्यहाँ ती नदी र भानुमतीको सङ्गम देखेर स्नान गरे। त्यसैले यो असिततीर्थ सबै तीर्थहरूमा उत्तम छ। उनले यहाँ स्नान गरेपछि शिलाले बनेको यस लिङ्गको स्थापना गरेका थिए। त्यसपछि उनले कार्तिककृष्ण अष्टमीका दिनदेखि एक वर्षसम्म भक्तिपूर्वक विधिअनुसार यस लिङ्गको निरन्तर पूजा गरेर जप गरे। एक वर्षपछि भगवान् शङ्कर तिनलाई वर दिनका लागि मध्यरातमा यसै लिङ्गबाट प्रकट हुनुभयो र उनलाई भन्नुभयो ॥८–१२॥

---

१. यत्तत्संस्मृतवान्, इति न.सं.पु.पाठः।

असितेश्वर उवाच

अत्रैव हिमवत्सानौ मामास्थाप्य तपः कृतम्। हिमाद्रौ यत्कृतो धर्मस्तत्तुल्यमत्र यत्कृतम् ॥१३॥
शृणु दास्ये वरं तुभ्यमेतद् भवतु सन्ततम्। लोकचतुर्गुणं जीव्याद् गमनं बहुयोजनम् ॥१४॥

नेमुनिरुवाच

इत्याकर्ण्य वचो विप्र ! चाऽसितो मुनिसत्तमः। प्रययौ स वरं लब्ध्वा स्वाश्रमं मध्यदेशकम् ॥१५॥
तदादि ह्यभवच्चाऽसौ गरीयान् मुनिमण्डले[२]। नित्यं स्नात्वा समुद्रे वै गच्छति स्म स्वमन्दिरम् ॥१६॥
भूयः शृणु प्रवक्ष्यामि मुक्तः कश्चिज्जनः पुरा। एतल्लिङ्गप्रसादात् सोऽधुनाऽभूत् पशुपानुगः[३] ॥१७॥
तन्मातुः पतितः कुक्षौ विन्दुस्तस्य पितुर्यदा। कुक्कुटास्यं गृहे प्राक्च दृष्टं तया तदोषसि ॥१८॥
तस्मात्कुक्कुटवक्त्रोऽभूत्स शूद्रो लोकनिन्दितः। विडम्बितो जनैर्नित्यं दुःखार्तो निर्गतो गृहात् ॥१९॥
भ्रामं भ्रामं[४] मुहुश्चासौ देशाद्देशान्तरं तदा। स्वात्मानमवप्रेक्ष्याऽऽर्य चाऽत्रैव प्राप्तवान् पुनः ॥२०॥
ददर्श शूद्रनामानं ध्यानस्थं मुनिसत्तमम्। एतत्तीर्थजले स्नात्वा[५] सम्पूज्यैनञ्च भक्तितः ॥२१॥
उपगम्य मुनेः स्थानं ननाम शिरसा स तम्। स्वात्मनस्तारणं हेतुमपृच्छद् गद्गदोदितैः ॥२२॥

कुक्कुटास्य उवाच

नमस्ते भगवन् धीर कथमहमिह प्रभो। तारयामीममात्मानं लोकनिन्द्यञ्च सर्वतः ॥२३॥
एतद्वक्त्रं समालोक्य लोका हसन्ति[६] नित्यशः। तस्मात्क्षणमपि स्थातुं नोत्सहे स्वगृहेऽपि च ॥२४॥
तस्माद्विनिर्गतो गेहाद्दैवेन प्रेरितो ह्यहम्। अत्रैव प्राप्तवान् मह्यमुपदेशः[७] प्रदीयताम् ॥२५॥

असितेश्वरले भन्नुभयो – यस हिमालय पर्वतको शिखरमा पुण्य गरेर जुन फल पाइन्छ यहाँ पुण्य गर्नाले पनि त्यही फल पाइन्छ। मेरो स्थापना गरेर तिमीले यहाँ जुन तपस्या गर्‍यौ त्यसै समानको पुण्यफल अन्यत्र प्राप्त हुँदैन। त्यसैले म तिमीलाई सामान्य प्राणीभन्दा चारगुणा बढी बाँच्ने र धेरै योजन हिँड्न सक्ने वरदान दिन्छु ॥१३ –१४॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! भगवान्‌बाट यस्तो वर प्राप्त गरी मुनिश्रेष्ठ असित आफ्नो आश्रम रहेको मध्यदेशतिर लागे। त्यसै दिनदेखि यो ठाउँ ऋषिहरूका निमित्त सधैं गौरवशाली बन्न पुग्यो। असित पनि समुद्रमा स्नान गरेर आफ्नो आश्रमतिर गए। फेरि म बताउँछु, सुन – अघि यस लिङ्गको आराधना गरेर भगवान्‌को अनुग्रहबाट कुनै मानिस मुक्त भएको थियो। त्यो आज पनि शिवजीको अनुचर भएर रहेको छ। जब त्यो व्यक्ति जन्मनुपूर्व उसका बाबुको वीर्य आमाको गर्भमा पर्‍यो उसका बाबुले त्यसभन्दा पहिले बिहानीपख घरमा कुखुराको अनुहार देखे। त्यसैले उसको मुख कुखुराको जस्तो भयो। यसैले दुनियाँले उसलाई निन्दा गरे। अरूले सधैं उपहास गरेको हुँदा ज्यादै दुःखी हुँदै ऊ घरबाट हिँड्यो ॥१५–१९॥

आफ्नो अनुहार हेरेर दिक्क मान्दै ऊ एक देशबाट अर्को देश घुम्दै फेरि यसै ठाउँमा आइपुग्यो। उसले यस ठाउँमा शूद्र नाम गरेका ऋषिलाई देख्यो। ती ऋषि यसै तीर्थमा स्नान गरेर भक्तिपूर्वक शिवजीको पूजा गरी ध्यानमा तत्पर भएका थिए। उसले मुनि बसेको ठाउँमा गई मुनिलाई शिर झुकाएर नमस्कार गरेर गद्गद हुँदै दुःखबाट छुट्कारा पाउने कारणका बारेमा ऋषिसँग सोध्यो ॥२०–२२॥

कुक्कुटास्यले भन्यो – हे भगवन् ! हजुरलाई नमस्कार छ। चारैतिरबाट दुनियाँले निन्दा गरेको यो मेरो आत्मालाई म कसरी पार लगाऊँ ? दुनियाँ यो मेरो मुख देखेर सधैं उपहास गर्दछन्। त्यसैले म आफ्नो घरमा समेत एक क्षण पनि बस्न चाहन्नँ। त्यसैको दैवसंयोग अनुसार म घरबाट निस्किएर यहाँ आइपुगेको छु। हजुर मलाई उपदेश दिनुहोस् ॥२३–२५॥

---

२. मुनीनां हि गरीयसः, इति न.सं.पु.पाठः।
३. स चाद्याप्यभूच्छिवानुगः, इति न.सं.पु.पाठः।
४. भ्राम्यमानः, इति न.सं.पु.पाठः।
५. एतत्तीर्थजलाप्लाव्य, इति न.सं.पु.पाठः।
६. हास्यन्ति, इति न.सं.पु.पाठः।
७. प्राप्तवास्तन्म उपदेशः, इति न.सं.पु.पाठः।

शूद्र उवाच

एतत्तीर्थजले स्नात्वा[८] चाऽसितेशं प्रपूजय। मन्त्रं पञ्चाक्षरं भक्त्या त्वं घोषय निरन्तरम्[९] ॥२६॥
ततः प्राप्स्यसि चैतस्माद् वाञ्छितं फलमुत्तमम्[१०]। अवश्यमेव कर्त्तव्यं वैराग्याद्[११] हरपूजनम् ॥२७॥

नेमुनिरुवाच

इत्याकर्ण्य मुनेर्वाचं सस्नौ तीर्थे स भक्तितः। माघशुक्लनवम्याञ्च तत्र लिङ्गमपूपुजत् ॥२८॥
वन्याशनैः स तृप्तात्मा हरपूजनतत्परः। एवं निनाय चैकाब्दं जलाप्लावार्चनैर्द्विज ॥२९॥
ततः संवत्सरान्ते च सम्प्राप्य[१२] प्रमथास्तथा। अभिषेकं ददुस्तस्मै मृते च प्रमथा भृशम् ॥३०॥
निन्युः शिवपुरं तं ते पुष्पकेण शिवाज्ञया। अवर्षन् कुसुमासारं गीतवाद्यनिनादितैः ॥३१॥
अभूत्कुक्कुटवक्त्रोऽसौ गरीयान्प्रमथेश्वरः। रुद्रस्यानुचरो नित्यं सर्वलोकैः प्रवन्दितः ॥३२॥
भूयो गच्छ विरूपाक्ष ! यत्रास्ते भैरवेश्वरः। सार्द्धैकयोजने दूरे उत्तरस्यामितो दिशि[१३] ॥३३॥
शक्रवत्याश्च गण्डक्याः श्रद्धया स्नाहि सङ्गमे। शक्रतुल्यबलोपेतो भविष्यसि विरूपदृक् ॥३४॥
घर्घरा च नदीपुण्या देवदार्वद्रिसम्भवा। गण्डकी च तयोर्योगे स्नानाद्दशगवां फलम् ॥३५॥
शिप्रा सा च नदी श्रेष्ठा शैत्या हिमस्रवोद्भवा। गण्डक्याः सङ्गमे तीर्थं भैरवाख्यञ्च विश्रुतम् ॥३६॥
स्नात्वा तत्र शिवं साक्षाल्लिङ्गं जलमयं परम्। अर्चय भैरवाख्यं त्वं ततः प्राप्स्यसि वाञ्छितम् ॥३७॥

शूद्रले भने – तिमी यस तीर्थको जलमा स्नान गरेर असितेश्वर भगवान्को पूजा गर अनि रातिदन मन्त्रोच्चारणपूर्वक पञ्चाक्षर मन्त्र जप। त्यसपछि यसै लिङ्गबाट तिमीले इच्छा लागेको उत्तम फल पाउनेछौ। शिवजीको पूजा गर्दा अवश्य विरक्त हुनुपर्दछ ॥२६ –२७॥

नेमुनिले भन्नुभयो – मुनिको यस्तो कुरा सुनेर त्यसले भक्तिपूर्वक तीर्थमा स्नान गरे र माघशुक्ल नवमीका दिन असितेश्वर शिवलिङ्गको पूजा गर्‍यो। हे विरूपाक्ष ! वनमा पाइने खानेकुराहरू खाएर आत्मालाई तृप्त बनाई उसले सधैँ भगवान् शङ्करको पूजा गर्‍यो। यसरी जलमा स्नान गरी पूजा गरेर उसले एक वर्ष बितायो। एक वर्षको अन्त्यमा प्रमथगणहरू त्यहाँ आए र मरेको कुक्कुटस्यलाई अभिषेक गरे ॥२८–३०॥

उनीहरूले शिवजीको आज्ञाबमोजिम गीत गाउँदै, बाजा बजाउँदै, पुष्पवृष्टि गर्दै पुष्पक विमानमा राखेर त्यसलाई शिवलोकमा लगे। त्यो कुखुराको मुख भएको व्यक्ति प्रमथगणमा अग्रगण्य हुन पुग्यो। सबै प्राणीहरूद्वारा वन्दनीय बनेर त्यो शिवजीको सेवक भएर बस्यो ॥३१–३२॥

हे विरूपाक्ष ! फेरि तिमी यहाँबाट छ कोस टाढा उत्तर दिशामा जहाँ भैरवेश्वर महादेव रहनुभएको छ, त्यस ठाउँमा जाऊ। हे विरूपाक्ष ! तिमीले त्यहाँ गएर शक्रवती र गण्डकी नदीको सङ्गममा स्नान गर्‍यौ भने तिमी इन्द्रजत्तिकै शक्तिशाली हुनेछौ। त्यहाँ देवदारु पर्वतबाट घर्घरा नाम गरेकी पवित्र नदी उत्पन्न भएकी छन्। घर्घरा र गण्डकी नदीको सङ्गममा स्नान गर्‍यो भने दशवटा गाई दान गरेको फल प्राप्त हुन्छ। त्यहाँ हिउँ पग्लिएर उत्पन्न भएकी शिप्रा नाम गरेकी उत्तम नदी छिन्। शिप्रा र गण्डकी नदीको दोभानमा भैरवनामक प्रसिद्ध तीर्थ छ। त्यहाँ स्नान गरेर जलमय भैरवनामक शिवको उत्तम लिङ्गलाई पूजा गर। त्यसपछि तिमीले आफूले सोचे अनुसारको फल पाउनेछौ ॥३३–३७॥

---

८. एतत्तीर्थजलप्लाव्य, इति न.सं.पु.पाठः।
९. पञ्चाक्षरं समुच्चार्य तद्घोषय ह्यहर्निशम्, इति न.सं.पु.पाठः।
१०. चैतस्मात्त्वं वाञ्छितफलोत्तमम्, इति न.सं.पु.पाठः।
११. विरक्तः, इति न.सं.पु.पाठः।
१२. अत्रैत्य, इति न.सं.पु.पाठः।
१३. चातो हि दिशि चोत्तरे, इति न.सं.पु.पाठः।

पृष्टञ्च यन्मे भवता महत्त्वं भो भक्त ! यस्मादसितेश्वरस्य ।
प्रोक्तं ध्रुवं तन्निखिलं मया तद्वक्ष्यामि यत्तच्छृणु भैरवस्य ॥३८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायामसिततीर्थासितेश्वरयोर्माहात्म्यं नाम चतुर्दशाधिकशततमोऽध्यायः ॥११४॥

हे भक्त ! तिमीले मलाई असितेश्वर भगवान्को जुन माहात्म्य सोधेका थियौ, त्यो सबै मैले बताएँ । अब म भैरवलिङ्गको माहात्म्य बताउँछु ॥३८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा असिततीर्थ र असितेश्वरको माहात्म्यनामक
एकसय चौधौं अध्याय पूरा भयो ।

पञ्चदशाधिकशततमोऽध्यायः

भैरवतीर्थभैरवेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

स्नानादसिततीर्थेऽसौ तल्लिङ्गस्याऽर्चनात्पुनः । जहौ परिश्रमं सर्वं सर्वत्र गमनक्षमः ॥१॥
गण्डक्याः सङ्गमे स्नात्वा विरूपाक्षोऽगमत्पुनः । गण्डक्याश्च तटेऽगस्त्य ! यत्राऽऽस्ते भैरवेश्वरः ॥२॥
भैरवाख्ये महातीर्थे स्नात्वाऽभ्यर्च्य शिवं परम् । अम्भोमयं महालिङ्गं तन्नद्योः सङ्गमे मुदा ॥३॥
तपःशुक्लचतुर्दश्यां लिङ्गमभ्यर्च्य भक्तितः । जागृतवानसौ तत्र पप्रच्छ तत्प्रशंसनम् ॥४॥

विरूपाक्ष उवाच

श्रोतुकामः पुनश्चाऽहं त्वत्तो ब्रह्मविदांवर[1] । एतत्तीर्थस्य माहात्म्यं जलमूर्तेः शिवस्य च ॥५॥
केन प्रकाशितं लिङ्गं तीर्थे लब्धञ्च किं फलम् । स्नानात्तदर्चनाच्चाऽत्र को मुक्तो वद मे प्रभो ॥६॥

नेमुनिरुवाच

अभूत्संवर्त्तको विप्र ! कालाग्निरुद्रशङ्करः[2] । पूर्वं भैरवरूपेण जघास सर्वजङ्गमान् ॥७॥
निःसत्त्वां मेदिनीं कृत्वा शून्याञ्च सर्वजन्तुभिः । स्वयं हिमालये स्थातुमत्रैव प्राप्तवान् विभुः ॥८॥
ददर्श भैरवोऽसौ हि चैतत्तीर्थं शिवात्मकम् । पुण्यात्पुण्यतमं ज्ञात्वा चाऽवात्सीदत्र जीवने ॥९॥
दिवसहस्रवर्षान्ते कृपयाऽत्राऽगमद् विधिः[3] । अयाचत वरं स्तुत्वा भक्त्यैतज्जलसंप्लवः ॥१०॥
एतस्माद्धि वरं लब्ध्वा लोकान् ससर्ज पद्मजः । एतस्यां विप्र ! मेदिन्याञ्चतुर्विधाँश्च सर्वशः ॥११॥
त्रिंशद्वर्षसहस्रान्ते कश्चिन्मुक्तः शृणु द्विज । एतत्तीर्थप्रसादाद्वै भैरवस्य विशेषतः ॥१२॥

अध्याय – ११५

भैरवतीर्थ भैरवेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – विरूपाक्षले असिततीर्थमा स्नान गरेर त्यस लिङ्गको पूजा गरेको हुँदा उनको सबै परिश्रम हटेर गयो र उनी सबैतिर हिँड्न समर्थ भए। त्यसपछि विरूपाक्ष गण्डकीको सङ्गममा स्नान गरेर गण्डकीकै तटमा रहेको भैरवेश्वर महादेव भएको क्षेत्रमा गए। विरूपाक्षले ती दुई नदीको सङ्गममा रहेको भैरवनामक महातीर्थमा प्रसन्न हुँदै स्नान गरेर जलमय त्यस महालिङ्गको पूजा गरे। माघशुक्ल चतुर्दशीका दिन भक्तिपूर्वक लिङ्गको पूजा गरेर उनी त्यहाँ जाग्राम बसे र नेमुनिसित त्यस तीर्थ र लिङ्गको माहात्म्य सोधे ॥१–४॥

विरूपाक्षले भने – हे ब्रह्मज्ञ ! अब म हजुरबाट जलमय मूर्ति भएका शिवलिङ्गको र यस तीर्थको माहात्म्य सुन्न चाहन्छु। हे प्रभु ! यस लिङ्गलाई कसले प्रकाशमा ल्याएको थियो ? यस तीर्थमा स्नान गरेर कसले के फल पायो ? यस लिङ्गको पूजा गरेर को मुक्त भयो ? सबै मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि प्रलयकालीन अग्निजस्तै देखिने संवर्त्तक नाम गरेका रुद्र भगवान्ले भैरवको रूप लिएर सम्पूर्ण प्राणीहरूको संहार गर्नुभएको थियो। भगवान् शङ्करले पृथ्वीलाई सम्पूर्ण प्राणीहरूले रहित तुल्याएर हिमालयमा बस्नका लागि आफैँ यहाँ आउनुभयो। भैरव पनि यस तीर्थलाई अत्यन्त पुण्यदायक र शिवस्वरूप ठानेर यसै जलमा बस्नुभयो ॥७–९॥

दिव्य हजार वर्ष पुगेपछि त्यहाँ ब्रह्माजी आउनुभयो र भक्तिपूर्वक जलमा स्नान गरेर उहाँले भैरवको स्तुति गर्दै वर माग्नुभयो। हे विरूपाक्ष ! यिनै भैरवबाट वर प्राप्त गरेर ब्रह्माजीले यो पृथ्वीमा सबैतिर चार किसिमका प्राणीहरूको सृष्टि गर्नुभयो। हे विरूपाक्ष ! त्यसको तीस हजार वर्षपछि यो तीर्थ र विशेष गरी भैरवरूपधारी भगवान् शङ्करको अनुग्रहबाट कुनै व्यक्ति मुक्त भएको थियो ॥१०–१२॥

---

१. त्वयि ब्रह्मविदां वरे, इति न.सं.पु.पाठः । २. कालाग्निरुद्रदेवता, इति न.सं.पु.पाठः ।
३. सहस्राणां समान्तेऽत्र दिव्यानामगमद्विधिः, इति न.सं.पु.पाठः ।

पुरासीत्कश्चिदेकाक्षो वैश्यो नाम्ना विरूपदृक्। पूर्वजन्मविपाकेन हीनोऽसावेकचक्षुषा ॥१३॥
अन्यजनेन यद्दत्तो दीपो देवाय वै पुरा। गृहीतस्तेन तद्दीपः क्रीडनाय च लीलया ॥१४॥
तत्पापेन ह्यसौ वैश्यस्तदर्द्धहरणेन च। एकेन चक्षुषा हीनश्चाभूज्जन्मान्तरे द्विज ॥१५॥
एकाक्षो लोकनिन्द्योऽसावभूद् दुःखातुरो हि विद्। एकदा दिवसे धीरं पप्रच्छ कारणं स्वकम् ॥१६॥
व्याचष्ट धर्मशर्मा च तस्मै दुःखातुराय वै। हेतुशास्त्रं समालोक्य वचो मधुसमार्द्रकम् ॥१७॥

धर्मशर्मोवाच

अवश्यमेव भोक्तव्यं कृतं यत्तत्[४] पुराऽधुना। इहैव सुकृतं वापि दुष्कृतं वा तथा पुनः ॥१८॥
भवतार्द्धो हृतो दीपः परदत्तो सुराय च[५]। पूर्वजन्मनि तस्माद्धि चैकेक्षणो भवानभूत् ॥१९॥
कुरु तीर्थाटनं वैश्य हिमवद्गह्वरेऽधुना। नेपालाख्ये महाक्षेत्रे बहुतीर्थविराजिते ॥२०॥
क्रमात्कुदुत्तरे तीर्थे भैरवाख्ये ततो हि विद्। स्नायतां भवता तत्र सन्ध्यादीपः प्रदीयताम् ॥२१॥
स्नानदीपप्रदानाच्च ते दास्यति वरं शिवः। गोचरो दिव्यनेत्रेण सन्मूर्तिरम्भसामयम्[८] ॥२२॥

नेमुनिरुवाच

इत्युपदेशमाकर्ण्य वैश्योऽसौ धीयुतस्तदा। विनिर्ययौ गृहात्स्नातुं कश्चिदासीत् सहायकः[६] ॥२३॥
परिभ्रम्य च तीर्थाणि चाऽत्रैव प्राप्तवान् शनैः। सस्नौ वैश्यो मुदा भक्त्या संस्मरन्[७] तद्वचः पुनः ॥२४॥
अपूपुजत्तदा रुद्रं वैश्योऽसौ जलमूर्त्तिकम्। पञ्चोपचारकैर्भक्त्या शनैः पठँश्च तन्मनुम् ॥२५॥
सायं काले ततो गत्वा चात्र दीपं ददौ पुनः। शिखोज्ज्वलं घृतैः पूर्णं शिवमुद्दिश्य विड्वरः ॥२६॥

हे विरूपाक्ष ! अघि कुनै एकाक्ष नामक वैश्य पूर्वजन्मको कर्मको फलले गर्दा एउटा आँखो नभएको कानो भएको थियो। पहिले कुनै समयमा त्यसले अरू मानिसले देवतालाई चढाएको बत्ती क्रीडाका लागि लीलापूर्वक ग्रहण गऱ्यो। आधा बत्ती चोरेको पापले गर्दा त्यो वैश्य अर्को जन्ममा एउटा आँखाबाट वञ्चित भयो। एउटा मात्र आँखा भएको त्यस वैश्यलाई दुनियाँले निन्दा गरेकाले त्यो अत्यन्त दुःखित थियो। एकदिन धर्मशर्मा नामक विद्वान्लाई उसले आफ्नो एउटा मात्र आँखो हुनुको कारण सोध्यो। धर्मशर्माले दुःखबाट आत्तिएको त्यस व्यक्तिलाई कर्मविपाक शास्त्रको अध्ययन गरेर मीठो बोलीमा भन्नलागे ॥१३-१७॥

धर्मशर्माले भने – अघि धर्म होस् वा पाप, जे गरेको छ, त्यो यसै जन्ममा अवश्य भोग गर्नुपर्छ। तिमीले अरूले देवतालाई चढाएको बत्तीको आधा भाग चोरेका थियौ, त्यसैले तिमी एउटा आँखा नभएको कानो भयौ। हे वैश्य ! हिमालयको खोँचमा रहेको नेपाल नाम गरेको पुण्यभूमि छ। धेरै तीर्थ भएको त्यस स्थलमा गएर तिमीले तीर्थदर्शन गर। हे वैश्य ! क्रमैले त्यसभन्दा उत्तरपट्टि रहेको भैरवनामक तीर्थमा तिमीले स्नान गर र साँझमा बत्ती बाल। स्नान गरेर दियो बालेपछि जलमूर्ति भगवान् शङ्करले तिमीलाई दिव्य नेत्रले हेरेर वर दिनुहुनेछ ॥१८-२२॥

नेमुनिले भन्नुभयो – बुद्धिमान् त्यो वैश्य यस्तो सुन्नासाथ कसैलाई साथमा लिएर स्नान गर्न घरबाट तुरुन्त निस्कियो। बिस्तारै तीर्थहरू घुम्दै त्यो वैश्य यसै ठाउँमा आइपुग्यो। अघिको कुरा सम्झिएर त्यसले फेरि भक्तिपूर्वक प्रसन्न हुँदै यस तीर्थमा स्नान गऱ्यो। मनमनै शिवजीको मन्त्र जप्दै सभक्ति पञ्चोपचार विधिबाट त्यस वैश्यले जलमय मूर्ति भएका भगवान् शङ्करको पूजा गऱ्यो। त्यस वैश्यले साँझ त्यस ठाउँमा गएर भगवान् शिवजीलाई लक्ष्य गरेर घिउले भिजाएको ज्वालाले उज्यालो बत्ती बाल्यो ॥२३-२६॥

---

४. यत्तत्कृतम्, इति न.सं.पु.पाठः।
५. भवतार्द्धं हृतं दीपमन्यद्दत्तं सुरस्य च, इति न.सं.पु.पाठः।
६. कमपि चावलम्बकः, इति न.सं.पु.पाठः।
७. संस्मृत्या, इति न.सं.पु.पाठः।
८. मर्त्यानामम्भसामयक, इति न.सं.पु.पाठः।

एवं दीपं[९] शिवायाऽहं ददे स्वात्मविभूतये। ततस्तत्पदमिश्रस्य जलस्याऽऽप्स्यामि सेवनम्[१०] ॥२७॥
एवं सङ्कल्प्य वैश्योऽसौ हराय जलमूर्त्तये। घृतपूर्णं प्रदीपञ्च ददावीशाय ताम्रगम्[११] ॥२८॥
जानुमात्रे जले स्थित्वा[१२] वैश्योत्तमः शनैः शनैः। शिवमन्त्रं धियोच्चार्य्य चाऽजहात्तत्प्रदीपकम् ॥२९॥
अधावच्च तमुद्दिश्य ग्राहोऽत्रस्थो हि सन्ततम्। तत्पादौ स तु सङ्गृह्य निनाय तज्जलान्तरम् ॥३०॥
आययू रुद्रदूतास्ते कुर्वन्तः पुष्पवर्षणम्[१३]। दिवि दुन्दुभयो नेदुर्ग्राहग्रस्ते विशांवरे ॥३१॥
आस्थाय पुष्पके याने वाद्यगीतैः प्रसेव्य च। निन्युः शिवपुरं तं ते लोकदर्शनपूर्वकम्[१४] ॥३२॥
अभूत्[१५] स एव चैकाक्षो महादेवस्य पार्श्वगः। प्रमथानां गरिष्ठश्च भैरवेशप्रसादतः ॥३३॥
अत्र संस्नाति यो[१६] वत्स ! चैत्रस्य पूर्णिमादिने। सर्वारिष्टैर्विनिर्मुक्तः प्रयाति भैरवालयम् ॥३४॥
अतो गच्छ विरूपाक्ष ! पूर्वदिशे पुनस्तथा। योजनार्धविदूरे त्वमेकशृङ्गाद्रिशेखरे ॥३५॥
ब्रह्मतीर्थे च यत्राऽऽस्ते ब्रह्मेश्वरो महाविभुः। येन दत्तो वरो पूर्वं बाणासुराय सेविने[१७] ॥३६॥
ब्रह्मतीर्थे मुदा स्नात्वा ब्रह्मेश्वरं समर्हय। सर्वैनोभिर्विनिर्मुक्तो ब्रह्मत्वं किल प्राप्स्यसि[१८] ॥३७॥
एतद्धि तुभ्यं कथितं मया वै माहात्म्यमेतस्य च भैरवस्य।
अन्यस्य लिङ्गस्य पुनर्महत्त्वं तत्रैत्य धीमन्निखिलञ्च वच्मि ॥३८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
भैरवेश्वरभैरवतीर्थमाहात्म्यं नाम पञ्चदशाधिकशततमोऽध्यायः ॥११५॥

आत्मकल्याणका निमित्त म यो बत्ती भगवान् शङ्करलाई समर्पण गर्दछु, उहाँको पाउको आश्रय लिएर सेवा गर्न पाऊँ। यस्तो सङ्कल्प गरेर तामाको दीपकमा घिउ राखेर बत्ती बाल्यो र जलमूर्ति भगवान् शङ्करलाई समर्पण गर्‍यो। घुँडा घुँडासम्म पानीमा प्रवेश गरेर मनमनै शिवजीको मन्त्र उच्चारण गर्दै उसले त्यहाँ बत्ती अर्पण गर्‍यो ॥२७-२९॥

त्यसपछि त्यहाँ रहेको गोही दौडिएर त्यो वैश्यतिर गयो। उसले त्यसको एउटा गोडा समात्यो र उसलाई पानीभित्र लग्यो। वैश्यलाई गोहीले समातेपछि शिवजीका दूतहरू फूल वर्षा गर्दै त्यस ठाउँमा आइपुगे। आकाशमा नगराहरू बजे। त्यसपछि उनीहरूले बाजा बजाएर गीत गाउँदै उसको सेवा गरी उसलाई पुष्पक विमानमा राखेर सम्पूर्ण मानिसहरूलाई देखाउँदै शिवलोकतिर लगे ॥३०-३२॥

त्यो एक आँखे वैश्य भगवान् शङ्करको भैरव अवतारको कृपाले गर्दा प्रमथगणहरूमा मुख्य भएर शिवजीको नजिकै बस्न पुग्यो। हे बाबु ! चैत्रपूर्णिमाको दिन जसले यस तीर्थमा स्नान गर्छ त्यो व्यक्ति सम्पूर्ण दुःखबाट मुक्त भएर भैरवको लोकमा जान्छ। हे विरूपाक्ष ! अब तिमी यहाँबाट पूर्वतिर दुई कोस टाढा रहेको एकशृङ्ग नाम गरेको पर्वतशिखरमा जाऊ। भक्त बाणासुरलाई वर दिने महाप्रभु ब्रह्मेश्वर ब्रह्मतीर्थका साथ यहाँ बस्नुभएको छ। तिमी ब्रह्मतीर्थमा प्रसन्न भएर स्नान गर, त्यसपछि ब्रह्मेश्वर भगवान्को पूजा गर। त्यसपछि सम्पूर्ण पापबाट मुक्त भएर तिमीले ब्रह्मत्व पाउनेछौ ॥३३-३७॥

हे बुद्धिमान् विरूपाक्ष ! मैले तिमीलाई भैरवलिङ्ग र भैरवतीर्थको माहात्म्य सुनाएँ र यसैगरी सम्पूर्ण तीर्थहरूको माहात्म्य तत् तत् स्थानमा गएर बताउनेछु ॥३८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डको नेपालमाहात्म्यमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भैरवेश्वर र भैरवतीर्थको महिमानामक
एकसय पन्ध्रौं अध्याय पूरा भयो।

---

९. एष दीपो, इति न.सं.पु.पाठः।
१०. लभिष्यामि च सेवनम्, इति न.सं.पु.पाठः।
११. ददौ ताम्रस्थमीशिने, इति न.सं.पु.पाठः।
१२. विश्य, इति न.सं.पु.पाठः।
१३. पुष्पासारं प्रवर्षयन्, इति न.सं.पु.पाठः।
१४. सर्वलोकान् प्रदर्शयन्, इति न.सं.पु.पाठः।
१५. भवेत्, इति न.सं.पु.पाठः।
१६. यः स्नायते, इति न.सं.पु.पाठः।
१७. भक्तिने, इति न.सं.पु.पाठः।
१८. प्रलभिष्यसि, इति न.सं.पु.पाठः।

षोडशाधिकशततमोऽध्यायः

ब्रह्मेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

स्नानाद् भैरवतीर्थेऽसावभूद्दिव्येक्षणो महान्। लक्षयोजनदूरस्थं दृश्यं द्रष्टुं क्षमोऽभवत्[१] ॥१॥
अगमन्मुनिना सार्धं भूयोऽगस्त्य ! विरूपदृक्। ब्रह्मेश्वरो हि यत्राऽऽस्ते ततः पूर्वदिशि ध्रुवम् ॥२॥
ब्रह्मतीर्थे तत सस्नौ विरूपाक्षो यथाविधि। एकशृङ्गाचलं भूयः समारोहच्छनैः शनैः ॥३॥
अर्चति स्म स तल्लिङ्गं भक्त्या नानोपहारकैः। द्वन्द्वभावं परित्यज्य शिवमेवाऽवलम्बितः ॥४॥
फाल्गुनपूर्णिमायाञ्च तन्निशायां विरूपदृक्। जागर्ति स्म शिवात्माऽसौ भक्त्योपोष्य प्रपूजनैः ॥५॥
पप्रच्छ नेमुनिं नक्तं तन्माहात्म्यं प्रणम्य च। लिङ्गतीर्थसमुत्पत्तिं[२] विनयेन घटोद्भव ॥६॥

विरूपाक्ष उवाच

भूयश्च भवतो धीर ![३] श्रोतुकामोऽस्मि सर्ववित्। एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च विशेषतः ॥७॥
समुद्भूतं कथं लिङ्गमेतन्मे हि वद प्रभो। तीर्थे वाऽत्र च को मुक्तः पूर्वं ब्रह्मविदांवर ॥८॥

नेमुनिरुवाच

निःशेषे च पुरा भूमौ ब्रह्मैकमद्वयं तदा। षष्टिवर्षसहस्रे द्वे गते चाऽत्र[४] समागतः ॥९॥
आराधितुं महादेवं जगतां कारणाद्विधिः। अत्र स्नातुं स्वयं पूर्वं तीर्थमकल्पयद् द्विज ॥१०॥
ब्रह्मा संस्मार वै गङ्गामाप्लवाय विरूपदृक्। ततो नदी समुद्भूता मृगेन्द्रोत्तमशेखरात् ॥११॥

अध्याय - ११६

ब्रह्मेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो - भैरवतीर्थमा स्नान गरेको हुँदा विरूपाक्षलाई दिव्यदृष्टि प्राप्त भयो। उनी चार लाख कोस पर रहेको वस्तु पनि चिन्न सक्ने भए। हे अगस्त्य मुनि ! त्यसपछि नेमुनिलाई साथमा लिएर विरूपाक्ष पूर्वदिशामा ब्रह्मेश्वर रहनुभएको क्षेत्रमा गए। विरूपाक्षले विधिपूर्वक ब्रह्मतीर्थमा स्नान गरे। त्यसपछि उनी बिस्तारै एकशृङ्ग नाम गरेको पहाडमा चढे। शिवमा नै आश्रित बनेर अभेदबुद्धि लिई उनले विभिन्न पूजासामग्रीद्वारा भक्तिपूर्वक त्यस लिङ्गको पूजा गरे। फाल्गुनशुक्ल पूर्णिमाको दिन राति विरूपाक्ष शिवकै रूप बनेर भक्तिपूर्वक उहाँको पूजा गर्दै जाग्राम बसे। हे अगस्त्य मुनि ! रात परेपछि नम्र हुँदै विरूपाक्षले प्रणाम गरेर नेमुनिसँग लिङ्ग र तीर्थको माहात्म्य सोधे ॥१-६॥

विरूपाक्षले भने - सर्ववेत्ता हे मुनिश्रेष्ठ ! मलाई यस लिङ्ग र तीर्थको माहात्म्य सुन्न मन लागेको छ। ब्रह्म जान्नेहरूमा श्रेष्ठ भएका हे प्रभु ! यस शिवलिङ्गको उत्पत्ति कसरी भयो ? यस तीर्थमा अघि को मुक्त भयो ? मलाई बताउनुहोस् ॥७-८॥

नेमुनिले भन्नुभयो - अघि महाप्रलयको बेलामा ब्रह्म मात्र हुनुहुन्थ्यो। दुई साठी हजार वर्ष अर्थात् अर्थात् एक लाख बीस हजार वर्ष बितेपछि त्यहाँ ब्रह्माजी आउनुभयो। हे विरूपाक्ष ! अघि ब्रह्माले संसारको सृष्टि गर्नका लागि भगवान् शङ्करको आराधना गर्न स्नानका लागि आफैं तीर्थ बनाउनुभयो। हे विरूपाक्ष ! ब्रह्माले स्नान गर्नका लागि गङ्गाजीलाई सम्झनुभयो। त्यसपछि मृगेन्द्र पर्वतको उत्तम शिखरबाट नदी उत्पत्ति भइन् ॥९-११॥

---

१. ....दूरस्थमयमिति सुनिर्णितः, इति न.सं.पु.पाठः।
२. लिङ्गोद्भूतञ्च तीर्थस्य, इति न.सं.पु.पाठः।
३. भूयो भवति धीरोऽहम्, इति न.सं.पु.पाठः।
४. तदतीतेऽत्र, इति न.सं.पु.पाठः।

उवाह सा[५] नदी पुण्या स्वच्छकल्लोलमालिनी । पूर्वं ब्रह्माङ्घ्रिजायाश्च ब्रह्मपद्याः समागमात् ॥१२॥
तत्रैव ब्रह्मणा स्नातमेतयोः सङ्गमे मुदा । ब्रह्मतीर्थमिदं तस्मात् सर्वतीर्थोत्तमं स्मृतम्[६] ॥१३॥
तत्र स्नात्वा विधिर्वत्स चैनं पर्वतमारुहत् । सुखासीनो मुदा भक्त्या रुद्रमन्त्रं जजाप वै ॥१४॥
कार्त्तिकस्यासिताष्टम्यामेतल्लिङ्गं प्रकल्पितम् । दिव्यवर्षसहस्रान्ते तत्पूजिते महानिशि ॥१५॥
ततोऽस्मात्स वरं लब्ध्वा लोकान्ससर्ज चेह वै । चतुर्विधाँश्च मेदिन्यां यथापूर्वमभूदसौ ॥१६॥
कालान्ते च ततोऽतीते मुक्तः कश्चिद् द्विजोत्तमः । पूर्वञ्च तत्प्रवक्ष्यामि भूत्वैकाग्रमनाः शृणु ॥१७॥
कश्चिन् म्लेच्छः पुरा धन्वी मृगयायै वनं गतः । शूकरैणमृगालाभाद् विलङ्घ्याद्रीन् सकन्दरान् ॥१८॥
ददर्श राक्षसं सोऽत्र क्रीडन्तञ्च यदृच्छया । सोऽप्यपश्यच्च तं म्लेच्छं तत्राऽऽगतं धनुर्धरम् ॥१९॥
जघान त्वरितं भीत्या म्लेच्छोऽसौ राक्षसं शरैः । निचखान शरान् तीक्ष्णान् रक्षोहृदि द्रुतं पुनः ॥२०॥
निहत्य राक्षसं बाणैर्म्लेच्छो दुद्राव सत्वरम् । तद्भीत्या कम्पिताङ्गोऽसौ कृत्वेति जीवनं गतम् ॥२१॥
राक्षसोऽपि रुषाऽऽविष्टस्तमन्वधावत द्रुतम् । विस्मृत्य च व्यथां शल्यां सिंहः क्रुद्धो मृगं यथा ॥२२॥
यावत्प्राप्तं न तीरं स ब्रह्मतीर्थस्य चोत्तरम् । वेगेन राक्षसस्तावज्जग्राह तत्तटे द्रुतम् ॥२३॥
जले निष्पीड्य मुष्टिभ्यां राक्षसस्तद्धृदि द्रुतम् । तद्ग्रीवानाडीतः क्रोधाच्छोणितं समपीपिबत् ॥२४॥
व्यसुर्म्लेच्छोऽपि तत्तीरे शिवेति च वदन् भयात् । शैवेन च पुरा प्रोक्तं तदाकर्ण्य धिया स्मरन् ॥२५॥
सोऽपि रक्षो व्यसुस्तत्र शरव्रणप्रपीडितः । पीत्वा तद्रुधिरं मांसं खादँश्च तत्तटे तदा ॥२६॥

निर्मल तरङ्ग भएकी पुण्यदात्री ब्रह्मगङ्गा नाम गरेकी नदी आएर अघि ब्रह्माजीको घुँडाबाट निस्किएकी ब्रह्मपदी नाम गरेकी अर्को नदीमा मिसिइन् । तिनै दुई नदीको सङ्गममा ब्रह्माजीले प्रसन्न हुँदै स्नान गर्नुभयो । त्यसैले यो ब्रह्मतीर्थ सबै तीर्थहरूमा उत्कृष्ट तीर्थ बन्यो ॥१२-१३॥

हे बाबु ! त्यहाँ स्नान गरेर ब्रह्माजी यस पर्वतमा चढ्नुभयो । सुखपूर्वक त्यहाँ बसेर ब्रह्माजीले भक्तिपूर्वक भगवान् शङ्करको मन्त्र जप्नुभयो । उहाँको पूजा गर्दागर्दै दिव्य एक हजार वर्ष बितेपछि कार्तिककृष्ण अष्टमीको मध्यरातमा शिवलिङ्गको प्रादुर्भाव भयो । त्यसपछि ब्रह्माजीले भगवान् शङ्करबाट वर प्राप्त गरेर पहिलेजस्तो गरी यस पृथ्वीमा चार किसिमका प्राणीहरूको सृष्टि गर्नुभयो ॥१४-१६॥

समय बित्दै गएपछि कुनै ब्राह्मण यहाँ मुक्त भएको थियो । तिमीलाई म त्यो कथा बताउँछु, एकचित्त भएर सुन । अघि धनुर्धारी कुनै म्लेच्छ शिकार खेल्न वनतिर हिँडेको थियो । मृग नपाएको हुँदा गुफा र पहाडहरू नाघ्दै यहाँ आयो । उसले यहाँ आफूखुसी खेलिरहेको राक्षसलाई देख्यो । राक्षसले पनि त्यस धनुर्धारी म्लेच्छलाई देख्यो । त्यस म्लेच्छले डराएर तुरुन्त राक्षसलाई बाण हान्यो । राक्षसको हृदयलाई ताकेर छिट्ये-छिट्ये उसले फेरि तीखा बाणहरू छोड्यो । त्यो म्लेच्छ राक्षसलाई प्रहार गरेर त्यसको डरले शरीर कपाउँदै अब जीवन गयो भन्ने ठानेर भाग्यो ॥१७-२१॥

रिसाएको सिंहले मृगलाई लखेटेझैँ बाणबाट लागेको घाउको पीडालाई सहँदै क्रुद्ध भएको राक्षस त्यसको पछिपछि लाग्यो । ब्रह्मतीर्थको उत्तरपट्टिको तीरमा पुग्नुभन्दा पहिले नै राक्षसले छिट्ये छिट्ये दौडिएर त्यसलाई समातिहाल्यो । राक्षसले पानीभित्र त्यसको हृदयमा मुठीले हिर्कायो । त्यस रिसाहा राक्षसले उसको घाँटीबाट रगत निकालेर पियो ॥२२-२४॥

म्लेच्छ पनि त्यसै तीर्थको तीरमा डरले शिव शिव भन्दै मऱ्यो । राक्षसले पनि अघि भनेको शिवको नाउँ सुनेर मनमनै शिवजीलाई सम्झ्यो । बाणको घाउले पीडित भएर त्यस म्लेच्छको रगत पिउँदापिउँदै, मासु खाँदाखाँदै त्यसै तटमा राक्षसको पनि मृत्यु भयो ॥२५ -२६॥

---

५. प्रववाह, इति न.सं.पु.पाठः ।
६. तस्माच्च ब्रह्मतीर्थोऽयं सर्वतीर्थोत्तमोत्तमः, इति न.सं.पु.पाठः ।

श्रोत्रियस्य कुले जातो म्लेच्छोऽसौ हि ततो द्विज । ब्रह्मतीर्थजलस्पर्शात्तत्तटे निधनात्तथा ॥२७॥
वेदानां पारगो विप्रः सर्वशास्त्रविशारदः । सत्यवादी सदा सौम्यः पापपराङ्मुखोऽभवत्[७] ॥२८॥
त्यक्त्वा प्रियाप्रियं तात ! स्वमन्वयं गृहं तथा । ब्रह्मचर्येण विप्रोऽसौ दण्डं दधार वै पुनः ॥२९॥
भूत्वा हि याचको नित्यं कञ्चित्कालं निनाय सः । विनिर्गत्य गृहाद्बाह्यं यतिचर्याञ्चचार वै ॥३०॥
इयं तनुर्ममावश्यं पतिष्यति न संशयः । मत्वेति ब्रह्मशर्म्मासौ तीर्थाटनञ्चकार हि ॥३१॥
भ्रमन् नित्यं[८] हि तीर्थानि मेदिन्यां सर्वशो यतिः । देवानां प्रतिमां पश्यन्निहैव प्राप्तवान् द्विज ॥३२॥
पूर्वजन्मस्मृतेश्चात्र तीर्थपुण्यप्रभावतः[९] । ब्रह्मशर्मा पुनः सस्नौ कृष्णाष्टम्याञ्च फाल्गुने ॥३३॥
ब्रह्मचारी ततः स्नात्वा कृत्वा सन्ध्यां नदीतटे[१०] । जप्तुं स निर्जनं चैनं समारुरोह पर्वतम्[११] ॥३४॥
ब्रह्मचारी ततोऽत्रैत्य[१२] चैतल्लिङ्गं ददर्श सः । ज्योतिर्मयं तथाऽव्यक्तं घृतपूर्णशिखामिव ॥३५॥
तदन्तिकं ययौ किञ्चिच्छनैः शनैर्भयान्वितः । वदन् किमिति विप्रोऽसौ चित्रेण चेतसा तदा ॥३६॥
प्रणम्य शिरसा भूमौ तुष्टाव भक्तितो मुहुः । त्रिधा भक्त्या[१३] परिक्रम्य बध्वाञ्जलिं स्वमूर्द्धनि ॥३७॥
ततो जजाप तन्मन्त्रं ब्रह्मशर्मा शिवान्तिके । लक्षमेकं मुदा भक्त्या तन्मनस्को दिवानिशम्[१४] ॥३८॥
पूर्णिमायाः समाप्तौ तज्ज्योतिर्लिङ्गेऽविशद्धि सः । दीपस्य मेलनं दीपशिखायामिव भाजने[१५] ॥३९॥
एतल्लिङ्गे विमुक्तोऽभूद्ब्रह्मशर्मा पुरैव हि । न पुनर्जायते योनौ मरणं नास्ति चाद्यतः ॥४०॥
तेन लब्धं पुनर्वत्स ! चैतल्लिङ्गे च रक्षसा । मत्तः शृणु प्रवक्ष्यामि तत्त्वं तन्निखिलं ध्रुवम् ॥४१॥

हे विरूपाक्ष ! त्यसपछि त्यो म्लेच्छ ब्रह्मतीर्थको जल स्पर्श गरेर मरेको हुँदा वेदाध्यायी ब्राह्मणको कुलमा पैदा भयो। सम्पूर्ण वेद र शास्त्रको ज्ञाता त्यो म्लेच्छ सत्यवादी र निष्पाप भयो। हे बाबु ! त्यसपछि उसले प्रिय एवं अप्रिय वस्तु तथा आफ्नो कुल र घरलाई त्याग गरेर ब्रह्मचर्यव्रत धारण गऱ्यो। उसले मगन्ते भएर केही समय बितायो। ऊ घरबाट बाहिर निस्किएर जोगीको जस्तो आचरण गर्दै विचरण गरिरहेको थियो। यो मेरो शरीर अवश्य नाश हुन्छ, यसमा शङ्का छैन भन्ने ठानेर ब्रह्मशर्माले तीर्थयात्रा गऱ्यो ॥२७-३१॥

हे विरूपाक्ष ! त्यसपछि ऊ पृथ्वीमा रहेका सम्पूर्ण तीर्थहरू घुम्दै देवताका मूर्तिहरू हेर्दै यसै ठाउँमा आइपुग्यो। पूर्वजन्ममा यसै ठाउँमा मरेको हुँदा त्यही पुण्यको प्रभावले ब्रह्मशर्माले फाल्गुनकृष्ण अष्टमीका दिन यहाँ स्नान गऱ्यो। त्यसपछि त्यो ब्रह्मचारी ब्रह्मशर्मा स्नान गरेर सन्ध्याकालमा जप गर्नका लागि मानिस नभएको यस पहाडमा उक्लियो ॥३२-३४॥

त्यस ब्रह्मचारीले यहाँ आएर लुकेर रहेको ज्योतिस्वरूप यस लिङ्गलाई घिउले भरिएको बत्तीको ज्वालाजस्तै देख्यो। त्यसपछि बिस्तार बिस्तार डराउँदै यो के रहेछ ? भनेर आश्चर्य मान्दै ब्रह्मचारी त्यस लिङ्गको नजिकमा पुग्यो। उसले शिरले भुइँमा बारम्बार नमस्कार गऱ्यो। तीनै किसिमको भक्ति गर्दै आफ्नो शिरमा अँजुली राखेर लिङ्गको परिक्रमा गऱ्यो ॥३५-३७॥

त्यसपछि ब्रह्मशर्माले शिवजीको नजिकै बसेर शिवमा नै चित्त लगाएर प्रसन्न हुँदै भक्तिपूर्वक रातिदन गरी एक लाख शिवजीको मन्त्र जप्यो। एउटा दियोको ज्वालामा अर्को ज्वाला मिलेजस्तै पूर्णिमा सकिएपछि त्यसै ज्योतिर्लिङ्गमा गएर ऊ मिल्यो। अघि ब्रह्मशर्मा यसै लिङ्गमा मिलेर मुक्त भयो। आजसम्म पनि त्यसलाई कुनै योनिमा जन्मिएर मर्नुपरेको छैन। हे बाबु ! त्यो राक्षसले पनि यसै शिवलिङ्गमा आएर मुक्ति पायो। म त्यो सबै कुरा तिमीलाई बताउँछु, मबाट त्यो कुरा सुन ॥३८-४१॥

---

७. अभूत्पापपराङ्मुखः, इति न.सं.पु.पाठः ।
८. भ्रममाणः, इति न.सं.पु.पाठः
९. पूर्वजन्ममृतानत्र तस्मात्पुण्यप्रभावतः, इति न.सं.पु.पाठः ।
१०. समत्र वै, इति न.सं.पु.पाठः ।
११. नूनं गिरिमेनं समारुहत्, इति न.सं.पु.पाठः ।
१२. समत्रैत्य, इति न.सं.पु.पाठः
१३. त्रिविधैर्हि, इति न.सं.पु.पाठः
१४. ह्यहर्निशम्, इति न.सं.पु.पाठः
१५. दीपो दीपशिखायाञ्च मेलनञ्चैव भाजने, इति न.सं.पु.पाठः ।

अजीजनदसौ रक्षो दैत्यकुले विरूपदृक् । बलेः पुत्रो महावीरो देवासुरैः समादृतः ॥४२॥
महाबलो महावीरः सर्वलोकभयप्रदः । सहस्राक्षाद्बलेर्वीर्यान्यूनोऽसौ ह्यभवत्तदा ॥४३॥
पितुः पराक्रमं प्रेक्ष्य बाणस्तप इयेष सः । नारदाद्धि समाकर्ण्याऽऽययावत्र सनिर्जनः ॥४४॥
ब्रह्मतीर्थे ततः स्नात्वा चैनमारुह्य पर्वतम् । एतल्लिङ्गं मुदा भक्त्या चापूपूजदहर्निशम् ॥४५॥
जजाप द्वादशाब्दं स दिव्यं पुनर्विभीषणः । पञ्चोपचारकैर्लिङ्गमपूजयत् स प्रत्यहम्[१६] ॥४६॥
आविर्भूतो महादेवश्चैतल्लिङ्गात्तदा द्विज । व्याचष्ट वचनं बाणं वरं दातुं प्रहर्षितः ॥४७॥

ब्रह्मेश्वर उवाच

वरं वरय भो बाण ! यत्ते मनसि विद्यते । तपसा तोषितोऽहं ते दास्यामि तन्न संशयः ॥४८॥

बाण उवाच

आत्मजोऽहं बलेर्देव पितुस्तुल्यपराक्रमः । सहस्रञ्चैव हस्तानां दीयतां महेश्वर ॥४९॥
त्रैलोक्ये च जयं भूयः सर्वोन्नतं वरन्तथा । देवासुरैरजेयत्वं याचे त्वामेतदीश्वर ॥५०॥

ब्रह्मेश्वर उवाच

एवमस्तु च ते बाण ! यदहं याचितस्त्वया । त्रैलोक्येषु न तिष्ठन्तु योद्धारस्तव सन्निधौ ॥५१॥
यदा च ते ध्वजः स्थानात्पतिष्यति च दानव । भविष्यति महद्युद्धं तदामरैः समं हि ते ॥५२॥
विनाशन्ते सहस्राणां भुजानां हि भविष्यति । कारणात्ते सुतायाश्च विष्णोः सकाशतोऽसुर ॥५३॥
रक्षिष्यामि तदाहं त्वां सङ्कटे युधि निश्चितम् । छेदिते विष्णुना दोर्ष्णि तव बाणासुर ! ध्रुवम् ॥५४॥
तत्र वरं प्रदास्यामि पार्श्वगत्वञ्च तेऽसुर । समक्षञ्चैव देवानां चिरञ्जीवसि चाद्यतः ॥५५॥

हे विरूपाक्ष ! त्यो राक्षस बलि राजाको वीर छोरा बाणासुर भएर दैत्यको कुलमा जन्मियो, देवता र राक्षस दुबैले त्यसको सम्मान गर्दथे। शक्तिशाली त्यो दैत्य सबै प्राणीका लागि भयदाता बन्यो। त्यसबेला ऊ आफ्ना पिता बलि र इन्द्रभन्दा पनि बल र सामर्थ्यमा अलिकति मात्र कम थियो। आफ्ना बाबु बलिको बहादुरी देखेर बाणसुरले तपस्या गर्ने इच्छा गर्‍यो। नारदबाट उपदेश लिएर बाणासुर एक्लै यहाँ आयो। त्यसपछि उसले ब्रह्मतीर्थमा स्नान गर्‍यो, यस पर्वतमा चढ्यो र रातिदन भक्तिपूर्वक खुसी हुँदै यस लिङ्गको पूजा गर्‍यो। भयानक त्यस बाणासुरले दिव्य बाह्र वर्षसम्म पञ्चोपचार विधिले दिनदिनै यस शिवलिङ्गको पूजा गर्दै जप गर्‍यो। उसको यस किसिमको पूजा तथा जपबाट खुसी भएर शिवलिङ्गबाट महादेव प्रकट हुनुभयो र त्यसलाई भन्नुभयो ॥४२-४७॥

ब्रह्मेश्वरले भन्नुभयो – हे बाणासुर ! म तिम्रो तपस्याले खुसी भएँ। तिम्रो मनमा जे लागेको छ, त्यो वर माग, म तिमीलाई दिन्छु, यसमा शङ्का छेन ॥४८॥

बाणासुरले भन्यो – हे भगवन् ! म वीरशिरोमणि राजा बलिको पुत्र हुँ। म पनि मेरा पिता बलिजस्तै बलशाली बन्न सकूँ। हे महेश्वर ! मलाई हजार हात दिनुहोस्, म तीनै लोकलाई जित्न सकूँ। देवता र राक्षसले मलाई जित्न नसकून्। हे ईश्वर ! हजुरसित यो वर माग्छु, मलाई यो उत्तम वर दिनुहोस् ॥४९-५०॥

ब्रह्मेश्वरले भन्नुभयो – हे बाणासुर ! तिमीले जे माग्यौ, त्यो कुरा हुन्छ। तीनै लोकमा कोही पनि तिमीसित लड्न नसकून्। हे दानव ! जब राखेको ठाउँबाट तिम्रो झण्डा खस्नेछ, त्यसपछि देवताहरूसित तिम्रो ठूलो युद्ध हुनेछ। हे राक्षस ! तिम्रै छोरीको कारणले गर्दा विष्णुबाट तिम्रा हजार हातको नाश हुनेछ। हे बाणासुर ! विष्णुले तिम्रा हात काटिसकेपछि तिमीलाई सङ्कट परेको बेलामा लडाइँमा मैले तिम्रो रक्षा गर्नेछु। हे असुर ! मेरो नजिकै रहेका तिमीलाई देवताको अगाडि नै म वर दिनेछु। आजदेखि तिमी चिरञ्जीवी भयौ ॥५१-५५॥

---

१६. पञ्चोपचारकैः पूज्यश्चैतल्लिङ्गमहः प्रति, इति नु.सं.पु.पाठः ।

नेमुनिरुवाच

श्रुत्वेति वचनं रौद्रं लब्धवरोऽसुरोत्तमः । शोणिताख्यां पुरीं शीघ्रं प्रययौ हर्षपूरितः ॥५६॥
कस्मिञ्चित् तत्र[17] कालान्ते स्वपुत्रीकारणात्पुनः । अनिरुद्धं बबन्धाऽऽशु नृभिस्तद्भवने दृढम् ॥५७॥
तन्मोक्तुञ्च समागत्य कृष्णकार्ष्णिहलायुधाः । युद्धञ्चक्रुर्महत्तीव्रं दानवैः सह तत्र ते ॥५८॥
सुनिर्जित्याऽसुरान् युद्धे विष्णुश्च सूर्यवर्चसा । चकर्त्त करसाहस्रं विहाय तस्य द्वौ करौ[18] ॥५९॥
तत्र सस्मार रुद्रं सः चक्रक्षतप्रपीडितः । रुद्रोऽपि प्रययौ तत्र तं रक्षितुं गणैः सह ॥६०॥
अभूद्युद्धं तयोस्तीव्रं देवासुरभयङ्करम् । अभून्नादो भृशं तत्र हाहाकारो भयोदितः ॥६१॥
एकात्मानौ च भूत्वा द्वौ देवौ विभाजितौ पुनः । एकात्मानावपि तौ द्वौ जगद्रक्षाय मीलितौ ॥६२॥
प्रेक्ष्य बाणं शिवस्तत्र वज्राहतं द्रुमं यथा । व्याचष्टे वचनं तस्मै वरं दातुञ्च विष्णवे ॥६३॥

रुद्र उवाच

मैवं हि भवता चाऽस्य कर्त्तव्यं निधनं क्वचित् । अस्मै वरो मया दत्तः पुरा तद्भक्तितो हरे ॥६४॥
शृणु बाण ! वरं दास्ये भूयस्त्वद्धार्दतोऽधुना । देवासुरसमक्षेऽद्य सर्वलोकैः सुदुर्लभम् ॥६५॥
अद्यादि पार्श्ववर्त्ती त्वं मदैकांशतनूस्तव । भवत्यक्षं गृहाणाऽऽशु नित्यं मेऽनुचरो भव ॥६६॥
पूजयन्ति ततो लोकास्त्वां मत्पार्श्वस्थितं सदा । चिरञ्जीवमिति ज्ञात्वा महाकाल इति ब्रुवन् ॥६७॥
प्रमथा बाणमेनं वै[19] अभिषिच्य विमानगम् । देवासुरसमक्षाच्च प्रापयत[20] ममालयम् ॥६८॥

नेमुनिले भन्नुभयो – यस्तो कुरा सुनेर भगवान् शङ्करबाट वर प्राप्त गरेपछि राक्षसराज बाणासुर खुसी हुँदै तुरुन्त शोणितपुरमा गयो । त्यहाँ केही समयपछि आफ्नै छोरीको कारणले गर्दा राजाहरूले उसैको घरमा अनिरुद्धलाई बलियोसित बाँधे । अनिरुद्धलाई छुट्याउन कृष्ण, प्रद्युम्न र बलराम आउनुभयो । त्यहाँ उहाँहरूको राक्षसहरूसित ठूलो युद्ध भयो ॥५६–५८॥

राक्षसहरूलाई जितेर भगवान् कृष्णले सूर्यभन्दा पनि तेजिलो हतियारले हजार हातमध्ये दुई हातलाई छोडेर बाणासुरका अरू हात काटिदिनुभयो । सुदर्शन चक्रको घाउबाट पीडित भएको त्यस बाणासुरले त्यसपछि भगवान् शङ्करलाई सम्झियो । भगवान् शङ्कर पनि बाणासुरको रक्षार्थ आफ्ना गणहरूका साथ त्यहाँ आउनुभयो ॥५९–६०॥

कृष्णजी र भगवान् शङ्करका बीचमा डरलाग्दो युद्ध भयो । सबै सेनाहरू डरले कराउँदै हाहाकार मच्चाउन थाले । एक आत्मा भएर पनि युद्ध गरिरहनुभएका महादेव र कृष्णलाई मायादेवीले छुट्याएकी थिइन् । एउटै आत्मा भएका दुबै जना संसारको रक्षाको निमित्त मिल्नुभयो । वज्रद्वारा काटिएको रुखजस्तो बाणासुरलाई देखेर शिवजीले वर दिनका लागि विष्णु र बाणासुरसित भन्न लाग्नुभयो ॥६१–६३॥

महादेवले भन्नुभयो – हे विष्णु ! तपाईंले यसलाई कहिल्यै पनि मार्न पाउनुहुन्न । यसको भक्तिबाट प्रसन्न भएर मैले अघि यसलाई वर दिएको थिएँ । हे बाणासुर ! तिम्रो मप्रतिको हार्दिकताले गर्दा म तिमीलाई देवता र राक्षसको अगाडि नै दुनियाँका लागि दुर्लभ भएको वर दिन्छु । आजदेखि तिमी मेरो समीपमा रहन पाउनेछौ । तिम्रो शरीर मेरो एक अंशबाट बन्नेछ । तिमी तुरुन्त यो रुद्राक्ष धारण गर र मेरो अनुयायी बन । त्यसपछि मेरो पार्श्ववर्ती भएका तिमीलाई दुनियाँले चिरञ्जीवी ठानेर महाकाल भन्दै पूजा गर्नेछन् । हे प्रमथगण हो ! देवता र राक्षसहरूको समीपमा अभिषेक गरेर यिनलाई विमानमा राखी मेरो लोकमा लैजाओ ॥६४–६८॥

---

१७. तत्र क्वचिच्च, इति न.सं.पु.पाठः ।
१८. विहाय द्वौ करौ तस्य चकर्त्त च सहस्रकम्, इति न.सं.पु.पाठः ।
१९. भो प्रमथाः समेनं वै, इति न.सं.पु.पाठः ।
२०. चानयध्वम्, इति न.सं.पु.पाठः ।

नेमुनिरुवाच

इत्याकर्ण्य वचः शैवमभिषेकं ददुस्तदा । बाणासुराय ते तत्र निन्यू रुद्रपुरं हि तम् ॥६९॥
उषाया अनिरुद्धेन विवाहे विहिते सति[२१] । द्वारवत्यां गते कृष्णे शङ्करे च तिरोहिते ॥७०॥
प्रमथानां गरिष्ठोऽभून्महाकाल इति श्रुतः । ब्रह्मतीर्थजले स्नात्वा देवलिङ्गप्रभावतः ॥७१॥
चतुःषष्टिगणैर्नित्यमत्र स्थितैरहर्निशम् । पार्वत्या सहितैरेतल्लिङ्गं नित्यमुपास्यते[२२] ॥७२॥
कार्त्तिकेयेश्वरो यत्र चन्द्रकान्त्युपलाचले । अधो याम्यनितम्बाच्च चन्द्रदीप्तिनदीमुखात्[२३] ॥७३॥
सिद्धरसः समुद्भूतो यत्र कूटे विराजते । तद्रसस्पर्शनाद्धातुः सद्यः स्वर्णं भवेत् किल ॥७४॥
तत्र गत्वा महालिङ्गं सम्पूज्याऽऽशु सुभक्तितः । वाञ्छितं लभ्यते[२४] सद्यश्चाऽभिव्रज विरूपदृक् ॥७५॥
ब्रह्मेश्वरस्याऽद्य विरूपनेत्र ! प्रोक्तं माहात्म्यं निखिलं मया ते ।
ब्रह्माख्यतीर्थस्य विशेषतो हि वक्ष्यामि भूयः शृणु वत्स चाऽन्यत् ॥७६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
ब्रह्मेश्वरमाहात्म्यं नाम षोडशाधिकशततमोऽध्यायः ॥११६॥

नेमुनिले भन्नुभयो – यस्तो भगवान् शङ्करको वचन सुनेर शिवजीका दूतहरूले बाणासुरलाई अभिषेक गरेर उनीहरूले त्यसलाई रुद्रलोकमा लगे । त्यसपछि भगवान् कृष्ण द्वारका जानुभयो भने भगवान् शङ्कर त्यसै ठाउँमा विलीन हुनुभयो । अनि उषाका साथ अनिरुद्धको विवाह भयो । ब्रह्मतीर्थको जलमा स्नान गरेर भगवान् शङ्करको लिङ्गको पूजा गरेको हुँदा त्यसैका प्रभावले बाणासुर प्रमथगणमा श्रेष्ठ महाकाल हुन पुगे ॥६९–७१॥

चौंसठ्ठी योगिनीहरू यसै ठाउँमा बसेर सधैं पार्वतीले सहित विराजमान हुनुहुने भगवान् शिवको लिङ्गको आराधना गर्दछन् । जुन चन्द्रकान्तमणि पर्वतमा कार्तिकेश्वर भगवान् बस्नुभएको छ, त्यसैका दक्षिणपट्टिबाट चन्द्रदीप्ति नदी बगेकी छन् । जुन पर्वतको शिखरमा सिद्धरसको उत्पत्ति भएको छ, त्यस रसलाई स्पर्श गऱ्यो भने धातु पनि सुन हुन्छ । हे विरूपाक्ष ! छिट्टै त्यहाँ गएर भक्तिपूर्वक त्यस महालिङ्गको पूजा गर, तुरुन्त इच्छा लागेको फल पाउनेछौ, गइहाल ॥७१–७५॥

हे विरूपाक्ष ! मैले तिमीलाई आज ब्रह्मेश्वर लिङ्गको र विशेष गरी ब्रह्मतीर्थको सम्पूर्ण माहात्म्य बताएँ । हे बाबु ! म फेरि भन्छु, अरु सुन ॥७६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा ब्रह्मेश्वर शिवलिङ्गको माहात्म्यनामक
एकसय सोह्रौं अध्याय पूरा भयो ।

---

२१. **विवाहित उषायाश्च ह्यनिरुद्धेन वै समम्, इति न.सं.पु.पाठः ।** २२. **एतल्लिङ्गमुपासन्ते पार्वत्या सहितं सदा, इति न.सं.पु.पाठः ।**
२३. **स्रवत्, इति न.सं.पु.पाठः ।** २४. **वाञ्छितार्थं लभेत्, इति न.सं.पु.पाठः ।**

सप्तदशाधिकशततमोऽध्यायः

स्कन्दतीर्थस्कन्देश्वर शिवलिङ्गयोर्महिमा

स्कन्द उवाच

ब्रह्मतीर्थे ततः स्नात्वा ब्रह्मेश्वरप्रपूजनात्। ब्रह्मज्ञानी ह्यभूद् विप्रश्चागस्त्योऽसौ विकिल्विषः ॥१॥
भूयोऽसौ मुनिना सार्द्धं यत्र तप्तं पुरा मया। मत्तीर्थे हि सुखं स्नात्वा तमीश्वरमपूपुजत् ॥२॥
तपःकृष्णद्वितीयायां निराहारो महानिशि। लिङ्गं समर्च्य माहात्म्यमपृच्छन्नेमुनिं हि सः[1] ॥३॥

विरूपाक्ष उवाच

भगवञ्छ्रोतुमिच्छामि सर्वज्ञाद् भवतः[2] प्रभो। एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च विशेषतः ॥४॥
समुद्भूतं कदा[3] लिङ्गं कार्त्तिकेयेश्वरं श्रुतम्। को मुक्तोऽत्र च तीर्थे वा वद मुनिजनेश्वर[4] ॥५॥

नेमुनिरुवाच

पूर्वं तपश्चकारात्र वधाय तारकस्य च। द्वादशाब्दञ्च दिव्यानां स्कन्दस्तीव्रं विरूपदृक् ॥६॥
चन्द्रदीप्तिर्नदी श्रेष्ठा चन्द्रकान्तोपलोद्भवा। सिद्धद्रवा च संयोगे तयोः सस्नौ शिवात्मजः[5] ॥७॥
स्कन्दतीर्थं ततः ख्यातं पृथिव्यामतिदुर्लभम्[6]। तत्र स्नात्वा नरो भक्त्या स्कन्दलोकं प्रगच्छति ॥८॥
तत्तीर्थे स तदा स्नात्वा चात्रागत्य ततो द्विज। स्थापितवान्यथाभक्त्या चैतल्लिङ्गं गुहान्तरे ॥९॥
जजाप तन्मनुं स्कन्दो जयाय स्वात्मनो भृशम्। द्वादशाब्दं हि दिव्यानां लिङ्गमभ्यर्च्य सर्वदा[7] ॥१०॥

अध्याय – ११७

स्कन्दतीर्थ र स्कन्देश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले ब्रह्मतीर्थमा स्नान गरेर ब्रह्मेश्वरको पूजा गरे। त्यसपछि उनी पापबाट मुक्त भएर ब्रह्मज्ञानी भए। फेरि विरूपाक्ष नेमुनिका साथमा हिँडे। उनले अघि जहाँ मैले तपस्या गरेको थिएँ, त्यसै तीर्थमा गएर सुखपूर्वक स्नान गरी स्कन्देश्वर भगवान्‌को पूजा गरे। माघकृष्ण द्वितीयाका दिन निराहार बसी राति शिवलिङ्गको पूजा गरेर विरूपाक्षले नेमुनिसँग त्यस लिङ्गको माहात्म्य सोधे ॥१–३॥

विरूपाक्षले भने – हे सर्वज्ञ प्रभु ! हजुरसित म यो लिङ्ग र विशेष गरी यस तीर्थको माहात्म्य सुन्न चाहन्छु। हे मुनीश्वर ! कार्तिकेयेश्वर लिङ्गको उत्पत्ति कहिले भएको थियो ? यस तीर्थमा कसले मुक्ति पाएको थियो ? सबै कुरा मलाई बताउनुहोस् ॥४–५॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि कार्तिक स्वामीले तारकासुरलाई मार्नका लागि दिव्य बाह्र वर्षसम्म यसै ठाउँमा कठोर तपस्या गर्नुभएको थियो। कार्तिक स्वामीले चन्द्रकान्तमणिबाट पैदा भएकी श्रेष्ठ चन्द्रदीप्ति नदी र सिद्धरसबाट पैदा भएकी नदीको सङ्गमस्थलमा स्नान गर्नुभयो। त्यसैले पृथ्वीमा दुर्लभ भएको त्यस तीर्थलाई स्कन्दतीर्थ भनियो। भक्तिपूर्वक मानिसले त्यहाँ स्नान गर्‍यो भने त्यो स्कन्दलोकमा जान्छ ॥६–८॥

हे विरूपाक्ष ! त्यस तीर्थमा स्नान गरेर यहाँ गुफाभित्र आई कार्तिक स्वामीले भक्तिपूर्वक यस लिङ्गको स्थापना गर्नुभएको थियो। कार्तिक स्वामीले आत्मविजयी बन्न रातिदन दिव्य बाह्र वर्षसम्म यस लिङ्गको पूजा गरेर भगवान् शङ्करको मन्त्र जप्नुभयो ॥९–११॥

---

१. पूज्य लिङ्गं माहात्म्यं तदपृच्छन्नेमुनिं हि सः, इति न.सं.पु.पाठः। २. त्वयि सर्वविदि, इति न.सं.पु.पाठः।
३. कदा समुद्भवम्, इति न.सं.पु.पाठः। ४. मे मुनिकेश्वर, इति न.सं.पु.पाठः।
५. सिद्धद्रवेण संयोगे स्कन्दः सस्नौ हि तत्र वै, इति न.सं.पु.पाठः ६. तस्माच्च स्कन्दं तद्विख्यातं भुवि दुर्ल्लभम्, इति न.सं.पु.पाठः।
७. दिव्यानामर्च्य लिङ्गमहर्निशम्, इति न.सं.पु.पाठः।

आविर्भूतस्ततो लिङ्गादुद्रस्तस्मै वरं ददौ। त्रैलोक्यविजयार्थाय दैत्यशत्रुविमर्दकम् ॥११॥
अंशो रुद्रात्मनः स्कन्दो लब्ध्वा तस्माद्वरं तथा। हन्तुं दानवसैन्यानि सितधारातटं ययौ ॥१२॥
शृणु वक्ष्यामि ते भूयः स्कन्दतीर्थप्रशंसनम्। कौचित् कोलौ विमुक्तौ च लिङ्गस्यास्य प्रभावतः[८] ॥१३॥
अशौचाज्जीवितौ विप्रावाजन्म भ्रमणे रतौ। तद्दोषात्तौ समुद्भूतौ कोलयोन्यां वनेचरौ ॥१४॥
फलमूलाशनौ नित्यं क्षुत्पिपासाप्रपीडितौ। वने वने तदाहारं मार्गमाणावितस्ततः ॥१५॥
एकदा मिलितौ चात्र ह्यन्यतश्चागतौ वनात्। तौ शूकरौ मिथः प्रेक्ष्य चेर्ष्यावन्तौ बभूवतुः ॥१६॥
युयुधतुर्गिरौ चात्र तौ हि मिथो जयैषिणौ। भृशं तुण्डप्रहारैश्च दन्ताघातैस्तथापरैः ॥१७॥
सम्प्रहरन्तौ च युद्धे तौ परस्परजयेच्छया[९]। तत्रैव प्राप्तवन्तौ च स्कन्दतीर्थतटे तदा ॥१८॥
एकस्तुण्डप्रहारेण ह्याकण्ठं मज्जितो जले[१०]। आकण्ठमस्तकञ्चैकः प्राविशत्तज्जले पुनः ॥१९॥
सन्दश्य तौ मिथो दन्तैर्जलादुत्तरतुः पुनः। त्यक्त्वा युद्धं मिथः प्रेक्ष्य चाननं विग्रहं तथा ॥२०॥
एकोऽभून्नरदेहोऽसौ जलस्पर्शात् च कोलकः[११]। नरवक्त्रस्तथा चैको विषमौ कोलविग्रहौ ॥२१॥
ज्ञानयुक्तावभूतां तौ चरन्तावचले पुनः[१२]। अत्र प्राप्तौ विरूपाक्ष ! चित्रं सम्मिलितौ पुनः ॥२२॥
चैत्रशुक्लत्रयोदश्यामेतल्लिङ्गे तदा हि तौ। स्वाङ्गं च स्वाननं विप्र घृष्टवन्तौ[१३] हि कण्डूतः ॥२३॥
चक्रतुरत्र वासं तौ चैकाब्दं हि निरन्तरम्। निवेद्य फलमूलानि चैतल्लिङ्गोपरि ध्रुवम् ॥२४॥

त्यसपछि यसै लिङ्गबाट भगवान् शङ्कर प्रादुर्भाव हुनुभयो र कार्तिक स्वामीलाई सम्पूर्ण शत्रुलाई नाश गरेर तीनै लोक विजय गर्न सक्ने वर दिनुभयो। रुद्रको अंश लिएर जन्मिनुएका कार्तिक स्वामी भगवान् शङ्करबाट वर प्राप्त गरी दानवका सेनाहरूलाई मार्न सितधारा नदीको तीरमा जानुभयो ॥११–१२॥

म फेरि तिमीलाई यो स्कन्दतीर्थको माहात्म्य बताउँछु, सुन – कुनै बनेल यसै लिङ्गको अनुग्रहले गर्दा मुक्त भएको थियो। जन्मभर अपवित्र तरिकाले जीवन निर्वाह गर्दै बाँचुञ्जेल भ्रमण गर्ने कुनै दुई ब्राह्मण त्यसै पापले गर्दा जङ्गली बनेलको योनिमा जन्मिए। सधैं फलफूल र कन्दमूलमात्र खाने, भोक र प्यासले पीडित भएका ती दुई बनेल वनमा यताउति हिँडेर आहारा खोज्न थाले ॥१३–१५॥

एक दिन यसै वनमा ती दुई बनेलको भेट भयो। छुट्टाछुट्टै वनबाट आएका ती दुई एक अर्कालाई देखेर ईर्ष्या गर्न थाले। परस्पर विजयको आकाङ्क्षा राख्ने ती दुबै बनेल आपसमा थुतुनो प्रहार गर्दै यसै पहाडमा खूबसित युद्ध गर्न थाले। आपसमा विजयको इच्छा राखेर प्रहार गर्दै ती दुई बनेल त्यस समयमा स्कन्दतीर्थको तटमा पुगे। दुबै जित्नका लागि कोसिस गर्दै थिए। एउटाले अर्कालाई थुतुनाले हान्यो र पानीमा डुबाइदियो र आफू पनि घाँटीसम्म डुब्ने गरी पानीमा पस्यो। दुबै बनेल दाह्राले हानाहान गर्दै पानीबाट बाहिर निस्किए ॥१६–१९॥

दुबैले आ–आफ्नो मुख र शरीर हेरेर युद्ध गर्न छाडे। जलको स्पर्शले गर्दा एउटाको शरीर मानिसका जस्तो र मुख बनेलको जस्तो भयो। अर्काको मुख मानिसको जस्तो र शरीर बनेलको जस्तो असमान भयो। त्यसपछि ती दुबैलाई ज्ञान भयो, परस्पर मिलेर पहाडमा हिँड्दै फेरि यसै ठाउँमा आइपुगे। चैत्रशुक्ल त्रयोदशीका दिन ती दुवै बनेलले त्यही स्कन्देश्वर लिङ्गमा चिलाई मेट्न शरीर घसारे र थुतुनो दले। एक वर्षसम्म तिनीहरू त्यहीं निरन्तर बसे। फल तथा कन्दमूल यस लिङ्गमा चढाए ॥२०–२४॥

---

८. कश्चित्कोलो विमुक्तोऽभूच्चैतल्लिङ्गप्रसादतः, इति न.सं.पु.पाठः। ९. परिवर्त्तनौ, इति न.सं.पु.पाठः।
१०. प्रहारयन्तौ चान्योन्यं युद्धे च विजयेप्सया, इति न.सं.पु.पाठः।
११. तुण्डाघातेन चैकस्तज्जले निमज्जितागलः, इति न.सं.पु.पाठः। १२. कोलानानां जलस्पृशात्, इति न.सं.पु.पाठः।
१३. चैतस्मिन्नचले चरन्, इति न.सं.पु.पाठः।

ततः संवत्सरान्ते तौ पञ्चत्वमत्र सङ्गतौ । चैत्रशुक्लत्रयोदश्यामेतल्लिङ्गस्पृशौ पुरा ॥२५॥
ततश्चाऽत्राऽऽगता दूता रुद्रस्य च शिवाज्ञया । ववृषुः[१४] पुष्पवर्षाणि वाद्यगीतैः प्रमोद्य च ॥२६॥
तावास्थाय हि तद्याने शिवदूताः समागताः । निन्युः शिवपुरं तौ तद्गणत्वेनाऽभिषिच्य च ॥२७॥
अद्यापि समवेतौ तौ रुद्रपार्श्वगतावुभौ । प्रसादाच्चैव लिङ्गस्य तीर्थस्य च विरूपदृक् ॥२८॥
भूयो गच्छ विरूपाक्ष ! मृगेन्द्रशिखरोपरि । शतरुद्रो हि यत्राऽऽस्ते पूर्वदिशे ह्यतो ध्रुवम् ॥२९॥
प्रोक्तं मयैतत्खलु ते महत्त्वं स्कन्देश्वरस्याऽद्य विरूपनेत्र ।
वक्ष्यामि भूयः शृणु विप्र ! चाऽन्यन् मृगेन्द्रकूटाश्रिततन्महत्त्वम् ॥३०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालामाहात्म्ये विरूपाक्षतीर्थयात्रायां
स्कन्दतीर्थस्कन्देश्वरयोर्माहात्म्यं नाम सप्तदशाधिकशततमोऽध्यायः ॥११७॥

एक वर्ष पुगेपछि चैत्रशुक्ल त्रयोदशीका दिन त्यस लिङ्गको स्पर्श गरेर दुबैले प्राण त्याग गरे । शिवजीको आज्ञाबमोजिम शिवदूतहरू यहाँ आई पुष्पवृष्टि गर्दै गाना बजाउँदै अभिषेक गरी ती दुई बनेललाई यानमा राखेर शिवलोक लगे । हे विरूपाक्ष ! यस लिङ्ग र तीर्थको अनुग्रहले गर्दा ती दुबै आज पनि भगवान् शङ्करका पार्श्ववर्ती भएर रहेका छन् ॥२५-२८॥

हे विरूपाक्ष ! यहाँबाट पूर्वपट्टि मृगेन्द्र शिखर छ, त्यसमाथि शतरुद्र भगवान् रहनुभएको छ, त्यसै ठाउँमा जाऊ । हे विरूपाक्ष ! मैले तिमीलाई स्कन्देश्वर भगवान्को यो माहात्म्य बताएँ । म पुनः मृगेन्द्रकूटपर्वतको प्रसिद्ध माहात्म्य तिमीलाई भन्छु, सुन ॥२९-३०॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा स्कन्दतीर्थ र स्कन्देश्वर शिवलिङ्गको महिमानामक
एकसय सत्रौं अध्याय पूरा भयो ।

---

१४. **वर्षयन्, इति न.सं.पु.पाठः ।**

अष्टदशाधिकशततमोऽध्यायः

नारसिंहतीर्थशतरुद्रेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

मम तीर्थे ततः स्नात्वा प्रजहौ प्रकृतिं स्वकाम्। महाज्ञानैः समायुक्तस्तेजस्वी च विकिल्विषः ॥१॥
भूयोऽगमद्विरूपाक्षो मुनिना तेन वै समम्। यत्रास्ते शतरुद्रोऽसौ हर्षपूर्णमनोरथः ॥२॥
नृसिंहाख्यमहातीर्थे स्नात्वाऽऽरोहद् गिरिं पुनः[1]। शतरुद्रं मुदा भक्त्याऽपूजयत्[2] च विरूपदृक् ॥३॥
ततः कृष्णतृतीयायां भक्त्या पञ्चोपचारकैः। पूजितवानुपोष्यार्य ! नक्तव्रतं समाचरन् ॥४॥
अपृच्छन्नेमुनिं भूयस्तन्निशायां विरूपदृक्। विनिद्रो भक्तियुक्तोऽसौ माहात्म्यं तीर्थलिङ्गयोः ॥५॥

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल ! श्रोतुकामश्च त्वत् पुनः[3]। एतेषाञ्चैव रुद्राणां माहात्म्यं जननं तथा ॥६॥
तत्तीर्थस्य माहात्म्यञ्च प्रादुर्भावं पुनर्विभो। एतल्लिङ्गप्रसादाद्धि को मुक्तोऽत्र वद प्रभो ॥७॥

नेमुनिरुवाच

हिरण्यकशिपुं हत्वा नृसिंहोऽत्रागमत्पुरा। चचाराऽस्मिन्वने शैले कञ्चित्कालं महासुखम् ॥८॥
ज्येष्ठसिते दशम्यां स दावप्रपीडितः पुरा। गङ्गामावाहयत् स्नातुं घर्मेणार्तस्तदा[4] द्विज ॥९॥
ज्येष्ठिला सा समाख्याता तस्मान्नदी वरोद्भवा। नित्यं तस्या जले स्नात्वा[5] चक्रे विहारमादृतम् ॥१०॥
भूयः सस्मार गङ्गां स पश्चिमायां ततो दिशि[6]। मृगेन्द्राद्रिसमुद्भूता विश्वगङ्गेति विश्रुता ॥११॥

अध्याय – ११८

नारसिंहतीर्थ र शतरुद्रेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – विरूपाक्ष मेरो तीर्थमा स्नान गरेर आफ्नो प्रकृति अर्थात् पाशविक प्रवृत्तिबाट मुक्त भई ठूला ज्ञानी भए। उनले आफूभित्र रहेको अज्ञान सबै हटाए। त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर मनोरथ पूरा भएकाले हर्षित हुँदै शतरुद्र भगवान् बस्नुभएको स्थानमा गए। नृसिंह नाम गरेको महातीर्थमा स्नान गरेर विरूपाक्ष त्यस पर्वतमा चढे। उनले प्रसन्न भएर शतरुद्र भगवान्को भक्तिपूर्वक पूजा गरे ॥१–३॥

हे अगस्त्य मुनि ! माघकृष्ण तृतीयाका दिन उनले भक्तिपूर्वक रातभरि उपवास तथा जाग्राम बसेर पञ्चोपचार विधिले शिवलिङ्गको पूजा गरे। विरूपाक्षले फेरि त्यसै दिन राति जाग्राम बसेर तीर्थ र लिङ्गको माहात्म्यको बारेमा नेमुनिसित भक्तिपूर्वक सोधे। हे मुनिश्रेष्ठ हजुरलाई नमस्कार छ। म यस शिवलिङ्गको माहात्म्य र उत्पत्तिका विषयमा हजुरबाट जान्न चाहन्छु। हे ज्ञानी प्रभु ! त्यो तीर्थको माहात्म्य र उत्पत्ति पनि सुन्न चाहन्छु। यस लिङ्गको अनुग्रहबाट को मुक्त भएको थियो ? त्यो सबै मलाई बताउनुहोस् ॥४–७॥

नेमुनिले भन्नुभयो – अघि नृसिंह भगवान् हिरण्यकशिपुलाई मारेर यसै वनमा आउनुभएको थियो। उहाँ आनन्दसित केही समयसम्म यस पर्वतको जङ्गलमा घुम्नुभयो। हे विरूपाक्ष ! ज्येष्ठशुक्ल दशमीका दिन उहाँले वनको डढेलो र घामको तातोको तापबाट पीडित भएर स्नान गर्न गङ्गाको आवाहन गर्नुभयो। त्यसबाट त्यहाँ ज्येष्ठिला नाम गरेकी उत्कृष्ट नदी पैदा भइन्। उहाँले त्यस नदीको जलमा स्नान गरेर प्रशंसनीय क्रीडा गर्नुभयो। त्यसपछि उहाँले पश्चिम दिशालाई पवित्र तुल्याउन गङ्गाको स्मरण गर्नुभयो र मृगेन्द्र पर्वतबाट विश्वगङ्गा नाम गरेकी गङ्गा पैदा भइन् ॥८–११॥

---

१. स्नात्वा गिरिं समारुहत्, इति न.सं.पु.पाठः।
२. अपूपूजत्, इति न.सं.पु.पाठः।
३. श्रोतुकामः पुनस्त्वयि, इति न.सं.पु.पाठः।
४. घमार्त्तिस्तस्तदा, इति न.सं.पु.पाठः।
५. जलाप्लाव्य, इति न.सं.पु.पाठः।
६. पातुं तत्पश्चिमां दिशि, इति न.सं.पु.पाठः।

सङ्गमे स तयोः सस्नौ ज्येष्ठिलाविश्वगङ्गयोः । ज्येष्ठस्य पूर्णिमायाञ्च ज्येष्ठर्क्षसंयुते दिने ॥१२॥
मेषाख्यायाञ्च सङ्क्रान्त्यां युक्तायां रविणा हरिः । तयोः सुसङ्गमे स्नात्वा तीर्थेऽस्मिन् स[७] समागमत् ॥१३॥
समाराधितवान् भक्त्या शतरुद्रं नृकेसरी । एते रुद्राः समुद्भूताः शतलिङ्गमयास्तदा[८] ॥१४॥
एतानि चैव लिङ्गानि चार्चितवान्नृकेसरी । द्वादशञ्चैव दिव्यानां फलपुष्पोपहारकैः ॥१५॥
कश्चिन्मुक्तो नृपश्रेष्ठश्चैतल्लिङ्गप्रसादतः । कालान्तरे च कस्मिँश्चित्कलौ[९] प्राप्ते विरूपदृक् ॥१६॥
आसीन्नृपवरः पूर्वं सूर्यकेतुरिति श्रुतः । क्वचित्कालान्तरे सोऽपि सार्वभौमो ह्यभूद् द्विज ॥१७॥
कृत्वा निःक्षत्रियां रामो ददौ तस्मै रसां पुरा । पुनः पुनर्नृपवृन्दे चैकविंशतिधाहते[१०] ॥१८॥
द्वादशाब्दं सुखं भुक्त्वा सूर्यकेतू रसामिमाम् । अर्पयामास तां[११] भूयस्तस्मै रामाय भक्तितः ॥१९॥
नमस्ते भगवन् राम त्वद्दत्तां क्ष्मां गृहाण वै । वाञ्छाम्यहं न राज्यञ्च स्वप्नवत् प्राणिनां सुखम् ॥२०॥
वाञ्छाम्यहं वनञ्चैकं तपःस्थानञ्च केवलम् । नमस्ते राम ! गच्छामि सत्यमेतत्तपोवनम् ॥२१॥
राज्यं समर्प्य रामाय तपःकर्तुं समाययौ । ज्ञात्वा हिमालयं श्रेष्ठं पत्नीपुत्रीसुतैः सह ॥२२॥
द्वादशाब्दं तपस्तेपे सूर्यकेतुर्हिमालये[१२] । नारसिंहमहातीर्थे स्नात्वा नित्यञ्च भक्तितः ॥२३॥
पञ्चोपचारकैर्नित्यं लिङ्गान्येतानि सर्वदा । अपूपूजन्मुदा भक्त्या सूर्यकेतुरहर्निशम् ॥२४॥
माघशुक्लस्य पञ्चम्यां प्रद्युम्नाय नृपोत्तमः । चन्द्रावतीं सुतां श्लक्ष्णां प्रददौ विधिवद् द्विज ॥२५॥
कृत्वा परिणयं कामो ययौ द्वारवतीं पुनः । विमोच्य वाग्वतीं बन्धान्महेन्द्रदमनात्तथा ॥२६॥
अष्टम्यां माघशुक्लायामाविर्बभूव शङ्करः । व्याजहार वचस्तस्मै वरं दातुं विरूपदृक् ॥२७॥

उहाँले ज्येष्ठा नक्षत्रले युक्त भएको ज्येष्ठ पूर्णिमाको दिन ज्येष्ठिला नदी र विश्वगङ्गा नदीको सङ्गममा स्नान गर्नुभयो । भगवान् नृसिंह मेषराशिमा सूर्य गएको मेषसङ्क्रान्तिका दिन ती नदीको सङ्गममा स्नान गरेर यस ठाउँमा आउनुभयो । नृसिंह अवतार भगवान्‌ले भक्तिपूर्वक शतरुद्रको आराधना गर्नुभयो । उहाँले आराधना गरेपछि सयवटा शिवजीका लिङ्ग उत्पन्न भए । भगवान् नृसिंहले दिव्य बाह्र वर्षसम्म फलफूल चढाएर यी लिङ्गहरूको अर्चना गर्नुभयो । हे विरूपाक्ष ! केही समयपछि कलियुगमा यस लिङ्गको अनुग्रहबाट कुनै राजाले मुक्ति प्राप्त गरेका थिए ॥१२-१६॥

हे विरूपाक्ष ! प्राचीन कालमा सूर्यकेतु नाम गरेका एक राजा थिए । उनी केही समयपछि चक्रवर्ती राजा भए । परशुरामले एक्काइस पटकसम्म घुम्दै दुष्ट राजालाई मारेर सम्पूर्ण पृथ्वीलाई क्षत्रियरहित बनाएपछि तिनै राजालाई यस पृथ्वीको शासनभार जिम्मा लगाएका थिए । राजा सूर्यकेतुले पृथ्वीको बाह्र वर्षसम्म भोग गरे र पुनः भक्तिपूर्वक परशुरामलाई नै पृथ्वी सुम्पिँदै भने – हे परशुराम ! हजुरलाई नमस्कार छ । तपाईंले दिनुभएको यो पृथ्वी फिर्ता लिनुहोस् । म यो जीवनलाई स्वप्नसरी चिन्तन गर्दै राज्यको सुखभोग गर्न चाहन्न । हे परशुराम ! मलाई तप गर्ने स्थान भएको वनको चाहना छ । त्यसैले म तपोवनमा जान्छु, यो सत्य कुरा हो ॥१७-२१॥

त्यसपछि परशुरामलाई राज्य सुम्पिए र उनी पत्नी, छोरी र छोराहरूलाई साथमै लिएर तपस्या गर्नका लागि हिमालय पर्वत नै उत्तम छ भन्ने ठानेर त्यहाँ गए । राजा सूर्यकेतुले भक्तिपूर्वक नित्य नृसिंह महातीर्थमा स्नान गरेर बाह्र वर्षसम्म यस ठाउँमा तप गरे । सधैँ प्रसन्न हुँदै राजा सूर्यकेतुले भक्तिपूर्वक पञ्चोपचार विधिद्वारा यी लिङ्गहरूको रातिदन आराधना गरे ॥२२-२४॥

माघशुक्ल पञ्चमीका दिन ती राजाले विधिपूर्वक प्रद्युम्नलाई आफ्नी सुन्दरी पुत्री दान दिए । प्रद्युम्नले विवाह गरेर वाग्वतीलाई बन्धन छुट्याए र आफू द्वारवती गए । हे विरूपाक्ष ! माघशुक्ल अष्टमीका दिन राजा सूर्यकेतुलाई वर दिनका लागि भगवान् शङ्कर प्रकट हुनुभयो र भन्नुभयो ॥२५-२७॥

---

७. अत्रैव च, इति न.सं.पु.पाठः ।
८. शतलिङ्गात्मकास्तदा, इति न.सं.पु.पाठः ।
९. कालान्ते कतिचित्तस्मात्कलौ, इति न.सं.पु.पाठः ।
१०. वारं वारं नृपोद्भूते एकविंशतिधाकृते, इति न.सं.पु.पाठः ।
११. प्रत्यर्पिता रसा, इति न.सं.पु.पाठः ।
१२. सूर्यकेतुः समत्र वै, इति न.सं.पु.पाठः ।

शतरुद्र उवाच

सूर्यकेतो नृपश्रेष्ठ वरं दास्यामि ते शृणु। यत्त्वया काङ्क्षितं चित्ते[१३] तथाऽस्तु ते हि साम्प्रतम् ॥२८॥
भवाद्यादि गणश्रेष्ठो मत्प्रसादान्नृपोत्तम। देवानामसुराणां त्वं वन्दनीयोऽमरो भव ॥२९॥

नेमुनिरुवाच

इत्येवं शङ्करस्तस्मै वरं दत्त्वा तदा ध्रुवम्। अन्तर्दधे किलात्रैव[१४] स्वभासा द्योतयन् गिरिम् ॥३०॥
ववृषुः पुष्पवर्षाणि लाजासारं तथामराः। नेदुर्दुन्दुभयो व्योम्नि गीततालरवैः समम् ॥३१॥
समेत्यात्र गणा रौद्रास्तमास्थाय च पुष्पके। सपरिवारमैश्वर्यैर्निन्युः शिवपुरं मुदा ॥३२॥
सम्प्रेक्ष्य तं विमानस्थं सर्वे लोकाः सुरासुराः। साधु साध्विति हर्षञ्च समुचुः[१५] सर्वशस्तदा ॥३३॥
यस्तत्तीर्थजले स्नात्वा[१६] चाऽऽरोहति त्विमं गिरिम्। पदेपदेऽश्वमेधानां फलं प्राप्नोत्यसंशयः ॥३४॥
पश्यति शतरुद्रं यो रुद्रगणो भविष्यति। शतजन्मार्जितैनोभिर्विमुक्तोऽसौ ततो द्विज ॥३५॥
वाग्वतीप्रभवे पुण्ये पञ्चतीर्थे च भक्तितः। स्नायाच्च विधिवद्विप्र ! भवेत्[१७] कोटिगुणं फलम् ॥३६॥
पूर्वस्यां दिश्यतो[१८] भूयो गच्छाऽधुना विरूपदृक्। काकेश्वरो हि यत्राऽऽस्ते विदूरे योजनार्द्धके ॥३७॥
सम्प्रोक्तमेतद्धि मया महत्त्वं[१९] बीजं परं प्राणभृतां सुखाद्यम्।
मुक्तिं ददानाय च रुद्रनाम्ने[२०] तुभ्यं विरूपेक्षणशूलिने वै ॥३८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
नारसिंहतीर्थशतरुद्रेश्वरयोर्माहात्म्यं नामाष्टादशाधिकशततमोऽध्यायः ॥११८॥

शतरुद्रले भन्नुभयो – हे राजा सूर्यकेतु ! म तिमीलाई वर दिन्छु, सुन। अहिले तिमीले जे इच्छा गरेका छौ, त्यही कुरा पूर्ण होस्। मेरो अनुग्रहले गर्दा आजदेखि तिमी प्रमथ आदि गणहरूको अग्रणी भयौ। देवता र राक्षसहरूका पनि वन्दनीय तिमी अमर बन्यौ ॥२८-२९॥

नेमुनिले भन्नुभयो – सूर्यकेतु राजालाई यसरी वर दिएर भगवान् शङ्कर आफ्नो कान्तिले त्यस पर्वतलाई प्रकाशतमान बनाउँदै यस ठाउँमा नै अन्तर्धान हुनुभयो। भगवान् अन्तर्धान भएपछि देवताहरूले फूल तथा लाजाको वृष्टि गरे अनि आकाशमा गीत र तालको शब्दका साथै नगराहरू बज्न लागे। त्यसपछि प्रसन्न हुँदै शिवजीका गणहरू यहाँ आएर ऐश्वर्यका साथै सपरिवार राजा सूर्यकेतुलाई पुष्पक विमानमा राखेर शिवजीको लोकमा लगे ॥३०-३२॥

राजा सूर्यकेतुलाई विमानमा आसीन देखेर देवता, राक्षस तथा अरू प्राणीहरूले सहर्ष धन्यवाद दिए। जसले यस तीर्थमा स्नान गरेर यो पहाडमाथि चढ्छ, त्यस व्यक्तिले पाइलैपिच्छे अश्वमेध यज्ञ गरेको फल पाउँछ, यसमा शङ्का छैन। हे विरूपाक्ष ! जसले शतरुद्र लिङ्गको दर्शन गर्छ त्यो व्यक्ति सय जन्मसम्म गरेका सम्पूर्ण पापबाट मुक्त हुँदै शिवजीको गण बन्दछ। हे विरूपाक्ष ! वाग्वतीक्षेत्रमा उत्पन्न भएका अतिपवित्र पाँच तीर्थमा भक्तिपूर्वक विधिले स्नान गऱ्यो भने अन्य स्थानमा गरेको स्नान भन्दा करोडौँ गुणा बढी फल पाउँछ ॥३३-३६॥

हे विरूपाक्ष ! यहाँबाट आधा योजन पूर्व अर्थात् दुई कोस पूर्व काकेश्वर भगवान् हुनुहुन्छ। अब तिमी त्यहाँ जाऊ। हे विरूपाक्ष ! यो माहात्म्य प्राणीहरूको सुखका लागि बीजस्वरूप छ। मैले तिमीलाई शतरुद्रले मुक्ति दिनुभएको भगवान् शङ्करको यो माहात्म्य बताएँ ॥३७-३८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा नारसिंहतीर्थ र शतरुद्रेश्वर शिवलिङ्गको महिमानामक
एकसय अठारौँ अध्याय पूरा भयो।

---

१३. कामम्, इति न.सं.पु.पाठः।
१४. समत्रैव, इति न.सं.पु.पाठः।
१५. अवदन्य, इति न.सं.पु.पाठः।
१६. यस्तत्तीर्थजलाप्लुत्य, इति न.सं.पु.पाठः।
१७. अन्यत्, इति न.सं.पु.पाठः।
१८. पूर्वे दिशि ह्यतः, इति न.सं.पु.पाठः।
१९. माहात्म्यम्, इति न.सं.पु.पाठः।
२०. दत्तस्य मुक्तेः शतरुद्रनाम्न, इति न.सं.पु.पाठः।

एकोनविंशाधिकशततमोऽध्यायः

आकाशगङ्गातीर्थ-काकेश्वरशिवलिङ्गयोर्महिमा ॥

स्कन्द उवाच

वाग्वतीप्रभवेऽगस्त्य ! सस्नौ भूयो विरूपदृक् । सुन्दर्याख्ये महातीर्थे ब्रह्मतीर्थे ततः पुनः ॥१॥
स्नात्वागमद्विरूपाक्षो यत्र काकेश्वरो विभुः । मुनिना तेन सार्द्धञ्च सर्वपापैः विवर्जितः ॥२॥
स्नात्वा चाऽऽकाशगङ्गायां काकेश्वरः समर्चितः । विधिवत्तेन पञ्चम्यां तपःकृष्णस्य कुम्भज ॥३॥
अध्युष्ट[१] तन्निशायां तल्लिङ्गमभ्यर्च्य कुम्भज । तन्माहात्म्यमपृच्छद्धि तत्तीर्थलिङ्गयोर्मुनिम् ॥४॥

विरूपाक्ष उवाच

नमस्ते नेमुने तुभ्यं संसारदुःखनाशिने । शतरुद्रस्य माहात्म्यं त्वत्प्रसादाच्छ्रुतं मया ॥५॥
भवतः श्रोतुकामोऽहं ब्रह्मविदांवर ! पुनः । एतल्लिङ्गस्य माहात्म्यं तीर्थस्य च तथा प्रभो ॥६॥
समुद्भूतं कथं[२] तीर्थमेतल्लिङ्गं तथा पुनः । को मुक्तोऽत्र महादेवाद्वद मे तन्मुनीश्वर ॥७॥

नेमुनिरुवाच

शृणु वत्स प्रवक्ष्यामि महाश्चर्यकथां शुभाम् । यस्याः श्रवणमात्रेण मुच्यते जन्मकिल्विषैः ॥८॥
एकदा दिवसे विप्र ! कैलाशे संस्थितो हरः[३] । कौतूहलेन पार्वत्या संवादं कृतवान् पुरा[४] ॥९॥

श्रीमहादेव उवाच

ममैव मायया सर्वञ्चराचरं विमोहितम् । जगद्धि जायते मत्तस्तत्सर्वं लीयते मयि ॥१०॥
मन्माययाऽऽशु देवि ! त्वं मोहिता सततं पुनः । मुह्यन्ते योगिनोऽप्याशु किमु चाऽन्यजना भुवि[५] ॥११॥
को वेत्ति मम कल्याणि ! चरित्रं तद् वदाधुना[६] । न जानन्ति चरित्रं मे ब्रह्मविष्णुपुरन्दराः ॥१२॥

अध्याय - ११९

आकाशगङ्गातीर्थ र काकेश्वर शिवलिङ्गको महिमा ॥

कुमार स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले वाग्वतीको उत्पत्ति भएको सुन्दरी नामक महातीर्थ ब्रह्मतीर्थमा स्नान गरे । त्यसपछि त्यहाँ स्नान गरेर उनी सम्पूर्ण पापबाट मुक्त भई नेमुनिलाई साथमा लिएर जहाँ काकेश्वर भगवान् हुनुहुन्थ्यो, त्यस ठाउँमा गए । माघकृष्ण पञ्चमीका दिन उनले भक्तिपूर्वक आकाशगङ्गामा स्नान गरेर यथाविधि काकेश्वर भगवान्‌को अर्चना गरे । विरूपाक्षले त्यही रातमा लिङ्गको पूजा गरेर त्यस तीर्थ र लिङ्गको माहात्म्य नेमुनिसित सोधे ॥१-४॥

विरूपाक्षले भने - हे नेमुनि ! मेरा सम्पूर्ण दुःखलाई नाश गर्ने हजुरलाई नमस्कार छ । हजुरको कृपाबाट मैले शतरुद्रको माहात्म्य सुनें । हे ब्रह्मज्ञ प्रभु ! म पुनः हजुरबाट यो लिङ्ग र तीर्थको माहात्म्य सुन्न चाहन्छु । हे मुनीश्वर ! यो लिङ्ग र तीर्थको उत्पत्ति कसरी भएको थियो ? यस स्थानमा महादेवबाट वर पाएर को मुक्त भएको थियो ? मलाई बताउनुहोस् ॥५-७॥

नेमुनिले भन्नुभयो - हे बाबु ! एउटा अत्यन्त आश्चर्यलाग्दो कल्याणदायी कथा छ, त्यो कथा सुन्यो भने मात्रै पनि प्राणी सम्पूर्ण पापबाट मुक्त हुन्छ । एकदिन कैलाश पर्वतमा शिवजीको पार्वतीसँग ठट्टै ठट्टामा प्राचीन विषयमा संवाद भएको थियो ॥८-९॥

महादेवले भन्नुभयो - मेरै मायाले सम्पूर्ण चराचर जगत् मोहित भएका छन्, मबाटै संसारको प्रादुर्भाव हुन्छ र त्यो सबै ममा नै लीन हुन्छ । हे देवी ! बारम्बार तिमी मेरै मायाका कारण मोहित भएकी छौ । मेरो मायाबाट योगीहरू त तुरुन्त मोहित हुन्छन् भने अरूको के कुरा ? हे कल्याणी ! भन, मेरो चरित्र कसले जानेको छ ? ब्रह्मा, विष्णु र इन्द्र पनि मेरो चरित्र जान्दैनन् ॥१२॥

---

१. उषितः, इति न.सं.पु.पाठः ।
२. कथं समुद्भवम्, इति न.सं.पु.पाठः ।
३. चावदद्धरः, इति न.सं.पु.पाठः ।
४. कौतूहलेन पार्वत्यै संवादं कारणं पुरा, इति न.सं.पु.पाठः ।
५. चापि चान्यजनः किमु, इति न.सं.पु.पाठः ।
६. तद्वदस्व मे, इति न.सं.पु.पाठः ।

श्रीदेव्युवाच

मैवं वक्तव्यमार्येदं वचो मान्यजनेन वै। त्रैलोक्येशेन भूतेश ऋतमपि महाप्रभो ॥१३॥
को जानातीह भूतेश चरित्रं सर्वरूपगम्। वेत्स्यति च जनः कश्चित्तवैवानुग्रहाद्विभो ॥१४॥

नेमुनिरुवाच

एवं तयोर्विवादे हि निशामध्ये च शङ्करः। विहाय पार्वतीं शीघ्रं व्योम्नि तिरोदधे तदा ॥१५॥
वाग्वतीप्रभवात्पूर्वं तस्थौ गिरिगुहावरे। व्योमगङ्गां समावाह्य तन्निर्झरैः समाकुले ॥१६॥
त्रिपुरस्य भयात् त्रस्ताः कैलासमाययुः सुराः। व्रजामः शरणं रुद्रमिति कृत्वा च सत्त्वरम् ॥१७॥
न प्रेक्ष्य शङ्करं तत्र बभूवुः कम्पविग्रहाः। स्वर्गे रसातले भूमौ मृगयन्ति स्म तं द्रुतम् ॥१८॥
प्राप्तवन्तस्तदात्रैवाऽन्विष्यन्तो हरं सुराः[७]। त्रैलोक्ये च परिभ्रम्य द्वीपान् शैलान् सकन्दरान् ॥१९॥
ब्रह्मा दध्यौ शिवं सम्यक् क्षणं तदेह वै द्विज। व्याचष्ट वचनं तेभ्यो योगेनैव हि साम्प्रतम् ॥२०॥

ब्रह्मोवाच

भो देवा देवदेवेशो गूढरूपेण तिष्ठति। नहि सोऽन्यत्र चाऽत्रैव सत्यमेतन्न संशयः ॥२१॥
चरित्रं तस्य को वेद विना देवीं सुरोत्तमाः। अत्रैवाऽऽवाहयिष्यामस्तां देवीं भक्तिभिः स्तवैः ॥२२॥
एवञ्च कथ्यमाने हि देवास्तद्भयविह्वलाः। यूथीभूताः किलाऽत्रैव शृणु देव्याश्चरित्रकम् ॥२३॥
समाज्ञाय च तत्सर्वं चरित्रं शङ्करस्य च। देवानाञ्च मनः क्षुब्धं संस्मार मायया शिवाम् ॥२४॥
काकरूपेण चात्रैव तदा देवी समाययौ। सत्वरं व्योममार्गेण रुद्रचरित्रवित् सदा ॥२५॥
ध्यायमानं शिवं साक्षाद्देवी चाऽत्र ददर्श सा। एतद्गह्वरमासीनं गङ्गाधारासमाप्लुतम्[८] ॥२६॥
देवी कौतूहलेनैव सा काकरूपिणी तदा। व्याचष्ट काकवाक्येन तेभ्योऽत्रस्था विरूपदृक् ॥२७॥
काकविमोहिता देवाः कस्माद्वो भयमागतम्। क्लिश्यथ यं विना यूयं स हि चाऽत्रैव पश्यताम् ॥२८॥

पार्वतीले भन्नुभयो – हे पूजनीय ईश्वर ! हजुरजस्ता मान्यजनले सत्यै भए पनि यस्तो कुरा गर्नु उचित हुँदैन। हे ईश्वर ! सम्पूर्ण रूप लिने हजुरको चरित्र कसले जान्न सक्छ ? हे प्रभु ! यदि कसैले जान्दछ त त्यो पनि हजुरकै कृपाबाट मात्र जान्न सक्दछ ॥१३ –१४॥

नेमुनिले भन्नुभयो – मध्यरातमा उहाँहरूको वार्तालाप भइरहेको थियो। त्यसै समयमा पार्वतीलाई त्यहीँ छोडेर भगवान् शङ्कर आकाशमा अन्तर्धान हुनुभयो। त्यसपछि उहाँले आकाशगङ्गालाई वाग्वतीको शिरको पूर्वतिरको पर्वतको गुफामा बोलाउनुभयो। उहाँ आफू पनि आकाशगङ्गाको छहरा भएको ठाउँमा बस्नुभयो। देवताहरू त्रिपुरासुरको भयले गर्दा भगवान् शङ्करको शरणमा जाऔँ भन्ने निश्चय गरी तुरुन्त कैलाश पर्वतमा आए। कैलासमा भगवान् शङ्करलाई नदेखेर उनीहरूको शरीर काँप्यो। उनीहरूले छिटो छिटो स्वर्ग, पाताल र पृथ्वीमा भगवान्लाई शङ्करलाई खोजे। देवताहरू तीनै लोकमा रहेका सम्पूर्ण द्वीप, पर्वत र गुफाहरूमा भगवान् शङ्करलाई खोज्दै यसै ठाउँमा आइपुगे। हे विरूपाक्ष ! त्यही समयमा ब्रह्माजीले योगशक्तिद्वारा यसै ठाउँमा एकछिन शिवजीको ध्यान गर्नुभयो र देवताहरूलाई भन्न लाग्नुभयो ॥१५–२०॥

ब्रह्माजीले भन्नुभयो – हे देवता हो ! भगवान् शङ्कर लुकेर यसै ठाउँमा बस्नुभएको छ, अन्यत्र जानुभएको छैन। यो कुरा साँचो हो, यसमा सन्देह छैन। हे देवता हो ! भगवतीबाहेक अरु कसैले पनि उहँको चरित्र जान्न सक्दैन। त्यसैले स्तुति गरेर ती भगवतीलाई आवाहन गरौँ। ब्रह्माजीले यति भनेपछि राक्षसको डरले विह्वल भएका देवताहरू जम्मा भएर यसै ठाउँमा बसे। त्यसपछि के भयो ? देवीको चरित्र सुन। यो सबै भगवान् शङ्करको चरित्र हो भन्ने कुरा सोचेर सबै देवताहरूको मन आत्तियो। उनीहरूले मायाले युक्त भएकी भगवतीको स्मरण गरे। भगवान् शङ्करको चरित्र जान्नुहुने भगवती कागको रूप लिएर त्यसैबेला आकाशमार्गबाट तुरुन्त यस ठाउँमा आउनुभयो ॥२१–२५॥

भगवती पार्वतीले गङ्गाको धारामा डुबेर यसै गुफामा ध्यान गर्दै बस्नुभएका साक्षात् भगवान् शङ्करलाई देख्नुभयो। हे विरूपाक्ष ! कागको रूप लिएकी भगवतीले उत्कण्ठापूर्वक कागकै बोलीमा देवताहरूलाई तिनीहरूको अवस्था बताउनुभयो ॥२६–२८॥

---

७. देवाश्चान्वेषयन् हरम्, इति न.सं.पु.पाठः। ८. गङ्गायानेन संवृतम्, इति न.सं.पु.पाठः।

विष्णुरुवाच

किं वदति च काकोऽसौ तत्रस्थो ह्यद्भुताननः। पश्याम्येतद्वचः सत्या काकवाणी न संशयः ॥२९॥
आरुह्यतां गिरिश्चैव भवद्भिर्मा चिरं सुराः। तद्वचोमङ्गलेनैव द्रक्ष्यामहे वयं हरम् ॥३०॥

नेमुनिरुवाच

काकवाणीं समाकर्ण्य विष्णोस्तथैव मङ्गलाम्। पुरो रुतं समागत्य तुष्टुवुर्भक्तिभिः सुराः ॥३१॥
भाद्रपदसिताष्टम्यां तन्मनस्काः समन्ततः। दध्युर्जेपुर्मुदा रुद्रं भक्तिभिर्देवता द्विज ॥३२॥
ददृशुर्देवताश्चाऽत्र ध्यायमानं परं शिवम्। तुष्टुवुस्तं प्रणम्याऽऽदौ परिक्रम्य मुहुर्मुहुः ॥३३॥
सम्प्रेक्ष्य देवता रुद्रो व्योम्नि द्रुतं तिरोदधे। लिङ्गमूर्तिं समास्थाय ज्ञात्वा तां[९] काकरूपिणीम् ॥३४॥
देवी चाऽपि तदा भूयस्तिरोधानं ययौ द्विज। देवाश्चाऽपूपुजन् लिङ्गं भक्त्या पञ्चोपचारकैः ॥३५॥
काकेनैव समुद्दिष्टञ्चैतल्लिङ्गं यतः सुरा। तस्मात्काकेश्वरो भूयादित्युक्त्वाऽपूपुजद्विधिः ॥३६॥
अप्राप्य शङ्करं साक्षात्मणिचूडगिरिं ययुः। भूयो द्विज सुराः सर्वे मृगयितुं तमाशु च ॥३७॥
एतल्लिङ्गे पुरा विप्र ! कश्चिन्मुक्तः पुनः शृणु। सदेहोऽभूदसौ म्लेच्छो रुद्रपार्श्वचरः सदा ॥३८॥
स्पृष्टान्नं भुक्तवान् मोहात्[१०] पूर्वजन्मन्यसौ नरः। तद्दोषेणाभवन्म्लेच्छः शुष्कोदरो विरूपदृक् ॥३९॥
मृगयाजीवनो भूयश्चैकदा दिवसे द्विज। धन्वी चाऽत्रागमन्म्लेच्छः कञ्चिद् विद्रावयन्[११] मृगम् ॥४०॥

विष्णुले भन्नुभयो– हे देवता हो ! कागको बोली सुनेर मोहित भएका तिमीहरूलाई के दुःख पऱ्यो ? जसलाई तिमीहरू खोज्दैछौ, उहाँ यसै ठाउँमा हुनुहुन्छ, हेर। विचित्र अनुहार भएको यो काग त्यहाँ बसेर के भन्दैछ ? एकपटक हेर्छु। कागको बोली सत्य हुन्छ, यसमा शङ्का छैन। अब यस पहाडमा चढिहालौँ। त्यही कागको मङ्गलमय बोलीले गर्दा हामीले महादेवलाई भेट्न सक्छौँ ॥२९–३०॥

नेमुनिले भन्नुभयो – कागको बोली र विष्णुको मङ्गलमय बोली सुनेर अगाडि सरेका देवताहरूले भक्तिपूर्वक भगवान् शङ्करको स्तुति गरे। हे विरूपाक्ष ! भाद्रशुक्ल अष्टमीका दिन शिवजीमा चारैतिरबाट मन लगाएर भक्तिपूर्वक देवताहरूले सहर्ष भगवान् रुद्रको मन्त्र जपे। देवताहरूले यसै ठाउँमा ध्यान गर्न लागेका भगवान् शिवजीलाई देखे। उनीहरूले पहिले नमस्कार गरे अनि बारम्बार परिक्रमा गरेर भगवान्को स्तुति गरे ॥३१–३३॥

भगवान् शङ्कर पनि देवताहरूलाई देख्नासाथ लिङ्गमूर्ति र कागको रूप लिने भगवतीलाई त्यहीँ छोडी तत्काल आकाशमा अन्तर्धान हुनुभयो। हे विरूपाक्ष ! यो दृश्य देखेपछि कागको रूपमा रहेकी भगवतीले पनि शिवजी अन्तर्धान हुनभएको जानेर उहाँ पनि अन्तर्धान हुनुभयो। देवताहरूले पञ्चोपचार विधिले भक्तिपूर्वक यस लिङ्गको पूजा गरे। हे देवता हो ! कागले नै उत्पन्न गरेको हुनाले यस लिङ्गको नाम काकेश्वर रहनेछ भनेर ब्रह्माजीले पनि पूजा गर्नुभयो। भगवान् शङ्करलाई नभेटेर सारा देवताहरू उहाँलाई खोज्दै तुरुन्त मणिचूड पर्वततिर लागे ॥३४–३७॥

हे विरूपाक्ष ! यस लिङ्गको आराधना गरेर अघि कुनै म्लेच्छ मुक्त भएको थियो। त्यो सशरीर भगवान् शङ्करको पार्श्ववर्ती बन्न पुगेको छ, त्यो कुरा सुन। हे विरूपाक्ष ! अघि कुनै शुष्कोदर नामक मानिस थियो। उसले पूर्वजन्ममा अर्काले छोएको अन्न खाएको हुनाले त्यही दोषले गर्दा त्यो म्लेच्छ भएर जन्मियो। हे विरूपाक्ष ! धनुर्धारी त्यो मानिस शिकार खेलेर आफ्नो जीविका चलाउँथ्यो। कुनै दिन मृगलाई लखेट्दै त्यो म्लेच्छ यहाँ आइपुग्यो ॥३८–४०॥

---

९. एतत्ताम्, इति न.सं.पु.पाठः।
१०. भुक्तवानन्नम्, इति न.सं.पु.पाठः।
११. कश्चिद्विद्रुत्य वै, इति न.सं.पु.पाठः।

मृगोऽप्याशु तमालोक्य दुद्रावैतत्सुकन्दरात् । सोऽप्यभिद्रुत्य तञ्चाऽत्र प्राप्तवांश्च तदा द्विज ॥४१॥
एतल्लिङ्गं तदालोक्य विस्मयं गतवान्[१२] हि सः । एवमेवं मुदा तस्थौ लोभमोहविवर्जितः ॥४२॥
नभसि व्योमगङ्गायां सस्नौ शुक्लाष्टमीतिथौ[१३] । अत्रैव च धनुस्त्यक्त्वा ज्ञानयुक्तो विरागवान् ॥४३॥
समर्च्य परया भक्त्या[१४] वन्योपहारकैस्ततः । प्रोषितवान्निशायां स लिङ्गमेतत् समस्पृशत्[१५] ॥४४॥
गणाश्चाऽत्र समागत्य व्योमगङ्गाजलैर्मुदा । अभिषेकं ददुस्तस्मै रुद्राज्ञया महोत्सवैः ॥४५॥
नवम्यां तं महायाने चास्थाय प्रमथा द्विज । निन्युः शिवपुरं सम्यक् लोकदर्शनपूर्वकम्[१६] ॥४६॥
सैव शुष्कोदरो नित्यं रुद्रपार्श्वचरोऽभवत् । रुद्रवरप्रयुक्तात्मा लिङ्गस्यास्य[१७] प्रसादतः ॥४७॥
समारोहणमात्रेण गिरेरस्य नरोत्तमः । अश्वमेधफलं प्राप्य बहुपापैर्विमुच्यते ॥४८॥
त्रिगङ्गानां समा ज्ञेया व्योमगङ्गा त्वियं द्विज । एतस्यां स्नानमात्रेण निष्पापः सान्वयः शुचिः ॥४९॥
विप्र ! व्रज ह्यतो दूरे क्रोशार्द्धे पूर्वतो दिशि । यत्राऽऽस्ते मणिचूडोऽसौ मणिचूडगिरौ सदा ॥५०॥

प्रोक्तं मया ते ह्यधुना महत्त्वं काकेश्वरस्याऽऽशु विरूपनेत्र ।
दुष्प्रापमन्यैः खलु भक्तिहीनैर्लब्धो वरस्तेन[१८] कृशोदरेण ॥५१॥

इति श्रीस्कन्दपुराणे हिमवतखण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायामाकाशगङ्गातीर्थकाकेश्वरयोर्माहात्म्यं नाम
कोनविंशाधिकशततमोऽध्यायः ॥११९॥

हे विरूपाक्ष ! आफूतिर आउन लागेको व्याधालाई देखेर मृग त्यही गुफाबाट उफ्रिएर भाग्यो । म्लेच्छ पनि त्यही गुफामा उफ्रिएर आइपुग्यो । त्यो म्लेच्छ यस लिङ्गलाई देखेर आश्चर्यचकित भयो । त्यसपछि लोभ, मोह सबै त्यागेर त्यो म्लेच्छ आनन्दित हुँदै यस ठाउँमा बस्यो । यस ठाउँमा नै उसले धनुष त्याग्यो र ज्ञानी तथा विरक्त भई श्रावणशुक्ल अष्टमीका दिन व्योमगङ्गामा स्नान गऱ्यो । उसले वनका फलफूलहरू ल्याएर भक्तिपूर्वक पार्वतीसहित यस लिङ्गलाई छोएर पूजा गऱ्यो र रातमा जाग्राम बस्यो ॥४१–४४॥

भगवान् शङ्करको आज्ञा अनुसार शिवजीका गणहरू प्रसन्न हुँदै यहाँ आई ठूलो उत्सव गरेर व्योमगङ्गाको जलले त्यसको अभिषेक गरे । प्रमथगणहरूले नवमीका दिन त्यस म्लेच्छलाई सम्पूर्ण प्राणीलाई देखाउँदै ठूलो यानमा राखेर शिवलोक लगे । रुद्रको वर र यसै लिङ्गको प्रभावले गर्दा त्यो शुष्कोदर अहिले भगवान् शङ्करको पार्श्ववर्ती भएर रहेको छ। यस पहाडमा चढ्नाले मात्रै पनि अश्वमेध यज्ञ गरेको फल प्राप्त हुन्छ र धेरै पापबाट मुक्ति पाइन्छ ॥४५–४८॥

हे विरूपाक्ष ! यी व्योमगङ्गा भनेकी त्रिगङ्गा अर्थात् गङ्गा, यमुना र सरस्वतीजस्तै हुन् । यिनमा स्नान गर्नाले मानिस कुलैसहित निष्पाप र पवित्र हुन्छ। हे विरूपाक्ष ! यहाँबाट आधा कोस पूर्वपट्टि मणिचूड पर्वतमा मणिचूड भगवान् रहनुभएको छ। अब त्यसै ठाउँमा जाऊ ॥४९–५०॥

हे विरूपाक्ष ! जुन ठाउँमा कृशोदर नाम गरेको म्लेच्छले वर पाएको थियो अनि भक्ति नभएका मानिसले जसलाई प्राप्त गर्न सक्दैनन्, त्यस्ता काकेश्वर भगवान्को माहात्म्य मैले तिमीलाई बताएँ ॥५१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा आकाशगङ्गातीर्थ र काकेश्वरशिवलिङ्गको महिमानामक
एकसय उन्नाइसौं अध्याय पूरा भयो ।

---

१२. चाश्चर्यं लब्धवान्, इति न.सं.पु.पाठः ।
१३. सस्नौ च व्योमगङ्गायां शुक्लाष्टम्यां नभस्य च, इति न.सं.पु.पाठः ।
१४. समर्चितो मया भक्त्या, इति न.सं.पु.पाठः ।
१५. तदेतल्लिङ्गं समस्पृशत्, इति न.सं.पु.पाठः ।
१६. सर्वलोकान् प्रदर्शयन्, इति न.सं.पु.पाठः ।
१७. एतल्लिङ्गम्, इति न.सं.पु.पाठः ।
१८. लब्धं वरं तेन, इति न.सं.पु.पाठः ।

विंशत्यधिकशततमोऽध्यायः

मणिचूडमणिचूडेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

स स्नात्वाऽऽकाशगङ्गायां काकेश्वरप्रपूजकः। निष्पापोऽभूद्विरूपाक्षस्त्रिजन्मार्जितदुष्कृतैः ॥१॥
भूयोऽगमद्विरूपाक्षो मुनिना तेन वै सह। मणिचूडेश्वरो यत्र तमेवाराधितुं मुने ॥२॥
तद्ध्रदे स मुदा सस्नौ यथाविभवविस्तरैः। फाल्गुनकृष्णसप्तम्यां तल्लिङ्गं समपूपुजत्[1] ॥३॥
उषित्वा तन्निशायां स ह्यपृच्छन्नेमुनिं पुनः। माहात्म्यञ्चैव लिङ्गस्य तीर्थस्य च घटोद्भव ॥४॥

विरूपाक्ष उवाच

नमस्ते नेमुने ! तात मम ज्ञानप्रकाशक। त्वत्तो हि श्रोतुकामोऽहं भूयो ब्रह्मविदाम्बर ॥५॥
समुद्भूतं कथं लिङ्गमेतद्ध्रदोत्तमान्तरे। को मुक्तोऽत्र वदैतन्मे लिङ्गस्यास्य प्रसादतः[2] ॥६॥

नेमुनिरुवाच

स्थिते काकेश्वरे रुद्रे गङ्गापाते च निर्जने। काकरूपेण सा देवी दर्शयामास तं[3] सुरान् ॥७॥
तत्राऽऽगतान् सुरान् प्रेक्ष्य तस्मादत्राययौ शिवः। तत्रैवाऽस्थाय तल्लिङ्गं देवीं व्यमोहयत्तदा[4] ॥८॥
निर्मायैमं ह्रदं रुद्रस्तस्थौ मुदा ह्रदान्तरे। मणिचूडे जलासारसमाच्छादितविग्रहः ॥९॥
तस्मिन् काले सुरास्तत्र बभूवु[5]र्व्याकुला हृदा। ब्रह्मणो वचनाद् भूयो मणिचूडाचलं ययुः ॥१०॥
सम्भूय देवताः सर्वा ब्रह्मणा सह संस्थिताः[6]। वज्राख्याया महादेव्याः स्तवञ्चक्रुः पुनस्तदा ॥११॥

अध्याय – १२०

मणिचूड र मणिचूडेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – विरूपाक्षले आकाशगङ्गामा स्नान गरेर काकेश्वर महादेवको पूजा गरे। अनि उनी तीन जन्ममा गरेका कुकृत्यजन्य पापबाट मुक्त भए। त्यसपछि ती नेमुनिलाई साथमा लिई विरूपाक्ष भगवान् शङ्करको आराधनार्थ जहाँ मणिचूडेश्वर भगवान् रहनुहुन्थ्यो, त्यसै ठाउँमा गए। हे अगस्त्य मुनि ! फाल्गुन कृष्ण सप्तमीका दिन उनले त्यहाँ रहेको तलाउमा स्नान गरेर आफ्नो सामर्थ्य अनुसार मणिचूडेश्वर लिङ्गको पूजा गरे। हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले रातमा जाग्राम बसेर शिवलिङ्ग र तीर्थको माहात्म्य नेमुनिसित सोधे ॥१–४॥

विरूपाक्षले भने – मलाई ज्ञान दिने हे नेमुनि ! हजुरलाई नमस्कार छ। हे ब्रह्मज्ञ ! यस तलाउको बीचमा यस लिङ्गको उत्पत्ति कसरी भएको थियो ? यस लिङ्गको अनुग्रहबाट को मुक्त भएको थियो ? म सुन्न चाहन्छु, त्यो सबै मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – जल नभएको एकान्तस्थलमा गङ्गाजी आएपछि कागको रूप लिएर यहाँ भगवान् शङ्कर बस्नुभयो। पार्वतीले पनि कागको रूप लिएर देवताहरूलाई भगवान् शङ्करको दर्शन गराउनुभयो। त्यहाँ आएका देवताहरूलाई देखेर शिवजी त्यहाँ आउनुभयो र त्यही ठाउँमा त्यस लिङ्गको स्थापना गरेर पार्वतीलाई मोहित तुल्याउनुभयो। भगवान् शिवजी मणिचूड पर्वतमा तलाउ बनाएर त्यसै तलाउको बीचमा आफ्नो शरीरलाई जलले छोपी आनन्दसँग बस्नुभयो। भगवान् शंकरलाई नदेखेर देवताहरू आत्तिए र ब्रह्माजीले भनेबमोजिम फेरि मणिचूड पर्वतमा गए। त्यसबेला ब्रह्माजीसहित सबै देवताहरूले मिलेर वज्रयोगिनी नाम गरेकी महादेवीको स्तुति गरे ॥७–११॥

---

१. कुम्भजार्चति, इति न.सं.पु.पाठः।
२. चैतल्लिङ्गप्रसादतः, इति न.सं.पु.पाठः।
३. रुद्रं प्रदर्शितम्, इति न.सं.पु.पाठः।
४. तां मोहयत्तदा, इति न.सं.पु.पाठः।
५. अभूवन्, इति न.सं.पु.पाठः।
६. तत्र वै समम्, इति न.सं.पु.पाठः।

देवा ऊचुः

ॐ नमो वज्रयोगिन्यै वज्राख्यायै नमो नमः। वज्रदेव्यै च वज्रायै महायोगिनि ! ते नमः ॥१२॥

आद्यायै च ह्यनाद्यायायादिदेवि नमोऽस्तु ते। देव्यै ह्यनादिरूपिण्यै चाऽऽदिशक्त्यै नमोऽस्तु ते ॥१३॥

योगिन्यै योगरूपायै योगिनीकोटिसेविते। महायोगधरायै ते योगेश्वर्यै नमो नमः ॥१४॥

घोरायै घोररूपिण्यै चाऽघोरायै नमो नमः। महाभीमस्वरूपिण्यै भीमरूपे ! नमोऽस्तु ते ॥१५॥

काल्यै चक्रत्रिनेत्रायै लोलजिह्वे नमोऽस्तु ते। ज्वलत्कालानलाभायै कालरात्रि ! नमोऽस्तु ते ॥१६॥

चतुर्दोर्भिः शुभाङ्गायै विविधायुधशोभने। महामाये नमो देव्यै चन्द्रार्द्धकृतशेखरे ॥१७॥

व्याघ्रचर्मोज्ज्वलद्दिव्यदेहायै च नमो नमः। भक्तानां वरदे मातर्महास्यायै नमो नमः ॥१८॥

रक्ष रक्ष महादेवि ! ते शरणागतांश्च नः। भयेभ्यस्त्राहि नो देवि रुद्रान्वेषणतत्परान् ॥१९॥

रुद्रं तं दर्शयाऽस्माकं वज्रेश्वरि च साम्प्रतम्। क्लिश्यामहे किलाऽद्यापि त्रिलोक्यां यं विना वयम्[७] ॥२०॥

नेमुनिरुवाच

तेषां भक्तिं समालोक्य योगैर्गम्या हि योगिनी। अदर्शयत्तनुं स्वाञ्च देवेभ्यो वज्रयोगिनी[८] ॥२१॥

इत्याकर्ण्य वचः स्तोत्रं देवैर्भक्त्या समीरितम्। देव्याह त्वरितं तेभ्यो हर्षसम्फुल्लमानसा ॥२२॥

योगिन्युवाच

अतश्चोर्ध्वं ह्रदे रम्ये तत्र तिष्ठति शङ्करः। त्रैलोक्यं मायया माञ्च सम्मोह्य खलु निर्जनः ॥२३॥

क्षेमङ्करी च मद्रूपा ह्रदे यत्र भ्रमिष्यति। तत्र द्रक्ष्यथ तां यूयं लिङ्गमूर्तिं जले स्थिताम् ॥२४॥

देवताहरूले भने – वज्रयोगिनीलाई नमस्कार छ, वज्रा नाम गरेकी देवीलाई नमस्कार छ, वज्रदेवी र वज्रा नाम भएकी हे महायोगिनी ! हजुरलाई बारम्बार नमस्कार छ। आद्या भएर पनि अनादि भएकी हे आदिदेवी ! हजुरलाई नमस्कार छ। आदिशक्ति भएर पनि अनादि रूप लिने हे देवी ! हजुरलाई नमस्कार छ। योगिनी, योगरूपा र करोडौं योगिनीद्वारा सुशोभित महायोग धारण गर्ने हे योगीश्वरी ! हजुरलाई नमस्कार छ। भयानक स्वरूप भए पनि घोर तथा अघोर दुबै रूप ग्रहण गर्ने अत्यन्त भीषण स्वरूप भएकी हे भीमरूपा ! हजुरलाई नमस्कार छ ॥१२-१५॥

चक्रजस्ता तीन आँखा र चञ्चल जिब्रो भएकी हे काली ! हजुरलाई नमस्कार छ। प्रलयकालको अग्निजस्तो कान्ति भएकी हे कालरात्रि! हजुरलाई नमस्कार छ। राम्रा अङ्गले सुहाएकी, चार हात भएकी, विभिन्न हतियारहरू धारण गर्ने हे महामाया ! आधा चन्द्र शिरमा धारण गर्ने हे देवी ! हजुरलाई नमस्कार छ। बाघको छाला लगाएकी र तेजिलो शरीर लिनुभएकी देवीलाई बारम्बार नमस्कार छ, ठूलो मुख भएकी भक्तलाई वर दिने हे आमा ! हजुरलाई बारम्बार नमस्कार छ। हे महादेवी ! हजुरको शरणमा आएका हामीहरूको रक्षा गर्नुहोस्, रक्षा गर्नुहोस्। भगवान् शिवजीको खोजीमा हिँडेका हामीहरूलाई भयबाट रक्षा गर्नुहोस्। हे वज्रेश्वरी ! भगवान् शङ्कर नभएर आजसम्म हामीले स्वर्गमा दुःख पाइरहेका छौ। त्यसैले हजुरले अहिले नै उहाँको दर्शन गराइदिनुहोस् ॥१६-२०॥

नेमुनिले भन्नुभयो – देवताहरूले भक्तिपूर्वक गरेको स्तुति र आफूप्रतिको भक्तिभाव देखेर योगसाधनाले मात्र जान्न सकिने योगिनी भगवतीले देवताहरूलाई आफ्नो स्वरूपको दर्शन दिएर प्रसन्न हुँदै भन्नुभयो ॥२१-२२॥

योगिनीले भन्नुभयो – यहाँदेखि अलिमाथि एउटा राम्रो तलाउ छ। तीनै लोक र मलाई समेत मायामा भुलाएर भगवान् शिव त्यस एकान्तस्थलमा बस्नुहुन्छ। मेरो क्षेमङ्करी नाम गरेको स्वरूप पनि त्यही तलाउमा घुमिरहेको छ। तपाईंहरूले त्यसै ठाउँमा जलभित्र लिङ्गमूर्ति भएका शिवजीलाई देख्नुहुनेछ ॥२३-२४॥

---

७. यं विना त्रिदिवे वयम्, इति न.सं.पु.पाठः।

८. योगिनी तदा, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्याकर्ण्य वचो देव्या देवा प्रहर्षिता भृशम्। मेनिरे चाऽऽत्मभिः सत्यं कृतार्था इव साम्प्रतम् ॥२५॥
प्रणम्य तनुभिर्भूमौ तां देवीं त्रिविधात्मभिः। पर्यक्रमन्मुहुर्भक्त्या ब्रह्मादयो विरूपदृक् ॥२६॥
आज्ञां देहि च नो देवि ! व्रजामस्तत्र मा चिरम्। इति सम्प्रार्थ्य ते देवा मणिचूडं समाययुः[९] ॥२७॥
क्षेमङ्करीं ततो देवाः पक्षिश्रेष्ठां ह्रदोपरि। भ्रमन्तीं दृष्टवन्तस्ते[१०] चाऽत्रैव गमने तदा ॥२८॥
ततो देवाः प्रणेमुस्तां भ्रमन्तीं खे ह्रदोपरि। एतस्मिंस्ते ह्रदे भक्त्या स्नानञ्चक्रुर्निमज्य वै ॥२९॥
फाल्गुनकृष्णसप्तम्यां सङ्क्रमणे रवौ तथा। स्नात्वोत्तीर्य ह्रदात्तीरे तस्थुर्ध्यानयुताः सुराः ॥३०॥
ततो जेपुः किलाऽत्रैव तीरस्थास्त्रिदशा मनुम्। ह्रदं समन्ततो भक्त्या प्रणेमुश्चैव तुष्टुवुः ॥३१॥
व्यक्तो भव महादेव व्यक्तो भव प्रभोऽधुना। क्लिश्यामहे विना त्वाञ्च रक्षाऽस्मान् दैत्यकिल्विषात् ॥३२॥
इत्याकर्ण्य वचो रुद्रस्तेषां दुःखेरितं द्विज। वरदानाय देवेभ्यस्तुतोषाऽतिशयं विभुः ॥३३॥
ह्रदमध्यात्ततो रुद्र उत्ततार प्रहर्षयन्। पर्वणि पूर्णिमायाञ्च[११] पूर्णचन्द्र इवाऽर्णवे ॥३४॥
चतुर्बाहुस्त्रिनेत्रोऽज ईषत्प्रहसिताननः। व्याजहार शुभं वाक्यं देवेभ्यो वरकारणम् ॥३५॥

श्रीमणिचूडेश्वर उवाच

त्रासं कुरुत मा देवा[१२] मुञ्चत शत्रुतो भयम्। प्राप्य मद्दर्शनं चित्ते युष्माकं स्यात् कथं भयम्[१३] ॥३६॥
गमिष्याम्यधुना स्वर्गं भवद्भिः सह पद्मज। प्रतीकारं करिष्यामि शृणुध्वं मद्वचो हि ते ॥३७॥
यश्चाऽऽरोहति मच्छैलं मणिचूडाद्रिनामकम्। यन्नाम वै धिया स्मृत्वा मल्लोकं स गमिष्यति ॥३८॥
मन्मणिचूडसम्भूतां नदीनां प्रवरां विदुः। पानावगाहनात्तस्यां वाजपेयफलं भवेत् ॥३९॥

नेमुनिले भन्नुभयो – देवीको यो कुरा सुनेर देवताहरू अत्यन्त प्रसन्न भए। त्यतिबेला उनीहरूले आफूलाई साँच्चै कृतार्थ भएको ठाने। हे विरूपाक्ष ! ब्रह्माजी आदि देवताहरूले भूमिमा शरीर झुकाएर तीनै किसिमको भक्तिद्वारा ती देवीलाई प्रणाम गरे र बारम्बार उहँको परिक्रमा पनि गरे। हे देवी ! हामीलाई आज्ञा दिनुहोस्, हामी तुरुन्त त्यहाँ जान्छौं। यसरी देवीसित आज्ञा लिएर देवताहरू तत्काल मणिचूड पर्वतमा आए। यहाँ आएपछि देवताहरूले तलाउभन्दा माथिबाट आकाशमा घुमिरहेको पक्षीको रूप लिएकी क्षेमङ्करी योगिनीलाई देखे ॥२५–२८॥

देवताहरूले तलाउमाथिको आकाशमा घुमिरहेको त्यस पक्षीलाई नमस्कार गरे र यस तलाउमा डुबेर भक्तिपूर्वक स्नान पनि गरे। फाल्गुनकृष्ण सप्तमी र सङ्क्रान्ति परेको त्यस दिन देवताहरू यही तलाउमा स्नान गरेर ध्यान गर्न लागे। त्यसपछि यसै तलाउको तीरमा बसेर देवताहरूले भगवान् शङ्करको मन्त्र जपे। उनीहरूले तलाउ वरिपरि घुमेर भक्तिपूर्वक भगवान्लाई प्रणाम गर्दै स्तुति गरे ॥२९–३१॥

हे महादेव ! प्रकट हुनुहोस्। हे प्रभु ! अब प्रकट हुनुहोस्। हजुर नभएको हुनाले हामीले दुःख पाएका छौं। दैत्यहरूको अत्याचारबाट हाम्रो रक्षा गर्नुहोस्। हे विरूपाक्ष ! देवताहरूको यस्तो भनाइ सुनेर भगवान् शङ्कर अत्यन्त सन्तुष्ट हुनुभयो र उनीहरूलाई वर दिन तत्पर हुनुभयो। त्यसपछि पूर्णिमा तिथिमा समुद्रमा पूर्णचन्द्र देखिएझैं खुसी हुँदै तलाउको मध्य भागबाट भगवान् शङ्कर प्रकट हुनुभयो। मुसुक्क हाँस्नुभएका भगवान् शिवका चार हात र तीन आँखा थिए। यस्ता अजन्मा भगवान् शङ्करले देवताहरूलाई वर दिनका लागि भन्नुभयो ॥३२–३५॥

मणिचूडेश्वरले भन्नुभयो – हे देवता हो ! नडराओ, शत्रुदेखि हुने डर त्याग। मेरो दर्शन पाएपछि तिमीहरूको अगाडि डर कसरी आउँछ र ? अर्थात् तिमीहरू डराउनुपर्दैन। हे ब्रह्मा ! म अहिले तिमीहरूसँगै स्वर्ग जान्छु र तिनीहरूको प्रतीकार गर्छु। मेरो कुरा सुन। जसले मणिचूड नाम गरेको पहाडमा आरोहण गर्दछ र मेरो नाम स्मरण गर्दछ, त्यो व्यक्ति मेरो लोकमा जान्छ। मेरो मणिचूड पर्वतबाट निस्किएकी नदीलाई उत्तम नदी ठान्दछन्। यस नदीको जलपान गर्ने र यसमा स्नान गर्ने व्यक्तिले वाजपेय यज्ञ गरेको फल पाउँछ ॥३६–३९॥

---

९. इत्याज्ञां याच्यतां देवाः अत्राययुर्हि सत्वरम्, इति न.सं.पु.पाठः।
१०. ददृशुर्भ्रममाणां वै, इति न.सं.पु.पाठः।
११. महापर्व, इति न.सं.पु.पाठः।
१२. भो देवास्त्रासयध्वं मा, इति न.सं.पु.पाठः।
१३. मद्दर्शनं समालभ्य क्वागमिष्यति वो भयम्, इति न.सं.पु.पाठः।

ममैतस्मिन् ह्रदे यो हि पर्वणि स्नाति श्रद्धया[१४] । सर्वैनोभिर्विनिर्मुक्तो मल्लोकमाप्स्यति ध्रुवम् ॥४०॥
यो मां पश्यति चैतस्मिन् लिङ्गमूर्तिं ह्रदेऽमराः । इह लोकं परित्यज्य स्थास्यति सुचिरं मयि ॥४१॥
यः पश्यति च वज्राख्यामादिशक्तिञ्च मत्प्रियाम् । आरुह्य तद्‌गिरिं भक्त्या तस्य पुण्यफलं शृणु ॥४२॥
सर्वजन्मार्जितैः पापैर्मुच्यते तत्क्षणाद्धि सः । वरयोगैः प्रलभ्यं यत्तन्मोक्षं लभते क्षणात् ॥४३॥
तत्र यत्तत्करिष्यन्ति दानयोगार्चनं सुराः । तत्सर्वमक्षयं विन्द्याद्योनौ न जायते पुनः ॥४४॥

नेमुनिरुवाच

इत्युपदिश्य देवान् स ययौ स्वर्गञ्च तैः सह[१५] । एकांशं हि समास्थाय चैतद्धि लोकहेतवे ॥४५॥
माहात्म्यं[१६] कथितं विप्र ! मणिचूडेश्वरस्य ते । कश्चिन्मुक्तो हि भूयोऽत्र कालान्ते शृणु मानुषः ॥४६॥
पूर्वजन्मनि मर्त्योऽसौ स्वर्णस्तेयं चकार हि[१७] । तद्दोषेण कृशाङ्गोऽभूत् किरातो म्लानविग्रहः ॥४७॥
पूर्णिमायामसौ म्लेच्छश्चाऽत्राऽऽययौ यदृच्छया । अत्रैव स्नातकान् प्रेक्षन् मृगयायां वने चरन् ॥४८॥
जलक्रीडाक्षणे दोर्भ्यां स लिङ्गमस्पृशज्जनः[१८] । एतज्जलं पपौ पूर्णं शिवेति च वदन् स्थितः ॥४९॥
तन्निशायां मृतो म्लेच्छः काले प्राप्ते च तत्र सः । तत्प्रेक्ष्य मुनयश्चित्रं साधु साध्विति चाऽवदन् ॥५०॥
ततो रुद्रगणा याने तमास्थाय महोत्सवैः । निन्युः शिवपुरं व्योम्नो दर्शयन्तो मुनीनपि[१९] ॥५१॥
सोऽभूद्रुद्रगणश्रेष्ठः कृशाङ्गो नाम विश्रुतः । अत्र प्राणविसर्गाद्धि चैतल्लिङ्गस्य स्पर्शनात्[२०] ॥५२॥
भूयो ह्यतो गच्छ विरूपनेत्र ! यत्र स्थितार्या खलु योगिनी सा ।
तस्मादधः सानुवरे च सिद्धिं प्राप्नोषि तस्या हि न संशयस्त्वम् ॥५३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां मणिचूडेश्वरमाहात्म्यं नाम विंशत्यधिकशततमोऽध्यायः ॥१२०॥

जसले पर्वमा मेरो यस तलाउमा स्नान गर्छ त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त भएर अवश्य मेरो लोकमा पुग्दछ। हे देवता हो ! यस तलाउमा जसले मेरो लिङ्गमूर्तिको दर्शन गर्छ त्यो व्यक्ति यो संसार छोडेपछि धेरै समयसम्म मसितै बस्न पाउँछ। जसले यस पहाडमा चढेर मेरी प्रिया वज्रा नामकी आदिशक्तिको भक्तिपूर्वक दर्शन गर्छ त्यसको पुण्यफल सुन। त्यो व्यक्ति सबै जन्ममा गरेका पापबाट तत्काल मुक्त हुन्छ र त्यसले ठूलो योगबाट मात्र प्राप्त गर्न सकिने मोक्षलाई तुरुन्त प्राप्त गर्दछ। हे देवता हो ! जसले त्यहाँ दान, योग र पूजा गर्छन्, ती सबै अक्षय हुन्छन् भनेर जान। त्यस्तो गर्ने व्यक्तिले फेरि योनिमा जन्म लिनुपर्दैन ॥४०-४४॥

नेमुनिले भन्नुभयो - यसरी भगवान् शङ्कर तिनीहरूलाई उपदेश दिएर लोककल्याणका लागि एक अंश यहीं छोडी देवताहरूको साथमा स्वर्ग जानुभयो। हे विरूपाक्ष ! मैले तिमीलाई यो मणिचूडको माहात्म्य बताएँ। यसै ठाउँमा कुनै कालखण्डमा मानव मुक्त भएको विषयमा सुन। पूर्वजन्ममा सुन चोरेको दोषले गर्दा कुनै मानिस यस जन्ममा मलिनो शरीर भएको दुब्लो किरात भएर जन्मियो। पूर्णिमाको दिन शिकार खेल्दै त्यो किराति आफूखुसी यहाँ आयो र वनमा विचरण गर्दै यहाँ स्नान गर्न लागेका मानिसहरूलाई देख्यो। त्यसले पौडी खेल्दा हातले शिवलिङ्गको स्पर्श गऱ्यो, पेटभरि पानी खायो र अनि शिव शिव भनेर बस्यो ॥४५-४९॥

त्यसै रात मृत्युको समय आइसकेको हुँदा सोही ठाउँमा त्यो म्लेच्छ मऱ्यो। त्यो देखेर ऋषिहरूले साधु साधु भन्दै त्यसलाई स्यावासी दिए। त्यसपछि शिवजीका गणहरू आएर ठूलो उत्सवका साथ त्यसलाई यानमा राखे। मुनिहरूलाई देखाउँदै आकाशमार्गद्वारा उनीहरूले त्यसलाई शिवलोक लगे। हे विरूपाक्ष ! कृशाङ्ग नाम गरेको त्यो व्यक्ति यस ठाउँमा मरेको र भगवान् शिवजीको लिङ्गलाई स्पर्श गरेको कारण गणहरूको नेता भयो ॥५०-५२॥

हे विरूपाक्ष ! अब फेरि तिमी यहाँबाट जहाँ पूजनीय योगिनी रहनुभएको छ, त्यस ठाउँमा जाऊ। त्यसबाट तलतिर पहाडको शिखरमा तिमी भगवती योगिनीको आराधना गर, सिद्धि पाउनेछौ, यसमा शङ्का छैन ॥५३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा मणिचूडेश्वरमाहात्म्यनामक
एकसय बीसौं अध्याय पूरा भयो।

---

१४. स्नायते पुनः, इति न.सं.पु.पाठः।
१५. इत्युपदिश्य तेभ्यः स ययौ स्वर्गं सुरैः समम्, इति न.सं.पु.पाठः।
१६. इत्येतत्, इति न.सं.पु.पाठः।
१७. कृतोऽन्यतः, इति न.सं.पु.पाठः।
१८. जलक्रीडाकृते दोर्भ्यामेतल्लिङ्गं स्पृशद्धि सः, इति न.सं.पु.पाठः।
१९. मुनिगणान् प्रदर्शयन्, इति न.सं.पु.पाठः।
२०. एतल्लिङ्गस्पृशाद् द्विज, इति न.सं.पु.पाठः।

एकविंशत्यधिकशततमोऽध्यायः

योगगङ्गायोगिनीयोगेश्वरीणां महिमा

स्कन्द उवाच

सम्पूज्य विधिवल्लिङ्गं स्नात्वा मणिह्रदे द्विज। अगमन्मुनिना सार्द्धं सा स्थिता यत्र योगिनी ॥१॥
योगगङ्गाजले स्नात्वा चाऽपूपुजत्स तां शिवाम्। फाल्गुनस्यासिताष्टम्यां विरूपाक्षो महानिशि ॥२॥
माहेश्वरीञ्च सम्पूज्य[1] चैकमूर्तिं हरात्मिकाम्। लक्षं प्रजप्तवान् मन्त्रमपृच्छत्तं प्रशंसनम् ॥३॥

विरूपाक्ष उवाच

नमस्ते नेमुने ! तुभ्यं प्रष्टुकामोऽस्मि त्वत्[2] प्रभो। कथं तिष्ठत्यसौ देवी कस्मादागत्य चात्र वै ॥४॥
एतस्याश्चैव माहात्म्यं श्रोतुमिच्छाम्यहं पुनः। केन लब्धो वरो ह्यस्या वदैतन्मे मुनीश्वर ॥५॥

नेमुनिरुवाच

या पुरा संस्तुता देवी ब्रह्मणा सैव विश्रुता। विष्णुनेत्रस्थिता माया ज्ञेया निद्रास्वरूपिणी ॥६॥
ब्रह्मणा निर्मिते शैले तस्थौ सम्प्राप्य योगिनी[3]। प्रेक्ष्य मणिमयञ्चैनं योगेनैव रहः पुरा ॥७॥
किञ्चित्कालान्तरे देवैर्योगैरियं प्रसेविता। ब्रह्मविष्णुहराद्यैर्वा तस्माद्योगेश्वरी श्रुता ॥८॥
गुहास्वेतासु संस्थाय सप्तर्षयः प्रतेपिरे। सहस्रवत्सरं दिव्यं जपन्तस्तन्मनुं भृशम् ॥९॥
शिवशक्त्यात्मिकां देवीं शिवविधिसुपूजिताम्[4]। तेऽभवन् सप्त ब्रह्माणः सम्पूज्य लेभिरे वरान्[5] ॥१०॥
तामाराधय भूयस्त्वं ततः सिद्धो भविष्यसि। नानोपहारकैस्तोत्रैस्तन्मनस्कश्च भक्तिभिः ॥११॥

अध्याय - १२१

योगगङ्गा, योगिनी र योगेश्वरीको महिमा

कुमार स्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष मणिचूडको तलाउमा स्नान गरी विधिपूर्वक लिङ्गको पूजा गरेर जहाँ भगवती योगिनी बस्नुभएको थियो, त्यसै ठाउँमा नेमुनिलाई साथमा लिएर गए। विरूपाक्षले फाल्गुनकृष्ण अष्टमीको रातमा योगगङ्गाको जलमा स्नान गरेर भगवतीको पूजा गरे। उनले शिवजीकी मूर्ति मानिएकी भगवती माहेश्वरीको पूजा गरेर एक लाख मन्त्र जपे र योगिनीको माहात्म्य नेमुनिसित सोधे ॥१–३॥

विरूपाक्षले भने – हे नेमुनि ! हजुरलाई नमस्कार छ। यी भगवती कहाँबाट आएर कसरी यहाँ बसेकी हुन् ? यिनको माहात्म्य के छ ? म फेरि सुन्न चाहन्छु। हे मुनीश्वर ! यिनबाट कसले वर पायो, मलाई बताउनुहोस् ॥४ –५॥

नेमुनिले भन्नुभयो– यी देवी तिनै हुनुहुन्छ जसको ब्रह्माजीले अघि स्तुति गर्नुभएको थियो। यी देवी विष्णुको आँखामा बस्ने निद्रास्वरुपिणी माया हुनुहुन्छ भनेर जान। अघि ब्रह्माजीले निर्माण गर्नुभएको पर्वतलाई मणिमय देखेर भगवती योगसाधनाका लागि यहाँ आई एकान्तमा बस्नुभएको थियो ॥६–७॥

केही समयपछि ब्रह्मा, विष्णु, शिव आदि देवताहरूले योगसाधना गरेर उहाँको सेवा गरे। त्यसैले उहाँको नाम योगेश्वरी भनी प्रसिद्ध भयो। यिनै गुफाहरूमा बसेर सप्तर्षिहरूले दिव्य हजार वर्षसम्म खूबसित भगवतीको मन्त्र जप्दै तपस्या गरे। शिवशक्तिस्वरूप भएकी र आफैं उत्पन्न भई शिवजीका साथमा रहेकी भगवती देवीको पूजा गरेर सप्तर्षिहरूले सप्तब्रह्मा हुने वर पाएका थिए। त्यसैले तिमी पनि विभिन्न किसिमका सामग्री र स्तोत्रहरूले भक्तिपूर्वक उहाँको आराधना गर, सिद्ध हुनेछौ ॥८–११॥

---

१. उमां माहेश्वरीं पूज्य, इति न.सं.पु.पाठः।
२. प्रष्टुकामस्त्वयि, इति न.सं.पु.पाठः।
३. तस्थौ तत्र समाव्रजन्, इति न.सं.पु.पाठः।
४. देवीं स्वयम्भुवां शिवेन च, इति न.सं.पु.पाठः।
५. सप्तब्रह्मा भवन् ते वै संपूज्य चालचन्वरान्, इति न.सं.पु.पाठः।

स्कन्द उवाच

आदाय तद्वचः पथ्यं हर्षप्रफुल्ललोचनः। सम्पूज्य विधिवद्देवीं जजाप च हरात्मिकाम् ॥१२॥
तुष्टाव च मुहुर्भक्त्या त्रिविधया घटोद्भव। इमां विप्रो निशामध्ये शिवां[६] माहेश्वरीतिथौ ॥१३॥
शिवशक्त्यात्मिकां देवीमुमां योगेश्वरीं तदा। परिक्रम्य मुहुर्विप्रो ननाम दण्डवत्क्षितौ ॥१४॥

विरूपाक्ष उवाच

अनाद्यायै किलाद्यायै शिवायै सततं नमः। शिवशक्त्यात्मरूपिण्यै चाऽऽदिशक्त्यै नमो नमः ॥१५॥
विशालाक्ष्यै महादेव्यै लम्बोदरि ! नमोऽस्तु ते। सर्वप्रणतपादायै सर्ववरप्रदे नमः ॥१६॥
अम्बिकायै महोत्साहे महोग्रायै नमोऽस्तु ते। महामङ्गलरूपिण्यै महाप्रभे नमोऽस्तु ते ॥१७॥
योगिन्यै योगरूपिण्यै योगेश्वर्य्यै नमोः नमः। महायोगैः प्रलक्ष्यायै योगिनां योगदे नमः ॥१८॥
ब्रह्मविष्णुहरेन्द्रैश्च सेवितपादपुष्करे। त्रैलोक्यवन्दिते देवि ! वरप्रदे नमोऽस्तु ते ॥१९॥
ब्रह्मत्वं ब्रह्मणे दत्तं व्यापित्वं विष्णवे तथा। ईश्वर्य्यत्वं हरायाऽऽर्य्ये दत्तं देवि ! नमोऽस्तु ते ॥२०॥
देवराजत्वमिन्द्राय स्वर्गराज्यप्रदे नमः। भक्तेभ्यश्चेप्सितं दत्से नमो मातर्नमोऽस्तु ते ॥२१॥
ब्रह्माण्डभाण्डरूपेण सर्वजगत्करेऽनिशम्। सर्वान्तःस्थायिनि मातः सर्वेन्द्रियात्मभिर्नमः ॥२२॥
मनोबुद्धिचिदानन्दैर्लोकान् निर्मासि स्वेच्छया[७]। लोभमोहमदाश्चर्य्यकामक्रोधैश्च त्वं स्वयम्[८] ॥२३॥
कङ्कालकालरूपेण लोकान् कलयसि ध्रुवम्। निःशेषञ्चेह कामेशि कामेश्वरि नमोऽस्तु ते ॥२४॥
चतुःषष्टिकलाभिस्त्वं माता मे लभसे[९] हरम्। बहुरूपप्रधारिण्यै जगदम्बे नमोस्तु ते ॥२५॥

विरूपाक्षले नेमुनिको उपकारी वचन ग्रहण गरे र अत्यन्त हर्षित भए। त्यसपछि उनले हर्षले प्रफुल्लित हुँदै माहेश्वरी भगवतीको विधिपूर्वक पूजा गरी जप गरे। हे अगस्त्य मुनि ! ती विरूपाक्षले भगवतीको प्रियतिथिको दिन मध्यरातमा तीनै किसिमका भक्तिद्वारा बारम्बार उहाँको स्तुति गरे। विरूपाक्षले त्यतिबेला शिवशक्तिस्वरूप भएकी योगेश्वरी देवीको परिक्रमा गरेर पृथ्वीलाई बारम्बार दण्डवत् प्रणाम गरे ॥१२-१४॥

विरूपाक्षले भने – अनादिस्वरूप भएकी आदिरूपा पार्वतीलाई बारम्बार नमस्कार छ। शिवशक्तिस्वरूप भएकी आदिरूपा आदिशक्तिलाई बारम्बार नमस्कार छ। हे लम्बोदरी ! विशाल आँखा भएकी महादेवी हजुरलाई नमस्कार छ। सबैद्वारा पाउमा वन्दना गरिएकी, सम्पूर्ण वर दिने देवीलाई नमस्कार छ। अत्यन्त उत्साह राख्ने हे देवी ! अम्बिकाको रूपमा रहेकी हजुरलाई नमस्कार छ। अत्यन्त उग्र स्वभावकी हजुरलाई नमस्कार छ। महामङ्गलको रूप लिने विशाल तेज भएकी हजुरलाई नमस्कार छ। योगको रूप लिने योगिनी योगेश्वरीलाई बारम्बार नमस्कार छ। महायोगद्वारा मात्र साक्षात्कार गर्न सकिने र योगीलाई योग सिकाउने देवीलाई नमस्कार छ। जसको चरणकमललाई ब्रह्मा, विष्णु, शिव र इन्द्रले नित्य सेवा गरेका छन्, तीनै लोककी वन्दनीया वरदाता हे देवी ! हजुरलाई नमस्कार छ ॥१५-१९॥

हे देवी ! हजुरले ब्रह्मालाई ब्रह्मत्वको वरदान दिनुभयो, विष्णुलाई व्यापक हुने वर दिनुभयो र शिवजीलाई ऐश्वर्य प्रदान गर्नुभयो। यस्ती हजुरलाई नमस्कार छ। हे माता ! इन्द्रलाई देवराज बनाएर स्वर्गको राज्य दिने हजुरलाई नमस्कार छ, नम्र भक्तजनहरूलाई इच्छा लागेको वर दिनुहुने हजुरलाई नमस्कार छ। ब्रह्माण्डरूपी भाण्डमा लीला गर्नुहुने र संसारमा सधैं अनेक लीला गर्ने हजुरलाई नमस्कार छ। सम्पूर्ण इन्द्रिय र आत्माद्वारा सबै प्राणीहरूमा वास गर्ने हे माता ! हजुरलाई नमस्कार छ। मन, बुद्धि र चिदानन्दले लोकको सृष्टि गर्ने तथा लोभ, मोह, मद, आश्चर्य, काम, क्रोधआदि सबैलाई साथमा राख्ने हजुरलाई नमस्कार छ। हेर्न नसकिने कालरुपिणी भएर पनि लोकलाई एकत्रित पार्नुहुने हे कामेश्वरी ! हजुरलाई नमस्कार छ। चौसट्ठी कलाले युक्त भएकी हे भगवती ! हजुर भगवान् शङ्करलाई राम्रोसित जान्नुहुन्छ। अनेक रूप धारण गर्नुहुने हे जगदम्बे ! हजुरलाई नमस्कार छ ॥२०-२५॥

---

६. उमा, इति न.सं.पु.पाठः।
७. त्वया लोकान् विकृन्तते, इति न.सं.पु.पाठः।
८. नमोऽस्तु ते, इति न.सं.पु.पाठः।
९. विन्दते, इति न.सं.पु.पाठः।

स्कन्द उवाच

एतत्सर्वं समाकर्ण्य योगेश्वरी घटोद्भव। हर्षप्रफुल्लनेत्राऽसौ वरं दातुमुवाच हि ॥२६॥

योगिन्युवाच

साधु वत्स विरूपाक्ष स्तवेनाहं प्रतोषिता। भक्तिभिश्च त्रिधा मन्त्रैः[१०] स्तवार्चनैस्तथा भृशम् ॥२७॥
अद्यादि त्वं चिरञ्जीव्या भक्त्या मम प्रतोषणात्। देहेनानेन पुत्रार्य ! सिद्धो भव निरन्तरम् ॥२८॥
तीर्थाटनं पुनः कर्तुं गच्छाधुना विरूपदृक्। सन्निधाने च मे कृत्वा तपः स्थास्यसि पुत्रक[११] ॥२९॥
व्याजहार वचो भूयो विरूपाक्षञ्च[१२] नेमुनिः। मुक्तः कश्चित्पुरा मर्त्यश्चाऽत्र देव्याः प्रसादतः ॥३०॥

नेमुनिरुवाच

शृणु विप्र प्रवक्ष्यामि मुक्तः कश्चिन्नरोत्तमः। पूर्वजन्मकृतात्पुण्यादेतस्य हि प्रसादतः ॥३१॥
आसीत्पुरा नृपश्रेष्ठो देवीदास इति श्रुतः। कलिङ्गाधिपतिर्विप्र ! दानधर्मरतः शुचिः ॥३२॥
नारदस्य मुखाच्छ्रुत्वा चाऽस्या देव्याः प्रशंसनम्। राज्यं न्यस्याऽऽत्मजे तस्माद्विरक्तो निर्ययौ पुरात् ॥३३॥
उत्तीर्य पर्वतान् देशानत्रैव प्राप्तवान्नृपः। योगेश्वर्यै नमस्तस्यै चेत्युक्त्या च पदे पदे ॥३४॥
तदाज्ञाञ्च समादाय मुदात्र प्रययौ नृपः। पठन् मनुं धिया भक्त्या त्यक्तसंसारसङ्गरः ॥३६॥
एतस्यां योगगङ्गायां सस्नौ च विधिवन्नृपः। गणेश्वरं नमस्कृत्य निष्पापो ज्ञानवानभूत् ॥३५॥
ददर्श सह रुद्रेण योगेश्वरीं स्वयम्भुवाम्। उमामाहेश्वरीं देवीं चित्ररूपां भयङ्करीम् ॥३७॥
ईषे कृष्णनवम्याञ्च नृपोऽसौ विविधार्हणैः। अपूपुजदिमां देवीं भक्तियुक्तो महानिशि ॥३८॥
प्रणम्य दण्डवद्भूमौ परिक्रमन् स्तुवन्मुहुः। ततो जजाप तन्मन्त्रं लक्षमेकं हि भक्तितः ॥३९॥
सूर्यप्रभे महायाने तमास्थाय गणास्ततः। उमामाहेश्वरं लोकं निन्युर्मानपुरःसरम् ॥४०॥

कार्तिक स्वामीले भन्नुभयो – विरूपाक्षको यस्तो स्तुति सुनेर प्रसन्न हुँदै योगेश्वरी भगवतीले वर दिनका लागि उनलाई भन्नुभयो ॥२६॥

योगिनीले भन्नुभयो – हे बाबु विरूपाक्ष! तिम्रो यो स्तुति सुनेर, तीन किसिमको भक्ति, मन्त्र तथा तिमीले गरेको अर्चना देखेर म अत्यन्त प्रसन्न भएँ, धन्यवाद छ। भक्तिले मलाई सन्तुष्ट पारेको हुँदा तिमी यही शरीर लिएर आजदेखि धेरै कालसम्म बाँच। हे बाबु ! तिमी बारम्बार सिद्ध बन। हे विरूपाक्ष ! अब तिमी तीर्थयात्राका लागि यहाँबाट जाऊ। हे छोरा ! मेरो नजिकै बसेर पूजक अर्थात् भक्त बनी तपस्या गर्न पाउनेछौ। नेमुनिले विरूपाक्षलाई फेरि बताउनुभयो – अघि कुनै मानिस देवीका कृपाले यस ठाउँमा मुक्त भएको थियो ॥२७-३०॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! कुनै मानिस यहाँ पूर्वजन्ममा गरेको पुण्य र यस क्षेत्रको अनुग्रहले गर्दा मुक्त भएको थियो। म बताउँछु, सुन। हे विरूपाक्ष ! अघि देवीदास नाम गरेका कुनै व्यक्ति कलिङ्ग देशको राजा थिए। उनी सबै राजामा श्रेष्ठ, दानी, धर्मात्मा र पवित्र थिए। नारदको मुखबाट यी देवीको माहात्म्य सुनेर विरक्त भई आफ्नो राज्य छोरालाई सुम्पिएर उनी त्यस शहरबाट निस्किए। उनी विभिन्न पर्वत र देशहरू नाघेर पाइलैपिच्छे ती योगेश्वरीलाई नमस्कार छ भन्दै यसै ठाउँमा आइपुगे ॥३१-३४॥

ती राजाले यही योगगङ्गामा स्नान गरे, गणेश्वर भगवान्लाई नमस्कार गरेर निष्पाप बने र ज्ञानी भए। उनको आज्ञा लिएर ती राजा प्रसन्न हुँदै यस ठाउँमा आए। संसारको बन्धनबाट मुक्त भएर उनले भक्तिपूर्वक मनमनै मन्त्र जपे। उनले भगवान् रुद्रका साथमा बस्नुभएकी विचित्र भयानक स्वरूपकी उमामाहेश्वरी देवीको दर्शन गरे। ती राजाले आश्विनकृष्ण नवमीको रातमा विभिन्न पूजासामग्रीहरू लिएर भक्तिपूर्वक यी देवीको आराधना गरे। उनले भूमिमा दण्डजस्तै लम्पसार परेर देवीलाई प्रणाम गरी परिक्रमा गर्दै बारम्बार स्तुति गरे र भक्तिपूर्वक एक लाख मन्त्र जपे। त्यसपछि शिवका गणहरूले सूर्यजस्तै चहकिलो ठूलो यानमा राखेर उनलाई ससम्मान उमामहेश्वरीको लोकमा लिएर गए ॥३५-४०॥

---

१०. त्रिविधैर्भक्तिर्मन्त्रैश्च, इति न.सं.पु.पाठः।
११. सन्निधाने च मे पुत्र ! तपः स्थास्यसि पूजकः, इति न.सं.पु.पाठः।
१२. स विरूक्षाय, इति न.सं.पु.पाठः।

कुर्याद् दानार्चनं योऽत्र पुण्यं तस्याऽक्षयं भवेत्[१३]। देहान्ते स परं स्थानं गमिष्यति न संशयः ॥४१॥
एकवारं जपन्मन्त्रमत्रैव च नरोत्तमः। जपादन्यत्र विहितात्[१४] कोटिकोटिगुणं फलम् ॥४२॥
एतत्ते कथितं विप्र ! योगिन्याश्च[१५] प्रशंसनम्। देव्याः प्रसादतश्चाऽसौ सदेहं मुक्तवान्नृपः ॥४३॥
भूयो गच्छ विरूपाक्ष ! नारायणह्रदोत्तमम्। नारायणं महालिङ्गं क्रोशैके पूर्वके ह्यतः ॥४४॥
स्नानञ्च कुर्याः प्रवरे ह्रदे त्वं नारायणाख्यं जलजञ्च लिङ्गम्।
प्राप्नोषि सिद्धिं परमां तदन्ते[१६] सम्पूज्य भक्त्या विधिवद्विनेत्र ॥४५॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां योगङ्गायोगेश्वरीमाहात्म्यं नाम एकविंशत्यधिकशततमोऽध्यायः ॥१२१॥

जसले यस ठाउँमा दान तथा पूजा गर्दछ, त्यो सबै अक्षय हुन्छ। शरीर छाडेपछि त्यो मानिस उत्तम स्थानमा पुग्छ, यसमा शङ्का छैन ॥४१॥ जुन मानिसले एक पटक मात्रै भए पनि यस ठाउँमा मन्त्र जप्छ भने त्यसले अन्य स्थानमा जप गरेको भन्दा करोडौं करोड गुणा बढी फल प्राप्त गर्दछ ॥४२॥

हे विरूपाक्ष ! मैले तिमीलाई योगेश्वरी भगवतीको माहात्म्य सुनाएँ। यी भगवतीको अनुग्रहले गर्दा ती राजा सशरीर मुक्त भएका थिए ॥४३॥ हे विरूपाक्ष ! यहाँबाट एक कोस पूर्व नारायण नाम गरेको तलाउ र नारायण महालिङ्ग छ। अब तिमी त्यस ठाउँमा जाऊ ॥४४॥ हे विरूपाक्ष ! तिमी त्यस श्रेष्ठ तलाउमा गएर स्नान गर। त्यसपछि जलभित्र रहेको नारायणलिङ्गको भक्तिपूर्वक यथाविधि पूजा गर। त्यसबाट तिमीले उत्तम सिद्धि पाउनेछौ ॥४५॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा योगगङ्गा, योगिनी र योगेश्वरीको माहात्म्यनामक एकसय एक्काइसौं अध्याय पूरा भयो।

---

१३. दानार्चनं कृतं योऽत्र तत्सर्वमक्षयं भवेत्, इति न.सं.पु.पाठः।
१४. अन्यत्र प्रजपाद् विप्र !, इति न.सं.पु.पाठः।
१५. एतस्याश्च, इति न.सं.पु.पाठः।
१६. समनुत्तमाञ्च, इति न.सं.पु.पाठः।

द्वाविंशत्यधिकशततमोऽध्यायः

नारायणसरोवरमहिमा

स्कन्द उवाच

चिरञ्जीविवरं लब्ध्वा[1] देव्याः प्रसादतो मुने। सिद्धदेहोऽगमद्विप्रो नारायणह्रदं पुनः ॥१॥
स्नात्वा तत्र विरूपाक्षो लिङ्गं नारायणात्मकम्। तपःकृष्णदशम्याञ्च ह्यानर्च विधिवन्मुने ॥२॥
ततोऽपृच्छन्मुनिं विप्रो विनिद्रो भक्तितो निशि। निनायाऽर्द्धनिशां सम्यङ्माहात्म्यं ह्रदलिङ्गयोः ॥३॥

विरूपाक्ष उवाच

नमस्ते भगवन्नार्य मुक्तिज्ञानप्रकारक। भवतः श्रोतुकामोऽहं माहात्म्यमीश्वरस्य च ॥४॥
अस्मिन् ह्रदे समुद्भूतं लिङ्गमेतत् कथं विभो[2]। केन प्रकाशितं लिङ्गं लोकाक्ष्णा तदगोचरम् ॥५॥

नेमुनिरुवाच

अत्र नारायणो रुद्रं समाराधितवान् पुरा। समुद्भूतं ततो लिङ्गमेतद्ध्रदजलोत्तमे ॥६॥
तस्मात्तस्यैव नाम्नाऽयं विश्रुतो भुवि दुर्लभः। नारायणस्तमानर्च नारायणेश्वरस्ततः ॥७॥
अस्माद्ध्रदात्समुद्भूता नारायणी नदी श्रुता। लभेताऽस्या जलाप्लावात् नारायणपदं महत्[3] ॥८॥
आसीत्कश्चित्किरातश्च सर्वजन्तुभयङ्करः। पूर्वजन्मविपाकेन बधिरोऽसावभूद् द्विज ! ॥९॥
सभायामास्थिते पूर्वे कथयति[4] जने कथाम्। साक्ष्यकालेऽभवन्मौनी[5] तद्दोषैर्बधिरोऽभवत् ॥१०॥
फलं भोक्तुं[6] समागत्य चाऽत्र चोदुम्बरं कुजम्। आरुरोह फलार्थाय किरातोऽसौ क्षुधार्दितः ॥११॥

अध्याय - १२२

नारायणसरोवरको महिमा

कार्तिक स्वामीले भन्नुभयो – विरूपाक्ष भगवतीको कृपाले चिरञ्जीवी हुने वर प्राप्त गरेर सिद्ध शरीर लिई फेरि नारायण नामको तलाउमा गए। हे अगस्त्य मुनि ! विरूपाक्षले त्यहाँ स्नान गरेर माघकृष्ण दशमीका दिन नारायणलिङ्गको विधिपूर्वक पूजा गरे। त्यसपछि विरूपाक्षले भक्तिपूर्वक जाग्राम बसेर तलाउ र त्यस लिङ्गको माहात्म्य सोध्दै आधा रात बिताए ॥१–३॥

विरूपाक्षले भने – मुक्ति र ज्ञान दिने हे पूज्य नेमुनि ! हजुरलाई नमस्कार छ। म भगवान्‌को यस लिङ्गको माहात्म्य सुन्न चाहन्छु। यो तलाउ र लिङ्गको उत्पत्ति कसरी भयो ? लोकको आँखामा अप्रत्यक्ष रहेको यस लिङ्गलाई कसले प्रकाशमा ल्याएको थियो ? ॥४–५॥

नेमुनिले भन्नुभयो – पहिले यहाँ भगवान् विष्णुले शङ्करको आराधना गर्नुभएको थियो। त्यसै कारण यस तलाउको उत्तम जलमा लिङ्गको उत्पत्ति भएको हो। तसर्थ पृथ्वीमा दुर्लभ भएको यो लिङ्ग नारायणकै नामले प्रसिद्ध भयो। नारायणले यस लिङ्गको पूजा गर्नुभएको हुनाले यस लिङ्गको नाम नारायणेश्वर रह्यो। यसै तलाउबाट नारायणी नदी बगेकी छन्। यस नदीमा स्नान मात्र गर्दा पनि साधकले नारायणको पद प्राप्त गर्दछ ॥६–८॥

हे विरूपाक्ष ! अघि कुनै ब्राह्मण पूर्वजन्मको कर्मले गर्दा सबै प्राणीहरूलाई भय उत्पन्न गर्ने बहिरो किरात भएर जन्मिए। पूर्वजन्ममा कुनै काममा प्रजाहरूले त्यस ब्राह्मणलाई साक्षी राखेका थिए। न्यायनिरूपण गर्ने सभामा पूर्वपक्षले आफ्ना तर्क राखेपछि साक्षीरूप ती ब्राह्मणले केही कुरा नबोली चुप लागेर बसेको हुँदा त्यसै दोषले गर्दा ती बहिरा भए। भोकले आत्तिएका ती किरात फल खानका लागि यहाँ आएर फल टिप्न डुम्रीको रुखमा चढे ॥९–११॥

---

१. लब्ध्वा वरञ्चिरञ्जीवम्, इति न.सं.पु.पाठः।
२. अस्मिन् ह्रदे समुद्भूतमेतल्लिङ्गं कथं विभो, इति न.सं.पु.पाठः।
३. अस्याञ्च स्नानमात्रेण नारायणपदं लभेत्, इति न.सं.पु.पाठः।
४. कथ्यमाने, इति न.सं.पु.पाठः।
५. साक्षिभूतेऽभवन्मौनी, इति न.सं.पु.पाठः।
६. फलाशितुम्, इति न.सं.पु.पाठः।

तद्भारभग्नशाखोऽसौ कुजो[७] ह्रदे पपात च। ममज्जाऽऽशु जले कृच्छ्रादुत्तीर्य तीरमागमत् ॥१२॥
अशृणोत्पक्षिणां शब्दं कोलाहलं मिथो रुतम्। दिव्यकर्णोऽभवन्म्लेच्छः पशुवाक्यविशारदः[८] ॥१३॥
अप्येकयोजनस्थानामाह्वानगानरोदनम्। तत्सर्वमशृणोन्म्लेच्छः सुस्पष्टं स्वान्तिके यथा ॥१४॥
कर्णतीर्थमिति ख्यातं ततो लोकैश्च सर्वदा। स्नातव्यं मनुजैश्चाऽत्र दिव्यकर्णफलार्थिभिः ॥१५॥
स्वात्मानमात्मना मेने स कृतार्थ इति ध्रुवम्। एतद्ह्रदजलस्पर्शाद् देहो मे चैवमेव हि[९] ॥१६॥
ज्ञात्वा तीर्थवरं म्लेच्छश्चाऽत्र तस्थौ निरन्तरम्। फलमूलाशनो नित्यं पिबन्नारायणीजलम्[१०] ॥१७॥
एकसंवत्सरान्तेऽसौ पञ्चत्वं प्राप्तवान् द्विज। माघकृष्णचतुर्दश्यां स्पृशन्नस्य जलं तटे[११] ॥१८॥
अत्रागत्य गणाः शीघ्रं तमास्थाय विमानके। निन्युः शिवपुरं दिव्यं नानामानपुरःसरम् ॥१९॥
स एव बधिरः ख्यातो रुद्रस्यानुचरोऽनिशम्। प्रमथानां गरिष्ठोऽभूदत्र देहविसर्जनात्[१२] ॥२०॥
भूयो गच्छ विरूपाक्ष ! पश्चिमायामतो दिशि[१३]। ज्योतीरूपो[१४] महारुद्रो यत्राऽऽस्ते प्रमथैः सह ॥२१॥
योगतीर्थ इतिख्याते स्नात्वा तमर्चयाऽऽशु वै। तत्रोषित्वा निशामेकां ततोऽन्यत्र प्रगम्यताम् ॥२२॥
एतन्मया ते कथितं महत्त्वं[१५] नारायणाख्यस्य हि शूलिनो वै।
अस्य ह्रदस्याऽऽर्य्य विरूपनेत्र ! वक्ष्यामि भूयः शृणु तत्र यत्तत् ॥२३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां नारायणेश्वरह्रदमाहात्म्यं नाम द्वाविंशत्यधिकशततमोऽध्यायः ॥१२२॥

तिनको भारले गर्दा डुम्रीको हाँगा भाँचियो र उनी तुरुन्त यसै तलाउमा खसे र पानीमा डुबे। त्यसपछि अत्यन्त कष्टका साथ उत्रिएर उनी तीरमा आए। ती किरातले परस्परमा आवाज निकालिरहेका पक्षीहरूको कोलाहल सुने र टाढाबाट पशुको आवाज पनि सुने। त्यसबाट तिनको कान दिव्य भयो र उनी पशुवाक्यका ज्ञाता बने। ती किरातले एक योजन पर रहेका व्यक्तिहरूको बोली, गाना, क्रन्दन सबै नजिकै भएजस्तै गरी स्पष्टसित सुने। त्यसपछि यस तीर्थको नाम कर्णतीर्थ भयो र जनताहरूले दिव्यकर्णको फल चाहना गर्ने मानिसहरूले यस ठाउँमा स्नान गर्नुपर्छ भनेर भने ॥१२-१५॥

ती किरातले आफैँले आफूलाई कृतार्थ ठाने र यो जलको स्पर्शले गर्दा नै मेरो शरीर यस्तो भएको हो, अन्यथा हुने थिएन भन्ने कुरा उनले ठाने। यो तीर्थ उत्तम रहेछ भन्ने ठानेर उनी त्यसै ठाउँमा बसे। उनले भोक मेट्न फलफूल खाए र तिर्खा मेट्न पानी पिए। एक वर्षपछि माघकृष्ण चतुर्दशीका दिन यसै तीर्थको तटमा जल स्पर्श गरी ती किरातले प्राणत्याग गरे। यहाँ आएर शिवजीका गणहरूले तिनलाई तुरुन्त विमानमा राखे र विभिन्न किसिमका सम्मान दिएर दिव्य शिवलोकमा पुऱ्याए। तिनै बहिरा किरात अहिले भगवान् रुद्रका सेवक भएर बसिरहेका छन्। यसै तलाउमा शरीर त्यागेको हुँदा उनी प्रमथगणका नायक भएका हुन् ॥१६-२०॥

हे विरूपाक्ष ! फेरि तिमी यहाँबाट पश्चिम दिशातिर जाऊ। त्यहाँ प्रमथगणका साथ महारुद्रको ज्योतिर्लिङ्ग विराजमान छ। योगतीर्थ नाम गरेको तीर्थमा स्नान गरेर तुरुन्त त्यस लिङ्गको पूजा गर। त्यहाँ एक रात बसेर त्यसपछि अन्यत्र जाऊ। मैले नारायण तलाउ र नारायणेश्वर लिङ्गको माहात्म्य बताएँ। त्यहाँ अरु जे जति छ, त्यो सबै कुरा बताउनेछु, फेरि सुन ॥२१-२३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा नरायणेश्वरसरोवरको माहात्म्यनामक एकसय बाइसौं अध्याय पूरा भयो।

---

७. अस्मिन्, इति न.सं.पु.पाठः।
८. पशूनामपि दूरतः, इति न.सं.पु.पाठः।
९. एतज्जलस्पृशाद्देहो मे चैवमेव नान्यथा, इति न.सं.पु.पाठः।
१०. नित्यमपीबमृगया जलम्, इति न.सं.पु.पाठः।
११. एतज्जलं स्पृशन् तटे, इति न.सं.पु.पाठः।
१२. अस्मिन् ह्रदे तनुत्यजात्, इति न.सं.पु.पाठः।
१३. पश्चिमे ककुभे ह्यतः, इति न.सं.पु.पाठः।
१४. ज्योतिर्लिङ्गः, इति न.सं.पु.पाठः।
१५. माहात्म्यम्, इति न.सं.पु.पाठः।

त्रयोविंशत्यधिकशततमोऽध्यायः

योगतीर्थज्योतिर्लिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

अत्र स्नात्वा विरूपाक्षो दूरदर्शी ह्यभूत्पुनः । दशयोजनसम्भूतं वृत्तान्तमशृणोन्मुने ॥१॥

भूयोऽगमत्समन्तेन वारुण्यां दिशि वै द्विज । सहस्रधनुषाञ्चैव दूरे तस्माद्विरूपदृक् ॥२॥

योगतीर्थजले स्नात्वा[1] ज्योतिर्ल्लिङ्गं समर्चितम् । भक्त्या नानाविधैः पुष्पैस्त्रयोदश्यां तपोऽसिते ॥३॥

उपोष्य तन्निशायां स विनिद्रः पूजकः पुनः । अपृच्छन्नेमुनिं भक्त्या तन्माहात्म्यं घटोद्भव ॥४॥

विरूपाक्ष उवाच

ज्ञानदीपप्रकाशाय नमस्ते गुरुरूपिणे । भवतः श्रोतुकामोऽहं भूयो वार्तां पुरोद्भवाम् ॥५॥

एतल्लिङ्गस्य माहात्म्यमुद्भवश्च[2] कथं विभो । ज्योतिर्लिङ्गमिति ख्यातं योगतीर्थं कथं[3] तथा ॥६॥

नेमुनिरुवाच

सनको नाम योगीशः पुराऽऽसीद् ब्रह्मणः सुतः । तन्मानससमुद्भूतः सदा सर्वदयापरः ॥७॥

रत्नावती नदी पुण्या चित्रह्रदोद्भवा पुरा । नारायणी नदी चाऽत्र तयोर्योगे समाययौ ॥८॥

सस्नौ योगीश्वरो विप्र ! योगस्नानेन योगतः । योगतीर्थमिति ख्यातमेतत्तीर्थन्ततो बुधैः ॥९॥

अत्राऽऽगत्य मुनिश्रेष्ठो योगं दध्यौ भृशं परम् । एतत्स्थाने समास्थाय[4] निर्विकारेन्द्रियोऽचलः ॥१०॥

कार्त्तिके शुक्लनवम्यां ध्यायमानो महानिशि । ज्योतिर्मयं महालिङ्गमेतच्च सनकार्चितम् ॥११॥

अध्याय – १२३

योगतीर्थ र ज्योतिर्लिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – विरूपाक्ष यस तीर्थमा स्नान गरेर फेरि दूरदर्शी बने । उनले दश योजन टाढा भएको कुराकानी पनि सुने । फेरि विरूपाक्ष सिद्धर्षि नेमुनिका साथ त्यहाँबाट पश्चिम दिशातिर लागे र हजार धनुष जति टाढा गए । योगतीर्थको जलमा स्नान गरेर माघकृष्ण त्रयोदशीका दिन विभिन्न किसिमका पूजासामग्री लिएर उनले ज्योतिर्लिङ्गको पूजा गरे । हे अगस्त्य मुनि ! पूजा गरिसकेपछि त्यसै रातमा जाग्राम बसेर त्यस तीर्थको र लिङ्गको माहात्म्य विरूपाक्षले भक्तिपूर्वक नेमुनिसँग फेरि सोधे ॥१–४॥

विरूपाक्षले भने – ज्ञानको बत्ती बाल्ने गुरुरूप भएका हजुरलाई नमस्कार छ । म अघि भएको वृत्तान्त फेरि सुन्न चाहन्छु । यो लिङ्गको उत्पत्ति र यसको महत्त्व कसरी बढ्यो ? योगतीर्थ एवं ज्योतिर्लिङ्गको प्रसिद्धि कसरी फैलियो ? यसबारे मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – अघि सनक नाम गरेका ब्रह्माका एक मानसपुत्र पैदा भए । ती सम्पूर्ण प्राणीलाई दया गर्ने योगीश्वर थिए । यहाँ रत्नावती नाम गरेकी पुण्य नदी छन् । अर्को चित्रदहबाट पैदा भएकी नारायण नामकी नदी छन् । उनी (सनक) यिनै दुई नदीको सङ्गमस्थलमा आए ॥७–८॥

हे विरूपाक्ष ! ती योगीश्वरले योगपूर्वक यहाँ स्नान गरेको हुँदा विद्वान्हरूले यसलाई योगतीर्थ भने । यस ठाउँमा आएर मुनिश्रेष्ठ ती सनकले निर्विकार भएर सबै इन्द्रियहरूलाई अचल राखी राम्ररी योग गर्दै बारम्बार भगवान्को ध्यान गरे । कार्तिकशुक्ल नवमीका दिन मध्यरातमा पूजा गरेर सनकमुनिले ध्यान गरिरहेको समयमा यस ज्योतिर्मय लिङ्गको प्रादुर्भाव भयो ॥९–११॥

---

१. योगतीर्थजलाप्लाव्य, इति न.सं.पु.पाठः ।
२. ... मुद्भूतञ्च, इति न.सं.पु.पाठः ।
३. ख्यातो योगतीर्थस्य वै, इति न.सं.पु.पाठः ।
४. तदाज्ञाय, इति न.सं.पु.पाठः ।

ज्योतिर्मयं तदा लिङ्गं विराजते महाप्रभम् । घृतपूर्णे च तत्पात्रे नक्तं दीपशिखेव हि ॥१२॥
ज्योतिर्लिङ्गं समालोक्य सनकोऽपूपुजन्मुदा । नानोपहारकैर्भक्त्या जपैः स्तवैः परिक्रमैः ॥१३॥
ददौ तस्मै वरं रुद्रः सततं जीवितं पुनः । ब्रह्मत्वञ्च द्वितीयं वै योगीश्वरं विरूपदृक् ॥१४॥
एतल्लिङ्गार्चनाच्चैव निन्युः स्वर्गं गणा इमम्[५] । अद्यादि सनकोऽसौ हि चाऽभूद्योगीश्वरो विभुः ॥१५॥
भूयः शृणु विरूपाक्ष ! कश्चिन्मुक्तो द्विजः पुरा । एतल्लिङ्गप्रसादात्स सदेहश्चाऽत्र सत्वरम् ॥१६॥
अशुचिर्बहुभार्यश्च बह्वाहारः सूचीमुखः[६] । तद्दोषेणाऽशुचिर्जिह्वा जाता सोऽभूच्च भिक्षुकः[७] ॥१७॥
सोऽभवत्क्षुत्पिपासार्त्तो भिक्षावृत्तिं समाचरन् । अत्रैव प्राप्तवान् विप्रः समुत्तीर्य्यावनीं पुरा ॥१८॥
ददर्शाऽत्र मुनिं सोऽपि हारीतं नाम विश्रुतम् । योगतीर्थे पितृन् देवान् तर्पयन्तं कुशोदकैः ॥१९॥
उपाश्रित्य ततस्तस्य सूचीमुखः शनैः शनैः । भक्त्या प्रणम्य चाऽपृच्छत्स्वकष्टकारणं मुनिम् ॥२०॥

सूचीमुख उवाच

मुनिप्रवर पुण्यात्मन् ![८] नतोऽस्मि तेऽङ्घ्रिपुष्करम् । लोकप्रणतदेहाय ज्ञानदाय च ते नमः ॥२१॥
कथं मोक्ष्यति मे देहः क्षुत्पिपासार्दितस्त्विह । तद्बीजं वद मे तात सर्वज्ञानप्रदायक ॥२२॥

हारीत उवाच

पूर्वजन्मविपाकेन त्वमिह क्लिश्यसि ध्रुवम् । तत्पापानि विनश्यन्ति पुत्राऽत्रैव न संशयः ॥२३॥
त्वत्स्नानाद्योगतीर्थेऽत्र पापं नश्यति तेऽधुना । अत ऊर्ध्वं समागत्य ज्योतिर्लिङ्गं प्रपूजय ॥२४॥
प्राप्स्यसि वाञ्छितं कामं तत्रैव वत्स मा चिरम् । गच्छ सूचीमुखार्य ! त्वं स्नाह्यत्र भक्तिभिर्द्रुतम् ॥२५॥

घिउले भरिएको भाँडामा राति बत्तीको ज्वालाजस्तै गरी त्यसबखत अत्यन्त तेजस्वी ज्योतिर्मय लिङ्ग प्रकट भयो । ज्योतिर्लिङ्गलाई देखेर सनकमुनिले विभिन्न किसिमका पूजासामग्रीद्वारा सभक्ति प्रसन्न हुँदै पूजा गरे, जप गरे, स्तुति गरे र परिक्रमा गरे । हे विरूपाक्ष ! ती सनकमुनिलाई भगवान् शङ्करले चिरञ्जीवी बन भन्ने पहिलो वर र ब्रह्मचारी बन भन्ने दोस्रो वर दिनुभयो । यसै ज्योतिर्लिङ्गलाई आराधना गरेर सनकमुनि स्वर्ग गए । आजसम्म पनि उनलाई योगीश्वर भनिदैछ ॥१२-१५॥

हे विरूपाक्ष ! फेरि सुन – अघि कुनै सूचीमुख नामक ब्राह्मण यसै लिङ्गको अनुग्रहबाट सशरीर तुरुन्त मुक्त भएका थिए । अघि उनी अपवित्र थिए, उनका धेरै पत्नी थिए, धेरै खान्थे, त्यसैले गर्दा तिनको जिब्रो अपवित्र थियो । उनले भिक्षा मागेर जीविका चलाउँथे । अघि ती ब्राह्मण भोक र तिर्खाले आत्तिएर भिक्षा माग्दै पृथ्वीमा घुम्ने क्रममा यसै ठाउँमा आइपुगे । उनले यस योगतीर्थमा पितृ र देवतालाई कुश र जलले तर्पण गरिरहेका हारीत नाम गरेका ऋषिलाई देखे । त्यसपछि ती सूचीमुखले विस्तार विस्तार ती ऋषिको नजिकै गएर आफूले दुःख पाउनाको कारण उनीसित भक्तिपूर्वक सोधे ॥१६-२०॥

सूचीमुखले भने – हजुर मुनिहरूमा श्रेष्ठ हुनुहुन्छ, हजुरका दुई पाउरूपी कमलमा म प्रणाम गर्दछु । सम्पूर्ण प्राणीहरूले हजुरको शरीरलाई ढोग्दछन् । यस्ता ज्ञान दिने हजुरलाई नमस्कार छ । भोक र प्यासले ग्रस्त भएको यो मेरो शरीर कसरी मुक्त हुन्छ ? सम्पूर्ण ज्ञानदाता हे मुनि ! हजुरले त्यसको कारण बताइदिनुपर्‍यो ॥२१-२२॥

हारीतले भने – पूर्वजन्मको कर्मले गर्दा यस जन्ममा तिमीले दुःख पाएका छौ । हे बाबु ! त्यो तिम्रो पाप यसै क्षेत्रमा नाश हुन्छ, यसमा शङ्का छैन ॥२३॥ यस योगतीर्थमा स्नान गर्‍यौ भने अहिले नै तिम्रो पाप नाश हुन्छ । त्यसपछि यहाँबाट माथि गएर तिमीले ज्योतिर्लिङ्गको पूजा गर्नुपर्छ ॥२४॥ हे बाबु ! त्यसै ठाउँमा तिमीले आफ्नो इच्छा अनुसारको फल पाउनेछौ, ढिलो नगर । हे सूचीमुख ! यस तीर्थमा भक्तिपूर्वक स्नान गरेर छिटो गइहाल ॥२३-२५॥

---

५. स्वर्गमादाय वै ययौ, इति न.सं.पु.पाठः ।
६. बहुपत्नी च वह्वाहारी पुराऽभवत्, इति न.सं.पु.पाठः ।
७. तद्दोषेणाशुची जिह्वा भिक्षाटनं ततोऽचरत्, इति न.सं.पु.पाठः ।
८. मुनीनां प्रवर्याहम्, इति न.सं.पु.पाठः ।

नेमुनिरुवाच

इत्याकर्ण्य मुनेर्वाक्यं योगतीर्थजलाप्लुतः । स्नात्वा च[९] विधिवद्विप्रो ययौ यत्र महेश्वरः ॥२६॥
वैशाखपूर्णिमायां स स्नात्वा तीर्थे सूचीमुखः । अपूपुजन्मुदा भक्त्या चैतल्लिङ्गं समर्हणैः ॥२७॥
पञ्चरात्रं सुखं प्राप्य जजापाहर्निशं द्विजः । पञ्चोपचारकैर्भक्त्या सम्पूज्य स पुनः पुनः ॥२८॥
वैशाखकृष्णपञ्चम्यामर्द्धरात्रे तदा द्विजः । गणा अत्रायय‌ू रौद्रा रुद्रपार्श्वचरो भव ॥२९॥
इति लब्धवरस्तीर्थे स्नात्वा निष्पापतां गतः[१०] । भूयो गच्छ विरूपाक्ष ! अतो याम्यां दिशि ध्रुवम् ॥३०॥
रत्नचूडेश्वरो यत्र योजनार्द्धे विदूरके । तत्र ह्रदो महाशैलान्नवधारास्रवोद्भवः ॥३१॥
यक्षलोकैश्च यत्रेशः सेवितो गच्छ तत्र वै ।

एतच्च तुभ्यं कथितं मया वै श्रीज्योतिरीशस्य विरूपनेत्र ।
माहात्म्यमीशस्य परं महत्त्वं[११] योगाख्यतीर्थस्य प्रशंसनञ्च[१२] ॥३२॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
योगतीर्थज्योतिर्लिङ्गयोर्माहात्म्यं नाम त्रयोविंशत्यधिकशततमोऽध्यायः ॥१२३॥

नेमुनिले भन्नुभयो – मुनिको यस्तो वचन सुनेपछि योगतीर्थको जलमा स्नान गरेर ती ब्राह्मण जहाँ महेश्वर बस्नुभएको थियो, त्यसै ठाउँमा गए। वैशाखशुक्ल पूर्णिमाको दिन यस तीर्थमा स्नान गरेर ती सूचीमुखले विभिन्न पूजासामग्री लिएर भक्तिपूर्वक यस लिङ्गको पूजा गरे। पाँच रातसम्म ती ब्राह्मणले भक्तिपूर्वक पञ्चोपचारद्वारा त्यस लिङ्गको बारम्बार पूजा गरे र रातिदन मन्त्र जप गरे। वैशाखकृष्ण पञ्चमीका दिन आधारातमा शिवजीका गणहरू यहाँ आए र उनलाई तिमी शिवजीका श्रेष्ठ पार्श्ववर्ती बन भने। योगतीर्थको जलमा गरेको स्नानको प्रभाव र भगवान्का कृपाले गर्दाउनले रुद्रको पार्श्ववर्ती हुने वर पाए र उनी पापबाट मुक्त भए ॥२६–३०½॥

त्यसपछि नेमुनिले भन्नुभयो – अब तपाईं दक्षिण दिशामा जानुहोस्। यस ठाउँबाट दुई कोस पर रत्नचूडेश्वर भगवान् हुनुहुन्छ। त्यहाँ महापर्वतबाट जलधारहरू एकैचोटि वहँदा बनेको ठूलो तलाउ छ। यस तीर्थमा अघि गणहरूले आराधना गरेका थिए। मैले तिमीलाई ज्योतिर्लिङ्गको र महातीर्थको सबै माहात्म्य बताएँ। यी सबै तीर्थका महत्त्व अवर्णनीय छन्। हे विरूपाक्ष ! मैले तिमीलाई ज्योतिरीश्वर भगवान्को सबै चरित्र बताएँ। हे महाप्रभावशाली विरूपाक्ष ! मैले विशेष रूपमा योगतीर्थको महिमा पनि बताएँ ॥३१–३२॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा योगतीर्थ र ज्योतिर्लिङ्गको माहात्म्यनामक
एकसय तेइसौं अध्याय पूरा भयो।

---

९. आप्लाव्य, इति न.सं.पु.पाठः।
१०. योगतीर्थजलाप्लाव्य निष्पापोऽजप्रसादतः, इति न.सं.पु.पाठः।
११. महाप्रभाव, इति न.सं.पु.पाठः।
१२. विशेषितञ्च, इति न.सं.पु.पाठः।

चतुर्विंशत्यधिकशततमोऽध्यायः

रत्नसरोवररत्नचूडेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

योगतीर्थे ततः स्नात्वा योगीश्वरोऽभवद् द्विजः। रत्नचूडेश्वरो यत्र मुनिना तेन वै समम् ॥१॥
रत्नह्रदं महाशैलं समारुह्य विरूपदृक्। रत्नह्रदे पुनः सस्नौ भक्त्या च विधिवन्मुने ॥२॥
तपःकृष्णचतुर्दश्यां स्नात्वा च तद्ध्रदे द्विजः। अर्हति स्म शिवं भक्त्या रत्नचूडेश्वरं ह्रदे ॥३॥
निरशनं व्रतं कृत्वा विप्रोऽसौ भक्तितो निशि[1]। विनिद्रोऽपूजयत्[2] रुद्रं मणिचूडेश्वरं तदा ॥४॥
माहात्म्यञ्च ततोऽपृच्छत्[3] तन्निशायाञ्च नेमुनिम्। लिङ्गस्य रत्नचूडस्य प्रणम्य तं घटोद्भव ॥५॥

विरूपाक्ष उवाच

नमस्ते मुनये धीमन् ज्ञानदाय स्वसेविनाम्। श्रोतुमिच्छामि माहात्म्यमेतयोर्ह्रदलिङ्गयोः ॥६॥
मोहान्धानाञ्च पापानां ज्ञानदीपप्रकाशक। उत्तरापेक्षिणं माञ्च[4] वदेतत्खलु नेमुने ॥७॥

नेमुनिरुवाच

ब्रह्मणात्र ह्रदं पूर्वं निर्माय द्विज सुन्दरम्। रत्नेन कल्पितं लिङ्गं रत्नचूडेशमीरितम् ॥८॥
एतद्ध्रदात्समुद्भूता नवधारा नदीवरा। एतस्य शृणु माहात्म्यं प्रवक्ष्याम्यहमद्भुतम् ॥९॥
आसीत्कश्चिद् द्विजो वत्स मुक्तश्चात्र ह्रदोत्तमे। श्रावणीपूर्णिमायां स चैतल्लिङ्गप्रदर्शनात् ॥१०॥
अनाचारी ह्यभूद् विप्रः पूर्वजन्मनि सन्ततम्। तद्दोषेण समाजेऽस्मिन्[5] पिशाच इति विश्रुतः ॥११॥
शौचहीनः कुचैलाङ्गी मिथ्यावादरतः सदा। लोकविद्वेषणोऽजस्रं सर्वाशनोऽभवत्तदा ॥१२॥

अध्याय - १२४

रत्नसरोवर र रत्नचूडेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष योगतीर्थमा स्नान गरेर योगीश्वर बनी जहाँ रत्नचूडेश्वर हुनुहुन्थ्यो, त्यसै ठाउँमा नेमुनिका साथ गए। विरूपाक्षले त्यस ठूलो पर्वतमा चढेर रत्नसरोवरमा भक्तिपूर्वक विधिवत् फेरि स्नान गरे। माघकृष्ण चतुर्दशीका दिन त्यस तलाउमा स्नान गरेर विरूपाक्षले भक्तिपूर्वक तलाउभित्र रहेका रत्नचूडेश्वर महादेवको पूजा गरे। त्यसपछि विरूपाक्षले खाना नै नखाईकन भक्तिपूर्वक राति जाग्राम बसेर मणिचूडेश्वर महादेवको पूजा गरे। हे अगस्त्य मुनि ! त्यसपछि त्यसै दिन राति रत्नचूड लिङ्गलाई नमस्कार गरेर विरूपाक्षले नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे ॥१-५॥

विरूपाक्षले भने – आफ्ना भक्तहरूलाई ज्ञान दिने बुद्धिमान् हे मुनि ! हजुरलाई नमस्कार छ। यो तलाउ र लिङ्गको माहात्म्य म सुन्न चाहन्छु। मोह र पापमा डुबेका व्यक्तिहरूलाई ज्ञानको बत्ती बालेर प्रकाश छरिदिने हे नेमुनि ! प्रश्न गर्न लागेको मलाई यी सबै कुरा बताइदिनुहोस् ॥६-७॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यो तलाउ अघि यस ठाउँमा ब्रह्माजीले बनाउनुभएको थियो। रत्नले बनेको लिङ्ग हुँदा यसको नाम रत्नचूडेश्वर रहेको हो। यसै दहबाट नौवटा धारा भएर नदीहरू पैदा भए। यसको अद्भुत माहात्म्य बताउँछु, सुन। हे बाबु ! एउटा कुनै ब्राह्मण श्रावणीपूर्णिमाको दिन यस लिङ्गको दर्शन गरेर यसै तलाउमा मुक्त भएका थिए। ती ब्राह्मण पूर्वजन्ममा निरन्तर आचाररहित भएका अर्थात् भ्रष्ट बनेर रहेका थिए। त्यसैको दोषले गर्दा उनी समाजमा पिशाचका नामले प्रसिद्ध भएर जन्मिए। पछिल्लो जन्ममा तिनको शौच थिएन, उनका अङ्गहरू सबै मैला लुगाले युक्त थिए। उनी सधैं भुटो बोल्दथे, दुनियालाई रीस उठाउँथे र सबै थोक खान्थे ॥८-१२॥

---

१. भूत्वा विनाशैर्विप्रः तन्निशायां हि भक्तितः, इति न.सं.पु.पाठः। २. विनिद्रः पूजकः, इति न.सं.पु.पाठः।
३. ततोऽपृच्छन्माहात्म्यं स, इति न.सं.पु.पाठः। ४. प्रश्नकामाय मे तात, इति न.सं.पु.पाठः।
५. समुद्भूतः, इति न.सं.पु.पाठः

एकदा दिवसे वत्स विरक्तो निःसृतो गृहात् । मातापित्रोः प्रियायाश्च जाते देहविसर्जने[६] ॥१३॥
पञ्चविंशतिवर्षीयः[७] गङ्गातीरं समाव्रजत् । ब्रह्मचारिणं ददर्शाऽसौ स्नात्वा सन्ध्यामुपाश्रितम् ॥१४॥
सोऽपि चाऽऽप्लाव्य गङ्गायामगमद्धि तदन्तिकम् । प्रणामाय करौ तस्य पादस्पर्शसमुद्यतौ[८] ॥१५॥
स्प्रष्टुं पादौ तत्परं[९] तमवलोक्य द्विजं यतिः । मा मा हे स्पृश मां पाप चेत्युक्त्वा चञ्चलोऽभवत्[१०] ॥१६॥
ततः साश्रुमुखोऽभूत्स[११] तमापृच्छद्यतिं द्विजः । कथं मोक्ष्यामि तातेति चैतत्कलेवरं मम ॥१७॥
हिमवत्पर्वतं गच्छ ततः पूतो भविष्यति । नेपाले चोत्तरे भागे तत्र लिङ्गं स्पृशाशु च ॥१८॥
तदाकर्ण्य वचो विप्रो यतिमुखाच्च्युतं मुदा । कृत्वेति पथ्यमार्य्योक्तं ह्रदोत्तमे ततोऽगमत् ॥१९॥
अत्राप्तवान्पिशाचोऽसावुत्तीर्याद्रीन्पुरादिकम् । आषाढपूर्णिमायां स सस्नौ ह्रदोत्तमे द्विज ॥२०॥
पूर्वाषाढर्क्षयुक्तायामाषाढीपूर्णिमानिशि । अर्चति स्म ह्रदे सोऽस्मिन्नेतल्लिङ्गं समर्हणैः ॥२१॥
तं पूजकं समालोक्य रत्नचूड उवाच हि । पूजितं वीरमार्गेण त्वयाऽस्मिन् भीषणे वने[१२] ॥२२॥

रत्नचूडेश्वर उवाच

भो पिशाचोऽसि मद्भक्तश्चात्र स्नानान्मदर्चनात् । वीरमार्गेण मत्पूजा कृताऽस्मिन् निर्जने वने[१३] ॥२३॥
अद्यादि प्रमथानां त्वं गरिष्ठो मे भवानुगः । सर्वपापैर्विमुक्तोऽसि स्नानदर्शनपूजनात्[१४] ॥२४॥

एकदिन बाबु, आमा र धर्मपत्नी मरेपछि विरक्त भएर ती आफ्नो घरबाट निस्किए । पच्चीस वर्ष उमेरका ती ब्राह्मण गङ्गाजीको तीरमा गए । त्यहाँ उनले स्नान गरेर सन्ध्या गर्न लागेका ब्रह्मचारीलाई देखे । उनले पनि गङ्गामा नुहाए र ब्रह्मचारीको नजिकै गए । त्यहाँ उनले दुबै हातले ब्रह्मचारीको पाउ समातेर नमस्कार गर्न खोजे । आफूलाई छोएर प्रणाम गर्न लागेका ती ब्राह्मणलाई ब्रह्मचारीले "ए पापी ! मलाई न छो" भन्दै हडबडका साथ पछाडि सरे । ब्राह्मणले आँखाभरि आँसु पारेर ब्रह्मचारीलाई भने- "हे ब्रह्मचारी ! मेरो शरीरलाई म कसरी मुक्त गराउन सक्छु ? बताइदिनुहोस्" ॥१३-१७॥

ब्रह्मचारीले ब्राह्मणलाई 'नेपालको उत्तर भागमा हिमालय छ । तिमी तुरुन्तै त्यहाँ जाऊ र शिवलिङ्गको स्पर्श गर' भने ॥ योगीको मुखबाट झरेको यो बोली सुनेर साँच्चै भन्नुभएको हो भन्ने ठानी ती ब्राह्मण हिमालय पर्वतमा रहेको उत्तम तलाउमा गए । पिशाचरूपधारी ती ब्राह्मणले पर्वत र नगर नाघ्दै आषाढपूर्णिमाका दिन त्यस उत्तम तलाउमा आएर स्नान गरे । पूर्वाषाढा नक्षत्रयुक्त आषाढपूर्णिमाका दिन राति उनले विभिन्न पूजासामग्री लिएर यस तलाउमा रहेको यस लिङ्गको पूजा गरे । भक्तिपूर्वक पूजा गर्न लागेका ती ब्राह्मणलाई देखेर रत्नचूडेश्वर भगवान्ले 'यस भयानक वनमा वीरमार्गले तिमी मेरो पूजा गर्दैछौ' भन्नुभयो ॥१८-२२॥

रत्नचूडेश्वरले अगाडि भन्नुभयो - हे भक्त ! तिमी पिशाच थियौ, वीरमार्गले डरलाग्दो विधिबाट मेरो पूजा गरेको हुँदा भक्त बन्यौ, यस तीर्थमा स्नान गर्‍यौ । त्यसका प्रभावले गर्दा आजदेखि मेरो प्रमथगणमध्येका मुख्य सेवक भयौ । तिमी भक्ति, पूजा र स्नानका प्रभावले सबै पापबाट मुक्त भयौ ॥२३-२४॥

नेमुनिले भन्नुभयो - यसरी वर दिएर तलाउमा भगवान् शङ्कर अन्तर्धान हुनुभयो । हे विरूपाक्ष ! वर पाएर त्यस पिशाचले पनि आफूलाई कृतार्थ ठान्यो ॥२५॥

---

६. पर्यपर ते ताते च मातरि स्वबन्धां ततः, इति न.सं.पु.पाठः ।
७. पञ्चविंशत्समायुक्तः, इति न.सं.पु.पाठः ।
८. प्रणन्तुं तमुपाविश्य तदङ्घ्रिमस्खलत्करम्, इति न.सं.पु.पाठः ।
९. स्वास्पर्शितुं समुद्यन्, इति न.सं.पु.पाठः ।
१०. मा मा स्पर्शय मां पाप इत्युक्त्वाभूच्चलद् भृशम्, इति न.सं.पु.पाठः ।
११. ततो ह्यश्रुमुखोऽभूत्स, इति न.सं.पु.पाठः ।
१२. वीरेण पूजितं भक्त्या भीषणे निर्जने वने, इति न.सं.पु.पाठः ।
१३. मां वीरेणार्चितं यस्मात्त्यक्तजन्तुर्विभीषणः, इति न.सं.पु.पाठः ।
१४. अत्राप्लवान्मदर्चनात्, इति न.सं.पु.पाठः ।

नेमुनिरुवाच

दत्त्वा वरं हरस्तस्मै चाऽत्र ह्रदे तिरोदधे। सोऽपि कृतार्थतां मेने लब्धवरो विरूपदृक् ॥२५॥
तस्मिन्नवसरे दूता रुद्रस्याऽत्र समाव्रजन्। पुष्पकपाणयः शीघ्रं गीतवाद्यप्रमोदितम् ॥२६॥
तमास्थाप्याशु तद्याने निन्युः शिवपुरं गणाः। अभिषिच्य ह्रदे तोयैर्गणत्वेनाद्रितं तदा ॥२७॥
संस्नाति यस्तु धीरोऽत्र रत्नचूडेश्वरं पुनः। समर्चति च सङ्क्रान्त्यां मधोः पुण्यफलं शृणु ॥२८॥
शैलारोहणमात्रेण[१५] जन्मैनसा विमुच्यते। मुक्तस्त्रिजन्मजैः पापैरेतद्ध्रदजलाप्लवात् ॥२९॥
लिङ्गदर्शनमात्रेण सर्वैनोभिर्विमुच्यते। याति शिवपुरं साक्षात्तद्यानेन सविग्रहः ॥३०॥
अतो याम्ये च देशे त्वमेतत्पर्वतकिङ्शुके। क्रोशमात्रे ह्यधः स्थाने यत्र वागीश्वरो व्रज ॥३१॥
वीरतीर्थे ततः स्नात्वा वागीश्वरं समर्चय। सर्वेषामुन्नता विप्र वाक्सिद्धिस्ते भविष्यति[१६] ॥३२॥

माहात्म्यमेतत् कथितं मया ते[१७] श्रीरत्नचूडस्य विरूपनेत्र।
तुर्य्ये युगे स्थास्यति गूढरूपमस्मिन् ह्यधोलिङ्गमखाततोये ॥३३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां रत्नचूडेश्वरमाहात्म्यं नाम चतुर्विंशत्यधिकशततमोऽध्यायः ॥१२४॥

त्यसै बेलामा पुष्पक विमान लिएर गाना, बजाना र उत्सवका साथ तुरुन्त शिवजीका दूतहरू यस ठाउँमा आए। यस तलाउमा शिवगणका रूपमा ती पिशाचरूप ब्राह्मणलाई अभिषेक गरेर उनलाई त्यसै यानमा तुरुन्त राखी शिवजीका गणहरूले शिवलोकमा लिएर गए। यस तलाउमा स्नान गरेर जसले रत्नचूडेश्वर भगवान्को वैशाखसङ्क्रान्तिका दिन पूजा गर्छ त्यसको पुण्यफल सुन। पहाडमा आरोहण गर्नाले मात्रै पनि साधकले तीनै जन्मदेखि गरेका पापबाट मुक्त हुन्छ। यस तलाउमा स्नान गऱ्यो भने तीन जन्ममा गरेका पापबाट मुक्ति पाउँछ।

साधकले यस लिङ्गको दर्शन मात्रै गऱ्यो भने पनि त्यो सम्पूर्ण पापबाट मुक्त भएर त्यसै यानमा चढेर शरीरैसित साक्षात् शिवलोकमा जान्छ ॥२६–२९॥

हे विरूपाक्ष! यहाँबाट तिमी अब एककोस टाढा दक्षिणतिर रहेको पलासै पलासले भरिएको पर्वतमा जाऊ। त्यसैको फेदीमा वागीश्वर शिवजी रहनुभएको छ। त्यसपछि वीरतीर्थमा स्नान गरेर वागीश्वरको पूजा गर। त्यसका प्रभावले तिम्रो सबैभन्दा ठूलो वाक्सिद्धि हुनेछ ॥३०–३२॥

हे विरूपाक्ष ! मैले तिमीलाई रत्नचूडेश्वरको सबै माहात्म्य बताएँ। कलियुगमा यो लिङ्ग प्राकृतिक सरोवरको जलभित्र अदृश्य भएर रहनेछ ॥३३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा रत्नचूडेश्वरको माहात्म्यनामक एकसय चौबीसौं अध्याय पूरा भयो।

---

१५. ते भविष्यति वाक्सिद्धिः सर्वेषामुन्नता द्विज, इति न.सं.पु.पाठः। १६. पर्वतारोहमात्रेण, इति न.सं.पु.पाठः।
१७. एतन्मया ते कथितं माहात्म्यम्, इति न.सं.पु.पाठः।

पञ्चविंशत्यधिकशततमोऽध्यायः

वीरानदी–वागीश्वरयोर्महिमा

स्कन्द उवाच

रत्नह्रदे ततः स्नात्वा विरूपाक्षो घटोद्भव। सम्पूज्य रत्नचूडेशं तस्य[1] रत्नप्रभा तनुः ॥१॥
भूयोऽगमद्विरूपाक्षश्चागस्त्यमुनिना सह। यत्र वागीश्वरं लिङ्गं रत्नह्रदाद्रिशेखरे[2] ॥२॥
वीरनद्यां सुखं स्नात्वा वागीश्वरमपूपुजत्। तपःकृष्णे ह्यमावास्यां भक्तिभावेन चेतसा ॥३॥
तन्निशायां मुदा विप्रो विनिद्रः पूजको हरम्। पृच्छति स्म मुनिं भक्त्या तन्माहात्म्यं घटोद्भव ॥४॥

विरूपाक्ष उवाच

भगवन्मुनिशार्दूल मुक्तिज्ञानप्रदायक। भूयः श्रोतुमनाश्चाहं त्वत्तो भवामि[3] साम्प्रतम् ॥५॥
एतल्लिङ्गस्य माहात्म्यं वीरनद्यास्तथैव च। को मुक्तोऽत्र मुने पूर्वं तत्सर्वं मे वद प्रभो ॥६॥

नेमुनिरुवाच

आसीद्विप्र पुरा कश्चिद्वाग्नामा च मुनीश्वरः। सोऽत्राऽदर्शन्नदीं चेमां शैलावतरणीं[4] वराम् ॥७॥
वीरेण चेतसा सस्नौ तस्माद्वीरा नदी श्रुता। सम्पूज्य विधिवद्भक्त्या वीरकल्लोलिनीं द्विज ॥८॥
अत्र संस्थापितं भक्त्या तेन लिङ्गं यथाविधि[5]। श्रावणीपूर्णिमायां हि श्रवणर्क्षेण संयुजि ॥९॥
भक्तियुक्तस्ततो वाक्च पपाठ तन्मनुं मुदा[6]। शताब्दं व्याप्य वाग्विप्रो जजाप पूजयन् हरम् ॥१०॥
तत आविर्बभौ रुद्रश्चास्मिँल्लिङ्गे[7] सविग्रहः। श्रावणीपूर्णिमायां वै वरं दातुमुवाच ह ॥११॥

अध्याय – १२५

वीरानदी र वागीश्वरको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले रत्नसरोवरमा स्नान गरेर रत्नचूडेश्वर भगवान्को पूजा गरे। त्यसपछि उनको शरीर रत्नजस्तै कान्तिसम्पन्न भयो। फेरि विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ वागीश्वर लिङ्ग रहेको थियो, त्यसै रत्नदह रहेको पर्वतमा गए। माघकृष्ण औँसीका दिन वीरा नदीमा स्नान गरेर भक्तियुक्त चित्तले वागीश्वर भगवान्को पूजा गरे। हे अगस्त्य मुनि ! त्यसैको राति विरूपाक्षले जाग्राम बसेर शिवजीको पूजा गरिसकेपछि भक्तिपूर्वक त्यस तीर्थको माहात्म्य नेमुनिसित सोधे ॥१–४॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! हजुर मुक्ति र ज्ञानका दाता हुनुहुन्छ। म अहिले हजुरबाट वीरानदी र वागीश्वर शिवलिङ्गको माहात्म्य सुन्न चाहन्छु। अघि यहाँ कसले मुक्ति पायो ? हे प्रभु ! त्यो सबै मलाई बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि कुनै वाक् नाम भएका ऋषि थिए। तिनै ऋषिले पहाडबाट निस्कन लागेकी यी श्रेष्ठ नदीलाई देखे। वीरभावनाले उनले यस नदीमा स्नान गरे। वीरतरङ्ग भएकी यी नदीलाई भक्तिपूर्वक विधिवत् उनले पूजा गरे। त्यसैले यिनको नाम वीरानदी भयो। उनले श्रवण नक्षत्रले युक्त भएको श्रावणी पूर्णिमाको दिन यस लिङ्गलाई सभक्ति विधिपूर्वक यसै ठाउँमा स्थापना गरे। भक्तियुक्त भएर हर्षित हुँदै 'वाक्'नाम गरेका ब्राह्मणले सयवर्षसम्म स्तुति, पाठपूजा आदि गर्दै महादेवको मन्त्र जपे। त्यसपछि श्रावणपूर्णिमाको दिन शरीरै लिएर भगवान् शङ्कर प्रकट हुनुभयो र वर दिनका लागि भन्न लाग्नुभयो ॥७–११॥

---

१. रत्नचूडेश्वरं पूज्य, इति न.सं.पु.पाठः।
२. अस्मि भवति, इति न.सं.पु.पाठः।
३. अत्र चास्थापितो भक्त्या चैतल्लिङ्गं यथाविधि, इति न.सं.पु.पाठः।
४. तन्मनुं संपठन् मुदा, इति न.सं.पु.पाठः।
५. किंशुके, इति न.सं.पु.पाठः।
६. वीरावतरणीम्, इति न.सं.पु.पाठः।
७. रुद्रश्चैतल्लिङ्गे, इति न.सं.पु.पाठः।

रुद्र उवाच

भो भो वाग्मुनिशार्दूल स्थापितोऽहं त्वया यतः। तस्मादद्यादि ते नाम्ना लिङ्गमेतद् भविष्यति ॥१२॥
वदिष्यन्ति ततो लोका वागीश्वर इति शिवम्[८]। इमं देहं परित्यज्य मम लोकं गमिष्यसि ॥१३॥

नेमुनिरुवाच

इत्युक्त्वाऽन्तर्दधे रुद्रो वागृषये वरप्रदः। तदर्हणं समादाय पूर्णिमायां महानिशि ॥१४॥
ततो दशसमान्तेऽसौ पञ्चत्वं प्राप्तवान्मुनिः। हंसयानं समायातं कालेनाऽत्र विरूपदृक्[९] ॥१५॥
रुद्रयाने तमास्थाय निन्युः शिवपुरं गणाः। गीततालमृदङ्गानां नादैः कुसुमवर्षणैः ॥१६॥
स एव प्रमथश्रेष्ठोऽभवत्स वाङ्मुनीश्वरः। अद्यापि विचरन्नूनं रुद्रेण सह मोदते ॥१७॥
संस्नाय वीरनद्यां यो वागीश्वरं समर्चति। महापापैर्विनिर्मुक्तः शिवलोकं स गच्छति ॥१८॥
विरूपाक्ष ! सुसिद्धोऽसि निष्पापविग्रहो भवान्। भूयो गच्छ ह्यतो दूरे योजनार्द्धञ्च वारुणे ॥१९॥
दोलागिरिमहाशृङ्गे यत्र कीलेश्वरः शिवः[१०]।

वागीश्वरस्याऽऽर्य परं महत्त्वं[११] प्रोक्तं मया ते ह्यधुना द्विजैतत्।
भूयो हि वक्ष्यामि विरूपनेत्र ! चाऽन्यस्य तत्रैव शृणु प्रशंसाम् ॥२०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां वीरानदीवागीश्वरयोर्माहात्म्यं नाम पञ्चविंशत्यधिकशततमोऽध्यायः ॥१२५॥

भगवान् शङ्करले भन्नुभयो – हे वाक् नाम गरेका मुनिश्रेष्ठ ! तिमीले मेरो स्थापना गर्‍यौ। त्यसैले आजदेखि यो लिङ्ग तिम्रै नामबाट प्रसिद्ध हुनेछ। मानिसहरूले यस लिङ्गलाई वागीश्वर भन्नेछन्। यो शरीर त्याग गरेपछि तिमी मेरो लोकमा जानेछौ ॥१२ –१३॥

नेमुनिले भन्नुभयो– यति भनेर पूर्णिमाको मध्यरातमा ती ऋषिले गरेको पूजालाई ग्रहण गरी 'वाक्'नाम गरेका ऋषिलाई वर दिन आउनुभएका भगवान् शङ्कर अन्तर्धान हुनुभयो। हे विरूपाक्ष ! दश वर्षपछि कालगतिले ती ब्राह्मणको प्राण गयो। त्यहाँ तिनलाई 'हंस'नाम गरेको विमान आयो। शिवजीका गणले त्यसै यानमा तिनलाई राखेर गीत, ताल र मादल बजाउँदै फूलको वर्षा गरेर शिवजीको लोकमा लगे ॥१४–१६॥

तिनै ब्राह्मण शिवजीको अनुचर तथा प्रमथगणका मुख्य भएर रहेका छन्। आज पनि भगवान् शङ्करका साथ घुम्दै आनन्दसित बसेका छन्। वीरा नदीमा स्नान गरेर जुन मानिसले वागीश्वर भगवान्को पूजा गर्छ त्यो सबै पापबाट मुक्त भएर शिवलोकमा जान्छ। हे विरूपाक्ष ! तिमी सिद्ध भएका छौ। तिम्रो शरीर पापबाट मुक्त भएको छ। फेरि तिमी यहाँबाट दुई कोस पश्चिममा रहेको दोलागिरिको टाकुरामा जाऊ। त्यहाँ कीलेश्वर महादेव बस्नुभएको छ ॥१७–१९½॥

हे आर्य ! मैले तिमीलाई वागीश्वरको माहात्म्य अहिले बताएँ। अब त्यहाँका अरू लिङ्गहरूको पनि माहात्म्य म बताउँछु, सुन ॥२०॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा रत्नचूडेश्वरको माहात्म्यनामक
एकसय चौबीसौं अध्याय पूरा भयो।

---

८. श्रुतः, इति न.सं.पु.पाठः।
९. हंसयानेन चात्रैव कालवशाद्विरूपदृक्, इति न.सं.पु.पाठः।
१०. यत्रास्ते हि किलेश्वरः, इति न.सं.पु.पाठः।
११. माहात्म्यम्, इति न.सं.पु.पाठः।

षड्विंशत्युत्तरशततमोऽध्यायः

कीलेश्वरशिवलिङ्गमहिमा मुरदानववधश्च

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षः सार्द्धन्तेनर्षिणा मुने। तस्माद्वारुणदेशे च दोलाशिखरिशेखरे ॥१॥
यत्र विराजते रुद्रः सह तार्क्ष्येण विष्णुना। कीलेश्वरं महालिङ्गं योजनार्द्धे घटोद्भव ॥२॥
शङ्खह्रदे मुदा स्नात्वा विष्णुमपूपुजत्[1] हि सः। चैत्रसितद्वितीयायां भक्त्या पञ्चोपचारकैः ॥३॥
तपःसिततृतीयायां कीलेश्वरः समर्चितः। पप्रच्छ नेमुनिं रात्रौ तन्माहात्म्यं विरूपदृक् ॥४॥

विरूपाक्ष उवाच

एतल्लिङ्गस्य माहात्म्यं विष्णोश्च नेमुने तथा। श्रोतुमिच्छाम्यहं भूयो त्वन्मुखाद् वद मे हि तत् ॥५॥
कथमेतौ समुद्भूतौ लिङ्गविष्णू कदा मुने[2]। केन लब्धः पुरैताभ्यां वरश्चैव मुनीश्वर ॥६॥

नेमुनिरुवाच

एकार्णवे यदा भूमौ निःशेषे जङ्गमे द्विज। तदोद्भूतो महाशम्भुर्व्यादिदेश हि श्रीहरिम् ॥७॥
मत्पूर्वदिशि विष्णो त्वं तिष्ठ शैले निरन्तरम्। पूजयन्ति च लोकास्त्वां मद्वपुरिति हेतुतः ॥८॥
ततः प्रभृति चाऽऽस्ते वै विष्णुस्तार्क्ष्येण वै समम्। शृणु वच्मि पुरा जातमस्य ल्लिङ्गस्य दर्शनम् ॥९॥
आसीत्पूर्वयुगे दैत्यो मुरनामा स काश्यप। महाबलो भराटेशे येन तप्तं पुरा तपः ॥१०॥
सहस्राब्दं भृशं व्याप्य चाऽलभत ततो वरम्। सुप्रभानगरे राज्यञ्चकार दानवैः सह ॥११॥
लब्धवरोऽसुरः क्रोधी नवलिङ्गेश्वरात्पुनः। त्रैलोक्यमजयद्युद्धे देवान् विद्राव्य सत्वरम् ॥१२॥

अध्याय - १२६

कीलेश्वर शिवलिङ्गको महिमा र मुरदानवको वध

कुमार स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर त्यसभन्दा पश्चिमतिर रहेको दोलागिरिको शिखरमा जानुभयो। आधायोजन पर रहेको त्यस टाकुरामा गरुडका साथमा रहनुभएका भगवान् विष्णुका साथ कीलेश्वर महादेव बस्नुभएको छ। विरूपाक्षले शङ्खदहमा आनन्दसित स्नान गरेर चैत्रशुक्ल द्वितीयाका दिन भक्तिपूर्वक पञ्चोपचारविधिले विष्णुको पूजा गरे। माघशुक्ल तृतीयाका दिन विरूपाक्षले कीलेश्वर भगवान्को अर्चना गरे, राति त्यस लिङ्गको माहात्म्य नेमुनिसित सोधे ॥१-४॥

विरूपाक्षले भने - हे नेमुनि ! यो लिङ्ग र विष्णुको माहात्म्यको बारेमा म सुन्न चाहन्छु। हे नेमुनि ! यो लिङ्ग र विष्णुको उत्पत्ति कसरी भयो ? यिनीहरूबाट कसले के वर पायो ? मलाई फेरि त्यो सबै बताइदिनुहोस् ॥५-६॥

नेमुनिले भन्नुभयो - पृथ्वीमा समुद्रबाहेक केही नभएपछि सम्पूर्ण जङ्गम, प्राणीहरू र समुद्र निःशेष भएपछि अद्भुत अवतार लिएका महाशम्भुले विष्णुलाई भन्नुभयो। हे विष्णु ! तपाईं मभन्दा पूर्वपट्टि सधैँ बस्नुहोस्। मेरो शरीर हो भन्ने ठानेर दुनियाँले तपाईंको पनि पूजा गर्नेछन्। त्यस समयदेखि भगवान् विष्णु गरुडका साथ त्यहाँ बस्नुभएको छ। यस लिङ्गको उत्पत्तिका बारेमा अघि भएको घटना बताउँछु, सुन ॥७-९॥

अघि मुरनाम गरेको अत्यन्त बलवान् दैत्य थियो। काश्यप गोत्रमा जन्मिएको त्यस दैत्यले भराटेश्वरको ठूलो कठिन तपस्या गऱ्यो। हजार वर्षसम्म तपस्या गरेपछि उसले वर पायो। अनि सुप्रभा नाम गरेको शहरमा गएर दानवहरूका साथ त्यसले राज्य गऱ्यो। नयाँ लिङ्गका रूपमा प्रकट हुनुभएको भराटेश्वरको अनुग्रहले गर्दा वर पाएर रिसाहा त्यस दैत्यले देवताहरूसँग युद्ध गऱ्यो र उनीहरूलाई भगाएर तुरुन्त तीनै लोकमाथि विजय प्राप्त गऱ्यो ॥१०-१२॥

---

१. विष्णुमभ्यर्चितः, इति न.सं.पु.पाठः।
२. कथमेतत्मसुद्भूतं लिङ्गं विष्णुश्च नेमुने, इति न.सं.पु.पाठः।

अत्राययुः सुराः स्वर्गाद्विष्णोश्च शरणं द्विज । रक्ष रक्ष महाविष्णो तद्भयाच्छरणागताः ॥१३॥
मुरः कश्यपपुत्रोऽसौ चाऽत्राऽगमत्तदा पुनः । देवानन्वेषयन् स्वर्गाद्योद्धुं तैः सहसा समम् ॥१४॥
ददृशुः तं सुराश्चाऽत्र दैत्यसैन्यैः समावृतम् । अमर्षैः पूरितं भीमं प्रोद्यच्छस्त्रास्त्रयानगम् ॥१५॥
ततो भयातुरा देवा विष्णुञ्च तुष्टुवुस्तदा । रक्ष रक्षाऽद्य नो विष्णो शत्रुदानवपापतः ॥१६॥
श्रुत्वैतद्वचनं विष्णुर्देवानां कम्पितोदितम् । व्याजहार वचस्तेभ्यो मामेति भीयतां सुराः ॥१७॥
इत्युक्त्वा त्वरितं विष्णुस्तार्क्ष्यं समारुरोह सः । धनुः शार्ङ्गं[३] समादाय सशरञ्च सुदर्शनम् ॥१८॥
अस्माद्विनिर्ययौ शीघ्रं देवसैन्यैः समं द्विज । वाद्यञ्चक्रुः सुरास्तीव्रं भेरीशङ्खमृदङ्गकैः ॥१९॥
ददृशुर्दानवा देवान् विष्णुपुरोगतान्पुनः । प्रणेदुः सिंहनादञ्च नानावाद्यैः समं भृशम् ॥२०॥
ववृषुः शरवर्षाणि देवसैन्येषु दानवाः । अत्यरुन्धन् गिरिमभ्रं धारया श्रावणे यथा ॥२१॥
चिक्षिपुर्देवसैन्येषु शस्त्रास्त्राणि च दानवाः । खट्वाङ्गप्राशशूलानि चक्रपरिघमुद्गरान् ॥२२॥
देवाश्च स्नापयामासुः[४] शस्त्रास्त्रवर्षणान्भृशम् । उद्दिश्य दानवान्विप्र मेघधारेव मेदिनीम् ॥२३॥
अन्धीभूता दिशाश्चाऽत्र मिथः शस्त्रास्त्रयोजनात् । शस्त्रास्त्रपिञ्जरीभूताः संवर्त्तके यथा जगत् ॥२४॥
विरेजे गगनञ्चाऽत्र तत आयोधनेऽर्चिभिः । शस्त्रास्त्रघर्षणोद्भूतैः प्रलये जगतामिव ॥२५॥
अभून्नादस्तदा युद्धे देवासुरभयङ्करः । हस्तिनां वाजिनाञ्चैव नेमीनां ह्वेषितोद्भवः[५] ॥२६॥
हाहाकारोऽभवद् भूयो वीराणां वेपथूद्भवः । मिथोऽस्त्रास्त्रैः प्रहारेषु प्रहरञ्छस्त्रजार्चिभिः[६] ॥२७॥

स्वर्गबाट ती देवताहरू यहाँ आए, विष्णुको शरणमा परे । देवताहरूले हे महाविष्णु ! दैत्यको डरले हामी तपाईंको शरणमा आएका छौं, रक्षा गर्नुहोस् भने ॥१३॥ त्यो दैत्य कश्यपको छोरो थियो । ती देवताहरूसँग युद्ध गर्न भनेर उनीहरूलाई खोज्दै स्वर्गबाट राक्षसहरूका साथ अचानक त्यो त्यहाँ आइपुग्यो ॥१४॥ रीसले चूर भएको, विभिन्न शस्त्र–अस्त्र हातमा लिएर यानमा बसेको डरलाग्दो दैत्यलाई देवताहरूले दैत्यका फौजका साथमा देखे ॥१५॥ त्यसपछि डरले आत्तिएर देवताहरूले विष्णुको स्तुति गरे । हे विष्णु ! आज शत्रुरूप दानवरूपी पापबाट हाम्रो रक्षा गर्नुहोस्, रक्षा गर्नुहोस् ॥१६॥

जिउ कमाउन थालेका देवताहरूको यो भनाइ सुनेर विष्णुले देवताहरूलाई भन्नुभयो – हे देवता हो ! नडराओ, नडराओ ॥१७॥ यति भनेर बाण सहितको शार्ङ्ग धनु र सुदर्शन चक्र लिएर भगवान् विष्णु तुरुन्त गरुडमाथि सवार हुनुभयो ॥१८॥ त्यसपछि देवताहरूको सेना लिएर भगवान् विष्णु निस्कनुभयो । देवताहरूले शङ्ख, मादल र कर्णालको बाजा खूबसित बजाए ॥१९॥ विष्णुलाई अगाडि लगाएर आउन लागेका देवताहरूलाई दानवहरूले देखे । सिंहको जस्तो गर्जन गरे, विभिन्न किसिमका बाजाहरू खूब बजाए ॥२०॥

श्रावणमहिनामा मेघले पानी बर्साएर बाटो बन्द गरेझैं दानवहरूले देवताको सेनामाथि निकै नै बाणवर्षा गरेर बाटो रोके । देवताहरूको सेनामाथि दानवहरूले शस्त्र र अस्त्रको वर्षा गरे । त्यसैगरी खट्वाङ्ग, पाश, त्रिशूल, चक्र, घुएँत्रो र मुद्ग्रो बर्साए । देवताहरूले पनि ती दैत्यहरूलाई ताकेर आकाशबाट पृथ्वीमा पानी बर्सेझैं अनेक किसिमका शस्त्र र अस्त्र बर्साउन थाले ॥२१–२३॥

देवताहरूले पनि ती दानवलाई ताकेर आकाशबाट संवर्तक मेघले पृथ्वीमा पानी बर्साएजस्तै गरी अनेक किसिमका शस्त्र र अस्त्र बर्साउन थाले । दैत्यपक्ष र देवतापक्षका शस्त्र र अस्त्रको संघर्षले गर्दा आकाश नै प्रलयकालीन संसारजस्तै नदेखिने भयो । देवता र राक्षसको युद्धमा उनीहरूका बीच डरलाग्दो आवाज आयो । हात्ती, घोडा र रथबाट उत्पन्न भएको शब्द अत्यन्त भयङ्कर थियो । फेरि वीरहरूको कम्पनबाट उत्पन्न हाहाकार मच्चियो । वीरहरूले धारिला शस्त्रहरूद्वारा परस्पर हानाहान गरे ॥२४–२७॥

---

३. आसीत्पूर्वयुगे दैत्यो मुरनामा स काश्यप । महाबलो भराटेशे येन तप्तं पुरा तपः तीव्रं भराटेशे स काश्यपः ।
४. देवाश्चाप्यसृजन्भूयः, इति न.सं.पु.पाठः ।
५. अभून्नादं तदा युद्धे देवासुरभयङ्करम् । हस्तिनां वाजिनाञ्चैव नेमिनां ह्वेषितोद्भवम्, इति न.सं.पु.पाठः ।
६. हाहाकारमभूद् भूयो वीराणां वेपथूद्भवम्, इति न.सं.पु.पाठः ।

जघान दानवान्विष्णुश्चक्रेणैव सहस्रशः। वज्रेणैव तथा शक्रो जघ्नुर्दिक्पतयोऽपि तान् ॥२८॥
अधूनोदसुरान् वायुः[७] शस्त्रास्त्रपञ्जरक्षणात्। वेगेनापातयच्छैले कोटिदैत्यान् जघान च ॥२९॥
कुबेरो गदया दैत्यान् कोटिकोटिं जघान च। ईशानश्च तथा शक्रः कोटिकोटीन् तथा विधुः ॥३०॥
दहनः स्वार्चिभिर्दैत्यान् कालो दण्डाददण्डयत्[८]। नखायुधेन नैर्ऋत्यः सहस्रशो जघान च ॥३१॥
तार्क्ष्यो हि पक्षपातेन जघान तान् सहस्रशः। नखैश्च चञ्चुनाऽजस्रमुद्विदार्य्य कलेवरम् ॥३२॥
ससृजुरग्निवृष्टिन्ते दैत्यास्तार्क्ष्योपरि द्रुतम्। शिलावृष्टिं द्रुमान् भूयः पांसुवृष्टिमितस्ततः ॥३३॥
ततस्तार्क्ष्यो रुषाविष्टः प्रययौ त्वरितं द्विज। वाग्वती मिलिता यत्र सुन्दरीजलधारया[९] ॥३४॥
आदाय तज्जलं तार्क्ष्यो मुखेऽद्रिशेखरान्नखैः। अत्राऽऽगत्य द्रुतं तत्तद् ववर्ष दानवोपरि ॥३५॥
तच्छिलावर्षणाघातैः पेतुर्दैत्याः समन्ततः। पक्षघातैर्नखैस्तोयैरसह्यैश्चञ्चूदंशनैः[१०] ॥३६॥
ततो मुरो रुषाविष्टश्चाभिद्रुत्यामरान्पुरः। ससर्ज बाणवृष्टिञ्च सर्वदेवोपरि ध्रुवम् ॥३७॥
अप्रेषयन्मुरो दूतं कुम्भोदरञ्च विष्णवे। देवासुरसमक्षे स युद्धे च लोमहर्षणे ॥३८॥

मुर उवाच

भो कुम्भोदर ! गच्छाशु विष्णोस्त्वमन्तिकं खलु। यद्वक्तव्यं त्वया तस्मै तत्त्वं शृणु सुमन्त्रवित् ॥३९॥
यदिच्छसि सुखं विष्णो ! जीवितुमिह वै चिरम्। देवलोकैस्तथा सार्द्धं लक्ष्मीं प्रेषय मेऽन्तिकम् ॥४०॥
यदि नो प्रेषयेस्तां त्वं सावधानतया शृणु[११]। सान्वयं त्वां हनिष्यामि ततः प्राप्स्यामि तां ध्रुवम् ॥४१॥
योग्यं योग्येन वै ग्राह्यमयोग्ये शोभते न तत्। इत्युक्त्वा त्वरितं तस्मै कुम्भोदर ! समाव्रज ॥४२॥

विष्णुले हजारौं राक्षसहरूलाई चक्रद्वारा नै हत्या गर्नुभयो। इन्द्रले वज्रले प्रहार गरे। त्यस्तै अरू दिक्पालहरूले पनि आ–आफ्ना शस्त्रहरू प्रहार गरे। वायुले दैत्यहरूलाई शस्त्रास्त्रको साथै उडाएर माथि लगे। त्यहाँबाट वेगसित तल खस्दा पर्वतमा परेर करोडौं दैत्य मारिए। कुबेरले कराडौं दैत्यलाई मारे। त्यस्तै ईशान, इन्द्र र चन्द्रमाले पनि करोडौं करोड दैत्य मारे। अग्निले आफ्नो ज्वालाले दैत्यहरूमाथि प्रहार गरे। कालले लठ्ठीले हिर्काए। निर्ऋतिले आफ्ना नङ्ग्राले हजारौं दैत्यहरूको विनाश गरे ॥२८–३१॥

गरुडले हजारौं ती दैत्यलाई पखेटाले हाने, नङ्ग्राले उत्तिकै नाश गरे, चुच्चाले शरीरलाई छिया–छिया पारेर धेरै दैत्य सिध्याए। दैत्यले गरुडमाथि चारैतिरबाट अग्निको वर्षा गरे, शिला बर्साए, धूलो बर्साए र रुखहरू पनि वर्साए। त्यसपछि रीसले चूर हुँदै गरुड जहाँ वाग्मती नदी सुन्दरी नदीको धाराले युक्त भएर बगेकी थिइन्, त्यसै ठाउँमा दौडिएर गए। गरुडले वाग्मतीको जल पिए, नङ्ग्राले पहाडका शिखरहरू ल्याए र ती दैत्यहरूमाथि वर्षा गरे। शिलाको वर्षा, पखेटाको हिर्काइ, नङ्ग्राको झम्टाइ, चुच्चाको ठुँगाइ र जलवर्षाको पीडाले गर्दा दैत्यहरू असह्य भएर चारैतिर पछारिए ॥३२–३६॥

त्यसपछि बाण बर्साउन सिपालु 'मुर'नामक दैत्य सबै देवताहरूको सामु दौडिएर आयो र बाण बर्साउन थाल्यो। देवता र दैत्यहरूको बीचमा भएको डरलाग्दो युद्धमा मुरदैत्यले कुम्भोदर राक्षसलाई दूत बनाएर तुरुन्तै विष्णु भएको ठाउँमा पठायो ॥३७–३८॥

मुरदैत्यले भन्यो – हे कुम्भोदर ! तैं तुरुन्त विष्णुको नजिकै जा। तैं मन्त्रणा गर्न सिपालु छस्। त्यहाँ गएर तैंले विष्णुलाई जे भन्नुपर्छ त्यो कुरा सुन्। "हे विष्णु ! तिमी यदि सुखसित धेरै समयसम्म बाँच्न चाहन्छौ भने तिमीले स्वर्गका देवताहरू र लक्ष्मीलाई मेरो समीपमा पठाइदेऊ। यदि तुरुन्त लक्ष्मीलाई म भएको ठाउँमा पठाएनौ भने वंशसहित तिमीलाई मार्नेछु र लक्ष्मीलाई अवश्य आफ्नो हात लगाउनेछु। योग्यवस्तु योग्यलाई दिनुपर्छ, अयोग्यमा त्यो वस्तु सुहाउँदैन।" हे कुम्भोदर ! यति कुरा चाँडै विष्णुलाई भनेर यहाँ आउने काम गर् ॥३९–४२॥

---

७. प्राद्धूयतासुरान्वायुः, इति न.सं.पु.पाठः।
८. दण्डेन चाप्यति, इति न.सं.पु.पाठः।
९. सौन्दर्यङ्गतधारया, इति न.सं.पु.पाठः।
१०. चञ्चूदष्टैरसह्यतः, इति न.सं.पु.पाठः।
११. नोचेद्धि त्वरितं मूढ तां प्रेषणं ममान्तिके, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्यादेशं समादाय कुम्भोदरस्त्वरान्वितः। श्रीविष्णोश्चाऽन्तिकं गत्वा विष्णवे तदुवाच हि ॥४३॥

कुम्भोदर उवाच

विष्णो त्वदन्तिकञ्चाऽहं मुरेण प्रेषितोऽधुना। कार्यार्थन्तस्य दैत्यस्य सम्प्राप्तः सामदानयोः[१२] ॥४४॥

लक्ष्मीं प्रेषय तस्मै त्वं वधूत्वेन हि साम्प्रतम्। यावद्धतास्त्वया दैत्या स तदागांसि वै क्षमेत् ॥४५॥

नो चेच्छृणु यदुक्तं ते केशव ! तेन मां प्रति। सान्वयं त्वां ध्रुवं हत्वा लक्ष्मीं नेष्यामि मद्गृहम् ॥४६॥

नेमुनिरुवाच

इत्याकर्ण्य वचो विष्णुस्ताक्ष्र्यं समारुरोह च। शङ्खचक्रगदाचापानुद्यम्य प्रययौ युधि ॥४७॥

अर्बुदबाणवृष्टिञ्च मुरासुरोपरि ध्रुवम्। विष्णुश्चकार शश्वच्च शार्ङ्गस्य निनदै रुषा ॥४८॥

टङ्कारनिनदैर्बाणैः स्वर्णपुङ्खाभिधानकैः। रराज द्यौर्निशीवाऽऽर्य महासारैः क्षये यथा ॥४९॥

ततः पाशुपतास्त्रञ्च मुरश्चिक्षेप सत्वरम्। विष्णोरायुधमुद्दिश्य पशुपतिः पशूनिव ॥५०॥

चापचक्रगदाशङ्खाः[१३] पाशुपतप्रहारतः। विष्णोर्हस्तात्तदा विप्र ! चाऽपतन् भुवि सत्वरम् ॥५१॥

रुषाविष्टस्तदा विष्णुः सुदर्शनं समाददे। हन्तुमुद्यतवन्तञ्च भीमो यथा जगत्क्षये ॥५२॥

तं हन्तुमुद्यतं विष्णुं ददर्श पशुपेश्वरः। न्यषेधयत्तदा विष्णुं गिरा व्योमजयैव हि ॥५३॥

अशरीर उवाच

मा मा विष्णो ! प्रहन्तव्यो भवताऽयं मुरः कदा। देवासुरैरवध्यत्वमस्मै दत्तो वरो मया ॥५४॥

विशेषेण न हन्तव्यः पुम्भिर्विष्णो कदापि च। अस्य हन्त्री महादेवी चाऽस्ति मम प्रिया हरे ॥५५॥

नेमुनिले भन्नुभयो – यति आदेश लिएर कुम्भोदर तुरुन्त विष्णुको नजिकै गयो र त्यो सबै कुरा विष्णुलाई भन्न लाग्यो ॥४३॥

कुम्भोदरले भन्यो – मुरदैत्यले पहिले साम, दाम प्रयोग गर्ने दृष्टिकोणले मलाई आफ्नो कामका निमित्त यहाँ पठाएका हुँदा म तिमीकहाँ आएको छु। तिमी तुरुन्त लक्ष्मीलाई मुरदैत्यकी पत्नी तुल्याउनका लागि दैत्यकहाँ पठाऊ। त्यसो गर्‍यौ भने तिमीले जति पनि दैत्यहरूलाई मारेर जे जति अपराध गर्‍यौ, उहाँले सबै क्षमा गर्नुहुनेछ, होइन भने वंशसहित तिम्रो नाश गरेर लक्ष्मीलाई मेरो घरमा ल्याउँछु भनेर उहाँले मलाई भन्नुभएको छ ॥४४-४६॥

नेमुनिले भन्नुभयो – यो कुरा सुन्नेबित्तिकै भगवान् विष्णु शङ्ख, चक्र, गदा र धनुष उभ्याएर गरुडमाथि चढी युद्धका लागि प्रस्थान गर्नुभयो। एकाएक रीसले क्रुद्ध भएका विष्णुले शार्ङ्गनामक धनुको टङ्कार गर्दै सिंहजस्तै गर्जना गरी मुरदैत्यमाथि दशौं हजार बाण प्रहार गर्नुभयो। ठूलो आवाजका साथ स्वर्णपुङ्ख नाम गरेका बाणहरूको वर्षाले प्रलयकालको रातमा जस्तै आकाश सुशोभित देखियो। त्यसपछि भगवान् पशुपतिले अज्ञानी दैत्यपशुमाथि पाशुपतास्त्रले प्रहार गरेझैं मुरदैत्यले पनि विष्णुका शस्त्रलाई लक्ष्य गरेर पाशुपतास्त्र प्रहार गर्‍यो ॥४७-५०॥

हे विरूपाक्ष ! पाशुपतास्त्रको प्रहारले गर्दा शङ्ख, चक्र, गदा र धनुष विष्णुको हातबाट तुरुन्त भुइँमा खसे। रिसाएका विष्णुले प्रलयकालका रुद्रजस्तै डरलाग्दा भएर त्यस दैत्यलाई मार्नका लागि सुदर्शन चक्र समाल्नुभयो। त्यस दैत्यलाई मार्न विष्णु जाइलागेको देखेर महादेवले स्वयं विष्णुलाई आकाशवाणीद्वारा रोक्नुभयो ॥५१-५३॥

आकाशवाणीले भनिन् – हे विष्णु ! तपाईं यस मुरदैत्यलाई नमार्नुहोस्। मैले यसलाई देवता र राक्षसले मार्न सक्दैनन् भनेर वर दिएको छु। हे विष्णु ! खास गरेर पुरुषजातिले यसलाई कहिल्यै पनि मार्न सक्दैनन्। मेरी पत्नी महादेवीले मात्र यसलाई मार्नेछिन् ॥५४-५५॥

---

१२. सामदानस्य हि ततः, इति न.सं.पु.पाठः। १३. शङ्खचक्रगदाचापा, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्युक्त्वाऽन्तर्दधे रुद्रो विष्णुरत्राऽगमद् ध्रुवम्। मुरोऽप्याशवभिदुद्राव चैतत्पर्वतशेखरम् ॥५६॥
दोलाशैलं दृढं दोर्भ्यां समालिङ्ग्य मुरोऽसुरः। प्रान्दोलयद् भृशं विप्र पाटयितुं[१४] रुषाऽन्वितः ॥५७॥
शैलकम्पं हरिः प्रेक्ष्य सस्मार पशुपेश्वरम्। एतल्लिङ्गं समुद्भूतं तत्क्षणाद्विष्णुचिन्तने ॥५८॥
राधासितचतुर्दश्या महानिशि मुदा हरिः। पूजति स्म तदा लिङ्गमेतत्पञ्चोपचारकैः ॥५९॥
तत्पूजनात्तुतोषेशस्स्तम्भहेतुसमुद्भवः। व्याचष्ट वचनं शम्भुर्वरदानाय विष्णवे ॥६०॥

कीलेश्वर उवाच

एतद्गिरिं समुद्धर्त्तुं स्तम्भत्वेनोद्भवाम्यहम्। दृप्तो दानवराजश्च गिरिमुत्खातुमुद्यतः[१५] ॥६१॥
स्वशीर्षमसिना विष्णो प्रच्छेद्याराधयेश्वरीम्। हनिष्यति ततः सा तं जगद्रक्षय साम्प्रतम् ॥६२॥

नेमुनिरुवाच

विष्णुः सद्यः स्वखड्गेन चाऽच्छिनत् स्वशिरः द्रुतम्[१६]। मायया मोहितुं दैत्यं रणे मुरं तदा द्विज ॥६३॥
आराधयत्ततो देवीं जगद्रक्षकः केशवः। रुद्रवाक्यामृतं मत्वा नत्वा लिङ्गं हि शीर्षतः[१७] ॥६४॥
अत्रागत्य मुरोऽप्याशु चाऽदर्शद्विष्णुमव्ययम्। सद्यश्छिन्नञ्च मूर्द्धानमसृगुक्षितविग्रहम् ॥६५॥
तार्क्ष्योपरि स्थितं देवं शङ्खचक्रगदाब्जकम्। प्रोद्यतञ्च चतुर्हस्तैश्छिन्नशीर्षञ्जगद्विभुम् ॥६६॥
पुनर्हन्तुमियेषाऽसौ मुरस्तार्क्ष्यञ्च पत्त्रिभिः। उद्वहन्तञ्च पृष्ठेन छिन्नशीर्षं हरिन्ततः ॥६७॥

नेमुनिले भन्नुभयो – यति भनेर भगवान् शङ्कर अन्तर्धान हुनुभयो। भगवान् विष्णु शिव बसेको ठाउँमा जानुभयो। मुरदैत्य पनि दौडिएर यसै पर्वतको शिखरमा आयो। रिसाएको मुरदैत्यले दुई हातले त्यस दोलागिरिलाई अँगालो हालेर उखेल्नका लागि खूबसित हल्लायो। मुरदैत्यले पर्वत हल्लाएको देखेर विष्णुले भगवान् शङ्करको स्मरण गर्नुभयो। विष्णुले स्मरण गर्नासाथ यो कीलेश्वर नामक लिङ्ग तुरुन्त प्रादुर्भाव भयो। वैशाखशुक्ल चतुर्दशीका दिन आधारातमा विष्णुले प्रसन्न भएर पञ्चोपचारविधिले यस लिङ्गको पूजा गर्नुभयो। त्यस पूजाबाट भगवान् शङ्कर प्रसन्न हुनुभयो र स्तम्भबाट प्रकट भएर विष्णुलाई वरदान दिनका लागि भन्न लाग्नुभयो ॥५६–६०॥

कीलेश्वरले भन्नुभयो – अभिमानी त्यो दैत्य पर्वत उखेल्न कस्सिएको हुँदा पर्वतको उद्धार गर्न म खम्बा भएर पैदा भएको छु। हे विष्णु! तपाईंले आफ्नो शिरलाई तरवारले काटेर ईश्वरीको आराधना गर्नुहोस्। तिनै ईश्वरीले त्यस दैत्यलाई मार्नेछिन्। यसरी तपाईंले संसारको रक्षा गर्नुहोस् ॥६१–६२॥

नेमुनिले भन्नुभयो – विरूपाक्ष! महादेवको आज्ञा अनुसार दैत्यलाई मोहमा पार्न आफ्नो शिर छेदन गरेर त्यसै पर्वतको शिखरमा विष्णुले भगवतीको आराधना गर्नुभयो। त्यसपछि रुद्रवाक्यलाई अमृत सम्झिएर त्यहाँ रहेको शिवलिङ्गलाई शिरले नमस्कार गरी संसारका रक्षक भगवान् विष्णुले भगवतीको आराधना गर्नुभएको थियो। यहाँ आएर मुरदैत्यले पनि रक्ताम्य शरीर भएका र टाउको छिनेका अव्यय विष्णुलाई देख्यो। संसारका स्वामी भगवान् विष्णु गरुडमाथि बस्नुभएको थियो। शङ्ख, चक्र, गदा र कमल उहाँका हातमा थिए। उहाँका चारहात थिए, शिर काटिएको थियो। त्यसपछि मुरदैत्यले टाउको काटिएका विष्णुलाई पिठ्यूँमा बोकेर बसेको गरुडलाई बाण हानेर मार्ने विचार गऱ्यो ॥६३–६७॥

---

१४. उत्पाट्तिुम्, इति न.सं.पु.पाठः।
१५. दृप्तेनासुरराजेन उत्खातुमुद्यतो गिरिम्, इति न.सं.पु.पाठः।
१६. चाच्छिनच्छिरसं स्वकम्, इति न.सं.पु.पाठः।
१७. लिङ्गं मूर्ध्ना नमस्कृतः, इति न.सं.पु.पाठः।

एकादश्याञ्च शुक्लायां वरदेनाऽभिप्रेरिता[१८] । विनिर्ययौ महादेवी तदङ्गसम्भवा तदा ॥६८॥
चकार भस्मसाद्दैत्यं तृतीयेक्षणवह्निना । प्रोद्यद्ब्रह्मास्त्रमार्यायाः ज्वलत्क्रोधानलेन च[१९] ॥६९॥
भस्मीकृते मुरे दैत्ये देवी तत्र विराजते । मातृकाश्च पुनर्जघ्नुरवशेषांश्च दानवान् ॥७०॥
साधुसाध्विति कृत्वास्यैर्ववृषुः पुष्पसन्ततिम् । प्रापूजन्नृषयः सिद्धा जगुर्गन्धर्वकिन्नराः ॥७१॥
विष्णुस्तुष्टाव तां देवीं प्रणम्य द्वादशीदिने । सम्पूज्य विधिवद्भक्त्या बद्ध्वाऽञ्जलिं परिक्रमन् ॥७२॥
समुद्भूतं ततो लिङ्गं कीलेश्वरमिति श्रुतम्[२०] । तस्माद्दोलागिरिः प्रोक्तो मुरेण दोलितो यतः ॥७३॥

भूयश्च वक्ष्यामि विरूपनेत्र ! माहात्म्यमीशस्य पुनश्च विष्णोः ।
मुक्तो हि कश्चिन्मनुजो पुराऽऽर्य ! चाऽत्रैव सम्यग् शृणु सावधानम् ॥७४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां कीलेश्वरमाहात्म्ये मुरवधो नाम षड्विंशत्युत्तरशततमोऽध्यायः ॥१२६॥

शुक्ल एकादशीको दिन महादेवको वरदान पाएर विष्णुको त्यसै शरीरबाट महादेवी प्रकट हुनुभयो । भगवतीले रीसले आँखा चिम्लिएर ब्रह्मास्त्र उठाउँदै जाइलाग्ने दैत्यलाई त्यसै ठाउँमा भस्म गर्नुभयो । मुर दैत्यलाई भस्म गरेपछि भगवती त्यसै ठाउँमा बस्नुभयो । मातृकाहरूले बाँकी रहेका सबै दैत्यहरूलाई विनाश गर्नुभयो । भगवतीले राम्रो गर्नुभयो भनेर सिद्धहरूले फूलको वर्षा गरे र पूजा गरे, गन्धर्व र किन्नरहरूले गाना गाए ॥६८-७१॥

द्वादशीका दिन विष्णु खुसी हुनुभयो र ईश्वरीको प्रदक्षिणा गर्दै हात जोडेर नमस्कार गर्नुभयो । अनि पूजा गर्नुभयो । यसरी यो लिङ्ग प्रकट भएको हुँदा यसको नाम कीलेश्वर रह्यो । दैत्यले हल्लाएको हुँदा यस पर्वतको नाम दोलागिरि रहेको हो ॥७२-७३॥

हे विरूपाक्ष ! तिमीलाई महादेव र विष्णुको माहात्म्य अरू पनि बताउँछु । यसै ठाउँमा कुनै मानिस अघि मुक्त भएको थियो, हे विरूपाक्ष ! ध्यान दिएर राम्रोसित सुन ॥७४॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा कीलेश्वरको माहात्म्यमा मुरदैत्यको वधनामक एकसय छब्बीसौं अध्याय पूरा भयो ।

---

१८. वरदाद्यस्य प्रेरिता, इति न.सं.पु.पाठः । १९. क्रोधोन्मील्येक्षणार्चिषा, इति न.सं.पु.पाठः ।
२०. तस्मात्समुद्भवं लिङ्गं कीलेश्वर इति श्रुतः, इति न.सं.पु.पाठः ।

सप्तविंशत्युत्तरशततमोऽध्यायः

कीलेश्वरशिवलिङ्गस्याप्रतिमं महत्त्वम्

नेमुनिरुवाच

आसीत्कश्चिद् द्विजश्रेष्ठो विष्णुभद्र इति श्रुतः । मरुदेशे समुत्पन्नः सर्वशास्त्रविशारदः ॥१॥
विरक्तो निर्गतो देशाद् द्वारवत्यां जगाम सः । मनो दधे तनुं मोक्तुं सांख्ययोगेन तत्र वै ॥२॥
व्यादिदेश हरिस्तस्मै प्रसुप्ताय विरूपदृक् । मा मा द्विजात्र मोक्तव्यं त्वच्छरीरं कदाचन ॥३॥
गच्छ हिमालयस्याधस्तत्सानुशेखरे द्विज । दोलाद्रिनाम्नि कूटे वै तत्र वसाम्यहं चिरम् ॥४॥
मत्प्रदर्शनमात्रेण यः कश्चित्तत्र मानुषः । गच्छति मम लोकं वै योगं विना सविग्रहः ॥५॥
प्रातरुत्थाय विप्रोऽसौ द्वारवत्या विनिर्ययौ । मत्वा तथ्यं हरेर्वाक्यं विष्णुं प्रणम्य दण्डवत् ॥६॥
अत्रैव प्राप्तवान् विप्रो मुमुक्षुर्द्विज ! निर्जनः । शङ्खह्रदे मुदा स्नात्वा समारोहमिमं गिरिम्[1] ॥७॥
द्वादश्यां माघशुक्लायां तिथौ च बुधवासरे[2] । ददर्शासौ[3] द्विजो विष्णुं गरुडोपरि राजितम् ॥८॥
संपूज्य विधिवद् भक्त्या वन्यपुष्पैश्च तज्जलैः । नमो नारायणायेति ॐकारपूर्वकं पठन् ॥९॥
प्रजप्य तन्मनुं लक्षं परिक्रमन् ननाम सः । प्राणायामं महायोगं तदग्रे कृतवान्द्विजः ॥१०॥
लयमाप ततो[4] विप्रो विष्णौ ज्योतिर्मये परे । यथा दीपशिखायाञ्च प्रदीप इव वै द्विज ॥११॥
भूयः शृणु विरूपाक्ष ! चैतल्लिङ्गप्रशंसनम् । विमुक्तः किन्नरः कश्चित्कालान्तेऽस्य प्रसादतः ॥१२॥
आसीदश्वमुखो विप्र ! सुग्रीवो नाम विश्रुतः । सुगीतैर्विचरन् शैले चात्रैव प्राप्तवान्पुरा ॥१३॥

अध्याय - १२७

कीलेश्वर शिवलिङ्गको अनुपम महिमा

नेमुनिले भन्नुभयो – मरुदेशमा पैदा भएका, शास्त्र पढेका विष्णुभद्र नाम गरेका कुनै ब्राह्मण थिए ॥१॥ विरक्त भएर घरबाट निस्किएका ती ब्राह्मणले द्वारावतीमा गई साङ्ख्यद्वारा प्रतिपादित योगविधि अनुसार शरीरत्याग गरेर मुक्त हुने विचार गरे। हे विरूपाक्ष ! सुतेका ती ब्राह्मणलाई सपनामा विष्णुले भन्नुभयो – हे ब्राह्मण ! तिमीले यहाँ कदापि शरीरत्याग गर्नुहुँदैन ॥१–३॥

हिमालयभन्दा तल दोलाद्रि नाम गरेको पर्वतको थुम्को छ। त्यसै ठाउँमा धेरै अघिदेखि म बसिरहेको छु। हे ब्राह्मण ! तिमी त्यहाँ जाऊ। त्यहाँ गएर मेरो दर्शन मात्रै गर्ने मानिस योगसाधना नै नगरीकन शरीरैसित मेरो लोकमा जान पाउँछ। भगवान् विष्णुको बोलीलाई सत्य ठानेर उहाँलाई दण्डवत् प्रणाम गरी ती ब्राह्मण बिहान उठेर द्वारावतीबाट निक्लिए ॥४–६॥

मुक्तिको इच्छा गर्ने ती एक्ला ब्राह्मण पनि त्यसै ठाउँमा आइपुगे। शङ्खदहमा सहर्ष स्नान गरेर त्यस पर्वतमाथि चढे। माघशुक्ल द्वादशी बुधबारका दिन ती ब्राह्मणले गरुडमाथि बसेका भगवान्को दर्शन पाए। उनले वनका फलफूल र जल ल्याएर विधिपूर्वक सभक्ति ॐ नमो नारायणाय भन्दै विष्णुको पूजा गरे। विष्णुको मन्त्र एक लाख पटक जपे। परिक्रमा गरेर नमस्कार गरे र विष्णुकै अगाडि प्राणायाम तथा महायोग गरे ॥९–१०॥

हे विरूपाक्ष ! त्यसपछि बत्तीको ज्वालामा बत्ती विलीन भएजस्तै विष्णुको ज्योतिमा ती ब्राह्मण पनि विलीन भए। हे विरूपाक्ष ! यस लिङ्गको माहात्म्य फेरि सुन। त्यसको केही समयपछि यसै लिङ्गको अनुग्रहबाट कुनै किन्नर मुक्त भयो। घोडाको जस्तो मुख भएको सुग्रीव नाम गरेको किन्नर गीत गाउँदै, घुम्दै अघि यसै पर्वतमा आइपुगेको थियो ॥११–१३॥

---

१. गिरिमेनं समारुहत्, इति न.सं.पु.पाठः ।
२. बुधवारेण संयुते, इति न.सं.पु.पाठः ।
३. ददर्शैनम्, इति न.सं.पु.पाठः ।
४. अलीलयत्ततः, इति न.सं.पु.पाठः ।

आषाढ्यां पूर्णिमायां स चैतल्लिङ्गान्तिकं सरन्। सम्पूज्येशञ्च तद्रात्रौ रुद्रयशो मुदा जगौ[५] ॥१४॥
तद्गीतसुस्वरेणाशु चाशुतोषस्तुतोष हि। वरञ्च दत्तवाँस्तस्मै स्वसखित्वं विरूपदृक् ॥१५॥
वृषयुक्ते विमाने तमास्थाय प्रतिपद्दिने। निन्युः शिवपुरं व्योम्नः शिवदूताः परं हि ते ॥१६॥
सोऽप्यभूत्प्रमथश्रेष्ठो हयवक्त्रो हि किन्नरः। चरत्यद्यापि नूनं स[६] रुद्रपार्श्वे निरन्तम् ॥१७॥
आसीद् ब्रह्मपुरे विप्रः पातकैः पञ्चभिर्युतः। त्यक्तोऽन्वयैस्तथा लोकैर्ब्रह्मकर्मविवर्जितः ॥१८॥
म्लेच्छवृत्तिं समास्थाय म्लेच्छलोकैः सहाचरन्। म्लेच्छकन्यां विनोद्यार्य ! कञ्चित्कालं निनाय सः ॥१९॥
एकदा दिवसे विप्रश्चात्रैव प्राप्तवान्पुनः। मृगयार्थं समागत्य लिङ्गमेतद् ददर्श ह[७] ॥२०॥
नानापुष्पैः समायुक्तमन्यैश्चम्पकशाखिभिः। प्रेक्ष्य मनोहरं स्थानमचिन्तयत्तदा द्विजः ॥२१॥
क्व यास्यामि विहायैतत्स्थानञ्च परमं सुखम्। स्थास्याम्यहं सुखञ्चात्र फलमूलसुखान्विते[८] ॥२२॥
इति कृत्वाऽवसद्बुध्या म्लेच्छवृत्तिर्द्विजो द्विज। फलमूलाशनो नित्यं कञ्चित्कालं निनाय सः ॥२३॥
चम्पकैश्चान्यपुष्पैश्च नित्यं लिङ्गमपूपुजत्। प्रगायन् हस्ततालैश्च तद्यशांसि च नित्यशः ॥२४॥
कार्त्तिकस्य नवम्यां स शुक्लायाञ्च सुगीतवान्[९]। चरित्रं तन्महादेव्याः करतालैश्च भक्तितः ॥२५॥
तन्निशायां मृतः सोऽपि काले प्राप्ते विरूपदृक्। अत्राययुर्हरेर्दूता शिवदूतास्तथा पुनः ॥२६॥
युयुधुश्चात्र ते दूताः परस्परजयैषिणः। अस्माभिर्नीयते शैवं वैष्णवञ्चापि नीयते[१०] ॥२७॥

आषाढपूर्णिमाको दिन यसै लिङ्गको नजिकै आएर उसले भगवान् शङ्करको पूजा गऱ्यो। राति उहाँको भजन गऱ्यो। हे विरूपाक्ष ! उहाँको गीतको स्वरबाट भगवान् शङ्कर प्रसन्न हुनुभयो। उहाँले त्यस किन्नरलाई आफ्नो साथी हुने वर दिनुभयो। प्रतिपदाको दिन शिवजीका दूतहरूले साढेको चिह्नले युक्त भएको विमानमा त्यस किन्नरलाई राखेर आकाशमार्गबाट उत्तम शिवलोकमा लगे। घोडाको जस्तो मुख भएको त्यो प्रमथगणको नाइके बन्यो। आज पनि शिवजीको सधैँ पार्श्ववर्ती भएर त्यो किन्नर घुमिरहेको छ। ब्रह्मपुरमा पाँचै पापले युक्त भएका कुनै एउटा ब्राह्मण थिए। ब्राह्मणले गर्नुपर्ने कर्म नगरेको हुँदा उनलाई दाजुभाइ र समाजले त्यागिदिए। हे विरूपाक्ष ! ती ब्राह्मणले म्लेच्छका साथ सङ्गत गरे, म्लेच्छकै वृत्ति लिए, म्लेच्छकै छोरी विवाह गरेर केही समय बिताए ॥१४–१९॥

एकदित ती ब्राह्मण शिकार खेल्दै यसै ठाउँमा आइपुगे। उनले यस लिङ्गलाई देखे। त्यसपछि ती ब्राह्मणले चाँपका रुख र नानाथरी फूलहरूले युक्त भएको यस ठाउँलाई देखेर विचार गरे। हे विरूपाक्ष ! 'अत्यन्त सुखमय यस सुन्दर ठाउँलाई छाडेर कहाँ जाऊँ ! म फल, कन्दमूल र फूलले परिपूर्ण भएको यसै ठाउँमा आनन्दपूर्वक बस्नेछु' भन्ने विचार गरेर म्लेच्छको वृत्ति भएका ती ब्राह्मण त्यसै ठाउँमा बसे। सधैँ फल, कन्दमूल खाएर उनले केही समय बिताए। चाँप र अरू वृक्षका फूलहरूले लिङ्गको पूजा गरे। दिनदिनै हातको ताली बजाएर भगवान्‌को लीलाको गायन गरे। कार्तिकशुक्ल नवमीका दिन ताली बजाउँदै भक्तिपूर्वक उनले महादेवीको चरित्रको गान गरे ॥२०–२५॥

हे विरूपाक्ष ! त्यसै दिन राति काल आइसकेको हुँदा ती ब्राह्मणको मृत्यु भयो। त्यसपछि त्यहाँ भगवान् विष्णु र शिवजीका दूतहरू आए। 'यो शैव हो, हामी लान्छौँ' भनेर शिवका दूतहरूले भने। यो विष्णुभक्त हो, हामी लान्छौँ भनेर विष्णुका दूतहरूले भने। दुबैमा विजयको प्रतिस्पर्धा भयो। दुवै देवताका दूतहरूका बीचमा भयानक युद्ध भयो ॥२६–२७॥

---

५. रुद्रयशः प्रगीयत, इति न.सं.पु.पाठः।
६. अद्यापि व्यचरन्नूनम्, इति न.सं.पु.पाठः।
७. मृगयार्थमसौ चैनं लिङ्गञ्च प्रददर्श सः, इति न.सं.पु.पाठः।
८. फलमूलप्रसूनके, इति न.सं.पु.पाठः।
९. प्रगायते, इति न.सं.पु.पाठः।
१०. वैष्णवञ्च ब्रवत्ययम्, इति न.सं.पु.पाठः।

तत्क्षणादत्र योगिन्यः सिंहयानधरा द्विज । चतुःषष्टिगणाः शीघ्रमाययुश्च तदाज्ञया ॥२८॥
गर्हयन्त्यश्च तान्दूतौंस्तमास्थाय विमानके । देव्या लोकं मुदा निन्युर्योगिन्यो हर्षपूर्वकम्[११] ॥२९॥
हतश्रियो ययुः स्वर्गं श्वसन्तो मलिनाननाः । योगिनीमर्दितौजोभिः[१२] प्रभुभ्यां तन्निवेदितम् ॥३०॥
भूयः शृणु विरूपाक्ष ! माहात्म्यं गरुडस्य च । अष्टौ नागानृते तार्क्ष्यः सर्वसर्पान् भुनक्ति च ॥३१॥
भुजङ्गैः सह तार्क्ष्यस्य चासीद्वादो मिथः पुरा । प्राप्तो भङ्गस्तथा नागैस्तार्क्ष्यस्तानजयद्भृशम् ॥३२॥
तद्विरोधेन तार्क्ष्योऽसौ चाद्यापि तान्भुनक्ति हि । प्रावृट्काले गिरौ धृत्वा गुहारण्येषु मार्गयन् ॥३३॥
शङ्खपालेन[१३] तज्ज्ञात्वा चैतद्ध्रदे तपः कृतम् । तस्माच्छङ्खह्रदो ख्यातः सर्वह्रदोत्तमोत्तमः ॥३४॥
तत्र स्नात्वा भवेन्मर्त्यो नागभयविवर्जितः । श्रावणासितपञ्चम्यां निष्पापोऽसौ विशेषतः ॥३५॥
आरोहति गिरिञ्चैनं स्नात्वा तत्र नरो हि यः । षण्मासाभ्यर्जितैः पापैस्तस्यात्मा स प्रमुच्यते ॥३६॥
अध्युष्य[१४] चैकरात्रिञ्च शङ्करं वा हरिं तथा । यः पश्यति तदात्मा स वत्सरार्धैर्विमुच्यते[१५] ॥३७॥
आरुह्यैनं गिरिं भक्त्या चैतयोः पुरतः स्थितः । विनिद्रः प्रजपेन्मन्त्रं तथाऽस्य शृणु तत्फलम् ॥३८॥
अश्वमेधसहस्रेभ्यो वाजपेयसहस्रतः । व्रतोपवासपूजाभ्यो[१६] दानादिभ्यश्च यत्फलम् ॥३९॥
स तत्फलानि सम्प्राप्य प्राप्नुयात्[१७] खलु तत्पदम् । पूर्वजन्मार्जितैः पापैर्मुच्यते तत्क्षणाद्धि सः ॥४०॥

हे विरूपाक्ष ! यो दृश्य देखेर भगवान् शङ्करको आज्ञा अनुसार सिंहमा चढेर चौसट्ठी गणले युक्त भएका योगिनीहरू तुरुन्तै त्यहाँ आइपुगे । योगिनीहरूले ती दुबैथरी दूतहरूलाई गाली गरे र ती ब्राह्मणलाई विमानमा राखेर खुसी हुँदै सम्मानका साथ देवीको लोकमा लगे । मलिन मुख लिएर लामो सास फेर्दै ती देवगणहरू स्वर्ग गए । योगिनीबाट घमण्ड तोडिएका ती दूतहरूले अन्त्यमा स्वामीलाई भएको वृत्तान्त सुनाए ॥२८-३०॥

हे विरूपाक्ष ! अब गरुडको माहात्म्य सुन । उनी आठवटा नागलाई छोडेर सबै सर्पलाई खान्छन् ।अघि सर्प र गरुडको बीचमा ठूलो झगडा भयो । सर्पहरूले गरुडले भनेको मानेनन् र युद्धमा सर्पलाई गरुडले जिते । त्यसै झगडाले गर्दा गरुड आज पनि वर्षाको समयमा गुफा र जङ्गलहरूमा खोजी खोजी सर्पलाई समातेर खान्छन् । त्यो रहस्य थाहा पाएर शङ्खपाल नाम गरेका नागले त्यसै तलाउमा तपस्या गरे । त्यसै कारणले गर्दा सबै तलाउमध्ये उत्तम तलाउ भएको त्यस तलाउको नाम शङ्खह्रद रह्यो ॥३१-३४॥

विशेष गरी श्रावणशुक्ल पञ्चमीका दिन यस तलाउमा स्नान गर्ने मानिस पापबाट मुक्त हुन्छ । उसलाई सर्पबाट पनि कुनै डर हुँदैन । यस तलाउमा स्नान गरेर जो मानिस यो पहाड चढ्छ, त्यो मानिसको आत्मा छ महिना अघिदेखि गरेको सबै पापबाट मुक्त हुन्छ । जो व्यक्ति त्यस ठाउँमा एकरात बसी विष्णु अथवा महादेवको पूजापाठ गरेर दर्शन गर्दछ, त्यसका वर्षदिनसम्म गरेका पापहरू छुट्नेछन्, यसको आत्मा मुक्त हुनेछ ॥३५-३७॥

यस पर्वतमा चढेर भक्तिपूर्वक यी दुई देवताको अगाडि उभिएर जाग्राम बसी जसले मन्त्र जप्छ, त्यसको फल सुन । हजारौं अश्वमेध यज्ञ गर्दा जुन फल पाइन्छ, हजारौं वाजपेययज्ञ गर्दा जुन फल मिल्छ, भोकै बसेर व्रत,पूजा र अनेक प्रकारका दान एवं पुण्य कर्म गर्दा जुन फल प्राप्त हुन्छ, त्यो फल दुई देवताको अगाडि भक्तिपूर्वक उभिएर मन्त्र जप्दा प्राप्त हुन्छ । त्यस्तो साधकले भगवान्को पद पाउँछ र ऊ पूर्वजन्ममा गरेका सम्पूर्ण पापबाट तुरुन्तै मुक्त हुन्छ ॥३८-४०॥

---

११. बहु मोद्य च, इति न.सं.पु.पाठः ।
१२. योगिनीमर्दितौजस्ते, इति न.सं.पु.पाठः ।
१३. शङ्खपालोऽपि, इति न.सं.पु.पाठः ।
१४. प्रोषित्वा, इति न.सं.पु.पाठः ।
१५. चाब्दजार्धैर्विमुच्यते, इति न.सं.पु.पाठः ।
१६. व्रतोपोष्यार्चनाच्चैव दानाच्चैव, इति न.सं.पु.पाठः ।
१७. प्रलभेत, इति न.सं.पु.पाठः ।

दिश्यग्नेश्च ह्यतो गच्छ यत्राऽऽस्ते वाल्मीकीश्वरः । वीरभद्राख्यतीर्थाच्च योजनार्द्धस्थल[१८] द्विज ॥४१॥
वीरभद्रामहातीर्थे स्नात्वेश्वरं प्रपूजय । हनूमांश्तत्र नित्यं वै चाऽध्यास्ते हि विरूपदृक् ॥४२॥
एतद्धि तुभ्यं कथितं महत्त्वं[१९] कीलेशनारायणशैलजानाम्[२०] ।
भूयो हि वक्ष्यामि विरूपनेत्र चान्यस्य तत्रैव शृणु प्रशंसाम् ॥४३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां कीलेश्वरमाहात्म्यं नाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥१२७॥

हे विरूपाक्ष ! यहाँबाट दुई कोस पर आग्नेय दिशामा वीरभद्रा नाम गरेको तीर्थमा वाल्मीकीश्वर भगवान् रहनुभएको छ, त्यहाँ जाऊ। वीरभद्र महातीर्थमा स्नान गरेर शङ्कर भगवान्को पूजा गर। हे विरूपाक्ष ! त्यहाँ हनुमान् सधैं बस्नुहुन्छ ॥४१-४२॥

हे विरूपाक्ष ! मैले तिमीलाई विष्णु, देवी र कीलेश्वर महादेवको यो माहात्म्य बताएँ। अरू माहात्म्य फेरि म बताउँनेछु, त्यसै ठाउँमा सुनौला ॥४३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा कीलेश्वरमाहात्म्यको वैशिष्ट्यनामक एकसय सत्ताइसौं अध्याय पूरा भयो।

---

१८. माहात्म्यम्, इति न.सं.पु.पाठः।
१९. विष्णोश्च देव्याश्च कीलेश्वरस्य, इति न.सं.पु.पाठः।
२०. योजनार्द्धे समं द्विज, इति न.सं.पु.पाठः।

अष्टाविंशत्युत्तरशततमोऽध्यायः

वीरभद्रतीर्थवाल्मीकेश्वरयोर्महिमा

स्कन्द उवाच

भूयोऽव्रजद्विरूपाक्षो मुनिना तेन वै समम्। समं हनुमता यत्र वाल्मीकीशो विराजते[1] ॥१॥
वीरभद्रे महातीर्थे भक्त्या सस्नौ विरूपदृक्। वाल्मीकीश्वरमार्द्रेण चेतसाऽपूपुजन्मुने ॥२॥
चैत्रशुक्लतृतीयायास्तन्निशायाञ्च विरूपदृक्। लिङ्गं सम्पूज्य[2] माहात्म्यमपृच्छद् भक्तितो मुनिम् ॥३॥

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल भूयोभूयोऽधुना विभो। भवतः स्प्रष्कामोऽहं माहात्म्यमेतयोर्वरम् ॥४॥
वाल्मीकिना कथं पूर्वमसौ संस्थापितः शिवः[3]। वीरभद्रमहातीर्थं प्रोक्तं मे भवता कथम् ॥५॥

नेमुनिरुवाच

भद्राचलमहारण्याद्वकाश्रमसमीपतः। एका नदी समुद्भूता या च भद्रेति विश्रुता ॥६॥
वीरा नदी मया प्रोक्ता वीरकामफलप्रदा। तयोश्च सङ्गमे सस्नौ वीरभद्रो हराङ्गजः ॥७॥
तस्माल्लोके विरूपाक्ष ! तीर्थमेतद्धि सन्ततम्। वीरभद्रमिति ख्यातं शततीर्थफलप्रदम् ॥८॥
वाल्मीकिश्च[4] पुरा सस्नौ त्यक्त्वा कालीमिहागतः। तीर्थयात्राक्रमे चैतल्लिङ्गं स्थापितवान्मुदा ॥९॥
अत्राऽवतरति स्पष्टं[5] हनुमान् सर्वपर्वसु। संस्नाति विधिना सोऽपि चैतत्तीर्थे विरूपदृक् ॥१०॥
स्नात्वा च विधिना सोऽपि चैतल्लिङ्गं समर्चति। रामायणे प्रसिद्धैषा कथा लिङ्गकृपामयी[6] ॥११॥

अध्याय – १२८

वीरभद्रतीर्थ वाल्मीकीश्वरको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष फेरि नेमुनिलाई साथमा लिएर जहाँ वाल्मीकेश्वर भगवान् हनुमान्का साथ रहनुभएको थियो, त्यसै ठाउँमा गए। हे अगस्त्य मुनि ! विरूपाक्षले वीरभद्र नाम गरेको महातीर्थमा भक्तिपूर्वक स्नान गरे। त्यसपछि भावुक चित्तले वाल्मीकेश्वर भगवान्को पूजा गरे। चैत्रशुक्ल तृतीयाका दिन राति विरूपाक्षले शिवलिङ्गको भक्तिपूर्वक पूजा गरेर नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे ॥१–३॥

विरूपाक्षले भने – हे मुनिश्रेष्ठ ! हजुरलाई मेरो बारम्बार नमस्कार छ। कसरी वाल्मीकि ऋषिले पहिले यहाँ शिवलिङ्गको स्थापना गर्नुभयो ? वीरभद्र महातीर्थ भनेर हजुरले मलाई बताउनुभयो, त्यो कसरी भयो ? म अब हजुरसित यी लिङ्ग र तीर्थको बारेमा सोध्न चाहन्छु ॥४–५॥

नेमुनिले भन्नुभयो – भद्राचल नाम गरेको वकाश्रम नजिकै रहेको जङ्गलबाट भद्रा नाम गरेकी नदी प्रादुर्भाव भइन्। वीरहरूका कामना पूर्ण गर्ने हुँदा वीरा नाम गरेकी अर्की नदी त्यहाँ पैदा भइन्। ती दुईको सङ्गममा शिवजीको अङ्गबाट उत्पन्न हुनुभएका वीरभद्रले स्नान गर्नुभयो। हे विरूपाक्ष ! त्यसैले यस तीर्थलाई मानिसहरूले वीरभद्र भनेर भने। यो तीर्थ सय तीर्थभन्दा बढी फल दिने खालको छ। अघि वाल्मीकिले काली नदीबाट आरम्भ गरी तीर्थहरू घुम्दै यसै ठाउँमा आएर स्नान गरेका थिए। उनले प्रसन्न भएर यस लिङ्गको स्थापना गरे। हे विरूपाक्ष ! यस तीर्थमा सबै पर्वमा हनुमान् ओर्लनुहुन्छ। उहाँले यसै तीर्थमा विधिपूर्वक स्नान गर्नुहुन्छ। यस तीर्थमा स्नान गरेर उहाँले विधिपूर्वक शिवलिङ्गको पूजा गर्नुहुन्छ। यसै लिङ्गको पूजाका प्रभावले हनुमान्लाई गौरवमय स्थान मिलेको कथा रामायणमा प्रसिद्ध छ ॥६–११॥

---

१. वाल्मीकीश्वरो हि यत्रास्ते हनुमाता समं तदा, इति न.सं.पु.पाठः।
२. पूज्य, इति न.सं.पु.पाठः।
३. वाल्मीकेन कथं पूर्वमेतद्धि स्थापितं शिवः, इति न.सं.पु.पाठः।
४. वाल्मीकोऽत्र, इति न.सं.पु.पाठः।
५. अत्रावतरते नूनम्, इति न.सं.पु.पाठः।
६. रामायण वरोन्मत्तः चैतल्लिङ्गप्रसादतः, इति न.सं.पु.पाठः।

श‍ृणु विप्र ! प्रवक्ष्यामि कश्चिन्मुक्तो जनः पुरा। एतत्तीर्थप्रसादात्स चैतल्लिङ्गविशेषतः ॥१२॥
म्लेच्छपत्नी पुरा चाऽऽसीद्दुर्मुखी नाम विश्रुता। पूर्वजन्मविपाकेन बहुपुत्रवती हि सा ॥१३॥
सिंहाद्रिशेखरे रम्ये फलमूलाशनावसत्। तत्र सा सुषुवे प्रेक्ष्य दुःखातुराऽभवत् शिशुम् ॥१४॥
आदाय तं सुतं रात्रौ दुर्मुखी सा शनैः शनैः। तदधः कानने भीमे क्षिप्त्वा समागमद् द्रुतम् ॥१५॥
कश्चित् तत्राऽऽययौ म्लेच्छः मृगयायै भ्रमन् दिने[७]। ददर्श बालकं विप्र ! घनारण्ये च भीषणे ॥१६॥
स्तन्यार्थिनं रुदन्तं तं क्षिपन्तं हस्तपद्युगम्। प्रेक्ष्य तस्थौ तदा म्लेच्छः साश्चर्यं निर्जने वने[८] ॥१७॥
कस्यायं बालकश्चेति क्षिप्तश्चाऽत्र कयापि वा। अस्मिन्वने वदन् म्लेच्छस्तस्थौ चित्रेण चेतसा ॥१८॥
कस्यायं बालकः पुत्रः क्षिप्तो भवतु कानने। निष्पुत्रोऽहं प्रगृह्येमं पत्न्यै ददामि रक्षितुम्[९] ॥१९॥
इत्युक्त्वाऽसौ तदा विप्र ! तमादायाऽऽशु बालकम्। स्वगृहं प्रययौ शीघ्रं निःस्वो लब्धधनो यथा ॥२०॥
अर्पयित्वा[१०] मुदा म्लेच्छः पत्न्यै तं बालकं द्विज। सम्पालय प्रिये चैनं पुत्रत्वेनेत्युवाच सः[११] ॥२१॥
रक्षति स्म शिला सा तं पुत्रत्वेन निरन्तरम्। कृत्वेति स्वात्मजं बन्ध्या सुपदार्थैर्ह्यपालयत् ॥२२॥
यावद् द्वादशवर्षान्तं पुत्रवत्प्रत्यपालयत्। तदन्ते शक्तिमान् सोऽपि[१२] व्यचरन् मृगयावनम् ॥२३॥
कालान्ते कतिचित्सोऽपि मृगयार्थं वनङ्गतः। अत्रैव प्राप्तवान् विप्र ! हनूमन्तं व्यलोकयत्[१३] ॥२४॥
हनुमद्दर्शनान्म्लेच्छो ज्ञानवानभवत्तदा। प्रणनाम हनूमन्तमेतल्लिङ्गप्रपूजकम् ॥२५॥

हे विरूपाक्ष ! यस ठाउँमा अघि यसै तीर्थ र लिङ्गविशेषको अनुग्रहबाट कुनै व्यक्ति मुक्त भएको थियो, बताउँछु, सुन। दुर्मुखी नाम गरेकी म्लेच्छकी पत्नी थिई। उसले पूर्वजन्ममा गरेका कर्मले गर्दा धेरै सन्तान पैदा गरी। त्यो दुर्मुखी सिंहाद्रि नाम गरेको पर्वतको टाकुरामा फल तथा कन्दमूल खाएर बस्दथी। त्यसले त्यसै ठाउँमा छोरो पाई। छोरालाई देखेर ऊ दुःखित भई। राति त्यस छोरालाई लिएर बिस्तारै बिस्तारै आफैँ त्यो म्लेच्छपत्नी सिंहाद्रिपर्वतभन्दा तल रहेको डरलाग्दो जङ्गलमा गई र छोरालाई त्यहीँ फ्याँकेर तुरुन्तै फर्किई ॥११-१५॥

हे विरूपाक्ष ! त्यसै दिन कुनै म्लेच्छ शिकार खेल्दै त्यहाँ आयो। उसले डरलाग्दो बाक्लो जङ्गलमा बालकलाई देख्यो। भोकले दूध पिउन खोजेर हातखुट्टा फ्याँकिरहेको बालकलाई देखेर उसले मनमा आश्चर्य मान्यो र केहीबेर उभिएर हेरिरह्यो। 'यो कसको बालक होला ? कुन आमाले यस जङ्गलमा ल्याएर यस बालकलाई फ्याँकेकी होली ?' भन्दै त्यो म्लेच्छ आश्चर्यचकित भएर उभिइरह्यो सोच्यो- 'कसको छोरो यो बालक जङ्गलमा फालिएको होला ! मेरा छोरा छैनन्, यसलाई लगेर पालनपोषण गर्न पत्नीलाई दिन्छु' ॥१६-१९॥

हे विरूपाक्ष ! यति विचार गरेर सम्पत्ति नभएको मानिसले सम्पत्ति पाएझैँ सन्तान नभएको त्यस म्लेच्छले त्यस बालकलाई लिएर आफ्नो घर गयो। म्लेच्छले त्यो बालकलाई लगेर 'हे प्रिया ! छोराका रूपमा यसको पालनपोषण गर' भन्दै प्रसन्न भएर आफ्नी पत्नीलाई दियो। म्लेच्छकी शिला नाम गरेकी बाँझी पत्नीले पनि छोराका रूपमा स्वीकार गरी त्यसलाई मीठा-मीठा खाद्यपदार्थहरू दिएर आफ्नै छोरालाई जस्तै हरबखत उसको स्याहार-सुसार गरेर हुर्काई। बाह्र वर्ष नपुगेसम्म उसले त्यस बालकलाई पुत्रवत् स्नेहले पाली। त्यसपछि त्यो बालक पनि समर्थ बन्यो र शिकार खेल्न जङ्गलमा घुम्न थाल्यो। केही समयपछि शिलाको पालित पुत्र पनि शिकारका क्रममा जङ्गल घुम्दै यसै ठाउँमा आइपुग्यो र उसले हनुमान्लाई देख्यो। हे विरूपाक्ष ! हनुमान्लाई देख्नासाथ त्यतिखेर नै त्यो ज्ञानी भयो। उसले वाल्मीकीश्वरलिङ्गको पूजा गर्न लागेका हनुमान्लाई प्रणाम गर्‍यो ॥२०-२५॥

---

७. तत्राययौ तदा कश्चित्म्लेच्छो हि मृगयादृतः, इति न.सं.पु.पाठः।
८. म्लेच्छश्चैवमेवाद्भुतेन तम्, इति न.सं.पु.पाठः।
९. पालितुम्, इति न.सं.पु.पाठः।
१०. समर्पितः, इति न.सं.पु.पाठः।
११. पुत्रत्वेनेति संवदत्, इति न.सं.पु.पाठः।
१२. तदन्ते सोऽपि सामर्थ्यम्, इति न.सं.पु.पाठः।
१३. ददर्श सः, इति न.सं.पु.पाठः।

सोऽपि सस्नौ मुदा तीर्थे वीरभद्रे कपीशवत् । कूपाच्च जलमादायाऽस्नापयद् वाल्मीकीश्वरम्[१४] ॥२६॥
स्नपनेन धिया भक्त्या भविष्यामि नृपोत्तमः । आनर्च लिङ्गमेतत्स राजत्वप्राप्तिकाङ्क्षया[१५] ॥२७॥
स्वगृहमगमन्म्लेच्छो हनूमद्दर्शनादिकम् । स्वजनेभ्यो हि तत्सर्वमवर्णयद्यथाद्भुतम् ॥२८॥
कालान्तरे क्वचिन्म्लेच्छः स पञ्चत्वमवाप्तवान्[१६] । विश्वकेतुर्नृपो भूत्वा मध्यदेशं हि भुक्तवान् ॥२९॥
भुनक्ति स्म सुखं राज्यं पुत्रपौत्रसमन्वितः । सार्वभौमश्चिरं कालं विश्वकेतुर्विरूपदृक् ॥३०॥
पूर्वजन्मनि जन्तूनां हिंसादूषणतः पुनः । अभूल्लोकविरुद्धोऽसौ प्रजादण्डेन लोभतः ॥३१॥
तत्र पुराऽकरोद्युद्धमन्यैर्नृपैररातिभिः । लोकविरोधतः सोऽपि महत्कष्टं तदाप्तवान् ॥३२॥
आक्रान्ते शत्रुभिः राज्ये पुत्रपौत्रान्वये हते । पूर्वजन्मविपाकेन चाऽभवत्क्षुब्धमानसः ॥३३॥
त्यक्त्वा प्रियां प्रियं सर्वं विरक्तमानसो नृपः । धिगिति जीवितं कृत्वा तीर्थाटनं तदाऽकरोत् ॥३४॥
विरक्तानां मुखाच्छ्रुत्वा हिमवद्गह्वरं ययौ । तीर्थेषु निर्जनः स्नात्वा स्थानेऽस्मिन्[१७] प्राप्तवान्पुनः ॥३५॥
पूर्वजन्मनि संस्नानात्सस्नौ चाऽत्रैव निर्जनः । पुराकृतञ्च सस्मार शुभाशुभं विरक्तवान् ॥३६॥
वाल्मीकीश्वरमार्द्रेण चेतसा सोऽपि सन्ततम् । श्रद्धया पूजयामास[१८] व्याप्य द्वादशवत्सरम् ॥३७॥
पौषे स पूर्णिमायाञ्च लेभे पञ्चत्वमातुरः[१९] । अनशनव्रतं कृत्वा देवमाराध्य तन्निशि[२०] ॥३८॥
तमास्थाय हि तद्याने निन्युः शिवपुरं गणाः । पुष्पवर्षैश्च तद्वाद्यैः रुद्रकन्याभिरावृतम् ॥३९॥
स एवाभूद् गणश्रेष्ठो रुद्रस्याऽनुचरोऽनिशम् । विश्वकेतुर्विरूपाक्ष चाऽद्यापि रुद्रवत्सुखी ॥४०॥

उसले पनि हनुमान्ले जस्तै खुसी भएर त्यस तीर्थमा स्नान गऱ्यो। कुवाबाट ठोक्रामा पानी ल्याएर वाल्मीकीश्वर शिवलिङ्गलाई स्नान गरायो । आफू उत्तम राजा हुने इच्छा मनमा राखेर उसले भक्तिका साथ शिवलिङ्गलाई स्नान गराई सो शिवलिङ्गको पूजा गऱ्यो। त्यसपछि त्यो म्लेच्छ आफ्नो घर गयो। उसले हनुमान्को दर्शनदेखि लिएर भएको सबै अद्भुत घटना आफ्ना मानिसहरूलाई बतायो । त्यसको केही समयपछि त्यो मऱ्यो । त्यसपछि अर्को जन्ममा विश्वकेतु नामको राजा भएर त्यसले मध्यदेशको भोग गऱ्यो। हे विरूपाक्ष ! केही समयसम्म त्यसले छोरा, नाति र परिवारका साथ सुखपूर्वक राज्यको भोग गऱ्यो। धेरै समयसम्म त्यो चक्रवर्ती पनि भयो ॥२६–३०॥

पूर्वजन्ममा धेरै जन्तुहरूलाई मारेको पाप र लोभले प्रजाहरूलाई धेरै दण्ड दिएको हुँदा नरनारीहरू यसका विरोधी बने । त्यहाँ अरू शत्रु राजाहरूसित यसको लडाईं पऱ्यो । जनतासित विरोध भएकाले यसले ठूलो कष्ट पायो । शत्रुले राज्यमाथि आक्रमण गरे । आक्रमणमा परी उसका छोरा, नाति, पनाति र सबै वंशज समाप्त भए । पूर्वजन्मको कर्मको संस्कारले गर्दा त्यो अत्यन्त क्षुब्ध बन्यो र उसले पत्नी र आफ्नो सर्वश्व त्यागिदियो। विरक्त भएर यस जिन्दगीलाई धिक्कार छ भन्दै ऊ तीर्थहरूको भ्रमण गर्न लाग्यो ॥३१–३४॥

वैरागीहरूको मुखबाट वैराग्यजनक उपदेश सुनेर ऊ हिमालयको गुफामा गयो । त्यहाँका तीर्थहरूमा स्नान गरेर ऊ एक्लै फेरि यहाँ आएको थियो। पूर्वजन्ममा यहाँ स्नान गरेको हुँदा एक्लै आएको त्यस म्लेच्छले त्यसै ठाउँमा पुनः स्नान गऱ्यो। अनि उसले पूर्वजन्ममा गरेका राम्रा र नराम्रा सबैथरी कामहरू सम्झियो। त्यसले भावुक हृदयले बाह्र वर्षसम्म भक्तिपूर्वक वाल्मीकीश्वर भगवान्को निरन्तर उपासना गऱ्यो। पुष महिनाको पूर्णिमाको दिन राति केही नखाई लिङ्गको पूजा गरेर त्यस वैरागीले प्राण छोड्यो। शिवजीका गणहरूले त्यसलाई यानमा राखेर फूलको वर्षा गरेर बाजा बजाउँदै रुद्रकन्याद्वारा सुहाएको शिवलोकमा लगे। हे विरूपाक्ष ! त्यही विश्वकेतु प्रमथ आदि गणमा मुख्य भएर भगवान् शङ्करको सेवक बनेको छ। आज पनि रुद्रजस्तै सुखी भएर रहेको छ ॥३५–४०॥

---

१४. तुणेन जलमादाय स्नापयद्वल्मीकं तदा, इति न.सं.पु.पाठः ।
१५. राजत्वकांक्षयेति वै, इति न.सं.पु.पाठः ।
१६. कालान्ते च ततः कश्चित् पञ्चत्वमलभद्धि सः, इति न.सं.पु.पाठः ।
१७. अत्रासौ, इति न.सं.पु.पाठः ।
१८. चक्रे उपासकं भक्त्या, इति न.सं.पु.पाठः ।
१९. पञ्चत्वमलभत्तदा, इति न.सं.पु.पाठः ।
२०. भूत्वा विनाशाने रोगी चैनं पूज्य महानिशि, इति न.सं.पु.पाठः ।

एतत्तीर्थे च यः स्नात्वा चैनमुपासते द्विज। इच्छासिद्धिं च सम्प्राप्य[२१] रुद्रलोकं स गच्छति ॥४१॥
भूयो गच्छ विरूपाक्ष चाऽतो वारुणकानने। धनुषां द्विशते दूरे यत्राऽऽस्ते मङ्गलेश्वरः ॥४२॥
प्रोक्तं मया ते प्रवरं महत्त्व[२२] तीर्थस्य चैतस्य विशेषतो वै।
लिङ्गस्य श्रद्धामयचेतसा च[२३] भूयः प्रवक्ष्यामि च ते तदन्यम् ॥४३॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
वीरभद्रतीर्थवाल्मीकीश्वरयोर्माहात्म्यं नाम अष्टाविंशत्युत्तरशततमोऽध्यायः ॥१२८॥

जसले यस तीर्थमा स्नान गरेर यस लिङ्गको उपासना गर्छ त्यो आफ्नो इच्छा अनुसारको फल प्राप्त गरेर रुद्रलोक जान्छ। हे विरूपाक्ष ! फेरि यहाँबाट पश्चिमतिर दुईसय धनुष प्रमाणबराब टाढा रहेको जङ्गलमा जाऊ। त्यस ठाउँमा मङ्गलेश्वर भगवान् रहनुभएको छ ॥४१–४२॥

मैले तिमीलाई यस उत्कृष्ट तीर्थको माहात्म्य विशेष गरेर बताएँ। लिङ्गको माहात्म्य पनि बताएँ। फेरि अरू पनि बताउनेछु ॥४३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा वीरभद्रतीर्थ र वाल्मीकीश्वरको माहात्म्यनामक
एकसय अट्ठाइसौं अध्याय पूरा भयो।

---

२१. मसमालभ्य, इति न.सं.पु.पाठः ॥ २२. माहात्म्यम्, इति न.सं.पु.पाठः।
२३. लिङ्गस्य हार्द्रेण हि चेतसा त्वम्, इति न.सं.पु.पाठः।

ऊनत्रिंशत्तमोऽध्यायः

भद्रतीर्थमङ्गलेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो यत्रास्ते मङ्गलेश्वरः । भद्रानद्यां मुदा स्नात्वा स ईश्वरसमर्चकः ॥१॥
चैत्रस्य शुक्लपञ्चम्यां विनिद्रो निशि पूजकः । पप्रच्छ तन्माहात्म्यं तं विरूपाक्षो महामुनिम् ॥२॥
आकर्ण्य तद्वचोऽगस्त्य ! भक्तोक्तं नेमुनिर्निशि । अवर्णयन् महिमानं[1] विरूपाक्षाय साम्प्रतम् ॥३॥

नेमुनिरुवाच

आसीत्कश्चिन्मुनिः पूर्वं मङ्गलो नाम विश्रुतः । अत्रैव विमलारण्ये शताब्दं तप्तवान् रहः ॥४॥
एतल्लिङ्गं च संस्थाप्य[2] भक्तिपूर्वेण चेतसा । जजाप तन्मनुं नित्यं क्षुत्पिपासाविवर्जितः ॥५॥
साङ्ख्ययोगेन विप्रेश ! चाऽत्रैव मुक्तवान्तनुम् । ततो लिङ्गमिदं ख्यातं मङ्गलेश्वरनामतः[3] ॥६॥
एतल्लिङ्गस्य माहात्म्यं भूयः शृणु वदामि ते । म्लेच्छेन केनचित् प्राप्तो[4] वरः प्रमथनायकात् ॥७॥
आसीदेतद्वने म्लेच्छ ऊर्ध्वकेश इति श्रुतः[5] । मृगयार्थं चरन्नार्य ! चैतल्लिङ्गान्तिकं पुरा ॥८॥
दूराद्ददर्श नर्तन्तं शङ्करं प्रमथैः सह । तिरोदधे निमेषेण तस्थौ स स्वयमेव च ॥९॥
त्यक्त्वा च कार्मुकं तूष्णीमारोहच्चम्पकं कुजम् । तत्पुष्पाणि समादाय[6] चाऽत्रागमत्त्वरान्वितः ॥१०॥
मधोः कृष्णचतुर्दश्यामेतल्लिङ्गमपूपुजत् । आधाय चेतसि म्लेच्छो रुद्रेण सह सङ्गमम् ॥११॥
एवमेव च षण्मासान् म्लेच्छो निनाय नित्यशः । सम्पूज्य भक्तितो लिङ्गं फलमूलाशनो मुदा ॥१२॥

अध्याय - १२९

भद्रतीर्थ र मङ्गलेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष जहाँ मङ्गलेश्वर बस्नुभएको थियो, त्यसै ठाउँमा गए। उनले भद्रा नदीमा स्नान गरेर सहर्ष ईश्वरको पूजा गरे। विरूपाक्षले चैत्रशुक्ल पञ्चमीका दिन लिङ्गको पूजा गरेर राति जाग्राम बसी नेमुनिसित त्यस तीर्थ र लिङ्गको माहात्म्य सोधे। भक्तिपूर्वक विरूपाक्षले भनेको वचन सुनेर नेमुनिले राति विरूपाक्षलाई तीर्थ र लिङ्गको माहात्म्य बताउनुभयो ॥१–३॥

नेमुनिले भन्नुभयो – अघि मङ्गल नाम गरेका कुनै ऋषि थिए। यिनले यसै निर्मल जङ्गलमा सय वर्षसम्म एकान्त स्थलमा रहेर तपस्या गरे। भोक र तिर्खालाई वास्ता नगरी उनले भक्तिपूर्वक सहर्ष यस लिङ्गको स्थापना गरेर सधैं भगवान् शङ्करको मन्त्र जपे ॥४–५॥

हे विरूपाक्ष ! साङ्ख्यशास्त्रमा प्रतिपादित योगपद्धतिबाट उनले यसै ठाउँमा शरीर छोडे। त्यसै समयदेखि यो लिङ्गको नाम मङ्गलेश्वर भयो। यस लिङ्गको माहात्म्य म फेरि तिमीलाई बताउँछु, सुन – कुनै म्लेच्छले यहाँ तपस्या गरेर प्रमथगणका स्वामी भगवान् शङ्करबाट वर पाएको थियो। हे विरूपाक्ष ! यस जङ्गलमा यसै लिङ्गको नजिकै शिकार खेलेर विचरण गर्ने ऊर्ध्वकेशनामक कुनै म्लेच्छ थियो ॥६–८॥

त्यस ठाउँमा प्रमथगणका साथ नाचिरहनुभएका शङ्करलाई त्यसले टाढैबाट देख्यो। एकैछिनमा शिवजी अन्तर्धान हुनुभयो र त्यो म्लेच्छमात्र त्यहाँ रह्यो। धनुषको ठोक्रालाई त्यसै छाडेर त्यो म्लेच्छ चाँपको रुखमा चढ्यो। चाँपका फूलहरू टिप्यो र हतार हतार त्यहाँ आयो। त्यसले भगवान् शङ्करलाई भेट्ने इच्छा गर्दै कृष्णचतुदशीका दिन भक्तिपूर्वक यस लिङ्गको पूजा गऱ्यो। फलफूल खाएर भक्तिपूर्वक त्यस म्लेच्छले त्यसै ठाउँमा सहर्ष लिङ्गको पूजा गर्दै छ महिना बितायो ॥९–१२॥

---

१. अवणयन्माहात्म्यं तद्, इति न.सं.पु.पाठः ।
२. एतल्लिङ्गं मुदा स्थाप्य, इति न.सं.पु.पाठः ।
३. ततः प्रभृति लिङ्गं तन्मङ्गलेश्वर आश्रुतः, इति न.सं.पु.पाठः ।
४. कश्चिन्म्लेच्छेन सम्प्राप्ते, इति न.सं.पु.पाठः ।
५. ऊर्ध्वकेशोऽभिधानकः, इति न.सं.पु.पाठः ।
६. तत्पुष्पकानि चादाय, इति न.सं.पु.पाठः ।

भाद्रकृष्णचतुर्दश्यां पञ्चत्वं प्राप्तवान्निशि। काले प्राप्ते तदा म्लेच्छश्चैतल्लिङ्गान्तिके द्विज ॥१३॥
अत्राऽऽगत्य पुनर्दूता शैवाः पुष्पकपाणयः। तमास्थाय विमानेन निन्युः शिवपुरं महत् ॥१४॥
अभूत्सोऽपि गणश्रेष्ठश्चोर्ध्वकेशाभिधानकः। रुद्रस्य पार्श्वगो नित्यं विचरन्प्रमथैः सह ॥१५॥
भूयो गच्छ विरूपाक्ष ! धनुःसहस्रमग्नितः। कन्दरे हि निकुञ्जाद्रेर्यत्राऽऽस्ते विमलेश्वरः ॥१६॥

प्रोक्तं मया ते निखिलेन चाऽस्य रुद्रस्य माहात्म्यमजस्य विप्र।
भूयो माहात्म्यं विमलेश्वरस्य वक्ष्यामि तत्रैव च तस्य विद्वन् ॥१७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
भद्रतीर्थमङ्गलेश्वरयोर्माहात्म्यं नामोनत्रिंशमोऽध्यायः ॥१२९॥

हे विरूपाक्ष ! काल आएपछि भाद्रकृष्ण चतुर्दशीका दिन राति त्यो म्लेच्छ यसै लिङ्गको नजिकै मऱ्यो। शिवजीका दूतहरू पुष्पक विमान लिएर यहाँ आए अनि त्यसलाई विमानमा राखेर उत्तम शिवलोकमा लगे। त्यो ऊर्ध्वकेश नाम गरेको म्लेच्छ पनि प्रमथगणहरूमा मुख्य भई उनीहरूका साथै हिँड्ने शिवजीको पार्श्ववर्ती बन्न पुग्यो। हे विरूपाक्ष ! अब तिमी हजार धनु पर आग्नेय दिशामा जाऊ। झाडी भएको त्यस निकुञ्जपर्वतको गुफामा विमलेश्वर भगवान् रहनुभएको छ ॥१३-१६॥

हे विद्वान् विरूपाक्ष ! मैले तिमीलाई मङ्गलेश्वर रुद्र भगवान्को सम्पूर्ण माहात्म्य बताएँ। म फेरि विमलेश्वर भगवान्को माहात्म्य त्यसै ठाउँमा बताउनेछु ॥१७॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भद्रतीर्थ र मङ्गलेश्वरको माहात्म्यनामक
एकसय उनन्तीसौं अध्याय पूरा भयो।

त्रिंशदुत्तरशततमोऽध्यायः

विमलोदकागङ्गाविमलेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो मुनिनाऽगस्त्य ! वै समम्। विमलेशो हि यत्राऽऽस्ते तल्लिङ्गं हि प्रणम्य च ॥१॥
विमलोदकगङ्गायां स्नात्वा लिङ्गमपूपुजत्[1]। चैत्रस्य शुक्लसप्तम्यां निरशनो विनिद्रकः ॥२॥
तमपृच्छद्धि माहात्म्यं तल्लिङ्गस्य विरूपदृक्। तदाकर्ण्य मुनिस्तञ्च व्याजहार वचस्तदा ॥३॥

नेमुनिरुवाच

आसीद्विरूपदृक् पूर्वं विमलो नाम विश्रुतः। वेदवेदाङ्गतत्वज्ञः सर्वशास्त्रविशारदः ॥४॥
जटिलो ब्रह्मचारी च धृतदण्डकमण्डलुः। पश्चिमे वयसि संस्थः[2] शिरःकम्पी महाशुचिः ॥५॥
ताडितो भगिनीपुत्रः पूर्वजन्मनि तेन च। तद्दोषात्स शिरःकम्पी चाऽभूद्धि विमलो द्विजः ॥६॥
विरक्तो निर्गतो गेहाद्धिमवत्पर्वतं प्रति। अत्रैव प्राप्तवान् विप्रो वृद्धत्वं हि शनैः शनैः ॥७॥
स सस्माराऽत्र गङ्गाञ्च स्नपनार्थं विरूपदृक्। एषा नदी समुद्भूतोवाह निर्मलजीवना[3] ॥८॥
एतल्लिङ्गं पुरोद्भूतं तज्जलेन समर्चितम्। विमलैरुपचारैश्च भक्तिपूर्वेण चेतसा ॥९॥
मार्गकृष्णचतुर्दश्यां निराहारो विनिद्रकः। सम्पूज्यैनं महारात्रौ शिवमन्त्रं जजाप सः ॥१०॥
ततश्चाऽऽविर्बभौ देवश्चाऽमावास्यां निशान्तरे। व्याजहार शुभं वाक्यं वरदानाय वै तदा ॥११॥

अध्याय – १३०

विमलोदका गङ्गा र विमलेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य ! त्यसपछि त्यस लिङ्गलाई प्रणाम गरेर नेमुनिका साथ विरूपाक्ष जहाँ विमलेश्वर भगवान् हुनुहुन्थ्यो, त्यसै ठाउँमा गए। चैत्रशुक्ल सप्तमीका दिन विमलोदका नाम गरेकी गङ्गामा स्नान गरेर निराहार तथा जाग्राम बसी विरूपाक्षले विमलेश्वर लिङ्गको पूजा गरे। विरूपाक्षले त्यस लिङ्गको माहात्म्य नेमुनिसित सोधे। त्यो सुनेर नेमुनिले उनलाई उत्तर दिन लाग्नुभयो ॥१–३॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! वेद-वेदाङ्गका तत्त्वज्ञ र सबै शास्त्रका ज्ञाता अघि विमल नाम भएका कुनै पुरुष थिए। यिनले जटा पालेका थिए, हातमा दण्ड र कमण्डलु लिएका थिए, उमेर ढल्केको थियो, यिनको शिर काँप्थ्यो र यिनी पवित्र थिए। पूर्वजन्ममा उनले बहिनीको छोरो अर्थात् भानिजलाई पिटेका थिए। त्यसै दोषले गर्दा विमल नाम गरेका ब्राह्मणलाई शिर काँप्ने रोग लागेको थियो। हे विरूपाक्ष ! एकदिन साह्रै विरक्त भएर उनी घरबाट निस्किए र हिमालय पर्वततिर लागे। बिस्तारै बिस्तारै यी वृद्ध यसै तीर्थमा आइपुगे ॥४–७॥

हे विरूपाक्ष ! उनले स्नान गर्नका लागि भगवती गङ्गाको सम्झना गरे। त्यसपछि निर्मल जल भएकी यी नदी पैदा भइन् र बग्न थालिन्। अघि उत्पन्न भएको यस लिङ्गलाई निर्मल जल र विभिन्न पूजासामग्रीद्वारा भक्तिपूर्ण चित्तले यिनले पूजा गरे। मार्गकृष्ण चतुर्दशीका दिन निराहार तथा जाग्राम बसी शिवलिङ्गको पूजा गरेर यिनले राति शिवमन्त्र जपे। त्यसपछि अमावास्याका दिन रातको अन्त्यमा भगवान् शङ्कर प्रादुर्भाव हुनुभयो र उहाँले वर दिनका लागि कल्याणमय वाक्य बोल्नुभयो ॥८–११॥

---

१. तल्लिङ्गमर्चितम्, इति न.सं.पु.पाठः। २. पश्चिमे वयसिस्थोऽसौ, इति न.सं.पु.पाठः।
३. एषा नदी समुद्भूता निर्मलार्णा ववाह च, इति न.सं.पु.पाठः।

विमलेश्वर उवाच

भविष्यसि च भो ब्रह्मन् मम पार्श्वचरो वरः । अर्चितो ब्रह्मकर्मोक्त्या यतोऽहं भवताऽधुना ॥१२॥
अर्चितो भवता भक्त्या चाद्याऽहं[४] हि यतो द्विज । तव नाम्ना भविष्यामि प्रख्यातो विमलेश्वरः ॥१३॥
भविष्यति च ते नाम्ना नदीयं सततं पुनः । सर्वलोकैर्हि धीरेति विख्याता विमलोदका ॥१४॥

नेमुनिरुवाच

साङ्ख्ययोगं समासाद्य चाऽत्रैव निधनं गतः । विप्रोऽसौ विमलो नाम माघकृष्णाष्टमीदिने ॥१५॥
रुद्रयाने तमास्थाय प्रमथा विमलं क्षणात् । प्रापयन्[५] शिवलोकं वै बहुमानपुरःसरम् ॥१६॥
स एव प्रमथश्रेष्ठश्चाऽभूद् विप्रो विरूपदृक् । रुद्रपार्श्वचरो नित्यं धृतसूत्रोपवीतकः ॥१७॥
तदादि मुनयो देवा न मुञ्चन्ति कदापि च । एतल्लिङ्गं समभ्यर्च्य चेदं स्थानं विरूपदृक् ॥१८॥
विमलोदकसुस्नातो विमलेश्वरमर्चति । विमलविग्रहो भूत्वा रुद्रलोकं प्रगच्छति ॥१९॥
भूयो गच्छ विरूपाक्ष चाऽतोऽप्यन्तर्दिशि ध्रुवम् । अनन्तेशो हि तत्राऽऽस्ते ऋष्याश्रमनितम्बके ॥२०॥
एतन्माहात्म्यं विमलेश्वरस्य जिज्ञासितं तद् भवता यतो वै ।
प्रोक्तं मया ते हि विरूपनेत्र ! भूयश्च वक्ष्याम्यहमार्य ! यत्तत् ॥२१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
विमलोदकगङ्गाविमलेश्वरयोर्माहात्म्यं नाम त्रिंशदुत्तरशततमोऽध्यायः ॥१३०॥

विमलेश्वरले भन्नुभयो – तिमीले ब्रह्मकर्म अनुसार अहिले मेरो पूजा गर्‍यौ । हे ब्राह्मण ! तिमी मेरा उत्कृष्ट पार्श्ववर्ती हुनेछौ । हे ब्राह्मण ! तिमीले भक्तिपूर्वक आज मेरो पूजा गर्‍यौ, त्यसैले तिम्रो नाम जोडेर म विमलेश्वर भएर प्रसिद्ध हुनेछु । फेरि यी सबैले धीरा भन्दै आएकी नदी पनि तिम्रै नाम अनुसार विमलोदका नामले प्रसिद्ध हुनेछिन् ॥१२–१४॥

नेमुनिले भन्नुभयो – माघकृष्ण अष्टमीका दिन साङ्ख्यशास्त्रमा प्रतिपादन गरिएको योगविधिलाई ग्रहण गरेर ती विमल नाम गरेका ब्राह्मण यसै ठाउँमा मरे । तुरुन्तै शिवजीका प्रमथगणहरूले शिवजीको यानमा उनलाई राखेर सम्मानका साथ शिवलोकमा पुर्‍याए । हे विरूपाक्ष ! तिनै विमल नाम गरेका ब्राह्मण प्रमथगणहरूमा श्रेष्ठ भए । उनी सधैँ जनै लगाएर शिवजीको पार्श्ववर्ती भएर बसेका छन् ॥१५–१७॥

हे विरूपाक्ष ! त्यसै समयदेखि देवता र ऋषिहरूले यस ठाउँलाई छाडेका छैनन् । उनीहरूले सधैँ यस लिङ्गको पूजा गर्छन् । जसले विमला नदीको जलमा स्नान गरेर विमलेश्वर भगवान्‌को पूजा गर्छ त्यो व्यक्ति निर्मल शरीर भएर धारण गरी रुद्रलोकमा जान्छ । हे विरूपाक्ष ! यहाँबाट तिमी उत्तर दिशातिर जाऊ । त्यहाँ ऋषिका आश्रमको नजिकै अनन्तेश्वर महादेव रहनुभएको छ ॥१८–२०॥

यो विमलेश्वरको माहात्म्य तपाईंले मलाई सोध्नुभएको थियो । हे विरूपाक्ष ! मैले सबै बताएँ । म अ पनि जे जति माहात्म्य छन्, ती बताउनेछु ॥२१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवतखण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा विमलोदका गङ्गा र विमलेश्वरको माहात्म्यनामक एकसय तीसौं अध्याय पूरा भयो ।

---

४. चाद्य माम्, इति न.सं.पु.पाठः । ५. आनयन्, इति न.सं.पु.पाठः ।

एकत्रिंशदुत्तरशततमोऽध्यायः

अनन्तेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो यत्राऽनन्तेश्वरो विभुः। ऋषितीर्थकृतस्नानः पुपूजाऽनन्तमीश्वरम्[1] ॥१॥
विनिद्रः पूजको रात्रौ चाऽपृच्छन्नेमुनिं निशि। ततो मधुसिताष्टम्यां भक्त्या प्रणम्य तं पुनः ॥२॥
निशम्य तद्वचो रात्रौ नेमुनिश्च घटोद्भव। अनन्ताख्यस्य लिङ्गस्य माहात्म्यं व्याजहार ह ॥३॥

नेमुनिरुवाच

आसन्पूर्वं विरूपाक्ष ऋषयोऽत्र सहस्रशः ॥४॥
तस्मादृष्याश्रमः प्रोक्त एष शैलो विचक्षणैः[2]। अगस्त्यो गालवो गार्ग्यः शक्तिर्धौम्यः पराशरः ॥५॥
कृष्णात्रेयश्च भगवानसितो देवलो बलः। बृहस्पतिरुतथ्यश्च मार्कण्डेयः श्रुतश्रवाः ॥६॥
द्वैपायनो विदर्भश्च जैमिनिर्माठरः कठः। विश्वामित्रो वशिष्ठश्च रोमशश्च महानृषिः ॥७॥
उत्तङ्गश्चैव रैभ्यश्च पौलोमश्च द्वितस्त्रितः। ऋषिर्वै कालवृक्षीयो मुनिर्मेधातिथिस्तथा ॥८॥
सारस्वतः पुरक्रोडः कुशिको गौतमस्तथा। भारद्वाजः स्थूलशिराः कश्यपः पुलहः ऋतुः ॥९॥
बृहदग्निर्हरिश्मश्रुर्विजयः कण्व एव च। दीर्घतपाश्च वैतण्डी वेदश्चाऽथांशुमच्छिवः ॥१०॥
अष्टावक्रो ददीतिश्च श्वेतकेतुस्तथैव च। उद्दालकः क्षारपाणिः शृङ्गी गौरमुखस्तथा ॥११॥
अग्निवेश्यः समीकश्च प्रमुचुर्मुमुचुस्तदा। एते चाऽन्ये च बहव ऋषयः संशितव्रताः ॥१२॥

अध्याय - १३१

अनन्तेश्वरलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यसपछि जहाँ अनन्तेश्वर भगवान् हुनुहुन्थ्यो त्यसै ठाउँमा विरूपाक्ष गए। उनले ऋषितीर्थमा स्नान गरेर अनन्तेश्वर लिङ्गको पूजा गरे। राति शिवलिङ्गको पूजा गरेर ननिदाईकन चैत्रशुक्ल अष्टमीका दिन भक्तिपूर्वक नमस्कार गरेर विरूपाक्षले नेमुनिसित सोधे। हे अगस्त्य मुनि ! उनको भनाइ सुनेर नेमुनिले अनन्त लिङ्गको माहात्म्य उनलाई बताउनुभयो ॥१–३॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि यहाँ हजारौं ऋषिहरू बस्थे। ऋषिहरूले निवास गरेकै कारणबाट यस पर्वतलाई ऋष्याश्रम भनियो। यस आश्रममा अगस्त्य, गालव, गार्ग्य, शक्ति, धौम्य, पराशर, कृष्णात्रेय, असित, देवल, बृहस्पति, उतथ्य, मार्कण्डेय, श्रुतश्रवा, द्वैपायन, विदर्भ, जैमिनि, माठर, कठ, विश्वामित्र, वसिष्ठ, लोमश, उतङ्ग, रैभ्य, पौलोम, द्वित, त्रित, कालवृक्षीय, मेधातिथि, सारस्वत, पुरक्रोड, कुशिक, गौतम, भारद्वाज, स्थूलशिरा, कश्यप, पुलह, ऋतु, बृहदग्नि, हरिश्मश्रु, विजय, कण्व, वैतण्डी, दीर्घतपा, वेद, अंशुमान्, शिव, अष्यवक्र, ददीति, श्वेतकेतु, उद्दालक, क्षारपाणि, शृङ्गी, गौरमुख, अग्निवेश्य, समीक, प्रमुचु, मुमुचु यी र यस्तै अरू ऋषिहरू तपस्या, व्रत आदि गरी बसेका थिए ॥४–१२॥

---

१. **ऋषितीर्थे च संस्नात्वा चानन्तेश्वर अर्चितः, इति न.सं.पु.पाठः।** २. **तस्मादृश्याश्रमं प्रोक्तमेतच्छैलं विचक्षणैः, इति न.सं.पु.पाठः।**

एते संसदि विप्रेशा अध्यासन्केचिदादृताः। स्वयम्भवो महाशम्भुर्लोकानां हितकाम्यया ॥१३॥
अस्मानुत्पादयामास न केवलं वयं द्विजाः[३]। एवं वदन्तो ते विप्राः[४] श्रीपशुपतये तदा ॥१४॥
प्रशस्य चैव नेमुर्वै दण्डवत्पतिताः क्षितौ। गतस्तेषु मुनिः[५] कश्चिन्मृदञ्चखान चाऽत्र वै ॥१५॥
खनित्रेणाऽत्र शौचार्थं बृहदग्निर्मुनीश्वरः। ददर्शैतन्महालिङ्गं बृहदग्निस्तदा द्विज ॥१६॥
मृदभ्यन्तरसम्भूतं मृत्तिकोत्खनने कृते। आहूय स मुनीन् सर्वान् लिङ्गकोटिमदर्शयत्[६] ॥१७॥
किमिति दृश्यतामेतद् भो भो मुनीश्वरा इदम्। सम्भूय ऋषयश्चाऽत्र चख्नुश्च मृत्तिकां तदा ॥१८॥
खाते लोकयितुं मूलमेतल्लिङ्गस्य साम्प्रतम्। त्रिंशद्धस्तप्रमाणेन खनित्वा ते च मृत्तिकाम् ॥१९॥
नाऽदर्शन्नपि तन्मूलं स्वयम्भूरिति मेनिरे। अनन्तरूपमस्माभिरस्य लिङ्गस्य लोकितम्[७] ॥२०॥
अनन्तेश्वरनामेदं भवतु प्रथितं भुवि[८]। तद्बिलञ्च मृदाच्छाद्य ज्ञात्वा लिङ्गं प्रमाणितम् ॥२१॥
अपूपुजन्मुदा भक्त्या भावभक्त्या[९] मुनीश्वराः। ततः प्रभृति तल्लिङ्गं पुण्यतीर्थजलार्चनैः[१०] ॥२२॥
पूज्यते मुनिभिर्भक्तै[११]र्नानोपहारकैः सदा। एतल्लिङ्गस्य माहात्म्यं शृणु विरूपदृक् पुनः ॥२३॥
मुक्तः कश्चित्पुरा म्लेच्छश्चैतल्लिङ्गप्रसादतः। उलूकास्याऽभिधानश्च ह्यासीन्म्लेच्छः पुरा द्विजः ॥२४॥
पूर्वजन्मविपाकेन नीचाचारेण सम्भवः। नीचाचारेण यत् किञ्चिद् भुक्तवान् निशि प्रत्यहम्[१२] ॥२५॥
चोर्येणादाय चाऽभोज्य पूर्वजन्मन्युलूकवत्। एवमेवाऽप्तकालेऽपि म्लेच्छाऽसावग्रसीद्धि तत् ॥२६॥

सबैद्वारा सम्मानित यी ऋषिहरू धर्मसभामा विराजमान थिए। उनीहरू लोकको हितको कामना गरेर स्वयम्भू महाशम्भुले हामीलाई पैदा गर्नुभएको हो भन्दै उनीहरू आफू केवल ब्राह्मण नभई लोककल्याणकारी पनि भएको र उनीहरूको मुख्य कर्तव्य लोकको कल्याण गर्नुमात्रै भएको सत्य बताइरहेका थिए। यसप्रकार आफ्नो उत्पत्तिको कारण खुलाउँदै आपसमा भगवान् पशुपतिको प्रशंसा गर्दै ती ऋषिहरूले पृथ्वीमा दण्डजस्तै लम्पसार परेर उहाँलाई प्रणाम गरे। त्यसै समयमा बृहदग्नि ऋषिले त्यहाँ गएर खन्तीले माटो खने। शौचकार्यका निमित्त बृहदग्नि ऋषिले खन्तीले माटो खन्दा माटोभित्र लुकेको शिवजीको महालिङ्गको दर्शन गरे। उनले सबै ऋषिहरूलाई बोलाएर कोटिलिङ्ग देखाए। यो के हो ? हे ऋषि हो ! हेर्नुहोस् भने। सबै ऋषिहरू मिलेर खाल्यमा त्यस लिङ्गको मूल हेर्नका लागि अझ माटो खने ॥१३-१८॥

तीस हातसम्म माटो खन्दा पनि तिनीहरूले शिवलिङ्गको फेद पत्ता लगाएनन्। त्यसपछि उनीहरूले त्यस शिवलिङ्गलाई स्वयम्भू भनेर माने। हे मुनीश्वर हो ! यस लिङ्गको अन्त पत्ता लागेन। त्यसैले यसको नाम अनन्त लिङ्ग हो भन्नुपर्छ। त्यसपछि त्यस खाल्यलाई माटोले छोपेर यो लिङ्ग हो भन्ने निश्चय गरी ऋषिहरूले यस लिङ्गलाई प्रसन्न हुँदै भक्तिपूर्वक पूजा गरे। त्यसै समयदेखि यस लिङ्गलाई ऋषिहरूले तीर्थजल र विभिन्न किसिमका पूजा पूजा सामग्रीद्वारा पूजा गर्ने गरेका छन्। हे विरूपाक्ष ! यस लिङ्गको माहात्म्य फेरि म बताउँछु, सुन - यसै लिङ्गको अनुग्रहबाट अघि कुनै म्लेच्छ मुक्त भएको थियो ॥१९-२३॥

कुनै ब्राह्मण पूर्वजन्मका नीच कर्मले गर्दा उलूकास्य नाम गरेका म्लेच्छ भएर जन्मिएका थिए। ती ब्राह्मणले पूर्वजन्ममा तल्लो आचरण गरेर जे पायो त्यही खान्थे, चोरी गरेर ल्याएको वस्तु लाटोकोसेराले जस्तै रात्रीमा भोजन गर्थे। यसैगरी यिनले विना समय खानेकुरा खाए ॥२४-२६॥

---

३. नान्यथा पशुपो रुद्रो जानीध्वं केवलं द्विजाः, इति न.सं.पु.पाठः।
४. एवं वदन्मिथो विप्रास्ते, इति न.सं.पु.पाठः।
५. गतस्मस्मिन्मुनिः, इति न.सं.पु.पाठः।
६. लिङ्गकोटिं प्रदर्शयत्, इति न.सं.पु.पाठः।
७. अन्ततोऽदर्शितञ्चास्य चास्माभिर्भो मुनीश्वर, इति न.सं.पु.पाठः।
८. अस्मादनन्तलिङ्गोऽयम्भवतु नाम चास्य च, इति न.सं.पु.पाठः।
९. चैतल्लिङ्गम्, इति न.सं.पु.पाठः।
१०. ततः प्रभृति लिङ्गोऽयं मुनितीर्थजलार्चनैः, इति न.सं.पु.पाठः।
११. मुनिभिश्च प्रपूज्यन्ते, इति न.सं.पु.पाठः।
१२. नीचाचारेण यत्तद्वै भक्षितो निशि सोऽग्रजः, इति न.सं.पु.पाठः।

तद्दोषेण च देहान्ते चोलूकास्योऽभवत्पुनः । उलूकवदनो म्लेच्छश्चाऽवात्सीत्कुञ्जपर्वते ॥२७॥
मृगयाजीवको नित्यमत्रैव सञ्चचार सः[१३] । ददर्शैतन्महालिङ्गमृषिभिः पूजितं सदा ॥२८॥
मधोः कृष्णाष्टमीरात्रौ वसन्नत्र श्रमातुरः । नवम्यां सोऽपि च प्रात ऋषितीर्थे जलाप्लुतः ॥२९॥
पत्रपुटोद्धृतैस्तोयैरेतल्लिङ्गमपूपुजत् । अत्रागत्य ह्यसौ लिङ्गमर्चति स्म यथा मुनिः ॥३०॥
वन्यैः पुष्पैर्जलैर्भक्त्या मुखवाद्यैर्ननाम हि । एवमेवाऽर्चितं नित्यमेतल्लिङ्गञ्च तेन वै ॥३१॥
ऋषिवत्[१४] पूजनं प्रेक्ष्य यावत्षण्मासमादितः । प्रत्यक्षोऽग्रेऽभवल्लिङ्गाद्रुद्रस्तस्मै वरं ददौ ॥३२॥
प्रभाते भाद्रकृष्णस्याऽष्टम्यां रुद्रं व्यलोकयत्[१५] । प्रातः काले नवम्याञ्च वरं लब्ध्वा गृहं ययौ ॥३३॥
पूर्णमनोरथो भूत्वा म्लेच्छवृत्तिविवर्जितः । काले प्राप्ते ततो म्लेच्छश्चात्रायातु पथि व्रजन् ॥३४॥
पञ्चत्वं प्राप्तवान् शैले शतधनुषि दूरतः । तत्रागत्य गणा रौद्राः पुष्पासारमवर्षयन् ॥३५॥
आदध्युः शैवके याने समादृत्य[१६] महोत्सवैः । अनयन्नीशलोकं तं व्योममार्गेण सादरम् ॥३६॥
ते निन्युस्तञ्च शुक्लायामेकादश्यामिषस्य च[१७] । सोऽप्यभवद्गणश्रेष्ठो रुद्रस्याऽनुचरोऽनिशम् ॥३७॥
एतल्लिङ्गप्रसादाद्वै चाऽद्यापि च विरूपदृक् । अतो वारुणदेशे त्वं भूयो गच्छ विरूपदृक् ॥३८॥
ऋष्याश्रममहाकूटे वृक्षपुष्पैः समाकुले । चैत्रस्य कृष्णस्य महानवम्यामुद्भूतलिङ्गस्य माहात्म्यमेतत् ।
अनन्तनाम्नोऽस्य हि ते मयोक्तं तत्रैव वक्ष्यामि पुनर्हि यत्तत् ॥३९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायामनन्तलिङ्गस्य माहात्म्यं नाम एकत्रिंशदुत्तरशततमोऽध्यायः ॥१३१॥

त्यसै पापले गर्दा मरेपछि उनको मुख लाटोकोसेराको जस्तो भयो। लाटोकोसेराको जस्तो मुख भएको त्यो म्लेच्छ शिकार खेलेर जीविका निर्वाह गर्दै यसै भाडी भएको पर्वतमा सधैं बस्दथ्यो। वैशाखकृष्ण अष्टमीका दिन राति थाकेर बसेको म्लेच्छले यो महालिङ्ग पूजा गर्न लागेका ऋषिहरूलाई देख्यो। उसले नवमीका दिन यसै ऋषितीर्थमा स्नान गऱ्यो र पातका दुनामा पानी राखेर ल्याई यस लिङ्गको पूजा गऱ्यो। ऋषिहरूले जस्तै यहाँ आएर त्यस म्लेच्छले जङ्गलका फलफूल ल्याई पूजा गऱ्यो र मुखले बाजा बजाउँदै नमस्कार गऱ्यो। ऋषिहरूले पूजा गरेको देखेर सुरुदेखि छ महिनासम्म त्यसले यसरी नै सधैं यस लिङ्गको पूजा गऱ्यो। लिङ्गबाट अगाडि भगवान् शङ्कर प्रकट हुनुभयो र भाद्रकृष्ण अष्टमीका दिन बिहान शिवको पार्श्ववर्ती भएस् भन्ने वर दिनुभयो ॥२७-३२॥

भाद्रकृष्ण अष्टमीका दिन भगवान् रुद्रको दर्शन गरेपछि नवमीका दिन बिहान उहाँको वर प्राप्त गरेर त्यो म्लेच्छ घर गयो। उसले आफ्नो मनोरथ पूरा गरी म्लेच्छको आचार-विहार परित्याग गऱ्यो। समय आएपछि यसै ठाउँमा आउन लाग्दा बाटामा हिंड्दा हिंड्दै सय धनुष टढा उसको मृत्यु भयो। त्यहाँ आएर शिवजीका गणहरूले पुष्पवृष्टि गरे र ठूलो उत्सवका साथ उसलाई शिवजीको यानमा राखे। हे विरूपाक्ष ! आश्विनशुक्ल एकादशीका दिन ईश्वरका गणले उसलाई लगे। पछि तिनै म्लेच्छ रुद्रका मुख्य गण भएर रहेका छन् ॥३३-३६॥

हे विरूपाक्ष ! अब तिमी यहाँबाट पश्चिमपट्टि रहेको रुख र फूलहरूले परिपूर्ण ऋष्याश्रम नाम गरेको पर्वतको शिखरमा जाऊ ॥३७॥ चैत्रकृष्ण महानवमीका दिन उत्पन्न अनन्त नाम गरेको यस लिङ्गको यो माहात्म्य मैले तिमीलाई बताएँ। अरु माहात्म्य म फेरि त्यसै ठाउँमा बताउनेछु ॥३७-३९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा अनन्तलिङ्गको माहात्म्यनामक
एकसय एकतिसौं अध्याय पूरा भयो।

---

१३. नित्यमत्रैासञ्चरत्सदा, इति न.सं.पु.पाठः ।
१४. ऋषीणाम्, इति न.सं.पु.पाठः ।
१५. भाद्रकृष्णाष्टमीप्रातः रुद्रपार्श्वचरो वरम्, इति न.सं.पु.पाठः ।
१६. आद्रयन्तम्, इति न.सं.पु.पाठः ।
१७. ते वै लोकान् हि शुक्लायामेकादश्यामिषस्य च, इति न.सं.पु.पाठः ।

द्वात्रिंशदुत्तरशततमोऽध्यायः

वृद्धगङ्गाविश्वरूपेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगच्छद्विरूपाक्षो मुनिना सह कुम्भज । विश्वरूपेश्वरो यत्र तं प्रणम्यानिशं मुनिम् ॥१॥
वृद्धगङ्गाजले स्नात्वा विरूपाक्षो मुदान्वितः । विश्वरूपेश्वरं लिङ्गमपूपुजद्धि भक्तितः ॥२॥
चैत्रमासे सिते पक्षे नवम्यां भक्तितो द्विजः । अपृच्छन्नेमुनिं रात्रौ तन्माहात्म्यं विनिद्रकः ॥३॥
समाकर्ण्य वचोऽगस्त्य ! विरूपाक्षस्य नेमुनिः । व्याचष्ट वचनं तस्मै तन्माहात्म्यं तदा निशि ॥४॥

नेमुनिरुवाच

आसीद्विप्रो महावृद्धश्चाशीतिवार्षिकः पुरा । श्रुतिगीताभिधानोऽसौ सर्वशास्त्रार्थपारगः ॥५॥
मृते पुत्रे च भार्यायां विरक्तो निःसृतो गृहात् । कृत्वेति जीवनं धिङ् मे क्व गच्छामीति भावयन्[1] ॥६॥
देशाद्देशान्तरं वृद्धो व्रजंस्तीर्थानि वै शनैः । अत्रैव प्राप्तवान् विप्रस्तृषार्तः सोऽभवद् भृशम् ॥७॥
सस्माराऽत्रैव गङ्गां स जलपानाय कोविदः । तत्र गङ्गा समुद्भूता महातपःस्मृता सती[2] ॥८॥
वैशाखस्य तृतीयायां सस्नौ शुक्लस्य तज्जले । पपौ स तज्जलं विप्रो वृक्षच्छायां समाश्रितः ॥९॥
त्यक्तश्रमोऽचलच्चेतो भोजनार्थं[3] द्विजो वने । एतल्लिङ्गं ददर्शार्य ! फलमूलानि मार्गयन् ॥१०॥
षड्वर्गञ्च परित्यज्य भक्तिपूर्वेण चेतसा । आनर्च विधिवल्लिङ्गं वन्यपुष्पोपहारकैः ॥११॥
गायत्रीं प्रजपन्विप्रो भक्तिभिश्च स्तवार्चनैः । यावदेकसमां विप्रस्त्रिविधैर्विधिभिश्च तत् ॥१२॥

अध्याय - १३२

वृद्धगङ्गा र विश्वरूपेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर उहाँलाई नमस्कार गर्दै जहाँ विश्वरूपेश्वर रहनुभएको छ, त्यस ठाउँमा गए । वृद्धगङ्गाको जलमा स्नान गरेर खुसी हुँदै विरूपाक्षले भक्तिपूर्वक विश्वरूपेश्वर शिवलिङ्गको पूजा गरे । चैत्रमासको शुक्लपक्ष नवमीका दिन राति जाग्राम बसेर विरूपाक्षले नेमुनिसित त्यस तीर्थ र लिङ्गको माहात्म्य सोधे । हे अगस्त्य मुनि ! विरूपाक्षको त्यो वचन सुनेर नेमुनिले राति त्यो तीर्थ र लिङ्गको माहात्म्य उनलाई बताउनुभयो ॥१–४॥

नेमुनिले भन्नुभयो – असी वर्षभन्दा बढी उमेर भएका कुनै वृद्ध ब्राह्मण थिए । उनको नाम श्रुतिगीत थियो, सम्पूर्ण शास्त्रमा उनी पारङ्गत भएका थिए । छोरो र पत्नी मरेपछि मेरो जीवनलाई धिक्कार छ, अब म कता जाऊँ भनेर विरक्त हुँदै घरबाट उनी निस्किए । ती बूढा ब्राह्मण एक देशबाट अर्को देशका तीर्थहरू घुम्दै बिस्तारै यस ठाउँमा आइपुगे । ती ब्राह्मण अत्यन्त तिर्खाएका थिए । ती बूढा ब्राह्मणले पानी पिउनका लागि गङ्गालाई सम्झे । उनको महान् तपस्या र सम्झनाले गर्दा गङ्गा त्यसै ठाउँमा गङ्गा उत्पन्न भइन् । वैशाख शुक्ल तृतीयाको दिन उनले तिनै गङ्गाको जलमा स्नान गरे, गङ्गाको जल पिए र रुखको छायामा बसे ॥५–९॥

हे विरूपाक्ष ! विश्राम लिएका ती पूज्य ब्राह्मण भोजनका लागि फलफूल खोज्न वनमा जाँदा उनले यस लिङ्गलाई देखे । काम, क्रोध, लोभ, मोह, मद र मात्सर्यलाई छोडेर भक्तियुक्त चित्तले वनमा उत्पन्न भएका फलफूलहरूद्वारा ती ब्राह्मणले विश्वरूपेश्वर लिङ्गको विधिवत् आराधना गरे । ती ब्राह्मणले गायत्री जपे, तीनै किसिमका भक्तिले युक्त भएर एक वर्षसम्म मुनिहरूका साथ बसेर विश्वरूपेश्वरलिङ्गको स्तुति र पूजा गरे ॥१०–१२॥

---

१. चाब्रुवन्, इति न.सं.पु.पाठः । २. महातपःस्मृतेन च, इति न.सं.पु.पाठः ।
३. चात्र चाशनार्थम्, इति न.सं.पु.पाठः ।

वैशाखपूर्णिमायाञ्च तत्पूजनात् श्रुतिश्रवाः । ददर्श विश्वरूपञ्च लिङ्गादस्माद् विनिःसृतम्[४] ॥१३॥
देवः सहस्रशीर्षश्च सहस्राक्षः सहस्रपात् । सहस्रैः सायुधैश्चैव[५] करै राजितविग्रहः ॥१४॥
चन्द्रार्कवह्निनेत्रैश्च वासुकीयज्ञसूत्रतः । सर्वालङ्कारभूषाद्यैर्विश्वरूपो व्यराजत ॥१५॥
प्रणनाम मुहुर्भक्त्या विश्वरूपं श्रुतिश्रवाः । पातयित्वा तनुं भूमौ परिक्रमन्स्तुवन्पुनः ॥१६॥
तस्मिन् रुद्रविमाने तमास्थाय प्रमथाः द्विज । आनिन्युः शिवलोकं वै गीतवाद्यप्रमोदितम् ॥१७॥
भूयः शृणु माहात्म्यञ्च लिङ्गस्यैतस्य[६] विप्रराट् । मुक्तः कश्चित्पुरात्रैव त्रिशिरा नाम पक्षिजः ॥१८॥
आसीद्दीर्घतपा नाम चास्मिन्तीर्थे जलाप्लुतः । सन्ध्यामुपासते दान्तस्तस्थौ सोऽत्र सुनिश्चिलः ॥१९॥
नूनमप्सरसः सप्त[७] तीर्थाटनादिहाययुः । गायन्त्यो भूषिता[८] वाद्यैस्तालमृदङ्गवेणुभिः ॥२०॥
सस्नुरत्र मुदा ता वै वृद्धगङ्गाजले तदा । परित्यज्य च वासांसि वृक्षलतावलम्बने ॥२१॥
जलक्रीडां ततस्ता वै चक्रुर्भृशं मुदा पुनः । प्रक्षेपणैर्जलैस्तीव्रं करपुटेरितैर्मिथः ॥२२॥
दीर्घतपा मुमोहाशु प्रेक्ष्य चेष्टा मनोहराः[९] । तत्क्षणे मन्मथासक्तो[१०] रेतः स त्यक्तवान् तदा ॥२३॥
संस्नायाप्सरसः[११] स्वर्गं गतास्ताश्च ततो मुनिः । प्रययौ स्वाश्रमं शीघ्रं त्यक्त्वा तीर्थं विरूपदृक् ॥२४॥
तद्रेतो हि जले तत्र विराजते सुनिर्मलम् । पक्षिराडत्र भेरुण्डो जलं पातुं तदाययौ ॥२५॥
तद्रेतस्तेन शीघ्रञ्च ह्यप्राशि तत्कलत्रके[१२] । गर्भाधानं ततोऽभूच्च षण्मासं तं दधार सा ॥२६॥

वैशाख पूर्णिमाका दिन विश्वरूपेश्वर भगवान्‌को पूजा गरेको हुँदा यसै लिङ्गबाट उत्पत्ति भएका विश्वरूप भगवान्‌को श्रुतिश्रवा(श्रुतिगीत)ले दर्शन पाए । विश्वरूपेश्वर भगवान्‌का हजार शिर थिए, उहाँका हजार आँखा थिए, उहाँको शरीर हजारौँ हतियार लिएका हात र हजारौँ पाउले सुशोभित थियो । चन्द्र, सूर्य र अग्नि उहाँका आँखा थिए, उहाँले वासुकिनागको जनै लगाउनुभएको थियो । सम्पूर्ण गहना र भेषले सुसज्जित भएका विश्वरूप त्यहाँ विराजमान हुनुहुन्थ्यो । श्रुतिश्रवाले भुइँमा शरीरलाई लम्पसार पारेर बारम्बार भक्तिपूर्वक विश्वरूप भगवान्‌लाई नमस्कार गरे, परिक्रमा गरे र स्तुति पनि गरे । प्रमथगणहरूले तिनलाई शिवयानमा राखेर गीत, वाद्यवादन र उत्सवका साथ शिवलोकमा पुऱ्याए ॥१३-१७॥

हे विरूपाक्ष ! यस लिङ्गको माहात्म्य फेरि सुन । अघि यसै ठाउँमा त्रिशिरा नाम गरेको पक्षी मुक्त भएको थियो । यस तीर्थको जलमा स्नान गरेर यहाँ दीर्घतपा नाम गरेका कुनै महात्मा बसेका थिए । उनी निश्चल भएर इन्द्रियहरूलाई वशमा गरी सन्ध्या, पूजा आदि कार्य गर्दथे ॥१८-१९॥

त्यसै समयमा अलङ्कारले सुसज्जित भएका सातवटी अप्सराहरू ताल, मादल, बाँसुरी आदि बाजाहरू बजाउँदै तीर्थयात्राका क्रममा यसै स्थानमा आइपुगे । उनीहरूले आफ्ना कपडाहरू रुख र लहराको कापमा राखेर वृद्धगङ्गाको जलमा प्रसन्न हुँदै स्नान गरे । त्यसपछि उनीहरूले अँजुलीमा पानी लिएर परस्परमा छ्यापछ्याप गर्दै हर्षित भएर खूबसित जलक्रीडा गरे । तिनीहरूको त्यस किसिमको चेष्टा र क्रीडा देखेर दीर्घतपा नाम गरेका ऋषि तुरुन्तै मोहित भए । कामवासनाले पीडित भएर उनको वीर्य तत्कालै स्खलित भयो ॥२०-२३॥

हे विरूपाक्ष ! यसरी वृद्धगङ्गाको जलमा स्नान गरेर ती अप्सराहरू स्वर्गतिर गए । ती ऋषि पनि त्यो तीर्थलाई छोडेर तुरुन्त आफ्नो आश्रमतिर फर्किए । दीर्घतपा ऋषिको त्यो निर्मल वीर्य त्यसै जलमा थियो । कुनै बखत भेरुण्ड नाम गरेको पक्षीको राजा त्यहाँ पानी पिउन आयो । पानी पिउन आएको त्यस पक्षीराजले त्यो वीर्य पनि खायो । पक्षीराजले उसकी पत्नीसँग सहवास गर्दा त्यो वीर्य उसमा पऱ्यो । ऊ चाँडै गर्भवती भई र छ महिनासम्म त्यसले गर्भधारण गरी ॥२४-२६॥

---

४. ह्येतल्लिङ्गात्समुद्भवम्, इति न.सं.पु.पाठः ।
५. सहस्रसायुधोपेतैः, इति न.सं.पु.पाठः ।
६. सप्ताप्सरोगणा नूनम्, इति न.सं.पु.पाठः ।
७. एतल्लिङ्गस्य, इति न.सं.पु.पाठः ।
८. भूषाढ्या गीतयन्, इति न.सं.पु.पाठः ।
९. स्नात्वाप्सरोगणाः, इति न.सं.पु.पाठः ।
१०. तच्चेष्टिताश्च ताः, इति न.सं.पु.पाठः ।
११. तत्क्षणेऽभूद्विकाराङ्गः, इति न.सं.पु.पाठः ।
१२. पक्षिणी तदा, इति न.सं.पु.पाठः ।

व्यसृजत्सा ततश्चाऽण्डं निकुञ्जे वृक्षकोपरि। ततः पुनर्विभेदाण्डञ्चञ्चुना समये द्विज ॥२७॥
अभवन्नरदेहोऽसौ त्रिशीर्षो हि च तद्यथा। अपालयच्च भेरुण्डा चाहारपोषणैर्मुहुः ॥२८॥
एवं सा द्वादशाब्दं तं नित्यमपालयत्सुतम्। चञ्चुनखैस्तमुत्थाप्याऽशिक्षड्डयनं मुदा[१३] ॥२९॥
वर्धमानं[१४] तमालोक्य पतन्तं नृशरीरिणम्[१५]। व्याजहाराशु भार्यायै तद्भयकारणं वचः ॥३०॥

पक्षिराडुवाच

कान्ते ! त्यजार्भकस्नेहं नाऽयं खगो विजायते[१६]। किं साधयिष्यति नः कार्यं नाऽस्य रक्षा फलप्रदा[१७] ॥३१॥
कान्ते ! पश्याऽस्य मर्त्याङ्गं नो हन्तारं न संशयः। व्रजावस्त्वरितं त्यक्त्वा चाऽन्यत्रैनं प्रिये ! सुखम् ॥३२॥

नेमुनिरुवाच

सन्त्यज्य बालकं विप्र ! वनान्तरं जगाम सा[१८]। भेरुण्डा श्रीमता सार्द्धं बालोऽसौ निर्जनोऽचरत् ॥३३॥
अत्र ददर्श वेदर्षिश्चरन्तं बालकं वने। त्रिशीर्षं नरदेहञ्च चाऽपृच्छत्तञ्च हेतुकम् ॥३४॥

देव उवाच

को भवानत्र भीष्मे त्वं वने चरसि निर्भयम्। कस्य पुत्रोऽसि भो वत्स ! वद तत्कारणञ्च मे ॥३५॥

त्रिशीर्ष उवाच

पुत्रोऽहं पक्षिराजस्य भेरुण्डागर्भसम्भवः। त्यक्त्वा मां पितरौ चाऽत्र गतौ देशान्तरं किल[१९] ॥३६॥
क्षुत्पिपासार्दितोऽहञ्च त्रिमुखैः पवनाशनैः। क्व गच्छामि न जानामि चोपायं मे वद प्रभो ॥३७॥

हे ब्राह्मण ! त्यसरी छ महिनासम्म गर्भधारण गरिसकेपछि लहरै लहराले बेरिएको कुनै रुखमा उसले फुल पारी। समय पूर्ण भएपछि त्यस फुललाई चुच्चाले ठुँगेर कोरल्ने काम गरेकी थिई। त्यस फुलबाट तीन शिर भएको अनौठो मनुष्यशरीरधारी पुरुष पैदा भयो। त्यसलाई पक्षीराज भेरुण्डकी पत्नी भेरुण्डाले पोषण आदि क्रियाबाट पालना गरेकी थिई। यसरी त्यस पुत्रलाई बाह्र वर्षसम्म उसले पालनपोषण गरी। चुच्चा र नङ्ग्राले उठाएर त्यसलाई उड्न सिकायो। मनुष्यको शरीर भएको हुँदा त्यो उड्न सकेन। अनि त्यसबाट हुने डरलाई सम्झँदै पक्षीराज भेरुण्डले आफ्नी पत्नी भेरुण्डालाई भन्न लाग्यो ॥२७–३०॥

पक्षीराजले भन्यो – त्यो नउड्ने छोरामा प्रेम छोडिदेऊ। यसले हामीहरूको के कार्य सिद्ध गर्ला ! यसको रक्षाबाट ठूलो इच्छापूर्ति हुँदैन। हे प्रिय ! यसले हामीलाई अवश्य नै मार्नेछ। यसको मनुष्य शरीर हेर त ! यसमा शङ्का छैन। त्यसैले हे प्यारी ! यसलाई यसै ठाउँमा छोडेर हामी तुरुन्त अन्यत्र गई सुखपूर्वक बसौं ॥३१–३२॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! त्यसपछि त्यो पक्षीकी पत्नी भेरुण्डा बालकलाई त्यसै ठाउँमा छोडेर आफ्नो पनि भेरुण्डका साथ अन्यत्र गई। बालक एक्लै जङ्गलमा हिँड्न थाल्यो। वनमा घुम्न लागेको तीन शिर भएको मनुष्यशरीरधारी त्यस बालकलाई नारदले देख्नुभयो र त्यसको कारण त्यस बालकलाई सोध्नुभयो ॥३३–३४॥

नारदले भन्नुभयो – हे बाबु ! तिमी को हौ ? तिमी कसका छोरा हौ ? यो डरलाग्दो जङ्गलमा एक्लै घुमिरहेका छौ। त्यसको कारण के हो ? मलाई बताऊ ॥३५॥

तीन शिर भएको त्यस बालकले भन्यो – म भेरुण्डाको गर्भबाट जन्मिएको पक्षीराज भेरुण्डको छोरो हुँ। मेरा आमा–बाबु मलाई यसै ठाउँमा छोडेर अन्यत्र जानुभयो। मेरा यी तीन मुखले वायु मात्र खाइरहेको छु। मलाई भोक र प्यासले सताएको छ। कहाँ जाऊँ, केही थाहा छैन। हे प्रभु ! मलाई कुनै उपाय बताइदिनुहोस् ॥३६–३७॥

---

१३. प्रेरयत्प्रोड्डनाय च, इति न.सं.पु.पाठः।
१४. अनुचरम्, इति न.सं.पु.पाठः।
१५. नरदेहाय खगः, इति न.सं.पु.पाठः।
१६. नोद्गच्छति यतो ह्ययम्, इति न.सं.पु.पाठः।
१७. महेच्छदा, इति न.सं.पु.पाठः।
१८. चान्यत्राममदाशु सा, इति न.सं.पु.पाठः।
१९. चान्यत्रदेशकम्, इति न.सं.पु.पाठः।

देव उवाच

स्नात्वा त्वं वृद्धगङ्गायामेतल्लिङ्गं समर्चय। पञ्चाक्षरं समुच्चार्य शिवशिवेति वै वदन् ॥३८॥
ततः प्राप्स्यसि[२०] रुद्रात्त्वं यदीप्सितं हृदा वरम्। भक्त्या पर्वसु चोपोष्य विधेहि[२१] निशि भोजनम् ॥३९॥

नेमुनिरुवाच

इत्युपदिश्य तस्मै स त्रिशीर्षाय मुनीश्वरः। लिङ्गमभ्यर्च्य वै तद्धि स्वाश्रमं प्रययौ द्विज ॥४०॥
सोऽपि च वृद्धगङ्गायां सस्नौ मधोः कुहौ पुनः। आदाय जलपुष्पाणि लिङ्गमेतदपूपुजत्[२२] ॥४१॥
एवं संवत्सरञ्चैकं व्याप्य लिङ्गं समर्चितम्। वैशाखपूर्णिमायाञ्च ह्याविर्भूतो महेश्वरः ॥४२॥
ददौ तस्मै वरं रुद्रः चिरञ्जीवित्वसाधकम्[२३]। पार्श्वगत्वञ्च तं दत्त्वा लिङ्गे चाऽन्तरभूत् पुनः[२४] ॥४३॥
तमास्थाय गणा रौद्रा निन्युर्याने शिवालये। काले प्राप्ते दिने तत्र वसन्तञ्च त्रिशीर्षकम्[२५] ॥४४॥
सोऽप्यभवद् गणश्रेष्ठो रुद्रपार्श्वचरोऽनिशम्। त्रिशीर्षो नाम विप्रेश ! चाऽद्यापि विचरन्मुदा ॥४५॥
माहात्म्यमेतत्कथितं मयाऽस्य लिङ्गस्य मुक्तस्त्रिशिरास्तथाऽत्र।
तत्सोमलिङ्गस्य विरूप ! वक्ष्ये यस्माद्विमुक्तः शशभृङ् महत्त्वम् ॥४६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
वृद्धगङ्गाविश्वरूपेश्वरयोर्माहात्म्यं नाम द्वात्रिंशदुत्तरशततमोऽध्यायः ॥१३२॥

नारदले भन्नुभयो – हे बालक ! तिमी शिवजीका पञ्चाक्षर मन्त्र उच्चारण गरी शिव शिव भन्दै वृद्धगङ्गामा स्नान गर अनि यस लिङ्गको पूजा गर। परिश्रम गरेर भक्तिपूर्वक पर्व-पर्वमा उपवास बस, रात्रीमा भोजन गर। शिवजीबाट तिमीले चाहेअनुसारको फल पाउनेछौ ॥३८-३९॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! तीन शिर भएको त्यस पक्षीलाई यति भनेर नारदमुनि त्यहाँ रहेको लिङ्गको पूजा गरी आफ्नो आश्रमतिर जानुभयो। वैशाख महिनाको अमावास्याका दिन त्यस पक्षीले पनि वृद्धगङ्गामा स्नान गरी पानी तथा फूल लिएर यस लिङ्गको पूजा गऱ्यो ॥४०-४१½॥

एक वर्षसम्म त्रिशिराले शिवलिङ्गको पूजा गऱ्यो। वैशाखशुक्ल पूर्णिमाको दिन भगवान् शङ्कर त्यहाँ प्रकट हुनुभयो। त्यस पक्षीलाई धेरै कालसम्म बाँच्न पाउने र आफ्नो पार्श्ववर्ती बन्न पाउने वर दिएर अस्ताचलबाट सूर्य अन्तर्धान भएझैं भगवान् रुद्र पनि अदृश्य हुनुभयो। तीन शिर भएको त्यो पक्षी त्यसै ठाउँमा बसिरहेको थियो। समय पुगेपछि शिवजीका गणहरूले त्यसलाई यानमा राखेर शिवालयमा लगे। हे विरूपाक्ष ! त्रिशिरा पनि सधैं शिवजीको छेउमा बस्ने गणश्रेष्ठ बन्यो। आजसम्म पनि त्यो पक्षी आनन्दपूर्वक शिवजीका साथ विहार गरिरहेको छ ॥४२-४५॥

हे विरूपाक्ष ! त्रिशिरा मुक्त भएको यस लिङ्गको माहात्म्य मैले तिमीलाई बताएँ। अब चन्द्रमालाई मुक्ति दिने सोमलिङ्गको माहात्म्य पनि म तिमीलाई बताउँनेछु ॥४६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा वृद्धगङ्गा र विश्वरूपेश्वरको माहात्म्यनामक
एकसय बत्तिसौं अध्याय पूरा भयो।

---

२०. लप्स्यसि, इति न.सं.पु.पाठः। २१. यत्नेन, इति न.सं.पु.पाठः।
२२. एतल्लिङ्गमपूपुजत, इति न.सं.पु.पाठः। २३. रुद्रश्चिरञ्जीवत्वपार्श्वगम्, इति न.सं.पु.पाठः।
२४. दत्त्वा चान्तर्दधे लिङ्गे चास्ताद्रौ चैव भास्करः, इति न.सं.पु.पाठः। २५. त्रयाननम्, इति न.सं.पु.पाठः।

त्रयस्त्रिंशदुत्तरशततमोऽध्यायः

सोमलिङ्गमाहात्म्यम्

स्कन्द उवाच

भूयोऽगस्त्याऽगमद्विप्रो मुनिना तेन वै सह। यत्रास्ते सोमलिङ्गं हि दक्षशापविमोचकम् ॥१॥
सोमतीर्थे ततः स्नात्वा लिङ्गं सोऽर्चितवान् हृदा[1]। भक्त्या पञ्चोपचारैः स सर्वभावेन चेतसा ॥२॥

नेमुनिरुवाच

स दक्षेणाभिशप्तोऽभूत् सोमः पूर्वयुगे द्विज ![2]। दुहितॄणां स्वकीयानां व्यसनकारणाद् द्विज ॥३॥
सोऽभिभूतस्ततो विप्र ! यक्ष्मणा च महारुजा। दक्षक्रोधोद्भवेनेन्दुः सर्वाङ्गे कुष्ठपीडितः ॥४॥
निष्प्रयत्नोऽभवत्सोमो निस्तेजाश्च रुजार्दितः। जीवशेषो महारोगी क्वापि गन्तुमशक्तवान् ॥५॥
प्रेक्ष्य सोमं रुजार्तञ्च देवास्तत्राययुः पुनः। करवाम वयं किं वाऽब्रुवन् देवा अजादयः[3] ॥६॥
प्रेक्ष्येन्दुं दुःखदग्धास्ते चाऽभूवन् देवता भृशम्। हाहाकारोऽभवत् ज्ञात्वा दक्षशापो हि कारणम्[4] ॥७॥
प्रणम्य च विधिं देवा चाऽपृच्छन्मुक्तिकारणम्। सोमरुजञ्च शापोक्तं श्रुत्वासन् विह्वलाः समे[5] ॥८॥
आकर्ण्य वचनं तेषां देवानां हि ततो विधिः। हेतुज्ञो वचनं तेभ्यो व्याजहार तदा द्विज ॥९॥

ब्रह्मोवाच

शृणु सोम विधास्यामि तच्छापस्य च मोचनम्। येनाऽभिदूषितो देहस्त्वञ्च[6] जीवावशेषितः ॥१०॥
सिद्धपीठे महाक्षेत्रे हिमवत्सानुगह्वरे। पाशुपते च तीर्थाद्ये तत्र व्रजाऽत्रिसम्भव ॥११॥

अध्याय - १३३

सोमलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो - हे अगस्त्य मुनि ! अघि दक्षद्वारा दिइएको सरापबाट चन्द्रमालाई मुरक्त तुल्याउने सोमलिङ्ग रहेको ठाउँमा नेमुनिलाई साथमा लिएर विरूपाक्ष आए। त्यसपछि उनले सोमतीर्थमा स्नान गरे र भक्तिपूर्वक पञ्चोपचार विधि अनुसार सर्वतोभावले सोमलिङ्गको पूजा गरे ॥१-२॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! अघि आफ्ना छोरीहरूमा चन्द्रद्वारा उत्पादित आपत्तिले गर्दा दक्षप्रजापतिले चन्द्रमालाई सराप दिएका थिए। दक्षप्रजापतिका रीसले सराप पाएका ती चन्द्रमाको शरीर क्षयरोग र कुष्ठरोगले ग्रस्त भयो। तिनका सम्पूर्ण प्रयासहरू विफल भए। रोगले ग्रस्त भएर तेज हरायो। सास मात्र बाँकी रहेका महारोगी ती चन्द्रमा हिँड्नै नसक्ने भए ॥३-५॥

चन्द्रमालाई रोगले पीडित भएको देखेर देवताहरू त्यहाँ आए। त्यो देखेर ब्रह्मा आदि देवताहरूले अब के गर्ने भन्न लागे। चन्द्रमालाई देखेर सबै देवताहरू अत्यन्त दुःखित भए। त्यसको कारण दक्षको सराप हो भन्ने थाहा पाएर उनीहरूले हाहाकार गर्दै सन्ताप प्रकट गरे। विह्वल भएका देवताहरूले ब्रह्माजीलाई नमस्कार गरे। दक्षको सरापबाट पैदा भएको चन्द्रमाको रोगलाई छिट्टै हटाउने उपाय देवताहरूले ब्रह्माजीसित सोधे। हे विरूपाक्ष ! तिनीहरूको वचन सुनेर त्यसको उपाय थाहा भएका ब्रह्माजीले देवताहरूको हितका लागि भन्नुभयो ॥६-९॥

ब्रह्माजीले भन्नुभयो - हे चन्द्रमा! जुन कारणले तिम्रो सासमात्र बाँकी रह्यो। तिमी रोगी भयौ। तिम्रो त्यस सरापलाई हटाउने उपाय म बताउँछु, सुन। हे चन्द्रमा ! हिमालयको शिखरको नजिकै गुफामा तीर्थैतीर्थले भरिएको सिद्धपीठ नाम भएको पशुपतितीर्थ छ, त्यहाँ जाऊ ॥१०-११॥

---

१. सोमलिङ्गं समर्चितः, इति न.सं.पु.पाठः।
२. दक्षेण शापितः सोमः पूर्वयुगे विरूपदृक्, इति न.सं.पु.पाठः।
३. किं कुर्वामश्च कृत्वेति चास्य ब्रुवन्नजादयः, इति न.सं.पु.पाठः।
४. कृत्वा हाहीति तद्धेतुं दक्षशापस्य कारणम्, इति न.सं.पु.पाठः।
५. विह्वलास्तस्य सत्वरम्, इति न.सं.पु.पाठः।
६. हेतुं स त्वम्, इति न.सं.पु.पाठः।

कोषगङ्गाजले स्नात्वा पद्मनद्याः सुसङ्गमे। समाराधय शम्भुं त्वं भक्त्या निरशनस्तटे ॥१२॥
विमोक्ष्यति च यक्ष्मा त्वां स्वल्पशेषं विना ध्रुवम्। तच्छापगौरवात्सोम ! सद्य एव न संशयः ॥१३॥

ऋषिरुवाच

इत्याकर्ण्योपदेशन्तं सोमोऽत्राश्वाजगाम हि। प्रणम्य देवता विप्र ! ब्रह्माणञ्च शनैः शनैः ॥१४॥
कार्त्तिकस्य तु शुक्लायामष्टम्याञ्च महातिथौ। उपकरणमादाय स्नातुमत्र समाव्रजत् ॥१५॥
अत्रैव च सुखं सस्नौ सङ्कल्प्य तच्च कारणम्। सद्यो विमोचितं रुग्भिः सर्वतस्तत्कलेवरम् ॥१६॥
दध्यौ चाऽत्र शिवं सम्यग् व्याप्यैकदिव्यवत्सरम्। स्तवार्चनैस्तथा मन्त्रैस्तन्मनस्को हि भक्तितः ॥१७॥
आश्विने मासि पूर्णायामेतल्लिङ्गं महानिशि। उद्भूततेजसाऽत्यन्तं ज्वलद्दीपशिखाकृति ॥१८॥
आविर्भूतो हरो लिङ्गात् सोमं व्याचष्ट सेविनम्[७]। स्तवार्च्चनैस्ततस्तस्य तद्भक्त्या तुष्टवान्विभुः ॥१९॥

रुद्र उवाच

अद्यप्रभृति सोम त्वं कलानिधिर्भवाशु च। यथैव प्रकृतिः पूर्वं स्वल्परुजं विना पुनः ॥२०॥
तच्छापहेतुतः सोम कृष्णपक्षो भविष्यति। लोकाह्लादनहेतोश्च गच्छ व्योम्नि सुखञ्चर ॥२१॥

ऋषिरुवाच

इत्युक्त्वाऽन्तर्दधे लिङ्गं रौद्रं तत्र[८] कलानिधिः। अभूत्सोमस्ततो यज्ञमश्वमेधञ्चकार च ॥२२॥
अत्राययुः सुराः सर्वे हर्षप्रफुल्लमानसाः। आह्लादनञ्च तं प्रेक्ष्य भामिनीभिः[९] समन्तदा ॥२३॥

पद्मानदीको सङ्गमस्थल भएको कोषगङ्गा नदीको जलमा स्नान गरेर त्यसैको तटमा उपवास गरी भक्तिपूर्वक शिवजीको आराधना गर। हे चन्द्रमा ! त्यसपछि सरापबाट पैदा भएको तिम्रो क्षयरोग कत्ति पनि बाँकी नरही सबै नाश हुनेछ, यसमा शङ्का छैन ॥१२-१३॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! यो कुरा सुनेर चन्द्रमाले देवता र ब्रह्मालाई नमस्कार गरे। ब्रह्माजीले भने अनुसार चन्द्रमा तुरुन्त त्यस तीर्थमा गए। कार्तिकशुक्ल अष्टमीको महातिथिका दिन चन्द्रमा सम्पूर्ण स्नानसामग्रीहरू लिएर स्नान गर्न त्यहाँ आए। यसै ठाउँमा रोगको मुक्तिका लागि सङ्कल्प गर्दै उनले आनन्दसित स्नान गरे। त्यसपछि तुरुन्त उनको शरीर रोगमुक्त भयो ॥१४-१६॥

यसै ठाउँमा बसेर एक दिव्यवर्षसम्म एकचित्तले स्तोत्र, मन्त्र आदि जप्दै, पाठपूजा गरी चन्द्रमाले भक्तिपूर्वक शिवजीको ध्यान गरे। आश्विन महिनाको पूर्णिमाको रातमा तेजले अत्यन्त प्रकाशित दीपशिखाको रूप लिएर यस लिङ्गको आविर्भाव भयो। चन्द्रमाको पूजा, पाठ र भक्तिबाट सन्तुष्ट भएर त्रिलोकव्यापी भगवान् शिव त्यस लिङ्गबाट प्रादुर्भाव हुनुभयो र भक्त चन्द्रमालाई भन्नुभयो ॥१७-१९॥

शङ्करले भन्नुभयो - हे चन्द्रमा ! आजदेखि तिमी कलानिधि भयौ, रोग र शोकबाट मुक्त भएर तिमी पहिलेजस्तै बन्यौ, त्यही सरापको कारणले तिम्रो कला घट्दा कृष्णपक्ष हुनेछ, संसारको कल्याणका निमित्त अब तिमी स्वर्गमा जाऊ र आनन्दसित विहार गर ॥२०-२१॥

नेमुनिले भन्नुभयो - यति भनेर भगवान् शङ्कर त्यसै लिङ्गमा अन्तर्धान हुनुभयो। त्यसपछि कलाका धनी चन्द्रमाले पनि अश्वमेध यज्ञ गरे। अत्यन्त प्रसन्न भएका चन्द्रमालाई देखेर देवताहरू उनलाई भेट्न आफ्ना-आफ्ना पत्नीहरूका साथमा त्यहाँ आए ॥२३॥

---

७. भक्तिने, इति न.सं.पु.पाठः।
८. लिङ्गे रुद्रस्तदा, इति न.सं.पु.पाठः।
९. ह्यङ्गनाभिः, इति न.सं.पु.पाठः।

ततस्तारां ददर्शेन्दू रूपयौवनसुन्दरीम्। सापि ददर्श तं विप्र ! चाऽपाङ्गेन स्मितानना ॥२४॥
एकस्मिन् दिवसे[१०] सोमश्चाऽपाङ्गेनाह्वयच्च ताम्। रह आनीय ताराञ्च ह्यकामयद्यथासुखम् ॥२५॥
ततो यज्ञावसाने ते ययुः स्वर्गं मुदाऽमराः। अभिषिच्याऽत्र ते सोमं मन्त्रैर्वाद्यमहोत्सवैः ॥२६॥
कस्मिँश्चिदेव कालान्ते सोमतेजोबलान्वितः। बुधो नामाभवद्विप्र ! ताराया गर्भसम्भवः ॥२७॥
तमालोक्याशु सोमोऽसौ ह्यब्रवीदिति मे सुतः। अर्भकोऽयं सभायां संश्रावयन्सुरवृन्दकम् ॥२८॥
इत्युक्तञ्च समाकर्ण्य बृहस्पती रुषा ज्वलन्। शप्तुं समुद्यतो भूयः सोमाय संसदि ध्रुवम् ॥२९॥
ततो न्यषेधयद् ब्रह्मा सद्यः शापोद्यतं गुरुम्। क्रोधावेगेन[११] सोमाय मा माऽस्मै शप हे ब्रुवन् ॥३०॥
ततोऽपृच्छद्विधिस्तारां बृहस्पतिप्रियाञ्च ताम्। कस्यात्मजोऽर्भकश्चायं तारे तथ्यं वदेति मे ॥३१॥
आकर्ण्य ब्रह्मणो वाक्यं ताराऽब्रवीच्च संसदि। सोमतेजःसमुद्भूतो बालोऽयं तात ! ते नमः ॥३२॥
ततो बृहस्पतिस्तत्र रुषाऽविष्टश्च तत्क्षणे। शापं ददौ स्वभार्यायै पुँश्चली भव सत्वरम् ॥३३॥
माऽबलायै च दातव्यः शापः गुरो कदापि च। इति न्यषेधयन्देवाः बृहस्पतिं तदा द्विज ॥३४॥
सापि स्वर्गादिहागत्य सोमतीर्थजलाप्लुता। ततश्चानर्च तल्लिङ्गमेतद् भक्त्या समर्हणैः ॥३५॥
सापि लेभे च सौन्दर्यं पूर्वस्य त्रिगुणं पुनः। अभूत्प्रियतमा तारा बृहस्पतेर्गरीयसी ॥३६॥
एतल्लिङ्गस्य माहात्म्यं भूयः शृणु वदामि ते। पूर्वं मुक्तोऽत्र गन्धर्वश्चैतस्य हि प्रसादतः ॥३७॥
सभामध्ये स्थिते शक्रे गन्धर्वं समुपस्थितम्। युवानं सुन्दरं प्रेक्ष्य शची स्मिताननाऽभवत् ॥३८॥

त्यसपछि चन्द्रमाले रूप र यौवनले सुन्दरी भएकी बृहस्पतिकी पत्नी तारालाई देखे। हँसिलो मुख भएकी ताराले पनि चन्द्रमालाई कटाक्षपूर्वक हेरिन्। कुनै दिन चन्द्रमाले आँखा सन्काई तारालाई यहाँ बोलाए र उनीसित एकान्तस्थलमा आनन्दसित विहार गरे। यज्ञ सकिएपछि मन्त्रोच्चारण, वाद्यवादन आदि उत्सवद्वारा चन्द्रमालाई अभिषेक गरेर सबै देवताहरू प्रसन्न हुँदै स्वर्गतिर गए ॥२४-२६॥

केही समयपछि चन्द्रमाको तेजोबलले पूर्ण भएको बुध नामक पुत्र ताराको गर्भबाट उत्पन्न भयो। त्यस बालकलाई देखेर सभामा यो बालक मेरो पुत्र हो भनेर देवतालाई चन्द्रमाले सुनाए। यो कुरा सुन्नासाथ रीसले आगो भएका बृहस्पतिले त्यसै सभामा चन्द्रमालाई सराप दिन खोजे। सराप दिन तयार भएका बृहस्पतिलाई ब्रह्माजीले निषेध गर्दै नबुझीकन चन्द्रमालाई सराप नदेऊ भनेर सम्झाउनुभयो ॥२७-३०॥

त्यसपछि ब्रह्माजीले बृहस्पतिकी पत्नी तारालाई – हे तारा ! यो कसको छोरो हो ? साँचो भन भनी सोध्नुभयो। ब्रह्माजीको कुरा सुनेर ताराले त्यस सभामा भनिन् – यो बालक चन्द्रमाको तेजबाट पैदा भएको हो। हे ब्रह्माजी ! हजुरलाई नमस्कार छ। त्यसपछि बृहस्पतिले रिसाएर तुरुन्त नै 'वेश्या भएस्' भनी आफ्नी पत्नीलाई सराप दिए। 'हे बृहस्पति ! यी अबलालाई सराप नदिनुहोस्' भनेर देवताले बृहस्पतिलाई सराप दिनबाट निषेध गरे। ती तारा पनि स्वर्गबाट यहाँ आइन्। सोमतीर्थमा स्नान गरेर विभिन्न सामग्रीहरू साथमा लिई भक्तिपूर्वक ताराले सोमेश्वर भगवान्को पूजा गरिन्। ताराले पहिलेको भन्दा तीन गुणा बढी सौन्दर्य प्राप्त गरिन् र बृहस्पतिकी प्रियतमा भएर बसिन् ॥३१-३६॥

यस लिङ्गको माहात्म्य म तिमीलाई फेरि बताउँछु, सुन – अघि यसै लिङ्गको अनुग्रहबाट यस ठाउँमा कुनै गन्धर्व मुक्त भएको थियो। इन्द्रमहाराज सभामा बसिरहेको बेला एउटा गन्धर्व आइपुग्यो। सुन्दर युवक त्यस गन्धर्वलाई देखेर इन्द्राणी मुसुक्क हाँसिन् ॥३८॥

---

१०. अत्र कश्चिद्दिने, इति न.सं.पु.पाठः।

११. आस्याते चैव, इति न.सं.पु.पाठः।

विव्वोकेन स्मितार्द्रेण ददर्श सुस्वरञ्च सा। सोऽपि तथाविधो जातः[१२] समक्षे विबुधद्रुहाम् ॥३९॥
तच्चेष्टां द्यौष्पतिर्ज्ञात्वा सुस्वराय शशाप च। व्रीडाप्रवीडितः क्रोधाद् देवर्षीणाञ्च संसदि[१३] ॥४०॥
रे रे सुस्वर ! मर्त्यस्त्वं भूत्वा मूढ पत ध्रुवम्। अवजानासि मां यस्मात् सभायां त्रिदशालये[१४] ॥४१॥
ततश्च नारदाच्छ्रुत्वा गन्धर्वोऽसाविहागमत्। तीर्थानां प्रवरं ज्ञात्वा तीर्थं शापविमोचकम् ॥४२॥
सस्नौ तत्र मुदा भक्त्या मुक्तोऽसौ शापदूषणात्[१५]। मूकत्वञ्च जहौ स्नानादभूद्यथा पुरा स्वरः ॥४३॥
कार्त्तिकस्य चतुर्दश्यां शुक्लायां स्नातकः पुनः। एतल्लिङ्गं निशामध्ये भक्त्यापूपुजदर्हणैः ॥४४॥
नित्यमुपासते चैतत् मुखवाद्यैश्च पूजनैः। रुद्रकीर्त्युभवैर्गीतैर्भक्त्या नम्रः परिक्रमन् ॥४५॥
षण्मासाभ्यन्तरे रुद्रो ददौ तस्मै वरोत्तमम्। त्रिनेत्रत्वञ्च श्रेष्ठत्वं[१६] तद्गीततोषितो मुदा ॥४६॥
तमास्थाय विमाने तु निन्युः शैवं गणाश्च वै। अद्यापि सोऽभवद्विप्र ! रुद्रस्यानुचरोऽनिशम् ॥४७॥
भूयो व्रज विरूपाक्ष ! यत्रास्ति गोभराटजः। षट्शतधनुषां दूरे ह्यतो याम्यदिशि ध्रुवम् ॥४८॥

एवन्माहात्म्यं कथितं मया ते, तीर्थस्य सोमाख्यवरस्य विप्र।
लिङ्गस्य चैतस्य पुनर्माहात्म्यम्, वक्ष्यामि चान्यस्य तथाहि तत्र ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
सोमलिङ्गमाहात्म्यं नाम त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥१३३॥

हे विरूपाक्ष ! इन्द्राणीले सुन्दर एवं युवा त्यस गन्धर्वलाई विलास र मुस्कानका साथ हेरिन्। त्यस गन्धर्वले पनि देवताहरूको माझमा इन्द्राणीलाई त्यसरी नै हेऱ्यो। देवर्षिले युक्त भएको त्यस सभामा लाजले भुतुक्क भएका इन्द्रले रिसाउँदै त्यस गन्धर्वको चेष्टा बुझेर सराप दिए– हे मूर्ख गन्धर्व ! मलाई र यस सभामा उपस्थित भएका देवताहरूलाई जुन कारणले तैंले अपमान गरिस्, त्यसैले तेरो मनुष्ययोनिमा जन्म होस् ॥३९–४१॥

त्यसपछि नारदजीबाट तीर्थहरूमा श्रेष्ठ र सरापलाई हटाउन सक्ने यो सोमतीर्थ उत्तम छ भन्ने थाहा पाएर त्यो गन्धर्व यहाँ आयो। आनन्दसित भक्तिपूर्वक यस तीर्थमा स्नान गरेपछि त्यो गन्धर्व मुक्त भयो र स्नानले गर्दा चाँडै नै लाटोपनलाई छाडेर पहिले जस्तै उसको राम्रो स्वर भयो। कार्तिकशुक्ल चतुर्दशीका दिन त्यसले फेरि त्यहाँ स्नान गऱ्यो। पूजासामग्री लिएर भक्तिपूर्वक त्यसले रातमा शिवलिङ्गको पूजा गऱ्यो। भक्तिले नम्र भएको त्यो गन्धर्व यताउति घुम्थ्यो, बाजा बजाउँथ्यो, पूजा र भजनले सधैँ शिवजीको सेवा गर्थ्यो। छ महिनाको बीचमा प्रमथनाथ त्रिनयन भगवान् शङ्करले उसको गीतबाट प्रसन्न भएर उसलाई उत्तम वर प्रदान गर्नुभयो। शिवजीका गणहरूले त्यस गन्धर्वलाई विमानमा राखेर शिवलोकमा लगे। त्यो गन्धर्व आज पनि शिवजीको सेवक भएर निरन्तर बसिरहेको छ ॥४२–४७॥

हे विरूपाक्ष ! अब तिमी यहाँबाट बाह्र सय गज दक्षिणतिर रहेको क्षेत्रमा जाऊ। त्यहाँ गोभराटेश्वर शिवलिङ्ग रहेको छ। हे विरूपाक्ष ! मैले तिमीलाई सोमतीर्थ र सोमेश्वर लिङ्गको माहात्म्य बताएँ। अरू पनि माहात्म्य म त्यसै ठाउँमा बताउनेछु ॥४८–४९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा सोमलिङ्गको माहात्म्यनामक
एकसय तेतिसौं अध्याय पूरा भयो।

---

१२. तथाविधं विप्र !, इति न.सं.पु.पाठः।
१३. क्रोधाद्देवर्षिभिः समावृते, इति न.सं.पु.पाठः।
१४. यस्माद्देवसभां त्रिविष्टपात्, इति न.सं.पु.पाठः।
१५. सुस्वेदस्तदा, इति न.सं.पु.पाठः।
१६. त्रिनेत्रं प्रमथश्रेष्ठम्, इति न.सं.पु.पाठः।

चतुस्त्रिंशदुत्तरशततमोऽध्यायः

गोशृङ्गतीर्थ–गोभराटेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो नेमुनिना समं मुने। गोभराटेश्वरो यत्र चक्रनेमिगिरेरधः ॥१॥
मधोः शुक्लस्य विप्रोऽसौ द्वादश्यां स्नातवान्[1] तदा। शृङ्गतीर्थे ततोऽगस्त्य ! गोभराटेशमार्चयत्[2] ॥२॥
सम्पूज्य विधिवल्लिङ्गं भक्त्या पञ्चोपचारकैः। सोऽपृच्छन्नेमुनिं रात्रौ माहात्म्यं तीर्थलिङ्गयोः ॥३॥
व्याजहार शुभं वाक्यं तस्मै च नेमुनिस्तदा। आकर्ण्य तद्वचोऽगस्त्य ! भक्त्या प्रोक्तं महानिशि ॥४॥

ऋषिरुवाच

पूर्वोक्ता कामधेनुर्या चन्द्रवदद्रिगह्वरे। समास्ते हि सदा सेवमाना तं[3] पशुपेश्वरम् ॥५॥
तस्याः शृङ्गात्समुद्भूता नदी पुण्यतमाभवत्। गोशृङ्गीति समाख्याता तस्मात्सर्वजनैर्द्विज ॥६॥
चक्रावती सरिच्छ्रेष्ठा चक्रनेम्यद्रिसम्भवा। तयोश्च सङ्गमे तीर्थं गोशृङ्गमिति तच्छ्रुतम् ॥७॥
शृङ्गी ऋषिः पुरा तत्र सस्नौ भक्त्या यथाविधि। कामधेनुं ददर्शार्यां पशुपतेः समागताम् ॥८॥
अत्रैव गोमयं त्यक्त्वा[4] चाऽगमत्तद्धि कन्दराम्। शृङ्गिणा गोमयं प्राप्य रुद्रबुद्ध्या समर्चितम्[5] ॥९॥
आषाढस्य चतुर्दश्यां कृष्णायामर्चिते निशि। समुद्भूतं ततो लिङ्गं[6] शृङ्गी ददर्श तैजसम् ॥१०॥
गोभरात्सम्भवो यस्माद् गोभराटेश्वरस्ततः। कृत्वाऽस्य नामधेयञ्च ह्यपूपुजत्समर्हणैः ॥११॥

अध्याय – १३४

गोशृङ्गतीर्थ र गोभराटेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर चक्रनेमि पर्वतको फेदीमा रहेको गोभराटेश्वर क्षेत्रमा गए। हे अगस्त्य मुनि ! वैशाखशुक्ल द्वादशीका दिन विरूपाक्षले शृङ्गतीर्थमा गएर स्नान गरे। हे अगस्त्य मुनि ! त्यसपछि उनले गोभराटेश्वर महादेवको पूजा गरे। विधिपूर्वक पञ्चोपचार विधिले सभक्ति लिङ्गको पूजा गरेर विरूपाक्षले राति तीर्थ र लिङ्गको माहात्म्य नेमुनिसित सोधे। हे अगस्त्य मुनि ! राति भक्तिपूर्वक विरूपाक्षले सोधेको वचन सुनेर नेमुनिले तिनलाई कल्याणमय उत्तर दिनुभयो ॥१–४॥

नेमुनिले भन्नुभयो – पहिले चर्चा गरिएकी कामधेनु गाई पशुपतिको सेवा गरेर चन्द्रवत् नाम गरेको पहाडको गुफामा बस्दछिन्। हे विरूपाक्ष ! तिनको सिङबाट अत्यन्त पवित्र नदी उत्पन्न भइन्। सबै मानिसहरूले त्यस नदीलाई गोशृङ्गी भनी नामकरण गरे। चक्रनेमि पर्वतबाट चक्रावती नाम गरेकी उत्तम नदी पैदा भइन्। ती दुई नदीको सङ्गममा रहेको तीर्थ 'गोशृङ्गतीर्थ'का नामले प्रसिद्ध छ ॥५–७॥

अघि शृङ्गी नाम गरेका ऋषिले त्यहाँ विधिपूर्वक स्नान गरे। त्यस अवसरमा उनले पशुपतिको नजिकै पुगेकी पूज्या कामधेनु गाईलाई देखे। ती गाईले त्यहाँ गोब्राइन् र गुफाभित्र पसिन्। ऋषिले त्यस गोबरलाई रुद्रको भावनाले पूजा गरे। आषाढकृष्ण चतुर्दशीको राति गोमयरुद्रको पूजा गरिसकेपछि त्यस गोबरबाट तेजिलो लिङ्ग उत्पन्न भएको शृङ्गी ऋषिले देखे। गोबरबाट उत्पन्न भएको हुँदा त्यस लिङ्गको नाम गोभराटेश्वर राखे र ऋषिले विभिन्न पूजासामग्री लिई पूजा गरे ॥८–११॥

---

१. स्नायते तदा, इति न.सं.पु.पाठः।
२. गोभराटेशमर्चितः, इति न.सं.पु.पाठः।
३. कालं सेवन्ती, इति न.सं.पु.पाठः।
४. त्यज्य, इति न.सं.पु.पाठः।
५. तद्गोमयं समासाद्य रुद्रबुध्या तमर्चितम्, इति न.सं.पु.पाठः।
६. तस्मात्समुद्भवं लिङ्गम्, इति न.सं.पु.पाठः।

सोऽपि लब्धवरः शृङ्गी चैतल्लिङ्गार्चनाद् ध्रुवम्। प्रययौ परमं स्थानं सर्वलोकैः सुदुर्लभम् ॥१२॥
अभून्नपुंसको वैश्यो भ्रष्टः स्वजातितः पुरा। रक्ततेजोमयो जातः[७] तन्मातृपितृदोषतः ॥१३॥
भ्रामं भ्रामं[८] क्षितिं देशान्तीर्थान्यायतनानि च। अत्रैव प्राप्तवान् वैश्यस्तदङ्गमुक्तिकामुकः ॥१४॥
गोशृङ्गाख्ये महातीर्थे सस्नौ विरक्तमानसः। तन्निन्द्याङ्गञ्च सन्त्यक्तुं सङ्कल्प्याशु विरक्तधीः ॥१५॥
तद्योनिं त्यक्तवान् वैश्यो स्नानमात्रेण तज्जले। समुत्तीर्णो जलाद् भूयश्चादर्शत्स्वतनुं शुभाम् ॥१६॥
हर्षविस्फारनेत्रोऽसौ चाऽत्राययौ मुदान्वितः। कस्मादपि मुनेः श्रुत्वा चैतल्लिङ्गं समार्चयत्[९] ॥१७॥
उपहारं ददौ वैश्यः सौवर्णञ्चैव शूलिने। तच्छत्राच्छादितं लिङ्गं सुवर्णच्छत्रमुच्यते[१०] ॥१८॥
द्वादशाब्दं मुदा व्याप्य चैनमपूपुजद् द्विज। गायन् रुद्रयशो वैश्यः भक्त्या नानोपहारकैः ॥१९॥
पौषस्य पूर्णिमायाञ्च निन्युशशिवपुरं विशम्। तमास्थाय महायाने रौद्रा गणा[११] महोत्सवैः ॥२०॥
सैवाभवत्पुनर्विप्र ! रुद्रस्यानुचरोऽनिशम्। महापराक्रमोपेतो नागायुतबलान्वितः ॥२१॥
गोदावर्यां कृतस्नानो जनो भवति सिद्धिराट्[१२]। संवत्सरकृतैः पापैर्मुच्यते नाऽत्र संशयः ॥२२॥
एतत्कुण्डे नरः स्नात्वा कामधेनुञ्च योऽर्चति। सर्वतीर्थमयीं साक्षाज्जलमूर्तिं शृणु द्विज ॥२३॥
अर्के सिंहगते तत्र स्नानात् पुण्यं महत् भवेत्[१३]। कोटितीर्थेषु स्नानाच्च यत्फलं तच्च लभ्यते[१४] ॥२४॥

पूजा गरेको प्रभावले गर्दा ती शृङ्गी ऋषि पनि इच्छा अनुसारको वर प्राप्त गरी अत्यन्त दुर्लभ सर्वोत्तम गतिमा पुगे। हे विरूपाक्ष ! अघि आफ्ना आमा र बाबुको दोषले गर्दा कुनै वैश्य जातिबाट च्युत भएर नपुंसक भएको थियो। त्यसको शरीरको वर्ण पनि रातै थियो। पृथ्वी, देश, तीर्थ र देवस्थल घुमेर खिन्न चित्त हुँदै त्यो वैश्य आफ्नो शरीरको मुक्तिका लागि यसै ठाउँमा आयो। आफ्नो निन्दनीय अङ्गलाई त्याग गर्ने सङ्कल्प गर्दै विरक्त बुद्धि भएको त्यस वैश्यले तुरुन्त गोशृङ्ग नाम गरेको महातीर्थमा स्नान गऱ्यो ॥१२-१५॥

त्यस वैश्यले त्यस तीर्थको जलमा स्नान गर्नासाथ त्यस योनिलाई परित्याग गरेको थियो। जलबाट बाहिर निस्किएपछि उसले आफ्नो शरीरलाई सुन्दर बनेको देख्यो। अत्यन्त हर्षित भएर प्रसन्न हुँदै यो वैश्य फेरि यहाँ आयो। कुनै मुनिको मुखबाट महिमा सुनेर उसले यस सोमेश्वर लिङ्गको पूजा गऱ्यो। त्यस वैश्यले भगवान् शङ्करलाई सुनको उपहार दियो। त्यसले चढाएको छाताले यो लिङ्ग ढाकिएको हुँदा यसलाई सुवर्णछत्र पनि भनिन्छ ॥१६-१८॥

हे विरूपाक्ष ! त्यसले बाह्र वर्षसम्म प्रसन्न भएर भक्तिपूर्वक शिवजीको भजन गर्दै विभिन्न उपहारहरू चढाएर शिवलिङ्गको पूजा गऱ्यो। पौषपूर्णिमाको दिन त्यस वैश्यलाई ठूलो आकारको विमानमा राखेर शिवजीका गणहरूले उत्सव गर्दै शिवलोकमा लगे। त्यही वैश्य हात्तीको जस्तो बल र ठूलो पराक्रमले युक्त भएर शिवजीको सेवक भई निरन्तर बसिरहेको छ। हे विरूपाक्ष ! गोदावरी महातीर्थमा स्नान मात्रै गऱ्यो भने पनि एक वर्षसम्म गरेका पापबाट मानिस मुक्त हुन्छ, यसमा शङ्का छैन।

साक्षात् जलमूर्ति र सम्पूर्ण तीर्थस्वरूप भएको गोदावरी कुण्डमा स्नान गरेर जसले कामधेनु गाईको पूजा गर्छ त्यसको फल सुन। सूर्य सिंहराशिमा गएको बेला जसले यस तीर्थमा स्नान गर्छ त्यसलाई साढे तीन करोड तीर्थमा दान गरेको फल प्राप्त हुन्छ। ॥१९-२२॥

---

७. रक्ततेजः समेनार्य !, इति न.सं.पु.पाठः। ८. भ्राम्यमाणः, इति न.सं.पु.पाठः।
९. कश्चिन्मुनिमुखाच्छ्रुत्वा चैतल्लिङ्गं समर्चितम्, इति न.सं.पु.पाठः। १०. सुवर्णच्छत्र मुच्यतः, इति न.सं.पु.पाठः।
११. रुद्रगणान्, इति न.सं.पु.पाठः।
१२. गोदावरीमहातीर्थे स्नानमात्रेण सिद्धिराट्, इति न.सं.पु.पाठः।
१३. सिंहस्थेऽर्के यदा प्राप्ते विशेषेण तदा पुनः, इति न.सं.पु.पाठः।
१४. तिस्रः कोट्योऽर्द्धकोटीनां स्नात्वा तत्र फलं भवेत्, इति न.सं.पु.पाठ

श्रावणे पूर्णिमायां यः स्नात्वा पूजति शङ्करम् । आजन्म स्वकृतैः पापैर्मुच्यते तत्क्षणाद् द्विज ॥२५॥
चन्द्रवच्छैलमारुह्य चित्रह्रदे नरोत्तमः । संस्नाति[१५] विधिना योऽत्र दशपापैः प्रमुच्यते ॥२६॥
स्नात्वा चन्द्रावतीं देवीं धातुरम्यां प्रणम्य च[१६] । सर्वपापं परित्यज्य चन्द्रलोकं स गच्छति ॥२७॥
तदधो रूपतीर्थे या स्त्रीणां रूपफलप्रदे । संस्नाति पूर्णिमायाञ्च सर्वमासेषु सा शृणु[१७] ॥२८॥
रूपसौन्दर्य्यमाप्नोति सर्वपापैर्विमुच्यते । लोकानां क्षोभिणी भूत्वा पत्युः सा प्रेयसी भवेत्[१८] ॥२९॥
अतो गच्छ विरूपाक्ष ! नैर्ऋत्याख्यां[१९] दिशं ध्रुवम् । योजनार्द्धे मया सार्द्धं यत्र भृङ्गेश्वरो विभुः ॥३०॥
माहात्म्यमेतत् कथितं विरूप ! चाऽस्यैव तीर्थस्य च साम्प्रतं हि ।
तत्रैव वक्ष्यामि च ते महत्त्वं[२०] महाद्भुतं यच्छृणु तत्कथाञ्च ॥३१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
गोशृङ्गतीर्थगोभराटेश्वरयोर्माहात्म्यं नाम चतुस्त्रिंशदुत्तरशततमोऽध्यायः ॥१३४॥

हे विरूपाक्ष ! श्रावणपूर्णिमाको दिन यस कुण्डमा स्नान गरेर जसले शङ्करको पूजा गर्छ त्यो तुरुन्त जन्मभरि गरेको पापबाट मुक्त हुन्छ । चन्द्रवान् नाम गरेको पर्वतमा चढेर चित्रदहमा जसले विधिपूर्वक स्नान गर्छ त्यो दश किसिमका पापबाट मुक्त हुन्छ ॥२३–२६॥

सम्पूर्ण धातुले युक्त हुनाले रमणीय एवं दिव्यगुणसम्पन्न बनेकी चन्द्रावती नाम गरेकी नदीमा स्नान गऱ्यो भने त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त भएर चन्द्रलोक जान्छ । त्यसभन्दा तलतिर स्त्रीहरूलाई सौन्दर्य प्रदान गर्ने रूपतीर्थ छ । सबै महिनाको पूर्णिमाको दिन त्यहाँ स्नान गर्दा प्राप्त हुने फल सुन । जुन स्त्रीले त्यस तीर्थमा स्नान गर्छे, त्यो सम्पूर्ण पापबाट मुक्त हुन्छे, रूप र सौन्दर्यले युक्त भएर दुनियाँलाई मोहित गराउन सक्छे र पतिकी प्रीतिपात्र बन्छे। हे विरूपाक्ष ! यहाँबाट नैर्ऋत्य दिशामा आधा योजन पर भृङ्गेश्वर महादेव हुनुहुन्छ, मसित त्यहाँ हिँड ॥२७–३०॥

हे विरूपाक्ष ! तिमीलाई मैले यस तीर्थको माहात्म्य अहिले नै बताएँ । अरु अद्भुत माहात्म्य र कथा म त्यसै ठाउँमा बताउनेछु ॥३१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा गोशृङ्गतीर्थ र गोभराटेश्वर शिवलिङ्गको माहात्म्यनामक एकसय चौतिसौं अध्याय पूरा भयो ।

---

१५. स्नायते, इति न.सं.पु.पाठः ।
१६. स्नात्वा चन्द्रवतीं देवीं सर्वधातुमयीं हि यः, इति न.सं.पु.पाठः ।
१७. तच्छृणु, इति न.सं.पु.पाठः ।
१८. प्रेयसी साऽभवत्पते, इति न.सं.पु.पाठः ।
१९. नैर्ऋत्यस्य, इति न.सं.पु.पाठः ।
२०. माहात्म्यम्, इति न.सं.पु.पाठः ।

पञ्चत्रिंशत्तमोऽध्यायः

भृङ्गेश्वरशिवलिङ्गमहिमा

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो निशम्य तद्वचो मुदा। तेन सार्द्धं घटोद्भूत ! यत्र भृङ्गेश्वरो विभुः ॥१॥
सिद्धरसे महाकुण्डे सस्नौ भक्त्या यथाविधि। तर्पयित्वा[1] च देवर्षीन् सङ्कल्प्य कुशहस्तकः ॥२॥
सिद्धदेहोऽभवत्सोऽपि भृङ्गेश्वरमपूपुजत्। त्रयोदश्यामुपोष्यार्य चतुर्दश्यां मधोः सिते ॥३॥
सोऽपृच्छन्नेमुनिं भक्त्या तन्माहात्म्यं महानिशि। प्रणम्य शिरसा भूमौ तत्कथाश्रवणोत्सुकः ॥४॥

विरूपाक्ष उवाच

मुक्तिमार्गप्रदार्येश नमस्तुभ्यं मुनीश्वर। भूयश्च श्रोतुकामोऽहं कथां दिव्यां फलप्रदाम् ॥५॥
वदोद्भूतं कथं[2] लिङ्गमेतन्महावने विभो। पुष्पितैः कुसुमैराढ्ये[3] फलोद्भवद्रुमाकुले ॥६॥

ऋषिरुवाच

शृणु वत्स प्रवक्ष्यामि यद्वृत्तान्तं पुराऽभवत्। कैलाशशिखरे रम्ये नानारत्नोपशोभिते ॥७॥
नन्दी भृङ्गी सदा द्वारि चेश्वरस्य च तस्थतुः। तद् द्वारं रक्षयन्तौ तौ[4] दण्डपाणी विरूपदृक् ॥८॥
तयोराज्ञां विना तत्र प्रवेष्टुं त्रिदशा अपि[5]। ब्रह्मादयोऽपि विप्रेश ! न शेकुस्ते कदाचन[6] ॥९॥
एकदा दिवसे विप्र ! पार्वत्यै शङ्करो रहः। अपूर्वाञ्च कथां[7] दिव्यामब्रवीद्रत्नमन्दिरे ॥१०॥

अध्याय – १३५

भृङ्गेश्वर शिवलिङ्गको महिमा

सूतजीले भन्नुभयो – हे शौनक आदि ऋषिहरू ! नेमुनिको भनाइ सुनेर जहाँ भृङ्गेश्वर भगवान् हुनुहुन्छ त्यसै ठाउँमा उहाँलाई साथमा लिएर विरूपाक्ष गए। उनले सिद्धरस महाकुण्डमा स्नान गरे, कुशजल हातमा लिएर सङ्कल्प गरी भक्तिपूर्वक देवता र ऋषिहरूलाई तर्पण दिए। उनको शरीर सिद्ध भयो। विरूपाक्षले वैशाखशुक्ल त्रयोदशीका दिन निराहार बसी चतुर्दशीका दिन भृङ्गेश्वर भगवान्‌को पूजा गरे। भूमिमा शिर झुकाउँदै विरूपाक्षले नेमुनिलाई नमस्कार गरे। अनि यस लिङ्गका बारेमा सुन्न चाहने ती ब्राह्मणले राति नेमुनिसित त्यस लिङ्गको माहात्म्य भक्तिपूर्वक सोधे ॥१–४॥

विरूपाक्षले भने – मुक्तिको बाटो देखाउने हे मुनिश्रेष्ठ ! हजुरलाई नमस्कार छ। म फेरि फलदायक दिव्य कथा सुन्न चाहन्छु। हे प्रभु ! विभिन्न किसिमका फूलले परिपूर्ण र फलेका वृक्षहरूले व्याप्त यस घना जङ्गलमा भृङ्गेश्वर लिङ्गको उत्पत्ति कसरी भयो ? बताउनुहोस् ॥५–६॥

नेमुनिले भन्नुभयो – हे बाबु ! विभिन्न रत्नले सुशोभित सुन्दर कैलास पर्वतमा जुन वृत्तान्त अघि घटेको थियो, त्यो बताउँछु, सुन। हे विरूपाक्ष ! नन्दी र भृङ्गी नाम गरेको दुईवटा शिवगण भगवान् शङ्करको ढोकामा लट्ठी लिएर रक्षाका लागि पालो बसेका थिए। हे विरूपाक्ष ! ती दुईको आज्ञा नलिईकन ब्रह्मा आदि देवताहरू पनि कहिल्यै त्यहाँभित्र पस्न सक्दैनथे। हे विरूपाक्ष ! एक दिन भगवान् शङ्करले रत्नमन्दिरको एकान्तस्थलमा दिव्य एवं अपूर्व कथा पार्वतीलाई भन्न लाग्नुभयो ॥७–१०॥

---

१. सन्तर्प्य स, इति न.सं.पु.पाठः।
२. कथं वदोद्भवम्, इति न.सं.पु.पाठः।
३. नानापुष्पप्रफुल्लाढ्ये, इति न.सं.पु.पाठः।
४. रक्षयन्नित्यम्, इति न.सं.पु.पाठः।
५. देवास्तत्रान्तरे प्रवेशितुम्, इति न.सं.पु.पाठः।
६. शेकुञ्च कदापि ते, इति न.सं.पु.पाठः।
७. अपूर्वकथाम्, इति न.सं.पु.पाठः।

ईश्वर उवाच

शृणु देवि प्रिये मत्तो यद्वृत्तान्तञ्च देहिनाम् । सुरासुरा न जानन्ति मम मायाविमोहिताः ॥११॥
सेवन्ते तव पादाब्जं त एव ज्ञानिनो विदुः । त्वत्सेवनेन सिद्धास्ते[८] जानन्ति योगिनो हि ते ॥१२॥
ससर्ज्जादावपो ब्रह्मा लब्ध्वा शक्तिं तव प्रिये । ततश्च मेदिनीं बीजं जन्तून् भूतैश्च पञ्चभिः[९] ॥१३॥
तद्बीजानां समाहारैस्ततो जीवन्ति देहिनः । प्राप्नुवन्ति क्रमात् पुष्टिं बलबुद्धिपराक्रमान् ॥१४॥
मायया मोहिता ये च देवि ! ते प्राणिनोऽनिशम् । त्वां च मङ्गलरूपां मां न जानन्ति कदाचन ॥१५॥

ऋषिरुवाच

तस्मिन्नवसरे भृङ्गी परित्यज्य हि नन्दिनम्[१०] । विवेशाभ्यन्तरे तत्र भृङ्गरूपेण गोपितः[११] ॥१६॥
तयोश्च यत्र संवादः पार्वतीपरमेशयोः । पूर्वमभूद्विरूपाक्ष ! तत्सर्वमशृणोद्धि सः ॥१७॥
तद्वृत्तान्तं समादाय भृङ्गी निर्गत्य सत्वरम्[१२] । जयायै स्वप्रियायै च रहोवृत्तं न्यवेदयत्[१३] ॥१८॥
व्यतीते तद्दिने देवी तत्राहूय च मातृकाः । अवोचत्तत्तदा ताभ्यो यदुक्तं शूलिना रहः ॥१९॥
आदरेण समाहूय पङ्क्तिक्रमेण मातृकाः । स्वान्तिके च चतुर्दिक्षु स्वासने चोपवेशयत् ॥२०॥

देव्युवाच

हे जये विजये साध्वि धर्मेऽधर्मे च मातृकाः । यदुक्तं गिरिशेनार्याः तच्छृणुष्व रहो निशि ॥२१॥
यद्वृत्तान्तं रहस्यञ्च देवासुराश्च मातृकाः । न जानन्तीह तद्वक्ष्ये प्रोक्तं रुद्रेण मे रहः ॥२२॥

ऋषिरुवाच

एवं हि कथयन्त्याञ्च देव्यां ताः शुश्रुवुस्तदा[१४] । जयाऽवदत् सभामध्ये विलङ्घ्य तद्वचो द्रुतम् ॥२३॥

महादेवले भन्नुभयो – हे देवी ! हे मेरी प्रिया ! मेरो मायाबाट मोहित भएर देवता र राक्षसले पनि जुन कुरा जान्दैनन्, त्यो वृत्तान्त म तिमीलाई बताउँछु, सुन । जुन महात्मा ज्ञानी योगीहरूले तिम्रो पाउरूपी कमलको सेवा गर्छन्, तिनै सिद्ध आत्मा भएका योगी पुरुषहरूले मात्र यो वृत्तान्त जान्न सक्दछन् । तिम्रो शक्ति पाएर ब्रह्माजीले सबैभन्दा पहिले पानीको सृष्टि गरे । त्यसपछि पृथिवी, बीज र पञ्चभूतका साथै प्राणीको सृजना गरे । त्यसै बीजको समूहबाट प्राणीहरू बाँच्दछन्, क्रमैसँग पुष्ट हुन्छन् र बलबुद्धि तथा पराक्रम पाउँछन् । हे देवी ! ती सबै प्राणीहरू मेरो मायाले निरन्तर मोहित भएका छन् । कल्याणस्वरूप मलाई उनीहरूले कहिल्यै पनि जान्दैनन्, अर्थात् चिन्दैनन् ॥११-१५॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! त्यसै बखतमा ढोकामा नन्दीलाई छोडेर भृङ्गी भ्रमरको रूप लिएर शिव-पार्वतको संवाद भएको स्थलमा प्रवेश गरे । उनले ती सबै कुरा सुने । त्यो वृत्तान्त लिएर भृङ्गी बाहिर निस्किए । आफ्नी पत्नी जयालाई एकान्तमा भएको त्यो वृत्तान्त बताए । त्यो दिन बितेपछि पार्वतीले मातृका देवीहरूलाई बोलाएर शिवजीले आफूलाई जुन कुरा बताउनुभएको थियो, त्यो कुरा तिनीहरूलाई भन्नुभयो । पार्वतीले बडो सम्मानका साथ ती मातृकाहरूलाई बोलाउनुभयो र आफ्नो नजिकै चार दिशामा रहेका आसनमा पङ्क्तिबद्ध क्रमले राख्नुभयो ॥१६-२०॥

देवीले भन्नुभयो – जया, विजया, साध्वी, धर्मार अधर्मा नाम गरेका हे मातृका हो ! शिवजीले एकान्तमा मलाई जुन कुरा बताउनुभयो, सुन – जुन गोप्य कुरा देवता र दानवहरूले पनि जान्दैनन्, त्यो कुरा मलाई शिवजीले बताउनुभएको छ, त्यो कुरा म बताउँछु ॥२१-२२॥

नेमुनिले भन्नुभयो – पार्वतीले यसरी भनेको मातृकाहरूले सुनिरहेका थिए । त्यसैबेला सभाको बीचबाट पार्वतीको कुरा काट्दै भृङ्गीकी पत्नी जयाले भनिन् ॥२३॥

---

८. सिद्धात्मान्, इति न.सं.पु.पाठः ।
९. जन्तून्पञ्चात्मकैस्ततः, इति न.सं.पु.पाठः ।
१०. नन्दिनं त्यज्य सांप्रतम्, इति न.सं.पु.पाठः ।
११. पक्षिणा, इति न.सं.पु.पाठः ।
१२. वै तदा, इति न.सं.पु.पाठः ।
१३. अकथयद्रहो हि यत्, इति न.सं.पु.पाठः ।
१४. एवं हि कथ्यमानायां देव्यां ताः श्रावतन्तदा, इति न.सं.पु.पाठः ।

जयोवाच

तव चरणपद्मस्य चाराधनं विनाम्बिके। न जानन्ति श्रियं मोक्षं त एव योनिजाः सदा ॥२४॥

आवयोर्मायया ये ये विमुखास्ते विमोहिता[१५]। इति किं नैव प्रोक्तं ते रहसि शूलिनाऽम्बिके ![१६] ॥२५॥

ऋषिरुवाच

विसृज्य मातृका देवी ययौ शिवान्तिकं द्रुतम्। विस्मिता सा रहोवृत्तं ज्ञानं जया कथं वदेत्[१७] ॥२६॥

चित्तेन साऽब्रवीत्[१८] देवी तया प्रोक्तञ्च शूलिने। चित्रेण चेतसा तत्तद् जयायाश्चेष्टितं द्विज ॥२७॥

देव्युवाच

प्रभो यद् भवता प्रोक्तं रहस्यमिति मे प्रभो। तद्वृत्तान्तं सभामध्ये तथैव च जयाऽब्रवीत् ॥२८॥

ऋषिरुवाच

श्रुत्वा तद्वचनं देव्याश्चेश्वरः सत्त्वरं तदा। ध्यात्वाऽब्रवीच्च तद्देव्या कथं ज्ञातमिति ब्रुवन् ॥२९॥

आहूय भृङ्गिणं शीघ्रं[१९] शशाप तत्क्षणाद्धि तम्। रुषाविष्टो महादेवो द्वाःस्थमपि विरूपदृक् ॥३०॥

ईश्वर उवाच

छन्दोवृत्तिं समाधाय भूत्वा मे द्वारपालकः। प्रविष्टश्च[२०] रहः स्थानं यद्वृत्तान्तं शृणोषि भोः ॥३१॥

रहो वृत्तान्तमादाय जयायै कथितं त्वया। कृत्वेति मे प्रिया भार्या भृङ्गिन् त्वं कितवोऽसि च ॥३२॥

यस्माद्रहःप्रवृत्तिर्मे भृङ्गिन् ! प्रोक्ता त्वया च यत्। स्वप्रियायै ह्यतो भ्रष्टस्तस्मात्त्वं मानुषो भव ॥३३॥

ऋषिरुवाच

श्रुत्वा शापं तदा भृङ्गी वेपथुविग्रहोऽभवत्। प्रणम्याश्रुमुखो रुद्रमप्रार्थयद्विमोचनम् ॥३४॥

जयाले भनिन् – हे पार्वती ! हजुरको पाउरूपी कमलको आराधना नगरीकन विभिन्न योनिमा जन्मिएका प्राणीहरूले कहिल्यै कल्याण र मोक्षका बारेमा ज्ञान गर्न सक्दैनन्। तपाईंको र शिवजीको मायाद्वारा सम्पूर्ण ती प्राणीहरू मोहित भएका छन्। यही कुरा तपाईंलाई शिवजीले एकान्तस्थलमा भन्नुभएको हो ॥२४–२५॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! त्यो कुरा सुनेर चकित भएकी पार्वती तुरुन्तै मातृकालाई त्यसै ठाउँमा छोडेर जयाले त्यो वृत्तान्त कसरी जानी भन्ने कुरा मनमा खेलाउँदै शिवजीको नजिकमा जानुभयो ॥२६–२७॥

पार्वतीले भन्नुभयो – हे प्रभु ! तपाईंले जुन रहस्यमय कुरा मलाई बताउनुभएको थियो, त्यही वृत्तान्त सभामा त्यसरी नै जयाले भनी ॥२८॥

ऋषिले भन्नुभयो – हे विरूपाक्ष ! पार्वतीको त्यो कुरा सुनेर शिवजीले तुरुन्तै ध्यानदृष्टिबाट यो कुरा कसरी जयाले थाहा पाई भनेर विचार गर्नुभयो। त्यसपछि रीसले युक्त हुनुभएका शिवजीले भृङ्गीलाई बोलाउनुभयो र आफ्नो महलमा पाले बसेको भए तापनि तिनलाई सराप दिनुभयो ॥२९–३०॥

शिवजीले भन्नुभयो – हे भृङ्गी ! मेरो पाले भएर आफ्नो भेष बदली भमराको रूप लिएर तैँले मेरो गोप्य कुरा सुनिछन्, त्यो गोप्य वृत्तान्त तैँले आफ्नी पत्नी जयालाई भनिछस्। त्यसैले तँ छली होस्। जुन कारणले मेरो गोप्य कुरा तैँले आफ्नी प्रियालाई भनिस्, त्यसै कारणले तैँले यहाँबाट भ्रष्ट भएर मनुष्ययोनिमा जन्म लिनु परोस् ॥३१–३३॥

नेमुनिले भन्नुभयो – त्यो सरापलाई सुनेर भृङ्गी थर्थरी काँपे। आँखाभरि आँसु पारेर शिवजीलाई नमस्कार गरे र सरापको मुक्तिका लागि अनुरोध गरे ॥३४॥

---

१५. **सर्वं तद्विमुखैर्विमोहितम्, इति न.सं.पु.पाठः।**
१६. **इत्युक्तञ्च हि ते देवि ! रहसि शूलिनाम्बिके, इति न.सं.पु.पाठः।**
१७. **अद्भुतात्मा कथं ज्ञानं तद्धि कृत्वेति चेतसा, इति न.सं.पु.पाठः।**
१८. **अब्रवीत् सहसा, इति न.सं.पु.पाठः।**
१९. **त्वरितं भृङ्गी, इति न.सं.पु.पाठः।**
२०. **प्रवेशितः, इति न.सं.पु.पाठः।**

भृङ्गी उवाच

क्षमस्व भगवान्देव चागांसि मे ह्यजानतः। अज्ञेनैव कृतं यत्तद् क्षन्तव्यं विभुनानिशम् ॥३५॥
रजोमूढात्मने मे त्वं शापान्तं ब्रूहि शङ्कर। कैतवं संश्रितेनेश तत्कृतञ्च मया ततः ॥३६॥

रुद्र उवाच

हिमवद्गह्वरेऽरण्ये नानापुष्पोपशोभिते। करवीराभिधाने भो तत्र प्रतप्यतां मयि ॥३७॥
शताब्दान्ते ततो दिव्ये शापान्ते सति वै मम[२१]। दास्यामि ते वरं नूनं मत्पार्श्वस्थो भविष्यसि[२२] ॥३८॥

ऋषिरुवाच

आकर्ण्य तद्वचो भृङ्गी कैलाशाच्च विनिर्ययौ। भूत्वा मानुषरूपोऽसौ विहाय देवविग्रहम् ॥३९॥
भूत्वा मुनिर्मुनिश्रेष्ठः सर्वसत्त्वदयाकरः। षट्कर्मसु रतो नित्यं वेदाध्ययनतत्परः ॥४०॥
अध्यास्ते चात्र भृङ्गी वै प्रेक्ष्य वनं मनोहरम्। पुष्पफललतोपेतं करवीरोपशोभितम् ॥४१॥
तेपे भृङ्गी भृशञ्चात्र रुद्राराधनतत्परः। कुण्डलिनि ह्रदे स्नात्वा षट्कर्मनिरतः शुचिः ॥४२॥
भूत्वाऽसौ निश्चलो भृङ्गी जजाप तन्मनुं हृदा। व्याप्य द्वादशदिव्याब्दं त्रिविधाभिश्च भक्तिभिः[२३] ॥४३॥
वैशाखपूर्णिमायाञ्च लिङ्गस्यास्य समुद्भवः[२४]। राजते पुरतस्तस्य ज्योतिर्मयं महानिशि ॥४४॥
प्रेक्ष्य लिङ्गं तदा भृङ्गी हर्षप्रफुल्लमानसः। प्रचक्रमे मुदा स्तोतुं परिक्रम्यार्चयन्पुनः ॥४५॥

भृङ्गीले भने – हे भगवान् ! नजान्ने मूर्खले गरेको अपराधलाई क्षमा गर्नुहोस्। मैले नजानीकन जुन काम गरें, हजुरले त्यसमा क्षमा गरिदिनुपर्छ। रजोगुणले गर्दा मूढबुद्धि भएर छल गरी जुन काम मैले गरें र सराप पाएँ त्यस सरापबाट मुक्त हुने उपाय बताउनुहोस् ॥३५-३६॥

महादेवले भन्नुभयो – हे भृङ्गी ! विभिन्न थरी फलफूलले सुशोभित करवीर नाम गरेको गुफामा गएर मलाई प्राप्त गर्नका लागि तिमी तपस्या गर। दिव्य सय वर्ष पुगेपछि तिम्रो सरापको अन्त्य हुनेछ। म तिमीलाई अघिजस्तै पार्श्ववर्ती बन्ने वर दिनेछु ॥३७-३८॥

नेमुनिले भन्नुभयो – शिवजीको वचन सुनेर भृङ्गी आफ्नो देवस्वरूपलाई त्यसै ठाउँमा छोडी मानिसको रूप लिएर कैलाशबाट निस्किए। करवीरक्षेत्रमा बसेर ती भृङ्गीले सधैं सबै प्राणीमा दया गर्थे, षट्कर्म गर्दथे, वेद पढ्थे। यसरी फलफूलले पूर्ण भएको करवीरले सुशोभित त्यस जङ्गलमा ती भृङ्ग शिवजीका उपासना गरी बसिरहेका थिए ॥४०-४१॥

कुण्डली नाम गरेको तलाउमा स्नान गरेर पवित्र भई षट्कर्म गर्दै शिवजीको आराधनामा तत्पर भएका ती भृङ्गीले त्यहाँ तपस्या गरे। पूर्ण दिव्य बाह्र वर्षसम्म निश्चल भएर भृङ्गीले तीनै किसिमका भक्तिको उपयोग गरी प्रसन्न हुँदै शिवजीको मन्त्र जपे। वैशाखपूर्णिमाको महारात्रिमा भृङ्गीको अगाडि एउटा ज्योतिर्मय लिङ्ग उत्पन्न भयो ॥४४॥ त्यस लिङ्गलाई देखेर प्रसन्न भएका भृङ्गीले लिङ्गको परिक्रमा गरे र खुसी हुँदै स्तुति गरे ॥४२-४५॥

---

२१. भृङ्गिन्वै मम, इति न.सं.पु.पाठः।
२२. मत्पार्श्वस्थ यथा पुरा, इति न.सं.पु.पाठः।
२३. भक्त्या च त्रिविधैर्मुदा, इति न.सं.पु.पाठः।
२४. एतल्लिङ्गं समुद्भवम्, इति न.सं.पु.पाठः।

भृङ्गी उवाच

ॐ नमः शिवाय शान्ताय भूतानां पतये नमः । ज्योतीरूपाय देवाय महालिङ्गाय वै नमः ॥४६॥
क्षितिरूपाय रुद्राय नमः पानीयरूपिणे । तेजोरूपाय भीमाय श्वसनमूर्त्तये नमः ॥४७॥
व्योमरूपाय भर्गाय जीमूतरूपिणे नमः । सर्वौषधिस्वरूपाय बीजरूपाय वै नमः ॥४८॥
रसाय रसरूपाय चैतन्याय नमो नमः । जीवाय बुद्धिरूपाय जीवेश्वराय वै नमः ॥४९॥
वाग्रूपाय च शब्दाय प्रणवाय स्वराय च । वेदाय वेदरूपाय ह्यक्षराय नमो नमः ॥५०॥
वन्द्याय सर्ववन्द्याय स्वयमप्रणतदेहिने । नमोऽस्तु सर्वरूपाय स्वयमेवाप्रणाशिने ॥५१॥
मन्मुक्तिहेतुना चाद्य प्रादुर्भूतोऽसि शङ्कर ![२५] । प्रणतोऽस्मि सदा तुभ्य[२६] वरदायानिशं नमः ॥५२॥
भृङ्गीश्वराय लिङ्गाय चाव्यक्तायात्मने नमः । व्यक्ताव्यक्तस्वरूपाय सर्वलक्ष्याय वै नमः ॥५३॥

ऋषिरुवाच

इत्याकर्ण्य स्तवं रुद्रो भृङ्गिभक्तीरितं तदा । आविर्भूय ततो लिङ्गाद्[२७] व्याचष्ट वचनं मुदा ॥५४॥

भृङ्गेश्वर उवाच

भो भृङ्गिन् ! मम भक्तोऽसि तुष्टोऽहं त्वत्स्तवैर्भृशम् । त्वदीयां प्रेक्ष्य भक्तिञ्च कठोरचरितं तथा ॥५५॥
भवेदद्यैव[२८] शापान्तो मम लोके प्रयास्यसि । मद्द्वारि तिष्ठ भृङ्गिन् मां सेवमानो[२९] पुरा यथा ॥५६॥
अत्र सिद्धमयीं गङ्गामेतत्कुण्डे च पश्यसि । मां स्नापयाऽनिशं भृङ्गिन् ! सिद्धरसेन साम्प्रतम् ॥५७॥
स्नापयति सकृत् यो मां रसेनानेन साधकः[३०] । सदेहोऽसौ विमानेन मम लोकं गमिष्यति ॥५८॥

भृङ्गीले भने – हे शान्तस्वरूप भएका शिवजी ! हजुरलाई नमस्कार छ। प्राणीका स्वामीलाई नमस्कार छ। ज्योतिस्वरूप महालिङ्ग भएका देवतालाई नमस्कार छ। पृथ्वीरूप लिने र जलस्वरूप भएका रुद्रलाई नमस्कार छ। वायुमूर्ति र तेजोरूप भीमलाई नमस्कार छ। आकाश, तेज र मेघस्वरूप शिवलाई नमस्कार छ। सम्पूर्ण औषधिस्वरूप भएका बीजरूप शिवलाई नमस्कार छ। रसनशील रसरूप भएका चैतन्यलाई नमस्कार छ। बुद्धिरूप भएका जीव र जीवेश्वरलाई नमस्कार छ। वाणीरूप लिने शब्द, प्रणव, स्वर, वेदरूप र अक्षरलाई नमस्कार छ, बारम्बार नमस्कार छ। सबैका वन्द्यस्वरूप भएका, सबै प्राणीद्वारा नमस्कृत, आफू कसैसित नझुक्ने र अविनाशी स्वरूप भएका सम्पूर्ण जगत्स्वरूपका शिवलाई नमस्कार छ। हे अविनाशी शङ्कर ! हजुर मेरो मुक्तिका लागि उत्पन्न हुनुभएको छ। वरदाता हजुरलाई सविनय नमस्कार गर्दछु। अव्यक्त आत्मा भएका, व्यक्ताव्यक्त स्वरूपले युक्त र सर्वलक्षणसम्पन्न भृङ्गीश्वर लिङ्गलाई म नमस्कार गर्दछु ॥४७–५३॥

नेमुनिले भन्नुभयो – भृङ्गीले भक्तिपूर्वक गरेको स्तुति सुनेर त्यस लिङ्गबाट शिवजी प्रादुर्भाव हुनुभयो र भन्नुभयो ॥५४॥

भृङ्गीश्वरले भन्नुभयो – हे भृङ्गी ! तिमी मेरा भक्त हौ, तिमीले गरेको स्तुति, तिम्रो भक्ति र कठिन आचरण देखेर म अत्यन्त प्रसन्न भएँ। हे भृङ्गी ! आजदेखि तिम्रो सरापको अन्त्य भयो, मेरो लोकमा जाऊ, मेरो ढोकामा बस, अघिजस्तै मेरो सेवा गर। हे भृङ्गी ! यस कुण्डमा सिद्धगङ्गालाई देख्नेछौ, अब मलाई सिद्धरसले स्नान गराऊ। यस सिद्धरसले जसले मलाई एकपटक मात्रै भए पनि स्नान गराउनेछ, त्यो व्यक्ति आफ्नो शरीरैसित विमानमा चढेर मेरो लोकमा जानेछ ॥५५–५८॥

---

२५. मन्मुक्तयेऽधुना हेतोरुद्भवोऽसि महेश्वर, इति न.सं.पु.पाठः।
२६. सदाऽज त्वाम्, इति न.सं.पु.पाठः।
२७. लिङ्गादाविर्भवन् तस्मै, इति न.सं.पु.पाठः।
२८. अद्यैव तव, इति न.सं.पु.पाठः।
२९. त्वं सेवयन्माम्, इति न.सं.पु.पाठः।
३०. एतद्रसेन यो मां वै सकृदपि स्नापयिष्यति, इति न.सं.पु.पाठः।

यो मां पश्यति पुण्यात्मा ह्यर्चनेनैव भक्तितः। पूर्वदेहोद्भवैः पापैः स मुक्तो नाऽत्र संशयः ॥५९॥
विशेषेण कलौ प्राप्ते गङ्गा गुप्ता भविष्यति। मम स्पर्शनमात्रेण सिद्धो भवति तत्क्षणात् ॥६०॥

ऋषिरुवाच

इत्याज्ञां स समाधाय सिद्धरसैः प्रसूनकैः। आनर्च्च विधिवल्लिङ्गं भक्त्या भृङ्गी मनुं स्मरन् ॥६१॥
मुनयोऽत्र समागत्य निर्माय पीठिकामिमाम्। मृण्मयेन तमानर्चुर्नानापुष्पैश्च तज्जलैः ॥६२॥
तज्जलस्पर्शनाद्वेदी चाऽभूद् ग्रावमयी तदा। तल्लिङ्गस्पर्शनान्मुद्रा ताम्रा स्वर्णमयी ह्यभूत् ॥६३॥
अद्राक्षुर्मुनयो मुद्रास्ताम्राः स्वस्वकरे स्थिताः। स्वर्णमय्यस्तदैतत् ते सिद्धलिङ्गञ्च मेनिरे ॥६४॥
एतल्लिङ्गस्य माहात्म्ये कथ्यमाने गणा ययुः। मुनिवृन्दैः सभायां वै रौद्रा विमानपाणयः ॥६५॥
उदतिष्ठन् तदा प्रेक्ष्य व्योमयानं समागतम्[३१]। रुद्रगणैः समानीतमम्बरात्सूर्यतैजसम्[३२] ॥६६॥
मुमुदिरे समुत्प्रेक्ष्य मुनयो यानमागतम्। नेतुमायाति[३३] मां स्वर्गं मिथोऽब्रुवन्धियेति ते ॥६७॥
तेषां चेष्टां समालोक्य गणा ऊचुश्च सत्वरम्। विमानपाणयो व्योम्नि न्यषेधयँश्च तान् द्विज ॥६८॥

गणा ऊचुः

यूयं तिष्ठत तत्रैव मोत्तिष्ठत मनागपि[३४]। आगमनस्य नो हेतुं शृणुत मुनयोऽधुना ॥६९॥
शतवर्षञ्च दिव्यानां भृङ्गी चाऽत्रैव संस्थितः। रुद्रशापात्स चैकाकी रुद्रद्वारं[३५] विहाय च ॥७०॥
तदर्थमागताश्चाऽत्र वयं रुद्राज्ञया विभो। एनं प्रापयितुं शैवमपरं नास्ति कारणम्[३६] ॥७१॥

जुन पवित्र आत्मा भएको मानिसले मलाई पूजा र भक्तिद्वारा सेवा गर्छ त्यो व्यक्ति पूर्वजन्ममा गरेको पापबाट मुक्त हुन्छ, यसमा सन्देह छैन। विशेष गरेर कलियुगमा यी सिद्धमय गङ्गा गुप्त हुनेछिन्। मलाई स्पर्श मात्रै गऱ्यो भने पनि त्यो व्यक्ति तुरुन्त सिद्ध हुनेछ ॥५९-६०॥

नेमुनिले भन्नुभयो – शिवजीको आज्ञा अनुसार भृङ्गीले सिद्धरस र फूलहरू ल्याएर भक्तिपूर्वक मन्त्र सम्झदै विधिपूर्वक त्यस लिङ्गको पूजा गरे। ऋषिहरू त्यहाँ आए, माटेले त्यस लिङ्गको पीठिका बनाए, विभिन्न किसिमका फूल र पानी ल्याएर त्यस लिङ्गको पूजा गरे। सिद्धगङ्गाको जलको स्पर्शले गर्दा वेदी शिलामय बन्यो। लिङ्गको स्पर्शले गर्दा तामाको मुद्रा पनि सुवर्णमुद्रामा परिणत भयो ॥६१-६३॥

ऋषिहरूले आ-आफ्ना हातमा लगाएको तामाको औंठीलाई सुनको औंठी भएको देखे। त्यसपछि उनीहरूले त्यस लिङ्गलाई सिद्धलिङ्ग हो भनेर निश्चय गरे। ती मुनिहरूले यस लिङ्गको माहात्म्य बताउन थालेका थिए, त्यसै बेला त्यहाँ विमान लिएर शिवजीका गणहरू आए। आकाशबाट सूर्यजस्तै तेजिलो विमान लिएर आउन लागेका शिवजीका गणहरूलाई देखेर ती ऋषिहरू उठे। विमान आएको देखेर मुनिहरू खुसी भए र स्वर्गबाट मलाई नै लिन आएका हुन् भनी आपसमा कुराकानी गर्न थाले। हे विरूपाक्ष ! तिनीहरूको चेष्टा देखेर विमानमा रहेका गणहरूले तिनीहरूलाई बुझाउँदै त्यसो होइन भनेर निषेध गरे ॥६४-६८॥

गणहरूले भने – हे मुनि हो ! तपाईंहरू यस ठाउँमा बस्नुहोस्, नउठ्नुहोस्। हामी किन आयौं, त्यो कुरा सुन्नुहोस्। शिवजीको सरापले गर्दा उहाँको ढोकालाई छाडेर भृङ्गी एक्लै यस ठाउँमा दिव्य सय वर्षसम्म बसेका छन्। भगवान् शङ्करको आदेश अनुसार शिवभक्त भृङ्गीलाई लिन हामी यहाँ आएका हौं भन्ने सम्झनुहोस्, अरू कुनै कारण होइन ॥६९-७१॥

---

३१. उदतिष्ठन्तदा ते वै प्रेक्ष्य विमानमागतम्, इति न.सं.पु.पाठः। ३२. ...सूर्यवर्चसम्, इति न.सं.पु.पाठः।
३३. उत्प्रेक्ष्य मुनयो यानमागतं मुमुदुस्तदा। आनयितुञ्च, इति न.सं.पु.पाठः। ३४. मामार्या उदतिष्ठत, इति न.सं.पु.पाठः।
३५. तद्द्वारञ्च, इति न.सं.पु.पाठः। ३६. एनमानयितुं शैवं विद्धि नास्त्यपरं हि तत्, इति न.सं.पु.पाठः।

ऋषिरुवाच

इत्युक्त्वा तं विमाने ते संस्थाप्य[३७] बहुमानतः । निन्युः शैवं मुदा शैवा द्योतयन्तो दिशोऽम्बरात्[३८] ॥७२॥
ऋषयोऽपि महालिङ्गमुपासन्तेऽत्र नित्यशः । भृङ्गरूपाः कलौ देवाः सेवन्ते सर्वपर्वसु ॥७३॥
आसीत्कश्चिन्नृपो विप्र ! नहुषो नाम विश्रुतः । उड्डीशायां कृतं राज्यं तेन दानं कृतं बहु[३९] ॥७४॥
तत्सुकृतप्रभावात्सः स्थायी चेन्द्रासनेऽभवत् । विप्रोद्वाहविमानेन चाययौ गगनान्मुदा ॥७५॥
हिमवत्सानुमुद्दिश्य स्वर्गसोपानविश्रुतम् । अत्रापि प्रेरिता विप्रा नृपेण च सकौतुकम्[४०] ॥७६॥
क्रुद्धास्ते मुनयस्तस्य साहङ्कारकटूक्तिभिः[४१] । भारोद्वाहश्रमस्विन्ना[४२] भाराक्रान्ताः कदापि न ॥७७॥
तस्मै शापं ददुर्विप्राः सर्पो भवेति सत्वरम् । अपततदत्र राजाऽसौ चाऽजगरोऽभवद् भुवि ॥७८॥
धनुषां द्विसहस्रेण दीर्घोऽभूत्सर्पविग्रहः । स्पर्शनादस्य तीर्थस्य सर्पो ज्ञानी बभूव सः[४३] ॥७९॥
जीवामीति सहस्राब्दं महादेवप्रसादतः । अवात्सीदत्र सर्पोऽसौ लिङ्गभूमिञ्च वेष्टयन्[४४] ॥८०॥
अत्राययौ च तं प्रेक्ष्य ग्रहीतुं गरुडो द्रुतम् । भृङ्गी ह्युवाच तार्क्ष्याय रुषा तस्य जिघांसवे[४५] ॥८१॥

नेमुनिले भन्नुभयो – यति भनेर ती शिवका गणहरूले भृङ्गीलाई बडो सम्मानका साथ विमानमा राखे । दिशाहरूलाई उज्यालो तुल्याउँदै आकाशमार्गबाट शिवजी भएको ठाउँमा लगे । ऋषिहरूले पनि यस महालिङ्गको सधैँ उपासना गर्न थाले । त्यसै समयदेखि कलियुगमा भमराको रूप लिएर देवताहरूले सबै पर्वमा यस लिङ्गको सेवा गर्छन् । नहुष नाम गरेका कुनै प्रसिद्ध राजा थिए । दानी ती राजा उडिशा नाम गरेको देशमा शासन गर्दथे ॥७२–७४॥

हे विरूपाक्ष ! भृङ्गीश्वरकै उपासना–धर्मका प्रभावले ती राजा स्थायी रूपले इन्द्रासनमा बसे । आकाशबाट ब्राह्मणहरूले हाँकेको विमान लिएर प्रसन्न हुँदै त्यहाँ आए । स्वर्गको सिँढीको नामले ख्यातिप्राप्त भएको हिमालय पर्वतको शिखरमा पुगेर ती राजाले ब्राह्मणहरूलाई कौतूहलका साथ शिविका वहन गर्न आदेश दिए । भारवहनको श्रमले गर्दा पसिनै पसिना भएका ती ब्राह्मणहरू भारको परिश्रमले भन्दा पनि ती राजाको मनै घोच्ने तीखो बोलीले रिसाए ॥७५–७७॥

ब्राह्मणहरूले तिनलाई तुरुन्त सर्प भएस् भनेर सराप दिए । राजा अजिङ्गर भएर भुइँमा पछारिए । ती राजाले दुई हजार धनु बराबर लामो सर्पको शरीर लिएका थिए । यस स्थानको स्पर्शले गर्दा फेरि तिनलाई ज्ञान प्राप्त भयो । महादेवको अनुग्रहबाट हजार वर्षसम्म बाँच्न पाउँछु भन्ने निश्चय गरेर त्यो सर्प लिङ्गको नजिकै रहेको भूमिमा गुडुल्किएर बसेको थियो । त्यस सर्पलाई देखेर कुनै गरुड समात्न आयो । त्यसलाई मार्न तत्पर भएको गरुडलाई देखेर भृङ्गीले रिसाएर भने ॥७८–८१॥

---

३७. आस्थाय, इति न.सं.पु.पाठः ।
३८. द्योतयन्कुकुभोऽम्बरात्, इति न.सं.पु.पाठः ।
३९. नानादानं ददाति वै, इति न.सं.पु.पाठः ।
४०. तदुत्सुको नृपो द्रुतम्, इति न.सं.पु.पाठः ।
४१. अजीजनद् रुषा तेषां तत्प्रयुक्तकटूक्तिभिः, इति न.सं.पु.पाठः ।
४२. भाराक्रान्ताश्रमस्विन्ना, इति न.सं.पु.पाठः ।
४३. एतत्थानस्पृशात्सर्पो ज्ञानयुक्तोऽभवत्पुनः, इति न.सं.पु.पाठः ।
४४. लिङ्गोपभूमिवेष्टयन्, इति न.सं.पु.पाठः ।
४५. तद्वधप्रोद्यते रुषा, इति न.सं.पु.पाठः ।

भृङ्गी उवाच

रे रे तार्क्ष्य महामूढ ! मा मागच्छेति[४६] चाऽत्र वै । सर्पं प्रेक्ष्य प्रलोभात्ते चागमनं किमस्ति ते[४७] ॥८२॥
स्पृशसि यदि तं तार्क्ष्य ! विस्मृत्याऽपि त्वमत्र चेत्[४८] । क्रोधेक्षणेन सद्यस्त्वां भस्मसात्स करिष्यति ॥८३॥
पुण्यभूमौ शिवस्थाने यो वा को वा प्रतिष्ठति । अवध्योऽसौ हि सर्वेषां न स पापैः प्रलिप्यते ॥८४॥
सहस्रवत्सरान्ते च ह्यस्य मृत्युर्भविष्यति । एतत्क्षेत्राद्बहिर्यावन्न याति चेत् भुजङ्गमः[४९] ॥८५॥

ऋषिरुवाच

इत्युक्तञ्च समाकर्ण्य तार्क्ष्योऽसौ भृङ्गिणा तदा । तदध्रदप्रान्तरेऽवात्सीत्तच्छिद्रेक्षणतत्परः ॥८६॥
सहस्रवत्सरान्ते हि तत्स्थानाद् स बहिर्गतः[५०] । क्षुधया पीडितोऽत्यन्तं ग्रस्तुञ्च प्राणिनः शनैः ॥८७॥
तद्बहिर्विचरन्तं तं प्रेक्ष्य तार्क्ष्योऽग्रहीद् द्रुतम् । अदम्यया सर्पशक्त्या[५१] प्रोत्सारितो व्यलोडयत् ॥८८॥
ततस्तार्क्ष्यो रुषाविष्टः चञ्चुना च नखैरहिम् । व्यचूर्णयद्विदार्याशु खण्डखण्डं कृता तनु ॥८९॥
ततस्तद्विग्रहात्सद्यः पुरुषोऽसौ प्रनिःसृतः । दिव्यकलेवरो राजा चाऽत्र निधनपुण्यतः ॥९०॥
रुद्रयाने तमास्थाय चाऽनयच्छिवमन्दिरम् । नानावाद्यैर्गणा हर्षगीतनृत्यैः प्रमोदितम् ॥९१॥

भृङ्गीले भने – हे मूर्ख गरुड ! यहाँ नआइज । तँ यस सर्पलाई देखेर लोभले अथवा अरु कारणले यहाँ आएको हो ? मलाई बता । हे गरुड ! बिर्सिएर पनि तैँले यस सर्पलाई स्पर्श गरिस् भने भगवान् शङ्करले तँलाई क्रोधको आँखाले तुरुन्त खरानी तुल्याउनुहुनेछ । पुण्यभूमि शिवजीको स्थानमा जोसुकै पनि रहन सक्छ । त्यो पापरहित हुन्छ । त्यो सबैको अवध्य हुन्छ । यस क्षेत्रभन्दा बाहिर निस्कियो भने त्यस पापीको हजार वर्षपछि मात्र मृत्यु हुनेछ ॥८२-८५॥

नेमुनिले भन्नुभयो – भृङ्गीले यस्तो कुरा भनेको सुनेर गरुड त्यस सर्पको छिद्र खोज्दै त्यस तलाउको नजिकै गएर बस्यो । हजार वर्ष बितेपछि भोकले आतिएर प्राणीहरूलाई खान त्यो सर्प त्यस ठाउँबाट निस्कियो । छिद्रबाट बाहिर डुलिरहेको त्यस सर्पलाई देखेर गरुडले झम्टियो । गरुडलाई पनि सर्पको अदम्य बलले गर्दा त्यससँग धेरै बेरसम्म लडिरहनुपर्‍यो । त्यसपछि रीसले चूर भएको गरुडले आफ्नो चुच्चो र नङ्ग्राले त्यस सर्पलाई पृथ्वीमा पछारेर टुक्रा टुक्रा पार्‍यो ॥८६-८९॥

त्यसपछि त्यस शरीरबाट तुरुन्तै दिव्य शरीर भएको पुरुष प्रकट भयो । यहाँ मरेको हुँदा ती सर्परूप राजा नहुषले दिव्य शरीर लिए । तिनलाई विमानमा राखेर शिवजीका दूतहरूले सहर्ष गीत र नृत्यद्वारा आनन्दित तुल्याउँदै शिवजीको मन्दिरमा लगे ॥९१॥

---

४६. मा गच्छसि, इति न.सं.पु.पाठः ।
४७. वदाशु मे, इति न.सं.पु.पाठः ।
४८. यच्चैनं स्पर्शनात्तार्क्ष्य ! त्वमत्र विस्मृतेन च, इति न.सं.पु.पाठः ।
४९. नाचरतेऽस्य पापिनः, इति न.सं.पु.पाठः ।
५०. हि समुच्चरत, इति न.सं.पु.पाठः ।
५१. सर्पबलोद्धतेनाऽसौ, इति न.सं.पु.पाठः ।

सिद्धरसे नरः स्नात्वा सिद्धो भवति तत्क्षणात्। कुण्डलिनीह्रदे स्नानात्सर्पभयैर्विमुच्यते ॥९२॥
वैशाखपूर्णिमायां य एतल्लिङ्गं प्रपश्यति। आजन्मसञ्चितैः पापैर्मुच्यते तत्क्षणाद्धि सः ॥९३॥
कदाचिद्दैवयोगेन भाग्यवानेनमर्चति। इहलोकं परित्यज्य प्राप्नोति परमं पदम् ॥९४॥
यो वा को वा समागत्य प्राणत्यागं करोति च। न पुनर्जायते योनौ शिवलोके वसेत्सुखी ॥९५॥

एतन्माहात्म्यं कथितं मया ते भृङ्गीश्वरस्यार्य पुनः शृणु त्वम्।
मतं त्रिलिङ्गस्य वरं महत्त्वं बिभ्राजमानो ललितावने वै ॥९६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
भृङ्गीश्वरमाहात्म्यं नाम पञ्चत्रिंशत्तमोऽध्यायः ॥१३५॥

सिद्धगङ्गाको सिद्धरसमा स्नान गऱ्यो भने मानिस तुरुन्तै सिद्ध हुन्छ। कुण्डली नाम गरेको तलाउमा स्नान गऱ्यो भने सर्पको डरबाट मुक्त हुन्छ। वैशाखपूर्णिमाको दिन जसले यस लिङ्गको स्पर्श गर्छ त्यो व्यक्ति जन्मभरि गरेका पापबाट तुरुन्त मुक्त हुन्छ। दैवसंयोगले गर्दा कुनै भाग्यमानीले यहाँ आएर यस लिङ्गको पूजा गऱ्यो भने त्यसले यो लोक छोडेपछि परमपद प्राप्त गर्छ। जोसुकैले पनि यस ठाउँमा आएर प्राण छोड्यो भने त्यो व्यक्ति कुनै योनिमा जन्म नलिईकन शिवलोकमा गएर सुखसित वास गर्छ ॥९२–९५॥

यस भृङ्गेश्वर लिङ्गको माहात्म्य मैले तिमीलाई बताएँ। अब ललिता नाम गरेको वनमा विराजमान त्रिलिङ्ग शिवजीको माहात्म्य छ, त्यो मबाट सुन ॥९६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भृङ्गीश्वरशिवलिङ्गको माहात्म्यनामक
एकसय पैँतिसौँ अध्याय पूरा भयो।

षट्त्रिंशदुत्तरशततमोऽध्यायः

मुनिकुण्डतीर्थ-त्रिलिङ्गेश्वरयोर्महिमा

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो मुनिना सह कुम्भज। सुरम्ये ललितारण्ये चोत्तरस्यां दिशि ध्रुवम्[1] ॥१॥
मुनिकुण्डे पुनः स्नात्वा त्रिलिङ्गेशमपूपुजत्। दिव्ये च ललितारण्ये भक्त्या नानाप्रसूनकैः ॥२॥
पूर्णिमायां ततो रात्रौ लिङ्गमभ्यर्च्य भक्तितः। तन्माहात्म्यं विरूपाक्षो ह्यपृच्छन्नेमुनिं पुनः ॥३॥
आकर्ण्य तद्वचो रात्रौ चाऽसौ मुनिर्घटोद्भव। व्याजहार शुभं वाक्यं भक्ताय[2] भक्तवत्सलः ॥४॥

ऋषिरुवाच

राजमानं वनं पश्य वाग्वत्या याम्यतो दिशि। क्रोशयुग्मप्रमाणेन प्रभावत्यास्तथोत्तरे ॥५॥
नानापुष्पैर्द्रुमै रम्यं लताभिर्ललितं वनम्। मयूरैः कोकिलैर्भृङ्गैः सत्त्वानाञ्च मनोहरम् ॥६॥
बिल्वपनसजम्बीरैर्दाडिमैर्बीजपूरकैः। आम्रैः पूगैश्च खर्जूरैः सुललितं मनोहरम् ॥७॥
नानापक्षिगणध्वानैः केकाभिर्भृङ्गगुञ्जनैः[3]। निकुञ्जैर्लसितं यस्माल्ललितारण्यमाश्रुतम् ॥८॥
गवयैर्हस्तिभिर्व्याघ्रैरक्षोभिर्वानरैर्वृकैः। हरिणैः कृष्णसारैश्च विविधैर्ललितं[4] मृगैः ॥९॥
अवतीर्यामरावत्याश्चाऽत्र देवाङ्गना[5] मुदा। अक्रीडन् कुसुमैः शश्वन् निकुञ्जेषु निरन्तरम्[6] ॥१०॥
ऋषयश्च सहस्राणि वसन्ति स्म तपोधनाः। कतिचिच्च यजन्तोऽत्र धूम्राशिनः फलाशिनः ॥११॥
आराधितो महादेवस्तत्रत्यैश्च महर्षिभिः। सार्धं स्कन्देन देव्या च जपाग्निहोमतर्पणैः[7] ॥१२॥

अध्याय - १३६

मुनिकुण्डतीर्थ र त्रिलिङ्गेश्वरको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर त्यस ठाउँबाट उत्तर दिशामा रहेको ललितारण्यमा गए। फेरि दिव्य ललितारण्यमा रहेको मुनिकुण्डमा स्नान गरेर उनले विभिन्न किसिमका फूलहरूद्वारा भक्तिपूर्वक त्रिलिङ्गेश्वर भगवान्‌को पूजा गरे। पूर्णिमाको दिन राति भक्तिपूर्वक लिङ्गको पूजा गरेर विरूपाक्षले नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे। हे अगस्त्य ! तिनको भनाइ सुनेर राति भक्तवत्सल नेमुनिले विरूपाक्षसित कल्याणमय वचन भन्न लाग्नुभयो ॥१-४॥

नेमुनिले भन्नुभयो – वाग्वती नदीको दक्षिणदिशा र प्रभावती नदीको उत्तरपट्टि सुहाएको हुँदा यो सुन्दर जङ्गल छ, हेर। विभिन्न किसिमका फूल, वृक्ष, लहरा, मयूर, कोइली, भमरा आदि प्राणीहरूले गर्दा यो वन अत्यन्त मनोहर भएको छ। बेल, कटहर, जामुनो, दारिम, ज्यामिर, आँप, सुपारी, खजुर आदि मीठा फलहरूले शोभित भएको हुँदा यो वन अत्यन्त सुन्दर छ। मयूरको मीठो स्वर, भमराको आवाज, अनेक किसिमका पक्षीहरूको नानाथरी गानाले गुञ्जित भएको यो वन अत्यन्त सुशोभित छ । त्यसैले यसलाई ललितारण्य भनिन्छ ॥५-८॥

लतागृह, साना गाई, हात्ती, बाघ, भालु, बाँदर, ब्वाँसो, मृग आदिले युक्त भएको हुँदा यो वन अत्यन्त सुन्दर बनेको छ। अमरावतीबाट ओर्लिएर अप्सराहरूले खुसीसँग यस सुन्दर बगैँचामा बसेर फूलहरूका साथ खूबसित क्रीडा गरेका थिए। यहाँ हजारौँ तपस्वी ऋषिहरू धुवाँ र फलमात्र खाएर बसेका थिए भने केही ऋषिहरू यज्ञ गरेर बस्दथे। तिनै महर्षिहरूले कार्तिक स्वामीसहित देवी र महादेवको जप, होम, तर्पण र पूजा गरेर आराधना गरे ॥९-१२॥

---

१. तस्माद्धि दिशि चोत्तरे, इति न.सं.पु.पाठः।
२. भक्तिने, इति न.सं.पु.पाठः।
३. .....भृङ्गनादितैः, इति न.सं.पु.पाठः।
४. अन्यैश्च, इति न.सं.पु.पाठः।
५. सुराङ्गना, इति न.सं.पु.पाठः।
६. वसन्भृशम्, इति न.सं.पु.पाठः।
७. देव्या कुन्देन सार्द्धञ्च द्वितीयस्नातकेर्षया, इति न.सं.पु.पाठः।

पौषकृष्णतृतीयायामेतल्लिङ्गं प्रकाशितम्[८] । लिङ्गत्रयात्मकं रात्रौ ताभ्याञ्च युगपत्समम् ॥१३॥
एतल्लिङ्गाद्वरं लब्ध्वा ध्यायमानो मुनिः शिवम् । किञ्चित्कालान्तरे तेन प्रलब्धं परमं पदम् ॥१४॥
शृणु वच्मि विरूपाक्ष एतल्लिङ्गप्रशंसनम् । कश्चित्पापी विलीनो[९]ऽभूदेतस्मिंश्च पुरा शिवे ॥१५॥
आसीत्कश्चिद् द्विजः पूर्वं क्वनिखङ्गसुतो द्विज । तालजङ्घश्च नाम्नासौ सर्वभुग् वेदवर्जितः ॥१६॥
पूर्वजन्मविपाकेन चौरवृत्तिं समाव्रजन् । अत्रावात्सीद्वने भीष्मे चौरोऽसौ निर्जनो रहः ॥१७॥
हत्वा वा प्राणिनो मर्त्यान् यत्र कुत्र गृहे वने । तदद्रव्याणि समादाय बुभुजेऽत्र सुखं यथा ॥१८॥
मार्गकृष्णचतुर्दश्यां गोपालं वनमध्यगम् । दुग्धभारसमाक्रान्तं जघान पत्रिणाऽशु सः ॥१९॥
दुग्धभारं समादाय चाऽत्राययौ द्रुतं हि सः । भाण्डञ्च तरुशाखायां स्थापयित्वा व्यलोडयत्[१०] ॥२०॥
लिङ्गप्रतिहताङ्घ्रिश्च सहसा[११] चकितेक्षणः । मध्याह्ने च चतुर्दश्यां वृक्षस्याधो विराजितः[१२] ॥२१॥
तल्लिङ्गं दुग्धभाण्डञ्च सदुग्धं पर्यपातयत्[१३] । तत्क्षीरेण सुखं लिङ्गं संसस्नौ भिन्नभाण्डतः ॥२२॥
अनन्तरञ्चतुर्दश्यां प्रत्यक्षं मुमुदे शिवः[१४] । तत्क्षीरेण त्वशेषेण प्रेक्ष्यापि भक्तिवर्जितम् ॥२३॥
तल्लिङ्गस्पर्शनात्सोऽपि किञ्चिज्ज्ञानयुतोऽभवत् । एवमेव स्थितो विप्रः स्थगितगतिविह्वलः ॥२४॥
एतत्क्षीरेण मे रुद्रः प्रसन्नोऽस्तु[१५] सदाशिवः । गृहाण शङ्करेदं मे चाङ्गं त्वं प्रतिवर्द्धय ॥२५॥
इत्युक्त्वा प्रणनामेशं परिक्रम्य सवृक्षकम् । एतत्कोटरमाविश्य चाशीशयत्क्षुधार्दितः ॥२६॥
अमावास्यातिथौ प्रातस्तालजङ्घो ममार सः । कालवशात्क्षुधार्त्तो हि शिवशिवेति संवदन् ॥२७॥

पौषकृष्ण तृतीयाको मध्यरातमा ती दुबैका साथ एकैचोटि यस लिङ्गबाट तीनवटा लिङ्ग प्रकट भए । यस लिङ्गबाट वर पाएर शिवजीको ध्यान गर्ने मुनिले केही समयपछि परमपद प्राप्त गरे । हे विरूपाक्ष ! म यस लिङ्गको माहात्म्य बताउँछु, सुन । अघि कुनै पापी यसै शिवलिङ्गबाट मुक्त भएको थियो ॥१३–१५॥

हे विरूपाक्ष ! अघि क्वनखङ्ग नाम गरेका कुनै ब्राह्मण थिए । उनको तालजङ्घ नाम गरेको छोरो थियो । वेदले प्रतिपादन गरेको कर्म न गर्ने त्यो सर्वभक्षी थियो । पूर्वजन्मको कर्मले गर्दा त्यसले चोरको वृत्तिलाई अँगाल्यो । यो चोर सधैं यस डरलाग्दो वनमा आएर एकान्तमा एक्लै बस्दथ्यो । प्राणीहरू र मानिसहरूलाई जताततै घर वा वनमा मारेर प्राणीहरूको मांस र मानिसहरूको धन ल्याई आनन्दसित त्यो उपभोग गर्दथ्यो ॥१६–१८॥

त्यसले मार्गकृष्ण चतुर्दशीका दिन दूध बोकेर वनको माझमा हिँडिरहेको गोठालालाई बाण हानेर मार्‍यो । दूधको घडा लिएर तुरुन्त त्यो चोर यहाँ आयो र त्यस तस्करले रुखमुनि लगेर दूधको भाँडो हल्लायो । चतुर्दशीको मध्याह्नमा उसको गोडाले अचानक लिङ्ग छुन पुग्यो । अत्यन्त हर्षित हुँदै त्यो आश्चर्यचकित भयो । दूधले भरिएको त्यो भाँडो लिङ्गमाथिबाट खस्यो र फुटेको भाँडाबाट पोखिएको दूधले शिवलिङ्गको स्नान भयो ॥१९–२२॥

त्यसपछि चतुर्दशीका दिन भक्ति नभए पनि सम्पूर्ण दूध पोखिएर शिवलिङ्गको स्नान हुन गएको हुँदा भगवान् शङ्कर प्रसन्न हुनुभयो । त्यस लिङ्गलाई स्नान गराएको हुँदा त्यो पनि केही ज्ञानी भयो । यसरी नै हिँड्न चल्न नसकेर अचेत भएर बस्यो । "हे रुद्र ! यो दूधले तपाईं प्रसन्न हुनुहोस्, यसलाई ग्रहण गरेर मेरो अङ्ग बढाइदिनुहोस्" यति भनी भोकले पीडित भएको त्यस ब्राह्मणले शिवजीलाई परिक्रमा गरी रुखको टेड्कानिर बसेर पुकार गर्‍यो । अमावास्याको बिहान त्यो तालजङ्घ भोकले पीडित भएर कालगतिले शिव ! शिव ! भन्दै मर्‍यो ॥२३–२७॥

---

८. समुद्भवम्, इति न.सं.पु.पाठः ।
९. विमुक्तः, इति न.सं.पु.पाठः ।
१०. एतद्द्रश्च तस्याधो व्यलोडत स तस्करः, इति न.सं.पु.पाठः ।
११. हठाद्धि, इति न.सं.पु.पाठः ।
१२. हर्षपूरितमानसः, इति न.सं.पु.पाठः ।
१३. सदुग्धं दुग्धभाण्डञ्च लिङ्गोपर्यपतद् ध्रुवम्, इति न.सं.पु.पाठः ।
१४ साक्षान्मुमोद शङ्कर, इति न.सं.पु.पाठः ।
१५ चापि भक्तिविवर्जितः, इति न.सं.पु.पाठः ।

शिवदूताः समागत्य याने तञ्च निधाय हि[१६] । निन्युः शिवपुरं रम्यं निर्जित्य यमदूतकान् ॥२८॥
सोऽभवच्च गणश्रेष्ठो रुद्रस्यानुचरोऽनिशम् । उपलिङ्गं मृतो यस्मात्तद्दुग्धस्नानपुण्यतः ॥२९॥

नेमुनिरुवाच

भूयो गच्छ विरूपाक्ष यत्र च कुपितेश्वरः । अतश्चैशानदेशे त्वं धनुषां त्रिंशके वने ॥३०॥
एतन्माहात्म्यञ्च शृणोति भक्त्या जन्मान्तरे योऽपि[१७] शिवप्रसादात् ।
तन्मानसे[१८] तस्करता भवेन्न भूयात् परद्रव्यनिवृत्तचेताः ॥३१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
मुनिकुण्डतीर्थत्रिलिङ्गेश्वरयोर्माहात्म्यं नाम षट्त्रिंशदुत्तरशततमोऽध्यायः ॥१३६॥

शिवजीका दूतहरूले त्यहाँ आएर त्यस मृतात्मालाई विमानमा राखे, आएका यमदूतहरूलाई हटाए र उसलाई सुन्दर शिवपुरीमा लगे । त्यस दूधद्वारा शिवजीलाई स्नान गराएको हुँदा प्राप्त भएको पुण्यको प्रभाव र शिवजीको नजिकै मरेको हुँदा त्यो तालजङ्घ शिवजीको सेवक तथा गणश्रेष्ठ बन्न पुग्यो ॥२८–२९॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यहाँबाट ईशानपट्टि तीस धनु जति टाढा वनमा कुपितेश्वर महादेव बस्नुभएको छ, त्यहाँ तिमी जाऊ । यो माहात्म्य जसले भक्तिपूर्वक सुन्छ, त्यो व्यक्ति अर्को जन्ममा शिवजीको अनुग्रहबाट परद्रव्यको चाहना गर्ने र चोर वृत्ति अँगाल्ने खालको हुनेछैन ॥३०–३१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा
मुनिकुण्डेश्वर तीर्थ तथा त्रिलिङ्गेश्वरको माहात्म्यनामक एकसय छत्तिसौं अध्याय पूरा भयो ।

---

१६. तं याने च न्याधापयन्, इति न.सं.पु.पाठः । १७. सोऽपि, इति न.सं.पु.पाठः ।
१८. धीमान्कदा, इति न.सं.पु.पाठः ।

सप्तत्रिंशदुत्तरशततमोऽध्यायः

उदकुण्डतीर्थ-कुपितेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयस्तत्राऽगमत् सिद्धस्तेन[1] नेमुनिना समम्। यत्र विराजते सार्द्धं[2] रुद्राण्या कुपितेश्वरः ॥१॥
उदकुण्डे मुदा स्नात्वा सिद्धेन[3] मुनिना सह। चैत्रकृष्णद्वितीयायां तल्लिङ्गञ्च समर्चितम् ॥२॥
तन्निशायां द्विजो लिङ्गं भक्त्या पुपूज[4] पुष्पकैः। धत्तूरैर्बिल्वपत्रैश्च तथा पञ्चोपचारकैः ॥३॥
अभ्यर्च्य शङ्करं सिद्धस्तन्माहात्म्यं मुनीश्वरम्। भक्त्या पप्रच्छ नम्रांसः तन्निशायाञ्च तत्त्ववित् ॥४॥
समाकर्ण्य मुनिर्वाक्यं भक्त्योदितं द्विजन्मनः। व्याजहार ततो वाक्यं सिद्धभक्ताय सम्मुदा[5] ॥५॥

ऋषिरुवाच

शृणु विप्र ! प्रवक्ष्यामि लिङ्गोत्पत्तिं[6] यथा पुरा। एतल्लिङ्गे नरः कश्चिद्विमुक्तो ह्यभवत्पुनः ॥६॥
ऋषिणा द्वितयेनाऽत्र पुरा तप्तं महत्तपः। एतल्लिङ्गं तदोद्‌भूतं कात्यायन्या समं द्विज ॥७॥
तया लब्धवरो धीमान्सहस्राब्दं तपस्यया[7]। साङ्ख्ययोगेन चाऽत्रैव त्यक्तकलेवरोऽभवत् ॥८॥
कश्चिन्मुक्तः किरातोऽत्र चैतल्लिङ्गप्रसादतः। पूर्वजन्मविपाकेन शठोऽभवदसौ भृशम् ॥९॥
बालिशश्च सदा त्वन्यान् शठवृत्तिमशिक्षत। तद्दोषेणाऽभवत्सोऽपि शठो हि लोकवञ्चकः ॥१०॥
सदा स वञ्चयामास[8] साधुरूपेण सर्वशः। म्लेच्छान् विप्रान् धनाढ्यांश्च नरान्नारीस्तथार्भकान्[9] ॥११॥

अध्याय - १३७

उदकुण्डतीर्थ र कुपितेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य ! फेरि ती विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ कुपितेश्वर महादेव बस्नुभएको थियो, त्यसै ठाउँमा गए। मुनिका साथमा गएका यी सिद्ध विरूपाक्षले चैत्रकृष्ण द्वितीयाका दिन उदककुण्डमा स्नान गरेर त्यस लिङ्गको पूजा गरे। त्यस दिन राति विरूपाक्षले धतुरो, बेलका पात, फूल र पञ्चोपचार विधिबाट लिङ्गको भक्तिपूर्वक पूजा गरे। तत्त्वज्ञाता ती सिद्ध तत्त्वज्ञ विरूपाक्षले राति नम्र भई झुकेर भक्तिपूर्वक शिवलिङ्गको पूजा गरी त्यसको माहात्म्य नेमुनिसित सोधे। ती ब्राह्मणले भक्तिपूर्वक भनेको बोली सुनेर सिद्धर्षि नेमुनिले उत्तर दिनुभयो ॥१–५॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यो लिङ्ग पहिले कसरी उत्पन्न भएको थियो भन्ने कुरा र यस लिङ्गको आराधनाबाट कुन कुन मानिस मुक्त भएका थिए भन्ने वृत्तान्त पनि सुन। हे विरूपाक्ष ! अघि द्वितयनामक ऋषिले यस ठाउँमा तपस्या गरेका थिए। त्यसै बेला कात्यायनीले सहित भएको यस लिङ्गको प्रादुर्भाव भएको हो। हजार वर्ष गरेको तपस्याबाट वर पाएर बुद्धिमान् भएका ती ऋषिले साङ्ख्ययोग अनुसार यहीँ नै शरीर छोडेका थिए ॥६–८॥

पूर्वजन्मको संस्कारले अत्यन्त मूर्ख भएको कुनै किरात यसै लिङ्गको अनुग्रहले गर्दा मुक्त भएको थियो। अरूलाई पनि मूर्ख बनाउन त्यसले शठवृत्तिको (ठग्ने वृत्ति) शिक्षा दियो। त्यसैले त्यो किरात पनि ठग र मूर्ख बन्यो। सज्जनको रूप लिएर त्यसले सधैं धनाढ्य, म्लेच्छ, ब्राह्मण, स्त्री, पुरुष र बालकहरूलाई पनि ठग्यो ॥९–११॥

---

१. भूयोऽगमत्ततोऽगस्त्य ! सिद्धोऽसौ, इति न.सं.पु.पाठः।
२. लिङ्गम्, इति न.सं.पु.पाठः।
३. सिद्धोऽसौ, इति न.सं.पु.पाठः।
४. अर्चति स्म, इति न.सं.पु.पाठः।
५. सिद्धाय भक्तिने तदा, इति न.सं.पु.पाठः।
६. लिङ्गोद्‌भूतम्, इति न.सं.पु.पाठः।
७. तपः कृतात्, इति न.सं.पु.पाठः।
८. सततं वञ्चितं तेन, इति न.सं.पु.पाठः।
९. स्त्रीपुंसानर्भकांस्था, इति न.सं.पु.पाठः।

द्विगुणं त्रिगुणञ्चाऽस्य दास्यामि ते चतुर्गुणम्। इदं द्रव्यं भवान् मह्यं ददातु साम्प्रतं विभो ॥१२॥
एतद्द्रव्यस्य मौल्यञ्च यदि दास्याम्यहं न ते। शपेऽहं मम वंशेन किल्विषमनुभूयताम्[१०] ॥१३॥
कृत्वेत्थं शपथं लोकान् वञ्चति स्म स वञ्चकः। शापायुधानृषिश्रेष्ठानपि म्लेच्छान् किमु द्विजः ॥१४॥
एवं लोकाञ्छठो नित्यं वञ्चयित्वा च सर्वशः। वने स्थित्वा च ह्येकाकी[११] कञ्चित्कालं निनाय च ॥१५॥
तपःकृष्णचतुर्दश्यामन्नाभावादुपोषितः। अमावास्यां क्षुधार्तोऽसौ वञ्चयितुं विनिःसृतः[१२] ॥१६॥
तद्दिवसे शठो म्लेच्छं भृङ्गनामानमाशु च। वञ्चयामास क्षुत्क्षामो नीवारभारधारिणम्[१३] ॥१७॥
नीवारान्द्रुतमानीय न्यवेदयत्स[१४] शूलिने। स्वयञ्च बुभुजे शेषमुदकुण्डे जलं पपौ ॥१८॥
भुक्ते तद्बिल्ववृक्षं स सुस्वापारुह्य वै सुखम्। जन्तोर्भयान्महारण्ये नित्यमेव विरूपदृक् ॥१९॥
हस्ताघातेन भारेण बिल्वपत्राणि तस्य च। लिङ्गोपरि बहून्यार्य ! न्यपतंश्च समन्ततः ॥२०॥
स भृङ्गो ज्ञातवान्तेन स्वात्मानं वञ्चितं तदा। अमर्षैः पूरितो म्लेच्छो धन्वी गृहात्प्रनिःसृतः ॥२१॥
हन्तुमना हि तं क्रोधादन्वेषयन् वने त्विह। वनप्रान्तं परिभ्रम्य भृङ्गोऽत्र प्राप्तवान् शठम्[१५] ॥२२॥
ददर्श चाऽत्र तं म्लेच्छः प्रसुप्तं बिल्ववृक्षके। स एव निश्चयं कृत्वा लिङ्गान्तिकं समाव्रजत् ॥२३॥
एतल्लिङ्गे तदा भृङ्गः कृत्वावज्ञां शरेण वै। शठं जघान सुप्तं तमुद्धृत्याकर्णमाशुगम् ॥२४॥
तद्बाणपीडितो वृक्षाल्लिङ्गान्तिकं वने द्रुतम्। भयेन धर्षितस्तस्य पपात सोऽपि तच्छितौ[१६] ॥२५॥
भृङ्गो रुषा शठं शीघ्रं लिङ्गान्तिके च निर्दयम्। मुद्गरैस्ताडयामास पादाघातैश्च मुष्टिभिः ॥२६॥

हे प्रभु ! म तपाईंलाई दोब्बर, तेब्बर, चौबर दिन्छु, यो द्रव्य अहिले मलाई दिनुहोस्। यस द्रव्यको मूल्य यदि तपाईंलाई मैले दिइनँ भने तपाईंको वंशले मलाई सराप दिनेछ भन्ने कुरा बुझ्नुहोस् ॥१२-१३॥

हे विरूपाक्ष ! यस्तो किरिया खाएर त्यस ठगले दुनियाँलाई ठग्यो। सराप नै हतियार भएका ऋषिहरू र म्लेच्छलाई पनि ठग्यो। यसरी दुनियाँलाई चारैतिरबाट ठग्ने त्यस मूर्खले एक्लै वनमा बसेर केही समय बितायो। माघकृष्ण चतुर्दशीका दिन खान नपाएर त्यो चोर उपवास बस्यो। अमावास्याको दिन भोकले आत्तिएर त्यो ठग हिंड्यो। त्यसदिन त्यो भोकले चूर भयो। सामानामको धान बोकेर ल्याइरहेको भृङ्ग नाम नाम गरेको कुनै म्लेच्छलाई उसले ठग्यो। त्यसले सामाधान ल्याएर शिवजीलाई चढायो, बाँकी सबै आफूले खायो र उदकुण्ड (कुवा) को पानी खायो ॥१४-१८॥

हे विरूपाक्ष ! नीवारान्न अर्थात् सामाधानको भात खाएपछि त्यो मूर्ख अत्यन्त डरलाग्दो जङ्गल भएको हुनाले जन्तुहरूको डरले बेलको रुखमा चढेर सधैँ आनन्दसित सुत्दथ्यो। त्यस दिन पनि सुत्न जाँदा त्यसको हातको आघातले धेरै बेलपत्रहरू शिवलिङ्गमाथि खसे। केही समयपछि भृङ्गले आफूलाई म्लेच्छले ठग्यो भन्ने कुरा बुझ्यो। रीसले चूर भई ते भृङ्ग त्यस म्लेच्छलाई मार्नका लागि ऊ बाणसहितको धनु हातमा लिई घरबाट निस्कियो। त्यसलाई मार्नका लागि भृङ्गले उसलाई खाज्दै सारा वन चाहाऱ्यो र सम्पूर्ण वन घुमेर त्यो भृङ्ग यसै ठाउँमा आइपुग्यो ॥१९-२२॥

उसले बेलको रुखमा सुतेको म्लेच्छलाई देख्यो। त्यो त्यही ठग हो भन्ने निश्चय गरेर ऊ लिङ्गको नजिकै गयो। भृङ्गले त्यहाँ शिवलिङ्ग छ भन्ने कुराको ख्यालै नगरी कानसम्म बाण तानेर बेलको रूखमा सुतेको त्यस मूर्ख म्लेच्छलाई हिर्कायो। हे विरूपाक्ष ! भृङ्गका बाण लगेर बनेका घाउले पीडित भई त्यो म्लेच्छ वरूबाट लिङ्ग नजिकैको भूमिमा पछारियो। भृङ्गले पनि अत्यन्त रिसाएर लिङ्गको नजिकै रहेको त्यस मूर्ख म्लेच्छलाई तुरुन्तै मुङ्ग्रो, लात्ती र मुट्ठीले बेसरी हिर्कायो ॥२३-२६॥

---

१०. शपेऽहं तव वंशस्य किल्विषेणानुभूयताम्, इति न.सं.पु.पाठः। ११. वनेऽवसदिदैहाकी, इति न.सं.पु.पाठः।
१२. निःसृतोऽतः प्रवञ्चितुम्, इति न.सं.पु.पाठः। १३. वञ्चति स्म क्षुधार्तोऽसौ नीवारानानयन्मुहुः, इति न.सं.पु.पाठः।
१४. निवेदति स्म, इति न.सं.पु.पाठः। १५. द्विज, इति न.सं.पु.पाठः।
१६. विरूपाक्षोऽपतत्क्षितौ, इति न.सं.पु.पाठः।

शिवशिवेति च प्रोच्य हस्ताभ्यां लिङ्गमस्पृशत्। रक्ष रक्षेश मामद्य चेत्युक्त्वाऽसूञ्जहौ शठः ॥२७॥
म्लेच्छस्य तादृशीञ्चेष्टां प्रेक्ष्य रुद्रः प्रकोपितः। कोपेन भीमरूपोऽयं लिङ्गाद्विनिःसृतो द्रुतम् ॥२८॥
भस्मावशेषितो म्लेच्छः तृतीयेक्षणवह्निना। रुद्रेण रौद्ररूपेण कोपभीषणचेतसा[१७] ॥२९॥
तट्टङ्कारं समाकर्ण्य त्रयो देवा इहागताः। प्रेक्ष्य प्रकम्पिता रुद्रं भक्त्या च तुष्टुवुर्मुहुः ॥३०॥
ॐ नमो भीमाय रुद्राय कुपितेश्वर ते नमः। क्रोधं संहर देवेश रक्षास्मान् शरणागतान् ॥३१॥
भक्त्या वै तुष्टुवुर्देवाश्चैतल्लिङ्गे महेश्वरम्। नाम चक्रुश्च[१८] लिङ्गस्य कुपितेश्वर आत्मभूः ॥३२॥
ततःप्रभृति लिङ्गञ्च कुपितेश्वरमुच्यते[१९]। ऋषिभिः सेवितौ तत्र कात्यायनीमहेश्वरौ[२०] ॥३३॥
रुद्रगणास्तमास्थाय याने निन्युः शिवालयम्। वाद्यैर्गीतैर्मुदा नृत्यैर्मोदयन्तः[२१] शठं बहु ॥३४॥
ह्यभूच्छठोऽपि चाद्यापि रुद्रस्यानुचरोऽनिशम्। पापिष्ठो भक्तिहीनोऽपि भक्तियुक्ताः किमु द्विजाः ॥३५॥
नीवारबिल्वपत्राणामत्रैव[२२] निधनस्य च। बहुपुण्यप्रभावात्स मुक्तो लिङ्गप्रसादतः ॥३६॥

शिव ! शिव ! भनेर हातले शिवलिङ्गको स्पर्श गर्दै 'हे ईश्वर ! मलाई आज रक्षा गर्नुहोस्, रक्षा गर्नुहोस्' भनेर त्यस शठले प्राण त्याग्यो। म्लेच्छको त्यस्तो क्रियाकलाप देखेर भगवान् शङ्कर अत्यन्त क्रुद्ध हुनुभयो। रीसले गर्दा डरलाग्दो रूप लिएर भगवान् रुद्र तत्कालै लिङ्गबाट प्रकट हुनुभयो। रौद्ररूप लिएर प्रादुर्भाव हुनुभएका भगवान् शङ्करले रिसाएर तेस्रो आँखाबाट निस्किएको डरलाग्दो अग्निद्वारा म्लेच्छलाई खरानी तुल्याउनुभयो। शिवजीको भीषण आवाज सुनेर ब्रह्मा, विष्णु र इन्द्र तीनै देवता त्यस ठाउँमा आइपुगे। रिसाएका रुद्रलाई देखेर थर्थरी काँपे अनि भक्तिले भगवान्‌को स्तुति गरे ॥२७–३०॥

हे भगवान् कुपितेश्वर ! डरलाग्दो स्वरूप भएका हजुरलाई नमस्कार छ। हे देवाधिदेव ! आफ्नो यो रीसलाई तुरुन्त शान्त गराउनुहोस्, शरणमा आएका हाम्रो रक्षा गर्नुहोस्। भक्त देवताहरूले यस लिङ्गमा रहेका भगवान्‌लाई प्रसन्न तुल्याए। ब्रह्माजीले यस लिङ्गको नाम कुपितेश्वर राख्नुभयो। त्यसै समयदेखि यस लिङ्गको नाम कुपितेश्वर रह्यो। ऋषिहरूले कात्यायनी र कुपितेश्वर महादेवको सधैं सेवा गरे। शिवजीका गणहरू आएर उनीहरूले त्यस शठलाई यानमा राखी बाजा बजाउँदै, गीत गाउँदै, नाँच नाँच्दै मन बहलाएर स्वर्ग लगे ॥३१–३४॥

हे विरूपाक्ष ! त्यो पापी र भक्तिरहित शठ पनि भगवान् शङ्करको सेवक भएर आजसम्म बसेको छ भने भक्ति भएका मानिसहरूको त के कुरा ? हे विरूपाक्ष ! सामाधान, बेलपत्र, यस ठाउँको मृत्यु, उनीहरूको पुण्यको प्रभाव र शिवलिङ्गको अनुग्रहले त्यो शठ मुक्त भयो ॥३५–३६॥

---

१७. कुपिते भीषणाग्निना, इति न.सं.पु.पाठः।
१८. चकार, इति न.सं.पु.पाठः।
१९. ततः प्रभृतिर्लिङ्गोऽयं कुपितेश्वर आश्रुतः, इति न.सं.पु.पाठः।
२०. नित्यं कात्यायनी महेश्वरम्, इति न.सं.पु.पाठः।
२१. प्रमोदयन्, इति न.सं.पु.पाठः।
२२. नीवारबिल्वपत्रस्य चात्रैव, इति न.सं.पु.पाठः।

भूयो गच्छ विरूपाक्ष ! यत्र सर्वेश्वरो विभुः । चत्वारिंशद्धनुदूरी चोत्तरस्यामतो दिशि[२३] ॥३७॥
शिवगङ्गा शिवाकारा गौरीकुण्डे विराजते । लोकानां वरदा नित्यं स्नातकानां विरूपदृक् ॥३८॥
सर्वेश्वरसमं लिङ्गं नास्ति नास्ति महीतले । सेवितं सर्वलोकैश्च सर्वभावेन सर्वदा ॥३९॥
अध्यायमेतद्धि शृणोति भक्त्या भूम्नो माहात्म्यं कुपितेश्वरस्य ।
न सोऽभिभूयेत शठैश्च पापैः प्राप्नोति शैवं हि पदं ततश्च ॥४०॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये
विरूपाक्षतीर्थयात्रायामुदकुण्डतीर्थकुपितेश्वरयोर्माहात्म्यं नाम सप्तत्रिंशदुत्तरशततमोऽध्यायः ॥१३७॥

हे विरूपाक्ष ! जहाँ सर्वेश्वर भगवान् बस्नुभएको छ यहाँबाट चालीस धनु उत्तरमा रहेको त्यस ठाउँमा तिमी जाऊ । शिवको आकार भएकी शिवगङ्गा पनि गौरीकुण्डमा बसेकी छन् । त्यहाँ गएर स्नान गर्ने भक्तलाई उनी सधैँ वर दिन्छिन् । सर्वेश्वरजस्तो लिङ्ग यस पृथ्वीतलमा छैन । सबै प्राणीले सबै भावले यस लिङ्गको सधैँ पूजा गर्छन् ॥३७–३९॥

हे विरूपाक्ष ! जसले भक्तिपूर्वक यो अध्याय सुन्छ र सर्वव्यापक कुपितेश्वर महादेवको पवित्र एवं महत्त्वपूर्ण यो माहात्म्य सुन्छ त्यसलाई कुनै शठले ठग्न सक्दैन र त्यसले शैवपद पनि प्राप्त गर्छ ॥४०॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा उदकुण्डतीर्थ तथा कुपितेश्वरको माहात्म्यनामक एकसय सैंतिसौं अध्याय पूरा भयो ।

---

२३. चोत्तरे दिश्यतोऽधुना, इति न.सं.पु.पाठः ।

अष्टात्रिंशदुत्तरशततमोऽध्यायः

गौरीकुण्डसर्वेश्वरशिवलिङ्गयोर्महिमा

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षस्तेनर्षिणा समं मुने। सर्वेश्वरो हि यत्रास्ते सर्वलोकैः समन्ततः ॥१॥
यत्रैव स्थापितं लिङ्गं कुभेश्वरस्त्वयेति वै। चैत्रकृष्णचतुर्थ्यां स स्नात्वा नागह्रदे पुनः ॥२॥
गौरीकुण्डे मुदा स्नात्वा शिवगङ्गे वदन्निति। कुशहस्तो हि सङ्कल्प्य स्नानं कुर्वे च मे तनोः ॥३॥
अस्मिन्तीर्थे विशुद्ध्यर्थं सर्वलोकोपलब्धये। ततः सर्वेश्वरं लिङ्गमुपचारैरपूपुजत्[1] ॥४॥
तव नाम्नेदमाहूतं पुण्यै पञ्चोपचारकैः। सम्पूज्य विधिवल्लिङ्गं तन्निशायां विनिद्रकः ॥५॥
अपृच्छन्नेमुनिं भक्त्या सर्वेश्वरप्रशंसनम्।

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल भक्ताय ज्ञानदीपक ॥६॥
एतल्लिङ्गस्य माहात्म्यं श्रोतुमिच्छाम्यहं द्विज। गौरीकुण्डस्य माहात्म्यं ह्रदस्य च विशेषतः ॥७॥
को मुक्तोऽत्र पुरा मर्त्यो वद मे मुनिसत्तम।

नेमुनिरुवाच

ब्रह्मणा च कृतं पूर्वमेतत्कुण्डमगाधकम् ॥८॥
कश्यपोऽपि तपस्तेपे लोकानाञ्च सिसृक्षया। गौर्य्या चाराधितं लिङ्गमेतत्कुण्डे ह्यगाधके ॥९॥
समुद्भूतं ततः कुण्डादेतल्लिङ्गं तदा द्विज।

अध्याय - १३८

गौरीकुण्ड र सर्वेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर दुनियाले वरिपरिबाट घेरिएर बसेका सर्वेश्वर भगवान् जहाँ हुनुहुन्थ्यो त्यसै ठाउँमा गए। त्यसपछि उनी चैत्रकृष्ण चतुर्थीका दिन नागदहमा स्नान गरेर तिमीले कुम्भेश्वर नामले स्थापना गरेको शिवलिङ्ग भएको ठाउँमा गए। त्यसपछि प्रसन्न चित्त भएर उनले गौरीकुण्डमा स्नान गरे, हातमा कुश-जल लिएर हे शिवगङ्गे ! म सम्पूर्ण लोकको प्राप्ति र पवित्रताका लागि यस तीर्थमा स्नान गर्छु भनेर सङ्कल्प गरे। पूजासामग्रीहरू लिएर तिम्रो नामबाट सम्बोधित सर्वेश्वर शिवलिङ्गको पूजा गरे। उनले त्यस दिन राति जाग्राम बसेर पञ्चोपचार विधिले फूलहरू लिएर ॐ सर्वेश्वराय नमः भनी विधिवत् शिवलिङ्गको पूजा गरे। उनले भक्तिपूर्वक सर्वेश्वर शिवलिङ्गको माहात्म्य नेमुनिसित सोधे ॥१-५½॥

विरूपाक्षले भने – भक्तलाई ज्ञान दिने हे मुनिश्रेष्ठ ! हजुरलाई नमस्कार छ। हजुरबाट म यो लिङ्गको विशेष गरी गौरीकुण्डको माहात्म्य सुन्न चाहन्छु। अघि कुन मानिस यहाँ कसरी मुक्त भयो ? हे मुनिश्रेष्ठ ! मलाई बताउनुहोस् ॥६-७½॥

नेमुनिले भन्नुभयो – यो गहिरो कुण्ड ब्रह्माजीले बनाउनुभएको हो। संसारको सृष्टि गर्न चाहने कश्यपले यसै ठाउँमा तपस्या गरेका थिए। हे विरूपाक्ष ! यो गहिरो दहमा अघि पार्वतीले शिवजीको आराधना गर्नुभएको थियो। त्यसैले कुण्डबाट त्यतिखेर यो लिङ्ग पैदा भएको हो ॥८-९½॥

---

१. लिङ्गमपूपुजत्प्रपूजनैः, इति न.सं.पु.पाठः।

आसीत्पूर्वं विरूपा च किराताधिपतेः सुता ॥१०॥
पितृभ्यां सा परित्यक्ता सुनिन्द्यरूपकारणात्[२]। विवाहितामपि स्वामी त्यक्त्वा विरक्तिमानभूत् ॥११॥
युवतौ षोडशाब्दायामपि विरूपतो मुने। लज्जया व्यथिता सापि प्राविशल्ललिता वनम् ॥१२॥
खादन्तु जन्तवो मेऽङ्गमिदङ्क्त्वेति निर्भरम्। मध्ये लिङ्गयुतं कुण्डं भव्यं कुरूपहेलिता[३] ॥१३॥
प्रददर्श महागाढं शिवगङ्गाम्बुनिर्मलम्। कार्तिक्यां पूर्णिमायां स निराहारा सती सदा ॥१४॥
मध्याह्ने त्वरितं विप्र देहं त्यक्तुमियेष च। प्रवन्द्य शिरसा लिङ्गं बध्वाञ्जलिर्विरक्तधी ॥१५॥
त्यक्तुमना ह्यसूनसद्य उत्पपात ह्रदे स्वयम्। तत्क्षोभिताम्बुवीचिस्तां प्रचिक्षेप तटे द्रुतम् ॥१६॥
अग्रहीच्च ततो म्लेच्छो जलादुद्धृत्य सान्त्वयन्। साभवत्तद्ध्रदे स्नानाद्दिव्यनारी सुसुन्दरी ॥१७॥
मुमुदे प्रेक्ष्य स्वात्मानं जलबिम्बे च सुन्दरी[४]। नारदाच्च समाकर्ण्य शक्र इहाययौ द्रुतम् ॥१८॥
सम्प्रेक्ष्य तां मुमोहाशु रूपशीलमहाद्भुताम्। इन्द्रो जग्राह तां शीघ्रं तन्मनोहारिणीं भृशम् ॥१९॥
तार्क्ष्योऽमृतं यथा पूर्वं समक्षे च किरातिनाम्। साऽभवत्सुचिरं कालं शक्रार्द्धासनहारिणी ॥२०॥
अपराञ्चाऽप्सरां विद्धि इन्द्रस्य दयितां प्रियाम्। भूयः शृणु विरूपाक्ष मुक्तः कश्चिन्नराधमः ॥२१॥
एतल्लिङ्गस्य माहात्म्यमभूत्पूर्वं महाद्भुतम्। आसीत्पूर्वं महापापी मध्यदेशे गृहाश्रमी ॥२२॥
चौरेणादाय नित्यं स भुनक्ति स्म द्विजाधमः। प्राग्जन्मनि स चाण्डालो गङ्गातीरे मृतः पुरा ॥२३॥
तस्मादभूच्च विप्रोऽसौ जातिमात्रगरिष्ठवान्।

हे विरूपाक्ष ! अघि कुनै किरात राजाकी कुरूपा एउटी छोरी थिइन्। नराम्रो रूप भएकी हुँदा बाबु–आमाले तिनलाई त्यागी दिएका थिए। विवाह गरे तापनि नराम्रो रूप भएको हुँदा सोह्र वर्षकी ती युवतीलाई उसको लोग्नेले छोडिदियो र विरक्त भयो। लाजले गर्दा अत्यन्त चिन्तित भएर मेरो शरीरलाई जनावरले खाऊन् भनेर उनी ललिता नाम गरेको वनमा प्रवेश गरिन्। ती विरूपाले यसै कुण्डको माझमा शिवलिङ्ग रहेको अत्यन्त गहिरो निर्मल शिवगङ्गाको जल देखिन्। कार्तिक पूर्णिमाको दिन निराहार बसेकी ती विरूपाले मध्याह्नको समयमा छिट्टै प्राण छोड्ने विचार गरिन् ॥१०–१४॥

शिवजीलिङ्गलाई हात जोडेर नमस्कार गर्दै विरक्त बनेकी ती विरूपा प्राणत्याग गर्नका लागि दहमा आफैं हाम फालिन्। उनी पानीमा हामफाल्दा क्षुब्ध भएका पानीका तरङ्गहरूले तुरुन्तै तिनलाई किनारा लगाए। एउटा म्लेच्छले तिनलाई पानीबाट बाहिर निकाल्यो र सान्त्वना दियो। ती विरूपा कन्या त्यस तलाउमा स्नान गरेपछि दिव्य सुन्दरी भइन्। पानीमा आफ्नो छाया देखेर उनी अत्यन्त प्रसन्न भइन् ॥१५–१७॥

नारदको मुखबाट त्यो सबै वृत्तान्त सुनेपछि उत्सुक बनेका इन्द्र त्यहाँ आए। तिनको अत्यन्त अद्भुत रूपराशिलाई देखेर उनी मुग्ध भए। वर्षा समयको प्रारम्भमा अघि गरुडले जसरी सर्पलाई झम्टिएका थिए त्यसरी नै किरातहरूका सामसमा नै ती सुन्दरी नारीलाई इन्द्रले च्याप्पै समाते। ती किरातपुत्री धेरै समयसम्म इन्द्रको अर्धासनकी अधिकारी बनिन्। अर्की इन्द्रकी प्रिय अप्सरा पनि त्यहाँ थिइन् भन्ने कुरा जान ॥१८–२०½॥

अघि कामधेनु गाईकी पुत्री नन्दिनीले स्नान गरेको हुँदा यस नदीको नाम नन्दिनी रह्यो। नन्दिनीतीर्थमा स्नान, यज्ञ र श्रद्धापूर्वक पितृहरूलाई तर्पण, पिण्ड प्रदान गर्दा गरिएका सबै कर्म अविनाशी हुन्छन्। त्यस नदीमा नुहाउने व्यक्तिले त्यो सबै अक्षयफल पाउँछ र मनले चिताएको कामना पूर्ण हुन्छ। मार्गशुक्ल तृतीयाका दिन उशीर वृक्षको मूलमा रहेकी नन्दिनी नदीमा जसले स्नान गर्छ त्यसले तीसवटा गाई दान गरेको फल पाउँछ। नन्दिनी र विष्णुपदी नदीको सङ्गममा जुन विद्वान्ले स्नान गर्छ त्यसले हजार गाई दान गरेको फल प्राप्त गरी उत्तम विष्णुलोक पाउँछ। जुन बुद्धिमान् मानिसले भराटेश्वर भगवान् शङ्करको कल्याणदायक माहात्म्यले परिपूर्ण भएको यो अध्याय सुन्छ, त्यसले पुत्रशोकको पीडा भोग्नुपर्दैन र पूर्ण आयु पाउँछ, यो साँचो कुरा हो ॥५९-६३॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भस्मतीर्थ र चन्दनभराटेश्वरलिङ्गको माहात्म्यनामक
एकसय एकचालिसौं अध्याय पूरा भयो।

---

१३. पञ्चम्यां कनखले प्रोक्तम्, इति न.सं.पु.पाठः।
१४. पूर्णिमायां नभस्यतः, इति न.सं.पु.पाठः।
१५. यत्र च, इति न.सं.पु.पाठः।
१६. गच्छसि, इति न.सं.पु.पाठः।
१७. दत्तमाद्रितः, इति न.सं.पु.पाठः।
१८. स्नायते, इति न.सं.पु.पाठः।
१९. नन्दिन्या विष्णुपद्या यः स्नायते सङ्गमे बुधः, इति न.सं.पु.पाठः।
२०. माहात्म्यभद्रञ्च, इति न.सं.पु.पाठः।
२१. न कर्षतेऽसौ, इति न.सं.पु.पाठः।

द्विचत्वारिंशदुत्तरशततमोऽध्यायः

यक्षतीर्थ–यक्षेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो योजनार्द्धे घटोद्भव। कौवेर्य्यां दिशि चैतस्मादुशीरबीजपर्वतम् ॥१॥
नन्दिन्याञ्च सुखं स्नात्वा तीर्थेषु क्रमशो मुने। यक्षतीर्थे पुनःस्नात्वा यक्षेश्वरमपूजयत् ॥२॥
तदधो विष्णुकन्दर्य्याः भक्तिभावेन कुम्भज। एकादश्यां मधोः कृष्णे तस्यां तमार्च्चयन्निशि ॥३॥
मुनिं पप्रच्छ माहात्म्यं तल्लिङ्गस्य विरूपदृक्। भक्त्योदितं समाकर्ण्य विरूपाक्षवचस्तदा ॥४॥
व्याजहार मुनिस्तस्मै तन्माहात्म्यं महानिशि।

नेमुनिरुवाच

विष्णुना स्थापितं लिङ्गमेतत्पुरा विरूपदृक् ॥५॥
क्षेत्रे पाशुपते पुण्ये तप्तञ्चात्र कठोरकम्। न मुञ्चति ततो विष्णुरेतल्लिङ्गमहर्निशम् ॥६॥
एकांशेन महादेवं सेवमानः सदा मुदा[1]। कश्चिद्यक्षो हयग्रीवः कुबेरद्वारपालकः ॥७॥
द्वारिस्थो यौवनोन्मत्तो लोकान्नागणयत्पुरा। तद्भयात्किङ्करा गेहे प्रवेष्टुं यक्षभूपतेः[2] ॥८॥
द्वारं विलङ्घ्य शेकुर्न तद्दण्डतर्ज्जनाद् भृशम्। कुबेरोऽपि च तज्ज्ञात्वा तेन द्वारि निवारितः[3] ॥९॥
वर्गश्च किङ्कराणां स तञ्च न्यषेधयत्पुनः।

कुबेर उवाच

भो भो दुष्ट हयग्रीव लोको निवारितः[4] कथम् ॥१०॥
अद्यप्रभृति मे राज्ये न स्थातव्यं त्वयाऽधुना।

अध्याय – १४२

यक्षतीर्थ र यक्षेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष आधा योजन उत्तरतर्फ रहेको उशीरबीज नाम गरेको पर्वतमा गए। विरूपाक्षले नन्दिनी नदीमा आनन्दसित स्नान गरे। फेरि क्रमशः तीर्थहरूमा स्नान गर्दै यक्षतीर्थमा स्नान गरेर उनले यक्षेश्वर भगवान्‌को पूजा गरे। हे अगस्त्य मुनि ! त्यसपछि विरूपाक्षले भक्तिभावले युक्त भएर वैशाखकृष्ण एकादशीका दिन राति विष्णुकन्दरीको पूजा गरे र नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे। भक्तिपूर्वक भनेको विरूपाक्षको बोली सुनेर नेमुनिले राति त्यस लिङ्गको माहात्म्य विरूपाक्षलाई बताए ॥१–४॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि यस लिङ्गलाई विष्णुले स्थापना गर्नुभएको थियो। पशुपतिको पुण्यमय क्षेत्रमा यस लिङ्गको स्थापना गरी भगवान् विष्णुले यहाँ कठोर तपस्या पनि गर्नुभएको थियो। त्यसैले गर्दा त्यसै समयदेखि भगवान् विष्णुको एक अंशले रातिदन यस लिङ्गलाई छोडेको छैन, आफ्नो एक अंश लिएर भगवान् विष्णु महादेवको सधैं सेवा गर्नुहुन्छ। अघि हयग्रीव नाम गरेको कुबेरको द्वारपाल यक्ष थियो। द्वारपाल हुन पाएँ भन्ने घमण्डले गर्दा त्यसले कसैलाई पनि गणना गरेन। त्यसको डरले गर्दा त्यसको लट्ठीले हिर्काइ खानुपर्ला भनेर कुबेरका अनुचरहरू कोही पनि भवनभित्र पस्न सक्दैनथे ॥८॥ कुबेरले पनि त्यस द्वारपालले आफ्ना अनुचरहरूलाई यढैबाट हटएको कुरा थाहा पाएर त्यसलाई आफ्नो ढोकाबाट हटाइदिए ॥५–९½॥

कुबेरले भने– हे दुष्ट हयग्रीव ! तैंले किन मेरा अनुचरहरूलाई ढोकाबाट भित्र पस्न दिइनस् ? आजदेखि तैंले मेरो राज्यमा वास पाउनेछैनस् ॥१०॥

---

१. सेवयन्सततं मुदा, इति न.सं.पु.पाठः।
२. कुबेरस्य प्रवेशितुम्, इति न.सं.पु.पाठः।
३. निषेधितम्, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्युक्त्वा यज्ञराट् तञ्चाऽप्रेषयत्[५] पार्श्वगैर्द्रुतम् ॥११॥
बहिश्चकार तत्कालमलकायाः स कोपतः[६]। ततो दैवाद्धयग्रीवो भ्रमन्नत्राययौ पुरा ॥१२॥
अस्मिन्तीर्थे मुदा स्नात्वा चैतल्लिङ्गं ह्यपूजयत्[७]। प्रतिपदादि माघेषु चोष्णोदकैः समर्चितम् ॥१३॥
अनेन लिङ्गमेतद् हि[८] यावद्द्वादशवासरम्। फलमूलाशनेनैव पूजितः स सदाशिवः[९] ॥१४॥
फलैर्मूलैः प्रसूनैश्च भक्त्या गीतैर्जलोत्तमैः। ततो द्वादशवर्षान्ते काले प्राप्ते महानिशि ॥१५॥
माघकृष्णचतुर्दश्यां हयग्रीवो मृतस्तदा। निराहारो महारोगी शिवशिवेति चाऽवदत् ॥१६॥
कराभ्यामस्पृशल्लिङ्गं[१०] प्राणे कण्ठगतेऽपि च। ततो निन्युर्हयग्रीवं प्रमथाः शिवपत्तनम् ॥१७॥
अद्यापि च गणश्रेष्ठो हयग्रीवोऽभवत्पुनः।
पुनर्गच्छ द्विजाऽस्मात्त्वं यत्रास्ते चण्डिकेश्वरः ॥१८॥
पिण्डारकेण तीर्थेन मृगेन्द्राद्रिनितम्बके। स्नाहि चोशीरतीर्थे त्वं दशगोदानजं फलम् ॥१९॥
लब्ध्वाशु प्रतिमां विष्णोः प्रपश्य व्रज तत्र च। स्नात्वा पश्यति यो विष्णुं सर्वपापैः प्रमुच्यते ॥२०॥
मधोः सिते हरितिथौ शतगोदानजं फलम्।
यक्षस्य तीर्थे च यदस्ति पुण्यं प्राप्नोति सद्यः श्रवणात्कथायाः।
आद्यो भवेत्स प्रसभञ्च शीघ्रं यक्षो यथा शत्रुषु वै बलिष्ठः ॥२१॥

इति श्रीस्कन्दपराणे हिमवत्खण्डे नेपालमाहात्म्येविरूपाक्षतीर्थयात्रायां यक्षतीर्थयक्षेश्वरयोर्माहात्म्यं नाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४२॥

नेमुनिले भन्नुभयो – यति भनेर त्यस हयग्रीवलाई तुरुन्त पार्श्ववर्तीद्वारा बाहिर पठाउन लगाए। तिनीहरूले पनि त्यस हयग्रीवलाई कुबेरको राज्यबाट निकालिदिए। त्यहाँ दैवसंयोगले त्यो हयग्रीव घुम्दै यसै लिङ्ग भएको ठाउँमा आयो। यस तीर्थमा प्रसन्न हुँदै स्नान गरेर त्यसले यस लिङ्गको पूजा गऱ्यो। माघमहिनाको प्रतिपदादेखि लिएर उसले तातो जलले पूजा गऱ्यो। उसले भक्तिपूर्वक बाह्र दिनसम्म आफूलाई शिवलिङ्गमय बनायो। फल तथा कन्दमूल खाएर दिनदिनै शिवजीको पूजा गऱ्यो। गीत एवं वाद्यका साथ फल, कन्दमूल र पवित्र जल भक्तिपूर्वक उसले पूजा गऱ्यो। बाह्र वर्षपछि माघकृष्ण चतुर्दशीका दिन राति काल आएको हुँदा हयग्रीव भोकै रुग्ण भएर शिव! शिव ! भन्दै मऱ्यो। उसले घाँटीसम्म प्राण पुगुञ्जेल हातले शिवलिङ्गलाई स्पर्श गरिरह्यो। अनि प्रमथगणहरूले हयग्रीवलाई शिवजीको लोकमा लगे। आज पनि त्यो हयग्रीव गणको मालिक भएर रहेको छ ॥११-१७½॥

हे विरूपाक्ष ! अब तिमी जहाँ चण्डिकेश्वर भगवान् हुनुहुन्छ, त्यस ठाउँमा जाऊ। मृगेन्द्रपर्वतको फेदीमा अवस्थित पिण्डारक तीर्थसँगैको उशीरतीर्थमा स्नान गर। त्यसो गऱ्यौ भने दशवटा गाई दान गरेको फल पाउनेछौ। जसले वैशाखशुक्ल एकादशीका दिन त्यस तीर्थमा स्नान गरेर विष्णुको दर्शन गर्छ त्यो सम्पूर्ण पापबाट मुक्त हुन्छ। सय गोदान गरेको फल पाउँछ। यक्षतीर्थमा जे जति पुण्य छ, यो कथा सुन्यो भने तुरुन्त त्यति नै पुण्य पाउँछ, त्यो व्यक्ति अवश्य नै चाँडै धनी हुन्छ। शत्रुको बीचमा यक्ष जति बलिया छन्, त्यो पनि त्यत्तिकै बलियो हुन्छ अर्थात् त्यसलाई शत्रुले केही गर्न सक्दैन ॥१८-२१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा यक्षतीर्थ र यक्षेश्वरलिङ्गको माहात्म्यनामक एकसय बयालिसौं अध्याय पूरा भयो।

---

४. निषेधितः, इति न.सं.पु.पाठः।
५. तं कुबेरोऽसौ प्रेषयत्, इति न.सं.पु.पाठः।
६. तद्गणं धारयन्हस्तैस्लकाया निकाशयत्, इति न.सं.पु.पाठः।
७. समर्चितः, इति न.सं.पु.पाठः।
८. एतल्लिङ्गमयं भक्त्या, इति न.सं.पु.पाठः।
९. फलमूलाशनो नित्यमर्चति स्म सदाशिवम्, इति न.सं.पु.पाठः।
१०. कराभ्यां स्पर्शयल्लिङ्गम्, इति न.सं.पु.पाठः।

त्रिचत्वारिंशदुत्तरशततमोऽध्यायः

पिण्डारकतीर्थ-चण्डिकेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो यत्रास्ते चण्डिकेश्वरः। उत्तरे क्रोशमात्रे च तीर्थे पिण्डारकाभिधे[1] ॥१॥
मधोः कृष्णत्रयोदश्यां सस्नौ भक्त्या द्विजः पुनः। पिण्डारके महातीर्थे सङ्कल्प्य विधिवत्तदा ॥२॥
चतुर्दश्यामुपोष्यार्य भक्त्या पुष्पोपहारकैः। लिङ्गं सम्पूज्य माहात्म्यं तमपृच्छन्मुनिं तदा ॥३॥
व्याजहार मुनिश्रेष्ठो विरूपाक्षाय साम्प्रतम्। भक्त्योदितं समाकर्ण्य माहात्म्यञ्च तयोर्निशि ॥४॥

ऋषिरुवाच

हत्वा च चण्डिका दैत्यान्सह मातृगणैः पुरा। तस्थौ चात्र चिरं कालं चिन्तयन्ती सदाशिवम्[2] ॥५॥
ईषे शुक्लचतुर्दश्यामेतल्लिङ्गसमुद्भवम्। प्रेक्ष्य देवी महालिङ्गमपूपुजन्मुदार्चनैः ॥६॥
चण्डिकेशो ह्यतः ख्यातो लिङ्गेशोऽयं सुरासुरैः। शृणु वच्म्यस्य माहात्म्यं कश्चिन्मुक्तो सुरः पुरा ॥७॥
आसीदेकेक्षणान्धश्च दानवेन्द्रो महाबलः। कश्यपस्यात्मजः पूर्वमत्र तेपे महातपः ॥८॥
अस्माल्लब्धवरो दैत्यश्चाऽवध्यः सर्वजन्मिनाम्। मेनिरे सर्वदैत्यास्तं हिरण्यकशिपुं यथा ॥९॥
लुण्ठति स्मासुरो नित्यं सद्योऽमरावतीं द्विज। विमथ्य चाऽमरान्द्रव्यमादायेहाययौ पुनः ॥१०॥
ततो देवाश्च सम्भूय पुरोधाय विधिं तदा। तद्बलोन्मर्द्दनक्षीणा म्लानमुखा इहाययुः ॥११॥
देवा निवेदयन्ति स्म तद्वृत्तान्तञ्च शूलिने। अन्धकेनाऽर्द्दिताः स्वर्गे सनिःश्वासा विलुण्ठिताः[3] ॥१२॥

अध्याय - १४३

पिण्डारकतीर्थ र चण्डिकेश्वर शिवलिङ्गको माहात्म्य

कुमार स्वामीले भन्नुभयो – त्यसपछि फेरि विरूपाक्ष त्यहाँबाट एक कोस उत्तरमा रहेको पिण्डारक तीर्थ नजिकै गए। त्यहाँ भगवान् चण्डिकेश्वर बस्नुहुन्थ्यो। वैशाखकृष्ण त्रयोदशीका दिन विरूपाक्षले भक्तिपूर्वक पिण्डारक नामक महातीर्थमा सङ्कल्प गरेर विधिवत् स्नान गरे। हे अगस्त्य मुनि ! चतुर्दशीका दिन उपवास बसेर चन्दन, अक्षता आदि पूजासामग्रीले भक्तिपूर्वक लिङ्गको पूजा गरिसकेपछि विरूपाक्षले नेमुनिसित चण्डिकेश्वर लिङ्गको माहात्म्य सोधे। मुनिश्रेष्ठ नेमुनिले पनि भक्तिपूर्वक सोधेको सुनेर विरूपाक्षलाई राति ती दुबैको माहात्म्य बताउनुभयो ॥१-४॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! अघि मातृकाले सहित भएकी भगवती चण्डिका दैत्यहरूको संहार गरेर महारुद्रको ध्यान गर्दै धेरै समयसम्म यसै स्थानमा बस्नुभएको थियो। आश्विनशुक्ल चतुर्दशीका दिन यस लिङ्गको उत्पत्ति भएको देखेर भगवती चण्डिकाले पूजासामग्री ल्याई सहर्ष यस लिङ्गको पूजा गर्नुभएको थियो। त्यसैले गर्दा यस शिवलिङ्गको नाम चण्डिकेश्वर भनेर देवता र दैत्यहरूले प्रसिद्ध गराए। यहाँ अघि कुनै देवता मुक्त भएका थिए। त्यो माहात्म्य बताउँछु, सुन ॥५-७॥

उहिले कुनै आँखो अन्धो भएको कश्यपको छोरो महाबली एक दैत्य थियो। उसले यहाँ ठूलो तपस्या गऱ्यो। यसै लिङ्गबाट वर प्राप्त गरेर त्यो अन्धकनामको दैत्य सम्पूर्ण प्राणीहरूद्वारा नमर्ने भयो। सबै दैत्यहरूले उसलाई हिरण्यकशिपुजस्तै माने। त्यस राक्षसले देवताहरूको अमरावती पुरी तुरुन्त गएर लुट्यो। त्यहाँको सम्पूर्ण सम्पत्तिलिएर त्यो यहाँ आयो। त्यसपछि सारा देवताहरू जम्मा भएर ब्रह्माजीलाई अगाडि लगाई दैत्यका फौजले मर्दन गरेको हुँदा क्षीण भएर अँध्यारो मुख लगाउँदै यहाँ आए। अन्धक नामक दैत्यले सताइएका देवताहरूले यहाँ आएर भगवान् शङ्करलाई स्वर्ग लुट्ने त्यस दैत्यको वृत्तान्त लामो सास लिँदै निवेदन गरे ॥८-१२॥

---

१. पिण्डारकाऽन्तिके, इति न.सं.पु.पाठः।
२. महारुद्रं सुचिन्तयम्, इति न.सं.पु.पाठः।
३. प्रलुण्ठञ्च सनिःश्वसन्, इति न.सं.पु.पाठः।

स तस्मिन् समये चाऽन्धः स्वर्गादिहाययौ द्रुतम्। अत्र स्थितान् सुरान् प्रेक्ष्य चकार रोषमद्भुतम्[४] ॥१३॥
ववर्ष शरवर्षाणि देवानामुपरि ध्रुवम्। अन्धकश्च महादैत्यो रुषाविष्टो महासुरः ॥१४॥
ववृषु देवतास्तीव्रं शरासारान् समन्ततः। अन्धस्योपरि शश्वच्च स्वर्णपुङ्खान्पतत्त्रिणः ॥१५॥
अन्धीभूता दिशश्चात्र बाणजालैः समन्ततः। महासारैर्यथाकल्पे नाबुध्यच्च दिशोन्धकः ॥१६॥
विश्वकर्मा ततो व्योम्नश्चोत्पत्य तं ववर्ष च। शिलासानुद्रुमान् पूर्णान् सजलकरकान् भृशम् ॥१७॥
इन्द्रश्चिक्षेप वज्रञ्च वह्निरग्निकणं यमः। दण्डं रक्षो दृषत्पाशं प्रचेता वायुरोजसम् ॥१८॥
पाशुपतं कुबेरश्च शूलमीशान एव च[५]। शस्त्रास्त्राणि सुराः शीघ्रं तस्योपरि च चिक्षिपुः ॥१९॥
महाकोलाहलश्चाऽभूद् गजानां ह्रेषितैस्तदा। अश्वानां रथनेमीनां शस्त्रास्त्रवर्षणैस्तथा ॥२०॥
ततोऽन्धकश्च तत्पीडां सोढ्वा चैव[६] त्वरान्वितः। एतल्लिङ्गं प्रणम्याशु तद्वरं प्रार्थयन्नभूत् ॥२१॥
भूयोऽन्धको[७] रुषाविष्टो चाग्नेयास्त्रं समन्ततः। चिक्षेप ज्वालमालाञ्च व्योम्नि देवगणोपरि ॥२२॥
इन्द्रं व्यलोडयद् भूमौ शरेणैकेन सोऽन्धकः। दिक्पालाश्च तथैवार्य पृथक् पृथक् शरेण च ॥२३॥
ब्रह्मास्त्रेणाऽन्धको बद्ध्वा विश्वकर्माणमाशु च। नागपाशेन सक्रोधं हन्तुं प्रचक्रमे तदा ॥२४॥
देवाश्चालोक्य तच्चेष्टां दिशश्च भेजिरे भयात्। त्राहि त्राहि महारुद्र ! ब्रुवन्तो हि[८] समन्ततः ॥२५॥
अशरीरोऽब्रवीदत्र प्रमथेभ्यस्तदा विभुः। दैत्यपराक्रमं प्रेक्ष्य चाऽतिहर्षितवान् प्रभुः ॥२६॥
भो प्रमथा इमं दैत्यं यानेन सह सादरम्। आनयत हि मे लोके यावन्न ताडितश्च तैः ॥२७॥

त्यो अन्धक दैत्य पनि त्यसै बखतमा देवताहरूलाई त्यहाँ बसेको देखेर क्रुद्ध हुँदै दौडिएर स्वर्गबाट यहाँ आयो। रीसले भुतुक्क भएको अन्धक नामक त्यस महादैत्यले देवताहरूमाथि बाणहरूको वर्षा गऱ्यो। देवताहरूले पनि अन्धक दैत्यमाथि चारैतिरबाट सुवर्णमय प्वाँख भएका बाणहरूको तीव्र वृष्टि गरे। महाप्रलयमा भएको मुसलधारे वर्षाले जस्तै गरी चारैतिरबाट वर्सिएका बाणले सबै दिशा अँध्यारा भए। अन्धक दैत्यले दिशा पत्ता लगाउन सकेन। त्यसपछि विश्वकर्मा आकाशमा उफ्रिए। ठूला-ठूला ढुङ्गा, रुख, पानी र असिनाहरू त्यस दैत्यमाथि खूबसित बर्साए ॥१३-१७॥

इन्द्रले वज्र, अग्निले आगाका फिलिङ्गाहरू, यमराजले दण्ड, निर्ऋतिले ढुङ्गा, वरुणले पासो र वायुले वेगको वर्षा गरे। कुबेरले पाशुपत अस्त्र फ्याँके, भगवान् शङ्करले त्रिशूल फ्याँक्नुभो, अरु देवताहरूले त्यस अन्धक दैत्यमाथि छिट्ये छिट्ये गरेर शस्त्र र अस्त्र फ्याँके। त्यस लडाईंमा बाणले घायल भएका हात्ती र घोडाको शब्द, रथका पाङ्गाको शब्द र अस्त्र तथा शस्त्रको सङ्घर्षणबाट पैदा भएको आवाजले ठूलो कोलाहल मच्चियो ॥१८-२०॥

त्यसपछि अन्धकासुर दैत्यले ती सबै पीडा सहन गरेर नम्र हुँदै चण्डिकेश्वर शिवलिङ्गको दर्शन गऱ्यो र आफ्नो इच्छाअनुसारको वर माग्यो। रिसाहा त्यस अन्धकासुर दैत्यले देवताका फौजहरूमाथि चारैतिर ज्वाला फैलिएको आग्नेयास्त्रको प्रहार गऱ्यो। त्यस अन्धकासुरले इन्द्रलाई एक बाण हानेर जमिनमा पछारिदियो, त्यसरी नै अरु दिक्पालहरूलाई बेग्लाबेग्लै एक-एक बाण हानेर जमिनमा ढाल्यो। रीसले चूर भएको अन्धक दैत्यले नागपाशले बाँधेर ब्रह्मास्त्र हानी विश्वकर्मालाई मार्न खोज्यो ॥२१-२४॥

विश्वकर्मालाई दैत्यले मार्न लागेको देखेर देवताहरू हे महारुद्र ! रक्षा गर्नुहोस्, रक्षा गर्नुहोस् भन्दै डराएर चारै दिशातिर लागे। त्यसै बखत महादेवले दैत्यको पराक्रम देखेर प्रसन्न हुँदै प्रमथगणलाई आकाशवाणीबाट भन्नुभयो। हे प्रमथगणहरू हो ! देवताहरूले बाण हान्नुभन्दा पहिले नै यस अन्धकासुर दैत्यलाई सम्मानका साथ विमानमा राखेर मेरो लोकमा लिएर आओ ॥२५-२७॥

---

४. इहाययौ रुषाद्भुतम्, इति न.सं.पु.पाठः।
५. ईशानः शूलमेव च, इति न.सं.पु.पाठः।
६. तदा सह्य, इति न.सं.पु.पाठः।
७. ततोऽन्धकः, इति न.सं.पु.पाठः।
८. एवं ब्रुवन्, इति न.सं.पु.पाठः।

इत्यादेशं समाकर्ण्य चाऽत्रायर्युगणा द्रुतम्। यानेन कुसुमासारं वर्षयन्तो मुदाऽन्विताः ॥२८॥
तमास्थाय च निन्युस्ते शिवलोकं गणा द्रुतम्। समक्षे देवसैन्यानां साधु साध्विति वादिनः ॥२९॥
पिण्डारकस्य माहात्म्यं शृणु विरूपदृक् पुनः। द्वारवत्या इहागत्य मुक्तः कश्चिन्नृपः पुरा ॥३१॥
आसीत्कश्चिन्नृपः पूर्वं सुनीतिर्नाम विश्रुतः। मारुताधिपतिर्द्रष्टुं द्वारवत्यां ययौ हरिम् ॥३२॥
स्नात्वा तीर्थे हरिं प्रेक्ष्य चाग्रहीत्तत्प्रसूनकम्। एकेन पाणिना भूयो द्वारि प्रसार्य वै स्थितः ॥३३॥
समाययौ यमोऽप्याशु पथि याते नृपे तथा। अब्रवीदीदृशं वाक्यं सक्रोधं पतये नृणाम् ॥३४॥

यम उवाच

राजन् जानीहि माञ्च त्वं यमनाम्ना च[९] विश्रुतम्। नियामकञ्च लोकानां त्वां शासितुमिहागतम् ॥३५॥
गृहीतं भवता पुष्पमेकेन पाणिना हरेः[१०]। तद्दूषणादहं राजन् ते करं छेदयाम्यतः ॥३६॥

ऋषिरुवाच

इत्युक्त्वा त्वरितं कालश्चकर्त्त नृपतेः करम्। दक्षं गृहीतपुष्पञ्च[११] लोकानां शमनाय च ॥३७॥
दुःखदग्धो नृपोऽत्यन्तं विरक्तः पथि सिद्धराट्। न चाऽद्राक्षीत्स्वकं राज्यं शोकसन्तप्तमानसः[१२] ॥३८॥
भ्रान्त्वा च[१३] सर्वतीर्थानि पृथिव्यां काशीमाप्तवान्। तस्यास्तीर्थेषु संसस्नौ गङ्गादिषु च भक्तितः ॥३९॥

यस्तो आदेश सुनेर प्रमथगणहरू दगुर्दै त्यहाँ आए। विमानबाट प्रसन्न हुँदै पुष्पवृष्टि गरे। त्यसलाई गणहरूले यानमा राखेर धन्यवाद दिँदै देवताका सेनाहरूको अगाडि नै तुरुन्त शिवलोक लगे। त्यसपछि खुसी हुँदै देवताहरू स्वर्गतिर लागे। त्यो दैत्य पनि गणको नाइके भई सधैं शिवको सेवक भएर बस्न थाल्यो। अब म फेरि पिण्डारकको माहात्म्य बताउँछु। अघि द्वारवतीबाट आएर कुनै राजा यहाँ मुक्त भएका थिए, त्यो कुरा सुन ॥२८-३१॥

हे विरूपाक्ष ! अघि सुनीति नाम भएका मारुतदेशका कुनै राजा द्वारकामा भगवान् विष्णुको दर्शन गर्न भनेर गएका थिए। तीर्थमा स्नान गरेर भगवान् विष्णुको दर्शन गरिसकेपछि एउटा हातले भगवान्‌को प्रसाद फूल लिए अनि ढोकामा बसेर अर्को हात फैलाए। राजा आफ्नो बाटो लागेका मात्र थिए, झट्ट यमराज त्यहाँ आइपुगे र रिसाउँदै ती राजालाई भन्न लागे ॥३२-३४॥

यमराजले भने – हे राजन् ! सारा संसारलाई नियममा राख्ने यमराज नामले प्रसिद्ध व्यक्ति मै हुँ भनेर बुझ, म तिमीलाई दण्ड दिन यहाँ आएको हुँ। भगवान् श्रीकृष्णको प्रसाद फूल तिमीले एउटा हातले समात्यौ, त्यसै अपराधले गर्दा म तिम्रो हात काट्छु ॥३५-३६॥

नेमुनिले भन्नुभयो – यति भनेर सारा संसारलाई नियममा राख्नका लागि यमराजले तुरुन्त फूल समाते राजाको दाहिने हात काटे। हे विरूपाक्ष ! बाटामा हात काटिएको हुँदा पीरले विरक्त भएका ती राजाले आफ्नो राज्यको कुनै वास्ता गरेनन्। पृथ्वीका सम्पूर्ण तीर्थहरू भ्रमण गरेर उनी काशीमा आइपुगे। काशीका गङ्गा आदि सारा तीर्थमा उनले भक्तिपूर्वक स्नान गरे ॥३७-३९॥

---

९. नाम्ना यमञ्च, इति न.सं.पु.पाठः।
१०. गृहीतं भवता पुष्पं हरेश्चैकेन पाणिना, इति न.सं.पु.पाठः।
११. दक्षगृहीतपुष्पञ्च, इति न.सं.पु.पाठः।
१२. स सुनिर्वृत्तमानसः इति न.सं.पु.पाठः।
१३. बाभ्रम्य, इति न.सं.पु.पाठः।

पाशुपतस्य माहात्म्यं सोऽश्रृणोद्दृषिवक्त्रतः । कौशिकीगण्डकीष्वार्य ! स्नात्वाऽत्र प्राप्तवान्नृपः ॥४०॥
प्रेक्ष्य पाशुपतं क्षेत्रं मुमुदे[१४] खलु निर्जनः । वाग्वत्यादिषु संस्नाय चाऽत्रैव प्राप्तवान् पुनः ॥४१॥
मत्पाणिश्च यथापूर्वं परत्राऽपि भवत्विति । एवं सङ्कल्प्य भूपोऽसौ सस्नौ सर्वत्र चाऽत्र च ॥४२॥
मधोः कृष्णत्रयोदश्यां सङ्क्रान्त्या संयुजि नृपः । सस्नौ चाऽत्र मुदा भक्त्या निमज्ज्योन्मज्य वै मुहुः ॥४३॥
जलादुत्तीर्य भूपोऽसौ चाऽपश्यत्स्वकरं तदा । तत्र प्रादुर्भूताः शाखाः स्वल्पाङ्कुराश्च तत्क्षणात् ॥४४॥
प्रसन्नश्च[१५] भृशं विप्र ! मासैकं व्याप्य भूपतिः । स्नात्वा तस्थौ मुदा चाऽत्र महातीर्थे विरूपदृक् ॥४५॥
मासमात्रेण तत्पाणिः पूर्णरूपभवत्तदा[१६] । पूर्वस्य द्विगुणं शुभ्रं तं प्रेक्ष्य हर्षितो भृशम् ॥४६॥
ततो जगाम राज्यं स्वमतिप्रहर्षितो नृपः । राज्यञ्चकार निष्पापो धर्मेण सुचिरं भृशम् ॥४७॥
भूयो गच्छ विरूपाक्ष ! चाऽतः पूर्वदिशि ध्रुवम् । धर्मेश्वरो हि यत्रास्ते धर्मेण सह सन्ततम् ॥४८॥

पिण्डारकस्यार्य ! श्रृणोति वीरस्तीर्थस्य लिङ्गस्य च यो महत्त्वम्[१७] ।
स्नानाद्यदस्त्याशु फलं स तद्वै प्राप्नोति निष्पापतनुश्च तत्र ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
पिण्डारकतीर्थचण्डिकेश्वरयोर्माहात्म्यं नाम त्रिचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४३॥

पशुपतिनाथको पवित्र तीर्थ देखेर उनी अत्यन्त प्रसनन भए। वाग्वती आदि नदीमा स्नान गरेर फेरि एक्लै उनी यहाँ आइपुगे। मेरो हात पहिलेकै जस्तो पछि पनि बनोस् यस्तो सङ्कल्प गरेर ती राजाले अरू सबै तीर्थका साथै यस तीर्थमा स्नान गरे। सङ्क्रान्तिले युक्त भएको चैत्रकृष्ण त्रयोदशीका दिन प्रसन्न भएर डुब्दै निस्कदै गरी यस तीर्थमा ती राजाले भक्तिपूर्वक स्नान गरे। जलबाट निस्किएपछि ती राजाले आफ्नो हात हेरे। आफ्ना हातमा उनले अङ्कुरजस्ता औंलाहरू धमाधम निस्कँदै गरेको देखे ॥४१–४४॥

हे विरूपाक्ष ! त्यो देखेर राजा अत्यन्त प्रसन्न भए। एक महिनासम्म त्यसै महातीर्थमा स्नान गरेर उनी बसे ॥ एक महिनाभित्र उनको हात पूर्ण भयो, पहिलेको भन्दा दोब्बर राम्रो भयो। त्यो हात देखेर उनी साह्रै खुसी भए। त्यसपछि पापमुक्त भई राजा प्रसन्न भएर आफ्नो राज्यमा गए। त्यहाँ उनले धेरै समयसम्म धर्मपूर्वक राजकाज चलाए ॥४६–४७॥

हे विरूपाक्ष ! अब तिमी यहाँबाट पूर्वतिर जाऊ। त्यहाँ धर्मका साथमा धर्मेश्वर भगवान् सधैं विराजमान हुनुहुन्छ। हे विरूपाक्ष ! जुन मानिसले पिण्डारक तीर्थ र चण्डिकेश्वर महादेवको माहात्म्य सुन्दछ, त्यसले पिण्डारकमा स्नान गरेर चण्डिकेश्वर भगवान्को दर्शन गरेको फल पाउँछ र ऊ सारा पापबाट मुक्तशरीरको शुद्ध बन्दछ ॥४८–४९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा पिण्डारकतीर्थ र चण्डिकेश्वरलिङ्गको माहात्म्यनामक
एकसय त्रिचालिसौं अध्याय पूरा भयो।

---

१४. मुमोद, इति न.सं.पु.पाठः।
१५. प्रहर्षिता, इति न.सं.पु.पाठः।
१६. सम्पूर्णमभवत्तदा, इति न.सं.पु.पाठः।
१७. माहात्म्यम्, इति न.सं.पु.पाठः।

चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः

धर्मेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो मुनिना सह तेन च। धर्मेश्वरो हि यत्रास्ते धर्मतीर्थतटोत्तमे ॥१॥
बलाकातीर्थमाश्रित्य धर्मो यत्र व्यवस्थितः। वकाश्रम इति ख्यातः पापैस्तत्र न लिप्यते ॥२॥
ज्येष्ठिला च नदी श्रेष्ठा धर्मगङ्गा सरिद्वरा। तयोश्च सङ्गमे पुण्ये धर्मतीर्थमुदाहृतम् ॥३॥
अत ऊर्ध्वप्रदेशे च कटके पर्वतस्य तु। तीर्थं ब्रह्मविलं गत्वा ब्रह्मा च वरदोऽभवत् ॥४॥
दर्यां सरलकीर्णायां मृगशृङ्गस्य भूभृतः। बलाकारूपमाश्रित्य धर्मो यत्र विराजते ॥५॥
बलाकारूपमासाद्य ब्राह्मणं यस्तु भोजयेत्। नरकेषु निमग्नान् स पितॄन् सन्तारयेन्नरः ॥६॥
संस्नाति सततं यस्तु पार्श्वे पापप्रणाशने। प्रभावाद्धर्मराजस्य नरकं स न पश्यति ॥७॥
बलाकोदकसम्भेदे विष्णुपद्या जले शुभे। स्नानात् काममवाप्नोति पिता तस्य प्रतुष्यति ॥८॥
मधोः कृष्णचतुर्दश्यां कुशहस्तो विधानतः। तेषु स्नात्वा विरूपाक्षो धर्मेश्वरमपूपुजत् ॥९॥
तदपृच्छच्च माहात्म्यं प्रणम्यर्षिं निशान्तरे। आकर्ण्य तद्वचो रात्रौ विरूपाक्षस्य कुम्भज ॥१०॥
व्याजहार शुभं वाक्यं तस्मै च मुनिसत्तमः।

ऋषिरुवाच

धर्मेण स्थापितं लिङ्गञ्चैतत्पूर्वयुगे द्विज ॥११॥
बलाकारूपमासाद्य चैनं नित्यं प्रसेवते। ज्ञात्वा पाशुपतं क्षेत्रमध्यासीदत्र सन्ततम् ॥१२॥
एतल्लिङ्गं समास्थाय बलाकारूपतो निशम्। एतल्लिङ्गे पुरा मुक्तः कश्चित्पापी किरातकः ॥१३॥

अध्याय - १४४

धर्मेश्वर शिवलिङ्गको माहात्म्य

कुमार स्वामीले भन्नुभयो- त्यसपछि फेरि विरूपाक्ष नेमुनिलाई साथमा लिएर धर्मतीर्थको उत्तम तटमा जानुभयो। त्यहाँ धर्मेश्वर भगवान् बस्नुभएको थियो। जुन ठाउँमा बकुल्लाको रूप लिएर धर्म बस्नुभएको छ, जसको नाम बकाश्रम भनी प्रसिद्ध भएको छ, त्यस ठाउँमा पापीहरू प्रवेश गर्न सक्दैनन्। ज्येष्ठिला नाम गरेकी नदी र धर्मगङ्गा नाम गरेकी उत्कृष्ट नदी त्यहाँ बगेकी छन्। ती दुईको पवित्र सङ्गमलाई धर्मतीर्थ भनिएको छ। त्यसदेखि माथि पहाडको टाकुरामा ब्रह्मविल नाम गरेको तीर्थ छ। त्यस तीर्थमा गएर स्नान गरेको हुँदा ब्रह्मा वर दिनका लागि समर्थ हुनुभयो ॥१-४॥

सल्लाले ढाकिएको मृगस्थली पर्वतको ओढारमा बकुल्लाको रूप लिएर धर्म रहनुभएको छ। बलाकारूप तीर्थमा गएर जुन मानिसले ब्राह्मणलाई भोजन गराउँछ, त्यसले नरकमा डुबेका पितृहरूलाई तार्दछ। जुन मानिस सारा पापलाई नाश गर्ने बलाकातीर्थमा गएर स्नान गर्दछ, धर्मराजका प्रभावले त्यसले नरक देख्नुपर्दैन। बलाकातीर्थको जलबाट निस्किएकी विष्णुपदीको पवित्र तीर्थमा स्नान गर्नाले मनले चिताएको सम्पूर्ण कामना पूर्ण हुन्छ, त्यसका पिता अत्यन्त प्रसन्न हुन्छन्। चैत्रकृष्ण चतुर्दशीका दिन हातमा कुश लिएर विधिपूर्वक ती तीर्थहरूमा स्नान गरी विरूपाक्षले धर्मेश्वर भगवान्को पूजा गरे। हे अगस्त्य मुनि ! नमस्कार गरेर कुनै रातमा विरूपाक्षले नेमुनिलाई त्यस तीर्थको माहात्म्य सोधे। नेमुनिले पनि विरूपाक्षको त्यो वचन सुनेर तिनलाई कल्याणकारी वचन भन्नुभयो ॥५-१०½॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! अघिल्लो युगमा धर्मराजले यस लिङ्गको स्थापना गरेका थिए। उनले बकुल्लाको रूप लिएर सधैँ यस लिङ्गको आराधना गरे। यो पशुपतिको क्षेत्र हो भन्ने ठानेर बकुल्लारूपधारी ती यमराज सधैँ यहाँ बस्थे। यसै लिङ्गको आराधनाबाट अघि कुनै पापी किरात मुक्त भएको थियो ॥११-१३॥

तद्वृत्तान्तं प्रवक्ष्यामि शृणु भक्त ! विरूपदृक् । आसीत्कश्चित् किरातश्च बकास्यो नाम विश्रुतः ॥१४॥
अत्र महानगर्यां स चाऽवात्सील्लब्धवृत्तिकः । नित्यं स प्राणिनो हत्वा भुनक्ति स्म स्वयं सुखम् ॥१५॥
पापाचारः सदा म्लेच्छो निष्ठुरः प्राणिनां भृशम् । हत्वा च निर्दयो जीवान् बुभुजे च स्वयं सुखम् ॥१६॥
कुक्षिम्भरो रुषाऽविष्टो बालवृद्धसमेक्षणः । ज्येष्ठकृष्णचतुर्दश्यां धर्मतीर्थजलं पपौ ॥१७॥
हत्वा शङ्कुं बकास्योऽसौ घर्मपीडातृषार्दितः । तज्जलस्पर्शपुण्यात्स स्तोकज्ञानैः परिप्लुतः ॥१८॥
पूजयन्तं शिवं स्नात्वा वशिष्ठञ्च ददर्श सः । भुक्तवानपि तत्तीर्थं सस्नौ तत्र पुनर्द्विज ॥१९॥
पत्रपुटजलैर्भक्त्या चैतल्लिङ्गमपूपुजत् । लिङ्गार्चितं वशिष्ठेन वकास्यश्चाऽत्र तन्निशि ॥२०॥
बिल्वपत्राणि चादाय भक्त्या तल्लिङ्गमार्चयत्[1] । वकास्यस्तदमावास्यां पञ्चत्वं प्राप्तवान्तदा ॥२१॥
उषसि मृगयाखेदात्कालप्राप्तो विनिद्रकः । अध्यक्षे तं वसिष्ठस्य निन्युः शिवपुरं गणाः ॥२२॥
धर्मेश्वरप्रभावात्स शङ्करानुचरोऽभवत् । संस्नाति धर्मतीर्थं यः सर्वपापैर्विमुच्यते ॥२३॥
भक्त्यार्च्चयति धर्मेशं धर्मलोकं स गच्छति । तां जलशायिनीं मूर्तिं विष्णोः पश्य कृते युगे[2] ॥२४॥
संहृत्य सकलाँल्लोकानेकः शेते पुरा विभुः । तत्र स्नात्वार्चितो येन चाऽनन्तोऽयं हि भक्तितः ॥२५॥
इहलोकं परित्यज्य विष्णुलोकं स गच्छति ।

हे भक्त विरूपाक्ष ! म त्यो वृत्तान्त बताउँछु, सुन– अघि बकास्य नाम गरेको कुनै किरात थियो । यस ठूलो नगरीमा व्याधाको वृत्ति लिएर त्यो किरात बस्दथ्यो । ऊ सधैँ आफैँ प्राणीहरूलाई मारेर सुखपूर्वक भोजन गर्दथ्यो । अपराधी आचरण भएको निठुरी त्यस म्लेच्छले निर्दय भई प्राणीहरूको आफैँ हत्या गरेर सुखपूर्वक भोजन गर्दथ्यो । ऊ आफ्नो पेट भर्नुबाहेक अरू कुनै काम गर्दैनथ्यो, अत्यन्त रिसाहा थियो । बालक र बूढाबूढीलाई एकै दृष्टिले हेर्थ्यो । ॥१३–१६॥

हाँस अथवा माछा मारेर थाकेको तथा घामका कारण तिर्खाले आत्तिएको त्यस बकास्यले कुनै ज्येष्ठकृष्ण चतुर्दशीका दिन यसै धर्मतीर्थको पानी पियो । त्यसै धर्मतीर्थका जलको स्पर्शजन्य पुण्यका प्रभावले त्यसमा केही ज्ञान पलायो । उसले शिवजीको पूजा गर्न लागेका वसिष्ठलाई देख्यो । हे विरूपाक्ष ! धर्मतीर्थको जल पान गरेपछि त्यसले फेरि त्यस तीर्थमा स्नान गर्‍यो । त्यसै दिन राति पातको भाँडामा पानी ल्याएर वसिष्ठले पूजा गरेको यस लिङ्गलाई यसले पनि पूजा गर्‍यो । बेलका पात ल्याएर भक्तिपूर्वक बकास्यले त्यस लिङ्गको पूजा गर्‍यो । त्यसै अमावास्याका दिन त्यसै ठाउँमा त्यो बकास्य मर्‍यो ॥१७–२१॥

औँसीको दिन बिहान शिकार खेलेर थाकेको त्यो बकास्य महानिद्रामा डुब्यो । वसिष्ठको अगाडि नै शिवजीका गणहरूले त्यसलाई शिवलोकमा लगे । धर्मेश्वरको प्रभावले गर्दा ऊ शिवजीको सेवक बन्यो । जसले धर्मतीर्थमा स्नान गर्छ त्यो व्यक्ति सम्पूर्ण पापबाट मुक्त हुन्छ । जसले भक्तिपूर्वक धर्मेश्वर, जलशायी भगवान् विष्णुको पूजा गर्दछ त्यो मानिस धर्मलोकमा प्राप्त हुन्छ । सत्ययुगमा सम्पूर्ण प्राणीहरूलाई संहार गरेर एक्लै जलमा शयन गर्नुहुने भगवान् विष्णुको यो त्यही जलशायी मूर्ति हो । जसले धर्मतीर्थमा स्नान गरेर भक्तिपूर्वक जलशायी विष्णुको पूजा गर्छ मरेपछि त्यो मानिस विष्णुलोकमा जान्छ । त्यहाँ जसले स्नान गरेर भक्तिपूर्वक भगवान् अनन्तको पूजा गर्दछ त्यो व्यक्ति अनन्तकै रूपमा परिणत हुन्छ ॥२४–२५½॥

१ अपृच्छत्तञ्च माहात्म्यं तत्, इति न.सं.पु.पाठः ।
२. विष्णोमूर्तिञ्च पश्यार्य जलशायीं कृते युगे, इति न.सं.पु.पाठः ।

अतो गच्छ विरूपाक्ष योजनार्द्धं विदूरकम् ॥२६॥
गोकर्णेशो हि यत्रास्ते चन्द्रभागातटे शुभे।
अध्यायमेतद्धि शृणोति धीमान् धर्मस्य तीर्थस्य वरं महत्त्वम्[३]।
लिङ्गस्य स्वप्नोद्भवजैश्च पापैः त्यक्तो ह्यसौ गच्छति धर्मलोकम् ॥२७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां धर्मेश्वरमाहात्म्यं नाम चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः ॥१४४॥

यसकारण हे विरूपाक्ष ! तिमी यहाँबाट आधा योजन टाढा रहेको चन्द्रभागा नदीको कल्याणदायी तीरमा जाऊ। त्यहाँ गोकर्णेश्वर भगवान् बस्नुभएको छ ॥२६½॥

जुन मानिसले धर्म, तीर्थ र धर्मेश्वरको पवित्र माहात्म्य भएको यो अध्याय सुन्छ, त्यो व्यक्ति जाग्रत् तथा स्वप्न अवस्थामा भए/गरेका पापबाट मुक्त भएर धर्मलोकमा जान्छ ॥२७॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा धर्मेश्वरतीर्थको माहात्म्यनामक एकसय चौवालिसौं अध्याय पूरा भयो।

---

३. माहात्म्यम्, इति न.सं.पु.पाठः ।

पञ्चचत्वारिंशदुत्तरशततमोऽध्यायः

पितामहतीर्थगोकर्णेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो मुनिना सह कुम्भज। गोकर्णेशो हि यत्रास्ते चन्द्रभागातटोत्तमे ॥१॥
चन्द्रेणैव तपस्तप्तं मुञ्जवच्छेखरे पुरा। सहस्राब्दं शिवं ध्यात्वा तस्माल्लब्धवरो द्विजः[1] ॥२॥
तदासनात्समुद्‌भूता नदी चन्द्रसमोज्ज्वला। अश्वमेधफलं प्राप्य तस्यां स्नातो दिवं व्रजेत् ॥३॥
चन्द्रभागा नदी पुण्या वाग्वती च महानदी। तयोस्तु सङ्गमे तीर्थं पैतामहञ्च विश्रुतम् ॥४॥
दशगयासमं ज्ञेयं तद्‌भूमिस्पर्शमात्रतः। पिण्डदानाच्छतगुणं तत्र चेद्विधिवद्यथा ॥५॥
चैत्रकृष्णस्य सिद्धोऽसौ चाऽमावास्यां घटोद्‌भव। पितामहादितीर्थेषु सस्नौ भक्त्या यथाविधि ॥६॥
आनर्च विधिवल्लिङ्गं पैतामहं विरूपदृक्। पप्रच्छ निशि माहात्म्यं तल्लिङ्गतीर्थयोर्मुनिम् ॥७॥
आकर्ण्य तद्वचो रात्रौ सिद्धर्षिः कुम्भज ! ध्रुवम्। व्याजहार ततस्तस्मै तन्माहात्म्यं महत्तरम् ॥८॥

सिद्धर्षिरुवाच

ब्रह्मणा स्थापितं पूर्वमेतल्लिङ्गञ्च हारिणम्। गोकर्णाख्यं महालिङ्गं भक्तानाञ्च वरप्रदम् ॥९॥
प्रसेवितं पुलस्त्येन विश्रवसा तथानिशम्। ब्रह्मणा चैव जानीहि सिद्धैश्चैव सहस्रकैः ॥१०॥
तस्माल्लब्धवरो रक्षो रावणो लोकरावणः। येनैव क्षोभितो लोको सर्वं जानीहि सिद्धिभाक् ॥११॥
तीर्थानाञ्चाऽत्र माहात्म्यं वक्ष्यामि शृणु तेऽधुना। गोकर्णे राजितानाञ्च लिङ्गानाञ्च विशेषतः ॥१२॥

अध्याय - १४५

पितामहतीर्थ र गोकर्णेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो- हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष नेमुनिलाई साथमा लिएर जहाँ गोकर्णेश्वर भगवान् रहनुभएको थियो, त्यसै चन्द्रभागा नदीको उत्तम तटमा गए। अघि मुञ्जवान् पर्वतको डाँडामा बसेर हजार वर्षसम्म चन्द्रमाले शिवजीको ध्यान गरी तपस्या गरेका थिए, त्यसै तपस्याको प्रभावले गर्दा वर प्राप्त गरी चन्द्रमा द्विजराज भए। चन्द्रमा बसेको ठाउँबाट चन्द्रमाजस्तै उज्यालो चन्द्रभागा नदी पैदा भएकी छन्। त्यहाँ स्नान गऱ्यो भने अश्वमेध यज्ञको फल प्राप्त गरी मानिस स्वर्ग जान पाउँछ। चन्द्रभागा नाम गरेकी नदी पवित्र छन्। त्यस्तै वाग्वती नाम गरेकी अर्की ठूली नदी छन्। ती दुईको सङ्गमलाई पैतामह तीर्थ भनिन्छ। त्यहाँको भूमिमात्र स्पर्श गऱ्यो भने पनि दशपटक गया गएको फल प्राप्त हुन्छ। त्यहाँ विधिपूर्वक पिण्ड दिइयो भने त्यसभन्दा सय गुणा बढी फल पाइन्छ॥१-५॥

हे अगस्त्य मुनि ! सिद्ध विरूपाक्षले चैत्रकृष्ण अमावास्याका दिन पैतामह आदि तीर्थमा गएर सभक्ति विधिपूर्वक स्नान गरे। विरूपाक्षले विधिपूर्वक पैतामह लिङ्गको पूजा गरे। राति उनले नेमुनिसित त्यस लिङ्ग र तीर्थको माहात्म्य सोधे। हे अगस्त्य मुनि ! विरूपाक्षको त्यो प्रश्न सुनेर सिद्धऋषि भएको नेमुनिले त्यस तीर्थ र लिङ्गको उत्तम माहात्म्य उनलाई बताए ॥६-८॥

सिद्धऋषि नेमुनिले भने – यो गोकर्ण नाम गरेको भक्तको कामना पूर्ण गर्ने सुन्दर महालिङ्ग अघि ब्रह्माजीले स्थापना गर्नुभएको हो। पुलस्त्यले यस लिङ्गको निरन्तर आराधना गरे। त्यस्तै विश्रवाले आराधना गरे। ब्रह्माजीले पनि यसको उपासना गर्नुभयो। यहाँ आएर हजारौं सिद्धहरूले पनि यसको अराधना गरे भन्ने कुरा तिमी बुझ। हे सिद्ध विरूपाक्ष ! त्यसै लिङ्गको आराधनाबाट वर प्राप्त गरेर संसारलाई रुवाउने रावण नाम गरेको राक्षसले सम्पूर्ण संसारलाई क्षुब्ध तुल्याएको थियो भन्ने कुरा बुझ। यस गोकर्णक्षेत्रमा विद्यमान सबै तीर्थ र विशेष गरी यस लिङ्गको माहात्म्य अब तिमीलाई म बताउँछु, सुन ॥९-१२॥

---

१. सहस्राब्दं शिवे तस्माल्लब्धवरो द्विजेश्वरः, इति न.सं.पु.पाठः।

आसीत्कश्चित्पुरा वैश्यो वेश्यापुत्रो विरक्तधीः। लोकविडम्बकोऽजस्रं जारजो निःसृतः पुरात् ॥१३॥
कुण्डलीनगरेऽवात्सीद्दन्तुरो नाम विश्रुतः। अज्ञातपितृको वैश्यो मातुरभावतोऽपि च ॥१४॥
सखिभिः पृच्छ्यमानोऽसौ बाल्यान्ते[२] स्वसमैरिति। कस्य पुत्रः सखेऽसि त्वं वद नाम पितुस्तव ॥१५॥
एवं तैः पृच्छ्यमानोऽसौ दातुं प्रत्युत्तरं द्विज। असमर्थो ह्यभूत्तस्मात् पुरादेष[३] विनिर्गतः ॥१६॥
गङ्गातीरं समासाद्य ददर्श पुलहञ्च सः। मुनिना चेति संदृष्टः क्व भवान् क्वागतो वद ॥१७॥

दन्तुर उवाच

न जाने मातरं तातं तयोर्नाम्नोरभावतः। मयि बाले मृता माता पिता चैव मुनीश्वर ॥१८॥
सखिभिः सर्वलोकैश्च नित्यमहं विडम्बितः। कस्य पुत्रोऽसि हे बालस्ते पितुर्नाम भो वद ॥१९॥
एवं तैः पृच्छ्यमानोऽहं दुःखातुर इहागतः। नोत्सहे जीवितुं तात क्षणमपि शपे त्वयि ॥२०॥
कस्य पुत्रो ह्यहं तात सर्वज्ञोऽसि न संशयः। भवान् वदतु मे नो चेत्त्यक्ष्याम्यहमसून्ध्रुवम् ॥२१॥

पुलह उवाच

हिमाद्रिगह्वरे पुण्ये नेपालनाम्नि शाङ्करे। चन्द्रभागातटे गच्छ गोकर्णेशो हि यत्र च ॥२२॥
तदुत्तरगयातीर्थे शतगयाफलप्रदे। पितामहमहाक्षेत्रं सर्वक्षेत्रोत्तमोत्तम् ॥२३॥
ब्रह्मविष्णुहरैरेतद् वाग्वत्या चन्द्रभागया। पवित्रितं महाक्षेत्रं पितृणाञ्चैव तारकम् ॥२४॥
तत्र पिण्डप्रदानाच्च त्रिसप्त प्रोद्धरेत्कुलम्। तत्र पिण्डप्रदानात्ते पिण्डं पिता ग्रसिष्यति ॥२५॥

अघि सधैं दुनियाबाट घृणित भएर विरक्त भएको कुनै जारबाट उत्पन्न वेश्यापुत्र वैश्य थियो। ऊ विरक्त भएर शहरबाट निस्कियो। त्यो वैश्य कुण्डली नगरमा बस्दथ्यो। दाँत उछिट्टिएको हुँदा त्यसलाई दन्तुर भन्थे। उसका बाबुको ठेगान थिएन र त्यसकी आमा पनि थिइन। बाल्यावस्था पूरा भइसकेपछि आफूसमानका साथीहरूले उसलाई तैं कसको छोरो होस् ? तेरो बाबुको नाम के हो ? भन भनेर सोधे। यसरी उनीहरूले सोधेको प्रश्नको उत्तर त्यसले दिन सकेन। त्यसै कारणले गर्दा त्यो शहरबाट निस्किएको थियो। गङ्गाको तीरमा पुगेपछि उसले पुलह ऋषिलाई देख्यो। ऋषिले पनि उसलाई देखे र भने- तिमी को हौ ? कहाँबाट आयौ ? भन ॥१३-१७॥

दन्तुरले भन्यो- हे मुनीश्वर ! आमा र बाबुका बारेमा मलाई थाहा छैन। त्यसो हुनाले उहाँहरूको नाम पनि म जान्दिनँ। म बालक छँदै आमा र बुबा दुबै मर्नुभयो। साथी र अरू मानिसले पनि मलाई हेला गरे। हे बालक ! तैं कसको छोरो होस् ? तेरो बाबुको नाम के हो ? भनेर उनीहरूले मलाई सोधे। यसरी उनीहरूले सोधेपछि अत्यन्त दुःखित भएर म यहाँ आएको छु। हे मुनि ! एकछिन पनि मलाई बाँच्ने इच्छा छैन, हजुरसित किरिया खाएर भन्छु। हे मुनि ! हजुर सर्वज्ञ हुनुहुन्छ, यसमा शङ्का छैन। म कसको छोरो हुँ ? मलाई बताउनुहोस्, होइन भने म यसै ठाउँमा अवश्य प्राण छोड्नेछु ॥१८-२१॥

पुलहले भने- तिमी यहाँबाट हिमालयको काखमा अवस्थित शिवजीको प्रिय नेपाल नाम गरेको देशमा चन्द्रभागा नदीको तट छ, त्यसै तटमा गोकर्णेश्वर महादेव रहनुभएको छ, त्यहाँ जाऊ। सय गयाको फल दिने उत्तरगयामा सबै क्षेत्रमा उत्तम मानिने पितामह महाक्षेत्र छ, ब्रह्मा, विष्णु र शिवजी र वाग्वती एवं चन्द्रभागा नदीले पवित्र तुल्याएका छन्। यस महाक्षेत्रलाई पितृतारक तीर्थ नै मानिएको छ। त्यहाँ पिण्ड दियो भने एक्काइस कुलको उद्धार हुन्छ। त्यहाँ तिमीले पिण्ड दियौ भने तिम्रा पितृहरूले त्यो पिण्ड खान पाउँछन् ॥२२-२५॥

---

२. प्रोढान्ते, इति न.सं.पु.पाठः। ३. भावादद्य, इति न.सं.पु.पाठः।

नेमुनिरुवाच

इत्यादेशं समाकर्ण्य पुलहस्य च दन्तुरः[४]। अत्रैव प्राप्तवान्विप्र ! चैकाकी निर्जने वने ॥२६॥
भाद्रासितचतुर्दश्यां स्नात्वा विश्रवसा सह। गोकर्णेशं प्रणम्याशु तस्थौ तीर्थे ह्युपोषितः ॥२७॥
अमावास्यां ततो वैश्यः सङ्कल्पं कृतवाँस्तटे। मुनिमुखाद्धि दर्भाग्रैः सस्नौ च विधिवन्मुहुः ॥२८॥
तदुत्तरगयातीर्थे गदाधराभिधानके। भक्त्या ततो हि स स्नात्वा पिण्डं दातुं प्रचक्रमे ॥२९॥
यथा गोत्राय ते तात ! यथानाम्ने च ते स्वधा[५]। एष पिण्डो मया दत्त इत्युच्चार्य ददौ हि सः[६] ॥३०॥
आगत्य पितरश्चात्र प्रसेरुर्युगपत्करान्। ग्रहीतुञ्चैव तत्पिण्डं भित्त्वाशु बालुवेदिकाम् ॥३१॥
देहि देह्यत्र मे पुत्र ! पिण्डं त्वत्करसंश्रितम्। तर्पय मे मुखे तोयं येन तृप्यामि सन्ततम् ॥३२॥
तिलोदकैरब्दमेकं तृप्तोऽस्मिँश्च पुरे वसे। केवलेनाम्भसा पुत्र तृप्तिः षण्मासमादरात् ॥३३॥
पिण्डदानेन चाऽत्राऽहं शतवर्षं महासुखम्। दत्त्वा ते चाशिषः पुत्र ! भूत्वा तृप्तो वसे सुखम् ॥३४॥
उक्तवन्तस्तदा तत्र वादञ्चक्रुर्मुहुर्हि ते। मत्पुत्र मम पुत्रेति भृशं विप्र ! पुरा पुनः ॥३५॥
ततो वैश्यश्च चित्रात्मा तस्थौ हि स्थगितस्तदा। कस्मै पिण्डः प्रदातव्य एवं चिन्ताकुलो भृशम् ॥३६॥
आश्वासयन्मुनिर्वैश्यं विश्रवाश्चाऽत्र साम्प्रतम्। कस्मैचित्त्यज मा पिण्डं संस्मरामि पितामहम् ॥३७॥
मुनिना संस्मृतः[७] शीघ्रं ब्रह्मा ह्यागत्य चाऽत्र वै। व्याचष्टे वचनं तस्मै व्योमस्थः श्रावयन् विशम् ॥३८॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! पुलहको यस्तो कुरा सुनेर अधम त्यो वैश्य एक्लै मान्छे नभएको यस वनमा आयो। भाद्रकृष्ण चतुर्दशीका दिन त्यस वैश्यले विश्रवा ऋषिका साथै गोकर्णेश्वरलाई नमस्कार गऱ्यो र त्यस तीर्थमा उपवास बस्यो। मुनिको भनाइ अनुसार अमावास्याका दिन तीरमा बसेर त्यस वैश्यले सङ्कल्प गऱ्यो र कुशका टुप्पाले (पानी छर्कंदै) विधिपूर्वक बारम्बार स्नान गऱ्यो। गदाधर नाम गरेको त्यस महान् उत्तरगया तीर्थमा उसले स्नान गरेर पिण्ड दिन प्रारम्भ गऱ्यो ॥२६–२९॥

नाम र गोत्रको उच्चारण गर्दै हे पिता ! यो पिण्ड हजुरलाई दिन्छु भनेर स्वधावाचन गरी उसले बाबुलाई पिण्ड दियो। त्यस अवसरमा त्यहाँ एकैचोटि पितृहरू आए र बालुवाको वेदीलाई भत्काई त्यो पिण्ड ग्रहण गर्नका लागि हात फैलाए। हे छोरा ! तिम्रो हातमा रहेको पिण्ड मलाई देऊ। मेरो मुखमा जल राख, म सधैं यसबाट तृप्त हुन्छु। हे पुत्र ! तिल–जलको तर्पणले एक वर्ष तृप्त भएर यस शहरमा बस्दछु, खाली जलको तर्पणले छ महिनासम्म तृप्ति प्राप्त गरी आनन्दपूर्वक बस्नेछु। पिण्डदानले म सय वर्षसम्म महासुखी हुन्छु। हे छोरा ! म तिमीलाई आशीर्वाद दिन्छु र तृप्त भएर सुखपूर्वक बस्दछु ॥३०–३४॥

त्यहाँ जम्मा भएका पितृहरू 'अघि यो मेरो छोरो थियो, यो मेरो छोरो थियो' भनेर परस्परमा विवाद गर्न थाले। त्यसपछि त्यो वैश्य छक्क पऱ्यो र रोकियो। अब कसलाई पिण्ड दिने भनेर ऊ अत्यन्त चिन्तित भयो। ऋषि विश्रवाले त्यस वैश्यलाई 'आत्तिने काम नगर, कसैलाई पनि पिण्ड नदेऊ, म पितामहलाई सम्झन्छु' भनी उसलाई आश्वस्त तुल्याए। मुनिले पितामहलाई सम्झिसकेपछि आकाशबाटै वैश्यलाई सुनाउँदै ब्रह्माजीले आएर मुनिलाई भन्न लाग्नुभयो ॥३५–३८॥

---

४. विशाधमः, इति न.सं.पु.पाठः।
५. यथा नाम यथागोत्र एष पिण्डः पितर्हि ते, इति न.सं.पु.पाठः।
६. स्वधेति प्रसभं कृत्वा पित्रे पिण्डं ददौ हि सः, इति न.सं.पु.पाठः।
७. संस्मारिते मुनौ, इति न.सं.पु.पाठः।

ब्रह्मोवाच

मा मा ददासि पिण्डं त्वं वारुणीस्थाय विड्वर। विप्राय चैव खिङ्गाय प्राचीस्थाय विशेषतः ॥३९॥
विशानेन पुरा वैश्य ! त्वन्माता च विवाहिता। गर्भे धत्ते न तद्वीर्यं त्वन्माताऽसौ ततो मृतः ॥४०॥
मृते वैश्ये ततो विप्रः विटरूपेण[८] नीतवान्। त्वन्माता च न धत्ते सा तस्य तेजस्तथापि च ॥४१॥
तस्मादपि च त्वन्माता नीतानेन विशा रहः। खिङ्गगरूपेण नित्यं सा विप्रं विलङ्घ्य तद्भयात् ॥४२॥
तद्वीर्येण हि वैश्य त्वमुत्पन्नोऽसि न संशयः। विप्रेण प्रोषितायां त्वं तस्मादपि च तत्सुतः ॥४३॥
पित्रे पिण्डञ्च निःशङ्कं मध्यस्थायाशु दीयताम्। यस्य वीर्यात्समुद्भूतस्तस्मै वैश्याय वैश्य वै ॥४४॥
विशेषेणैव मत्तीर्थे पिण्डदानात्कदापि च। नागमिष्यति तत्राऽन्यः पितैव हि न संशयः ॥४५॥

ऋषिरुवाच

इत्याज्ञाञ्च समाकर्ण्य वैश्यः पितामहस्य च। ददौ पिण्डं स्वपित्रे वै हित्वा चैवाऽपरं द्विज ॥४६॥
पैतामहे महातीर्थे ददौ पिण्डं पुनर्हि सः। सङ्कल्प्य विधिवद् भक्त्या तिलोदककुशैः समम् ॥४७॥
अग्रहीत्तत्पिता वैश्यः सप्तभिः पितृभिः समम्। तिलोदकानि तत्पिण्डं जहर्षुः[९] पितरश्च ते ॥४८॥
ततश्च पितरस्तस्मै चाशिषः प्रददुर्भृशम्। तृप्तास्तिलोदकैः पिण्डैर्गगनस्था मुदान्विताः ॥४९॥
समूचुः पितरस्तस्मै वचांसि त्वरितं मुदा। विश्वेदेवैश्च सम्भूय तीर्थादुत्तीर्य वै समम् ॥५०॥

ब्रह्माजीले भन्नुभयो- हे वैश्य ! पश्चिमपट्टि रहेकालाई पिण्ड नदेऊ, विशेष गरेर पूर्वपट्टि रहेको खिङ्ग अर्थात् गुण्डो ब्राह्मणलाई पनि पिण्ड नदेऊ। हे वैश्य ! तिम्री आमालाई यस वैश्यले विवाह गरेको हो। आमाले वैश्यको वीर्य गर्भमा धारण नगर्दै त्यो वैश्य मरेको थियो। वैश्य मरेपछि यो गुण्डो ब्राह्मणले तिम्री आमालाई लगेको थियो तैपनि तिम्री आमाले यस ब्राह्मणको वीर्य धारण गरिनन्। त्यसपछि कुनै वैश्यले गुण्डो ब्राह्मणका डरले उसलाई छलेर तिम्री आमालाई एकान्तमा लग्यो। हे वैश्य ! तर तिमी उनै वैश्यका वीर्यबाट उत्पन्न भएका हौ, यसमा शङ्का छैन। ब्राह्मणले निकालिएकी तिम्री आमाबाट तिमी पैदा भयौ। त्यसकारणले पनि तिमी खास त्यही वैश्यका छोरा ठहर्छौ। हे वैश्य ! जसको वीर्यबाट तिमी पैदा भयौ, तिनै माझमा बस्ने पितृस्वरूप वैश्यलाई शङ्का नमानीकन पिण्डदान देऊ। विशेष गरेर मेरो तीर्थमा पिण्ड दिंदा बाबुबाहेक अरू आउन पाउँदैनन्। खास बाबु नै आउँछन्, यसमा शङ्का छैन ॥३९-४५॥

ऋषिले भन्नुभयो- हे विरूपाक्ष ! ऋषि र पितामहको यस्तो वचन सुनेर त्यस वैश्यलाई अरुलाई छोडी आफ्नो बाबुलाई पिण्ड दियो। फेरि उसले पैतामह नाम गरेको महातीर्थमा तिल, जल र कुश लिएर सङ्कल्प गरी सभक्ति विधिपूर्वक पिण्डदान दियो। उसका बाबु वैश्यले आफ्ना सात पुस्तका पितृहरूलाई साथमा लिएर तिल, जल मिसिएको पिण्ड ग्रहण गरे। पितृहरू खुसी भए। त्यसपछि आकाशमा रहेका पितृहरूले तर्पण तथा पिण्डबाट तृप्त भएर प्रसन्न हुँदै वैश्यलाई आशीर्वाद दिए। पितृहरूले तीर्थबाट सहस्र उत्रिई विश्वेदेवाहरूका साथमा बसेर तुरुन्त त्यसलाई भने ॥४६-५०॥

---

८. खिङ्गरूपेण, इति न.सं.पु.पाठः।
९. मुमुदुः, इति न.सं.पु.पाठः।

पितर ऊचुः

पुत्र ! पौत्र ! प्रपौत्रार्य ! दत्तैः पिण्डोदकैस्त्वया । सुतृप्ताश्च भवामोऽद्य चाऽस्मिन्तीर्थे न संशयः ॥५१॥
अद्यप्रभृतिरार्य त्वं सार्वभौमपतिर्भव । कालान्ते च ततः पुत्र ! मनुर्भव चिरं पुनः ॥५२॥
भूयः शृणु वरं पुत्र ! मन्वन्तरे ततः पुनः । भूत्वा मुनिवरो मुक्तो लिङ्गे चास्मिन्भविष्यसि ॥५३॥
अदर्शना वयं भूयो नायाष्यामो दशाऽपराः[10] । त्वया सहैव मुक्ताश्च भविष्यामः शिवेऽत्र वै ॥५४॥
स्पर्शनादपि चैतस्यामधःस्थाः पितरोऽपि च । अस्मल्लोकं व्रजिष्यन्ति पिण्डतिलोदकैः किमु ॥५५॥
दशगयासमं ज्ञेयं क्षेत्रं पैतामहं त्विहम् । कलौ पैतामहं ज्ञेयं मोक्षदं हि गयात्रये ॥५६॥

ऋषिरुवाच

इत्यादिश्य पिता तस्य पितामहैः समं ययौ । पितृलोकं विमानेन दत्त्वा सफलमाशिषः ॥५७॥
वैश्योऽपि स्वं ययौ देशमधःस्थानपि तत्पितॄन् । रसातलात्समुद्धृत्य पिण्डतिलोर्णरज्जुभिः ॥५८॥
एतल्लिङ्गं समभ्यर्च्य भक्त्योपहारकार्चनैः । विश्रवसं प्रणम्यादौ चादायाज्ञां हि तद्ययौ ॥५९॥
सार्वभौमस्ततः सोऽभून्मध्यदेशे हि विड्वरः । सहस्राब्दं सुखं राज्यं भुक्तवान्नीतिभिः खलु ॥६०॥
राज्यं पुत्राय संन्यस्य साङ्ख्ययोगैर्विरक्तवान् । राज्याद्विनिःसृतो वैश्यो हा गोकर्णेश्वरेति च ॥६१॥
अत्र प्राप्तो[11] मृतो वैश्यो क्षेत्रे पाशुपते पुनः । तत्पुण्यादभवच्चाऽसौ स्वारोचिषो मनूत्तमः ॥६२॥
अतो मन्वन्तरे सोऽपि पुनरत्रैव चापतत्[12] । पुण्यप्रभावतः स्वर्गात्पितृणामाशिषा द्विजः ॥६३॥

पितृहरूले भने – छोरा, नाति, पनातिका सम्बन्धले युक्त भएका हे वैश्य ! तिमीले पिण्डदान दियौ, यस तीर्थमा हामी तृप्त भयौँ, यसमा शङ्का छैन । हे बाबु ! आजदेखि तिमी पृथ्वीको चक्रवर्ती राजा होऊ । पछि गएर धेरै कालसम्म मनु हुनेछौ । हे छोरा ! फेरि अर्को वर पनि सुन – त्यसपछि मन्वन्तरमा श्रेष्ठ मुनि भएर तिमी यसै लिङ्गको आराधनाबाट मुक्त हुनेछौ । दश पुस्ता अगाडि र दश पुस्ता पछाडिका नदेखिने हामीहरू बीचमा देखिनेछैनौं र तिमीसमेत एक्काइस पुस्तासम्मका सबै मानिसहरू यस शिवलिङ्गको आश्रयबाट मुक्त हुनेछौ । यस तीर्थको स्पर्शबाट मात्र पनि पातालमा रहेका पितृहरू यहाँ आउँछन् भने तर्पण पिण्ड दिएका खण्डमा त के भनिरहनुपर्छ र ? यो पैतामहक्षेत्र दशगयाको क्षेत्र बराबर छ भनेर जान । तीन गयामध्ये यो पैतामह क्षेत्र कलियुगमा विशेष मोक्षदायक मानिएको छ ॥५१–५६॥

ऋषिले भन्नुभयो – यस्तो आशीर्वाद दिएर पितामहका साथ उनका बाबु विमानबाट पितृलोक गए । ती वैश्य पनि पिण्ड, तिल र जलरूपी डोरीले रसातलबाट ती पितृहरूलाई उद्धार गरेर आफ्नो देशतिर गए । वैश्यले भक्तिपूर्वक उपहार तथा पूजासामग्रीद्वारा यस लिङ्गको पूजा गरी विश्रवामुनिलाई नमस्कार गरेर उहाँको अनुमति लिई प्रस्थान गरे । त्यहाँबाट गएपछि ती वैश्य मध्यदेशको चक्रवर्ती राजा भए । हजार वर्षसम्म आनन्दसित नीतिपूर्वक राज्यको भोग गरे । त्यसपछि तिनले राज्य छोरालाई जिम्मा लगाए । साङ्ख्यसिद्धान्तमा प्रतिपादित योगको अनुसरण गरेर ती वैश्य विरक्त भए । हे गोकर्णेश्वर ! भन्दै राज्यबाट उनी प्रस्थान गरे ॥५७–६०॥

त्यसपछि उनी यसै पाशुपतक्षेत्रमा गए र पछि त्यहीँ मरे । आफूले गरेका पुण्यका प्रभावले स्वारोचिष नाम गरेका मनु भए । त्यसपछि तिनै वैश्य अर्को मनुका पालामा आफ्नो पुण्यको प्रभाव र पितृहरूको आशीर्वादले गर्दा स्वर्गबाट फेरि पृथ्वीतल अर्थात् गोकर्णेश्वरमा आइपुगे ॥६०–६३॥

---

१०. **भूयश्चानागताः दशापराः, इति न.सं.पु.पाठः ।**
११. **अप्राप्तोऽत्र, इति न.सं.पु.पाठः ।**
१२. **चात्रैव चापत्पुनः, इति न.सं.पु.पाठः ।**

स्नात्वा शुक्लचतुर्दश्यामत्र[13] भाद्रपदस्य च। एतल्लिङ्गं समभ्यर्च्य भक्त्या जागृतवान्निशि ॥६४॥
तत्र सस्नौ पुनर्भक्त्या पित्रे पिण्डं ददौ पुनः। तिलोदकैश्च सङ्कल्प्य गोकर्णेशं धिया स्मरन् ॥६५॥
प्रमथास्तमिहागत्य चादध्युः पुष्पके मुदा[14]। शैवं लोकं शिवादेशात् निनीषवो महोत्सवैः[15] ॥६६॥
निन्युः शिवपुरं वैश्यं प्रमथास्तं महोत्सवैः। अद्यापि सोऽभवद्वैश्यो रुद्रस्यानुचरोऽनिशम् ॥६७॥
तस्मिन्नवसरे कश्चिच्चौर आगत्य चात्र च। एतस्माद्धि भृगोः शीघ्रं नत्वेशमुत्पपात च ॥६८॥
बालं मृतं समालोक्य चान्यो म्लेच्छश्च विद्रुतः। अभिद्रुत्य भयात्तस्य चोत्पपात भृगोरतः ॥६९॥
प्रमथास्तमिहागत्य चादध्युः पुष्पके मुदा[16]। शैवं लोकं शिवादेशात् निनीषवो महोत्सवैः[17] ॥६६॥
निन्युः शिवपुरं वैश्यं प्रमथास्तं महोत्सवैः। अद्यापि सोऽभवद्वैश्यो रुद्रस्यानुचरोऽनिशम् ॥६७॥
शिवदूता मृते तस्मिन्याने चास्थाय तं द्रुतम्। निन्युः शिवपुरं भव्यं चाप्सरोभिः प्रसेवितम्[18] ॥७०॥
भूयो गच्छ विरूपाक्ष ! हनुतीर्थञ्च यत्र वै। कोशत्रयविदूरेऽतो दक्षिणस्यां हि सिद्धिभाक्[19] ॥७१॥
कावेर्युदकसम्भेदे मणिमत्या जलोत्तमे। स्नाहि चाकाशगङ्गायां दशाश्वमेधजं फलम् ॥७२॥
कोषोदके पुनः स्नाहि यत्र स्नानं कृतं सुरैः। गवां दशफलं प्रोक्तं देवैस्तत्र विरूपदृक् ॥७३॥
तेषु स्नात्वा व्रजाशु त्वं यत्र कोटीश्वरो विभुः। रुद्रधारातटे लिङ्गं विराजते हि सन्ततम् ॥७४॥

शृणोति योऽध्यायमिमं सुभक्तितः प्रीणन्ति नित्यं पितरश्च तस्य वै।
विना च पिण्डैर्हि तिलोदकैस्तथा दशाब्दमात्रं खलु तत्पुरे वसन् ॥७५॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
पैतामहतीर्थगोकर्णेश्वरयोर्माहात्म्यं नाम पञ्चचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४५॥

भाद्र शुक्लपक्ष चतुर्दशीका दिन गोकर्णेश्वरको नजिकैबाट बगेकी वाग्वती नदीमा स्नान गरेर उनले भक्तिपूर्वक यस लिङ्गको पूजा गरे र रातभर जाग्राम बसे। फेरि त्यसै तीर्थमा स्नान गरेर उनले गोकर्णेश्वर भगवान्लाई सम्भदै तिल-जलले सङ्कल्प गरी प्रेमसित आफ्ना बाबुलाई पिण्ड दिए। शिवजीको आज्ञा अनुसार ती वैश्यलाई स्वर्गमा लैजान प्रमथगणहरू त्यहाँ आए अनि गीत गाउँदै र बाजा बजाउँदै ठूलो उत्सवका साथ तिनलाई तिनलाई पुष्पक विमानमा राखे। प्रमथगणहरूले ठूलो उत्सवका साथ ती वैश्यलाई शिवजीको लोकमा लगे। आज पनि ती वैश्य निरन्तर शिवजीको सेवक भएर बसिरहेका छन् ॥६४-६७॥

यसै बीचमा कुनै चोर गोकर्णेश्वरमा आयो। हडबडसित शिवजीलाई नमस्कार गरेर ऊ गोकर्णेश्वरको नजिकैको पर्वतको भिरबाट जान लागेको थियो। यसै अवसरमा मरेको बालक लिएर दौडिरहेको अर्को म्लेच्छलाई उसले देख्यो। त्यसलाई देखेर डरले दौडिँदा ऊ पहाडबाट खस्यो र मर्‍यो। मरेको त्यस चोरलाई तुरुन्तै शिवजीका दूतहरूले आफ्नो विमानमा राखेर अप्सराद्वारा सुसेवित तुल्याउँदै शिवपुरीमा लगे ॥६८-७०॥

हे विरूपाक्ष ! अब तिमी यहाँबाट तीन कोस टाढा दक्षिणतिर रहेको हनुमत्तीर्थमा जाऊ। कावेरी नदीको जलवेगले तीव्र रूपमा प्रवाहित बनाइएकी मणिमती नाम गरेकी नदीको सङ्गम अनि आकाशगङ्गाको उत्तम जलमा स्नान गर। त्यसो गर्‍यौ भने दशवटा अश्वमेध यज्ञ गरेबराबरको फल प्राप्त हुन्छ। जहाँ अघि देवताले स्नान गरेका थिए, त्यसै कोषोदक तीर्थमा गएर तिमीले स्नान गर्नुपर्दछ। त्यहाँ स्नान गर्‍यौ भने दशवटा गाई दान गरेको फल प्राप्त हुन्छ भन्ने कुरा देवताहरूले बताएका छन्। त्यसपछि तिमी ती ती तीर्थशरूमा स्नान गरेर जहाँ कोटेश्वर भगवान् हुनुहुन्छ त्यस ठाउँमा जाऊ। त्यहाँ रुद्रधारानदीका तटमा शिवजीको लिङ्ग सधैँ विराजमान भएको छ ॥७१-७४॥

जसले यो अध्याय भक्तिपूर्वक सुन्दछ, त्यसका पितृहरू तिलतर्पण, पिण्डादि नदिईकन पनि प्रसन्न हुन्छन्। कोटेश्वर वा काटीश्वर महादेवको नगरीमा रही यो अध्याय सुन्ने व्यक्ति दश वर्षसम्म शिवलोकमा बस्न पाउँछ ॥७५॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा पैतामतीर्थ र गोकर्णेश्वरको माहात्म्यनामक
एकसय पैंतालिसौं अध्याय पूरा भयो।

---

१३. स्नात्वा चात्र चतुर्दश्यां शुक्लायाम्, इति न.सं.पु.पाठः।
१४. शिवम्, इति न.सं.पु.पाठः।
१५. गीतवाद्यमहोल्लासैर्विनयन् तं शिवाज्ञया, इति न.सं.पु.पाठः।
१६. शिवम्, इति न.सं.पु.पाठः।
१७. गीतवाद्यमहोल्लासैर्विनयन् तं शिवाज्ञया, इति न.सं.पु.पाठः।
१८. प्रसेवयन्, इति न.सं.पु.पाठः।
१९. त्रयकोशे विदूरेऽतो दक्षिणे दिशि सिद्धिभाक्, इति न.सं.पु.पाठः।

षट्चत्वारिंशदुत्तरशततमोऽध्यायः

हनुमत्तीर्थमहिमा

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो हनुतीर्थे घटोद्भव। तत्र सस्नौ तृतीयायां शुक्लायां माधवस्य तु ॥१॥
अपृच्छत् तन्माहात्म्यं स तीर्थस्य नेमुनिं निशि। सोऽप्यव्रवीत्तदा तस्मै तीर्थमाहात्म्यमाशु च ॥२॥

नेमुनिरुवाच

अञ्जनाप्रार्थितः पूर्वं वायुपुत्रः[1] कपिर्द्विज। चरन्तं गगने सूर्यं प्रेक्ष्य कौतूहलेन च ॥३॥
अधुना देहि मे मातः ! क्रीडनाय कुतूहलम्। विचरन्[2] गगने किं तत्तेजोरूपञ्च पश्यताम् ॥४॥
वचो निशम्य पुत्रस्य चाऽतिकौतूहलोदितम्। मुमुदे साञ्जनात्यन्तं किष्किन्धायां सुविस्मिता[3] ॥५॥
उवाच वचनं शीघ्रं पुत्राय साञ्जना तदा। कौतूहलेन सिद्धार्य्य क्रोडस्थाय स्मिनानना ॥६॥

अञ्जनोवाच

अगम्यं तत्कथं दास्ये ते रविं गगनेचरम्। यदि शक्नोषि हे पुत्र ! गृह्यतां व्योममण्डले[4] ॥७॥

ऋषिरुवाच

समाकर्ण्य वचो मातुः पराह्णे सहसा तदा। तस्याः क्रोडात्कपिश्चाऽसावुत्पपात नभोऽन्तरे ॥८॥
प्रसार्याशु करं व्योम्नि गृहीत्वा तं[5] स वायुजः। तद्रथकूबरे सद्यो वायुरिव पपात च ॥९॥
तद्रथकूबराघातात्कपेर्हनुर्बिभेद च। पपाताऽत्र द्रुतं व्योम्नस्तस्य भग्नो हनुर्द्विज ॥१०॥

अध्याय – १४६

हनुमत्तीर्थको महिमा

कुमार स्वामीले भन्नुभयो– हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष हनुमत्तीर्थमा गए। उनले त्यहाँ वैशाखशुक्ल तृतीयाका दिन स्नान गरे। राति विरूपाक्षले त्यस तीर्थको माहात्म्य नेमुनिसित सोधे। नेमुनिले पनि तुरुन्त त्यस तीर्थको माहात्म्य विरूपाक्षलाई बताए ॥१–२॥

नेमुनिले भन्नुभयो– पहिले अञ्जनाको प्रार्थना अनुसार पैदा भएका वायुपुत्र हनुमान्‌ले आकाशमा हिँडिरहेका सूर्यलाई देखेर ज्यादै उत्कण्ठित हुँदै आमालाई भने– 'हे आमा ! मलाई खेल्नका लागि आकाशमा हिँडिरहेको तेजोमय देखिने त्यो डल्लो के हो ? मलाई खेल्नका लागि ल्याइदिनुहोस् न।' हे सिद्ध पुरुष ! छोराको वचन सुनेर उत्कण्ठित भएकी ती अञ्जना अत्यन्त प्रसन्न भइन् र काखमा बसेका हनुमान्‌लाई उनले मुसुक्क हाँस्दै भन्न लागिन् ॥३–६॥

अञ्जनाले भनिन्– भेट्नै नसकिने त्यो आकाशमा हिँड्ने डल्लो म तिमीलाई कसरी दिन सक्छु र ? यदि तिमी आफैँ लिन सक्छौ भने आकाशमा छ, लेऊ ॥७॥

ऋषिले भने– आमाको भनाइ सुनेर बेलुकापख हनुमान् आमाको काखबाट आकाशतिर उफ्रिए। हात फैलाएर आकाशमा हिँडिरहेका सूर्यलाई समात्न उफ्रिएका ती हनुमान्‌ले वायुले झैँ सूर्यको रथको हरिसमा ठक्कर खाए। हे विरूपाक्ष ! त्यसरी रथको हरिसमा ठोक्किँदा उनको चिउँडो भाँच्चियो। उनी आकाशबाट तुरुन्तै पृथ्वीमा पछारिए ॥८–१०॥

---

१. देहि मातोऽधुना मह्यम्, इति न.सं.पु.पाठः।
२. चरन्तम्, इति न.सं.पु.पाठः।
३. किष्किन्ध्यां चकितेक्षणा, इति न.सं.पु.पाठः।
४. पुत्र त्वं प्रगृह्यतां तमम्बरे, इति न.सं.पु.पाठः।
५. तं गृहीतुम्, इति न.सं.पु.पाठः।

तत्राकाशे कपौ सिद्ध यावच्च व्यथितः स्थितः[६]। तावत्सूर्योऽचरद् व्योम्नि योजनानां सहस्रकम् ॥११॥
सोऽपि चाऽत्र पपाताशु वायुपुत्रस्तदा पुनः। कृतस्नानेषु[७] देवेषु सिद्धेषु मुनिषु द्विजः ॥१२॥
ददर्श स ऋषीनत्र ततो नद्योः सुसङ्गमे। पूजयतो हरं स्नात्वा ध्यायतः संस्थितानपि[८] ॥१३॥
वशिष्ठात्रिमरीचींश्च पुलस्त्यं पुलहं क्रतुम्। भृगुमाङ्गिरसं चाऽन्यं दत्तात्रेयञ्च नारदम् ॥१४॥
अपृच्छन्नारदो चैनं कस्मादिहागतः कपे। किमर्थं नो वदाशु त्वं त्वद्धनूभेदितं कथम् ॥१५॥
नारदस्य वचः श्रुत्वा कपिरत्र घटोद्भव। कारणं[९] कथयामास मुनिभ्योऽत्र समागमे ॥१६॥
आकर्ण्य मुनयस्तस्य वाचमागमनं पुनः। हनोर्भङ्गं तदाश्चर्यं प्रापुर्भृशं विरूपदृक् ॥१७॥
धन्यधन्येति तस्मै ते वदन्तो नाम साम्प्रतम्। हनूमानिति ते नाम चाऽद्यतो भविता कपे ॥१८॥
यस्मात्प्रपतितश्चाऽत्र त्वद्धनुर्गगनात्पुनः। तस्मादेतद्धनूतीर्थं भूयात्कपे वरप्रदम् ॥१९॥
कपीनां प्रवरं तीर्थं तद्वाञ्छितप्रदम्। लोकानाञ्च विशेषेण स्नातकानां कपीश्वर ॥२०॥
स्नात्वाऽत्र स्थाप्यतां लिङ्गं बालुभिः शिलयाऽपि वा। दीर्घजीवी कपेऽद्यादि भविता त्वं न संशयः ॥२१॥
साधयिष्यसि त्वं सर्वान् लोकान् स्वीयान् भृशं कपे[१०]। त्रेतायुगे हि रामस्य कार्यमेतज्जलाप्लवात्[११] ॥२२॥
कृत्वा शीघ्रञ्च तत्सर्वं हनुमन् गच्छ मन्दिरम्। स्नातव्यं भवता चाऽत्र सर्वपर्वसु यत्नतः ॥२३॥

हे विरूपाक्ष ! जब पवनपुत्र ठक्करको पीडाले व्यथित अवस्था थिए त्यही छोटे समयमा पनि सूर्य आकाशमा हजार योजन पर पुगिसकेका थिए। वायुपुत्र हनुमान् त्यसै तीर्थमा खसे। त्यहाँ दुई नदीको सङ्गम भएको तीर्थमा स्नान गरिसकेपछि वायुपुत्रले भगवान् शिवको ध्यान गर्दै शिवजीको पूजा गरिरहेका कोही त्यसै बसिरहेका देवता, सिद्ध र मुनिहरूको दर्शन गरे। त्यहाँ विराजमान मुनिहरूमध्ये मुख्य बनेका वशिष्ठ, अत्रि, मरीचि, पुलस्त्य, पुलह, ऋतु, भृगु, अङ्गिरा, दत्तात्रेय र नारद बसेका थिए । उनले ती सबैको दर्शन गरे ॥११-१४॥

नारदले हनुमान्लाई सोधे – हे वानर ! तिमी कहाँबाट यहाँ आयौ ? किन आयौ ? कसरी तिम्रो यो चिउँडो भाँचियो ? छिट्टै भन। नारदको भनाइ सुनेर हनुमान्ले मुनिहरूसँग भेट भएको घटनासम्मको सबै वृत्तान्त बताए ॥१६॥ हनुमान्को भनाइ सुनेर उनको यस स्थलको आगमन र चिउँडो भाँचिएको वृत्तान्तले ऋषिहरू अत्यन्त आश्चर्यचकित भए ॥१५-१७॥

ऋषिहरू सबैले यहाँ हनुमान्लाई धन्यवाद दिए र उनको उचित नामको विचार गरी उनलाई भने -'हे कपीश्वर ! आजदेखि तिम्रो नाम हनुमान् रह्यो'। हे वानर ! आकाशबाट तिम्रो भाँचिएको हनू(चिउँडो) यहाँ खस्यो, त्यसैले यस तीर्थको नाम आजदेखि वरदायक हनूतीर्थ भयो। हे कपीश्वर ! यो तीर्थ उत्तम तीर्थ छ। यसले मानिसहरूलाई विशेष गरेर स्नान गर्ने व्यक्तिहरूलाई इच्छा लागेको फल दिन्छ। हे हनुमान् ! यस ठाउँमा स्नान गरी बालुवा र ढुङ्गा ल्याएर शिवजीको लिङ्ग बनाऊ। आजदेखि तिमी चिरञ्जीवी हुनेछौ, यसमा शङ्का छैन। त्यसपछि तिमीले यस तीर्थको जलमा स्नान गरेको हुँदा त्रेतायुगमा रामचन्द्रलाई सहयोग गर्न सक्नेछौ, सबै प्राणीहरूलाई तिमीले सहयोग पुऱ्याउनेछौ। हे हनुमान्! चाँडो यो सबै काम गरेर आफ्नो घर जाऊ। यस तीर्थमा तिमीले प्रयास गरेर सबै पर्वहरूमा स्नान गर्नुपर्दछ ॥१८-२३॥

---

६. व्यथिते स्थिते, इति न.सं.पु.पाठः।
७. स्नापितेषु च, इति न.सं.पु.पाठः।
८. पूजयन्तं हरं कश्चित्स्नात्वा ध्यायन्स्थितान् तथा, इति न.सं.पु.पाठः।
९. तत्सर्वम्, इति न.सं.पु.पाठः।
१०. ततः साधिष्यसि त्वं वै लोकान्सर्वान् भृशं कपे, इति न.सं.पु.पाठः।
११. कसमुद्रलङ्घनादित्यर्थः।

ऋषिरुवाच

ऋषीणां वचनं श्रुत्वा हनुमानत्र भक्तितः। तृतीयायां मुदा सस्नौ शुक्लायां भाद्रकस्य च ॥२४॥
संस्थाप्य विधिवल्लिङ्गं प्रेक्ष्येदञ्च शिलामयम्[१२]। किष्किन्धायां ययौ शीघ्रं[१३] हनूमान् राम किङ्करः ॥२५॥
कृत्वा रामायणं सिद्ध स्नातवानत्र[१४] पर्वसु। अद्यापि स इहागत्य परिवारैः समं सदा ॥२६॥
अत्र स्नातो दिवं याति बहुपापैर्विवर्जितः। अग्निष्टोमफलं प्राप्य भुक्त्वा भोगान्यथेप्सितान् ॥२७॥
बन्ध्या चेदबला स्नानादत्र पुत्रवती भवेत्। पतिप्रिया भवेन्नित्यं गुणरूपबलान्विता ॥२८॥
स्वल्पायुर्यो भवेन्मर्त्यः स्नानादत्र विरूपदृक्। दीर्घजीवी भवेत्सोऽपि सर्वपापैर्विवर्जितः ॥२९॥
भूयो गच्छ विरूपाक्ष ! यत्र कोटीश्वरो विभुः। धनुषां द्विसहस्राणां दूरे वायोर्दिशि ध्रुवम् ॥३०॥
अध्यायमेतच्छृणुयान्मुदा यः स्नानात्फलं प्राप्य हि सोऽत्र नूनम्।
गच्छत्यवश्यं त्रिदिवं विमुक्तः सर्वैनसा वाग्घृदयाङ्गजेन ॥३१॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
हनुतीर्थमाहात्म्यं नाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥१४६॥

ऋषिले भन्नुभयो – ऋषिको यो भनाइ सुनेर हनुमान्ले भक्तिपूर्वक भाद्रशुक्ल तृतीयाका दिन प्रसन्न हुँदै यस तीर्थमा स्नान गरे। विधिपूर्वक ढुङ्गाले बनेको लिङ्गलाई स्थापना गरेर दर्शन गरी उत्तम प्राप्त गर्ने श्रीरामका भक्त एवं सेवक हनुमान् छिट्टैआफ्नो किष्किन्धा नगरीमा गए। हे सिद्ध विरूपाक्ष ! हनुमान् भगवान् रामको लीलामा सहयोगी भई रामायण पूरा गरेर आज पनि सपरिवार यहाँ आएर आउँछन् र नुहाउँछन् ॥२४-२६॥

यहाँ स्नान गर्ने मानिसले अग्निष्टेम यज्ञ गरेको फल पाउँछ, सम्पूर्ण पापबाट मुक्त भएर इच्छा लागेको भोग उपभोग गरी ऊ स्वर्ग जान्छ। बाँझी आइमाई छ भने पनि उसले यहाँ स्नान गर्दा पुत्रवती हुन्छे, पतिकी प्यारी हुन्छे, सधैं गुण, रूप र शक्तिले युक्त बन्दछे। हे विरूपाक्ष ! जसको थोरै आयु छ, त्यसले यस तीर्थमा स्नान गऱ्यो भने सम्पूर्ण पापबाट मुक्त भएर त्यो व्यक्ति चिरञ्जीवी हुन्छ ॥२७-२९॥

हे विरूपाक्ष ! अब तिमी यहाँबाट दुई हजार धनु पर वायव्यदिशामा रहनुभएका कोटीश्वर भगवान्को नजिकै जाऊ। जसले आनन्द भएर यस अध्याय सुन्छ, त्यसले त्यस तीर्थमा स्नान गरेको फल पाउँछ। बोली, हृदय र शरीरका अङ्गबाट भएका सम्पूर्ण पापबाट मुक्त भएर त्यो व्यक्ति अवश्य स्वर्ग जान्छ ॥३०-३१॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा हनुमान्तीर्थको माहात्म्यनामक
एकसय छयालिसौं अध्याय पूरा भयो ॥

---

१२. प्रस्तरामयम्, इति न.सं.पु.पाठः। १३. किष्किन्ध्यां प्रययौ शीघ्रम्, इति न.सं.पु.पाठः।
१४. स्नायतेऽत्र च, इति न.सं.पु.पाठः।

सप्तचत्वारिंशदुत्तरशततमोऽध्यायः

रुद्रधारातीर्थ–कोटीश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो यत्र कोटीश्वरो विभुः । राधशुक्लचतुर्थ्याञ्च मुनिना सह कुम्भज ॥१॥
कुशहस्तो द्विजो भक्त्या सस्नौ सङ्कल्प्य वै यथा । शङ्खमूले महातीर्थे सर्वतीर्थोत्तमोत्तमे ॥२॥
स उत्तरप्रयागाख्ये शङ्खमूले महत्तरे । स्नात्वा लिङ्गं समभ्यर्च्य चापृच्छन्नेमुनिं निशि ॥३॥
मुनिं प्रणम्य भक्त्या च विरूपाक्षो हृदा[1] पुनः । पप्रच्छ स महारात्रौ माहात्म्यं तीर्थलिङ्गयोः ॥४॥
आकर्ण्य तद्वचस्तत्र नेमुनिर्मुनिसत्तमः । व्याजहार शुभं वाक्यं तस्मै स्वसेविने[2] निशि ॥५॥

ऋषिरुवाच

शृणु विप्र ! प्रवक्ष्यामि मुक्तः कश्चिद् द्विजाधमः । महाक्षेत्रे पुण्यभूमावत्रैव च पुरा द्विजः ॥६॥
अस्यां विराजते पश्य पुण्यभूमौ स्पृहार्थदम् । शङ्खमूलं महातीर्थं सर्वतीर्थोत्तमोत्तमम् ॥७॥
जलस्पर्शात् प्रमुच्यन्ते यत्र पातकिनो जनाः[3] । पश्य तीर्थवरं भद्रञ्चतुर्वर्गफलप्रदम् ॥८॥
पश्य रुद्रमुखोद्भूतां शिवगङ्गां विराजिताम् । लोकानां वरदां नित्यं स्नातकानामनुत्तमाम् ॥९॥
मणिगङ्गाञ्च पश्यार्य भास्वत्प्रभां प्रवाहिताम्[4] । रुद्रशीर्षोद्भवां पुण्यां नृणां मुक्तिवरप्रदाम् ॥१०॥
अत्रोद्भूता महापुण्या रुद्रगङ्गा विराजिता । पुराकृतमहापापपातकानां विनाशिनी[5] ॥११॥

अध्याय – १४७

रुद्रधारातीर्थ र कोटीश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष वैशाखशुक्ल चतुर्थीका दिन नेमुनिलाई साथमा लिएर जहाँ कोटीश्वर भगवान् बस्नुहुन्थ्यो, त्यसै ठाउँमा गए। हातमा कुश लिएर सङ्कल्प गर्दै विरूपाक्षले सबै तीर्थमा उत्तम तथा शङ्खमूलमा अवस्थित महातीर्थमा भक्तिपूर्वक स्नान गरे। उत्तरप्रयाग नाम गरेको महत्त्वपूर्ण शङ्खमूल तीर्थमा स्नान गरेर शिवलिङ्गको पूजा गरिसकेपछि विरूपाक्षले राति नेमुनिसित सोधे। विरूपाक्षले भक्तिपूर्वक पहिले नेमुनिलाई प्रणाम गरे, अनि उनले रातमा तीर्थ र लिङ्गको माहात्म्य उनीसित सोधे। राति विरूपाक्षले गरेको प्रश्न सुनेर सिद्धऋषि मुनिश्रेष्ठ नेमुनिले आफ्ना भक्त विरूपाक्षलाई कल्याणमय माहात्म्य बताउनुभयो ॥१–५॥

ऋषिले भन्नुभयो – हे विरूपाक्ष ! सुन, म बताउँछु। यस पुण्यभूमि भएको महाक्षेत्रमा अघि अधम ब्राह्मणले मुक्ति पाएका थिए। यस पवित्र भूमिमा सम्पूर्ण मनका इच्छालाई पूर्ण गरिदिने, सबै तीर्थमा उत्तम शङ्खमूल नाम गरेको तीर्थ विराजमान भएको छ। जुन तीर्थको जल छोयो भने मात्रै पनि ठूला–ठूला पाप गर्ने व्यक्तिहरू मुक्त हुन्छन्। चतुर्वर्ग फल उपलब्ध गराउने अर्थात् धर्म, अर्थ, काम र मोक्षनामका चारथरी पुरुषार्थको फल दिने कल्याणदायी त्यस उत्तम तीर्थको दर्शन गर ॥६–८॥

स्नान गर्ने प्राणीहरूलाई सधैँ उत्तम वर दिने शिवजीको मुखबाट निस्किएकी शिवगङ्गा यसै ठाउँमा विराजमान भएकी छन्, हेर। हे विरूपाक्ष ! सधैँ चम्किलो कान्ति भएकी, शिवजीको शिरबाट उत्पन्न भएकी, मानिसलाई मुक्तिरूपी वर दिने पवित्र मणिगङ्गाको दर्शन गर। यहीँबाट अत्यन्त पवित्र रुद्रगङ्गा पैदा भएकी छन्। यिनले अघि गरेका पाप र महापापहरूलाई नाश गरिदिन्छिन् ॥९–११॥

---

१. मुने, इति न.सं.पु.पाठः।
२. स्वभक्तिने, इति न.सं.पु.पाठः।
३. महापातकिनो यत्र प्रमुच्यन्ते जलस्पृशात्, इति न.सं.पु.पाठः।
४. भास्वत्प्रभाहितां सदा, इति न.सं.पु.पाठः।
५. पुराकृतान्महापापान्पापकानपि नाशिनी, इति न.सं.पु.पाठः।

रुद्रधारा च पातालगङ्गा ज्ञेयाऽघहारिणी । स्वर्गार्थिभिः सुरैर्दैत्यैः सिद्धर्षिभिः प्रसेविता ॥१२॥
मणिमती तथा ज्ञेया व्योमगङ्गा सुखप्रदा । बलैश्वर्य्यप्रदा नित्यं राज्यार्थिभिः प्रसेविता ॥१३॥
भागीरथी तथा ज्ञेया वाग्वतीयं महानदी । धर्मार्थकामदाऽजस्रं मोक्षार्थिभिः प्रसेविता ॥१४॥
पुण्यभूमिर्महाक्षेत्रं तस्माद् विद्धि द्विजोत्तम । त्रिगङ्गासङ्गमं यासु चैकाऽपि दुर्लभा त्रिषु ॥१५॥
तिस्रः कोट्यर्द्धकोटीभिरध्यास्तेऽमरनिम्नगा । यावत्स्वर्गोद्भवैस्तीर्थैः पातालसम्भवैः सह ॥१६॥
जम्बुद्वीपवरिष्ठैश्च क्षेत्रैर्नेपालसम्भवैः । जम्बुद्वीपवरिष्ठञ्च क्षेत्रं नेपालकं विदुः ॥१७॥
अपि तस्मिन्निदं शैवं पुण्यभूमिमहत्तरम् । भागीरथ्याश्चतुर्भिश्च गुणैर्युक्तं महत्तरम्[६] ॥१८॥
शङ्खमूलं महातीर्थं त्रिगङ्गासङ्गमं यतः । शङ्खो लब्धवरश्चाऽभूच्चिरञ्जीवी तपस्यया ॥१९॥
रुद्रगङ्गातटे चाऽत्र कोटीश्वरप्रसादतः । व्यासो मुनिवरश्चाऽत्र तेपे रक्षो विभीषणः ॥२०॥
सप्तर्षयस्तथा सिद्धाः सुचिरञ्जीविनो परे । कुष्ठवन्तो विमुच्यन्ते कुष्ठात् पातकिनस्तथा[७] ॥२१॥
रुद्रधारामहातीर्थे स्नानाद्धि सर्वकिल्विषैः । शृणु सिद्ध प्रवक्ष्यामि कश्चिन्मुक्तः पुरात्र वै ॥२२॥
माहात्म्यं रुद्रधारायास्त्रिगङ्गासङ्गमाश्रितम् । कश्चिद्विप्रः पुरा चासीदुज्जयिनी पुरे वसन् ॥२३॥
सोऽवधीत्पितरं युद्धे कालाद् गङ्गातटे मृतः । गङ्गायां मरणात्[८] पुण्याद्विप्रोऽभवत्पुनर्हि सः ॥२४॥

पापनाश गरिदिने रुद्रधारालाई तिमी पातालगङ्गा भनेर जान । स्वर्गको आकाङ्क्षा राख्ने देवता, दैत्य, सिद्ध र ऋषिहरूले सधैँ यिनको सेवा गर्दछन् । प्राणीहरूलाई कल्याण गर्ने मणिमतीलाई व्योमगङ्गा अर्थात् आकाशगङ्गा भनेर जान । यिनले बल तथा ऐश्वर्य दिन्छिन्, राज्यको कामना गर्ने व्यक्तिहरूले सधैँ यिनको सेवा गर्दछन् । यी महानदी वाग्वतीलाई भागीरथी भनेर बुझ । यिनको सेवा गर्ने व्यक्तिहरूलाई यिनले धर्म र काम दिन्छिन् । मुमुक्षुहरूले सधैँ यिनको सेवा गर्छन् ॥१२-१४॥

हे विरूपाक्ष ! यी तीनवटा नदीमध्ये एउटा नदी पनि अरू क्षेत्रमा उपलब्ध हुन सक्दैन । यहाँ तीनवटै गङ्गाको सङ्गम छ, त्यसैले यस क्षेत्रलाई पुण्यभूमि भनेर ठान । यस पुण्यभूमिमा स्वर्ग तथा पातालमा भएका तीन करोड पचास लाख तीर्थहरूका साथ स्वर्गङ्गा बसेकी छन् । विभिन्न तीर्थहरूका कारण अत्यन्त महनीय बनेका नेपालवर्ती क्षेत्रहरूले गर्दा यो क्षेत्र जम्बुद्वीपमा नै सबैभन्दा महत्त्वपूर्ण बनेको छ । त्यसमा पनि पुण्यभूमिले गर्दा यो महत्त्वपूर्ण हुनपुगेको शिवजीको क्षेत्र हो । यहाँ भागीरथीको भन्दा चारगुना बढी प्रभावकारिता छ ॥१५-१८॥

शङ्खमूल नाम गरेको यस महातीर्थमा तीनवटा गङ्गाहरूको सङ्गम छ । यसै ठाउँमा तपस्या गरेर शङ्खासुरले चिरञ्जीवी हुने वर पाएको थियो । यसै रुद्रगङ्गाको तटमा कोटीश्वर भगवान्बाट वर प्राप्त गरेर व्यास मुनिश्रेष्ठ भए । यसै ठाउँमा विभीषण नाम गरेका राक्षसले तपस्या गरेका थिए । सप्तऋषि तथा सिद्धहरू यसै ठाउँमा तपस्या गरेर चिरञ्जीवी भए । रुद्रधारा तीर्थमा स्नान गर्नाले कुष्ठरोगी कुष्ठरोगबाट मुक्त हुन्छ । त्यसैगरी महापापीहरू पनि सबैथरी पापबाट मुक्त हुन्छन् । रुद्रधारा र त्रिगङ्गाको सङ्गममा आश्रय लिएको हुँदा अघि यहाँ कुनै व्यक्ति मुक्त भएको थियो, हे सिद्ध ! त्यसको माहात्म्य सुन ॥१९-२२॥

अघि कुनै समयमा उज्जयिनी शहरमा एक जना ब्राह्मण बस्दथे । उनले युद्धमा आफ्ना बाबुलाई पनि मारे । केही समयपछि बितेपछि उनी कालगतिले गङ्गाजीको तीरमा मरे । गङ्गातटमा मरेको प्रभावले गर्दा अर्को जन्ममा ब्राह्मण भएर नै जन्मिए ॥२३ -२४॥

---

६. भागीरथ्याश्चतुर्णाञ्च गुणं ज्ञेयं महत्तरम्, इति न.सं.पु.पाठः । ७. कुष्ठवान्मुच्यते कुष्ठान्महापातकिनस्तथा, इति न.सं.पु.पाठः ।
८. गङ्गातीरमृतात्, इति न.सं.पु.पाठः ।

पितृहत्याघसंलिप्तः[९] सर्वभुक् च रुषाऽन्वितः। पिपासार्त्तो रुषायुक्तो जलाभावे त्वरान्वितः ॥२५॥
स्वपत्नीं गुर्विणीं विप्रः पादेनैव जघान सः। स्त्रीबालहत्यया लिप्तस्तर्जितः सकलैर्जनैः[१०] ॥२६॥
विनिःसृतः पुराद्विप्रो ब्रह्मपिशाच आश्रुतः। मांसलुब्धोऽभवत् दृष्ट्वा[११] चरन्तीं कानने च गाम् ॥२७॥
रहो जघान खड्गेन चाऽभौक्षीत्पिशितं[१२] हि तत्। आलोक्य रक्षको विप्रो भुक्तवन्तं तदामिषम् ॥२८॥
लगुडेन जघानार्य तमभिद्रुत्य गर्हयन्। सोऽपि ब्रह्मपिशाचश्च द्विजं गोरक्षकं पुनः ॥२९॥
तं जघानाऽसिना शीघ्रं समुद्दिश्य च तद्गलम्। गङ्गायां मरणात्[१३] पुण्यादग्रजन्मा हि जातितः ॥३०॥
तत्पापैर्लिप्तगात्रोऽसौ व्रणी कुष्ठी ह्यभूद् भृशम्। ददर्शाऽत्र मुनीन् सिद्धान् पूजकाँस्तान् शिवं मुदा ॥३१॥
ततो ब्रह्मपिशाचश्च मार्गशुक्लाष्टमीदिने। सनच्च भगवानाद्यः सनकश्च महाविभुः ॥३२॥
सनातनश्च विश्वात्मा सनन्दनो वरप्रदः। सनत्कुमार एवार्यो ब्रह्मा च कपिलस्तथा ॥३३॥
एतान्ददर्श पापोऽसावेतत्तीर्थतटेषु च। मरीच्यत्री पुलस्त्यञ्च भृगुमङ्गिरसं क्रतुम् ॥३४॥
पुलहं नारदं गर्गं वसिष्ठं गौतमं तथा। याज्ञवल्क्यञ्च संवर्त्तं पैठीनसं यमं मनुम् ॥३५॥
आपस्तम्बञ्च हारीतं कात्यायनञ्च देवलम्। विष्णुं बौधायनं चाऽन्यमपश्यच्च सहस्रशः ॥३६॥
तर्पयन् यो मुदा पितॄन् पूजयन् बालुकं शिवम्[१४]। एतत्तीर्थेषु संस्नाय स्थितः कश्चित् तटे यतिः[१५] ॥३७॥
तस्मै ब्रह्मपिशाचाय शुभं वाक्यं जगाद हि[१६]।

बाबुको वधबाट उत्पन्न पापले ग्रस्त भएका सर्वाहारा ती ब्राह्मण पानी खान नपाएर रिसाए। उनले गर्भवती आफ्नी पत्नीलाई लात्तीले हानेर मारे। स्त्रीहत्या र बालहत्याको पापले गर्दा सबै मानिसहरूले तिनलाई अति नै गाली गरे। त्यसपछि ती ब्राह्मण ब्रह्मपिशाच भएर गाउँबाट बाहिर निस्किए। जङ्गलमा चरिरहेको गाईलाई देखेर ती गाईको मासुमाथि उनको मन लोभियो। उनले एकान्त पारेर तरबारले हाने र गाईलाई मारे। त्यसपछि गाईको रगत खाए। गाईका स्वामी ब्राह्मणले मासु खान लागेको त्यस ब्राह्मणलाई देखेर दौडँदै आई गाली गर्दै लौराले हिर्काए। गाई हेर्ने ती ब्राह्मणलाई ब्रह्मपिशाचरूपी ती ब्राह्मणले तुरुन्त तरबार उठाए र घाँटीमा हानेर तत्कालै मारिदिए ॥२५–२९½॥

यतिविधि पाप गरेको भए पनि त्यो हत्यारा ब्राह्मण गङ्गातीर्थमा मरेको हुनाले ब्राह्मण भएर फेरि पैदा भयो। ब्राह्मणको हत्या गरेको पापले गर्दा उसको शरीरभरि खटिरै खटिरा आए। त्यो कुष्ठरोगले अत्यन्त पीडित भयो। उसले यस ठाउँमा प्रसन्न भएर शिवजीको पूजा गर्न लागेका ऋषि र सिद्धहरूलाई देख्यो। त्यसपछि त्यस पापी ब्रह्मपिशाचले मार्गशुक्ल अष्टमीका दिन भगवान् सनत, महाविभु सनक, विश्वात्मा सनातन र वरदाता सनन्दन, सनत्कुमार, ब्रह्मा तथा कपिल नाम गरेका ऋषिहरूलाई त्यसै तीर्थको तटमा देख्यो ॥३०–३३॥

त्यसैगरी उसले पितृहरूको तर्पण गर्न लागेका बालुवाले बनाएको शिवलिङ्गलाई सहर्ष पूजा गर्न लागेका मरीचि, अत्रि, पुलस्त्य, भृगु, अङ्गिरा, क्रतु, पुलह, नारद, गर्ग, वसिष्ठ, गौतम, याज्ञवल्क्य, संवर्त, पैठीनस, यम, मनु, आपस्तम्ब, हारीत, कात्यायन, देवल, विष्णु, बोधायन र अरू पनि यस तीर्थमा स्नान गरेर भक्तिपूर्वक नियमका साथ तर्पण गर्न लागेका ऋषिहरूलाई देख्यो। उनीहरूले पनि ब्रह्मपिशाच भएको त्यस ब्राह्मणलाई देखे ॥३४–३६॥

माथि बताइएका तीर्थरूमा स्नान गर्ने कुनै संन्यासी पनि त्यहीँ थिए। बालुवाको शिवलिङ्ग स्थापना गरेर पूजा गर्दै तटमा बसिरहेका तिनै संन्यासीले त्यस ब्रह्मपिशाचको कल्याणका लागि शुभवचन भन्न लागे ॥३७½॥

---

९. पितृवधेन सो लिप्तः, इति न.सं.पु.पाठः।
१०. तर्क्यः सर्वजनैरिह, इति न.सं.पु.पाठः।
११. मांसलुब्धमनोऽभूत्स, इति न.सं.पु.पाठः।
१२. अभोजीत्, इति न.सं.पु.पाठः।
१३. गङ्गातीरे मृतात्, इति न.सं.पु.पाठः।
१४. तर्प्पयन्तं मुदा कश्चिन्पूजकं बालुकं शिवम्, इति न.सं.पु.पाठः।
१५. एतत्तीर्थेषु संस्नात्वा स यतिर्भक्तितो द्विज, इति न.सं.पु.पाठः।

यतिरुवाच

रे रे पापिष्ठ ! पश्यैतानृषीन् धर्माश्रितान् सदा ॥३८॥

एतत्तीर्थेषु संस्नाय बालुमयहरार्च्चकान् । स्नाहि चाऽत्र महातीर्थे ततो मोक्ष्यसि पापतः ॥३९॥

महापापैर्विलिप्ताङ्ग ! चेहाऽमुत्र कृतैरपि । विमुच्यते जनः पापात् सद्योऽत्र जलमर्शनात्[१७] ॥४०॥

गोविप्रपितृबालस्त्रीहतिजैरन्यजैस्तथा ।

ऋषिरुवाच

इत्युपदिश्य स्नात्वा स समारोहत् यतिः स्थलीम्[१८] ॥४१॥

एतल्लिङ्गं समभ्यर्च्य जजाप तन्मनुं रहः । सोऽपि सस्नौ तदा भक्त्या चैतच्छ्रोतसि सञ्चरन् ॥४२॥

कुष्ठव्रणार्तिव्यग्रत्वात्[१९] शनैः शनैर्निमज्य च । जलादुत्तीर्य पूर्वं स कृतं पापमबूबुधत्[२०] ॥४३॥

पितृघातादिकं सर्वमभक्ष्यभक्षितं च यत् । ततो दुःखप्रदग्धाङ्गः संस्मृत्य तत् कृतं पुरः[२१] ॥४४॥

नारदं कृतपापानां[२२] चाऽपृच्छन्मोचनं हि तत् ।

ब्रह्मपिशाच उवाच

नमस्ते भगवन्तुभ्यं सर्ववार्त्ताविदे सते[२३] ॥४५॥

नारद ! ब्रह्मपुत्राय कृपाशील ! नमोऽस्तु ते । कथं मोक्ष्यामि तत्पापादज्ञानतः पुरा कृतात् ॥४६॥

गोविप्रपितृबालस्त्रीवधाज्जाताद् वद प्रभो[२४] ।

यतिले भने – हे पापिष्ठ ब्रह्मपिशाच ! यस तीर्थमा स्नान गरेर बालुवाको शिवलिङ्गलाई पूजा गर्न लागेका धर्मात्मा ऋषिहरूलाई हेर् । हे महापापी ! तैं पहिले यस महातीर्थमा स्नान गर । त्यसपछि यस लोक र परलोकमा गरेका महापापबाट तैँले मुक्ति पाउनेछस् । यस तीर्थको जललाई स्पर्श गऱ्यो भने गाई, ब्राह्मण, बाबु, बालक र स्त्रीको हत्या गरेको हत्याजन्य पापद्वारा मुक्त होइन्छ ॥३८–४०॥

नेमुनिले भन्नुभयो – त्यसलाई यस्तो उपदेश दिएर ती संन्यासी स्नान गरी आफ्नो आश्रमतिर उक्लिए । शिवजीको पूजा गरी एकान्तमा बसेर शिवमन्त्र जपे । उसले पनि भक्तिपूर्वक त्यस तीर्थमा कुष्ठरोगको घाउले आत्तिएर डराएको हुँदा बिस्तार बिस्तार डुबेर शिवजीलाई सम्झदै स्नान गऱ्यो । पानीबाट निस्किएपछि त्यसले बाबुको हत्या गरेको र खान नहुने कुरा खाएको आदि आफूले पहिले गरेका सम्पूर्ण पापकर्महरूलाई सम्झियो । आफूले पहिले गरेका कामहरूलाई सम्झिएर अत्यन्त दुःखित हुँदै नारदको नजिकमा ऊ गयो र उसले ती पापहरूबाट मुक्त हुने उपाय नारदसँग सोध्यो ॥४१–४४॥

ब्रह्मपिशाचले भन्यो – सारा कुरा जान्ने हे भगवन् ! हजुरलाई नमस्कार छ । हजुर ब्रह्माका छोरा हुनुहुन्छ, कृपालु हे नारदजी ! हजुरलाई नमस्कार छ । पहिले नजानीकन गरिएका पापहरू, गाई, ब्राह्मण, बाबु, बालक र स्त्रीजातिलाई मारेका पाप तथा खान नहुने करा खाएर भएको पापबाट म कसरी मुक्त हुन्छु ? ॥४५ –४६॥

---

१६. व्याजहार शुभं वाक्यं तस्मै ब्रह्मपिशाचिने, इति न.सं.पु.पाठः ।
१७. एतज्जलस्पृशात्सद्यो बहुपापैर्विमुच्यते, इति न.सं.पु.पाठः ।
१८. इत्युपदिश्य तस्मै स स्नात्वा समारुहत् स्थलीम्, इति न.सं.पु.पाठः ।
१९. कुष्ठव्रणार्त्तभीष्माच्च, इति न.सं.पु.पाठः ।
२०. जलादुत्तीर्य पूर्वे स यत्तत्कृतानबूबुधत्, इति न.सं.पु.पाठः ।
२१. तत्कृतान्पुरः, इति न.सं.पु.पाठः ।
२२. समुपागम्य, इति न.सं.पु.पाठः ।
२३. सर्ववार्त्ताविशारदे, इति न.सं.पु.पाठः ।
२४. पापादभक्षतः, इति न.सं.पु.पाठः ।

ऋषिरुवाच

इत्युक्त्वाऽसौ मुनेः पादं स्प्रष्टुं तस्याऽन्तिकं[२५] ययौ ॥४७॥

करपुटं समुत्सार्य नतमूर्द्धाऽपतद् भुवि। अस्पृश्यञ्च तमालोक्य नारदो हि समुत्सरन्[२६] ॥४८॥

अतिभूमिर्मुनिस्तस्मै वचोऽवोचद्विदूरतः।

नारद उवाच

अत्र स्नाह्यनिशं पाप महीतीर्थेऽघनाशके ॥४९॥

साक्षाल्लिङ्गं समभ्यर्च्य ततो वाञ्छां प्रलप्स्यसे।

व्याप्य संवत्सरञ्चैकं नित्यस्नायी शुचिर्भव। एकसंवत्सरं यावदत्र स्नानेन ते सदा ॥५०॥

विनश्यन्ति हि पापानि द्वादशापि कृतानि च[२७]। त्रिगङ्गासङ्गमे स्नात्वा पुण्यस्थल्यां विकिल्विषः ॥५१॥

ऋषिरुवाच

इत्युपदिश्य तस्मै स नारदस्तत्क्षणाद् द्विज ॥५२॥

पुण्यस्थलीं समारुह्य कोटीश्वरमपूपुजत्। मुनयश्चैव संभूय महालिङ्गमपूपुजन् ॥५३॥

पञ्चोपचारकैर्भक्त्या परिक्रम्य स्तवैर्मुहुः[२८]।

ततः सस्नौ पिशाचोऽसौ चाऽस्मिन्तीर्थे निरन्तरम् ॥५४॥

मार्गशीर्षं मुहुर्व्याप्य वसन्तत्र शिवं स्मरन्। मिथ्यावादोद्भवाः दोषाः[२९] पूर्णिमायां जलाप्लवात् ॥५५॥

इहाऽमुत्र कृतास्तत्र विनश्यन्ति स्म सिद्धराट्। व्याप्य पौषं पुनः सस्नौ ब्रह्मपिशाच आदितः ॥५६॥

सङ्कल्प्य च मुदा भक्त्या कुशहस्तो यथाविधि। सुवर्णस्तेयजं पापं तस्य नाशमगात् पुनः[३०] ॥५७॥

नेमुनिले भन्नुभयो – यति भनेर यो ब्रह्मपिशाच नारदजीको पाउमा स्पर्श गर्न उहाँको नजिकै गयो। हात फैलाएर नम्र हुँदै भुइँमा पसारियो। त्यो देखेर यो अस्पृश्य छ भन्ने ठानी नारदजीले त्यसो नगर भन्दै टाढैबाट भन्नुभयो ॥४७–४८॥

नारदजीले भन्नुभयो – हे पापिष्ठ! तैं पाप नाश गर्ने यस महातीर्थमा एक वर्षसम्म दिनदिनै स्नान गरेर पवित्र बन्। एक वर्षसम्म तैंले यस तीर्थमा स्नान गरिस्भने तेरा पहिले गरेका बाह्रै किसिमका पापहरू नाश हुन्छन्। तीन गङ्गाको सङ्गम भएको यस पुण्यस्थलीमा स्नान गरेर पापबाट मुक्त भई साक्षात् भगवान् शङ्करको लिङ्गको आराधना गर, त्यसो गरिस् भने तैंले इच्छा लागेको फल पाउनेछस् ॥४९–५१॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष! यति उपदेश दिएर नारदमुनि आफ्नो आश्रम अर्थात् निवासस्थानमा जानुभयो र कोटीश्वरको पूजा गर्नुभयो। ऋषिहरूले आपसमा मिलेर भक्तिपूर्वक परिक्रमा गरी बारम्बार स्तुति गर्दै पञ्चोपचारविधिले त्यस महालिङ्गको पूजा गरे ॥५२–५३½॥

त्यस पिशाचले त्यसै तीर्थमा बसेर हरघडी शिवजीको स्मरण गर्दै मंसिर महिनाभरि स्नान गऱ्यो। हे विरूपाक्ष! पूर्णिमाको दिनसम्म गरेको त्यो स्नानले गर्दा झूटो बोलेको दोषबाट उत्पन्न भएका तथा यस लोक र परलोकमा गरेका अन्य पापहरू पनि नाश भए। त्यस ब्रह्मपिशचाले १ गतेदेखि हातमा जलकुश लिएर प्रसन्न हुँदै विधिपूर्वक सङ्कल्प गरेर पौष महिनाभरि नित्य स्नान गऱ्यो। सुनको चोरीबाट भएका पापहरू र यो जन्म र पूर्वजन्ममा गरेका सबै पापहरू पनि पूर्णिमाको दिन नाश भए ॥५४–५७½॥

---

२५. स्पर्शितुमन्तिकम्, इति न.सं.पु.पाठः।

२६. समुच्चरत्, इति न.सं.पु.पाठः।

२७. विनश्यन्ति च ते पापा द्वादशापि पुरा कृताः, इति न.सं.पु.पाठः।

२८. स्तुवन्मुहुः, इति न.सं.पु.पाठः।

२९. पापाः, इति न.सं.पु.पाठः।

३०. सुवर्णस्तेयजाः पापा विनश्यन्ति स्म तस्य च, इति न.सं.पु.पाठः।

परत्रेह कृतं चाऽपि पूर्णिमायां निरन्तरम् । सस्नौ माघं पुनर्व्याप्य पिशाचोऽसौ निरन्तरम् ॥५८॥
सम्पूज्य विधिवद्रुद्रं बालुकाभिः सुनिर्मितम् । पूर्णिमायां ततस्तस्य विनश्यति स्म सर्वशः ॥५९॥
अभक्ष्यभक्षणात् पापमिहलोकपरत्रजम् । संव्याप्य फाल्गुनं मासं दर्भपाणिर्यथाविधि ॥६०॥
अस्मिन्तीर्थे मुदा सस्नौ पिशाचोऽसौ हि भक्तितः । ततश्च पूर्णिमायां वै किल्विषाणि गतानि हि[३१] ॥६१॥
मद्यपानसम्भवानि कृच्छसाध्यानि तानि च[३२] । सस्नौ मधुं पुनर्व्याप्य पिशाचोऽत्र सुभक्तितः ॥६२॥
बालुजं शिवमभ्यर्च्य[३३] चास्मिन्तीर्थे निरन्तरम् । नश्यति स्म ततस्तस्य परद्रव्यापहारजम् ॥६३॥
इहामुत्र कृतं पापं पूर्णिमायां जलाप्लवात् । ततो ब्रह्मपिशाचोऽसौ चास्मिन्तीर्थे पुनर्भृशम् ॥६४॥
सस्नौ च विधिवद् भक्त्या वैशाखं व्याप्य नित्यशः । अगम्यगमनोद्भूतं नाशयितुञ्च किल्विषम्[३४] ॥६५॥
अतिकृच्छ्रादसाध्यं तत् पूर्णिमायां हि तस्य च । ज्येष्ठं व्याप्य पुनः सस्नौ ब्रह्मपिशाच आदरात् ॥६६॥
सङ्कल्प्य विधिवत्तीर्थे कुशपाणिर्निरन्तरम्[३५] । पूर्णिमायां समाप्तायां नश्यति स्म च किल्विषम् ॥६७॥
मुखदोषोद्भवं पापमसाध्यमपि निर्गतम्[३६] । आषाढं व्याप्य संसस्नौ पिशाचोऽसौ निरन्तरम् ॥६८॥
रुद्रधारोदये तीर्थे त्रिगङ्गासङ्गमे शुभे । आषाढ्यां पूर्णिमायाञ्च स्त्रीहत्याकिल्विषं गतम्[३७] ॥६९॥
कृच्छ्रातिकृच्छ्रसाध्यञ्च गतं पापं[३८] जलाप्लवात् । संसस्नौ श्रावणं व्याप्य पिशाचो दर्भहस्तकः ॥७०॥
भक्त्या सङ्कल्प्य तीर्थेऽस्मिन्रुद्रधारासुसङ्गमे । पूर्णिमायां समाप्तायां भ्रूणहत्या विनिर्गता[३९] ॥७१॥

माघमहिनाभरि नित्य स्नान गरेर उसले विधिपूर्वक बालुवाले बनाएको भगवान् शिवको लिङ्गमा पूजा गऱ्यो । पूर्णिमाको दिन अभक्ष्य वस्तु खानाले पैदा भएका पाप तथा यस लोक र परलोकमा गरेका सम्पूर्ण पापहरू नाश भए । त्यसपछि यस पिशाचले हातमा कुश लिएर सङ्कल्प गर्दै विधिपूर्वक प्रसन्न भएर फाल्गुनमहिनाभरि सभक्ति स्नान गऱ्यो । कष्टले मात्र हटाउन सकिने तथा रक्सी खानाले पैदा भएका उसका पापहरू पूर्णिमाको दिन नाश भए ॥५८–६१॥

त्यसपछि त्यस पिशाचले चैत्रमहिनाभरि भक्तिपूर्वक यस तीर्थमा नित्य स्नान गरेर बालुवाले बनाएको शिवलिङ्गको पूजा गऱ्यो । त्यसै महिनाको पूर्णिमाको दिन स्नान गरेपछि अरुको द्रव्य चोरेर लागेका त्यसका यस लोक र परलोकका सबै पापहरू नाश भए । त्यसपछि यस ब्रह्मपिशाचले यस तीर्थमा वैशाखभरि विधिपूर्वक सभक्ति सधैं स्नान गऱ्यो । त्यसै महिनाको पूर्णिमाको दिन अगम्या स्त्रीमा गमन गरेर लागेका तर हटाउन बडो मुस्किल पर्ने त्यसका पापहरू नाश भए । त्यस ब्रह्मराक्षसले फेरि जेठभरि जलकुश हातमा लिई सङ्कल्प गरेर सधै यस तीर्थमा विधिपूर्वक स्नान गऱ्यो । हे विरूपाक्ष ! त्यस महिनाको पूर्णिमाको समाप्तिपछि हटाउन मुस्किल पर्ने मुखको दोषबाट उत्पन्न पापहरू पनि नाश भएर गए ॥६२–६७½॥

तीनवटै गङ्गा मिलेको रुद्रधारा तीर्थमा यस पिशाचले आषाढभरि सधैं स्नान गऱ्यो । त्यस तीर्थमा स्नान गर्नाले आषाढपूर्णिमाको दिन त्यसले गरेका कठिनभन्दा कठिन परिश्रमबाट हटाउन सकिने स्त्रीहत्या र अरू पापहरू पनि नाश भए । रुद्रधाराको सङ्गमस्थल भएको यस तीर्थमा भक्तिपूर्वक हातमा जलकुश लिई सङ्कल्प गरेर त्यस पिशाचले श्रावण महिनाभरि स्नान गऱ्यो । त्यसै महिनाको पूर्णिमाको समाप्ति भएपछि कृच्छसाध्य पाउले हिर्काउँदा पैदा हुने पाप र भ्रूणहत्याजन्य पाप नाश भयो ॥६८–७१½॥

---

३१. विनश्यन्ति स्म किल्विषाः, इति न.सं.पु.पाठः ।
३२. मद्यपानोद्भवाः तस्य कृच्छ्रसाध्याः तथापि च, इति न.सं.पु.पाठः ।
३३. बालुकाजं शिवं पूज्य, इति न.सं.पु.पाठः ।
३४. अगम्यगमनोद्भूताः पापा नश्यन्ति स्म च तत्, इति न.सं.पु.पाठः ।
३५. सदात्र वै, इति न.सं.पु.पाठः ।
३६. मुखदोषाद्भवाः पापा असाध्यास्तस्य सिद्धभाक्, इति न.सं.पु.पाठः ।
३७. तस्य वै तदा, इति न.सं.पु.पाठः ।
३८. नश्यन्ति स्म, इति न.सं.पु.पाठः ।
३९. विनश्यति, इति न.सं.पु.पाठः ।

पादाघातोद्भवं पापं चाऽसाध्यमपि निर्गतम्[४०]। व्याप्य भाद्रं मुदा सस्नौ पिशाचो नित्यशः पुनः ॥७२॥
त्रिगङ्गासङ्गमे तीर्थे सङ्कल्प्यार्य यथाविधि। पूर्णिमायाञ्च तत्पापं गोहत्याजनितं गतम्[४१] ॥७३॥
कृच्छ्रातिकृच्छ्रतो साध्यं महापापं बहिर्गतम्[४२]। आश्विनं व्याप्य संसस्नौ ब्रह्मपिशाचः सादरम्[४३] ॥७४॥
यथोक्तविधिना तीर्थे महापापविनाशके। पूर्णिमायां समाप्तायां ब्रह्महत्यादि किल्विषम्[४४] ॥७५॥
विनश्यति स्म तीर्थेऽस्मिन्मासमात्रं जलाप्लवात्। व्याप्य श्रीकार्त्तिकं मासं सस्नौ स विधिनाऽनिशम्॥७६॥
तीर्थे ब्रह्मपिशाचोऽसौ महापातकनाशके। पूर्णिमायां समाप्तायां पितृहत्यादि किल्विषम्[४५] ॥७७॥
सर्वपापहरे तीर्थे नश्यति स्म जलाप्लवात्। एवं सस्नौ पिशाचोऽसौ पर्वसु च विशेषतः ॥७८॥
अरुणोदयमारभ्य त्रिसन्ध्यायामभोजनः[४६]। ततोऽभवत् पिशाचोऽसौ निष्किल्विषकलेवरः[४७] ॥७९॥
पूर्वाच्छतगुणं शुभ्रो निर्गदश्चैव विज्वरः। अवोचन्मुनयस्तस्मै ब्रह्मपिशाच भोऽधुना ॥८०॥
निष्पापस्तेऽभवद्देह एतत्तीर्थप्रसादतः। पुण्यस्थलं समारुह्य कोटीश्वरं प्रपूजय ॥८१॥
सर्वयज्ञफलं प्राप्य ततः कामं प्रलप्स्यसे। मुनीनां वचनं श्रुत्वा पिशाचोऽसौ प्रहर्षितः ॥८२॥
वाग्वतीं खलु तुष्टाव चापरे च विशेषतः[४८]।

हे विरूपाक्ष ! फेरि उसले तीनै वटा गङ्गा मिलेको तीर्थमा प्रसन्न हुँदै सङ्कल्प गरेर भाद्रमहिनाभरि सधैँ विधिपूर्वक स्नान गऱ्यो। पूर्णिमाको दिन बडो कष्टसित मात्र हटाउन सकिने उसले गरेका ठूला–ठूला पापहरू र गोहत्याजन्य पाप नाश भए। त्यस ब्रह्मपिशाचले फेरि ठूला–ठूला पापलाई नाश गर्ने यस तीर्थमा विधिपूर्वक आश्विनमहिनाभरि स्नान गऱ्यो। त्यस तीर्थको जलमा महिनाभर स्नान गरेको हुँदा त्यस महिनाको पूर्णिमाको समाप्ति भएपछि ब्रह्महत्या आदि गरिएका सबै पाप नाश भए ॥७२–७५॥

त्यस ब्रह्मपिशाचले ठूला–ठूला पापलाई नाश गर्ने त्यस तीर्थमा कार्तिक महिनाभर विधिपूर्वक सधैँ स्नान गऱ्यो। सम्पूर्ण पापलाई नाश गर्ने त्यस तीर्थमा स्नान गरेको हुँदा त्यसै महिनाको पूर्णिमाको समाप्ति भएपछि उसको पितृहत्याजन्य पाप नाश भयो। यसरी त्यस पिशाचले अरुणोदयदेखि लिएर तीनै सन्ध्यामा नखाईकन विशेष गरी पर्वका दिन स्नान गऱ्यो। त्यसपछि त्यस पिशाचले आफ्नो शरीरलाई पापरहित भएको अनुभव गऱ्यो। आफ्नो शरीर पहिलेभन्दा सय गुणा शुद्ध, रोगरहित र तापरहित भएको उसलाई अनुभव भयो ॥७६–७९½॥

ऋषिहरूले उसलाई भने – हे ब्रह्मपिशाच ! यी तीर्थको कृपाले गर्दा तेरो शरीर अब पापबाट मुक्त भयो। पुण्यवेदीमा चढेर अब कोटीश्वर भगवान्‌को पूजा गर। त्यसपछि सम्पूर्ण यज्ञ गरेको फल प्राप्त भई इच्छा पूर्ण हुनेछ। मुनिहरूको यो कुरा सुनेर त्यो पिशाच अत्यन्त खुसी भयो, अनि उसले दुई नदी अर्थात् मणिवती र रुद्रधारा तथा विशेष गरी वाग्वतीको स्तुति गऱ्यो ॥८०–८२½॥

---

४०. पादाघातोद्भवास्तस्य कृच्छ्रा साध्यास्तथापि च, इति न.सं.पु.पाठः।
४१. पूर्णिमायाञ्च तत्पापा गोहत्या स्म विनश्यति, इति न.सं.पु.पाठः।
४२. साध्या महापापाश्च तस्य च, इति न.सं.पु.पाठः।
४३. आश्रुतः, इति न.सं.पु.पाठः।
४४. तस्य च, इति न.सं.पु.पाठः।
४५. तस्य च, इति न.सं.पु.पाठः।
४६. त्रिसन्ध्यायां निराशनः, इति न.सं.पु.पाठः।
४७. निष्पापश्च कलेवरः, इति न.सं.पु.पाठः।
४८. तुष्टव खलु वाग्वत्यै चापराभ्यां विशेषतः, इति न.सं.पु.पाठः।

पिशाच उवाच

ॐ नाभिकुण्डसमुद्भूते रुद्रकण्ठाद्विनिःसृते ॥८३॥
वाग्वतीति श्रुता देवि ! जलमूर्त्यै नमोऽस्तु ते। रुद्रचूडारत्नभूते योगेश्वरि नमाम्यहम्[४९] ॥८४॥
मणिमतीति विख्याते ! जलमूर्त्यै नमोऽस्तु ते। रुद्रपादोद्भवे गङ्गे स्नपनार्थञ्च शूलिनः ॥८५॥
रुद्रधारेति विख्याते जलमूर्त्यै नमोऽस्तु ते। एकाङ्गं त्रिविधा भित्त्वा सा चोवाह[५०] महेश्वरी ॥८६॥
वाग्वती रुद्रधारेति मणिमतीति विश्रुता। नानारूपाङ्गधारिण्यै व्यक्ताव्यक्तस्वरूपिणि ॥८७॥
बहुमूर्त्यै महादेव्यै चैकरूपे नमोऽस्तु ते। वाग्वतीपूतकल्लोलैर्धर्ममय्यां विलुप्यति[५१] ॥८८॥
त्वयि निमज्जकानाञ्च पापकल्लोलसंहतिः। हेमाभायै त्रिनेत्रायै सर्वालङ्कारशोभिनि ॥८९॥
व्याघ्रचर्मोपवीतायै स्मिताननने नमोऽस्तु ते। त्रिशूलं डमरुं मालां पुस्तकं बिभ्रतीं करैः ॥९०॥
ईषत्स्मिताननां देवीं द्रवीभूतां नमाम्यहम्। सर्वपापौघहारिण्यै सर्वलोकैर्नमस्कृते ॥९१॥
महापातकनाशिन्यै वरप्रदे ! नमोऽस्तु ते। तीर्थरूपे नदीनाञ्च तिसृणां[५२] सङ्गमोज्ज्वले ॥९२॥
द्रवीभूते महामूर्त्ति ! चागोचरे नमोऽस्तु ते। ब्राह्मी च वैष्णवी रौद्री मूर्तयस्ते महेश्वरि ॥९३॥
एतासां सरितां मूर्त्तिस्ताभिरेव प्रगच्छति[५३]। वाग्वति शिवगङ्गेऽजे त्रैलोक्यपावनि शिवे ॥९४॥
दुर्गे भवानि शर्वाणि उमेऽपर्णे नमोऽस्तु ते।

पिशाचले भन्यो – हे देवी ! हजुर नाभिकुण्डबाट उत्पन्न हुनुभएको छ। रुद्रकण्ठबाट हजुर निस्कनुभएको छ, वाग्वती नामले प्रसिद्ध हुनुहुन्छ। जलको मूर्ति लिने हे देवी ! हजुरलाई नमस्कार छ। हे योगेश्वरी ! हजुर भगवान् शङ्करको चूडामणिबाट पैदा भएर बग्नुभएको छ। मणिवतीको नामले हजुर प्रसिद्ध हुनुहुन्छ। जलको मूर्ति लिने हजुरलाई नमस्कार छ। भगवान् शङ्करलाई स्नान गराउनका लागि हे गङ्गा ! हजुर शिवजीको पाउबाट पैदा हुनुभएको छ। हजुरको नाम रुद्रधारा छ। यस्ती जलमूर्ति लिने हजुरलाई नमस्कार छ ॥८३–८५½॥

एउटै अङ्ग अर्थात् पर्वतलाई तीनतिरबाट फोरेर वाग्वती, रुद्रधारा र मणिवती नामले हे महेश्वरी ! हजुर बग्नुभएको छ। व्यक्त तथा अव्यक्त स्वरूप लिएर विभिन्न रूप र अङ्गलाई धारण गर्ने अनेक मूर्ति भईकन पनि एउटै रूप लिने महादेवीलाई नमस्कार छ। वाग्वतीको पवित्र तरङ्गले परिपूर्ण भएको क्षेत्रमा निवास गर्ने र तपाईंको जलमा स्नान गर्ने भक्तहरूको सबै पापपुञ्ज नाश हुन्छ। सुवर्णको जस्तो कान्ति भएकी, तीन आँखा भएकी, अनेक गहनाले सिङ्गारिएकी र बाघको छाला ओढेकी हे प्रसन्नवदना ! हजुरलाई नमस्कार छ। त्रिशूल, डमरु, माला, पुस्तक धारण गर्ने, मुसुमुसु हाँस्ने जलस्वरूप भएकी देवीलाई म नमस्कार गर्छु ॥८६–९०½॥

सम्पूर्ण पापको समूहलाई नाश गर्ने, सम्पूर्ण प्राणीहरूद्वारा नमस्कार गरिएकी, महापातकहरूलाई ध्वस्त गर्ने वरदायनी हे देवी ! हजुरलाई नमस्कार छ। तीनै नदीहरूको सङ्गमले गर्दा तीर्थका रूपमा देखापरेकी, जलको रूप लिने, सामान्य इन्द्रियले ज्ञान गर्न नसकिने हे महामूर्ति ! हजुरलाई नमस्कार छ। हे माहेश्वरी ! ब्राह्मी, वैष्णवी र रौद्री, यी तीनवटा तपाईंका मूर्ति हुन्। यी तीनैलाई साथमा लिएर तपाईं बग्नुभएको छ। हे वाग्वती ! हे शिवगङ्गा ! हे तीनै लोकलाई पवित्र पार्ने शिवा ! हे दुर्गा ! हे भवानी ! हे शर्वाणी ! हे उमा ! हे अपर्णा ! हजुरलाई नमस्कार छ ॥९१–९४½॥

---

४९. रुद्रचूडामणेर्भूते योगेश्वरि प्रयास्यसि, इति न.सं.पु.पाठः।
५०. प्रववाह, इति न.सं.पु.पाठः।
५१. विनश्यति, इति न.सं.पु.पाठः।
५२. त्रयाणाम्, इति न.सं.पु.पाठः।
५३. मूर्त्तिस्ताभिराश्रित्य संवहन्, इति न.सं.पु.पाठः।

ऋषिरुवाच

इत्याकर्ण्य स्तवं विप्र ! पिशाचस्य तदा शिवा ॥९५॥
सङ्गमे त्वरितं नद्योरुन्ममज्ज जलान्तरात्। व्याचष्टे वचनं तस्मै वाग्वती सा स्मितानना ॥९६॥
वरं दातुं मुदा तीर्थे कृपाकल्लोलशालिनी।

वाग्वत्युवाच

भो भो ब्रह्मपिशाचार्य ! द्विजोत्तमो भवाद्यतः ॥९७॥
निष्पापस्तव देहः स्यान्मयि स्नानाद्धि भक्तितः। सप्तजन्मार्ज्जितैः पापैः सन्त्यक्तस्त्वं न संशयः ॥९८॥
महापातकजैः पङ्कैर्वाङ्मनोदेहजैस्तथा। चिरञ्जीव्याः सुपुत्रस्त्वमद्य प्रभृति सन्ततम् ॥९९॥
मत्प्रसादाच्च भूया वै रुद्रस्याऽनुचरोऽनिशम्। अद्यैव पूर्णिमायां त्वं कोटीश्वरं प्रपूजय ॥१००॥
यास्यसि शिवलोकं वै भवेः प्रमथनायकः। पितृलोकं गतान् पश्य पितॄन्तव ह्यधःस्थितान् ॥१०१॥
तृप्तानुत्सारितान्दत्तैस्त्वत्तिलोदकरज्जुभिः। यत्र कुत्र मयि प्राप्ते संस्नान्ति धीयुता नराः ॥१०२॥
तेषां पूर्वकृतान् पापान् हरिष्यामि न संशयः।
कोटित्रयार्धकोटीनि[५४] तीर्थानि मयि सन्ति वै ॥१०३॥
सर्वतीर्थमयी साक्षात्सकलेषु च पर्वसु। वाग्वती शिवगङ्गेति ब्रह्मसरस्वतीति वा ॥१०४॥
यो ब्रूयादनिशं तस्य नित्यं पापं हराम्यहम्। तथोत्तरप्रयागं स्यादत्र नः सङ्गमः शुभः ॥१०५॥
फलदः तीर्थकोटीनां कलौ प्राप्ते विशेषतः।

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यस किसिमको त्यो पिशाचको स्तुति सुनेर दुई नदीको सङ्गमस्थलको पानीभित्रबाट भगवती तुरुन्त प्रकट हुनुभयो। कृपाले सम्पन्न भएकी भगवती वाग्वतीले मुसुक्क हाँसेर वर दिनका लागि त्यस पिशाचलाई भन्न लाग्नुभयो ॥९५–९६½॥

वाग्वतीले भन्नुभयो – हे ब्रह्मपिशाच ! तिमी आजदेखि ब्राह्मणश्रेष्ठ भयौ। मेरो जलमा भक्तिपूर्वक स्नान गरेको हुँदा तिम्रो शरीर पापबाट मुक्त भयो। सात जन्ममा गरेको पापबाट पनि तिमी मुक्त भयौ। त्यस्तै बोली, मन र शरीरले गरेका महापापबाट पैदा भएको हिलोबाट पनि तिमी मुक्त भएका छौ, यसमा शङ्का छैन। हे छोरा ! आजदेखि तिमी धेरै समयसम्म चिरञ्जीवी भए। मेरो अनुग्रहले गर्दा तिमी भगवान् शङ्करको सेवक भएर कैलासमा बस्न पाउनेछौ ॥९७–९९॥

हे बाबु ! आज पूर्णिमाको दिन कोटीश्वर भगवान्को पूजा गर। तिमी शिवलोकमा गएपछि प्रमथगणका नेता हुनेछौ। पितृलोकमा गएर तल बसेका पितृहरूलाई हेर। यिनीहरू तिमीले दिएका तिल र जलको डोरीले तृप्त भएर माथि आएका छन्। जुनसुकै ठाउँमा किन नहोस्, मेरो जलमा जुन बुद्धिमान् मानिसले स्नान गर्छ त्यसले अघि गरेका सम्पूर्ण पापहरू हरण गर्नेछु, यसमा शङ्का छैन ॥१००–१०२½॥

मसँग साढे तीन करोड तीर्थहरू छन्। त्यसैले म सम्पूर्ण पर्वहरूमा सर्वतीर्थमय भएर रहन्छु। जसले सधैं वाग्वती, शिवगङ्गा अथवा ब्रह्मसरस्वती भनेर निरन्तर जप्ने गर्छ म त्यसका सबै पाप हरण गर्छु। यहाँ हामीहरूको सङ्गम भएको उत्तरप्रयाग छ। विशेष गरी कलियुगमा करोडौं तीर्थमा गरेको धर्मकर्मको फल यसै तीर्थमा प्राप्त हुन्छ ॥१००–१०५½॥

---

५४. चिरञ्जीव्याद्रिपुत्र, इति न.सं.पु.पाठः।

ऋषिरुवाच

इत्युक्त्वान्तर्दधे विप्रं वाग्वतीसङ्गमे जले ॥१०६॥
दर्शयित्वा स्वरूपं तत् त्रिगङ्गारूपिणी शिवा। सोऽप्यगमत्पिशाचोऽसौ पुण्यभूमिं महास्थलीम् ॥१०७॥
आरुरोह गिरिं भक्त्या कोटीश्वरेति संवदन्। प्रणम्य दण्डवद् भूमौ व्यक्तरूपाञ्च वाग्वतीम् ॥१०८॥
तत्पूर्णिमादिने भक्त्या चैतल्लिङ्गं समार्चयत्[५५]। आययुः प्रमथाश्चाऽत्र प्रवर्षन्तः सुमानि च[५६] ॥१०९॥
तस्मिन्विनिद्रिते विप्रे यानहस्ता महानिशि। तमास्थाय विमाने ते निन्युः शिवपुरं शुभम् ॥११०॥
सदेहं पूजयन्तो हि रुद्रकन्याप्रसेवितम्[५७]। रुद्रस्यानुचरः सोऽपि पिशाचोऽभून्निरन्तरम् ॥१११॥
स चोत्तरप्रयागस्य प्रसादाद्धि न संशयः। स्नानकाले नरो भक्त्या यः पठेद्वाग्वतीस्तवम् ॥११२॥
वाग्वत्या स्नानजं पुण्यं प्राप्नोति नित्यपाठकः। सङ्ग्रामे जयमाप्नोति ग्रहपीडा विनश्यति ॥११३॥
कान्तां पुत्रं धनञ्चायुर्यशः कीर्तिं च प्राप्नुयात्[५८]। पितृस्त्रीबालगोविप्रवधपापैश्च मुच्यते ॥११४॥
सुवर्णस्तेयमिथ्योक्ताभक्ष्यस्वकृतकिल्विषैः। मद्यपानपरद्रव्यागम्यागमनकिल्विषैः ॥११५॥
मुखदोषोद्भवैः पापैर्मुच्यते स न संशयः। न तूत्तरप्रयागेन समं तीर्थञ्च विद्यते ॥११६॥

नेमुनिले भन्नुभयो – यति भनेर वाग्वतीको सङ्गममा रहेकी त्रिगङ्गारूपधारिणी भगवती शिवा आफ्ना तीनै स्वरूप देखाउँदै अन्तर्धान हुनुभयो। ती पिशाच पनि भक्तिपूर्वक कोटीश्वरको नाम लिँदै पवित्र भूमि भएको त्यस आश्रममा गए ॥१०६–१०७॥

व्यक्त रूप भएकी वाग्वतीलाई भूमिमा पसे्रर दण्डवत् प्रणाम गर्दै त्यसै पूर्णिमाको दिन ती पिशाचले यस लिङ्गको पूजा गरे। राति जाग्राम गरेर ती पिशाचरूप ब्राह्मण बसिरहेका थिए। त्यसैबेला विमान लिएर फूल वर्षा गर्दै यस ठाउँमा प्रमथ आदि शिवगणहरू आए। तिनलाई उनीहरूले विमानमा राखेर सम्मानपूर्वक सशरीर कल्याणदायक शिवपुरमा लगे। रुद्रकन्याहरूले उनको सेवा गरेका थिए। ती पिशाच पनि उत्तरप्रयागको कृपाले गर्दा सधैँ शिवजीको सेवक बन्न पुगे, यसमा शङ्का छैन ॥१०८–१११॥

स्नान गर्ने समयमा जसले सधैँ वाग्वतीको स्तुतिपाठ गर्छ त्यसले वाग्वतीमा स्नान गरेको पुण्य पाउँछ ॥ वाग्वतीको स्तुतिपाठ गर्ने व्यक्तिले युद्धमा विजय पाउँछ। उसका ग्रहदशाहरू नाश हुन्छन्, पत्नी, पुत्र, पुत्री, धन, आयु, यश तथा कीर्ति सधैँ उसलाई उपलब्ध हुन्छ। त्यो व्यक्ति पितृ, स्त्री, बालक, गाई र ब्राह्मण मारेको पापबाट मुक्त हुन्छ। त्यस्तै सुन चोरेको, झूटो बोलेको, अभक्ष्य खाएको र आफूले गरेका अन्य पापबाट पनि मुक्त हुन्छ। मदिरासेवन, परद्रव्यको अपहरण, अगम्यामाथिको गमन र मुखको दोषबाट भएका पापहरूबाट पनि मुक्त हुन्छ, यसमा शङ्का छैन ॥११२–११६½॥

---

५५. चैतल्लिङ्गञ्च समर्चितः, इति न.सं.पु.पाठः।
५६. वर्षयन्पुष्पसन्ततिम्, इति न.सं.पु.पाठः।
५७. सदेहं पूजयन् गीतै रुद्रकन्याप्रसेवयन्, इति न.सं.पु.पाठः।
५८. लभेत्सदा, इति न.सं.पु.पाठः।

त्रिषु लोकेषु सिद्धार्य विशेषेण कलौ ऋतम् । भूयो गच्छ विरूपाक्ष ! यत्र बाणेश्वरो विभुः ॥११७॥
धनुषाञ्च शतं धीमन् ततो दूरे समुत्तरम् ।
शृण्वन्ति येऽखिलजनमनोमोदमध्यायमेतद्
भक्त्या सकृत् त्वघहरमुदीचीप्रयागस्य वृत्तम् ।
पापैर्नैकैः स्वतनुविहितैः पूर्वजन्मार्जितैश्च
नो लिप्यन्ते मखजनितफलं पुण्यपुञ्जाँल्लभन्ते ॥११८॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां रुद्रधाराकोटीश्वरयोर्माहात्म्यं नाम सप्तचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४७॥

हे विरूपाक्ष ! विशेष गरी कलियुगमा उत्तरप्रयागजस्तो अर्को कुनै ठूलो तीर्थ तीनै लोकमा छैन, यो कुरा सत्य हो । त्यसपछि हे विरूपाक्ष ! त्यहाँबाट सय धनुष उत्तर जाऊ । त्यहाँ बाणेश्वर भगवान् बस्नुभएको छ ॥११३–११७½½॥

हे विरूपाक्ष ! जसले यस अध्यायमा वर्णन गरिएको सम्पूर्ण मानिसलाई आनन्द दिने पापनाशक उत्तरप्रयागको माहात्म्य एक पटकमात्रै भए पनि भक्तिपूर्वक सुन्छन्, तिनीहरूले आफ्नो शरीर र पूर्वजन्ममा गरेका पापबाट मुक्त भएर वाजपेय यज्ञ गरेको फल पाउँछन् ॥११८॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा रुद्रधारातीर्थ र कोटीश्वरको माहात्म्यनामक एकसय सत्चालिसौं अध्याय पूरा भयो ।

अष्टचत्वारिंशदुत्तरशततमोऽध्यायः

बाणेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो मुनिना सह कुम्भज। बाणेश्वरो हि यत्रास्ते पञ्चम्यां राधके सिते ॥१॥
स्नात्वा स बाणगङ्गायां बाणेश्वरमपूपुजत्। अपृच्छन्नेमुनिं रात्रौ लिङ्गप्रशंसनं पुनः ॥२॥
आकर्ण्य तद्वचः शीघ्रं तन्माहात्म्यं घटोद्भव। व्याजहार मुनिस्तस्मै स्वभक्ताय[1] महानिशि ॥३॥

ऋषिरुवाच

बाणर्षिणा द्विजैः साकं लिङ्गं संस्थापितं पुरा। अस्मिन्पाशुपते क्षेत्रे तस्माद्बाणेश्वरः श्रुतः ॥४॥
कश्चिन्म्लेच्छश्च कालान्ते चैतल्लिङ्गप्रसादतः। रुद्रस्याऽनुचरो मुक्तो ह्यभवद्वच्म्यहं शृणु ॥५॥
आसीत्पुरा किरातश्च पिङ्गकेश इति श्रुतः। अवात्सीत्खलु चाऽत्रैव ह्याजन्म स[2] धनुर्धरः ॥६॥
नित्यं स मृगयाजीवी भुनक्ति स्म[3] मृगामिषम्। निवेद्य स च लिङ्गाय भक्त्या स्वैरन्वयैः सह[4] ॥७॥
अवात्सीदेवमत्रैव सम्पूर्णं जीवनं हृदा[5]। शिव शिवेति मन्त्रं च जपन् पुत्रकलत्रकैः[6] ॥८॥
रतिञ्चकार स म्लेच्छो दिवारात्रौ द्विधा त्रिधा। अग्रहीद्राजयक्ष्मा तं तद्दोषेण विरूपदृक् ॥९॥
स्वल्पायुरभवन् म्लेच्छो महारोगी व्यथार्दितः[7]। दिने दिने ह्यभूत्क्षीणः कालञ्च प्राप्तवान् ध्रुवम् ॥१०॥
मकरस्थे रवौ म्लेच्छः सङ्क्रान्त्यां शङ्करान्तिके। आह्वयन्[8] शिव रुद्रेति पञ्चत्वं प्राप्तवान् दिने ॥११॥

अध्याय - १४८

बाणेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! फेरि विरूपाक्ष नेमुनिलाई साथमा लिएर वैशाखशुक्ल पञ्चमीका दिन जहाँ बाणेश्वर भगवान् बस्नुभएको थियो, त्यसै ठाउँमा गए। उनले बाणगङ्गामा स्नान गरेर बाणेश्वर भगवान्को पूजा गरे। फेरि राति उनले नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे। हे अगस्त्य मुनि ! उनको त्यो कुरा सुनेर नेमुनिले राति आफ्ना भक्त विरूपाक्षलाई यस लिङ्गको महत्त्व बताए ॥१–३॥

नेमुनिले भन्नुभयो – अघि बाण नाम गरेका ब्रह्मर्षिले यस पाशुपतक्षेत्रमा यो लिङ्ग स्थापना गरेका थिए। त्यसै ले यसको नाम बाणेश्वर रह्यो। कालान्तरमा गएर यसै लिङ्गको प्रभावले गर्दा कुनै म्लेच्छ मुक्त भएर शिवजीको सेवक बन्न पुगेको थियो, त्यो कुरा म बताउँछु, सुन ॥४–५॥

हे विरूपाक्ष ! अघि पिङ्गकेश नाम गरेको एउटा किरात थियो। त्यो धनुर्धारी किरात जन्मभर यसै ठाउँमा बसेको थियो। ऊ सधैँ शिकार खेल्थ्यो। भक्तिपूर्वक त्यस लिङ्गमा समर्पण गरेर सपरिवार मृगको मासु खान्थ्यो। यसरी त्यो म्लेच्छ पत्नी र पुत्रहरूका साथमा शिव ! शिव ! भन्दै जन्मभर यसै ठाउँमा बस्यो। हे विरूपाक्ष ! त्यस म्लेच्छले दिन तथा रातमा गरेर दुई पटक, तीन पटकसम्म रतिक्रीडा गऱ्यो। त्यसै दोषले गर्दा उसलाई क्षयरोगले समात्यो। त्यो महारोगी म्लेच्छ रोगले पीडित भएर स्वल्पायु बन्न पुग्यो। ऊ दिनदिनै दुब्लाउँदै गयो, त्यसको काल आइपुग्यो। सूर्य मकरराशिमा प्रवेश गरेको सङ्क्रान्तिका दिन त्यस म्लेच्छले शिवलिङ्गको नजिकै मध्याह्नमा शिव ! रुद्र ! भन्दै प्राण छोड्यो ॥६–११॥

---

१. स्वभक्तिने, इति न.सं.पु.पाठः।
२. आजन्मानि, इति न.सं.पु.पाठः।
३. सदाभोजी, इति न.सं.पु.पाठः।
४. समन्वयैः सह, इति न.सं.पु.पाठः।
५. एवमासीत्समत्रैव चाजन्मान्तं स सन्ततम्, इति न.सं.पु.पाठः।
६. शिवशिवेति च म्लेच्छो भार्यापुत्रैः समं तदा, इति न.सं.पु.पाठः।
७. रुजार्दितः, इति न.सं.पु.पाठः।
८. मध्याह्ने, इति न.सं.पु.पाठः।

प्रमथास्त्वरितञ्चाऽत्र समाययुः शिवाज्ञया। प्रवर्षन्तश्च पुष्पाणि वादयन्तश्च वाद्यकम्[९] ॥१२॥
तमास्थायाशु ते याने निन्युः शिवपुरं परम्। गीतवाद्यमहोल्लासै रुद्रकन्याप्रसेवितम् ॥१३॥
अद्यापि वर्तते[१०] म्लेच्छो रुद्रस्याऽनुचरोऽनिशम्। पिङ्गकेश इति ख्यातः प्रमथानां गरिष्ठकः ॥१४॥
भूयो गच्छ विरूपाक्ष ! यत्र ज्ञानेश्वरो विभुः। धनुषाञ्च सहस्राणामतो दूरे व्यवस्थितः ॥१५॥
अध्यायं ये प्रवरचरितं भक्तिभावेन प्राज्ञाः संशृण्वन्तीश्वरवरकृपाख्यानमाहात्म्यपूतम्।
ते प्राप्स्यन्तीश्वरवरपुरं किल्विषैस्त्यक्तदेहाः स्थास्यन्तैशे प्रवरभवने वर्षमेकं हि यावत् ॥१६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
बाणेश्वरमाहात्म्यं नाम अष्टचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४८॥

शिवजीको निर्देशन अनुसार प्रमथ आदि गण फूल वर्षा गर्दै, बाजा बजाउँदै त्यहाँ आए। तिनीहरूले गीत गाउँदै, बाजा बजाउँदै ठूलो उत्सवका साथ त्यसलाई यानमा राखेर शिवपुरमा लगे। त्यसबेला रुद्रकन्याले पनि त्यसको सेवा गरेका थिए। आज पनि पिङ्गकेश नाम गरेको त्यो म्लेच्छ प्रमथगणहरूको नाइके भएर सधैँ शिवजीको सेवक बनी बसेको छ ॥१२-१४॥

हे विरूपाक्ष ! फेरि तिमी हजार धनुष टाढा रहेको क्षेत्र जहाँ ज्ञानेश्वर भगवान् हुनुहुन्छ, त्यस ठाउँमा जाऊ ॥१५॥

जुन विद्वान्हरूले महादेव बाणेश्वरको उत्तम कथाले युक्त भएको यो पवित्र अध्याय प्रतिदिन सुन्छन्, ती व्यक्तिहरू पापबाट मुक्त भई सर्वशक्तिमान् शिवजीको लोकमा पुग्छन्। एक वर्षसम्म शिवजीको उत्तम भवनमा बस्न पाउँछन् ॥१६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा बाणेश्वरको माहात्म्यनामक
एकसय अट्चालिसौं अध्याय पूरा भयो।

---

९. वर्षयन् पुष्पवर्षाणि नानावाद्यानि वादयन्, इति न.सं.पु.पाठः। १०. सोऽभवन्, इति न.सं.पु.पाठः।

ऊनपञ्चाशदुत्तरशततमोऽध्यायः

मयूरतीर्थज्ञानेश्वरशिवलिङ्गयोर्माहात्म्यम्

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो यत्र ज्ञानेश्वरो विभुः। राधशुक्लस्य षष्ठ्याञ्च मुनिना तेन वै समम् ॥१॥
बर्हितीर्थे मुदा स्नात्वा ज्ञानेश्वरमपूपुजत्। ततोऽपृच्छन्मुनिं रात्रौ माहात्म्यं तीर्थलिङ्गयोः ॥२॥
आकर्ण्य तद्वचोऽगस्त्य ! सिद्धर्षिर्निशि सेविने[1]। व्याजहार शुभं वाक्यं माहात्म्यञ्च तयोः पुनः ॥३॥

ऋषिरुवाच

देवैराराधितः पूर्वं सेनानीप्रमुखैरिह[2]। दैत्यार्दितैश्च तैः साकं युद्धाय शङ्करो विभुः[3] ॥४॥
माघकृष्णचतुर्दश्यामेतल्लिङ्गसमुद्भवम्। सम्प्रेक्ष्य मुमुहुर्देवा महालिङ्गं महाद्भुतम् ॥५॥
आनर्चुर्विधिवल्लिङ्गं देवाः स्कन्दपुरोगमाः। आविर्भूतस्ततो लिङ्गान्महादेवो मुदा पुनः ॥६॥
व्याजहार वचः शीघ्रं देवेभ्यो व्यक्तविग्रहः। सेनानीञ्च समादृत्य पूर्वं दत्त्वा वरं तदा ॥७॥

रुद्र उवाच

जेष्ठिलायामतः पूर्वं स्नानं कुरुथ साम्प्रतम्। ततो भविष्यति जयस्त्रिदशानां न संशयः ॥८॥

ऋषिरुवाच

इत्यादेशं समादाय सस्नुः तस्यां सुरा मुदा। कुशोदकैश्च सङ्कल्प्य देवानां[4] जयलब्धये ॥९॥
देवसैन्यं ततः प्रेक्ष्य मयूरोऽनरीनृत्यत[5]। अद्यैव सङ्गरेऽस्माकं भविष्यति जयो ब्रुवन्[6] ॥१०॥

अध्याय – १४९

मयूरतीर्थ र ज्ञानेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष वैशाखशुक्ल षष्ठीका दिन ती नेमुनिलाई साथमा लिएर जहाँ ज्ञानेश्वर बस्नुहुन्थ्यो, त्यसै ठाउँमा गए। मयूरतीर्थमा उनले प्रसन्न भएर स्नान गरे, अनि ज्ञानेश्वर भगवान्‌को पूजा गरे। त्यसपछि राति उनले नेमुनिसित त्यस तीर्थ र लिङ्गको माहात्म्य सोधे। हे अगस्त्य मुनि ! उनको त्यो कुरा सुनेर सिद्धऋषि नेमुनिले राति आफ्ना भक्त विरूपाक्षलाई त्यस तीर्थ र लिङ्गको कल्याणमय माहात्म्य फेरि बताए ॥१–३॥

नेमुनिले भन्नुभयो – अघि स्कन्द आदि देवताहरूले राक्षसहरूबाट पीडित भएर युद्धका लागि यसै स्थलमा भगवान् शङ्करको आराधना गरेका थिए। माघकृष्ण चतुर्दशीका दिन यो लिङ्ग पैदा भएको थियो। यो आश्चर्यजनक महालिङ्गलाई देखेर देवताहरू मोहित भएका थिए। कार्तिक स्वामी आदि देवताहरूले यस लिङ्गको विधिपूर्वक पूजा गरे। त्यसपछि यस लिङ्गबाट प्रसन्न हुँदै भगवान् शङ्कर प्रादुर्भाव हुनुभयो। प्रकट हुनुभएका भगवान् शङ्करले कार्तिक स्वामी र देवताहरूको आदर गर्दै वर दिनुभयो र तुरुन्त उनीहरूलाई भन्नुभयो ॥४–७॥

भगवान् शङ्करले भन्नुभयो – अब पहिले ज्येष्ठिला नदीमा स्नान गर। त्यसपछि देवताहरूको विजय हुन्छ, यसमा शङ्का छैन ॥८॥

नेमुनिले भन्नुभयो – यस किसिमको आदेश पाएपछि कुशजल लिएर आफ्नो विजय प्राप्तिका निमित्त सङ्कल्प गर्दै देवताहरूले त्यस नदीमा गएर आनन्दसित स्नान गरे। देवताहरूको सेनालाई देखेर आज नै युद्धमा देवताहरूको विजय हुन्छ भने झैँ गरी मयूर पनि नाच्यो ॥९–१०॥

---

१. भक्तिने, इति न.सं.पु.पाठः।
२. स्कन्दमुखैरमुत्र वै, इति न.सं.पु.पाठः।
३. दितिसुतार्दमानैस्तैः समं युद्धाय शङ्करम्, इति न.सं.पु.पाठः।
४. आत्मनः, इति न.सं.पु.पाठः।
५. मयूरोऽसौ नरीनृतत्, इति न.सं.पु.पाठः।
६. अद्यैव नो भविष्यन्ति युद्धे जय इति ब्रुवन्, इति न.सं.पु.पाठः।

ततः प्रभृति सिद्धार्य ! सर्वलोकैरिति श्रुतम् । मयूरतीर्थमित्याख्यं सर्वदा विजयप्रदम्[७] ॥११॥
कश्चिन्मुक्तः पुरा चाऽत्र कालान्ते हि द्विजात्मकः । अस्मिन्तीर्थे जलस्नानादेतल्लिङ्गप्रसादतः ॥१२॥
आसीद्विप्र ! मुनेः पुत्रो मूको नाम इति श्रुतः । पशुपतिपुरे चाऽत्र विकटस्य महात्मनः ॥१३॥
एतत्तीर्थे मुनिः पुत्रं स मूकं स्नपनेच्छुकः[८] । सङ्कल्प्य विधिवद् भक्त्या क्षुद्रधीरेकपुत्रकः ॥१४॥
ज्येष्ठशुक्लनवम्यां स वसन् तीर्थे मुनिर्निशि । दशम्यां ज्येष्ठनक्षत्रे सुतमस्नापयत् तटे[९] ॥१५॥
ततश्च स्नानमात्रेण स बालकस्तदा पुनः । व्याचष्ट वचनं मूकः पितरं[१०] चाऽभिमोदयन् ॥१६॥
पितस्त्वं क्षुधयात्यन्तपीडितायाऽधुना विभो । देह्यन्नं सहसा मह्यं यस्माद् जीवामि निश्चितम्[११] ॥१७॥
इत्याकर्ण्याशु मूकस्य पुत्रस्य वचनं मुनिः । प्रमुमोद भृशं तत्र निःस्वो लब्धनिधिर्यथा ॥१८॥
सङ्गृह्य पुत्रहस्तं स चाऽत्रानीय मुदा मुनिः । पञ्चोपचारकैर्भक्त्या चैतल्लिङ्गमसेवत ॥१९॥
अवात्सीत्तन्निशायां वै सपुत्रो मुनिसत्तमः । ततो ज्ञानं ददौ रुद्रो बालकाय स्वसेविने[१२] ॥२०॥
असेवत तदादि स चैतल्लिङ्गं निरन्तरम् । अभूद्विचक्षणो विप्रः पद्यनैवावदत्सदा ॥२१॥
चरणेन सदा प्रोक्तं विप्रेण सर्वसन्निधौ[१३] । तस्माल्लोकैः शिशुः प्रोक्तः सोऽयं वै चरणस्थितिः[१४] ॥२२॥
चरणेन यतो लिङ्गमेतत्प्रसेवितं सदा । तस्माल्लिङ्गमिदं प्रोक्तंलोकैश्च चरणेश्वरम्[१५] ॥२३॥

हे विरूपाक्ष ! त्यसै समयदेखि सबै मानिसहरूले यसलाई मयूरतीर्थ भने । देवताहरू युद्धका निमित्त स्वर्गतिर लागे । अघि कुनै ब्राह्मण यस तीर्थको जलमा स्नान गरेको पुण्य र लिङ्गको अनुग्रहले गर्दा मरेर यसै ठाउँमा मुक्त भएको थियो । हे विरूपाक्ष ! यसै पशुपतिपुरमा विकट नाम गरेको महात्मा मुनिको एउटा मूक नाम गरेको छोरो पैदा भएको थियो । एउटै छोरा पाएका ती मुनिले मलाई खिन्न बनाउँदै यसै तीर्थमा ल्याएर त्यस मूक नाम गरेको छोरालाई सङ्कल्प गरेर विधिपूर्वक सभक्ति स्नान गराए । ज्येष्ठशुक्ल नवमीका दिन तीर्थमा बसेर ती ऋषिले ज्येष्ठा नक्षत्रले युक्त भएको दशमीका दिन छोरालाई स्नान गराएका थिए । स्नान गर्नेबित्तिकै मूक नाम गरेको त्यस बालकको बोली फुट्यो र उसले आफ्नो बाबुसँग प्रेमपूर्वक भन्यो ॥११-१६॥

हे बुबा ! भोकले अत्यन्त पीडित भएको मलाई तपाईं तुरुन्त खानेकुरा दिनुहोस्, त्यो भएपछि मात्र म शरीरका प्राणहरूलाई धारण गर्न सक्छु । गरीब मान्छेले खानी पाउँदा जसरी प्रसन्न हुन्छ, त्यसरी नै मूक अर्थात् लाटो छोराको यो भनाइ सुनेर ती ऋषि अत्यन्त हर्षित भए । छोराको हात समातेर ती मुनिले यस लिङ्गको नजिकै ल्याई पञ्चोपचार विधिले भक्तिपूर्वक आराधना गराए । ती मुनिले छोरालाई राति त्यसै ठाउँमा राखे । त्यसपछि भगवान् शङ्करले पनि आफ्ना भक्त ती बालकलाई ज्ञान दिनुभयो ॥१७-२०॥

त्यसै दिनदेखि उनले यस लिङ्गको निरन्तर आराधना गरे । ती ब्राह्मण विद्वान् भए, पद्यमा नै कुरा गर्न सक्ने भए । ती ब्राह्मणले सबैको अगाडि छन्दोबद्ध श्लोकको एक पाउबाट मात्रै बोल्न लागेको हुँदा सबैले ती ब्राह्मणलाई चरण भन्ने नाम राखे किनभने चरण नाम गरेका ब्राह्मणले यस लिङ्गको सधैं सेवा गरेका थिए, त्यसैले मानिसहरूले यस लिङ्गलाई चरणेश्वर भने ॥२१-२३॥

---

७. नाके युद्धं ययुः सुराः, इति न.सं.पु.पाठः ।
८. स्नापयेत्तदा, इति न.सं.पु.पाठः ।
९. जेष्ठर्क्षसंयुतायां वै दशम्यां स्नापयत् सुतम्, इति न.सं.पु.पाठः ।
१०. स्वपित्रे, इति न.सं.पु.पाठः ।
११. यस्माद्धार्ये ह्यसून्तनोः, इति न.सं.पु.पाठः ।
१२. स्वभक्तिने, इति न.सं.पु.पाठः ।
१३. सन्तताग्रतः, इति न.सं.पु.पाठः ।
१४. तस्माल्लोकैस्ततस्तस्मै प्रोक्तं वै चरणस्थितिः, इति न.सं.पु.पाठः ।
१५. तस्माल्लोकैर्द्विज प्रोक्तमेतस्मै चरणेश्वरः, इति न.सं.पु.पाठः ।

चरणो नाम महात्मा लोकवन्द्यो ह्यभून्मुनिः । देशिकः सर्वविद्यासु सर्वसत्त्वदयाकरः ॥२४॥
चतुर्थञ्च वयः प्राप्य रुद्रमन्त्रं जजाप सः । दशलक्षं हृदा भक्त्या चाऽभूल्लब्धवरो हरात् ॥२५॥
प्रमथास्तमिहागत्य चादध्युस्तद्विमानके । ज्येष्ठे सितदशम्यां तत्त्रिवृत्ते मानपूर्वकम्[१६] ॥२६॥
निन्युः शिवपुरं विप्रं तेऽम्बराद्यानगं मुदा । वाद्यगीतमहोल्लासै रुद्रकन्याप्रसेवितम् ॥२७॥
भूयो गच्छ द्विजश्रेष्ठ ! यत्रास्ते पर्वतेश्वरः । पशुपतेरुदीच्यां हि धनुषां त्रिसहस्रके ॥२८॥
शृण्वन्तीदं मुखजडहरं ये माहात्म्यं हि मर्त्या अध्यायेऽस्मिन्वरपशुपतेर्बर्हिनाम्ना हि लिङ्गम् ।
ते चाभूवन्मुखजडदृढत्यक्तदेहाभिरामास्तत्र स्नानात्परशिवपुरं यान्ति निष्पापदेहाः ॥२९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
मयूरतीर्थज्ञानेश्वरयोर्माहात्म्यं नाम ऊनपञ्चाशदुत्तरशततमोऽध्यायः ॥१४९॥

चरण नाम गरेका ती महात्मा ती मुनि संसारका पूजनीय भए। उनी सम्पूर्ण विद्याका अधिकारी बने। उनी सम्पूर्ण प्राणीहरूमाथि दया गर्दथे। अन्तिम उमेरमा पुगेपछि उनले भक्तिपूर्वक भगवान् शङ्करको दश लाख मन्त्र जपेर शिवजीबाट वरदान पाए। शिवजीका प्रमथ आदि पार्षदहरूले आएर ज्येष्ठशुक्ल दशमीका दिन तीन घेरा भएको शिवविमानमा उनलाई बडो सम्मानका साथ राखे। उनीहरूले यानमा राखेका ती ब्राह्मणलाई आकाशमार्गबाट बाजा बजाउँदै ठूलो उत्सवका साथ शिवलोक लगे। रुद्रकन्याले उनको सेवा गरेका थिए ॥२४-२७॥

हे विरूपाक्ष ! फेरि तिमी तीन हजार धनु उत्तरतिर रहेको पशुपतिको क्षेत्रमा जाऊ। त्यहाँ पर्वतेश्वर भगवान् बस्नुभएको छ ॥२८॥

यस अध्यायमा वर्णन भएको मूर्खतालाई नाश गर्ने पशुपतिसम्बन्धी मयूरतीर्थको माहात्म्य जसले सुन्छन्, ती मानिसहरू मूर्खताबाट मुक्त तथा निर्मल हुन्छन्। त्यस तीर्थमा स्नान गर्नाले पापबाट मुक्त भएर उत्तम शिवजीको धाममा जान्छन् ॥२९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा मयूरतीर्थ र ज्ञानेश्वरको माहात्म्यनामक एकसय उनन्पचासौं अध्याय पूरा भयो।

---

१६. **चाद्रयन् बहु, इति न.सं.पु.पाठः।**

पञ्चाशदुत्तरशततमोऽध्यायः

ज्ञानकूपतीर्थपर्वतेश्वरशिवलिङ्गयोर्माहात्म्यम् ॥

स्कन्द उवाच

ततोऽगमद्विरूपाक्षो यत्राऽस्ते पर्वतेश्वरः । एकादश्यां समं तेन राधशुक्लस्य वै मुदा ॥१॥
ज्ञानकूपे ह्रदा स्नात्वा पर्वतेशमपूपुजत् । तन्माहात्म्यं मुनिं रात्रौ पृच्छति स्म द्विजोत्तमः ॥२॥
आकर्ण्य वचनं तस्य भक्त्योदितं मनोहरम्[1] । व्याजहार मुनिश्चाऽपि तन्माहात्म्यं द्विजन्मने ॥३॥

नेमुनिरुवाच

यदा हिमालयेनार्य ध्यातः[2] पशुपतिर्भृशम् । तदैव स्थापितं लिङ्गमेतद्धिमवताऽत्र वै ॥४॥
तदादि भुवि विख्यातो लोके च पर्वतेश्वरः[3] । शृणु वच्मि च माहात्म्यमेतल्लिङ्गस्य सिद्धिदम्[4] ॥५॥
स्थूलपाद इति ख्यात आसीत्कश्चिच्च गुह्यकः । स्वच्छन्दगमनश्चाऽङ्ग ! स योजनपदो भृशम् ॥६॥
सत्ये त्विहाययौ सोऽपि कुबेरेण समं मुदा[5] । वाग्वत्यामत्र वै स्नातुं गुह्यकैश्च निषेवितः[6] ॥७॥
श्रावणीपूर्णिमायान्तु वाग्वत्यामत्र भक्तितः । मुदा सस्नौ विरूपाक्ष ! स्वतीर्थे गुह्यकेश्वरः ॥८॥
एतत्कूपञ्च सम्प्रेक्ष्य स्थूलपादः प्रहर्षितः । अज्ञोऽसावुत्पपाताशु कूपेऽस्मिन् ज्ञानदे भृशम् ॥९॥
ज्ञानवानभवत्सोऽपि चाऽस्मिञ्जले निमज्जनात् । कूपादुत्तीर्य स शीघ्रं स्थूलपाद इहाऽव्रजत् ॥१०॥
कृत्वात्मानञ्च धिक्कारमस्थिरञ्चाऽपि जीवनम्[7] । देहेनानेन किं भद्रं साध्यते खलु मे हितम् ॥११॥
ज्ञानवान्स्थूलपादोऽसौ चैतल्लिङ्गमसेवत । अलकां खलु सन्त्यज्य प्रियां प्रियं प्रभुं तथा ॥१२॥

अध्याय - १५०

ज्ञानकूपतीर्थ र पर्वतेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – त्यसपछि विरूपाक्ष वैशाखशुक्ल एकादशीका दिन नेमुनिलाई साथमा लिएर प्रसन्न हुँदै जहाँ पर्वतेश्वर रहनुभएको थियो, त्यसै ठाउँमा गए। ज्ञानकूपमा स्नान गरेर प्रसन्न हुँदै उनले पर्वतेश्वर भगवान्को पूजा गरे। ब्राह्मणश्रेष्ठ ती विरूपाक्षले राति नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे। भक्तिपूर्वक भनेको विरूपाक्षको भनाइलाई सुनेर ऋषिले पनि ती ब्राह्मणलाई त्यस लिङ्गको माहात्म्य बताए ॥१-३॥

नेमुनिले भन्नुभयो – जुन बेला हिमालयले भगवान् शङ्करको तपस्या गरेका थिए, त्यसैबेला हिमालयले यो लिङ्ग यहाँ स्थापना गरेका हुन्। हे विरूपाक्ष ! त्यसै समयदेखि दुनियाँले उहाँलाई पर्वतेश्वर भने। यस लिङ्गको माहात्म्य पनि म बताउँछु, सुन। अघि स्थूलपाद नाम गरेको कुनै यक्ष थियो। एक योजन लामा खुट्टा भएको त्यो यक्ष नित्य स्वच्छन्द भएर हिँड्दथ्यो। सत्ययुगमा त्यो यक्ष यक्षद्वारा सेवित कुबेरसँगसँगै स्नान गर्न यस वाग्वती नदीमा आएको ॥४-७॥

हे विरूपाक्ष ! श्रावणपूर्णिमाको दिन ज्ञानी त्यस स्थूलपादले भक्तिपूर्वक वाग्वतीका तटमा रहेको कूपतीर्थमा स्नान गऱ्यो। यो कुवा देखेर मूर्ख स्थूलपाद ज्यादै प्रसन्न भयो। अनि ज्ञानदायक त्यस कुवामा तुरुन्त जोडले हामफाल्यो। कुवाको जलमा स्नान गरेको हुँदा त्यो पनि ज्ञानी भयो। स्थूलपाद कुवाबाट निस्किएर तुरुन्त यहाँ आयो। यो जीवनलाई अस्थिर ठान्दै उसले आफैँलाई धिक्कार दियो। यस शरीरबाट कसको के कल्याण हुन्छ ? मैले के कसै को हितमा के गर्न सक्छु ? यसरी भनेर उसले चिन्तन गऱ्यो अलकानगरी, पत्नी र प्यारा स्वामीलाई समेत त्याग गरेर ज्ञानी स्थूलपादले यस लिङ्गको सेवा गर्न थाल्यो ॥८-१२॥

---

१. च तस्य च, इति न.सं.पु.पाठः।
२. तप्तः, इति न.सं.पु.पाठः।
३. तदादिशति विख्यातो लोकैश्च पर्वतेश्वरः, इति न.सं.पु.पाठः।
४. सिद्धभाक्, इति न.सं.पु.पाठः।
५. ययुः, इति न.सं.पु.पाठः।
६. गुह्यकसेवितेन च, इति न.सं.पु.पाठः।
७. धिक्कारमित्यस्थिरञ्च जीवनम्, इति न.सं.पु.पाठः।

ज्ञानकूपोद्धृतैस्तोयैर्नानापुष्पोच्चयैर्मुदा। नित्यमुपासते लिङ्गं पर्वतेश ! वदन्निति ॥१३॥
माघकृष्णचतुर्दश्यां पञ्चत्वं प्राप्तवान्निशि। भवामि तव दासोऽहं स्थूलपाद इति ब्रुवन् ॥१४॥
वर्षन्तः पुष्पगुच्छानि[८] यानहस्तास्त्विहाययुः। रुद्रगणा मुदा तस्मै वदन्तो साधु साध्विति ॥१५॥
तमास्थाय गणा याने निन्युः शिवपुरं महत्। उद्धूयमाना चार्द्रैश्च चामरैः किङ्करोद्धृतैः ॥१६॥
अद्यापि च भवेत्सोऽपि रुद्रस्याऽनुचरो बली। योजनपाद इत्याख्यो देवासुरैः प्रमाणितः ॥१७॥
अतो गच्छ विरूपाक्ष ! धनुषां हि चतुःशते। जलमध्ये दिशि प्राच्यां यत्रास्ते हि जलेश्वरः ॥१८॥

अध्यायेऽस्मिन् हिमगिरिपतेर्यो महत्त्वं शृणोति
ज्ञानाख्ये यत्प्रयतजलजे स्नानतः सोऽपि कूपे।
प्राप्यार्यस्तत्फलमनुमितं गच्छति स्थाणुलोकं
ज्ञानी त्यक्त्वा कठिनकलुषं ज्ञानशत्रूद्भवं वै ॥१९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां ज्ञानकूपतीर्थपर्वतेश्वरयोर्माहात्म्यं नाम पञ्चाशदुत्तरशततमोऽध्यायः ॥१५०॥

हे पर्वतेश्वर ! भन्दै ज्ञानकूपबाट निकालिएको जल र विभिन्न किसिमका फूलहरूले प्रसन्न हुँदै उसले यस लिङ्गको सधैँ उपासना गऱ्यो। माघकृष्ण चतुर्दशीका दिन राति म हजुरको दास बनूँ भन्दै स्थूलपाद मऱ्यो। शिवजीका गणहरू विमान लिएर फूलको वर्षा गर्दै प्रसन्न भएर त्यसलाई धन्यवाद दिँदै यहाँ आए। रुद्रगणहरूले त्यसलाई विमानमा राखेर नोकरहरूद्वारा चमर हम्काउँदै शिवजीको शहरतिर लगे। देवता र राक्षसहरूको समूहमा योजनपाद नामले प्रसिद्ध भएको त्यो यक्ष अहिलेसम्म पनि भगवान् शङ्करको बलियो सेवक भएर बसेको छ ॥१३-१७॥

हे विरूपाक्ष ! यसपछि तिमी चार सय धनुषको दूरीमा पूर्वमा पर्ने क्षेत्रमा जाऊ। यहाँ पानीको बीचमा जलेश्वर भगवान् रहनुभएको छ ॥१८॥

यस अध्यायमा वर्णन गरिएको पर्वतेश्वर भगवान्को माहात्म्य जसले सुन्छ, पवित्र जल भएको ज्ञानकूपमा गएर जसले स्नान गर्छ त्यसले स्नानको फल पाउँछ र ज्ञानी बन्छ, अज्ञानबाट पैदा भएका अतिघोर पापबाट पनि मुक्त हुन्छ र ऊ शिवलोकमा जान्छ ॥१९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा ज्ञानकूपतीर्थ र पर्वतेश्वरको माहात्म्यनामक एकसय पचासौं अध्याय पूरा भयो।

---

८. पुष्पवर्षाणि, इति न.सं.पु.पाठः।

एकपञ्चाशदुत्तरशततमोऽध्यायः

जलेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

भूयो जगाम सिद्धर्षिर्यत्रास्तेऽसौ जलेश्वरः । चतुश्शते च धनुषामतस्तत्र घटोद्भव ॥१॥
जलेश्वरमहातीर्थे भक्त्या स्नात्वा विरूपदृक् । अर्चितवान्महालिङ्गं जलमध्योद्भवं मुदा ॥२॥
राधशुक्लत्रयोदश्यां निशायां तच्च[1] पूजयन् । तल्लिङ्गस्य च माहात्म्यं पप्रच्छ किल[2] नेमुनिम् ॥३॥
पृच्छ्यमानो मुनिश्रेष्ठो विरूपाक्षाय वै पुनः । व्याजहार ततो रात्रौ तन्माहात्म्यं घटोद्भव ॥४॥

नेमुनिरुवाच

आराधितो हि वाग्वत्या शिवं स्नापयितुं[3] पुरा । स्थानं पावयितुं स्वीयं[4] भक्तिभावेन नित्यशः ॥५॥
मां पाहि देवदेवेश पवित्रं कुरु सन्ततम् । लोकमान्या भविष्यामि तवागमनकारणात्[5] ॥६॥
आकर्ण्य तद्वचो रुद्रो वाग्वत्या नित्यमीरितम् । कार्त्तिकस्य सिताष्टम्यां लिङ्गं प्रादुरभूज्जले ॥७॥
जलान्तरात्समुत्तीर्य चाविर्भूतो महेश्वरः । वचो जगाद वाग्वत्यै वरं दातुं तदा मुदा ॥८॥

जलेश्वर उवाच

देवि ! वाग्वति शर्वाणि वरं वरय साम्प्रतम् । यत् सर्वं याचसे मत्तः[6] तत्सर्वञ्च ददामि ते ॥९॥
पूर्वं दत्तो वरः तुभ्यं मयाऽमरैः सुरर्षिभिः ॥१०॥
लोकवन्द्या भवाऽद्यापि सर्वकलुषनाशिनी । एवं दत्तो वरस्तुभ्यं प्रिये ! मयाऽमरैः सह ॥११॥
तथापि याच्यतां देवि दास्येऽहं निश्चितं पुनः ।

अध्याय – १५१

जलेश्वर शिवलिङ्गको महिमा

कुमार स्वामीले भन्नुभयो– हे अगस्त्य मुनि ! त्यसपछि ती सिद्धऋषि विरूपाक्ष जहाँ जलेश्वर भगवान् रहनुभएको थियो, चार सय धनु पर रहेको त्यस ठाउँमा गए। विरूपाक्षले जलेश्वर तीर्थमा भक्तिपूर्वक स्नान गरेर हर्षविभोर भएर जलको माध्यभागमा स्थित शिवलिङ्गको पूजा गरे । उनले माघशुक्ल त्रयोदशीको रातमा त्यस लिङ्गको पूजा गरेर लिङ्गको माहात्म्यका बारेमा नेमुनिसित प्रश्न गरे। हे अगस्त्य मुनि ! विरूपाक्षद्वारा प्रश्न सोधिएका नेमुनिले उनलाई फेरि त्यस लिङ्गको माहात्म्य बताउनुभयो ॥१–४॥

नेमुनिले भन्नुभयो – अघि वाग्वतीले आफ्नो स्थानलाई पवित्र तुल्याउन र स्वयं भगवान् शिवलाई विधिपूर्वक स्नान गराउन भक्तिपूर्वक शिवजीको आराधना गरेकी थिइन्– 'हे देवेश ! मलाई रक्षा गर्नुहोस्, सधैँ मलाई पवित्र तुल्याउनुहोस् । हजुर यहाँ आई मेरो समीपमा विराजमान भइदिनुभएमा म संसारकै मान्य हुनेछु' । नित्य आराधिका वाग्वतीका यी वचन सुनेर भगवान् शङ्कर कार्तिकशुक्ल अष्टमीका दिन जलमा लिङ्गको रूप लिएर प्रकट हुनुभयो। त्यस अवसरमा जलको मध्यभागबाट प्रकट हुनुभएका भगवान् शङ्करले खुसी हुँदै वाग्वतीलाई वर दिनका लागि भन्न लाग्नुभयो ॥५–८॥

जलेश्वरले भन्नुभयो – हे देवी ! हे वाग्वती ! अब तिमी मसित जे वर माग्दछ्यौ माग, म सबै वर दिन्छु। हे वाग्वती ! पहिले नै देवता, देवर्षि र मैले पनि तिमीलाई वर दिइसकेका छौँ । अहिले पनि तिमी लोकमान्य र पापनाशक होऊ। हे प्रिय वाग्वती ! देवतासँगै रहेकी तिमीलाई मैले यो वरदान दिइसकेको भए पनि हे देवी ! तिमी फेरि वर माग, म अवश्य दिन्छु ॥९–११½॥

---

१. स, इति न.सं.पु.पाठः ।
२. प्रश्नञ्चकार, इति न.सं.पु.पाठः ।
३. संस्नापतुम्, इति न.सं.पु.पाठः ।
४. पवित्रितुं स्वतो स्थानम्, इति न.सं.पु.पाठः ।
५. तवागमनसम्भवात्, इति न.सं.पु.पाठः ।
६. मयि वरयसे यत्त्वम्, इति न.सं.पु.पाठः ।

वाग्वत्युवाच

सर्वं दत्तं पुरा मह्यं भवता त्रिदशर्षिभिः ॥१२॥

तथापि त्वत्तः याचेऽहं देवदेव ! वरं पुनः । सर्वैर्जलचरैः कीटैरसद्भिर्जन्तुभिस्तथा ॥१३॥

मे मूर्त्तिर्दूषिता नित्यञ्चाऽमेध्या कलुषीकृता । तद्दोषैर्दूषिता चाऽहममेध्यजीविनी सदा ॥१४॥

येन पूता भवामीश याचेऽहं तद्वरं त्वयि । मम जलान्तरे नित्यं स्थातव्यं भवताऽपि च ॥१५॥

स्नापयेऽहं भवन्तं वै मत्कल्लोलैः सदाऽर्च्चनैः । ततस्तवाऽर्चनैर्देव ! पूता जलमयी ह्यहम् ॥१६॥

भविष्यामि न सन्देहस्त्वत्प्रसादात् प्रभो सदा[७] ।

जलेश्वर उवाच

एवमस्तु महादेवि वाग्वति लोकपाविनि ॥१७॥

ददामि शृणु ते देवि वरं वरय चोत्तमम् । संस्नान्ति त्वयि यावन्तः प्राणिनः ज्ञानवर्जिताः ॥१८॥

गोरक्षनाथसिद्धोऽसौ योगेनात्र समाश्रितः। मत्स्येन्द्रेण समं नित्यञ्चौरङ्गिणा तथापरैः ॥५२॥

देवताहरूले ढुकुटीबाट झिकेको सुन–चाँदी प्रयोग गरेर राम्रोसित बनाएको हुँदा मुनिहरूका लागि पनि यो कोषोदक तीर्थ प्रिय बनेको छ। कोषोदक तीर्थ र यसको अगाडि रहेको नदीमा स्नान मात्रै गऱ्यो भने पनि सबै यज्ञ गरेको फल प्राप्त हुन्छ। जसले त्यस तीर्थमा स्नान गर्छ त्यो व्यक्ति पवित्र, दक्ष, सत्यवादी, जितेन्द्रिय र सम्पूर्ण पापबाट मुक्त हुन्छ, उसले देवस्वरूप नै प्राप्त गर्छ। यहाँ भएका तीर्थहरूमा गर्नुपर्ने विधि र स्नान गर्ने मानिसले ती तीर्थमा स्नान, दानादि गर्नाले प्राप्त हुने विशेष फलका बारेमा बताउँछु, सुन ॥४०–४३॥

आश्विनकृष्ण नवमीका दिन गौरीतीर्थको जलमा स्नान गर्नुपर्छ, कार्तिकशुक्ल पञ्चमीका दिन ब्रह्मोदयको जलमा स्नान गर्नुपर्छ। मार्गकृष्ण चतुर्दशीका दिन सुन्दरीजल तीर्थको जलमा र पौषशुक्ल अष्टमीका दिन शूलगङ्गाको जलमा नुहाउनुपर्छ। माघमासको शुक्लपक्षको सप्तमीतिथिमा ब्रह्मोदयतीर्थको जलमा र मार्गशीर्ष कृष्णपक्षको पशुयोनितीर्थमा स्नान गर्नुपर्दछ। चैत्रकृष्ण त्रयोदशीका दिन योगकुण्डमा स्नान गर्नुपर्छ र वैशाखकृष्ण अष्टमीका दिन स्तनकुण्डमा स्नान गर्नुपर्छ ॥४४–४७॥

ज्येष्ठकृष्ण षष्ठीका दिन ज्ञानी मानिसले सूर्यकुण्डमा स्नान गर्नुपर्छ। आषाढशुक्ल पूर्णिमाको दिन स्वर्णधारानदीको जलमा स्नान गर्नुपर्छ। श्रावणपूर्णिमाका दिन कोषोदकनामक तीर्थमा स्नान गर्नुपर्छ। त्यस्तै कार्तिककृष्ण चतुर्दशीका दिन गोखुरतीर्थमा स्नान गर्नुपर्छ। सङ्क्रान्ति अथवा भाद्रकृष्ण सप्तमीका दिन विधिपूर्वक अगस्त्यतीर्थमा स्नान गर्नुपर्छ। कार्तिकशुक्ल चतुर्दशी अथवा कार्तिककृष्ण चतुर्दशीका दिन मृगस्थलीस्थित ब्रह्मदीपनामक महातीर्थमा स्नान गरेर बत्ती दान गर्नुपर्दछ। मत्स्येन्द्रनाथ र चौरङ्गीनाथ आदि सिद्धहरूलाई साथमा लिएर सिद्ध गोरखनाथले अघि यसै ठाउँमा बसेर योगसाधना गरेका थिए ॥४८–५२॥

---

१९. तत्रैव स्नानमात्रेण सर्वमेधफलं लभेत्, इति न.सं.पु.पाठः।
२०. गौरीतीर्थे जलाप्लवेत्, इति न.सं.पु.पाठः।
२१. जलाप्लवेत्, इति न.सं.पु.पाठः।
२२. सुन्दरिकाजलाप्लवेत्, इति न.सं.पु.पाठः।
२३. शूलोद्गङ्गाजलाप्लवेत्, इति न.सं.पु.पाठः।
२४. जलाप्लवेत्, इति न.सं.पु.पाठः।
२५. जलाप्लवेत्, इति न.सं.पु.पाठः।
२६. तथाप्लवेत्, इति न.सं.पु.पाठः।
२७. प्रातोऽर्के स्नायते बुधः, इति न.सं.पु.पाठः।
२८. जलाप्लवेत्, इति न.सं.पु.पाठः।
२९. तथापरे, इति न.सं.पु.पाठः।
३०. दीपञ्च दीयते, इति न.सं.पु.पाठः।

तेषां योगश्च संसिद्धस्त्वत्र मृगस्थले द्विज । पशुपतेः प्रसादात्ते योगं प्रापुः समर्हितम्[३१] ॥५३॥
नानासिद्धगणैर्नित्यमत्रागत्य सुभक्तितः । प्रलब्धश्च[३२] महायोगो गोरक्षस्य प्रसादतः ॥५४॥
कार्त्तिकस्य चतुर्दश्यां कृष्णायां वीक्षिता बुधैः । सिद्धाश्रमश्च तत्पादौ निष्कल्मषौ[३३] न संशयः ॥५५॥
गोरक्षं संस्मरन् बुद्ध्या त्रिरात्रं यदि तिष्ठति[३४] । योगीश्वरो भवेदाशु सिद्धदेहो भवेत्सदा ॥५६॥
अत एव गरिष्ठञ्च ह्येतत्क्षेत्रं विरूपदृक् । सिद्धानामाश्रमः शश्वत्पशुपतेर्विहारभूः ॥५७॥
यो दद्यान्मे प्रिये क्षेत्रे विप्रायास्मिँश्च भोजनम् । सर्वयज्ञफलं तस्य मम लोके वसेन्मुदा ॥५८॥
इत्युक्तं खलु देवेभ्यो ज्योतीरूपेण शूलिना । मृगशृङ्गे धृते देवैर्यदाम्बरस्थितेन वै ॥५९॥
मार्गकृष्णचतुर्दश्यां शिवात्मा भक्तितो बुधः । स्नात्वारोहति वाग्वत्यामारभ्य शङ्करस्थलीम् ॥६०॥
मृगस्थलीगिरिं भ्रान्त्वा[३५] व्रीहिं विक्षिप्य यत्कृतम् । एकव्रीहिप्रदानं तत् सुवर्णरतिकाफलम्[३६] ॥६१॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति निश्चितम् । भ्रान्तवता[३७] मृगस्थल्यामित्युक्तं शूलिना पुरा ॥६२॥
किरातेशाभिधं लिङ्गं[३८] निशामेकां प्रसेव्यताम् । एतद्दर्शनमात्रेण पापमुक्तिर्भवेद् ध्रुवम्[३९] ॥६३॥

हे विरूपाक्ष ! तिनीहरूको योग यसै मृगस्थलीमा सिद्ध भयो । भगवान् पशुपतिको अनुग्रहले गर्दा उनीहरूले उत्तम योग प्राप्त गरेका थिए ॥५३॥ गोरक्षनाथका अनुकम्पाले गर्दा विभिन्न किसिमका सिद्धहरूले यहाँ आएर भक्तिपूर्वक उत्कृष्ट योगहरू प्राप्त गरेका थिए ॥५४॥ कार्तिककृष्ण चतुर्दशीका दिन जुन ज्ञानी मानिसहरूले यो सिद्धाश्रम र सिद्धका पाउको दर्शन गर्छन्, तिनीहरू पापबाट मुक्त हुन्छन्, यसमा शङ्का छैन ॥५५॥ जसले यहाँ गोरखनाथलाई मनमा सम्झिएर तीन रातसम्म बस्छ, त्यो चाँडै योगीश्वर हुन्छ र सधैँको लागि त्यसको शरीर सिद्ध हुन्छ ॥५६॥

हे विरूपाक्ष ! यसै कारणले यो क्षेत्र महत्त्वपूर्ण भएको छ, सिद्धहरूको आश्रम बनेको छ र पशुपतिको पनि क्रीडास्थल बनेको छ ॥५७॥ मेरो यस प्यारो क्षेत्रमा जसले ब्राह्मणलाई भोजन गराउँछ, त्यसलाई सबै यज्ञको फल प्राप्त हुन्छ, त्यो प्रसन्न भएर मेरै लोकमा बस्न पाउँछ ॥५८॥ देवताहरूको वासस्थान भएको मृगस्थलीमा आकाशमा रहेका त्रिशूलधारी शिवले बताउनुभयो । ज्ञानी मानिसले शिवजीलाई भक्तिका साथ मनमा राखेर कृष्णचतुर्दशीका दिन वाग्वतीमा स्नान गरी शङ्करस्थलीदेखि सुरु गरेर पर्वतमा चढ्यो भने मृगस्थली पहाडलाई घुमेर धान छर्‍यो भने एक–एक गेडा बराबर एक रति सुन उसले पाउँछ ॥५९–६०॥

मृगस्थली पर्वतमा घुमेर जुन शतबीज छरिन्छ, त्यो सबै प्रतिबीज एक रति बराबर सुन हुन्छ। अघि शिवजीले मृगस्थलीको परिक्रमा गर्ने क्रममा मृगस्थलीमा भ्रमण गर्ने व्यक्तिले पाइलैपिच्छे अश्वमेध यज्ञ गरेको फल अवश्य पाउँछ भनेर भन्नुभएको थियो । हे विरूपाक्ष ! भगवान् किरातेश्वरको यस लिङ्गलाई एक रात बसेर आराधना गर । यसको दर्शनले मात्रै पनि मानिस विभिन्न किसिमका पापबाट मुक्त हुन्छ ॥६१–६३॥

---

३१. प्राप्नुयुरर्हणम्, इति न.सं.पु.पाठः ।
३२. प्रलब्धस्तैः, इति न.सं.पु.पाठः ।
३३. निष्पापास्ते, इति न.सं.पु.पाठः ।
३४. त्रिरात्रं वसते तत्र तं गोरक्षं स्मरन्धिया, इति न.सं.पु.पाठः ।
३५. भ्राम्य, इति न.सं.पु.पाठः ।
३६. सुवर्णरत्तिकातुल्यं व्रीहिमेकञ्च तत्फलम्, इति न.सं.पु.पाठः ।
३७. भ्राम्यमाणे, इति न.सं.पु.पाठः ।
३८. एतल्लिङ्गं किरातेशम्, इति न.सं.पु.पाठः ।
३९. नानापापैः प्रमुच्यते, इति न.सं.पु.पाठः ।

ये शृण्वन्ति निखिलमलहरं पूतमध्यायमेतत् सिद्धस्थल्याः खलु पशुपतेः दिव्यक्रीडाचलायाः[४०]।
श्रीमत्पुण्याः श्रवणनिरताः स्नानदानोद्भवानि ते प्राप्नुयुः प्रसभमखिलं तत्फलान्यार्य ! तस्याम् ॥६४॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां मृगस्थलीमाहात्म्यं नाम चतुःपञ्चाशदुत्तरशततमोऽध्यायः ॥१५४॥

हे विरूपाक्ष ! सिद्धस्थलीमा भगवान् शङ्करले क्रीडा गर्नुभएको पवित्र प्रसङ्गसँग यो अध्याय जसले सुन्छन्, तिनीहरूले कथाश्रवण, स्नान, दान इत्यादि धर्मकार्यमा संलग्न व्यक्तिहरूले प्राप्त गर्ने सबै फल पाउँछन् ॥६४॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा मृगस्थलीको माहात्म्यनामक
एकसय चौवन्नौं अध्याय पूरा भयो ।

---

४०. क्रीडमानाचलायाः, इति न.सं.पु.पाठः ।

पञ्चपञ्चाशदुत्तरशततमोऽध्यायः

किरातेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

वैशाखस्यासिताष्टम्यामेतल्लिङ्गं पुनर्मुदा। रुद्रसहस्रतीर्थेषु स्नात्वाऽपूपुजदादृतः ॥१॥

किरातेशस्य माहात्म्यं पप्रच्छ नेमुनिं पुनः। अभ्यर्च्य निशि लिङ्गं स भक्त्या प्रणतचेतसा ॥२॥

आकर्ण्य तद्वचोऽगस्त्य ! विनयेनोदितं मुनिः। व्याजहार शुभं वाक्यं तन्माहात्म्यं स्वसेवकम्[1] ॥३॥

सिद्धर्षिरुवाच

आसीत्पुरार्य संवादः कैलाशे शिखरोत्तमे। देवीशङ्करयोः सार्धं ब्रह्मविष्णुगुहैः शुभः ॥४॥

प्रोक्तवाँश्च शिवो देव्यै देवेभ्यश्चाऽञ्जसा वचः। संसृष्टञ्च जगत्पूर्वं द्वन्द्वैः पञ्चात्मकैरिति ॥५॥

व्याजहार सभामध्ये ब्रह्माशु वचनं शुभम्। देव्या मुखं समालोक्य तद्‌गौरवं प्रकाशयन् ॥६॥

ब्रह्मोवाच।

देवीं विना हरे ! स्कन्द ! चरित्रं शङ्करस्य च। त्रिषु जगत्सु गुप्तस्य वेत्ता कोऽपि न विद्यते ॥७॥

विमुह्य त्वां पुरा विष्णो ! देवी त्वन्नेत्रयोः स्थिता[2]। योगरूपा महामाया सा चेयञ्ज्ञायतामिह ॥८॥

रुद्रोऽपि मोहितोऽजस्रं यया स शक्तिरूपया[3]। क्षुद्राशाश्च वयं किं भो नमस्तुभ्यं नमोऽम्बिके ॥९॥

अध्याय – १५५

किरातेश्वर शिवलिङ्गको माहात्म्य

कार्तिक स्वामीले भन्नुभयो – विरूपाक्षले श्रद्धापूर्वक वैशाखकृष्ण अष्टमीका दिन रुद्रसहस्र तीर्थमा स्नान गरेर प्रसन्न हुँदै किरातेश्वर लिङ्गको पूजा गरे। त्यसपछि रातमा नम्र भएर भक्तिपूर्वक त्यस लिङ्गको आराधना गरेर विरूपाक्षले नेमुनिसित किरातेश्वर भगवान्‌को माहात्म्य सोधे। विनयपूर्वक विरूपाक्षद्वारा सोधिएको प्रश्न सुनेर नेमुनिले आफ्ना भक्त उनलाई किरातेश्वरको कल्याणमय माहात्म्य सुनाए ॥१–३॥

सिद्धऋषिले भने – पहिलेको समयमा कैलाश पर्वतको श्रेष्ठ शिखरमा देवी, शङ्कर, ब्रह्मा, विष्णु र कार्तिक स्वामीका बीच मङ्गलमय संवाद भएको थियो। देवी र देवताहरूद्वारा सृष्टिप्रपञ्चको उत्पत्तिको विषयलाई लिएर शिवजीका समक्ष प्रश्न गरिएपछि भगवान् शिवले सबैलाई लक्षित गरी पञ्चमहाभूतबाट बनेका नारी र पुरुषहरूको मैथुनधर्मबाट सृष्टिप्रपञ्चको विस्तार भएको कुरा बताउनुभयो। हे विरूपाक्ष ! त्यस सभामा पार्वतीको मुख हेर्दै ब्रह्माजीले सुन्दर वाक्यमा तिनीहरूको माहात्म्य बताउनुभयो ॥४–६॥

ब्रह्माले भन्नुभयो – हे हरि ! हे कार्तिक स्वामी ! शङ्करको चरित्र तीनै लोकमा गुप्त भएको हुँदा उहाँहरूको चरित्र जान्ने देवी पार्वतीमात्र हुनुहुन्छ, अरू कोही पनि छैन। हे विष्णु ! पहिले जसले तपाईंको आँखालाई मुग्ध बनाउनुभयो, ती योगस्वरूपा माया यहाँ नै हुनुहुन्छ भनेर जान्नुहोस्। हे अम्बिके ! जुन शक्तिरूपा हजुरबाट स्वयं महादेव पनि प्रतिक्षण मुग्ध हुनुभएको थियो भने हामीजस्ता क्षुद्रको त के कुरा ! त्यस्ती हजुरलाई नमस्कार छ ॥७–९॥

---

१. स्वभक्तिने, इति न.सं.पु.पाठः।
२. नेत्रे चासीत्तवार्ययोः, इति न.सं.पु.पाठः।
३. शक्तिरूपेण वै यया, इति न.सं.पु.पाठः।

सिद्धर्षिरुवाच

भाषमाणे[४] विधावेव प्रोत्फुल्ललोचना तदा। ईषज्जहास शर्वाणी निरीक्ष्य शङ्करानननम् ॥१०॥
ततोऽब्रवीत्तदा शम्भुः स्कन्दाय वचनं द्रुतम्। अन्तः कोपं समाधाय देव्या हास्योदयोद्भवम् ॥११॥
स्कन्द ! रक्षार्य मे स्थानं त्वञ्च[५] बाहुबलैः सदा। इत्युक्त्वाऽन्तर्दधे शम्भुः ताश्च विमोहयन्[६] ध्रुवम् ॥१२॥
वेषं दधार रुद्रोऽसौ किराततरूपमत्र च। पुण्ये श्लेष्मान्तकारण्ये मोहयितुं जगत्प्रभुः[७] ॥१३॥
प्रबद्धजूटिका दीर्घा ललाटान्ते च रज्जुना। वराटकैश्च केशान्ते सङ्ग्रथ्य भूषयन् प्रभुः[८] ॥१४॥
प्रान्ते तदधरोष्ठस्य मसीविभूषितोत्तमम्। चर्चितं हरितालेन[९] वन्यपुष्पस्रजोत्तमम् ॥१५॥
गुञ्जावतंसकर्णान्तं रुद्रकिराततरूपिणम्। मयूरपक्षभूषाढ्यं लतापुष्पाभिशोभितम् ॥१६॥
वल्कलकञ्चुकं शम्भुं सत्काष्ठवलयाङ्गदम्[१०]। द्रुवल्कलपरिधानं[११] गुञ्जास्तवकभूषणम् ॥१७॥

तीक्ष्णं बाणं बकवरगरुत्सक्तभूषासुपुङ्खं
हस्ताब्जेन प्रवरगुणयुक्कार्मुकं धारयन्तम्।
आलोक्यं तं सुशरमपरं शुभ्रदन्तैः सकोपं
कक्षे तूणं जठरपटले कर्त्रिकां धारयन्तम् ॥१८॥

नेमुनिले भन्नुभयो – ब्रह्माजीले यति भनेपछि प्रफुल्ल लोचना भगवती पार्वती भगवान् शङ्करको मुख हेरेर मुसुमुसु हाँस्नुभयो। देवी पर्वतीले मेरो उपहास गरेर हाँसेकी हुन् भन्ने बुझेका भगवान् शङ्करले उपहासबाट उत्पन्न रीसलाई भित्रभित्रै शमन गरेर तुरुन्तै कार्तिक स्वामीलाई भन्नुभयो –हे पुत्र कार्तिकेय ! तिमी आफ्नो बाहुबलद्वारा मेरो यस स्थानको रक्षा गर। यति भन्दै सबै देवताहरूलाई मोहमा डुबाउँदै भगवान् शम्भु अन्तर्धान हुनुभयो ॥१०–१२॥

यसरी अन्तर्धान भएपछि संसारका स्वामी भगवान् शङ्करले पवित्र श्लेष्मान्तक वनमा गएर सम्पूर्ण संसारलाई मोहित तुल्याउन किरातको भेष र रूप धारण गर्नुभयो। उहाँले डोरीले निधारको छेउमा लामो जुरो बाँध्नुभएको थियो। कपालका टुप्पामा कौडीहरू राखेर जुरो बाँधी सिँगार्नुभएको थियो। उहाँले तल्लो ओठको छेउमा मसीले सिँगार्नुभएको थियो भने हरितालले गर्दा तेजस्वी भएका जङ्गली फूलको उत्तम माला लगाउनुभएको थियो ॥१३–१५॥

किरातको रूप लिने भगवान् शङ्करले कानसम्म पुग्नेगरी रातिगेडी लगाउनुका साथै मयूरका प्वाँखको गहना धारण गर्नुभएको थियो। लहरा र फूलले गर्दा उहाँ अत्यन्त सुन्दर देखिनुहुन्थ्यो। बोक्राको कोट लगाउनुभएका उहाँले काठको बाला र बाजु लगाउनुभएको थियो। यसरी बोक्रा पहिरन बनाउनुभएका उहाँका गहना रातिगेडीको झुप्पा बनेका थिए। बकुल्लाको प्वाँखले अलङ्कृत पङ्ख भएको तीखो बाणलाई करकमलमा धारण गर्नुभएको थियो। प्वाँख, तीखो बाण, असल ताँदो लगाएको धनुषलाई कमलजस्ता हातमा लिनुभएको थियो। अर्को बाण, ठोक्रो र छुरी काखीमा बेस्सरी कसिने गरी राख्नुभएका उहाँ सेता दाँत देखाएर रिसाएको मुद्रामा रहनुभएको थियो ॥१६–१८॥

---

४. प्रोक्तमाने, इति न.सं.पु.पाठः।
५. स्थाने तव, इति न.सं.पु.पाठः।
६. तस्मै तेषां विमोहितम्, इति न.सं.पु.पाठः।
७. जगत्सर्वं विमोहितुम्, इति न.सं.पु.पाठः।
८. तद्ग्रन्थनैर्विभूषयन्, इति न.सं.पु.पाठः।
९. हरितालेन चच्चिक्यम्, इति न.सं.पु.पाठः।
१०. काष्ठेन वलयाङ्गदम्, इति न.सं.पु.पाठः।
११. वल्कलं परिधानञ्च, इति न.सं.पु.पाठः।

ॐ नीवारं तत् भुजयुगगतं भुक्तवन्तं च दोष्णा[१२]
म्लेच्छैरन्यैस्तदनुगमनैः सेव्यमानं किरातैः ।
मुष्ट्या मुष्ट्या ह्यसकृदुचितं सेवकेभ्यो ददानं[१३]
कुक्ष्यालम्बप्रवरवसनं शङ्करं को हि विद्यात्[१४] ॥१९॥
म्लेच्छैः सार्द्धं खलु मृगगणान् मारयन्तञ्च नित्यं[१५]
बाणैरेतद्वनविचरणं म्लेच्छरूपं महेशम्[१६] ।
तेभ्यो भूयो मृगसुपललं भागधेयं ददानं[१७]
भक्तान् धर्तुं विपिनविचरान् तान् पशून् मारयन्तम्[१८] ॥२०॥
अचीक्रिडन्मुदाऽत्रैवं किरातैः सह कानने । सहस्राब्दञ्च दिव्यानां किरातरूपधृक् विभुः ॥२१॥
तस्मिन्काले च सा देवी ज्ञातवती ततः पुनः । चरित्रं खलु रुद्रस्य तद्रूपं धर्त्तुमिच्छती ॥२२॥
ब्रह्महरिकुमारैश्च[१९] गिरौ संवदती च सा । अत्राययौ हि सन्त्यज्य भवानी सहसा च तान् ॥२३॥
सापि किरातिनीरूपं साक्षाद्दधार चात्र वै । मोहयन्ती महादेवं[२०] जगत्सर्वञ्चराचरम् ॥२४॥
यथा किरातिनीनां सा चेष्टामाधाय चाऽत्र वै । यावत्कलां समन्ताभिरचीक्रिडद्यथासुखम् ॥२५॥
कार्त्तिकस्य चतुर्दश्यां कृष्णायाञ्चाऽत्र शङ्करः । लिङ्गं स्थापितवानेतत्किरातरूपधृक् मुदा ॥२६॥
अगोचरोऽत्र सत्त्वानामवात्सीच्छङ्करो रहः । किरातरूपधृग्रात्रौ चैतल्लिङ्गं प्रपूजयन्[२१] ॥२७॥

हातमा नाभो धान लिएर खाँदै गरेका किरातरूपधारी शिवजीका पछिपछि म्लेच्छ र किरातहरू लागेका थिए । उहाँले मुठीले त्यो अन्नको भाग तिनीहरूलाई बाँड्नुभएको थियो । कोखामा झण्डिएका उत्कृष्ट वस्त्रले गर्दा किरातरूप भगवान्लाई उहाँ नै गवान् शङ्कर हुनुहुन्छ भनेर चिन्ने कोही थिएन । ती म्लेच्छहरूलाई साथमा लिएर छिर्येछिर्ये हिँड्ने किरातरूपधारी शिवजीले थुप्रै मृगहरूलाई मार्नुभयो र मासुलाई भाग लगाएर तिनीहरूमा बाँडिदिनुभयो । तिनीहरूको पापनाश गर्नकै लागि महादेवले ती भक्त पशुहरूलाई मार्नुभएको थियो ॥१९–२०॥

यसरी किरातको रूप लिने भगवान् महादेवले किरातिनीहरूसँग मिलेर यस जङ्गलमा हजार वर्षसम्म क्रीडा गर्नुभयो । त्यसपछि पार्वतीले पनि महादेवको त्यो चरित्र थाहा पाउनुभयो र उहाँले पनि किरातिनीको रूप धारण गर्ने विचार गर्नुभयो । ब्रह्मा, विष्णु र कार्तिक स्वामीसँग कैलाश पर्वतमा बसेर कुराकानी गरिरहनुभएकी भगवती पार्वती उनीहरूलाई त्यसै ठाउँमा छाडेर अकस्मात् किरातरूप शिव भएका ठाउँमा आउनुभयो । पार्वतीले पनि सम्पूर्ण संसार र स्वयं महादेवलाई नै मोहित तुल्याउन प्रत्यक्ष किरातिनीको रूप धारण गर्नुभयो ॥२१–२४॥

किरातिनीहरूको जस्तो चेष्ट्या हुन्छ, पार्वतीले पनि त्यस्तै क्रियाकलाप गरेर यस ठाउँमा चारैतिर घुमी सुखपूर्वक क्रीडा गर्नुभयो । कार्तिक कृष्ण चतुर्दशीका दिन किरातरूपधारी भगवान् शङ्करले यस ठाउँमा एउटा लिङ्ग स्थापना गर्नुभयो । प्राणीहरूद्वारा अगोचर भई एकान्तमा वास गर्नुहुने किरातरूपधारी भगवान् शङ्कर रातमा यस लिङ्गको आराधना गर्दै बस्नुहुन्थ्यो ॥२५–२७॥

---

१२. नीवारान्नं स खलु बुभुजे मुष्टिनादाय दोष्णा, इति न.सं.पु.पाठः ।
१३. मुष्टिं मुष्टिं ह्यसकृदुचितं दास्यतेभ्यो यथा वै, इति न.सं.पु.पाठः ।
१४. कुक्ष्यालम्बप्रवर वसनाद्गम्यमानो विदूरात्, इति न.सं.पु.पाठः ।
१५. मृगगणान्वैर्जघानाशु नित्यम्, इति न.सं.पु.पाठः ।
१६. वाणैरेतद्विपिनचरतो म्लेच्छरूपो महेशः, इति न.सं.पु.पाठः ।
१७. तद्ददौ भागधेयम्, इति न.सं.पु.पाठः ।
१८. तान्प्रोद्धर्तुं वृजिनचरतान्संभृताञ्वाहनत्सः, इति न.सं.पु.पाठः ।
१९. ब्रह्मणि च हरौ स्कन्दे गिरौ संवदति सति, इति न.सं.पु.पाठः ।
२०. संमोहयन्महादेवम्, इति न.सं.पु.पाठः ।
२१. प्रसेवयन्, इति न.सं.पु.पाठः ।

तिरस्करीञ्च निःक्षिप्य रुद्रस्याऽगोचराय च[२२]। रुद्रचरित्रमार्या सा ज्ञातवती तदैव हि ॥२८॥
एतल्लिङ्गं मुदा भक्त्या देवी किरातिनी च सा। पूजति स्मोपचारैश्च वन्यपुष्पैर्जलैः सदा ॥२९॥
लिङ्गं सम्पूज्य सा देवी क्रीडन्ती सखीभिः सह। अवसाने ततो लिङ्गं ददर्श पूजितं विभुः ॥३०॥
महारहःस्थले चाऽस्मिन्नेतत्प्रपूजितं हि कैः। अगोचरे च सत्त्वानां मयि संरक्षके सति ॥३१॥
एवञ्चिन्ताकुलो रुद्रो द्रष्टुं तत्पूजकं जनम्[२३]। गूढरूपः पुरस्तस्थौ चाच्छाद्य मायया तनुम् ॥३२॥
विद्यमानेऽपि तस्मिन्सा लिङ्गपूजां व्यधात् पुनः[२४]। दृष्टवान् भगवान् शम्भुर्लिङ्गपूजारताञ्च ताम्[२५] ॥३३॥
एवमेव मिथस्तस्थौ मोहयन्तौ रहःस्थितौ। दिव्यानां वत्सरं यातं सहस्रञ्च विरूपदृक् ॥३४॥
ब्रह्मविष्णुमुखा देवाश्चाऽभूवँश्च सुदुःखिताः। न प्रेक्ष्य शङ्करं देवीं जगत्क्षोभमभूद् भृशम् ॥३५॥

विष्णुरुवाच

सर्वत्र मार्गमाणास्तं वयञ्च क्षीणतां गताः[२६]। पश्यामो नैव[२७] कुत्रापि चार्यारुद्रौ पितामह ॥३६॥
शङ्कितोऽस्मि महादेवः सिद्धारण्ये तपोवने। मृगरूपेण पूर्वेऽस्मिन्नचीक्रिडद्धि यत्र वै ॥३७॥

सिद्धर्षिरुवाच

आकर्ण्य वचनं विष्णोः साधु साध्विति चाऽवदन्। ब्रह्मपुरोगमा देवाः सहर्षमाययुर्द्विज ! ॥३८॥
हा तात शिव हा देवि ![२८] मातर्भवानि निर्जराः। इत्युक्त्वा मार्गयन्ति स्म क्षेत्रे नैपालके शिवम् ॥३९॥

किरातिनीको रूप धारण गरेकी भगवती पार्वतीले पनि आफूलाई नचिनाउने गरी पर्दाभित्र रहेर शिवजीको सबै चरित्र थाहा पाउनुभयो। किरातिनीस्वरूपा भगवतीले अत्यन्त प्रसन्न भएर वनमा फुलेका फूल र जलसहितका पूजासामग्रीले यस लिङ्गको नित्य पूजा, आराधना गर्नुभयो। भगवती पार्वती यस लिङ्गको अर्चना गरेर आफ्ना सङ्गिनीहरूका साथ खेल्न जानुहुन्थ्यो। कुनै दिन भगवान् शङ्करले पहिले नै कसैले यस लिङ्गको पूजा गरिसकेको देख्नुभयो। मेरो संरक्षकत्वमा रहेको, कुनै प्राणीले पनि देख्न नसक्ने, एकान्तमा रहेको यस लिङ्गलाई कसले पूजा गर्‍यो ? यस्तो विचार गरेर त्यस लिङ्गको पूजक व्यक्ति पत्ता लगाउन मायाद्वारा आफ्नो शरीरलाई अदृश्य बनाएर भगवान् यसै ठाउँमा बस्नुभयो ॥२८-३२॥

शिवजी एक दिन त्यहाँ बसिरहेको बेलामा पार्वती आएर शिवलिङ्गको पूजा गर्नुभयो। शिवजीले पनि शिवलिङ्गको पूजा गर्ने ती किरातिनीलाई देख्नुभयो। हे विरूपाक्ष ! यसैगरी एकान्तमा बसेर परस्पर मोहित गराउँदै किरातरूपधारी शिवजी र किरातिनी पार्वती दिव्य एक हजार वर्षसम्म त्यहाँ बस्नुभयो। भगवान् शङ्कर र पार्वतीलाई नदेखेर ब्रह्मा, विष्णु आदि गरिएका देवताहरू अत्यन्त दुःखी भए भने संसारमा पनि ठूलो खैलाबैला मच्चियो ॥३३-३५॥

विष्णुले भन्नुभयो - हे ब्रह्माजी ! हामीले संसारभर डुलेर भगवान् शङ्करलाई खोज्दा-खोज्दा थाकिसक्यौं। पार्वती र भगवान् रुद्रलाई हामीले कहीँ पनि देखेनौं। मलाई शङ्का लागेको छ कि भगवान् महादेव मृगको रूप लिएर सिद्धहरू बस्ने तपोवनमा क्रीडा गर्न जानुभएको हुन सक्छ किनकि पूर्वकल्पमा पनि उहाँले यसरी नै क्रीडा गर्नुभएको थियो ॥३६-३७॥

नेमुनिले भन्नुभयो - हे विरूपाक्ष ! विष्णुको यस्तो कुरा सुनेपछि उहाँको भनाइ सही हो भन्दै ब्रह्मा आदि देवताहरू सहर्ष यहाँ आए। देवताहरूले हे पिता ! हे शङ्कर ! हे माता भवानी ! भन्दै नेपालको सिद्धारण्यक्षेत्रमा भगवान् शिवजीलाई खोज्न लागे ॥३८-३९॥

---

२२. रुद्रस्यागोचरं यथा, इति न.सं.पु.पाठः।
२३. रुद्रस्तत्पूजकं प्रदर्शितुम्, इति न.सं.पु.पाठः।
२४. लिङ्गं प्रपूजिता सती, इति न.सं.पु.पाठः।
२५. दृष्टवानभवच्छम्भुर्लिङ्गप्रपूजकाञ्च ताम्, इति न.सं.पु.पाठः।
२६. सर्वत्र मार्गमाणाश्च वयं क्षीणा भवामहे, इति न.सं.पु.पाठः।
२७. द्रक्ष्यामहे न, इति न.सं.पु.पाठः।
२८. शङ्करेशार्ये, इति न.सं.पु.पाठः।

शङ्करौ प्रेक्ष्यमाणास्ते ततश्चाऽत्र समागमन्। गुह्याख्यां वन्दयामासुर्भवानीं शिवसंयुताम् ॥४०॥
मातर्देवि नमस्तुभ्यं त्वद्रूपञ्च शिवञ्च नः। प्रदर्शयाधुना देवि खिन्नाःस्मोऽन्वेषणे हरम् ॥४१॥
प्रजेपुस्तुष्टुवुर्भक्त्या गुह्येश्वरीं ततोऽमराः। षण्मासञ्च दिवारात्रौ व्याप्य च त्रिविधैर्मुदा ॥४२॥
ईषे शुक्लनवम्यां सा चाविर्भूता महानिशि। प्रोवाच वचनं तेभ्यो वरं दातुञ्च गह्वरात् ॥४३॥
भो ब्रह्मन्नमरा विष्णो रुद्रं किरातरूपिणम्। अत ऊर्ध्वं मम क्षेत्रे पश्यत माञ्च तादृशीम् ॥४४॥
क्रीडारतं[२९] किरातैस्तै सार्द्धं तत्र सुखं सुराः। किरातिनीं जनैः सार्धं क्रीडन्तीं माञ्च द्रक्ष्यथ[३०] ॥४५॥
इत्युक्त्वान्तर्दधे देवी ज्योतिरूपा च गह्वरे। श्रुत्वा तद्वचनं देवैः सत्यमिति प्रमाणितम् ॥४६॥
तेऽपि प्रणम्य तां सद्यः समारोहन् तपोवनम्। हरं द्रष्टुं यथापूर्वं पङ्क्तिबद्धाः क्रमेण वै ॥४७॥
एतल्लिङ्गान्तिके रुद्रं किरातरूपिणं मुदा। किरातानाञ्च मध्यस्थं ददृशुस्तेऽत्र कानने[३१] ॥४८॥
चर्वयन्तं नीवारान्नं किरातैः सह शङ्करम्। किरातरूपिणं त्र्यक्षमद्राक्षुस्ते धनुर्धरम् ॥४९॥
रक्षणाय च लोकानां व्यक्तीकृत्य किरातिनीम्। तद्रूपेणात्र देवी च देवान्तिके समाययौ[३२] ॥५०॥
उपचारैर्यथा नित्यं किरातरूपिणी पुनः। पश्यन्ती च शिवं साक्षाल्लिङ्गमेतदपूपुजत्[३३] ॥५१॥

पार्वती र शङ्करको खोजी गरिरहेका विष्णुसहितका देवताहरू यसै सिद्धक्षेत्रमा आए। उनीहरूले शिवजी र उहाँसँगै रहनुभएकी गुह्यकाली भवानीलाई देखेर सादर प्रणाम गरे र स्तुति गर्न लागे – हे माता ! हे देवी ! हजुरलाई नमस्कार छ। हजुरको रूप धारण गर्ने शिवजीलाई पनि हाम्रो नमस्कार छ। हे देवी ! हामी शिवजीलाई खोज्दा खोज्दा हैरान भइसक्यौं। अब उहाँको दर्शन गराइदिनुहोस्। यसरी भक्तिपूर्वक देवताहरूले दिनरात तीनै किसिमले प्रसन्न हुँदै भगवती गुह्येश्वरीको मन्त्र जपे र स्तुति गरे ॥४०–४२॥

आश्विनशुक्ल नवमीका दिन राति गुफाबाट देवताहरूलाई वर दिनका निमित्त भगवती प्रकट हुनुभयो र उनीहरूलाई भन्नुभयो – हे ब्रह्मा ! हे विष्णु ! हे देवता हो! किरातको रूप लिएर बस्ने भगवान् रुद्र र किरातिनीको रूपमा रहेकी मलाई यसभन्दा माथिल्लो क्षेत्रमा हेर। हे देवता हो ! किरातहरूका साथ निर्जन स्थलमा आनन्दपूर्वक क्रीडा गरिरहनुभएका भगवान् शङ्कर र किरात अनि किरातिनीहरूका साथमा क्रीडा गरिरहेकी मलाई पनि त्यसै स्थानमा देख्नेछौ ॥४३–४५॥

यति भनेर ज्योतिःस्वरूपा भगवती गुफाभित्र पस्नुभयो। उहाँको वचन सुनेर देवताहरूले त्यस कुरालाई सत्य माने। त्यसपछि देवताहरू उहाँलाई नमस्कार गरेर भगवान् शङ्करलाई हेर्नका निमित्त पङ्तिबद्ध हुँदै क्रमशः तपोवनमा आरोहण गरे। त्यहाँ पुगेपछि भगवान् शङ्करको लिङ्गको नजिकै किरातहरूको बीचमा प्रसन्न भएर बस्नुभएका किरातरूपधारी भगवान् शङ्करलाई उनीहरूले देखे ॥४६–४८॥

भगवान् शङ्कर किरातहरूका साथ सामाधान चपाइरहनुभएको थियो। देवताहरूले तीनवटा आँखा भएका र धनुष धारण गर्नुभएका किरातस्वरूप भगवान्लाई देखे। संसारको रक्षाका निम्ति किरातिनीको रूप सृजना गरी त्यही रूप लिएर भगवती फेरि त्यहीँ देवताहरूका समीपमा आउनुभयो। किरातरूपधारिणी पार्वतीले जसरी सधैं विभिन्न पूजासामग्री लिएर लिङ्गको पूजा गर्नुहुन्थ्यो, त्यसैगरी लिङ्गको पूजा गरेपछि साक्षात् शिवजीको दर्शन पाउनुभयो ॥४९–५१॥

---

२९. क्रीडयन्तम्, इति न.सं.पु.पाठः।
३०. सार्द्धं किरातभिरस्मिन् विरहिते जनैः, इति न.सं.पु.पाठः।
३१. वै वने, इति न.सं.पु.पाठः।
३२. इहाययौ तदा पुनः, इति न.सं.पु.पाठः।
३३. दर्शयन् स्वं शिवं साक्षातेदल्लिङ्गमपूपुजत्, इति न.सं.पु.पाठः।

उत्थाय स्वासनात् रुद्रो मधुरयँश्च मानयन्[३४] । आनीय स्वान्तिके देवीं स्वासनमुपवेशयत् ॥५२॥
ततश्चाऽलिङ्ग्य रुद्रोऽसौ देवीं किरातरूपिणीम् । व्याचष्ट वचनं प्रीत्या तस्यै स्मिताननो हरः ॥५३॥

किरात उवाच

अनेन ब्रह्मणा शैले सत्यमुक्तं पुरा च नः । सर्वज्ञोऽपि ह्यहं देवि मायया ते[३५] विमोहितः ॥५४॥
सर्वेशशब्दरूढोऽपि तव मायाविमोहितः । त्वत्प्रसादादहं वेद्मि[३६] देवि त्वां तमसः पराम् ॥५५॥

सिद्धर्षिरुवाच

समाकर्ण्य वचो देवी रुद्रमुखाच्च्युतं पुनः । व्याजहार वचो रुद्रं कैलासगतिहेतुकम् ॥५६॥

देव्युवाच

भवता नैव वक्तव्यं लोकवन्द्येन शङ्कर । त्वत्प्रसादान्मया लब्धः सुवरो वाञ्छितः पुरा ॥५७॥
बहुकालञ्च नैवात्र स्थातव्यं भवताऽधुना । मयैव हि रहःस्थाने तपोवनोत्तमे प्रभो ॥५८॥

किरात उवाच

नाऽहं समुत्सहे देवि त्यक्तुमेतत्स्थलं पुनः । कञ्चित्कालं मुदा प्रीत्या क्रीडावोऽत्र[३७] यथासुखम् ॥५९॥
वैशाल्यधिपतिर्यावन्नात्रागमिष्यति प्रिये[३८] । क्रीडावस्तावदत्रैव[३९] रूपेणाऽनेन वै सुखम् ॥६०॥
ब्रह्मन् विष्णोऽमराः शक्र यूयं क्रीडत कानने[४०] । किरातवेषमाधाय सहस्राब्दं मया सह ॥६१॥

भगवान् शङ्करले पनि आफ्नो आसनबाट उठेर मीठो बोली बोल्दै बडो आदरका साथ पार्वतीलाई नजिकै ल्याएर आफूसँगै रहेको आसनमा राख्नुभयो । त्यसपछि भगवान् शङ्करले किरातरूपिणी पार्वतीलाई प्रेमपूर्वक आलिङ्गन गरेर मुसुक्क हाँस्दै भन्न लाग्नुभयो ॥५२-५३॥

किरातरूपधारी भगवान्‌ले भन्नुभयो – हे देवी ! ब्रह्माले पहिले कैलाशपर्वतमा हामीलाई साँच्चै भनेका थिए- म सर्वज्ञ छु, तर मायाबाट मोहित हुन्छु। सर्वेश शब्द ममा रूढ छ, तैपनि तिम्रो मायाबाट मैले मोहित हुनुपरेको छ। यो कुरा तिम्रै कृपाले गर्दा मैले थाहा पाएँ। हे देवी ! तिमी अन्धकारभन्दा पनि पर रहेकी ज्योतिःस्वरूपा हौ ॥५४-५५॥

नेमुनिले भन्नुभयो – भगवान् शङ्करको मुखबाट निस्किएको यस्तो वचन सुनेर पार्वतीले पुनः कैलासप्राप्तिको हेतुस्वरूप यी वचन भगवान् शङ्करलाई भन्न लाग्नुभयो ॥५६॥

भगवतीले भन्नुभयो – संसारका वन्दनीय हजुरले यो कुरा भन्न सुहाउँदैन । अघि हजुरकै अनुग्रहबाट मैले इच्छा गरेको यस्तो किसिमको वर पाएकी थिएँ। हे प्रभो ! उत्तम तपोवनको यस एकान्तस्थलमा धेरै समयसम्म हजुरले र मैले पनि बस्नु ठीक हुँदैन ॥५७-५८॥

किरातरूपधारी भगवान्‌ले भन्नुभयो – हे देवी ! यो ठाउँ छाड्न मलाई पटक्कै मन छैन । केही समयसम्म आनन्दसित यस ठाउँमा हामी फेरि पनि क्रीडा गरौँ। वैशालीका अधिपति लिच्छविराजा जबसम्म यस ठाउँमा आउँदैनन् तबसम्म हामी यसै रूपले यहाँ क्रीडा गरौँ। हे ब्रह्मा ! हे विष्णु ! हे देवता हो ! आजदेखि तपाईंहरू पनि किरातको रूप लिएर हामीसँगै एक हजार वर्षसम्म यसै वनमा क्रीडा गर्नुहोस् ॥५९-६१॥

---

३४. धारयित्वासनादुद्रो मधुरयन् समद्रियन्, इति न.सं.पु.पाठः ।
३५. माययेति, इति न.सं.पु.पाठः ।
३६. ज्ञातः, इति न.सं.पु.पाठः ।
३७. चात्र क्रीडयामः, इति न.सं.पु.पाठः ।
३८. जनिष्यति प्रिये, इति न.सं.पु.पाठः ।
३९. तावत्क्रीडामहे चात्र, इति न.सं.पु.पाठः ।
४०. क्रीडन्तामत्र चाद्यतः, इति न.सं.पु.पाठः ।

सिद्धर्षिरुवाच

इत्युक्ते तद्वने रुद्रो ह्यचीक्रिडन्मुदा पुनः । देव्या किरातरूपिण्या[४१] सरित्कुञ्जेषु वै समम् ॥६२॥
प्रणिपत्य ततो रुद्रमचीक्रिडन्मुदाऽमराः । किरातरूपमास्थाय मृगयायां सह स्थिताः[४२] ॥६३॥
सहस्रवत्सरान्ते तद्दिवि यातेऽमरान्वये । कश्चिन्मुक्तः किरातोऽत्र चैतल्लिङ्गे शृणु पुरा ॥६४॥
आसीत्कश्चित्किरातोऽत्र शुकवक्त्रो महाबली । एकदा मृगयां यातः चैतल्लिङ्गं स दृष्टवान् ॥६५॥
गन्धर्वाः खलु सम्पूज्य गीतवाद्यमहोत्सवैः । पूजयित्वा च ते यान्ति नित्यं स्वर्गं ददर्श सः[४३] ॥६६॥
सोऽपि ह्यपूपुजल्लिङ्गं वन्यैः पुष्पोपहारकैः । वाग्वतीशंवरैर्नित्यं गण्डपूर्णोद्धृतैर्मुदा ॥६७॥
मृगमांसं निवेद्यार्य भक्त्या स शिवमब्रवीत् । एतदास्वाद्यतां[४४] देव सद्यः सुखमिति प्रभो ॥६८॥
काले काले फलान्यार्य न्यवेदयत्[४५] त्रिशूलिने । स्वादूनि खलु पक्वानि दन्तदष्टानि श्रद्धया[४६] ॥६९॥
फलान्यन्नानि मांसानि निवेदयन् दिने दिने[४७] । परीक्ष्य जिह्वया दन्तैः स्वादूनि यानि यानि च ॥७०॥
एकसंवत्सरं यावद् देवमुपासते शिवम् । ततः सन्तुष्टवान् रुद्रस्तस्य भक्त्या प्रपूजनात् ॥७१॥
कार्त्तिकस्य चतुर्दश्यां कृष्णायां प्रमथा हि तम् । निन्युर्यनिन वै शैवं पूजयित्वा[४८] सविग्रहम् ॥७२॥
स एव प्रमथश्रेष्ठोऽभवन्म्लेच्छश्शुकाननः । रुद्रस्याऽनुचरो नित्यं रुद्रौजसा समायुतः ॥७३॥

नेमुनिले भन्नुभयो – यति भनेर फेरि शिवजीले किरातिनी पार्वतीका साथ नदी तथा झाडीहरूमा सहर्ष क्रीडा गर्नुभयो । त्यसपछि देवताहरूले प्रसन्न हुँदै भगवान् शङ्करलाई प्रणाम गरेर किरातको रूप लिएर उहाँको साथमा रही शिकार खेल्दै क्रीडा गरे । यसरी हजार वर्षपछि देवताहरू स्वर्ग गए । त्यसपछि यस लिङ्गको सेवा गरेर कुनै किरातले मुक्ति पएको थियो, त्यो कुरा सुन ॥६२–६४॥

सुगाको जस्तो मुख भएको, अत्यन्त बलियो यहाँ कुनै किरात थियो । एक दिन शिकार खेल्न जाँदा उसले किरातेश्वर लिङ्गको दर्शन पायो । गन्धर्वहरू सधैं त्यहाँ आई गीत गाउँदै, बाजा बजाउँदै विभिन्न उत्सवका साथ यस लिङ्गको पूजा गरेर स्वर्ग जाने गर्थे । त्यो घटना उसले देख्यो र उसले पनि जङ्गलका फूल, पात, मुजुरा र मुखभित्र अटाएसम्मको पानी ल्याएर सधैं प्रेमले त्यस लिङ्गको पूजा गर्न थाल्यो । मृगको मासु भक्तिपूर्वक शिवजीलाई चढाएर त्यस किरातले भन्यो – हे प्रभु ! हे महादेव ! यो सबैको आनन्दपूर्वक स्वाद लिनुहोस् ॥६५–६८॥

हे आर्य ! त्यस किरातले पाकेका मीठा फलफूलहरू ल्याएर पहिले आफूले चाख्थ्यो र मीठो मात्र शिवजीलाई चढाउँथ्यो । ऊ फल, अन्न, मासु दाँतले टेकेर जिब्राले मीठो नमीठो जाँची जुन जुन मीठा छन् ती ती वस्तुमात्र शिवजीलाई चढाउँथ्यो । यसरी एक वर्षसम्म उसले शिवजीको सेवा गऱ्यो । त्यसपछि भक्तिपूर्वक गरेको त्यसको पूजाले शिवजी प्रसन्न हुनुभयो । कार्तिककृष्ण चतुर्दशीका दिन प्रमथगणहरू आएर पूजा गर्दै सशरीर उसलाई यानमा राखेर शिवलोक लगे । त्यही सुगाको जस्तो मुख भएको म्लेच्छ प्रमथगणको नाइके भयो । अहिले त्यो शिवजीको तेजले युक्त भएर सधैं शिवजीको आराधक बनेको छ ॥६९–७३॥

---

४१. किरातरूपिणा देव्या, इति न.सं.पु.पाठः
४२. मृगयां तेन वै समम्, इति न.सं.पु.पाठः
४३. नित्यं सेव्य ययुः स्वर्गमेनं मुहुर्ददर्श सः, इति न.सं.पु.पाठः
४४. एतत्प्रपूज्यताम्, इति न.सं.पु.पाठः
४५. निवेदति स्म, इति न.सं.पु.पाठः
४६. दन्तैर्दश्य पुनः पुनः, इति न.सं.पु.पाठः
४७. निवेदति स्म तानि सः, इति न.सं.पु.पाठः
४८. पूज्यमाने, इति न.सं.पु.पाठः

विरूपाक्ष उवाच

अमेध्यैश्च तथोच्छिष्टैर्मन्त्रहीनैश्च पूजनैः। कथञ्च भगवान् तुष्टः पापाचारस्य तस्य च ॥७४॥

धर्मोपवासमन्त्रैश्च स्नानं विनार्य तेन वै। सदेहेन कथं प्राप्तः शिवसादृश्यविग्रहः ॥७५॥

नेमुनिरुवाच

मनोबुद्धिचिदानन्दक्रोधरूपो महाविभुः। तत्तद्रूपेण चाऽन्तःस्थो जीवानां जृम्भतेऽनिशम्[४९] ॥७६॥

सच्चिदानन्दरूपोऽसौ सर्वस्वान्ते विभासते। सगुणः सर्वसाक्षी वै व्योम्नीव राजते रविः ॥७७॥

अलक्ष्यो मूलरूपो यश्चाव्यक्तो[५०] भासते हृदि। स कथं लिप्यते पापैः पद्मपत्रं जलैरिव ॥७८॥

भोक्ता स एव चाऽन्तःस्थो भुङ्क्ते नानाविधं सुखम्। कामरूपेण सर्वेज्यो ह्यमेध्यैर्लिप्यते कथम् ॥७९॥

मनसा कामरूपेण चाऽगृह्णाति च तत्करैः। जन्तोर्मुखेन चाऽन्तःस्थो तद्रूपेण विजृम्भते[५१] ॥८०॥

प्रेरणाय च तस्यार्य ![५२] जिह्वादन्तैः परीक्ष्य च। पदार्थाश्च प्रयच्छन्ति[५३] तदुच्छिष्टं कथं भवेत् ॥८१॥

तज्जिह्वादन्तयोः कार्यं शिवशक्त्यात्मको रसः। ताभ्यां स्पृष्टञ्च यद्द्रव्यं[५४] तदमेध्यं कथं भवेत् ॥८२॥

भक्तिश्रद्धाविहीनो यो दत्ते मूर्खः त्रिशूलिने[५५]। तदमेध्यं तथोच्छिष्टं न गृह्णाति कदापि सः ॥८३॥

एतल्लिङ्गस्य संस्पर्शाद् ज्ञानी भक्तोऽभवत् स च[५६]। जातिदोषेण धीमन् स मेध्यामेध्यं न बुध्यते ॥८४॥

विरूपाक्षले भने– हे नेमुनि ! मन्त्रै नपढीकन प्रदान गरिएको त्यस्तो जूठोबाट भगवान् शङ्कर कसरी प्रसन्न हुनुभयो ? धर्म, उपवास, मन्त्र र स्नानविना पनि उसले कसरी यसै शरीरले अर्थात् नमरीकन शिवजीको जस्तो शरीर पायो ? ॥७४–७५॥

नेमुनिले भन्नुभयो– हे विरूपाक्ष ! मन, बुद्धि, चित्त, आनन्द र क्रोधरूप सर्वव्यापक महादेव प्राणीहरूका हृदयमा ती ती रूप लिएर सदा विराजमान हुनुहुन्छ। सर्वगुणसम्पन्न, सर्वसाक्षी भगवान् शङ्कर सबै शरीरभित्र सधैं सूर्यजस्तै प्रकाशित भएर रहनुभएको छ। उहाँको मूल रूप अलक्ष्य र अव्यक्त छ। उहाँ हृदयको आकाशमा सूर्यजस्तै साक्षी भएर रहनुभएको छ ॥७६–७७॥

मूलरूपमा जो अलक्ष्य छ, जो अव्यक्त भएर प्रकाशित हुन्छ, त्यो व्यक्ति कसरी पापबाट लिप्त हुन्छ ? अर्थात् कमलको पातमा पानीजस्तै त्यो निर्लिप्त भएर रहेको हुन्छ। भित्र रहेर ऊ आफैं विभिन्न किसिमका सुखहरूको भोग गर्छ। आफ्नो इच्छा अनुसार चल्छ। सबैको पूज्य छ भने त्यो अपवित्रताबाट कसरी लिप्त हुन्छ ? मनको इच्छा अनुसार ऊ आफ्ना हातले भित्र रहेर प्राणीहरूलाई मुख बाउन लगाई हाई गराउँछ। उसैको प्रेरणा अनुसार जिब्रो तथा दाँतले परीक्षण गरेर चढाएका पदार्थहरू कसरी जूठा हुन्छन् र ? जिब्रो र दाँतले शिव र शक्ति भएर रस तुल्याउने काम गर्छन्। ती दुईले छोएको द्रव्य अपवित्र कसरी हुन्छ ? श्रद्धाभक्तिहीन जुन अज्ञानीले शिवजीलाई त्यस्तो जूठो दिन्छ भने त्यो अपवित्र हुन्छ। त्यसलाई भगवान्ले कहिल्यै पनि ग्रहण गर्नुहुन्न। हे बुद्धिमान् विरूपाक्ष ! यस लिङ्गको स्पर्श गरेको हुँदा त्यो म्लेच्छ अत्यन्त ज्ञानी तथा श्रद्धालु भयो। जातिदोषले गर्दा त्यसले कुन पवित्र र कुन अपवित्र छुट्याउन सकेन ॥७८–८४॥

---

४९. जृम्भते जीविनोऽनिशम्, इति न.सं.पु.पाठः।

५०. यः अव्यक्तः, इति न.सं.पु.पाठः।

५१. जृम्भमानाय जीविनाम्, इति न.सं.पु.पाठः।

५२. तत्प्रेरणेन तेनार्य, इति न.सं.पु.पाठः।

५३. पदार्थानि च यद्दत्तम्, इति न.सं.पु.पाठः।

५४. ताभ्यां यत्स्पर्शनाद्द्रव्यम्, इति न.सं.पु.पाठः।

५५. श्रद्धाभक्त्यार्द्रहीनो यः सोऽज्ञो ददाति शूलिने, इति न.सं.पु.पाठः।

५६. एतल्लिङ्गस्पृशान्म्लेच्छः ज्ञानी श्रद्धी ह्यभूद्भृशम्, इति न.सं.पु.पाठः।

स्नेहवाञ्छ्रद्धया युक्तो यः कोऽपि पूजति शिवम् । तद् गृह्णाति मुदा रुद्रो भक्तियुक्तश्च किं पुनः ॥८५॥
एतैर्युक्तः किरातोऽसौ मन्त्रहीनोऽपि भक्तितः । अपूपुजत्तथा रुद्रं लब्धवांश्च परं पदम् ॥८६॥
किरातार्जुनयोरत्र[५७] चाऽभूद्युद्धं पुरा द्विज । दत्तो वरश्च रुद्रेण चाऽर्जुनाय महत्तरः ॥८७॥
शैलैः प्रसेवितो नित्यं हिमवत्प्रमुखैर्द्विज । तस्माच्छैलेश्वरः प्रोक्तस्तेषां वाञ्छार्थपूरणात्[५८] ॥८८॥

श्रृणोति माहात्म्यमिदं नरोत्तमः किरातलङ्गस्य परापरात्मनः ॥
तदर्चनाद्धि प्रभवं फलञ्च हृदीप्सितं वै लभते च भक्तितः ॥८९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां किरातेश्वरमाहात्म्यं नाम पञ्चपञ्चाशदुत्तरशततमोऽध्यायः ॥१५५॥

हे विरूपाक्ष ! भगवान् शङ्कर श्रद्धाले युक्त भएर स्नेहका साथ जो कोहीले पनि उहाँको पूजा गऱ्यो र कुनै वस्तु अर्पण गऱ्यो भने त्यस वस्तुलाई प्रसन्नतापूर्वक ग्रहण गर्नुहुन्छ भने श्रद्धा र भक्तिपूर्वक गरेको पूजाका सम्बन्धमा त के भन्नुपर्छ र ? मन्त्र उच्चारण नगरीकन पनि यसरी यस किरातले भक्तिपूर्वक भगवान् शङ्करको पूजा गऱ्यो र उसले उत्तम पद प्राप्त गऱ्यो ॥८५-८६॥

हे विरूपाक्ष ! किरात र अर्जुनको पनि अघि यसै स्थलमा युद्ध भएको थियो । भगवान् शङ्करले त्यसबेला उनलाई ठूलो वर दिनुभएको थियो । हे विरूपाक्ष ! हिमालय आदि गरिएका पर्वतहरूले सधैँ उहाँको सेवा गरेका र भगवान् शङ्करले तिनीहरूको इच्छा पूर्ण गरिदिनुभएको हुँदा उहाँको नाम शैलेश्वर रह्यो ॥८७-८८॥

हे विरूपाक्ष ! जो मानिसले परमात्मा किरातेश्वर महादेवको लिङ्गको यो माहात्म्य भक्तिपूर्वक सुन्छ, त्यसले पूजा गर्दा पाउन सक्ने सबै फल पाउँछ, इच्छा अनुसार मनमा लागेका फल प्राप्त गर्न सक्छ ॥८९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा किरातेश्वरको माहात्म्यनामक एकसय पचपन्नौं अध्याय पूरा भयो ।

---

५७. किरातार्जनमत्रैव, इति न.सं.पु.पाठः ।
५८. वाञ्छार्थसम्प्रदात्, इति न.सं.पु.पाठः ।

षट्पञ्चाशदुत्तरशततमोऽध्यायः

किरातेश्वरशिवलिङ्गमाहात्म्यम्

विरूपाक्ष उवाच

नमस्ते मुनिशार्दूल ! सर्ववार्ताविशारद। भूयोऽहं श्रोतुमिच्छामि चैतल्लिङ्गप्रशंसनम् ॥१॥
अभूद्युद्धं तयोः पूर्वं किरातार्जुनयोः कथम्। सोढवान्कथमीशोऽभूदागांसि ह्यर्जुनस्य च ॥२॥

ऋषिरुवाच

धर्मादिशात् पाण्डवेषु वनं यातेषु तेषु च[1]। गूढरूपोऽर्जुनो धन्वी तीर्थयात्रामिहाकरोत् ॥३॥
सिद्धक्षेत्रोद्भवे कुण्डे स्नात्वेह[2] प्राप्तवान्पुनः। वाग्वत्यां सङ्गमे स्नात्वा पशुपतिमपूपुजत् ॥४॥
तत्र यावन्ति लिङ्गानि सम्पूज्यात्राययौ शनैः। युधिष्ठिरमुखाच्छ्रुत्वा चैतल्लिङ्गं प्रपूजितम् ॥५॥
सन्ददर्श किरातान् स धनुर्धरान् समन्ततः। एकग्रावे फलान्यार्य सम्भूय खादतो मुदा ॥६॥
तदार्द्रहृदया म्लेच्छाश्चाजुहुवुश्च पाण्डवम्। भो सखे त्वमिहागच्छ भुङ्क्ष्व चेति तमब्रुवन् ॥७॥
श्रुत्वाशु वचनं तेषां पाण्डवः क्रोधमूर्च्छितः। आधायाऽभ्यन्तरे कोपं तांश्च प्रोवाच सोऽर्जुनः ॥८॥

अर्जुन उवाच

भोक्तुं नेहागतो मूढा युष्मत्सकाशतो ह्यहम्। आराधनाय तल्लिङ्गं जानीत नन्विहागतः ॥९॥
अहो वनौकसाञ्चेष्टा वागीदृशी यतो भवेत्। पात्रापात्रं न जानन्ति मर्कटा इव किङ्कराः ॥१०॥

ऋषिरुवाच

सम्मन्त्र्य सहसा म्लेच्छा रुषाविष्टास्ततः परम्। आकर्ण्य तद्वचो विप्र ! व्याचष्टुर्वचनञ्च ते ॥११॥

अध्याय – १५६

किरातेश्वर शिवलिङ्गका माहात्म्य

विरूपाक्षले भने – सम्पूर्ण विषयका ज्ञाता हे नेमुनि ! हजुरलाई नमस्कार छ। अघि किरातेश्वर भगवान् र अर्जुनको युद्ध कसरी भयो ? किरातेश्वरले अर्जुनका अपराधलाई कसरी सहनुभयो ? म अब किरातेश्वरलिङ्गको माहात्म्य सुन्न चाहन्छु ॥१-२॥

नेमुनिले भन्नुभयो – युधिष्ठिरको सल्लाह अनुसार पाण्डवहरू वनमा गएपछि धनुर्धारी भई गुप्त रूपमा रहेका अर्जुनले यस ठाउँमा तीर्थयात्रा गरेका थिए। यहाँ आएका अर्जुनले सिद्धक्षेत्रबाट उत्पन्न भएको यस वाग्वतीको सङ्गमस्थलमा स्नान गरे र पशुपतिनाथको पूजा गरे। त्यसपछि जति लिङ्ग थिए, ती सबैको पूजा गरेर उनी किरातेश्वरमा आए। युधिष्ठिरको मुखबाट उनले किरातेश्वरको माहात्म्य सुनेका थिए। त्यसैले उनले यस लिङ्गको विशेष पूजा गरे। उनले यहाँ एउटै ढुङ्गामा राखेर परस्पर प्रसन्न हुँदै फल खाइरहेका धनुर्धारी किरातहरूलाई चारैतिर देखे ॥६॥ म्लेच्छहरूले दयाले हृदय पग्लिएका अर्जुनलाई बोलाएर भने – हे साथी ! यहाँ आऊ र फल खाऊ। तिनीहरूको कुरा सुन्नासाथ अर्जुन रीसले आगो भए। भित्रभित्रै रीस लुकाएर अर्जुनले उनीहरूसित भन्न लागे ॥३-८॥

अर्जुनले भने – हे मूर्ख हो ! म तिमीहरूको खानेकुरा खान आएको होइन, म त किरातेश्वर महादेवको लिङ्गको पूजा गर्न यहाँ आएको हुँ भन्ने कुरा बुझ। वनमा बस्ने मानिसहरूको क्रियाकलाप विचित्रको हुँदो रहेछ। बोली पनि यस्तो छ। बाँदरजस्ता यिनीहरू को मान्छे कस्तो भन्ने कुरा जान्दै जान्दैनन् ॥९-१०॥

नेमुनिले भन्नुभयो – अर्जुनको वचन सुनेर ती किरातहरू अत्यन्त रिसाएर परस्पर कुराकानी गरेपछि अर्जुनलाई भन्न लागे ॥११॥

---

१. पाण्डवे च वने याते धर्मपुत्रोपदेशतः, इति न.सं.पु.पाठः। २. अप्यार्य स्नात्वाहे, इति न.सं.पु.पाठः।

किराता ऊचुः

धृतवस्त्रश्च कृत्वेति शूरोऽहं किञ्च मन्यसे। कृत्वाऽवज्ञाञ्च नो मूढ इति वल्कलवेषिणाम् ॥१२॥
अपि धनुर्धरं त्वाञ्च क्षुद्र ! न गणयामहे। हन्यमाने च काले त्वामेकं को वद रक्षति ? ॥१३॥
यदि नोपेक्षसे प्राणान्[३] नमस्व पादयोर्हि नः। नो चेद्बाणाश्च सोढव्याः क्षुद्र ! त्वद्रक्तलोलुपाः ॥१४॥

ऋषिरुवाच

ततः प्रत्युत्तरं पार्थः किरातेभ्यो ददौ पुनः ॥१५॥
अमर्षैः पूरितस्तीव्रं वह्निरिव घृतेन्धनैः।

अर्जुन उवाच

न बहु वल्गिनः शूरा दर्शयन्ति पराक्रमम्। अद्य प्रदर्श्यतां वो नः किङ्कराः स्वं पराक्रमम्[४] ॥१६॥

ऋषिरुवाच

आकर्ण्य तद्वचो म्लेच्छा मुमूर्च्छुः कोपतो भृशम्। उत्थाय त्वरितं बाणैस्ते जघ्नुः पाण्डवं तदा ॥१७॥
लक्ष्यीकृत्य मुखं पादं पृष्ठमुरःस्थलं भुजम्। चतुर्दिक्षु समावृत्य म्लेच्छा जघ्नुः पुनश्च तम् ॥१८॥
अमर्षी सव्यसाची च सम्मार्जयन् गुणं मुहुः। तद्बाणाहतपीडां स सोढ्वा[५] क्षतमपि द्रुतम् ॥१९॥
जघान त्वरितं म्लेच्छान् पाण्डुपुत्रो भृशं शरैः। चतुर्दिक्षु समुद्दिश्य त्रिभिस्त्रिभिः पृथक् पृथक् ॥२०॥
सन्त्यज्य कार्मुकं बाणान् शिलाशाखाद्रुमैश्च ते। सम्भूय पाण्डवं जघ्नुर्भृशं रुषा समन्ततः ॥२१॥
तस्मादसहमानोऽसौ गाण्डीवं त्वरितं तदा। सस्मार चाक्षयं तूणं नमस्कृत्य दरीश्वरम् ॥२२॥
अत्रागतञ्च गाण्डीवं तूणं तथा क्षयं पुनः। जग्राह त्वरितं पार्थः प्रणम्य प्रजपन् खलु ॥२३॥
ततः कृत्वाशु टङ्कारमयोजयद् गुणे शरान्। पूर्णकर्णोद्धृतैर्बाणैः किरातान् स जघान च ॥२४॥

किरातहरूले भने – हे क्षुद्र ! लुगा लगाएको हुनाले शूरो छु भनेर ठानिस् कि कसो ! हे मूर्ख ! रुखको बोक्राको लुगा लगाएका हामीलाई देखेर तैँले आफूलाई ठूलो ठानिस् र हाम्रो अवज्ञा गरिस्। हे क्षुद्र ! धनुर्धारी तैँलाई हामीले पटक्कै गनेका छैनौँ। हामीले तैँमाथि प्रहार गर्न थाल्यौँ भने त्यसबेला एक्लो तरो रक्षा गर्ने को हुन्छ ? भन्। यदि बाँच्ने इच्छा छ भने हाम्रा गोडामा ढोग्, होइन भने तेरो रगत खान खोज्ने बाणहरूलाई तैँले सहनुपर्छ ॥१२-१४॥

नेमुनिले भन्नुभयो – त्यसपछि घिउ र दाउरामा दन्किएको अग्निजस्तै क्रुद्ध भएका वीर अर्जुनले किरातहरूलाई प्रत्युत्तर दिए ॥१५॥

अर्जुनले भने – हे किङ्कर हो ! वीरहरूले कहिल्यै पनि फूर्ति देखाउँदैनन्, पराक्रम देखाउँछन्। तिमीहरू अब मलाई आफ्नो पराक्रम देखाओ ॥१६॥

नेमुनिले भन्नुभयो – त्यो कुरा सुनेर म्लेच्छहरू रीसले अत्यन्त मूर्च्छित भए। उनीहरूले तुरुन्त उठेर त्यसैबेला अर्जुनलाई बाणले हाने। मुख, गोडा, पिठ्यूँ, छाती र हातलाई ताकेर चारै दिशाबाट घेरी किरातहरूले अर्जुनलाई प्रहार गरे। शत्रुको ललकारलाई सहन नसक्ने अर्जुनले पनि तिनीहरूको बाणबाट भएको पीडा र घाउलाई सहेर अत्यन्त रिसाउँदै धनुषको ताँदोलाई मुसारे। तुरुन्त अर्जुनले किरातहरूलाई चारैतिर फर्किएर तीन-तीन बाणका दरले छुट्टाछुट्टै प्रहार गरे। त्यसपछि उनीहरूले बाण छोडिदिए। रिसाएर ढुङ्गा, मूढा र रुखहरूले चारैतिरबाट अर्जुनलाई खूबसित प्रहार गरे। त्यसबाट असह्य भएर अर्जुनले भगवान् विष्णुलाई नमस्कार गरेर तुरुन्त गाण्डीव धनुको सम्झना गरे। गाण्डीव धनु र अविनाशी बाणको ठोक्रो आएपछि तिनीहरूलाई नाश गर्नका लागि अर्जुनले भगवान्‌को मन्त्र जप्दै तुरुन्त ग्रहण गरे र कानसम्म ताँदोतानेर अर्जुनले धनुष्टङ्कार गरी किरातहरूलाई प्रहार गरे ॥१७-२४॥

---

३. जीवम्, इति न.सं.पु.पाठः।
४. इदानीं दर्शयध्वं वो नः किङ्कराः पराक्रमम्, इति न.सं.पु.पाठः।
५. सह्यम्, इति न.सं.पु.पाठः।

व्रणाङ्किताः क्षितौ पेतुर्वज्रैरिव हता द्रुमाः। विसेहिरे ततो म्लेच्छास्तद्बाणाघातजान्क्षतान् ॥२५॥
त्यक्त्वा चायोधनं म्लेच्छा दुद्रुवुः शरणं प्रभोः। किरातरूपिणः शम्भो रक्ष रक्ष न्यवेदयन्[६] ॥२६॥
जघान च द्रुतं पार्थः शरैरानतपर्वभिः। रुद्रं प्रसेव्यमानं तैस्तद्रूपं नैव बुद्धवान्[७] ॥२७॥
अभिससार चाऽत्रापि कृत्वा टङ्कारमीश्वरः। पिनाकञ्च समादाय समादधे शरं गुणे ॥२८॥
ववर्ष शरवृष्टिञ्च पाण्डवस्योपरि द्रुतम्। पिनाकप्रेरितां रुद्रो यथासारैर्जगत्क्षये ॥२९॥
व्रणाङ्कितोऽपि तद्बाणैरर्जुनो वीरविक्रमः। शरवृष्टिं ववर्षाजौ रुद्रस्योपरि सन्ततम् ॥३०॥
युयुधतुर्मिथः क्रोधाद्धन्तुं जिघृक्षया मुहुः। प्रहरन्तौ मिथस्तौ हि सिंहौ मत्तौ गजाविव ॥३१॥
न सेहे चाऽर्जुनो विप्र ! रुद्रबाणाहतिव्यथाम्। सन्त्यज्यायोधनं सद्यश्चैतल्लिङ्गमपूपुजत् ॥३२॥
वन्यैः पुष्पैर्जलैर्भक्त्या पुपूज[८] चन्दनैर्मुहुः। एवं स्तुवन् परिक्रम्य युयोध तेन वै सह ॥३३॥
भूयो भूयो महद्युद्धञ्चक्रतुश्च भयङ्करम्। लक्ष्यीकृत्य मिथोऽङ्गानि[९] चिक्षिपतुः शरान् मुहुः ॥३४॥
रुद्रशरव्रणं पार्थो न सोढ्वा शिवमब्रवीत्। युद्धे परिश्रमोऽत्यन्तं विश्रान्तिः क्रियतामिति[१०] ॥३५॥

अर्जुन उवाच

भो किरात ! परिश्रम्य शृणु मम वचः क्षणम्। हितोपदेशमार्याणां श्रोतव्यमिति वै श्रुतिः ॥३६॥
अपनीय श्रमं श्रान्त्वा[११] योद्धव्यञ्च परैः सह। इत्युक्तं मे पुरा भ्रात्रा युधिष्ठिरेण किङ्कर ॥३७॥
अद्य व्यतीतः कालो मे हरार्चनस्य किङ्कर। यावन्न भविता युद्धं पूजयिष्यामि शङ्करम्[१२] ॥३८॥

वज्रले हानिएका रुखजस्तै भएर बाणको आघातले गर्दा घाइते भएका म्लेच्छहरू बाणको आघात सहन नसकेर भूमिमा पछारिए। त्यसपछि किरातहरू युद्ध छोडेर हे शम्भो ! हामीलाई रक्षा गर्नुहोस् भन्दै किरातरूपधारी शिवजीको शरणमा गए। अर्जुनले शिवजीको सेवा गर्न लागेका किरातहरूलाई तिनीहरूको स्वरूप नबुझीकन खूबसित तानेर तुरुन्त बाण प्रहार गरे। यता शिवजीले पनि पिनाक धनुषको सम्झना गर्नुभयो। पिनाक आएपछि त्यसलाई समातेर टङ्कार गर्दै त्यसलाई ताँदोमा चढाउनुभयो ॥२५-२८॥

भगवान् शङ्करले प्रलयकालमा पानीका धारा बर्सिए जस्तै गरी अर्जुनमाथि बाणहरूको वर्षा गर्नुभयो। घायल भए तापनि पराक्रमी वीर अर्जुनले रुद्रमाथि बाणहरूको वर्षा गरिरहे। किरातेश्वर महादेव र अर्जुन क्रुद्ध भएर जित्ने इच्छाले मत्त भएका दुई हात्ती अथवा दुई सिंहजस्तै गरी परस्पर प्रहार गर्न थाले। अर्जुनले शिवजीको बाणको आघातबाट भएको पीडालाई सहन गर्न सकेनन्। त्यसपछि उनले युद्ध छोडेर तुरुन्तै किरातेश्वर शिवलिङ्गको पूजा गरे। उनले वनका फूल, पानी र चन्दन ल्याई भक्तिपूर्वक परिक्रमा र स्तुति गर्दै शिवजीको पूजा गरे र त्यसपछि उनी किरातेश्वरसँग लड्न थाले। उनीहरूले बारम्बार डरलाग्दो ठूलो युद्ध गरे, मर्मयुक्त अङ्गलाई परस्पर ताकाताक गरेर बारम्बार बाणहरू छोडे। शिवजीको बाणबाट भएको घाउलाई सहन नसकेर अर्जुनले शिवजीलाई म तिम्रो सेनादेखि डराएको त होइन, युद्ध गर्दा गर्दा मलाई ज्यादै थकाइ लाग्यो, तसर्थ केही बेर युद्धविराम गरौं भने ॥२९-३५॥

अर्जुनले अगाडि भने – हे किरात ! ध्यान दिएर एकछिन मेरो कुरा सुन, किनभने महात्माहरूको हित उपदेश सुन्नुपर्छ भनेर वेदले भनेको छ। हे किरात ! मेरा दाजु युधिष्ठिरले मलाई थकाइ मारी मारी शत्रुसित लड्नुपर्छ भनेर बताउनुभएको थियो। आज मेरो शिवपूजाको समय बित्यो। जबसम्म युद्धको समय हुँदैन त्यस समयसम्म म शिवजीको पूजा गर्छु ॥३६-३८॥

---

६. रक्षेति नो वदन्, इति न.सं.पु.पाठः।
७. समजानतः, इति न.सं.पु.पाठः।
८. आनर्च, इति न.सं.पु.पाठः।
९. अवयवं मिथो लक्ष्य, इति न.सं.पु.पाठः।
१०. तद्बले ह्यभयावहः, इति न.सं.पु.पाठः।
११. श्राम्य, इति न.सं.पु.पाठः।
१२. पूजिष्यामि च शङ्करम्, इति न.सं.पु.पाठः।

ऋषिरुवाच

आकर्ण्य तद्वचो रुद्रः किराताङ्गी स्मिताननः। स्वस्मिन् भक्तिञ्च[१३] सम्प्रेक्ष्य तत्पराक्रमहर्षितः ॥३९॥
उवाच वचनं शम्भुस्तस्मै दातुञ्च[१४] काङ्क्षितम्। दन्तानां किरणैः शुभ्रैर्विद्योतयन् दिशो दश ॥४०॥

किरात उवाच

पूजयस्व हरं पार्थ यथेप्सितं त्वमर्हणैः। मुञ्च मत्तो भयं किञ्चित् कुरु पूजां हृदीप्सिताम् ॥४१॥
यथासुखञ्च सम्पूज्य लिङ्गाङ्गं जगदीश्वरम्। ततः प्रयुध्यतां पार्थ वरं लब्ध्वा[१५] मया सह ॥४२॥

ऋषिरुवाच

आकर्ण्य तद्वचो विप्र ! महालिङ्गमपूपुजत्। सन्त्यज्य कार्मुकं बाणं जलैः पुष्पोपहारकैः ॥४३॥
स्तुत्वा प्रणम्य लिङ्गं स परित्यज्य पुनः पुनः। आदाय कार्मुकं बाणं युयोध तेन वै समम् ॥४४॥
अपश्यदर्जुनो रुद्रं लिङ्गं यैर्यैः प्रपूजितम्। तैः पुष्पचन्दनैर्युक्तं प्राहरत् तन्निजैः शरैः[१६] ॥४५॥
चर्चितं चन्दनैस्तैश्च कुसुमैस्तैर्विभूषितम्[१७]। तज्जलैः सिक्तदेहन्तं प्रहरन्तं स्मिताननम् ॥४६॥
किङ्किमिति ततः कृत्वा प्रेक्ष्य कुसुमचन्दनम्। ईषत्प्रहसितः पार्थः दृष्ट्वा तञ्च[१८] स्मिताननम् ॥४७॥
पुनः प्रहर्तुं तं[१९] पार्थ उद्यतोऽपि युधि द्विज। हृदि शङ्कां निधायेशं नैव प्रहृतवान्[२०] विभुम् ॥४८॥
हरोऽपि दर्शयन्पार्थं स्वविग्रहं पिनाकिनम्। उद्धूय सहसा मायां तच्छक्त्या च[२१] प्रहर्षितः ॥४९॥
प्रेक्ष्य पिनाकिनं पार्थस्तुष्टाव तं मुहुर्मुहुः। सन्त्यज्य कार्मुकं बाणं प्रणम्य दण्डवद् भुवि ॥५०॥

नेमुनिले भन्नुभयो – अर्जुनको भनाइ सुनेपछि किरातरूपधारी भगवान् शङ्कर आफूमाथि उनको भक्ति र पराक्रम देखेर खुसी हुँदै मुसुक्क हाँस्नुभयो। अनि भगवान् शम्भुले दाँतका सुन्दर किरणद्वारा दशै दिशालाई उज्यालो पार्दै अर्जुनलाई वर दिनका लागि भन्नुभयो ॥३९-४०॥

किरातेश्वरले भन्नुभयो– हे अर्जुन ! पूजा गर्दा मलाई बाण हान्छ कि भन्ने डर नराखीकन आफूखुसी पूजासामग्री जम्मा गरी आनन्दसित लिङ्गस्वरूप भगवान्को पूजा गर। हे पार्थ ! भगवान्बाट चाहेको वर पाएपछि मसित युद्ध गरौला ॥४१-४२॥

नेमुनिले भन्नुभयो – किरातको त्यो भनाइ सुनेर अर्जुनले धनु र बाण भुइँमा राखे। पानी, फूल आदि पूजासामग्री लिएर उनले किरातेश्वरलिङ्गको पूजा गरे। यसरी लिङ्गको स्तुति र प्रणाम गरेर बारम्बार फ्याँकिएको त्यो धनुष र बाणलाई फेरि समाते, किरातसँग उनले युद्ध गरे। अर्जुनले लिङ्गमा जुन जुन फूल, चन्दन आदि चढाएका थिए, आफूले प्रहार गर्न लागेका किरातलाई तिनै फूल र चन्दनले युक्त भएको देखे ॥४५॥

अर्जुनले चढाएको चन्दन दलेर, फूलले सिङ्गारिएर उनैले चढाएका जलमा निथ्रुक्क भिजेर मुसुमुसु हाँस्दै बाणप्रहार गरिरहेका शिवजीलाई अर्जुनले देखे। त्यसपछि कसो हो ए ! भनेर उनले बुझ्न खोजे। आफूले चढाएको फूल र चन्दनलाई चिनेर लडाइँमा बाण हान्न तयार हुँदाहुँदै पनि उनले किरातलाई बाण प्रहार गर्न सकेनन्। यी किरात शिव नै हुन् भनेर सशङ्कित हुँदै उनले शिवजीमाथि बाणप्रहार गरेनन्। अर्जुनको पराक्रम देखेर प्रसन्न हुनुभएका भगवान् शङ्करले पनि पिनाकधारी आफ्नो शरीर अर्जुनलाई देखाइदिनुभयो र माया हटाइदिनुभयो। अर्जुनले पिनाकधारी भगवान् शङ्करलाई देखेर बाण परित्याग गरे। पृथ्वीमा लम्पसार परेर दण्डवत् प्रणाम गरे, बारम्बार शिवजीको स्तुति गरे ॥४९-५०॥

---

१३. तद्भक्तिं स्वे च, इति न.सं.पु.पाठः।
१४. दानाय, इति न.सं.पु.पाठः।
१५. लब्धवरः, इति न.सं.पु.पाठः।
१६. तत्पुष्पचन्दनोपेतं प्रहारयत्तमाशुगैः, इति न.सं.पु.पाठः।
१७. तच्चन्दनैश्च सञ्चर्च्य तत्कुसुमैश्च भूषयन्, इति न.सं.पु.पाठः।
१८. पार्थस्तादृशाङ्गम्, इति न.सं.पु.पाठः।
१९. प्रहारितुञ्च तम्, इति न.सं.पु.पाठः।
२०. न प्रहारितवान्, इति न.सं.पु.पाठः।
२१. तद्बलैश्च, इति न.सं.पु.पाठः।

अर्जुन उवाच

ॐ नमो हराय रुद्राय सात्वतां पतये नमः। त्र्यम्बकाय च रुद्राय प्रेतानां पतये नमः ॥५१॥

किरातदेहिनेऽजाय किरातवेषिणे नमः। किरातेशाय भर्गाय म्लेच्छरूपाय वै नमः ॥५२॥

व्यक्ताव्यक्तरूपाय भक्तभक्ताय ते नमः[२२]। पिनाकिने महेशाय जगद्रक्षाविधायिने ॥५३॥

वरदाय वरेशाय प्रवरवरदायिने। पराय परमेशाय परापराय वै नमः ॥५४॥

विमोहितोऽहं तव देव मायया कृतं प्रयुद्धं भवता समं विभो।

सम्प्राहरं वै[२३] त्वयि चाशुगैर्भृशं क्षमस्व देवेश ममाऽपराधकम् ॥५५॥

किरातेश्वर उवाच

म्लेच्छोऽभूस्त्वं पुरा जन्मकिरातोऽसि ततो नरः। वाग्वत्यां श्रद्धया स्नानादर्जुनोऽसि न संशयः[२४] ॥५६॥

तुष्टोऽहञ्च समालोक्य चार्जुन ते पराक्रमम्। स्तुतिभिश्च विशेषेण त्रिविधाभिश्च भक्तिभिः[२५] ॥५७॥

वरं वरय मत्तस्त्वं पाण्डुनन्दन ! साम्प्रतम्। विद्यते वीर यत्स्वान्ते तत्सर्वं ते ददाम्यहम् ॥५८॥

अर्जुन उवाच

सर्वज्ञ ! सर्ववन्द्येश ! जानासि मम वेदनाम्। सर्वस्वान्ते स्थितो देवः कृत्याकृत्येषु दर्शकः ॥५९॥

दुर्योधनेन नो देव ! सर्वं राज्यं हृतं वयम्। प्रेरिता वनवासाय गुप्तरूपेण संस्थिताः[२६] ॥६०॥

राज्यं याचे निजं देव ! त्वत्तोऽहं क्षत्रनन्दनः[२७]। कौरवेषु जयञ्चाऽपि वरमेनं महेश्वर ![२८] ॥६१॥

अर्जुनले भने - संसारका संहारकर्ता रुद्रलाई नमस्कार छ। सम्पूर्ण प्राणीका स्वामीलाई नमस्कार छ। तीन आँखा भएका प्रेतका मालिक शङ्करलाई नमस्कार छ। किरातको शरीर धारण गर्ने अजन्मा र किरातको भेषधारीलाई नमस्कार छ। किरातका स्वामी तेजस्वरूप म्लेच्छलाई नमस्कार छ। भक्तहरूका निमित्त कल्याणकारक व्यक्त तथा अव्यक्त स्वरूप भएका भगवान्लाई नमस्कार छ। सम्पूर्ण जगत्को रक्षा गर्ने पिनाकधनुर्धारी महेश्वरलाई नमस्कार छ। उत्तम वर दिने वरका अधिपति वरदाता परम परमेश्वर परापरलाई नमस्कार छ। हे भगवन् ! हजुरको मायाले मैले मोहित भएर हजुरसँग युद्ध गरेँ। हजुरमाथि खूबसित बाणहरू प्रहार गरेँ। हे ईश्वर ! मेरो अपराधलाई क्षमा गरिदिनुहोस् ॥५१-५५॥

किरातरूपधारी भगवान् शङ्करले भन्नुभयो - अघिल्लो जन्ममा तिमी पनि म्लेच्छ किरात भएका थियौ। यसै वाग्वतीमा स्नान गरेको हुनाले यस जन्ममा अर्जुन भएका हौ, यसमा शङ्का छैन। हे अर्जुन ! तिम्रो पराक्रम देखेर विशेष गरी स्तुति, भक्ति र चालचलनबाट म प्रसन्न भएँ। हे पाण्डुपुत्र ! अब तिमी मसित वर माग। तिम्रो मनमा जे लागेको छ, त्यो सबै म दिन्छु ॥५६-५८॥

अर्जुनले भने - हे सर्वज्ञ ! हे सबैका वन्दनीय ! हजुर कृत्य र अकृत्य सबै कुरा थाहा पाउनुहुन्छ। मेरो हृदयमा के कस्तो वेदना छ, हजुर जान्नुहुन्छ। दुर्योधनले हाम्रो राज्य सबै लुट्यो। उसको अपमानले गर्दा हामी वनमा गुप्तवास गरिरहेका छौँ। हे महादेव ! म क्षत्रिय हुँ। त्यसैले म युद्धमा कौरवलाई जितेर आफ्नो राज्य लिन चाहन्छु। हे शङ्कर ! यही वर दिनुहोस् ॥५९-६१॥

---

२२. **भव्याय भक्तिनां नमः, इति न.सं.पु.पाठः।**
२३. **प्रहारितं मे, इति न.सं.पु.पाठः।**
२४. **वाग्वत्यां स्नानतोऽत्रेह चार्जुनोऽसि न संशयः, इति न.सं.पु.पाठः।**
२५. **तव भक्तिभिरीरितैः, इति न.सं.पु.पाठः।**
२६. **चापमानप्रचोदिताः, इति न.सं.पु.पाठः।**
२७. **क्षत्रियोऽहं महादेव ! याचे राज्यं स्वकं तव, इति न.सं.पु.पाठः।**
२८. **कौरवान् युधि निर्जित्य चैतद्वञ्च शङ्कर, इति न.सं.पु.पाठः।**

किरातेश्वर उवाच

किञ्चित्कालान्तरे पार्थ चैवमेव भविष्यति । यश्चाऽपि हृदि ते कामः स च पूर्णो भविष्यति[२९] ॥६२॥
स्नाहि क्षत्रियतीर्थे त्वं लब्धा जयं ततोऽर्जुन । निवृत्ते भारते शेषे मम लोकं गमिष्यसि ॥६३॥

ऋषिरुवाच

इत्युक्त्वा चाऽर्जुनायेशश्चैतल्लिङ्गे व्यलीयत । द्योतयंश्च दिशो भाभिरस्ताचलमिवांशुमान् ॥६४॥
अर्जुनोऽपि प्रणम्येशमेतल्लिङ्गं परिक्रमन् । सस्नौ क्षत्रियतीर्थेऽसौ श्रद्धालुः खलु भक्तितः ॥६५॥
कार्त्तिक्यां[३०] पूर्णिमायां स वरं लेभे दशाहनि । तत्र स्नात्वाऽगमच्छीघ्रं भ्रातरो यत्र वै स्थिताः ॥६६॥
नित्यं पूजितवानत्र चैतल्लिङ्गं हिमालयः । तस्माच्छैलेश्वरं ख्यातं तेन प्रसेवनाद् द्विज ॥६७॥
शैलेश्वरं तु यः स्नानैः भक्तिपूर्वमुपासते[३१] । मत्पार्षदो भवेत्सद्यो विचरेत्स सुरैः सह ॥६८॥
शैलेश्वरं परं गुह्यं गतिः शैलेश्वरो परा । शैलेश्वरसमं[३२] क्षेत्रं न किञ्चिद् भुवि विद्यते ॥६९॥
उपासको भवेद्यस्तु दक्षिणे च महात्मनः । शैलेश्वरस्य मर्त्यो यः स गच्छेत्परमां गतिम् ॥७०॥
भृगुप्रपतनं कृत्वा कामक्रोधविवर्जितः । विमानेन दिवं यायादप्सरोगणसेवितः ॥७१॥
विविधान्यत्र तीर्थानि सन्ति पुण्यानि देवताः । येषां तोयैर्नरः स्पृष्टः सर्वपापैः प्रमुच्यते ॥७२॥
ब्रह्महा गुरुहा गोघ्नः स्पृष्टोऽपि सर्वपातकैः । क्षेत्रमेतदनुप्राप्य निर्मलो जायते नरः ॥७३॥
इत्युक्तञ्च पुरेशेन देवेभ्यो ज्योतीरूपिणा । इत्येतत्कथितं विप्र ! किरातेशप्रशंसनम् ॥७४॥

हे अर्जुन ! केही समयपछि तिमीले सोचेजस्तै हुनेछ। मेरो अनुग्रहले गर्दा तिम्रो हृदयमा जे छ, त्यो कामना पूर्ण हुनेछ, यसमा शङ्का छैन। हे अर्जुन ! तिमीले यस क्षत्रियतीर्थमा स्नान गर। तिमीले महाभारतको युद्धमा विजय पाउनेछौ। त्यो युद्ध समाप्त भएपछि अन्त्यमा तिमी मेरो धाममा बस्न पाउनेछौ ॥६२–६३॥

नेमुनिले भन्नुभयो – अर्जुनलाई यति कुरा भनेर सम्पूर्ण दिशालाई कान्तिद्वारा उज्यालो पार्दै सूर्य अस्ताचलमा डुबेझैं गरी भगवान् शङ्कर त्यसै लिङ्गमा विलीन हुनुभयो । अर्जुनले पनि भगवान् शङ्करलाई नमस्कार गरे, किरातेश्वरलिङ्गको परिक्रमा गरे, श्रद्धा र भक्तिका साथ क्षत्रियतीर्थमा गएर उनले स्नान गरे। शङ्करबाट वर पाएका अर्जुन कार्तिकपूर्णिमाको दिन स्नान गरेर दशौ दिनभित्र जहाँ भाइहरू बसेका थिए, त्यसै ठाउँमा पुगे ॥६४–६६॥

यस लिङ्गलाई हिमालयले सधैं पूजा गरेका थिए। हे विरूपाक्ष ! उनले पूजा गरेको हुँदा यसको नाम शैलेश्वर रहेको हो। जसले भक्तिपूर्वक शैलेश्वर भगवान्को पूजा गर्छ त्यो तुरुन्त मेरो पार्षद भएर देवताहरूका साथ विचरण गर्दछ। शैलेश्वर अत्यन्त गुप्त छ। शैलेश्वर सबभन्दा ठूलो गति हो, शैलेश्वर सबैभन्दा ठूलो क्षेत्र हो। पृथ्वीमा त्यस्तो अरू केही छैन। महत्त्वशाली यस शैलेश्वरको दक्षिणपट्टि गएर जसले उपवास बस्छ त्यसले परमगति पाउँछ ॥६७–७०॥

काम–क्रोधबाट मुक्त भएर शैलेश्वरमा गई हामफाल्यो भने दिव्य विमानमा चढी अप्सराहरूद्वारा सुशोभित हुँदै त्यो व्यक्ति स्वर्ग जान्छ। यहाँ अनेक पवित्र तीर्थहरू छन्। अनेक देवताहरूको वास छ। यहाँका तीर्थको जल छुनाले मात्र पनि सबै पापबाट मानिस मुक्त हुन्छ। ब्रह्महत्या गर्ने, गुरुहत्या गर्ने, गाई मार्ने र सम्पूर्ण पापले युक्त भएको मानिस पनि यस तीर्थमा आउँछ भने निर्मल हुन्छ अर्थात् पापबाट मुक्त हुन्छ। पहिले ज्योतिस्वरूप भगवान्ले देवताहरूलाई यही कुरा बताउनुभएको थियो। हे ब्राह्मण विरूपाक्ष ! मैले पनि तिमीलाई त्यही किरातेश्वरको माहात्म्य बताएँ ॥७१–७४॥

---

२९. हृदि यदस्ति ते कामं मत्प्रसादान्न संशयः, इति न.सं.पु.पाठः।
३०. कार्त्तिकी.., इति न.सं.पु.पाठः।
३१. भक्तितः समुपासते, इति न.सं.पु.पाठः।
३२. शैलेश्वरं परम्, इति न.सं.पु.पाठः।

भूयो गच्छ विरूपाक्ष ! भस्मेश्वरो हि यत्र च। भस्मगङ्गामहाकुण्डं यत्रास्ते द्विज निर्मलम् ॥७५॥

शृण्वन्तीमं विगतकलुषं नूनमध्यायमेतत्,
द्रक्ष्यन्तीशं[३३] परमसुकृतैर्योगिभिर्ध्यायमानम्।
शैवं धाम श्रवणनिरता निर्गतैनोविमोहाः,
भुक्त्वा भोगान्सकलविभवान्सर्ववन्द्याः परत्र ॥७६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
किरातेश्वरमाहात्म्यं नाम षट्पञ्चाशदुत्तरशततमोऽध्यायः ॥१५६॥

हे विरूपाक्ष ! अब भस्मगङ्गा नाम गरेको निर्मल महाकुण्डमा तिमी जाऊ। त्यहाँ भस्मेश्वर महादेव रहनुभएको छ। जसले यो पवित्र अध्याय सुन्छन् तिनीहरूका सबै पाप र मोह छुट्नेछन्। यस लोकमा तिनीहरूले सबैबाट सम्मान पाउँछन् । यहाँ सम्पूर्ण ऐश्वर्यको भोग गरेर परलोकमा परम पुण्यशाली योगीहरूले ध्यान गरिने भगवान् शिवको धाममा उनीहरू पुग्दछन् ॥७५-७६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा किरातेश्वर शिवलिङ्गको माहात्म्यनामक
एकसय छपन्नौं अध्याय पूरा भयो।

---

३३. प्राप्यन्तीशम्, इति न.सं.पु.पाठः।

सप्तपञ्चाशदुत्तरशततमोऽध्यायः

भस्मगङ्गाकुण्डतीर्थभस्मेश्वरयोर्माहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो यत्र भस्मेश्वरो विभुः । भस्मगङ्गाजले स्नात्वा भस्मेश्वरमपूपुजत् ॥१॥
राधकृष्णनवम्यां स लिङ्गमभ्यर्च्य तन्निशि[1] । अपृच्छत्खलु माहात्म्यं नेमुनिं भक्तितो मुने ॥२॥
आकर्ण्य तद्वचोऽगस्त्य ! सर्वं व्याचष्ट नेमुनिः । भक्तं स्वं लिङ्गमाहात्म्यं तदुत्पत्तिं घटोद्भव ॥३॥

सिद्धर्षिरुवाच

भस्मना च कृते स्नाने महारुद्रेण वै पुरा[2] । एतल्लिङ्गञ्च जानीथाः स्थापितञ्च स्वसाक्षिकम्[3] ॥४॥
भस्मनाऽत्र कृतस्नानः तदादि च महेश्वरः[4] । तस्माद् भस्मेश्वरः प्रोक्तो भुक्तिमुक्तिफलप्रदः ॥५॥
यल्लिङ्गस्पर्शनात्सर्वः सद्यः पूतो भवेद् भृशम् । अपवित्रोऽपि पूतात्मा चाऽसंयतोऽपि संयतः ॥६॥
एतेन भस्मना स्नात्वा चैतल्लिङ्गं निरन्तरम् । देवर्षयः समर्हन्ति यज्ञसम्भवभस्मभिः ॥७॥
शृणु कश्चित्पुरा मुक्तश्चैतल्लिङ्गप्रसादतः । ह्रस्वो नाम द्विजश्चासीत्केरले नगरे द्विज ॥८॥
सम्पत्तौ विद्यमानायामपि श्रेष्ठी वणिक्सुतः[5] । कस्मैचिन्न ददौ दानं धनसञ्चयलालसः[6] ॥९॥
ततः कालान्तरे सोऽपि गङ्गातीरे मृतो द्विज । गङ्गातीरमृतेः पुण्यात्सोऽभूद्विप्रकलेवरः ॥१०॥

अध्याय – १५७

भस्मगङ्गाकुण्डतीर्थ र भस्मेश्वरको महिमा

कुमार स्वामीले भन्नुभयो – नेमुनिले भनेपछि विरूपाक्ष भस्मेश्वर बस्नुभएको क्षेत्रमा गए र भस्मगङ्गा जलमा स्नान गरेर उनले भस्मेश्वरको पूजा गरे । हे अगस्त्य मुनि ! उनले वैशाखकृष्ण नवमीको रातमा भस्मेश्वर लिङ्गको पूजा गरे र भक्तिपूर्वक नेमुनिसँग त्यस तीर्थको माहात्म्य सोधे । हे अगस्त्य मुनि ! विरूपाक्षको सुनेर नेमुनिले आफ्ना भक्त विरूपाक्षलाई प्रारम्भदेखि नै लिङ्गको माहात्म्य र उत्पत्तिका बारेमा सम्पूर्ण वृत्तान्त सुनाए ॥१–३॥

सिद्धऋषि नेमुनिले भन्नुभयो – हे ब्राह्मण विरूपाक्ष ! पहिले यहाँ भगवान् शङ्करले भस्मले स्नान गर्नुभयो र त्यसपछि आफ्नै साक्षीस्वरूप भएको यस लिङ्गको स्थापना गर्नुभएको हो भन्ने कुरा तिमीले बुझ । भगवान् शङ्करले भस्मले मात्र स्नान गरेको हुँदा त्यसै दिनदेखि भक्तहरूलाई भुक्ति र मुक्ति दिने यो लिङ्ग भस्मेश्वरका नामले प्रसिद्ध भयो । यस लिङ्गको स्पर्शले मात्रै पनि सबै प्राणीहरू तत्काल पवित्र हुन्छन् । यदि कुनै अपवित्र प्राणीले यस लिङ्गको स्पर्श गर्छ भने त्यो पवित्र हुन्छ र असंयमीले स्पर्श गर्दा त्यो व्यक्ति संयमी हुन्छ । देवर्षिहरू यज्ञमा यसै भस्मले स्नान गर्छन् र यज्ञको भस्मद्वारा श्रद्धाभक्तिपूर्वक लिङ्गको नित्य पूजन गर्छन् ॥४–७॥

हे ब्राह्मण ! सुन – पहिले कुनै केरल नाम गरेको शहरमा ह्रस्व नाम भएको ब्राह्मण बस्दथ्यो । त्यो यसै लिङ्गको अनुग्रहबाट मुक्त भएको थियो । ब्राह्मण भए पनि त्यो सेठ कुनै व्यापारीको छोरो थियो । सम्पत्ति हुँदाहुँदै पनि त्यो कसैलाई केही दान नदिने स्वभावको थियो । उसले जीवनमा धनमात्र बटुल्ने काम गऱ्यो । हे विरूपाक्ष ! त्यसपछि कालान्तरमा गएर ऊ गङ्गाको तीरमा मऱ्यो । गङ्गाको तीरमा मरेको पुण्यका प्रभावले त्यो ब्राह्मणको शरीर लिएर जन्मियो ॥८–१०॥

---

१. लिङ्गं पूज्य महानिशि, इति न.सं.पु.पाठः ।
२. महारुद्रः पुरा द्विज, इति न.सं.पु.पाठः ।
३. एतल्लिङ्गञ्च जानीयात्स्थापितवान्स्वसारिकम्, इति न.सं.पु.पाठः ।
४. अद्य प्रभृति शङ्करः, इति न.सं.पु.पाठः ।
५. विद्यमाने च सम्पत्तौ महाधानो वणिक् सुतः, इति न.सं.पु.पाठः ।
६. केवलं धनसञ्चितः, इति न.सं.पु.पाठः ।

अदानात् सञ्चयाच्चैव[७] दरिद्रोऽभूद् द्विजो भृशम्। कष्टवाँश्च ततोऽभूत्स भोज्याभावात्[८] क्षुधार्दितः ॥११॥
चौरवृत्तिं समासाद्य चाहारं बुभुजे सदा। स्वजनस्य गृहे ग्रामे द्रव्यं नित्यमचूचुरत् ॥१२॥
त्यक्तोऽन्वयैर्जनैर्विप्रो भृत्यैरपि च निन्दितः। आप्तैः समुपदिष्टोऽपि[९] दिवा गूढो निशाचरः ॥१३॥
चोरयति[१०] जना धृत्वा बबन्धू रज्जुभिर्दृढम्। अनिन्दत्तं[११] जनः कश्चित्कृतं किमित्यमोचयत् ॥१४॥
कश्चिज्जघान वाक्खड्गैर्बबन्ध तमितस्ततः। दण्डैरताडयत्[१२] कश्चित्कृत्वा धिगिति गर्हयन् ॥१५॥
निःसृतः स्वजनैस्त्यक्तो देशाद्देशं विलङ्घ्य सः। वाराणसीन्ततः प्राप्तः पुराणमशृणोच्छुभम् ॥१६॥
यदेतत्क्षेत्रमाहात्म्यं काश्यामाकर्ण्य हर्षितः। अत्रायया सुवर्णाढ्यमेतत्पुरं हिरण्यमयम् ॥१७॥
पशुपतेः प्रसादाद्वै धनाढ्योऽहं भवामि च। स्नास्यामि तत्र[१३] वाग्वत्यामिति कृत्वा हृदाययौ ॥१८॥
अपश्यत्स पुरीमेतां मृत्स्नाकाष्ठेष्टिकामयीम्। दुःखातुरोऽभवद् ह्रस्वो हा दैवेति वदन्मुहुः ॥१९॥
शौचैर्विवर्जितो ह्रस्वो भ्रष्टाचारश्च सर्वभुक्। मिथ्यावादी दिवा गूढो निशि चौर्योत्सुकः शठः ॥२०॥
एवं त्रिवत्सरं यावच्चौरश्चाऽत्र शिवालये। सकृत्स्नात्वा च वाग्वत्यां ह्रस्वोऽवात्सीद्धि सन्ततम् ॥२२॥
मार्गकृष्णचतुर्दश्यां कश्चिद्यतेरचूचुरत्। पोटलिकां स विश्वास्य[१४] चादायाऽत्र ययौ मुदा ॥२३॥
कृत्वा किमिति ह्रस्वः स तद्बन्धनममोचयत्। भस्मपिण्डं ददर्शाशु भक्ष्याभावात्क्षुधार्दितः ॥२४॥

कसैलाई केही नदिएको र केवल द्रव्य सञ्चय गरेको हुँदा त्यो ब्राह्मण अत्यन्त दरिद्र भयो। गरीबीका कारण घरमा खाने कुरा केही नहुँदा त्यो अत्यन्त भोकायो र पीडित भई सदा दुःखी बन्यो। त्यसपछि उसले चोरवृत्ति अपनाएर खानेकुरा खान थाल्यो। ऊ आफन्त व्यक्तिका घर-गाउँमा गएर दिनदिनै सम्पत्ति चोर्न थाल्यो। यसकारण आफन्तहरूले पनि उसलाई परित्याग गरे, सेवकहरूले पनि निन्दा गर्न थाले। जति उपदेश दिए पनि त्यो दिनभर बस्ने र रातमा हिँड्ने गर्थ्यो ॥११-१३॥

चोर्न लागेको बेलामा समातेर मानिसहरूले उसलाई डोरीले बेस्सरी बाँधे र गाली गरे। त्यसलाई कुनै एकजना मान्छेले के गरेको भनेर गाली गर्दै छुट्याइदियो। कुनै आफन्तले उसलाई बोलीरूपी तरबारले हिर्कायो, कसैले यताउति बाँधे, कसैले 'तँलाई धिक्कार छ' भनेर निन्दा गर्दै उसलाई लौराले हिर्काए। यसरी निन्दित भई आफन्तहरूले निकालिदिएपछि त्यो ब्राह्मण एक्लै एक देशबाट अर्को देश पार गर्दै वाराणसीमा पुग्यो। त्यहाँ उसले कल्याणकारक पुराण सुन्यो। पुराणमा नेपालशहरलाई सुनैसुनले भरिपूर्ण वा सुवर्णमय नगर भनेर वर्णन गरिएको सुनेपछि ऊ अत्यन्त खुसी भयो। त्यसपछि त्यो ब्राह्मण सरासर नेपालको सुवर्णनगरीमा आयो ॥१४-१७॥

त्यो ब्राह्मण पशुपतिको अनुग्रहले म पनि सम्पन्न हुनेछु र वाग्वतीमा स्नान गर्नेछु भन्ने हृदयले विचार गरेर यहाँ आएको थियो। उसले यहाँ आउँदा यस शहरलाई माटो, काठ र ईंटले मात्र बनेको देख्यो। त्यसपछि त्यो ह्रस्व नाम गरेको ब्राह्मण बारम्बार हा दैव ! भन्दै दुःखमनाउ गर्न थाल्यो। ह्रस्वनामक त्यो ब्राह्मण स्नान, शौचादि गर्दैनथ्यो, उसको आचार भ्रष्ट थियो, सर्वभक्षी थियो, असत्य बोल्थ्यो, दिउँसो लुक्थ्यो र रातमा चोर्न हिँड्ने स्वाँठ थियो। ऊ दिनभरि यताउति लुक्थ्यो। ऊ निरन्तर चौर्यवृत्ति अँगालेर निरन्तर यस शहरमा बस्न थाल्यो। यसरी तीन वर्षसम्म त्यो चोर ब्राह्मण वाग्वतीमा एकपटक स्नान गरेर शिवालयमा बस्ने गर्दथ्यो। एकपटक मार्गकृष्ण चतुर्दशीका दिन कुनै एउटा जोगीलाई विश्वासमा पारेर पोको चोरेर खुसी हुँदै त्यो यही शिवालयमा आयो। ह्रस्वले यसभित्र के छ भनेर त्यो पोकाको गाँठो फुकायो। उसले त्यहाँभित्र खरानीको डल्लो देख्यो, त्यहाँ खानेकुरा थिएन, त्यो भोकले अत्यन्त पीडित भएको थियो ॥१८-२४॥

---

७. अदानात्सञ्चयद्रव्यात्, इति न.सं.पु.पाठः।
८. अन्नाभावात्, इति न.सं.पु.पाठः।
९. हितोपदेशितोऽप्याप्तैः, इति न.सं.पु.पाठः।
१०. चौर्यमाणे, इति न.सं.पु.पाठः।
११. गर्हयन्तम्, इति न.सं.पु.पाठः।
१२. ताडयल्लगुडैः, इति न.सं.पु.पाठः।
१३. स्नायिष्यामि च, इति न.सं.पु.पाठः।
१४. निस्वस्य, इति न.सं.पु.पाठः।

भस्म प्रेक्ष्य तदा ह्रस्वः स्नाहीति च वदन् शिवम्। विचूर्ण्य भस्म पाणिभ्यां लिङ्गोपरि रुषाऽक्षिपत्॥२५॥
निराहारः स विप्रस्तु निशां तत्र व्यतीतवान्। उन्मत्तवत् क्षुधार्त्तो हि शिवेति च वदन्मुहुः ॥२६॥
एतद्भस्मप्रलिप्ताङ्गश्चौर्यं कर्तुं जगाम स[१५]। चौर्यारम्भे[१६] निशि ह्रस्वं कश्चिन्नरस्तमग्रहीत्॥२७॥
मुष्टिभिश्चरणैर्ह्रस्वं गृहस्था लगुडैः पुनः। विविधुस्तमजस्रं तद्यावच्छक्तिश्च विद्यते॥२८॥
ततो निःसारयामासुः ताडितं तं मुहुश्च ते[१७]। सोऽपि शनैः शनैरार्त्तश्चाऽत्राययौ शिवालये॥२९॥
अमावास्यां स मार्गस्य चाऽत्र प्राङ्गणके मृतः। एतद्विभूतिगङ्गाम्भोविलिप्ताङ्गललाटकः ॥३०॥
आययुर्यमदूतास्तं दण्डैः सन्तर्ज्य चाऽवदन्। पापं त्वां क्षेपयिष्यामो नरके चाऽज्ञया प्रभोः ॥३१॥
इहागत्य द्रुतं शैवा याने दधुर्मुदा हि तम्। निर्जित्य तरसा याम्यान्निन्युः शिवपुरं महत्॥३२॥
सोऽप्यभवद् गणश्रेष्ठो ह्रस्वनामा महाबली। रुद्रस्याऽनुचरो नित्यं गणश्रेष्ठो हि ब्राह्मणः ॥३३॥
एनाञ्च वत्सलां देवीं सम्पूजयाशु भक्तितः। स्त्रीषु प्रीतिं समाप्नोति योऽर्चत्येनां हरप्रियाम्॥३४॥
तां जयमङ्गलां देवीं सम्पूजय जयप्रदाम्। युद्धे जयं समाप्नोति योऽर्चति विजयेच्छया[१८] ॥३५॥
भूयो गच्छ विरूपाक्ष ! यत्रास्ते भुवनेश्वरः। देव्या च भुवनेश्वर्या सह निरन्तरं विभुः ॥३६॥

भस्मेश्वरस्यार्य शृणोति भक्त्या माहात्म्यमेतद्धि नरो विपापः।
प्राप्नोति कामं हृदयेप्सितं स भुक्त्वा च भोगान् व्रजतीशलोकम्॥३७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
भस्मगङ्गाकुण्डतीर्थभस्मेश्वरयोर्माहात्म्यं नाम सप्तपञ्चाशदुत्तरशततमोऽध्यायः ॥१५७॥

भस्मको डल्लो देखेपछि उसले हातले खरानीको डल्लोलाई चूर्ण तुल्यायो र 'लौ नुहा' भन्दै रिसाउँदै त्यो भस्मलाई शिवजीमाथि फ्याँक्यो। निराहार बसेको त्यस ब्राह्मणले भोकले आत्तिएर पागलजस्तै बनी शिव ! शिव ! भन्दै त्यहाँ रात बितायो। त्यो ब्राह्मण त्यही पोकाको भस्म शरीरभरि दलेर राति चोरी गर्नका लागि हिँड्यो। रातमा चोर्दाचोर्दै कुनै मानिसले त्यस ह्रस्वलाई समात्यो। त्यसपछि त्यहाँका गृहस्थीहरूले उसलाई मुठीले, गोडाले र लौराले आफ्नो शक्तिले भ्याएसम्म धेरै पिटे॥२५-२८॥

बेस्सरी पिटेर उनीहरूले त्यस चोरलाई त्यहाँबाट निकालिदिए। आत्तिएको त्यो चोर ब्राह्मण बिस्तारै बिस्तारै यसै शिवालयमा आयो। मार्गकृष्ण अमावास्याका दिन शरीरका अङ्गहरूमा त्यही विभूति र भस्मगङ्गाको लगाएर सुते को सुत्यै ऊ यसै आँगनमा मऱ्यो। त्यसपछि यमराजका दूतहरू त्यहाँ आए र यमराजको आज्ञा अनुसार 'यस पापीलाई हामी नरकमा लैजान्छौँ' भन्दै गाली गर्न थाले। तुरुन्त यहाँ शिवजीका दूतहरू पनि आइपुगे। हत्त न पत्त यमराजका दूतहरूलाई जितेर उनीहरूले त्यस ब्राह्मणलाई शिवजीको लोकमा लगे। त्यो ह्रस्वनामक ब्राह्मण अत्यन्त शक्तिशाली र गणको नेता भयो र शिवजीको अनुचर भएर बस्यो॥२९-३३॥

हे ब्राह्मण विरूपाक्ष ! अब तिमी वत्सलादेवीको भक्तिपूर्वक पूजा गर। जसले यी देवीको पूजा गर्छ त्यसले आफ्नी पत्नीको सच्चा प्रेम पाउँनेछ। त्यसपछि तिमीले विजय दिने जयमङ्गला देवीको पूजा गर। जसले विजयको इच्छा राखेर यी देवीको पूजा गर्छ त्यसले युद्धमा अवश्य विजय पाउँनेछ॥३४-३५॥

हे विरूपाक्ष ! जहाँ सधैँ भुवनेश्वरी देवीका साथ भुवनेश्वर महादेव बसिरहनुभएको छ, अब तिमी त्यस ठाउँमा जाऊ॥३६॥

हे विरूपाक्ष ! जुन मानिसले भक्तिपूर्वक भस्मेश्वरको यो माहात्म्य सुन्छ, त्यसले मनमा लागेका सम्पूर्ण इच्छा पूर्ण गर्छ र विभिन्न भोगहरू भोग्दै अन्त्यमा शिवलोक जान्छ॥३७॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भस्मगङ्गाकुण्डतीर्थ र भस्मेश्वरको माहात्म्यनामक
एकसय सन्ताउन्नौं अध्याय पूरा भयो।

---

१५. ...त्यायितुमगमत्पुनः, इति न.सं.पु.पाठः। १६. स्तेयमाने, इति न.सं.पु.पाठः।
१७. ततो निःसारयच्चौरं ताड्यमानं मुहुश्च ते, इति न.सं.पु.पाठः। १८. जयकाङ्क्षितः, इति न.सं.पु.पाठः।

अष्टपञ्चाशदुत्तरशततमोऽध्यायः

भुवनेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

भूयोऽगमद्विरूपाक्षो नेमुनिना समं मुने। प्रतीच्यां दिशि तस्माद्धि यत्रास्ते भुवनेश्वरः ॥१॥
ज्ञानकुण्डे ततः स्नात्वा भुवनेशमपूपुजत्। राधकृष्णैकादश्यां वै विनिद्रोऽभूद्विरूपदृक् ॥२॥
पप्रच्छ तस्य माहात्म्यं भुवनेशस्य नेमुनिम्। भक्त्या निशि विरूपाक्षः श्रद्दधानो हि कुम्भज ॥३॥
आकर्ण्य तद्वचोऽगस्त्य ! व्याजहार च नेमुनिः। तल्लिङ्गस्य च माहात्म्यं महारात्रौ मुने मुदा ॥४॥

नेमुनिरुवाच

आविर्भूतो च यदा चाऽत्र पशुपतिर्महाविभुः[१]। देवोऽसौ भुवनाख्यश्च कश्चिदत्राययौ भ्रमन्[२] ॥५॥
एतल्लिङ्गं सहर्षञ्च स्थापितं भुवनेन वै। तप्तं तेन[३] कठोरञ्च दिव्यं सहस्रवत्सरम् ॥६॥
सुप्रसन्नाद्[४] वरं लब्ध्वा महादेवात्सुनिश्चयम्। प्रययौ हि स्वकं राज्यं तस्थौ निश्चलविग्रहः ॥७॥
भुवनेश्वर इत्याख्यः सर्वलोकैस्तदा शिवः[५]। पूजितो वरप्राप्त्यर्थं[६] सर्वेप्सितवरप्रदः ॥८॥
एतल्लिङ्गस्य माहात्म्यं शृणु वच्मि महात्मनः। काचिन्मुक्ता पुरा चाऽत्र चैतल्लिङ्गप्रसादतः ॥९॥
आसीद्वैश्या पुरा विप्र ! नाम्ना मधुस्रवा श्रुता। मृते भर्त्तरि विट्पुत्री स्वच्छन्दगमना निशि ॥१०॥
हस्तिनाख्यनगर्यां सा चावासीत्पुंश्चली सदा। स्वगोत्रैर्बान्धवैस्त्यक्ता यावद् द्वादशवत्सरम् ॥११॥

अध्याय - १५८

भुवनेश्वर शिवलिङ्गक महिमा

कुमार स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष पश्चिम दिशातर्फ जहाँ भुवनेश्वर विराजमान हुनुहुन्थ्यो त्यसै क्षेत्रमा गए। त्यहाँ पुगेपछि उनले ज्ञानकुण्डमा स्नान गरेर भुवनेश्वरको अर्चना गरे र वैशाखशुक्ल एकादशीका दिन विरूपाक्ष जाग्राम बसे। हे अगस्त्य मुनि ! विरूपाक्षले रातमा श्रद्धाभक्तिपूर्वक नेमुनिसँग ती भुवनेश्वरको माहात्म्य सोधे। हे अगस्त्य मुनि ! भुवनेश्वरका विषयमा विरूपाक्षले गरेको प्रश्न सुनेर नेमुनिले रातमा आनन्दपूर्वक उनलाई त्यस लिङ्गको माहात्म्य बताउनुभयो ॥१-४॥

नेमुनिले भन्नुभयो – जुनसमयमा यहाँ महाविभु पशुपतिको उत्पत्ति भएको थियो त्यही समयमा यहाँ भुवन नाम गरेका एक राजा आएका थिए, । अत्यन्त प्रसन्न भएर राजा भुवनले यो लिङ्गको स्थापना गरी दिव्य हजार वर्षसम्म कठोर तपस्या गरे। त्यसपछि ती राजा पनि महादेवबाट निश्चित वर पाएर निश्चल भई आफ्नो राज्यमा गएर बसे। त्यसै समयदेखि सबै मानिसले यस लिङ्गलाई भुवनेश्वर भन्न लागे। यस लिङ्गबाट धेरै प्राणीहरूले वर पाएका छन्। यो साक्षात् महादेवको रूप हो। यसको आराधनाबाट इच्छित वर प्राप्त हुन्छ। अत्यन्त गौरवशाली यस लिङ्गको माहात्म्य म तिमीलाई बताउँछु, सुन। पहिले कुनै समयमा यही लिङ्गको अनुग्रहबाट कुनै नारी मुक्त भएकी थिइन् ॥५-९॥

हे ब्राह्मण विरूपाक्ष ! अघि कुनै वैश्यकी मधुस्रवा नामले प्रसिद्ध छोरी थिई। लोग्ने मरेपछि मधुस्रवा राति-राति स्वच्छन्दसित विचरण गर्न लागी। त्यसपछि आफ्ना सगोत्री र दाजुभाइबाट परित्यक्त भएकी त्यो मधुस्रवा बाह्र वर्षसम्म हस्तिनापुरमा वेश्या भएर बसी ॥१०-११॥

---

१. उद्भूतं यदा चात्र पशुपतिं महाविभुम्, इति न.सं.पु.पाठः।
२. अत्रायर्यौ मुदान्वितः, इति न.सं.पु.पाठः।
३. भृशम्, इति न.सं.पु.पाठः ॥
४. भुवनोऽपि, इति न.सं.पु.पाठः।
५. द्विज, इति न.सं.पु.पाठः।
६. लोकवरप्रदः, इति न.सं.पु.पाठः।

वेश्या भूत्वापि साऽजस्रं जहौ नैव हरव्रतम्। रुद्रभक्तिरता नित्यं शिवपूजनतत्परा ॥१२॥
भ्राता ददौ विषं तस्यै लोकनिन्दात्रपेर्ष्यया। म्रियतामिति कृत्वा सा त्यक्ष्यामि तच्च लाञ्छनम् ॥१३॥
ज्ञातवती विषं सा च भ्रात्रा दत्तञ्च मृत्यवे। न बुभुजे तदा क्ष्वेडं हिताय चात्मनो द्विज ॥१४॥
उदासीनमना भूत्वा निर्ययौ नगराद्बहिः। ग्रामाद् ग्रामान्तरं भ्रान्त्वा काशीं प्राप्तवती पुनः ॥१५॥
अश्रृणोत्सा च माहात्म्यं तस्यां हिमवतो वरम्। एतत्पुर्यास्तथा विप्र ! मत्क्षेत्रस्य विशेषतः ॥१६॥
पञ्चाशद्वर्षदेशीया[७] वेश्या सा लोकनिन्दिता। कञ्चिन्नरं समालम्ब्य चाऽत्र गन्तुं प्रचक्रमे ॥१७॥
श्रुत्वा माहात्म्यमेतस्य चेहाययौ मधुस्रवा। ज्ञानकुण्डे ततः सस्नौ वाग्वत्यां सततं पुनः ॥१८॥
अवात्सीत्सततं वेश्या चाऽत्र लिङ्गालये द्विज। भिक्षां प्रार्थ्य जनेभ्यः सा बुभुजे[८] यद्धि तत्सुखम् ॥१९॥
मार्जनेन च सा नित्यं सम्ममार्ज हरालयम्[९]। प्राङ्गणेऽभ्यन्तरे वेश्या जपन्ती शम्भवे नमः[१०] ॥२०॥
एवं संवत्सरञ्चैकं सम्ममार्ज सुयन्त्रिता[११]। एतल्लिङ्गस्य भूमिं सा सन्ध्ययोर्जापतत्परा[१२] ॥२१॥
माघकृष्णस्य चाऽष्टम्यां शीतार्ता सा महानिशि। असून्जहौ स्थलेऽत्रैव[१३] हे रुद्र ! ब्रुवती मुहुः ॥२२॥
रुद्रगणा विमाने तामाधाय त्वरितं ययुः। रुद्रलोकं महोत्साहगीतवाद्यमहोत्सवैः ॥२३॥
साऽप्यभवद् भवान्या वै चाऽनुचरी च योगिनी। एतल्लिङ्गप्रसादाच्च ह्यत्र मार्जनधर्मतः ॥२४॥
कश्चिन्मुक्तः पुरा विप्रः श्रृणु विरूपदृक् पुनः। एतल्लिङ्गप्रसादाच्च ज्ञानकूपजलाप्लवात् ॥२५॥
पूर्वजन्मनि चाऽन्येषां बुद्धिं समग्रहीन् नृपः। परीक्षितुञ्च कस्मैचित्स्वबुद्धिं नाऽप्रकाशयत् ॥२६॥

वेश्या भए पनि शिवजीको भक्तिमा दृढ हुँदै उहाँको पूजामा तल्लीन रहने त्यस स्त्रीले शङ्करको व्रत लिन कहिल्यै छोडिन । उसको भाइले दुनियाँबाट हुने निन्दा, लाज र ईर्ष्याले गर्दा यो कलङ्कलाई छोडिदिन्छु, यो मरोस् भनेर विष खान दियो ॥१०-१३॥

हे विरूपाक्ष ! भाइले आफूलाई मार्नका लागि विषय दिएको कुरा उसले चाल पाई र आफ्नो हितका लागि उसले त्यस समयमा विष खाइन। त्यसपछि उदासीन भएर ऊ त्यो शहरबाट बाहिर निस्किई र एक गाउँबाट अर्को गाउँ घुम्दै पुनः काशीनगरीमा पुगी। त्यस नगरीमा उसले हिमालय, विशेष गरी यो शहर अनि मेरो क्षेत्र(नेपाल)को माहात्म्य सुनी। कुनै मान्छेलाई साथमा लिएर पचास वर्ष पुगेकी लोकनिन्दित त्यस वेश्या यहाँ आउने विचार गरी। मधुस्रवा यस क्षेत्रको माहात्म्य सुनेर यस स्थानमा आई अनि ज्ञानकुण्ड र वाग्वतीमा स्नान गरी ॥१४-१८॥

हे विरूपाक्ष ! त्यो वेश्या सधैँ यसै शिवलिङ्ग रहेको भवनमा बस्न थाली। ऊ मानिसहरूसित भिक्षा मागेर सुखपूर्वक खाने गर्थी। शिवजीको मन्दिरको भित्र तथा बाहिर आँगनमा हर ! शिव ! भन्दै ऊ नित्य बढार्ने गर्दथी। एक वर्षसम्म त्यसले भगवान् शङ्करको नाम लिँदै बिहान तथा साँझको सन्ध्यामा यो लिङ्ग भएको क्षेत्रलाई बढारबुढुर गरी। माघकृष्ण अष्टमीको रातमाजाडोले पीडित भएर त्यो वेश्याले बारम्बार हे रुद्र ! भन्दै प्राणत्याग गरी। मरेपछि उसलाई तत्काल रुद्रका गणहरूले विमानमा राखेर बडो उत्साहका साथ गीत गाउँदै, बाजा बजाउँदै र उत्सव गर्दै शिवलोक लगे। मधुस्रवाले यस क्षेत्रको सरसफइ गर्दा प्राप्त भएको लिङ्गको कृपाले गर्दा भगवती पार्वतीकी सेविका योगिनी भएर बस्ने सौभाग्य पाई ॥१९-२४॥

हे विरूपाक्ष ! अघि कुनै ब्राह्मण ज्ञानकूपको जलमा गरेको स्नान र यस लिङ्गको अनुग्रहले गर्दा मुक्त भएका थिए, सुन। कुनै राजाले आफ्नो पूर्वजन्ममा परीक्षणका लागि अरूका विचार मात्र सङ्ग्रह गर्थे तर आफ्नो विचार कसैलाई पनि भन्दैनथे। ती राजा कुनै दिन तीर्थयात्रा गर्न गएका थिए ॥२५-२६॥

---

७. पञ्चाशाब्दवयोपेता, इति न.सं.पु.पाठः।
८. भुञ्जीत, इति न.सं.पु.पाठः।
९. समार्जयद्धरालयम्, इति न.सं.पु.पाठः।
१०. हरः शिवेति वै वदन्, इति न.सं.पु.पाठः।
११. यावत्सम्मार्जयत्तदा, इति न.सं.पु.पाठः।
१२. सन्ध्ययोर्नाम संवदन्, इति न.सं.पु.पाठः।
१३. असून् जहौ च साऽत्रैव, इति न.सं.पु.पाठः।

एतत्खर्वरिकातीर्थे सस्नौ तीर्थाटनो नृपः । तत्पुण्यस्य प्रभावात्स विप्रोऽभूच्छ्रुतिवर्जितः ॥२७॥
प्राग्जन्मनो हि दोषेण चाज्ञोऽभूद्विप्रविग्रहः । आर्यातीर्थप्रसादाच्च सत्यैर्विवर्जितोऽनिशम् ॥२८॥
मर्कटास्यः पुनश्चासौ चाऽत्राऽवासीच्च निर्जनः । याचकवृत्तिमाश्रित्य ज्ञानकूपजलं पपौ ॥२९॥
तज्जलपानमात्रेण[१४] स चाऽज्ञो ज्ञानवान् ध्रुवम् । अभूत्तदैव तत्कूपे नित्यं सस्नौ सुभक्तितः ॥३०॥
एतल्लिङ्गं समानर्च जगौ गीतानि भक्तितः[१५] । अत्र पुष्पफलैस्तोयैः परिक्रम्य पुनर्हि सः ॥३१॥
चतुर्थवत्सरं यावन्निरन्तरमसेवत[१६] । स्वात्मानञ्च निवेद्यार्यं[१७] महादेवाय भक्तितः ॥३२॥
स मर्कटाननो भिक्षुः पञ्चत्वं प्राप्तवान्निशि । पौषकृष्णचतुर्दश्यामेतल्लिङ्गान्तिके द्विज ॥३३॥
शैवा याने तमास्थाय निन्युः शिवपुरं गणाः । गीतवाद्यमहोल्लासैरप्सरोभिः प्रसेवितम्[१८] ॥३४॥
सोऽप्यभवद् गणश्रेष्ठो रुद्रस्याऽनुचरोऽनिशम् । एतल्लिङ्गप्रसादाद्वै ज्ञानकुण्डजलाप्लवात् ॥३५॥
भूयो गच्छ विरूपाक्ष रुद्रागारेश्वरं शिवम्[१९] । रुद्रस्नानोदके कुण्डे स्नात्वाऽर्चय सभक्तिकम्[२०] ॥३६॥

ये शृण्वन्ति प्रसभमनिशं सम्यगध्यायमेनं
ते प्राप्स्यन्ति द्रुतमसुभृतां दुर्लभं लोकभद्रम् ।
एनोवर्गै रहितवपुषः प्राक्कृतैश्चाऽद्यजातै-[२१]
र्भुक्त्वा भोगानिह खलु सुचिरं पूर्णवाञ्छाश्च धन्याः[२२] ॥३७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां भुवनेश्वरमाहात्म्यं नाम अष्टपञ्चाशदुत्तरशततमोऽध्यायः ॥१५८॥

तीर्थयात्रामा निस्केका ती राजाले खर्वरिका नाम गरेको तीर्थमा स्नान गरे । जसले गर्दा उनी ब्राह्मण भएर जन्मिए पनि उनलाई वेदको ज्ञान भएन । आर्यातीर्थको अनुग्रहले गर्दा ब्राह्मण भएर जन्मिए पनि पूर्वजन्मको दोषले यिनी सधैँ सत्य अर्थात् ज्ञानबाट विमुख भएका थिए ॥२५-२८॥

बाँदरको मुख भएका यी ब्राह्मण एक्लै यसै तीर्थमा बसे । माग्ने वृत्ति अँगालेर बसेका उनी ज्ञानकूपको जलपान गर्थे । त्यस कुवाको जल धेरै पिएको हुनाले अज्ञानी ती ब्राह्मण ज्ञानी भए । उनले सधैँ भक्तिपूर्वक यस कुवामा स्नान गरे । यस ठाउँमा परिक्रमा गरेर भक्तिपूर्वक भगवान्को भजन गाउँदै फूल, फल र जल लिएर उनले यस लिङ्गको पूजा गरेका थिए । हे विरूपाक्ष ! उनले अर्घ्यसँगै आफूलाई समेत भक्तिपूर्वक महादेवलाई समर्पित गरी चार वर्षसम्म नित्य यस लिङ्गको आराधना गर्ने गर्थे ॥२९-३२॥

हे विरूपाक्ष ! बाँदरको जस्तो मुख भएका ती भिक्षु पौषकृष्ण चतुर्दशीका दिन राति यसै लिङ्गको समीपमा मरे । शिवदूतहरूले अप्सराहरूद्वारा सेवा गरिएका उनलाई यानमा राखेर गीत गाउँदै, बाजा बजाउँदै र उत्सव गर्दै शिवलोकमा लगे । ज्ञानकुण्डको स्नान र यस लिङ्गको अनुग्रहले गर्दा उनी प्रमथगणका नेता भएर रुद्रका सेवक बन्न पुगे ॥३३-३५॥

हे विरूपाक्ष ! अब तिमी जहाँ रुद्रागारेश्वर भगवान् बस्नुभएको छ, त्यहाँ जाऊ र रुद्रकुण्डमा स्नान गरेर भगवान् शिवको आराधना गर ॥३६॥

हे विरूपाक्ष ! जसले यो अध्याय कुनै पनि किसिमले राम्रोसँग नित्य सुन्दछन्, तिनीहरूले प्राणीहरूले प्राप्त गर्न नसक्ने कल्याणदायक लोक प्राप्त गर्दछन् । पूर्वजन्ममा नराम्रो काम गरेको भए पनि यस जन्ममा पापबाट मुक्त भएर धेरै समयसम्म सांसारिक सुखभोग गर्दै उनीहरूले इच्छा अनुसारको फल पाउँछन् र तिनीहरू धन्य छन् ॥३७॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा भुवनेश्वरको माहात्म्यनामक
एकसय अन्ठाउन्नौं अध्याय पूरा भयो ।

---

१४. तज्जलापीतमात्रेण, इति न.सं.पु.पाठः ।
१५. भक्तिभावैश्च गीतवान्, इति न.सं.पु.पाठः ।
१६. यावन्नित्यमेवमसेवयत्, इति न.सं.पु.पाठः
१७. स्वात्माने निवेद्यार्घ्यम्, इति न.सं.पु.पाठः ।
१८. प्रसेवयन्, इति न.सं.पु.पाठः ।
१९. रुद्रागारेश्वरो विभुः, इति न.सं.पु.पाठः ।
२०. पूजयत शिवम्, इति न.सं.पु.पाठः ।
२१. प्राक्कृतैश्चाप्यसज्जै, इति न.सं.पु.पाठः ।
२२. सुचिरं वाञ्छितार्थाश्च यान्यान्, इति न.सं.पु.पाठः ।

ऊनषष्ट्युत्तरशततमोऽध्यायः

रुद्रागारेश्वरशिवलिङ्गमाहात्म्यम्

स्कन्द उवाच

सिद्धोऽसौ चाऽगमद्यत्र रुद्रागारेश्वरः पुनः । सिद्धर्षिणा सहाऽगस्त्य ! स्थित्वा च द्वे निशे[1] मुदा ॥१॥
राधाकृष्णत्रयोदश्यां रुद्रस्नानोदकोत्तमे । रुद्रागारेश्वरं लिङ्गं स्नात्वा चाऽपूपुजद्धि सः ॥२॥
तन्निशायां विरूपाक्षो माहात्म्यं नेमुनिं पुनः । भक्त्याऽपृच्छत् प्रणम्यादौ तल्लिङ्गस्य घटोद्भव ॥३॥
आकर्ण्य तद्वचो रात्रौ तन्माहात्म्यञ्च नेमुनिः । व्याजहार वचो भूयः श्रद्दधानाय भक्तितः ॥४॥

नेमुनिरुवाच

रुद्रेण स्थापितं पूर्वमेतल्लिङ्गं स्वयं द्विज । शयनाय स्वकीयाय रहःसुखेप्सया सदा ॥५॥
तस्मात्ख्यातश्च लोकेषु रुद्रागारेश्वरो विभुः[2] । भुक्तिमुक्तिप्रदः साक्षाद् भक्ताय वाञ्छितार्थदः ॥६॥
शृणु सिद्ध ! प्रवक्ष्यामि कश्चिन्मुक्तः पुराऽत्र ते । एतल्लिङ्गप्रसादात्स रुद्रस्याऽनुचरोऽभवत् ॥७॥
आसीदत्र विरूपाक्ष ! किरातानां गरिष्ठकः । शङ्कुर्नाम बली म्लेच्छः किरातैरावृतः सदा ॥८॥
तुलास्थिते रवौ कैश्चिन्म्लेच्छैः सह धनुर्धरः । मृगयामगमच्छङ्कुर्बलाकेश्वरकानने ॥९॥
धर्मेश्वरं महालिङ्गं शङ्कुर्ददर्श पूजितम् । नानापुष्पोपहारैश्च ऋषिवृन्दैर्महोत्सवैः ॥१०॥
अन्ये म्लेच्छाश्च तल्लिङ्गं स्थगितगतयः क्षणम् । किमिति समुपाश्रित्य प्रणेमुस्तैः प्रपूजितम् ॥११॥
पश्यन्नपि ययौ शङ्कुर्वने ह्यदर्शको यथा[3] । विहायानुचरान् सद्यस्तत्प्रेक्षणोत्सुकाँस्तदा ॥१२॥

अध्याय – १५९

रुद्रागारेश्वर शिवलिङ्गको महिमा

कार्तिक स्वामीले भन्नुभयो – हे अगस्त्य मुनि ! त्यसपछि विरूपाक्ष सिद्धर्षि नेमुनिलाई साथमा लिएर जहाँ रुद्रागारेश्वर विराजमान हुनुहुन्थ्यो त्यसै ठाउँमा आए र दुई रात त्यहाँ बसे । वैशाखकृष्ण त्रयोदशीका दिन उत्तम रुद्रस्नानोदक नाम गरेको तीर्थमा स्नान गरेर उनले रुद्रागारेश्वर शिवलिङ्गको पूजा गरे ।।१–२।।

हे अगस्त्य मुनि ! त्यसै दिन राति लिङ्गलाई प्रणाम गरेर विरूपाक्षले नेमुनिसित त्यस लिङ्गको माहात्म्य सोधे । त्यो वचन सुनेर नेमुनिले राति भक्ति र श्रद्धाले ओतप्रोत बनेका विरूपाक्षलाई त्यस लिङ्गको माहात्म्य बताउनुभयो ।।३–४।।

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! यो लिङ्ग अघि भगवान् रुद्रले एकान्त स्थलमा शयन गरी आनन्द लिनका लागि आफैं स्थापना गर्नुभएको हो । त्यसैले यो लिङ्ग साक्षात् रुद्रागारेश्वरका नामले संसारमा प्रसिद्ध भएको छ । यसले आफ्ना भक्तहरूलाई भुक्ति, मुक्ति र इच्छा लागेको वस्तु दिन्छ । हे विरूपाक्ष ! अघि कुनै व्यक्ति यस ठाउँमा यही लिङ्गको कृपाबाट शिवजीको सेवक बन्न पुगेको थियो । त्यो कथा बताउँछु, सुन ।।५–७।।

हे विरूपाक्ष ! यहाँ अघि शङ्कु नाम गरेको बलियो किरातजातिको मानिस थियो । उसलाई अरू किरातहरूले सधैं घेरिरहेका हुन्थे । सूर्य तुला राशिमा पुगेको बेला कार्तिक महिनामा म्लेच्छहरूलाई साथमा लिएर धनुर्धारी शङ्कु नाम गरेको म्लेच्छ बलाकेश्वर भगवान् रहनुभएको जङ्गलमा शिकार खेल्न गयो । त्यहाँ शङ्कुले विभिन्न किसिमका फूल र पूजासामग्री लिएर बडो उत्सवका साथ ऋषिहरूद्वारा पूजा गरिएको अवस्थामा शिवजीको धर्मेश्वर महालिङ्गको दर्शन गर्‍यो । अरू म्लेच्छहरूले पनि हिँड्न छोडेर 'के रहेछ हेरौं' भनी शिवलिङ्गको नजिकै गए र पूजित शिवलिङ्गलाई प्रणाम गरे । तर शङ्कुले भने पूजा गरेको देखे पनि नदेखेजस्तै गरेर हेर्न गएका आफ्ना साथीहरूलाई समेत छोडेर गयो ।।८–१२।।

---

१. उषित्वा, इति न.सं.पु.पाठः ।　२. लोकेषु लिङ्गं रुद्रमन्दिरेश्वरः, इति न.सं.पु.पाठः ।
३. इव ह्यदर्शकः, इति न.सं.पु.पाठः ।

तेऽपि तत्र द्रुतं गत्वा समूचुः[४] शङ्कवे तदा। लिङ्गोत्सवस्य वृत्तान्तं हार्देन सहसा द्विज ॥१३॥
आकर्ण्य वचनं तेषां शङ्कुर्व्याचष्ट सत्त्वरम्। न दृष्टः स[५] सखेऽस्माभिर्मुनिभिः पूजितो हरः ॥१४॥
इत्युक्त्वा प्रययौ शङ्कुर्मृगान् हन्तुं वनेचरान्। मुनिभिः पूजिते रुद्रे दृष्टेऽप्यनृतभाषणः[६] ॥१५॥
हत्वा जन्तून् वने शङ्कुर्यावदस्तं गते रवौ। तन्मांसानि समादाय गन्तुं प्रचक्रमे गृहम् ॥१६॥
तस्य ते च सखायोऽपि त्यक्त्वा तं[७] गृहमाययुः। तद्वनेऽदृश्यमानन्ते कुत्र गत इति ब्रुवन् ॥१७॥
मांसभारं समादाय शङ्कुर्विनिर्ययौ वनात्। एतन्महास्थलीकूटे यावन्न प्राप्तवान्भवेत् ॥१८॥
तावच्छङ्कोर्विहीने द्वे तेजोभिर्लोचने द्विज[८]। स्थगितायां सृतौ तस्य सन्ध्यायां मांसभारिणः[९] ॥१९॥
दृश्यमानञ्च तल्लिङ्गमृषिवृन्दैः प्रपूजितम्। नेति दृष्टं मृषा प्रोक्तं तत्पापैः सोऽन्धकोऽभवत् ॥२०॥
तत्रैव पतितो रात्रौ भाराक्रान्तः परिश्रमात्। तेजोविहीननेत्रत्वाद् द्रष्टुं नैव शशाकः ह[१०] ॥२१॥
ततः प्राप्तो मुनिः कश्चित्तं प्रेक्ष्य कृपया युतः। स्वहस्तेन समालम्ब्यानिनायेह शनैः शनैः[११] ॥२२॥
चक्षुर्भ्याञ्च विहीनोऽसौ चाऽस्मात्कुत्रापि नो गतः। काष्ठवत्पतितो विप्र ! तत्रैव धरणीतले ॥२३॥
गन्धर्वा ऋषयो नित्यमेतल्लिङ्गं सुरासुराः। स्तोत्रैर्गीतैरसेवन्त तालैर्नृत्यैर्मृदङ्गकैः[१२] ॥२४॥
तत्छब्दमशृणोच्छङ्कुः किञ्चिद् ज्ञानान्वितः पुनः। अब्रवीदनिशं सोऽपि चेदृशं नाम वै द्विज ॥२५॥
हे रुद्र भो महादेव ! सर्वभूतदयाकर। चक्षुर्हीनमनाथं मां रक्ष रक्ष सदाशिव ॥२६॥

हे विरूपाक्ष ! तिनीहरूले पनि उत्सव सकिनासाथ छिटो छिटो गएर शङ्कुलाई भेटे र तुरुन्तै त्यस उत्सवको सम्पूर्ण वृत्तान्त हृदयदेखि नै खोलेर बताए। तिनीहरूको वचन सुनेर शङ्कुले तुरुन्त जवाफ दियो– 'हामीहरूले त ऋषिहरूले शिवजीको पूजा गरेको देखेनौं'। यसरी मुनिहरूले महादेवको पूजा गरेको देखेर पनि उसले सरासर झूठो बोल्ने त्यो शङ्कु एकछिनपछि वनमा बसेका मृगलाई मार्न जङ्गलतिर लाग्यो। जङ्गलमा जनावरहरूलाई मारेर सूर्य अस्ताएपछि मासु लिएर त्यो शङ्कु घरतिर फर्कियो। त्यसका साथीहरू पनि शङ्कुलाई जङ्गलमा नदेखेर कतै गयो होला भन्दै त्यसलाई छोडेर आफ्नो घरतिर आए। जनावरको मासुको भारी बोकेर शङ्कु वनबाट बाहिर निस्कियो। महास्थलीको टाकुरासम्म ऊ खुरुखुरु आइरहेको थियो ॥१३–१८॥

हे ब्राह्मण विरूपाक्ष ! त्यहाँ शिवलिङ्गको समीप आइनपुग्दै शङ्कुका दुबै आँखाको ज्योति बन्द भयो। त्यसबखत साँझ परिसकेको थियो। भारीसमेत बोकेको हुँदा ऊ एक पाइलो पनि हिँड्न सकेन। पहिले ऋषिहरूले रुद्रागारेश्वरलिङ्गको पूजा गरेको देख्दादेख्दै पनि देखिन भनेर उसले जुन झूठो बोल्यो, त्यसै पापले गर्दा त्यो अन्धो भयो। भारी बोकेको थकाइले गर्दा राति त्यो त्यसै ठाउँमा पल्टियो। आँखा तेजरहित भएका हुँदा उसले हेर्न सकेन। त्यहाँ कुनै मुनि आए। उसलाई देखेर उनको मनमा दया जाग्यो। उनले आफ्नो हातले समातेर शङ्कुलाई यहाँ ल्याए ॥१९–२२॥

हे विरूपाक्ष ! दृष्टिविहीन भएको त्यो शङ्कु त्यहाँबाट कतै पनि जान सकेन। त्यसै ठाउँमा काठजस्तै भएर लडिरह्यो। गन्धर्व, ऋषि, देवता र दानवहरूले स्तोत्र पाठ गरेर, गीता गाएर, मादल बजाएर, ताली बजाएर अनि विभिन्न नाँच नाँचेर यस लिङ्गको आराधना गरिरहेका थिए। शङ्कुले त्यो शब्द सुन्यो र उसलाई केही ज्ञान भयो। अनि उसले पनि यस्तै खालका नाम सधैं जप्न थाल्यो। सम्पूर्ण प्राणीलाई दया गर्ने हे रुद्र ! हे महादेव ! हे सदाशिव ! आँखा नभएको मलाई रक्षा गर्नुहोस् ॥२३–२६॥

---

४. प्रचक्षुः, इति न.सं.पु.पाठः।
५. न दृष्टं तम्, इति न.सं.पु.पाठः।
६. दृश्यमानेऽनृतोक्तकः, इति न.सं.पु.पाठः।
७. त्यज्य तद्, इति न.सं.पु.पाठः।
८. तावच्छङ्कोर्विहिनौ द्वौ तेजोभिलोचनौ द्विज, इति न.सं.पु.पाठः।
९. मांसभारसमाक्रान्ता सन्ध्यान्ते स्थगिता सृतिः, इति न.सं.पु.पाठः।
१०. तेजोविहीननेत्राभ्यान्नयनागोचरोऽभवत्, इति न.सं.पु.पाठः।
११. समालम्ब्य अत्रानीयत वै तदा, इति न.सं.पु.पाठः।
१२. स्तोत्रैर्गीर्मृदङ्गैश्च तालैर्नृत्यैरसेवयन्, इति न.सं.पु.पाठः

नेत्रे देहि महादेव ! येन सेवेय त्वां भुवि[१३] । ततस्त्वत्सेवकोऽहं त्वां न मोक्ष्यामि क्षणं विभो ॥२७॥
एवमुक्त्वा सदा शङ्कुर्बध्वाञ्जलिं ननाम हि। तदा लिङ्गान्तिकं गत्वा कराभ्यामस्पृशच्छनैः ॥२८॥
कार्त्तिकस्य चतुर्दश्यां घृताक्ते वर्त्तिके ददौ । शिखायुते च सन्ध्यायां याचमानो जनान् खलु[१४] ॥२९॥
स रात्रौ श्रुतवान्[१५] स्वप्ने चैकसंवत्सरान्तरे । रुद्रवाणीं ततः शङ्कुर्यतिरूपेरितां शिवाम् ॥३०॥
एतत्कुण्डजलेनाशु नेत्रे सम्मार्ज्य[१६] यत्नतः । दीपं ददासि लिङ्गाय दृग्भ्यां द्रक्ष्यसि तद्[१७] ध्रुवम् ॥३१॥
आकर्ण्य तद्वचः शङ्कुर्हर्षात्प्रफुल्लमानसः । लिङ्गस्य पूजकं कञ्चिदब्रवीदीदृशं वचः[१८] ॥३२॥
भो दातर्मे ह्यनाथाय नेत्रहीनाय तज्जलम् । एतत्कुण्डात्समानीय दीयतां मे कृपां कुरु ॥३३॥
लिङ्गमभ्यर्च्य विप्रोऽसौ धर्मदास इति श्रुतः । जलमादाय तत्कुण्डात्तस्मै मृत्पात्रके ददौ ॥३४॥
देहि स्वामिन्ननाथाय चेत्युक्त्वा मुमुदे तदा[१९] । प्रणम्य शिरसा भक्त्या तज्जलं पाणिनाग्रहीत् ॥३५॥
शिवेति शङ्करेत्युक्त्वा करस्थेन जलेन सः । अस्पृशल्लोचने चेति मत्वा सिद्धरसं हृदा ॥३६॥
उन्मील्य तदा शङ्कुरेतल्लिङ्गं ददर्श च । पुरतः समभिव्यक्तं स्मरणीयं महत्तरम्[२०] ॥३७॥
उन्मील्य लोचनं हृष्टः[२१] सुप्तोत्थितो यथा चिरम् । चतुर्दिक्षु ददर्शाशु लिङ्गसद्मानि सर्वतः ॥३८॥
ननाम स महाहर्षाद् लिङ्गं परिक्रमन्मुहुः । शिवाय शङ्करायेति नमो नम इति स्तुवन् ॥३९॥

हे महादेव ! मलाई दुईवटा आँखा दिनुहोस्, जसले गर्दा म हजुरको सेवा गर्न सकूँ। हे प्रभु ! त्यसपछि हजुरको सेवक भएर म एकछिन पनि हजुरलाई छोड्नेछैन। यति भनेर शङ्कुले अञ्जलि बाँधेर नमस्कार गऱ्यो। लिङ्गको नजिकै गएर बिस्तारै उसले हातले स्पर्श गऱ्यो। कार्तिक चतुर्दशीका दिन मानिसहरूसँग घिउमा भिजाएका दुई जोर बत्ती मागेर उसले सन्ध्याकालमा बाल्यो। त्यसै रातमा शङ्कुले एउटा सपनामा योगीको मुखबाट निस्किएको कल्याणकारक एक वर्षभित्र तैँले एउटा आँखो पाउनेछस् भन्ने वचन सुन्यो– हे शङ्कु ! यस कुण्डको जलले आफ्नो आँखा पखालेर यस लिङ्गलाई दीपदान गरिस् भने निश्चय नै तँ दुबै आँखाले हेर्न सक्ने हुनेछस् ॥२७–३१॥

यस्तो सपना देखेर शङ्कुको मन अत्यन्त प्रफुल्लित भयो। त्यस लिङ्गको पूजा गरिरहेको कुनै मानिसलाई उसले भन्यो– हे दाता ! मजस्तो आँखा नभएको अनाथलाई त्यस कुण्डबाट अलिकति जल ल्याएर दिनुहोस्, ममाथि कृपा गर्नुहोस्। यस्तो कुरा सुनेर धर्मदास नाम गरेको ब्राह्मणले लिङ्गको पूजा गरे, माटको भाँडामा त्यस कुण्डबाट जल ल्याएर शङ्कुलाई दिए। शङ्कुले पनि 'हे स्वामी ! यस अनाथलाई त्यो पवित्र जल दिनुहोस्, दिनुहोस्' भनी अति प्रसन्न भएर धर्मदासलाई शिरले प्रणाम गरी त्यो जल हातमा लियो। अनि त्यस जललाई सिद्धरस सम्झेर खुसी हुँदै हे शिव ! हे शङ्कर ! भनेर हातमा रहेको जल आफ्नो दुबै आँखामा लगायो। त्यसपछि जब शङ्कुले आँखा उघाऱ्यो तब उसले आफ्ना अघिल्तिर अत्यन्त सुन्दर यस लिङ्गको स्पष्ट रूपमा दर्शन पायो। आँखा उघारेपछि शङ्कु धेरैबेर निदाएर उठेजस्तै गरी आँखा मिच्दै गर्दा उसले चारै दिशामा सबैतिर लिङ्गैलिङ्ग भएको देखी अत्यन्त प्रसन्न भयो। उसले नमः शिवाय, नमः शङ्कराय भनेर स्तुति गर्दै बारम्बार लिङ्गको परिक्रमा गऱ्यो र अत्यन्त हर्षित भएर त्यस लिङ्गलाई नमस्कार गऱ्यो ॥३२–३९॥

---

१३. जीवः सुखं हि मे, इति न.सं.पु.पाठः ।
१४. याच्यमानो जनान् खलु, इति न.सं.पु.पाठः ।
१५. तद्रात्रावलभत, इति न.सं.पु.पाठः ।
१६. संस्पर्श्य, इति न.सं.पु.पाठः ।
१७. दर्शिष्यसि, इति न.सं.पु.पाठः ।
१८. कञ्चिच्च पूजकं लिङ्गं चाब्रवीदीदृशं वचः, इति न.सं.पु.पाठः ।
१९. चेत्युक्त्वाशु मुमोद सः, इति न.सं.पु.पाठः ।
२०. पुरतो हि समव्यक्तं सुसुन्दरं महत्तरम्, इति न.सं.पु.पाठः ।
२१. मुमोद लोचनोन्मील्य, इति न.सं.पु.पाठः ।

आषाढपूर्णिमायां स शङ्कुश्च दिवसे[२२] पुनः । पुपूज[२३] पुष्पतोयैस्तद्विनाशनं विनिद्रकः ॥४०॥
एवं सम्पूजितं लिङ्गं शङ्कुना भक्तितोऽनिशम् । यावद्वत्सरमेकञ्च मुदा पञ्चोपचारकैः ॥४१॥
तत्पूर्णिमादिने रुद्रश्चैतल्लिङ्गाद् विनिर्गतः । वरं दातुं मुदा तस्मै तद्भक्तिभिः प्रतोषितः ॥४२॥
साधु साध्विति शङ्को वै गृहाण स्वायुधद्वयम्[२४] । त्रिशूलं डमरुं त्र्यक्षः ददौ तस्मै हरः स्वयम् ॥४३॥
इति दत्त्वा वरं तस्मै लिङ्गे तिरोदधे हरः । कृतार्थतां तदा मेने ततः शङ्कुः प्रहर्षितः ॥४४॥
ततो रुद्रगणा याने तमास्थाप्य विहायसा[२५] । निन्युः शिवपुरं भद्रं बहुमानपुरःसरम् ॥४५॥
सोऽप्यभवद् गणश्रेष्ठो वर्त्तिकायाः प्रदानतः[२६] । रुद्रस्याऽनुचरो नित्यं कोटिनागबलान्वितः ॥४६॥
रुद्रागारेश्वरं लिङ्गमाराधय विभूतिदम् । दीपदानेन रुद्रं तं[२७] भुक्तिमुक्तिफलप्रदम् ॥४७॥
अतो गच्छ विरूपाक्ष ! यत्र नागेशवासुकिः । सम्पूज्य प्रथमं भक्त्या[२८] नानालिङ्गानि सर्वतः ॥४८॥

अध्यायेऽस्मिन् गिरिशगुरुतां भक्तिभावार्द्रचित्ता
दीपज्वालोद्भवहरपशुपतिप्रोद्धृतम्लेच्छदेहाम् ।
ये शृण्वन्ति प्रवरमनुजाश्चैकचित्तं विधाय
यास्यन्त्यार्यागिरिशभवनं सर्वपापं विहाय ॥४९॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां
रुद्रागारेश्वरमाहात्म्यं नाम ऊनषष्ट्युत्तरशततमोऽध्यायः ॥१५९॥

फेरि अर्को वर्षको आषाढपूर्णिमाका दिन त्यस शङ्कुले निराहार बसेर जल, पुष्प आदिले पूजा गऱ्यो, रात्रीमा जागरण गऱ्यो । यसरी शङ्कुले एक वर्षसम्म पञ्चोपचार विधिले तत्पर भएर भक्तिपूर्वक सधैँ यस लिङ्गको पूजा गऱ्यो । त्यसै पूर्णिमाको दिन भगवान् शङ्कर उसको भक्तिबाट प्रसन्न भएर सहर्ष उसलाई वर दिन यसै लिङ्गबाट आविर्भाव हुनुभयो ॥४०–४२॥

हे शङ्कु ! तिमीलाई धन्यवाद छ ! यी दुईवटा अस्त्र धारण गर, भनेर त्रिनयन भगवान् शङ्कर आफैँले उसलाई त्रिशूल र डमरु दिनुभयो । यसरी शङ्कुलाई वर दिएपछि भगवान् शङ्कर त्यसै लिङ्गमा विलीन हुनुभयो । त्यसबखत शङ्कुले पनि खुसी हुँदै आफूलाई कृतार्थ सम्झियो । त्यसपछि शिवजीका गणहरूले यानमा त्यसलाई राखेर बडो सम्मानका साथ आकाशको बाटो गरी कल्याणदायक शिवपुरमा लगे । त्यो शङ्कु पनि दीपदान गरेको हुँदा करोडौँ हात्तीको बलले युक्त भएर रुद्रगणमा श्रेष्ठ हुनपुग्यो र शिवजीको सेवक भई बस्यो ॥४३–४६॥

हे विरूपाक्ष ! ऐश्वर्य तथा भुक्ति र मुक्ति दिने उज्यालो मन्दिरमा रहेको रुद्रागारेश्वर लिङ्गको आराधना गर र जहाँ नागराज वासुकि हुनुहुन्छ त्यस स्थानमा जाऊ । त्यहाँ चारैतिर लिङ्गहरू रहेका छन् । सर्वप्रथम तिमीले त्यहाँ वासुकिको पूजा गर ॥४७–४८॥

यस अध्यायमा भक्तिभावले एकचित्त भएर शङ्कुले दिएको दीपको ज्वालाबाट उत्पन्न म्लेच्छको शरीरलाई उद्धार गरेको भगवान् शङ्करको कथा वर्णित छ । जसले यो कथा भक्तिभावले एकचित्त भएर सुन्छन्, ती सबै सम्पूर्ण पापबाट मुक्त भएर शिव तथा पार्वतीको लोकमा जान्छन् ॥४९॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको
हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा रुद्रागारेश्वरको माहात्म्यनामक
एकसय उनन्साठिऔँ अध्याय पूरा भयो ।

---

२२. तद्दिने, इति न.सं.पु.पाठः ।
२३. सम्पूज्य, इति न.सं.पु.पाठः ।
२४. स्वायुधे इमे, इति न.सं.पु.पाठः ।
२५. स्वायुधे इमे, इति न.सं.पु.पाठः ।
२६. वर्त्तिकैकाप्रदानतः, इति न.सं.पु.पाठः ।
२७. प्रदीपमन्दिरं रुद्रम्, इति न.सं.पु.पाठः ।
२८. कार्यम्, इति न.सं.पु.पाठः ।

षष्ट्युत्तरशततमोऽध्यायः

वासुकिवरप्रदानप्रसङ्गः

स्कन्द उवाच

सम्पूज्य विधिवत्सिद्धो लिङ्गानि सर्वशो मुने। नामधेयानि सिद्धर्षिमपृच्छत्तत्र तत्र च ॥१॥

विरूपाक्ष उवाच

चतुरधिकषष्टेश्च लिङ्गानां महिमा श्रुतः[१]। भवत्क्षेत्रोद्भवानां हि भवतश्च प्रसादतः ॥२॥

लिङ्गानां नामधेयानि शेषाणां भवतः प्रभो। अन्येषां श्रोतुमिच्छामि पृथक् पृथक् वद प्रभो ॥३॥

वासुकेर्नागराजस्य माहात्म्यञ्च तथा पुनः। महालिङ्गस्य सिद्धर्षे ! पशुपतेर्विशेषतः ॥४॥

सिद्धर्षिरुवाच

अयुतानि च कोटीनां लिङ्गानि सन्ति चाऽत्र वै। पाशुपते महाक्षेत्रे सर्वा लिङ्गमयी क्षितिः ॥५॥

तिलः पतति चैकोऽपि चैतत्क्षेत्रोपरि द्विज। लिङ्गस्योपरि सम्यग्वै तिष्ठति तत्तिलो दृढम् ॥६॥

सुकृतदुष्कृतान्यार्य ![२] पुंसामत्र कृतानि यत्। अक्षयानि च कल्पन्ते स्वर्गनरकदानि च[३] ॥७॥

नामधेयानि तेषान्ते कथं वक्ष्ये विरूपदृक्। मृत्तिकाच्छादितानाञ्च ह्यदृश्यानां रसान्तरे ॥८॥

गरिष्ठानाञ्च लिङ्गानां स्थापितानां सुरर्षिभिः। केषाञ्चन प्रमुखाणां वक्ष्ये नामानि सम्प्रति[४] ॥९॥

ब्रह्मेश्वरमिदं लिङ्गं ब्रह्मणा स्थापितं पुरा। पूजकानां सदा भक्त्या ब्रह्मलोकफलप्रदम् ॥१०॥

विष्ण्वीश्वरमिदं लिङ्गं विष्णुना स्थापितं पुरा। भक्त्या तदर्च्चकानाञ्च विष्णुलोकफलप्रदम् ॥११॥

अध्याय – १६०

वासुकिलाई वरप्रदान गरिएको प्रसङ्ग

कार्तिक स्वामीले भन्नुभयो – हे मुनि ! ती सिद्ध विरूपाक्षले सबै लिङ्गको विधिपूर्वक पूजा गरे अनि ठाउँ–ठाउँमा रहेका लिङ्गको नाम नेमुनिसित सोधे ॥१॥

विरूपाक्षले भने – हे प्रभो ! हजुरका अनुग्रहबाट मैले चौसट्ठी लिङ्गको उत्पत्ति र हजुरको क्षेत्रमा रहेका अन्य लिङ्गहरूको माहात्म्य सुनेँ। हे प्रभो ! बाँकी रहेका अन्य लिङ्गका विषयमा पनि म हजुरबाट सुन्न चाहन्छु, अलग अलग गरेर सबै बताइदिनुहोस्। हे सिद्धर्षि ! नागराज वासुकिको माहात्म्य र विशेष गरी पशुपतिमहालिङ्गको माहात्म्य बताइदिनुहोस् ॥२–४॥

नेमुनिले भन्नुभयो – यस पशुपतिक्षेत्रमा करोडौँ करोड लिङ्गहरू छन्। यहाँको सबै पृथ्वी लिङ्गमय छ। हे विरूपाक्ष ! यहाँ एउटा मात्रै तिल खस्यो भने पनि त्यो तिल लिङ्गमाथि अँठिलो भएर बसेको हुन्छ अर्थात् भूमिमा झरेको हुँदैन। यस क्षेत्रमा मानिसले स्वर्गदायक धर्म अथवा नरकका कारक पाप आदि जे जे कर्म गर्छन् ती सबै अक्षय हुन्छन् ॥५–८॥

हे विरूपाक्ष ! मायेले छोपिई पृथ्वीभित्र पुरिएर अदृश्य भएका ती लिङ्गहरूको नाम म तिमीलाई कसरी बताऊँ ? तीमध्ये देवता तथा ऋषिहरूले स्थापना गरेका, यहाँ रहेका महत्त्वपूर्ण लिङ्गहरूका केही नामहरू म बताउँछु, सुन। हे विरूपाक्ष ! भक्तिपूर्वक पूजा गर्ने व्यक्तिलाई सधैँ ब्रह्मलोक प्राप्त गराउने यो ब्रह्मलिङ्ग ब्रह्माजीले स्थापना गर्नुभएको हो। श्रद्धाभक्तिपूर्वक अर्चना गर्ने भक्तलाई विष्णुलोक प्रदान गर्ने यो विष्णुलिङ्गलाई स्वयं भगवान् विष्णुले स्थापना गर्नभएको थियो ॥९–११॥

---

१. माहात्म्यञ्च श्रुतं विभो, इति न.सं.पु.पाठः।

२. सुकृतकिल्विषाण्यार्य, इति न.सं.पु.पाठः।

३. तत्सर्वमक्षयं धर्माद् गच्छन्त्यन्ते त्रिविष्टपम्, इति न.सं.पु.पाठः।

४. तेषां नामान्यहं वक्ष्ये चात्रस्थानाञ्च स्वल्पिनाम्, इति न.सं.पु.पाठः।

उग्रेश्वरमिदं लिङ्गं स्थापितं शूलिना पुरा। भक्तेभ्यो वरदं साक्षाच्छिवलोकफलप्रदम् ॥१२॥
शक्रेश्वरमिदं लिङ्गं शक्रेण स्थापितं पुरा। लिङ्गार्चकः सदा भक्त्या चन्द्रलोके वसेत् सुखी ॥१३॥
अर्केश्वरमिदं लिङ्गं सूर्येण स्थापितं पुनः। सूर्यलोके वसेत्सौख्यं रवौ रवौ हि पूजकः ॥१४॥
चन्द्रेश्वरमिदं विद्धि सोमेन स्थापितं पुरा। लिङ्गार्चकः सदा भक्त्या चन्द्रलोके वसेत्सुखी ॥१५॥
अग्नीश्वरमिदं सिद्धञ्चाऽग्निना स्थापितं पुनः। लिङ्गार्चको नरो भक्त्या चाग्निलोके वसेत्सुखी ॥१६॥
कालेश्वरमिदं विद्धि यमेन स्थापितं पुरा। तत्राऽर्चकः सकृद्भक्त्या यमलोके वसेत्सुखी ॥१७॥
नैर्ऋत्येशमिदं विद्धि नैर्ऋत्येनाऽर्चितं मुदा। पूजया पूजकानाञ्च[५] स्वर्गलोकफलप्रदम् ॥१८॥
वरुणेशमिदं भूयः पाशिना स्थापितं पुरा। तत्र सुखी नरो याति वरुणलोकमर्चकः ॥१९॥
वायुना स्थापितञ्चेदं वायुलोकफलप्रदम्। वायुतुल्यबलोपेतो वायुलोकेऽर्चको वसेत् ॥२०॥
पौलस्त्येशमिदं लिङ्गं श्रीदेन स्थापितं पुरा। तदर्चको धनाध्यक्षः कुबेरस्य भवेद् प्रियः ॥२१॥
स्कन्देश्वरमिदं विद्धि स्कन्देन स्थापितं पुरा। स्कन्दलोके वसेच्चाऽस्य पूजको वै[६] महासुखम् ॥२२॥
गणेश्वरमिदं विद्धि हेरम्बेन तथाऽर्चितम्। गजाननस्य लोके स विघ्नं विहाय वै वसेत् ॥२३॥

यो उग्रेश्वर लिङ्ग हो। यसलाई अघि भगवान् शङ्करले स्थापना गर्नुभएको थियो। भक्तलाई इच्छा लागेको वर दिने साक्षात् यस शिवलिङ्गको आराधनाबाट शिवलोक प्राप्त हुन्छ। यो शक्रेश्वरलिङ्ग हो। यस लिङ्गलाई अघि इन्द्रले स्थापना गर्नुभएको थियो। भक्तिपूर्वक सधैँ यस लिङ्गको पूजा गर्ने व्यक्तिले आनन्दसित चन्द्रलोकमा बस्न पाउँछ। यो अर्केश्वरलिङ्ग हो। यसलाई अघि सूर्यले स्थापना गर्नुभएको थियो। प्रत्येक आइतबारका दिन यसको पूजा गऱ्यो भने त्यो व्यक्ति सुखका साथ सूर्यलोकमा बस्न पाउँछ। यो चन्द्रेश्वरलिङ्ग हो भनेर जान। यसलाई अघि चन्द्रमाले स्थापना गर्नुभएको थियो। यसको भक्तिपूर्वक पूजा गर्ने व्यक्ति चन्द्रलोकमा सधैँ सुखसाथ बस्न पाउँछ। यो अग्नीश्वलिङ्ग हो भनेर सिद्ध भएको छ। यसलाई अघि अग्निले स्थापना गर्नुभएको थियो। यस लिङ्गको भक्तिपूर्वक पूजा गर्ने मानिसले सुखसित अग्निलोकमा बस्न पाउँछ ॥१२-१६॥

यसलाई कालेश्वरलिङ्ग हो भनेर बुझ। यसको स्थापना अघि यमराजले गर्नुभएको थियो। एकपटक मात्र भए पनि भक्तिपूर्वक यस लिङ्गको आराधना गर्ने व्यक्तिले सुखसित यमलोकमा बस्न पाउँछ। यो नैर्ऋत्येश्वरलिङ्ग हो भनेर ठान। यसलाई स्थापना गरेर अघि नैर्ऋत्यले प्रसन्न भएर पूजा गर्नुभएको थियो। यस लिङ्गको आराधना गर्ने व्यक्तिका लागि यसले स्वर्गलोकको फल दिन्छ। यो लिङ्ग वरुणेश्वरलिङ्ग हो। यसलाई अघि वरुणले स्थापना गर्नुभएको थियो। यस लिङ्गको आराधना गर्ने व्यक्ति सुखी भएर वरुणलोकमा जान्छ। वायुलोक पुऱ्याउने यस पवनेश्वरलिङ्गलाई वायुले स्थापना गर्नुभएको हो। यस लिङ्गको आराधना गर्ने व्यक्ति वायुजस्तै बलियो भएर वायुलोकमा बस्न पाउँछ ॥१७-२०॥

पौलस्त्येश्वर नाम गरेको यस लिङ्गलाई अघि कुबेरले स्थापना गर्नुभएको थियो। यस लिङ्गको पूजा गर्ने व्यक्ति कुबेरको ढुकुटीको मालिक बन्न पाउँछ, यसमा सन्देह छैन। यो स्कन्देश्वरलिङ्ग हो भनेर बुझ। यसलाई अघि कार्तिकस्वामीले स्थापना गर्नुभएको थियो। यस लिङ्गको आराधना गर्ने व्यक्ति ठूलो सुख पाएर स्कन्दलोकमा बस्न पाउँछ। यो गणेश्वरको लिङ्ग हो भनेर जान। यसलाई गणेशले पूजा गर्नुभएको थियो। यसको आराधना गर्ने व्यक्ति सम्पूर्ण विघ्नबाट मुक्त भएर गणेशको लोकमा बस्न पाउँछ ॥२३॥

---

५. स्थापयेदर्चकानाञ्च, इति न.सं.पु.पाठः। ६. वसेच्चेदमर्चको वै, इति न.सं.पु.पाठः

विश्वेश्वरं महालिङ्गमिदं विद्धि विरूपदृक्। काश्यां यत्तत्कृतं कर्म लभेतैतत्प्रपूजनात्[७] ॥२४॥
आगत्यादौ हिमगिरितटं पुण्यभूमिञ्च मत्वा यावत्तेपे भृशमविरतं द्वादशाब्दं तपस्वी।
आराध्याजं पशुपतिविभुं देवदासस्य हेतोः संस्थाप्येदं सकलवरदं विश्वनाथस्य लिङ्गम्[८] ॥२५॥
विश्वनाथो मुदा भक्त्या पशुपतिं ननाम च। लब्ध्वा वरं परिक्रम्य तस्मात् काशीं मुदाऽव्रजत् ॥२६॥
तस्माद्विश्वेश्वरं लिङ्गं भुक्तिमुक्तिफलप्रदम्। काश्यां यत्सुकृतं सर्वमेतल्लिङ्गार्चनाद् भवेत्[९] ॥२७॥
केदारेशमिदं विद्धि केदारशूलिना पुरा। स्थापितमात्मनात्मानं भक्तानां[१०] मुक्तिदं शुभम् ॥२८॥
सिद्धेश्वरमिदं लिङ्गं सिद्धेश्वरेण वै मुदा। स्थापितं भक्तितो विप्र ! योगसिद्धिकरं ध्रुवम् ॥२९॥
नीलकण्ठेश्वरं लिङ्गं नीलकण्ठेन भक्तितः। स्थापितं पूजकानाञ्च सायुज्यवरदं परम् ॥३०॥
भद्रापदेश्वरं लिङ्गं रुद्रकोटीश्वरं तथा। अविमुक्तेश्वरं भूयो महाकालेश्वरं द्विज ॥३१॥
गोकर्णेशञ्च दीप्तीशं भद्रकर्णेश्वरं तथा। सुवर्णाक्षेश्वरं लिङ्गं स्थाण्वीश्वरमिदं पुनः ॥३२॥
छगलण्डेश्वरं लिङ्गं दुरण्डेशमिदं पुनः। माकोटेश्वरमाद्येशं मण्डलेश्वरमीश्वरम् ॥३३॥
कालञ्जरेश्वरं लिङ्गं शङ्कुकर्णेश्वरं परम्। स्थलेश्वरं महालिङ्गं स्थूलेश्वरमिदं परम् ॥३४॥
श्रीपर्वतेश्वरं लिङ्गं हरिश्चन्द्रेश्वरं तथा। आम्रातकेश्वरं विद्धि चाल्पेश्वरमिदं द्विज ॥३५॥

हे विरूपाक्ष ! यो विश्वेश्वर लिङ्ग हो भन्ने कुरा तिमी बुझ। काशीमा कर्म गर्दा जुन पुण्य फल प्राप्त हुन्छ, त्यही फल यस लिङ्गको पूजनबाट प्राप्त हुन्छ। पहिले विश्वनाथ यस हिमालय-पर्वतखण्डलाई पवित्र ठानेर यहाँ आउनुभयो र उहाँले बाह्र वर्षसम्म अविच्छिन्न रूपले खूबसित तपस्या गर्नुभयो। अजन्मा व्यापक पशुपतिनाथको आराधना गरी देवदासका लागि सम्पूर्ण लोकलाई वर दिने यस लिङ्गको स्थापना गर्नुभयो। विश्वनाथले आनन्दपूर्वक सभक्ति पशुपतिनाथलाई नमस्कार गर्नुभयो। उहाँबाट वर प्राप्त गरेर विश्वनाथ परिक्रमा गरी सहर्ष काशी जानुभयो। त्यसैले यसलाई विश्वेश्वर लिङ्ग भनिएको हो। यसबाट भुक्ति तथा मुक्ति दुबैथरी फल प्राप्त हुन्छ। काशीमा कर्म गर्नाले जुन फल प्राप्त हुन्छ त्यो फल यस लिङ्गको पूजामात्रै गर्नाले प्राप्त हुन्छ ॥२४-२७॥

हे विरूपाक्ष ! यो केदारेश्वरलिङ्ग हो भनेर बुझ। अघि केदार नाम गरेका भगवान् शङ्कर आफैँले आफ्नै लागि यसको स्थापना गर्नुभएको थियो। यसको भक्ति गर्ने व्यक्तिहरूले कल्याणमय मुक्ति प्राप्त गर्दछन्। यो सिद्धेश्वरलिङ्ग हो। यसलाई प्रसन्न भएर सिद्धेश्वरले स्थापना गर्नुभएको थियो। भक्तिपूर्वक यसको आराधना गर्ने व्यक्तिलाई यसले अवश्य योगसिद्धि प्रदान गर्छ। यो नीलकण्ठेश्वरलिङ्गलाई नीलकण्ठमहादेवले भक्तिपूर्वक स्थापना गर्नुभएको थियो। यसको पूजा गर्ने व्यक्तिलाई यसले उत्तम सायुज्य पद अर्थात् मुक्ति वर प्रदान गर्दछ ॥२८-३०॥

हे विरूपाक्ष ! यो भद्रापदेश्वरलिङ्ग हो, यो रुद्रकोटीश्वरलिङ्ग हो, यो अविमुक्तेश्वरलिङ्ग हो र यो महाकालेश्वरलिङ्ग हो। यो गोकर्णेश्वरलिङ्ग हो, यो दीप्तीश्वरलिङ्ग हो। त्यस्तै यो भद्रकर्णेश्वरलिङ्ग हो, यो सुवर्णाक्षेश्वरलिङ्ग हो, फेरि यो स्थाण्वीश्वरलिङ्ग हो। यो छगलण्डेश्वरलिङ्ग हो। फेरि यो दुरण्डेश्वरलिङ्ग हो। यो महाकोटेश्वरलिङ्ग हो, यो आद्येश्वरलिङ्ग हो, यो मण्डलेश्वर नाम गरेको भगवान् ईश्वरको लिङ्ग हो। यो कालञ्जरेश्वरलिङ्ग हो, अर्को शङ्कुकर्णेश्वरलिङ्ग हो। यो स्थलेश्वरमहालिङ्ग हो, अर्को स्थूलेश्वरलिङ्ग हो। यो पर्वतेश्वरलिङ्ग हो, त्यस्तै यो हरिश्चन्द्रेश्वरलिङ्ग हो। यसलाई आम्रातकेश्वरलिङ्ग भनेर बुझ। हे विरूपाक्ष ! यो अल्पेश्वर भगवान्‌को लिङ्ग हो ॥३१-३५॥

---

७. लभेतैत्स्पृशाद्धि तत्, इति न.सं.पु.पाठः।
८. स्थाप्यात्रेदं सकलवरदं विश्वनाथो हि लिङ्गम्, इति न.सं.पु.पाठः।
९. सर्वमेतल्लिङ्गं प्रशाल्लभेत्, इति न.सं.पु.पाठः।
१०. भक्तिनाम्, इति न.सं.पु.पाठः।

आम्रेश्वरं महालिङ्गमाषाढीशं परन्त्विदम्। भालेश्वरञ्च चण्डीशं मुण्डीशं भूतिदं तथा ॥३६॥
भवान्तकेश्वरं लिङ्गं नकुलीशमिदं ततः। ज्योतिर्लिङ्गेश्वरं विद्धि कुण्डानि शृणु वच्मि ते ॥३७॥
योगकुण्डं कुरुक्षेत्रं कुण्डं नखलविश्रुतम्। कनखलं महाकुण्डं तत्कुण्डं विमलोदकम् ॥३८॥
महेन्द्राख्यमिदं कुण्डं भीमकुण्डमिदं पुनः। प्रयागाख्यं महाकुण्डं गङ्गासागरविश्रुतम् ॥३९॥
प्राभासं नैमिषं कुण्डं ब्रह्मकुण्डं हरस्य च। हारिद्वारं महाकुण्डं विष्णुकुण्डमिदं महत् ॥४०॥
स्कन्दतीर्थं महाकुण्डञ्चागस्त्यकुण्डमाश्रुतम्। सप्तर्षीणां महाकुण्डं सनकानां तथापरम् ॥४१॥
अगस्त्येशमिदं लिङ्गं व्यासेश्वरमिदं द्विज। मामकीयमिदं लिङ्गं यतो लब्धो महान् वरः[११] ॥४२॥
ग्रहेश्वराणि लिङ्गानि स्थापितानि नवग्रहैः। तद्दिने पूजनात्तेषां[१२] ग्रहशान्तिर्भवेद् भृशम् ॥४३॥
सप्तर्षीणाञ्च लिङ्गानि चैतानि स्थापितानि तैः। सप्तर्षीणां हि लोके स तत्पूजको वसेत्सुखी ॥४४॥
लिङ्गान्येतानि भक्तेभ्यो ददति चेप्सितानि वै। अन्येषाञ्चैव लिङ्गानि तथाविधं विरूपदृक् ॥४५॥
वासुकिर्नागराजोऽसौ तप्तवान् स पुरा तपः[१३]। तार्क्ष्यभयादिहागत्य वाग्वत्या जीवनाप्लवः[१४] ॥४६॥
पशुपतिं समाराध्य वाक्कायमानसैरिह। सहस्राब्दं मुदा व्याप्य भक्त्या तन्नाम संस्मरन् ॥४७॥
कार्त्तिक्यां पूर्णिमायाञ्च साक्षात्पशुपतिर्विभुः। व्यक्तीकृत्य तनुं तस्मै वरं दातुमुवाच हि ॥४८॥

यो आम्रेश्वरमहालिङ्ग हो, यो चाँहि आषाढीश्वरलिङ्ग हो। त्यस्तै यो लिङ्ग भालेश्वर हो, यो चण्डीश्वरहो, यो लिङ्ग मुण्डीश्वर हो र यो लिङ्ग भूतीश्वर हो। यो लिङ्ग भवान्तकेश्वर हो। त्यसभन्दा पछिल्लो लिङ्ग नकुलीश्वरलिङ्ग हो। यस लिङ्गलाई ज्योतिर्लिङ्गेश्वर भनेर बुझ। अब म कुण्डका बारेमा तिमीलाई बताउँछु, सुन ॥३६–३७॥

यो योगकुण्ड हो, यो कुरुक्षेत्रकुण्ड हो। यो प्रसिद्ध कनखलकुण्ड हो। यो कनखल नाम गरेको निर्मल जलयुक्त महाकुण्ड हो। यो कुण्ड महेन्द्रकुण्ड हो, फेरि यो भीमकुण्ड हो। यो गङ्गासागरको नामले प्रसिद्ध भएको प्रयागमहाकुण्ड हो। यो प्रभास कुण्ड हो, यो नैमिषकुण्ड हो। यो शिवजीको ब्रह्मकुण्ड हो। यो हरिद्वारनाम गरेको महाकुण्ड हो। यो ठूलो कुण्ड विष्णुकुण्ड हो। यो अगस्त्यकुण्डको नामले प्रसिद्ध भएको महाकुण्ड स्कन्दतीर्थ हो। त्यस्तै अर्को सप्तर्षिहरूको महाकुण्ड छ। यो सनक आदि गरिएका ऋषिहरूको कुण्ड हो। यो अगस्त्येश्वर लिङ्ग हो। हे विरूपाक्ष ! यसलाई व्यासेश्वरलिङ्ग भन्छन्। यो मैले बनाएको शिवलिङ्ग हो। यसबाट ठूलो वर प्राप्त हुन्छ ॥३८–४२॥

यी लिङ्गहरू नवग्रहले बनाएका लिङ्ग हुन्। ग्रहहरूका आ–आफ्ना वारहरूमा यी लिङ्गको आराधना गर्ने व्यक्तिलाई ग्रहको पीडाबाट तुरुन्त शान्ति मिल्छ। यी सप्तर्षिका लिङ्ग हुन्। यी लिङ्गलाई सप्तर्षिहरूले नै स्थापना गरेका थिए। यी लिङ्गको पूजा गर्ने व्यक्तिले सप्तर्षिको लोकमा गएर आनन्दसित बस्न पाउँछ। हे विरूपाक्ष ! यी लिङ्गहरूले भक्तहरूलाई इच्छा लागेको फल प्रदान गर्छन्। अन्य लिङ्गहरूले पनि त्यस्तै खालको फल दिन्छन्। यी नागका राजा वासुकि हुन्। अघि यिनले गरुडको डरले यहाँ आएर वाग्वतीको जलमा स्नान गरी ठूलो तपस्या गरेका थिए। वचन, शरीर र मनले हजार वर्षसम्म पशुपतिको आराधना गरेर भक्तिपूर्वक उनले शिवजीको मन्त्र जपेका थिए। कार्तिक पूर्णिमाको दिन साक्षात् पशुपति प्रकट भएर तिनलाई वर दिनका लागि भन्नुभएको थियो ॥४३–४८॥

---

११. लब्धं महद्वरम्, इति न.सं.पु.पाठः।
१२. अर्चति तस्याशु, इति न.सं.पु.पाठः।
१३. पुरा तप्तो महत्तपः, इति न.सं.पु.पाठः।
१४. जीवनाप्लुतः, इति न.सं.पु.पाठः।

श्रीपशुपतिरुवाच

शृणु दास्ये वरं तुभ्यं नागराज महातपाः। आराधितस्त्वया यस्मात्[१५] त्रिविधैस्तोषितोऽनिशम् ॥४९॥
यस्मात्स्मरसि मां नित्यं हृदयस्थञ्च कण्ठतः। कण्ठस्य भूषणं मे त्वं भविता नागराट् सदा ॥५०॥
अपरं रक्षको भूत्वा तिष्ठ नाग ! मदन्तिके। द्वारं निधिं मम क्षेत्रं सर्वकालं प्ररक्षयन् ॥५१॥
प्रथमं न नमस्कृत्य त्वां मद्द्वारि नराधमः। यः प्रविशति मां द्रष्टुं निष्फलार्थो भवेन्नरः ॥५२॥
त्वां पश्य मां प्रपश्यन्ति नरास्ते क्षीणकिल्विषाः। तेभ्यो ददाम्यहं नाग ! भुक्तिं मुक्तिं हृदेप्सितान् ॥५३॥
अधुनाऽलङ्कुरु स्पष्टमुरोदेशं ममोरग ![१६]। सर्वभूषोन्नता श्रीस्ते भविता मत्प्रसादतः ॥५४॥

नेमुनिरुवाच

इत्युक्त्वा भूषयामास स्वात्मानं सहसा मुदा। धृत्वा पाणिद्वयेनाऽसौ शिवः कण्ठे निधाय च[१७] ॥५५॥
नमन्ति सर्वलोकास्तं सशङ्करञ्च वासुकिम्। हराङ्गभूषणोद्योतं तदारभ्य निरन्तरम्[१८] ॥५६॥
ततः पशुपतिः क्षेत्रनन्दिभृङ्गिगजाननान्। हार्देन तान् समाहूय चेदं वचनमब्रवीत् ॥५७॥

श्रीपशुपतिरुवाच

भो लम्बोदर ! भो क्षेत्र नन्दिभृङ्गिदिशां वराः। यूयं रक्षथ मत्क्षेत्रं स्थित्वा द्वारेषु सन्ततम् ॥५८॥
युष्मान्न दृष्ट्वा ये मर्त्याश्चायान्ति च मदन्तिकम्। विघ्नं ददत यूयं वै तेभ्यो देवाः पदे पदे ॥५९॥
प्रणम्य गौरवाद्युष्मान् मां प्रपश्यन्ति ये नराः। गमिष्यन्ति च मे लोकं हित्वा पशुकलेवरम् ॥६०॥

पशुपतिले भन्नुभयो – हे नागराज ! हे महातपस्वी ! तिमीले तीनै किसिमका भक्तिद्वारा मेरो आराधना गऱ्यौ, मलाई सन्तुष्ट तुल्यायौ, म तिमीलाई वर दिन्छु। तिमीले हृदयमा अवस्थित मलाई कण्ठद्वारा सम्झना गऱ्यौ अर्थात् जप्यौ। त्यसैले हे नागराट् ! सधैँ तिमी मेरो कण्ठको गहना हुनेछौ। अर्को फेरि के भन्छु भने हे नाग ! तिमीले मेरो ढोका, सम्पत्ति र क्षेत्रलाई सधैँ रक्षा गरेर मेरो नजिकै बस ॥४९–५१॥

जुन अधम मानिसले मेरो ढोकामा आएर पहिले तिमीलाई नढोगीकन मेरो दर्शनका लागि प्रवेश गर्छ भने त्यसको प्रयोजन निष्फल हुनेछ। हे वासुकि ! तिम्रो दर्शन गरेर जसले मेरो दर्शन गर्छन्, ती मानिसहरू पापबाट मुक्त हुनेछन्। हे वासुकि ! तिनीहरूलाई म भुक्ति, मुक्ति र उनीहरूले चिताएको फल दिनेछु। हे नाग ! तिमी अब मेरो कण्ठलाई विभूषित तुल्याऊ, मेरो कृपाले गर्दा तिमी सबै गहनामध्ये चम्किलो गहना बन्नेछौ ॥५२–५४॥

नेमुनिले भन्नुभयो – यति भनेर भगवान् शङ्करले आफ्नो हातले वासुकिलाई समातेर तुरुन्त प्रसन्न हुँदै कण्ठमा अलङ्कारका रूपमा लगाउनुभयो। त्यसै समयदेखि सबै मानिसहरूले भगवान् शङ्करको गहना बन्न पुगेका वासुकिसहित शङ्करलाई नमस्कार गर्छन्। त्यसपछि भगवान् शङ्करले क्षेत्रपाल, नन्दी, भृङ्गी र गणेशलाई बोलाएर हृदयदेखि नै यस्तो कुरा भन्नुभयो ॥५५–५७॥

पशुपतिले भन्नुभयो – हे लम्बोदर ! हे क्षेत्रपाल ! हे नन्दी ! हे भृङ्गी ! हे दिक्पाल हो ! मेरो ढोकामा बसेर तिमीहरूले मेरो रक्षा गर। हे देवता हो ! तिमीहरूको दर्शन नगरीकन जो मानिसहरू मेरो दर्शनका लागि नजिक आउँछन्, तिनीहरूलाई पाइलैपिच्छे तिमीहरूले विघ्न पार। तिमीहरूको दर्शन गरेर जो मानिसहरूले मेरो दर्शन गर्छन्, ती मानिसहरू अज्ञामय मानवशरीरबाट मुक्त भएर मेरो लोक जान्छन्। एकपटक मात्रै भए पनि जसले मेरो दर्शन गर्छ त्यो मानिस पशुजन्मबाट मुक्त हुन्छ। सम्पूर्ण जन्ममा गरेका पापबाट मुक्त भएर मेरो लोकमा जान्छ ॥५८–६१॥

---

१५. यस्मादाराधितं माञ्च, इति न.सं.पु.पाठः।
१६. भूषय मेऽधुनाऽहं त्वामुरोदेशं ममोरग, इति न.सं.पु.पाठः।
१७. वासुकिना ह्युरोदेशे कराभ्यां धृत्य शङ्करः, इति न.सं.पु.पाठः।
१८. ततः प्रभृति चाद्यतः, इति न.सं.पु.पाठः।

सकृत्पश्यति यो मां हि मुक्तश्च पशुजन्मतः । सर्वजन्मार्जितैः पापैर्निर्मुक्तो याति मे पुरम् ॥६१॥
मां सत्कृत्य च यो भक्त्या पश्यति त्रिविधैश्च माम् । पुनर्जन्म परित्यज्य मम लोके महीयते ॥६२॥
मदर्चनैः स्तवैर्यो मां जाप्यैः पश्यति भक्तितः । स्वकुलानि समुद्धृत्य स योगी मयि लीयते ॥६३॥

सिद्धर्षिरुवाच

इत्युक्त्वाऽन्तर्दधे लिङ्गे साक्षात्पशुपतिर्विभुः । तस्थुर्द्वारिषु ते देवाः सर्वकालं सुरक्षया[१९] ॥६४॥
तस्मात्प्राक् वासुकिं भक्त्या पूजयित्वा[२०] विचक्षणैः । कार्या पशुपतेः पूजा जीवनं सार्थकं भवेत् ॥६५॥

माहात्म्यं ये सुकृततनवो वासुकेर्नागराजः
चाऽध्यायेऽस्मिन्विगतदुरिता धीर शृण्वन्ति भक्त्या ।
यान्ति त्यक्त्वा परकृतभयं जन्मसम्भूतपापं
सर्वागम्यं परशिवपुरं सान्वयं मोदमुग्धाः[२१] ॥६६॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां वासुकिवरप्रदानं नाम षष्ट्युत्तरशततमोऽध्यायः ॥१६०॥

जसले तीनै किसिमका भक्ति लगाएर सत्कारपूर्वक मेरो दर्शन गर्छ त्यसले पुनर्जन्म लिनुपर्दैन, मेरो लोकमा ससम्मान रहन पाउँछ। जसले पूजा, स्तुति र जप गरेर भक्तिपूर्वक मेरो दर्शन गर्छ त्यो योगी आफ्नो कुलको उद्धार गरेर ममा नै लीन हुन पाउँछ ॥६३॥

नेमुनिले भन्नुभयो – यति भनेर भगवान् साक्षात् पशुपति लिङ्गमा विलीन हुनुभयो। देवताहरू सधैँ सुरक्षाका लागि त्यहीँ द्वारमा बसे। त्यसैले बुद्धिमान् मानिसहरूले पाशुपक्षेत्रमा गएपछि सर्वप्रथम भक्तिपूर्वक नागराज वासुकिको पूजा गरेर मात्रै भगवान् पशुपनिथको दर्शन, पूजाआजा गर्नुपर्दछ। यसरी गरिने कर्मबाट मात्रै पशुपतिनाको दर्शन र पूजा गरेको फल मिल्नेछ र जीवन सार्थक बन्नेछ ॥६४–६५

पुण्य शरीर भएका जो मानिसहरूले यस अध्यायमा वर्णन गरिएको नागराज वासुकिको माहात्म्य भक्तिपूर्वक सुन्छन्, तिनीहरू संसारमा लागेका पाप र अर्काबाट हुने डरबाट मुक्त भएर कसैले पनि जान्न नसकिने उत्तम शिवलोकमा प्रसन्न हुँदै सपरिवार जान्छन् ॥६६॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवतखण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा वासुकिलाई भगवान् शिवद्वारा वरप्रदाननामक एकसय साठिऔं अध्याय पूरा भयो।

---

१९. **प्ररक्षयन्, इति न.सं.पु.पाठः ।**
२०. **प्रणम्यार्च्य, इति न.सं.पु.पाठः ।**
२१. **हर्षवन्तः, इति न.सं.पु.पाठः ।**

एकषष्ट्युत्तरशततमोऽध्यायः

सिद्धेश्वरशिवलिङ्गमाहात्म्यम्

सिद्धर्षिरुवाच

स्कन्देनैवं यदुक्तं मे दिव्यं वृत्तान्तमैश्वरम्। वक्ष्यामि ते हि तत् सर्वं शृणुष्वैकाग्रमानसः ॥१॥
पशुपतेश्च माहात्म्यमधुना तच्छृणु द्विज। पुरोद्भूतञ्च संवादं देवीशङ्करयोर्हि तम् ॥२॥

देव्युवाच

शान्ताय शान्तरूपाय पशूनां पतये नमः। पञ्चात्मकाय देवाय पञ्चास्यव्यक्तये नमः ॥३॥
भगवन् देवदेवेश पञ्चभूतविधायक। यदुक्तं जन्तवः सर्वे लीयन्ते कर्मभिः कथम् ॥४॥
भवदंशाश्च ये देवाः ब्रह्मादयो दशात्मकाः। क्षये कुत्र विलीयन्ते कर्मपाशैर्विवर्जिताः ॥५॥
ब्रह्मा विष्णुर्गणो दुर्गा सोमः सूर्यो जलोऽनिलः। भूरग्निमूर्तयो हीमा इत्युक्तं भवता च मे ॥६॥
मा जानीहि कदाप्यन्यान् देवान् दशात्मकानिमान्[1]।
मन्मूर्तीश्चाऽनिशं विद्यादिमान् मदात्मकान् प्रिये[2] ॥७॥
इत्युक्तञ्च पुरा देव ! भवता मेऽनुकम्पया। श्रोतुमिच्छामि तद्देवा लीयन्ते चैव कुत्र वा ॥८॥

सिद्धर्षिरुवाच

आकर्ण्य वचनं देव्याः पशुपतिर्विरूपदृक्। मुमुदे च भृशं तस्यै शङ्करो लोकशङ्करः ॥९॥
पृच्छ्यमानो हरश्चैवं देव्या चाऽत्रैव भक्तितः। व्याजहाराशु यत्पृष्टं तत्सर्वं खलु हर्षवान् ॥१०॥

अध्याय – १६१

सिद्धेश्वर शिवलिङ्गको माहात्म्य

नेमुनिले भन्नुभयो – अघि कार्तिक स्वामीले बताउनुभएको दिव्य ईश्वरीय वृत्तान्त सबै तिमीलाई म सुनाउँछ, एकाग्रचित्त भएर सुन। हे विरूपाक्ष ! पशुपतिको माहात्म्यसँग सम्बद्ध पार्वती र शङ्करको बीचमा अघि भएको संवाद पनि बताउँछु, अब सुन ॥१–२॥

देवीले भन्नुभयो – शान्तरूप लिने शान्तस्वरूप पशुपतिलाई नमस्कार छ। पाँच आत्मा भएका पाँचवटा मुखबाट प्रकट हुने देवतालाई नमस्कार छ। हे देवताका पनि देवता ! पञ्चमहाभूतका निर्माता हे भगवन्! सृष्टि गरेका सबै प्राणीहरू आफ्नै कर्मका कारणमा लीन हुन्छन्, कसरी ? हे भगवन् ! हजुरको अंशबाट उत्पन्न भएका जुन देवता, ब्रह्मा आदि गरिएका दश दिक्पाल छन्, तिनीहरू कर्मपाशबाट मुक्त भएर प्रलयकालमा कहाँ लीन हुन्छन् ? ब्रह्मा, विष्णु, गणेश, दुर्गा, सोम, जल, वायु, पृथ्वी र अग्नि, यी सबै मूर्ति मेरा हुन् भनेर हजुरले मलाई भन्नुभएको थियो। हे प्रिय ! यी दश देवतालाई कहिल्यै पनि मदेखि भिन्न नसम्झ। यी मेरै अंशबाट भएका मेरै मूर्ति हुन् भनेर ठान। हजुरले ममाथि कृपा गरेर अघि यस्तो भन्नुभएको थियो। ती देवताहरू कहाँ विलीन हुन्छन् ? यो कुरा म सुन्न चाहन्छु ॥३–८॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! पार्वतीको यस्तो वचन सुनेर लोकका कल्याणकारी भगवान् शङ्कर उमासँग अत्यन्त खुसी हुनुभयो। पार्वतीले भक्तिपूर्वक यस्तो कुरा सोधेपछि प्रसन्न हुँदै भगवान् शङ्करले तुरुन्तै भगवती पार्वतीले सोधेका प्रश्नको जवाफ दिनुभयो ॥९–१०॥

---

१. कदाप्यन्यद्देवा इमे दशात्मकाः, इति न.सं.पु.पाठः। २. मन्मूर्तयोऽनिशं विद्यान्ममात्मका इमे प्रिये, इति न.सं.पु.पाठः।

पशुपतिरुवाच

एवमेव महादेवि मम ते मूर्त्तयोऽमराः । यदुक्तञ्च त्वया चाऽत्र सत्यमेतन्न संशयः ॥११॥
आवयोर्मूर्त्तयः सर्व अजादयो भवानि ते । नोऽपि चेदात्मनो ह्यंशाः सतो भवा हि तेऽसतः ॥१२॥
ब्रह्माऽहमच्युतोऽहञ्च गणेशोऽहं तथानिलः । सोमः सूर्योऽनलो दुर्गा जलं भूमिरहं तथा[३] ॥१३॥
द्यौरहं यजमानोऽहं यज्ञरूपोऽहमीश्वरः । मन्त्रोऽहं खलुभोक्ताहं हवनीयञ्च भोज्यकम् ॥१४॥
मनो बुद्धिरहं चित्तं[४] गर्वो जीवस्तथाश्रितः । आनन्दोऽहं जगत्सर्वं तद्रूपैर्जृम्भयाम्यहम् ॥१५॥
मदेव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद् ब्रह्माऽस्म्यहमव्ययम् ॥१६॥
पश्य देवि त्विदानीं ते विलीयन्तेऽमरा मयि । यतो यतः पुरोद्भूतास्तस्मिँस्तस्मिँस्तनौ मम ॥१७॥

सिद्धर्षिरुवाच

इत्युक्त्वाशु महादेवीं विरराम महेश्वरः । पञ्चात्मकं महालिङ्गं तस्थौ स्थावरवद्यथा ॥१८॥
भवानीं दर्शयन् स्वस्मिन्[५] तत्क्षणे च प्रवेशिताम् । ज्योतिर्मयं महालिङ्गं तस्थौ तदेवमेव च ॥१९॥
आददे मूर्त्तितो देवान् पशुपतिः स्वकीयकान् । दीपशिखेव तैलानि वर्त्तिकातः शनैः शनैः ॥२०॥
ऊर्ध्वे चैशानवक्त्रे सोऽलीयत भगवान् रविः[६] । प्रदोषेऽस्ताचले व्योम्नः स्वभाभिर्द्योतयञ्जगत् ॥२१॥
सोमोऽपि च तथा तत्र भाभिर्विद्योतयञ्जगत् । नक्षत्राणां गणैः सार्द्धं ज्वालाजाले ह्यलीयत[७] ॥२२॥

पशुपतिनाथले भन्नुभयो – हे पार्वती ! यी माथि बताइएका मूर्तिहरू सबै मेरा हुन् । तिमीले जे कुरा भन्यौ, त्यो कुरा सत्य छ, यसमा सन्देह छैन । हे भवानी ! यी ब्रह्मा आदि देवताहरू हामी दुईका अंश हुन् । यिनलाई हाम्रो अंश नमाने पनि सत्स्वरूप भएका यी देवताहरूलाई अनादिको अंश त मान्नैपर्छ । ब्रह्मा भनेको म नै हुँ, विष्णु म नै हुँ, गणेश म नै हुँ, वायु मै हुँ । चन्द्रमा, सूर्य, अग्नि, दुर्गा, पृथ्वी र जल भनेको मै हुँ, अर्को कुरा छैन । आकाश भनेको म हुँ, म यजमान हुँ, यज्ञरूप पनि मै हुँ, म ईश्वर हुँ, म मन्त्र हुँ, म भोक्ता हुँ, हवनीय पनि मै हुँ र भोज्य पनि मै हुँ । मन भनेको मै हुँ, म बुद्धि पनि हुँ, मै चित्त हुँ, जीवमा रहेको घमण्ड भनेको मै हुँ, मै आनन्द हुँ । त्यही आनन्द रूप लिएर जगत्लाई मैले व्याप्त गरेको छु । मबाट नै सम्पूर्ण जगत्को सृष्टि भएको छ । ममाथि नै सम्पूर्ण संसार अडिएको छ । ममा नै सबै विलय हुन्छ । त्यसैले म ब्रह्मा हुँ र म अव्यय हुँ । हे देवी ! अब सबै देवताहरू अघि मेरो शरीरमा जुन जुन ठाउँबाट पैदा भएका थिए अहिले ती सबै मेरो शरीरका तिनै तिनै स्थानमा विलीन हुँदैछन्, लौ हेर ॥११-१७॥

नेमुनिले भन्नुभयो – पार्वतीलाई यति कुरा भनेर भगवान् शङ्कर चुप लाग्नुभयो । महालिङ्गस्वरूप भगवान् शङ्कर स्थावरजस्तै भएर रहनुभयो । महालिङ्गस्वरूपका भगवान् शङ्करले आफ्नै सामु पार्वती तत्कालै आफ्नो महालिङ्गमा विलीन हुँदै गरेको दृश्य देखाउनुभयो । त्यो ज्योतिर्मय महालिङ्ग अन्त्यमा जस्ताको तस्तै रह्यो ॥१८-१९॥

पशुपतिनाथले बत्तीको ज्वालाले तेजलाई सोसेजस्तै गरी आफ्ना अवयव भएका सबै देवताहरूलाई शोषण गरेर बिस्तारै आफैँमा विलीन गराउनुभयो । पाँच मुखमध्ये सबैभन्दा माथि रहेको ईशान वक्त्रमा अस्ताउन लागेका सूर्यले अस्ताचलबाट संसारलाई प्रकाशमय तुल्याइराखेको आफ्नो किरणको समूहलाई आफैँमा विलीन गराएजस्तै गरी सूर्यलाई विलीन गराउनुभयो । आफ्ना किरणद्वारा संसारलाई प्रकाशित तुल्याउने चन्द्रमा पनि तारागणहरूका साथ ठूलो ज्योतिर्लिङ्गमा विलीन भए ॥२०-२२॥

३. भूर्जलोऽहं तथापरः, इति न.सं.पु.पाठः
४. मनोऽहं बुद्ध्यहं चित्तः, इति न.सं.पु.पाठः ।
५. दर्शयन् स्वे भवानीन्ताम्, इति न.सं.पु.पाठः ।
६. वै चालीलियद्रविर्यथा, इति न.सं.पु.पाठः ।
७. ज्वालकीलमलीयत, इति न.सं.पु.पाठः ।

अलीयत ततो[८] ब्रह्मा प्राच्ये तत्पुरुषानने। शक्त्या युक्तोऽहि लिङ्गस्य देवानपि प्रदर्शयन् ॥२३॥
याम्येऽघोरानने विष्णुः पशुपतेरवीविशत्। ज्वालामये महावह्नौ चाऽस्मिँल्लिङ्गे तथानलः ॥२४॥
सद्योजातानने‌ऽवाच्यां लम्बोदरो ह्यवीविशत्। प्रभञ्जनस्तथा सद्यः क्षयानले यथा जगत् ॥२५॥
पशुपतौ महालिङ्गे प्रेक्ष्याविष्टान् सुरानपि[९]। साऽभूद्देवी सुचित्रात्मा रुद्रेणाकर्षिता पुनः ॥२६॥
उदीच्यां वामदेवास्ये भवानी साप्यवीविशत्। दीप इव शिखायां वै चाकर्षितेश्वरेण च ॥२७॥
विलीनानि च भूतानि सुरासुराश्च सर्वतः। अस्मिञ्ज्योतिर्मये लिङ्गे ज्वालाग्नौ शलभा इव ॥२८॥
एक एव तदा विप्र ! पशुपतिर्जलान्तरे। निशि दीप इव ज्योतिर्लिङ्गरूपे व्यराजत[१०] ॥२९॥
त्रिंशद्वर्षसहस्राणि दिव्यानाञ्च विरूपदृक्। एक एव हरस्तस्थौ सर्वलोकं विसृज्य सः ॥३०॥
ततः ससर्ज लोकाँश्च पशुपतिर्हि चात्मनः। प्रथमञ्च भवानीं तां ततश्चाऽन्यान् शृणु द्विज ॥३१॥
कार्त्तिकी नवमी शुक्ला रविवारेण संयुता। तस्यां विनिर्ययौ सूर्यो भाभिर्विद्योतयन् दिशः[११] ॥३२॥
सोमोऽपि च तथेशानाद्विनिर्ययौ सतारकः। आह्लादयन् दिशः पूर्णे क्षीराब्धाविव पर्वणि ॥३३॥
ब्रह्मा विनिर्ययौ भूयः पूर्ववक्त्राद्विरूपदृक्। पठन् वेदाँश्च पञ्चास्यः सर्वलोकसिसृक्षया ॥३४॥
अघोरवक्त्रतो विष्णुर्विनिर्ययौ महाद्युतिः। अनलोऽपि दिशः सर्वाः हेतिभिर्द्योतयन्पुनः ॥३५॥
सद्योजाताननाद् भूयो लम्बोदरो विनिर्ययौ। वायुरपि महावीरो ववौ पुनर्विनिःसृतः ॥३६॥

त्यसपछि ब्रह्माजी ज्योतिर्लिङ्गको तत्पुरुष नाम गरेको पूर्वपट्टिको मुखमा आफ्नो शक्तिसहित देवताको अगाडि नै विलीन हुनुभयो। विष्णु पशुपतिको दक्षिणतिर रहेको अघोर नाम गरेको मुखमा प्रवेश गर्नुभयो। ज्वालामय वह्निस्वरूप यसै मुखमा अग्नि पनि विलीन भए। पश्चिमतर्फ रहेको भगवान् शङ्करको सद्योजात नाम गरेको मुखमा गणेशजी प्रवेश गर्नुभयो। प्रलयको अग्निमा संसार विलीन भएजस्तै गरी वायु पनि त्यसै मुखमा तत्काले विलीन भए ॥२३–२५॥

पशुपतिस्वरूप महालिङ्गमा प्रवेश गर्न लागेका देवतालाई देखेर आफू पनि त्यस शिवलिङ्गको तेजले आकृष्ट भएकी पार्वती अचम्ममा पर्नुभयो। उत्तरपट्टि रहेको वामदेव नाम गरेको शिवजीको मुखमा ज्वालामा बत्ती लीन भएझैं गरी लिङ्गको तेजबाट आकृष्ट भई पार्वती पनि विलीन हुनुभयो। आगाको ज्वालामा सलह लीन भएजस्तै ज्योतिर्मय लिङ्गमा प्राणीहरू, देवता र राक्षसहरू सबैतिरबाट लीन भए। हे विरूपाक्ष ! त्यसबखत रात्रीको बीचमा दियो बसेजस्तै गरी पानीको बीचमा केवल ज्योतिर्लिङ्गस्वरूप भगवान् पशुपति मात्र सुशोभित हुनुभयो ॥२६–२९॥

हे विरूपाक्ष ! सम्पूर्ण प्राणीहरूलाई संहार गरेर दिव्य तीस हजार वर्षसम्म एक्लै भगवान् शङ्कर बस्नुभयो। हे विरूपाक्ष ! त्यसपछि भगवान् पशुपतिले आफैं प्राणीहरूको सृष्टि गर्नुभयो। सबैभन्दा पहिले पार्वतीको सृष्टि गर्नुभयो। त्यसपछि अरुको सृजना गर्नुभयो, सुन। कार्तिक शुक्ल नवमी आइतबारका दिन सम्पूर्ण दिशालाई उज्यालो तुल्याउँदै त्यसै लिङ्गबाट सूर्य पैदा हुनुभयो। त्यसैगरी तारासहित चन्द्रमा पनि पूर्णिमाको दिन दशै दिशा उज्यालो पार्दै समुद्रमा उदाए झैं गरी शिवजीबाट बाहिर निस्किए ॥३०–३३॥

हे विरूपाक्ष ! फेरि सम्पूर्ण लोकको सृष्टि गर्ने इच्छाले पाँच मुख भएका ब्रह्माजी वेद पढ्दै शिवजीको पूर्वपट्टिको मुखबाट प्रकट हुनुभयो। अत्यन्त कान्ति भएका भगवान् विष्णु शिवजीको अघोर वक्त्रबाट प्रकट हुनुभयो। त्यस्तै आफ्ना ज्वालाले सम्पूर्ण दिशालाई उज्यालो तुल्याउँदै अग्नि पनि निस्कनुभयो। भगवान् शङ्करको सद्योजात नाम गरेको मुखबाट गणेश निस्कनुभयो। महावीर वायु पनि फेरि निस्किएर वग्न थाल्नुभयो ॥३४–३६॥

---

८. अलीलियत्ततः, इति न.सं.पु.पाठः।
९. प्रेक्ष्य देवान्प्रवेशकान्, इति न.सं.पु.पाठः।
१०. दीप इव क्षपामध्ये ज्योतिर्लिङ्गो विराजते, इति न.सं.पु.पाठः।
११. सूर्यस्तस्माद्विद्योतयन् दिशः, इति न.सं.पु.पाठः।

सोऽपश्यद्देवताः सर्वा लिङ्गाद्विनिःसृतास्तथा । मुमुदे च भृशं मेने ईश्वरः सत्यमित्यजः ॥३७॥
ब्रह्मणः कारणाद् भूयो जगत्त्सर्वं चराचरम् । एवमेव यथापूर्वमासीत्सत्यं विरूपदृक् ॥३८॥
कल्पान्ते पुनरेतस्मिँल्लिङ्गे सिद्धैः सुरर्षिभिः । लीयते सर्वभूतैश्च[१२] यथा गृहेषु रात्रयः ॥३९॥
आलयः सर्वभूतानां तस्मात्स जगदालयः । लीयन्ते सर्वलोकास्ते[१३] तस्माल्लिङ्गमिति श्रुतम् ॥४०॥
वेदीभूतां भवानीन्तां विद्याल्लिङ्गं तथेश्वरम् । उमामाहेश्वरी मूर्तिरिव[१४] लिङ्गं परात्परम् ॥४१॥
भुक्तिमुक्तिप्रदः साक्षात्पशुपतिरयं विभुः । सकृत्पश्यति यो लिङ्गं तस्य पुण्यफलं शृणु ॥४२॥
वाजपेयसहस्रोत्थं चाश्वमेधसहस्रजम् । सर्वक्रतूद्भवं पुण्यं सर्वदानोद्भवं फलम् ॥४३॥
आदाय शिवलोकं स निष्पापः खलु गच्छति । देहान्ते च ततो विप्र ! सत्यमेतन्न संशयः ॥४४॥
भक्त्या प्रेक्ष्य नमेल्लिङ्गं दण्डवत्पातयेत्तनुम् । तिर्यक्योनिं परित्यज्य दुःखसंसारसंसृतिम् ॥४५॥
तेषां फलं समादाय व्रजेच्छैवं पुरं पुरम् । परिक्रामति यो भक्त्या लिङ्गं पशुपतिं महत् ॥४६॥
सर्वजन्मार्जितैः पापैर्मुक्तः परं स गच्छति । तन्मनुं प्रजपेदत्र चाभ्यर्च्य पशुपेश्वरम् ॥४७॥
भस्माङ्गी खलु रुद्राक्षी तस्य पुण्यफलं शृणु । यावच्च जीवतीहासौ रुद्रवद्विचरेद्भुवि ॥४८॥
देहान्ते लीयते लिङ्गे सदेहो वाथवा शिवः । देवासुरर्षिभिः सिद्धैः सेव्यते लिङ्गमैश्वरम् ॥४९॥

पार्वतीले लिङ्गबाट निस्किरहेका सबै देवतालाई देख्नुभयो । त्यसपछि ईश्वर नै सत्य हुनुहुँदो रहेछ, अजन्मा हुनुहुँदो रहेछ भनेर पार्वतीले ठान्नुभयो र अत्यन्त प्रसन्न हुनुभयो । हे विरूपाक्ष ! परब्रह्म परमात्माका कारणले गर्दा यो चर तथा अचर जगत् पहिले जस्तो थियो, त्यस्तै बन्यो । कालान्तरमा फेरि यसै लिङ्गमा सिद्ध, देवता, ऋषि तथा प्राणीहरू घरमा राति मानिस लीन भएझैं विलीन हुन्छन् ॥३७-३९॥

भगवान् शङ्कर सबै प्राणीहरूका आलय हुनुहुन्छ । त्यसैले उहाँलाई संसारको आलय मानिन्छ । सम्पूर्ण प्राणीहरू उहाँमा लीन हुन्छन्, त्यसैले उहाँलाई लिङ्ग भनिन्छ। शिवलिङ्गमा रहेको वेदी पार्वतीको रूप हो। त्यहाँको लिङ्ग भगवान् शङ्करको रूप हो। त्यसैले लिङ्गलाई उमा र महेश्वरको मूर्ति मानिन्छ। यो लिङ्ग उत्तमभन्दा पनि उत्तम हुन्छ। पशुपतिनाथ साक्षात् भुक्तिदाता र मुक्तिदाता हुनुहुन्छ। जुन मानिसले एकपटक मात्रै भए पनि उहाँको दर्शन गर्छ त्यसको पुण्यफल सुन। हजारौं अश्वमेध यज्ञ, हजारौं वाजपेय यज्ञ, हरेक किसिमका अरू यज्ञ र हरेक किसिमका दान गर्दा जुन फल पाइन्छ, त्यो फल एक पटक पशुपतिनाथको दर्शन गर्दा उपलब्ध हुन्छ ॥४०-४३॥

हे विरूपाक्ष ! त्यस्तो मानिस शरीर छोडेपछि पापरहित भएर शरीरैसित शिवलोक जान्छ । यो साँचो हो, यसमा सन्देह छैन । शरीरलाई दण्डजस्तै बनाएर, भक्तिपूर्वक जसले शिवलिङ्गको दर्शन गर्छ त्यो व्यक्ति पशुको जुनि र संसारको दुःखबाट मुक्त हुन्छ । जसले भक्तिपूर्वक परमेश्वर पशुपतिको लिङ्गको परिक्रमा गर्छ त्यसबाट प्राप्त हुने पुण्य लिएर त्यो महान् शिवलोकमा जान्छ । जसले भगवान् पशुपतिको पूजा गरेर यहाँ उहाँको मन्त्र जप गर्छ त्योसम्पूर्ण जन्ममा गरेका पापबाट मुक्त भएर त्यो परमधाममा जान्छ । विभूति लगाउने र रुद्राक्षमाला धारण गर्ने व्यक्तिले के कस्तो पुण्यफल पाउँछ त्यो कुरा सुन । त्यस्तो मानिस जहाँसम्म बाँच्दछ, त्यहाँसम्म शिवजीजस्तै भएर यस धरातलमा हिँडेको हुन्छ । शरीरको अन्त्य भएपछि ऊ शिवलिङ्गमा विलीन हुन्छ अथवा शरीरैसहित शिवस्वरूप हुन्छ । त्यसलाई देवता, ऋषि र सिद्धहरूले सेवा गर्छन् ॥४४-४९॥

---

१२. सर्वभूतैश्च लीयन्ते, इति न.सं.पु.पाठः ।
१३. सर्वलोकैर्वै, इति न.सं.पु.पाठः ।
१४. मूर्त्तिमेतत्, इति न.सं.पु.पाठः ।

त्रैलोक्यभवनं त्यक्त्वा चात्रैव प्रवसन्मुहुः । शृणु कश्चित्पुरा मुक्तः काम्बोजो नाम विश्रुतः ॥५०॥
म्लेच्छो हिमवतश्चाऽधो भुव्युत्तरदिशि स्थितः । जातिस्मरणतीर्थेऽसौ त्रिवारं तज्जलं पपौ ॥५१॥
प्राग्जातिस्मरणं प्राप्तो म्लेच्छो नामाधिपो द्विज । त्यक्त्वा प्रियां प्रियं राज्यं सर्वस्वं तृणवन्नृपः ॥५२॥
राज्याद्विनिःसृतो म्लेच्छोऽस्थिरां तां संसृतिं विदन् । तदाधावन्निरोद्धुं तं भार्या पुत्राश्च मन्त्रिणः ॥५३॥
पथि संरुध्य भूपं तमूचुर्मधुरया गिरा ।

भृत्या ऊचुः

क्व यास्यसि महाराज ! त्यक्त्वा राज्यं सुखञ्च नः ॥५४॥
तदुत्थिता कथं स्वान्ते विरक्तिर्भूपते तव ।

काम्बोज उवाच

कस्य पुत्रः सुखं राज्यं भार्या सर्वस्वमर्थकम् ॥५५॥
तत्सुखानि च भो भृत्याः भुक्त्वा जीवति कश्चिरम् । शृणु भृत्या पुरा यत्तज्जन्म लब्धं सहस्रशः ॥५६॥
ततो लब्धोऽप्ययं देहः सिद्धेश्वरप्रसादतः । बहुयोनिषु सञ्जातः स्वेदजेष्वण्डजेषु च ॥५७॥
उद्भिज्जोऽहं ततः कालाज्जरायुजो बहु पुनः । नियुतवत्सरान्तेऽहं वाग्वत्यां निधनात्पुनः ॥५८॥
लब्ध्वा विप्रतनुं काश्यां प्रतिग्रहपरोऽभवम्[१५] । असत्प्रतिग्रहात्तस्यां तदुपजीवनादहम् ॥५९॥
मर्कटतां समापन्नः[१६] तस्माल्लब्धो हिमाचलः । ततः पशुपतेः पुण्ये चावात्सं सिद्धकानने ॥६०॥
फलमूलाशनोऽजस्रं सिंहव्याघ्रभयातुरः । पशुपतेर्हि कौवेर्यां यत्र सिद्धेश्वरो विभुः ॥६१॥

स्वर्गलाई पनि छोडेर यसै ठाउँमा बसोवास गर्ने काम्बोज नाम गरेका कुनै व्यक्ति अघि मुक्त भए, त्यो कुरा सुन । ती म्लेच्छले हिमालयको तल्लो भागमा उत्तरतिर बसेर जातिस्मरण तीर्थमा गई तीन पटक त्यस तीर्थको जल पिएका थिए । हे विरूपाक्ष ! त्यस तीर्थको जल पिउनाको प्रभावले म्लेच्छकुलमा पैदा भएका ती राजालाई पूर्वजन्मको सम्झना भयो । त्यसपछि सम्पूर्ण राज्य र सर्वस्वलाई झारबराबर ठानेर त्याग गरे । संसारलाई अनित्य सम्झेर ती म्लेच्छ राजा राज्य छोडेर निस्किए । त्यसबेला उनलाई रोक्न रानी, छोराहरू र मन्त्रीहरू दौडिए । बाटमा रोकेर उनीहरूले मीठो भाषामा भने ॥५०–५३½॥

मन्त्रीहरूले भने – हे महाराज ! यो राज्यको सुख र हामीहरूलाई छोडेर हजुर कता जाँदै हुनुहुन्छ ? हे राजन् ! हजुरको मनमा कसरी वैराग्य पैदा भयो ? ॥५४½॥

कम्बोज नाम गरेको म्लेच्छले भने – हे मन्त्री हो ! कसको छोरो सुख, राज्य, पत्नी, सर्वस्व र त्यसबाट हुने सम्पूर्ण सुविधालाई भोग गरेर सधैं बाँचिरहन्छ ? हे मन्त्री हो ! मैले यसअघि हजारौं जन्महरू भोगिसकें । त्यसपछि सिद्धेश्वरको अनुकम्पाबाट मैले यो शरीर पाएको छु ॥५५–५६½॥

म पहिले स्वेदज योनिमा पैदा भएँ, त्यसपछि अण्डजयोनिमा मैले अनेक पटक जन्म लिएँ । पछि उद्भिज्जयोनिमा प्राप्त भई धेरै समयपछि म जरायुजयोनिमा पैदा भएँ । लाखौं वर्षपछि म फेरि यसै वाग्वतीनदीको तीरमा मरेको हुँदा प्रतिग्रह लिने ब्राह्मणको शरीर लिएर काशीमा जन्मिएँ । खराब किसिमको प्रतिग्रह लिएर जीविका चलाएको हुँदा म पछि बाँदर भएर जन्मिएँ । त्यसपछि हिमालयमा आएँ । त्यसपछि सिंह र बाघदेखि डराउँदै फलफूल तथा कन्दमूल खाएर सधैं म सिद्धहरू बस्ने पशुपतिको पवित्र जङ्गलमा बस्न थालें ॥५७–६१॥

---

१५. प्रतिग्राह्यभवं पुनः, इति न.सं.पु.पाठः ।   १६. अभवं मर्कटोऽहञ्च, इति न.सं.पु.पाठः ।

भुक्त्वा बिल्वफलान्याशु बिल्ववृक्षे तदन्तिके। तत्पत्राणि समाकृष्य प्रक्षिप्तं सहसा मया ॥६२॥
सम्यक् तान्यपतन् भृत्याः ! तल्लिङ्गोपरि साम्प्रतम्। कार्त्तिक्यां पूर्णिमायाञ्च प्रातःकालेऽवसं कुजे ॥६३॥
मामुद्दिश्य धनुः पापी तत्रागत्य विभीषयन्। जघान सहसा पापी मे पृष्ठं छद्मगेन च ॥६४॥
निश्चकाम च[१७] सक्रोधो मृगयाभिरतस्ततः। शरप्रहारतस्तस्य पीडितोऽहञ्च तत्कुजात् ॥६५॥
अवतीर्याशु दुद्राव चार्यातीर्थञ्च प्राप्तवान्[१८]। आर्यातीर्थजलं प्राश्य तत्रैव निधनं गतः ॥६६॥
तद्देहश्च[१९] ममैवाशु रुद्रलोकञ्च लब्धवान्। शतं युगं स्थितस्तत्र सर्वतो विगतज्वरः ॥६७॥
सिद्धेश्वरप्रसादाद्वै तत्तीर्थे निधनात्पुनः। तत्पुण्यसंक्षयात्तस्माद् भ्रष्टोऽहमत्र वै पुनः ॥६८॥
एषा तनुर्मया लब्धा लोकवन्द्या नृपोत्तमा[२०]। एतत्तीर्थजलं पीत्वा त्रिवारञ्च मया पुनः ॥६९॥
पूर्वजातिपरिज्ञानं लब्धं तयोः प्रसादतः। अतोऽधुना ह्यहं भृत्या ! लिङ्गं पाशुपतं परम् ॥७०॥
व्रजामि सेवितुं पुण्यं यत्रोवाह च वाग्वती[२१]। राज्यं नेच्छामि हे भृत्याः ! लोभमोहभयाकुलम् ॥७१॥
गच्छत स्वाश्रमं यूयं तं सेवितुं व्रजाम्यहम्।

भृत्या ऊचुः

गृहस्थानां समो धर्मः परो नास्ति नृपोत्तम ॥७२॥
अभ्यागतान् च सत्कृत्य प्रीत्या भोजनदानतः[२२]। इन्द्रः सम्प्रीयते विष्णुः तेषाञ्च पादशौचतः[२३] ॥७३॥
पूजनैः शिवधातारौ होमेन पितरः समे[२४]। स्वर्गादि सत्फलप्राप्तिर्भवेत् तेषां समादरात्[२५] ॥७४॥
अतिथिपालनान्नित्यं स्वर्गः तस्य गृहेषु च।

सधैँ पशुपतिको उत्तर दिशामा जहाँ सिद्धेश्वर भगवान् बस्नुहुन्थ्यो, त्यसको नजिकै बेलको रुखमा फलेको बेल खाएँ। त्यसपछि मैले विनाकाममा त्यसै रुखका पात टिपेर तल खसालेँ। त्यसरी तल खसालेका बेलका पातहरू सिद्धेश्वर भगवान्को लिङ्गमाथि पर्न गएछन्। हे मन्त्री हो ! त्यसदिन कार्तिक पूर्णिमाको प्रातःकाल थियो। म रुखमा चढेको थिएँ। त्यहाँ मलाई डर देखाउन हातमा धनुष लिएर एउटा पापी अचानक आयो र मलाई दया नराखीकन बाणले हिर्कायो। रिसाएर निर्दय भई ममाथि प्रहार गरेको बाणको पीडाले गर्दा म रुखबाट ओर्लिएँ र दौडिँदै त्यहाँबाट भागेँ र आर्यघाटमा गएर डुबुल्की मारेँ। आर्यातीर्थको जल पिएपछि म त्यसै ठाउँमा मरेँ। मेरो शरीर तुरुन्तै रुद्रलोकमा पुग्यो ॥६२-६६॥

सम्पूर्ण तापबाट मुक्त भएर सय युगसम्म त्यसै लोकमा बसेँ ॥६७॥ सिद्धेश्वरको अनुग्रह र त्यस उत्तम तीर्थमा मरण भएका कारण म रुद्रलोकमा थिएँ तर त्यो पुण्यफल सिद्धिएको हुनाले म फेरि भ्रष्ट भएर मैले दुनियाद्वारा मानिएको राजाको यो शरीर पाएँ। यसै तीर्थको जल तीनपटक पिएको हुनाले शिवजी र पार्वतीको अनुग्रहले गर्दा मैले पूर्वजन्मको ज्ञान पाएँ। हे बाबु हो ! यसैले म अहिले जहाँ वाग्वती हुनुहुन्छ त्यसै ठाउँमा भगवान् शिवजीको लिङ्गको आराधनाका लागि जाँदैछु। हे मन्त्री हो ! लोभ, मोह र भयले सताउने यो राज्य मलाई चाहिँदैन। तिमीहरू आ-आफ्नो घर जाओ। म शिवजीको आराधना गर्न जान्छु ॥६७-७१½॥

मन्त्रीहरूले भने - हे महाराज ! गृहस्थाश्रमजस्तो अर्को धर्म छैन। पाहुनाहरूलाई बोलाएर उनीहरूको स्वागत गराउनाले, भोजन गराउनाले इन्द्र पनि खुसी हुन्छन्। उनीहरूको गोडा धोयो भने विष्णु पनि प्रसन्न हुन्छन्। सत्कार गऱ्यो भने ब्रह्मा र शङ्कर पनि प्रसन्न बन्नुहुन्छ। होम गऱ्यो भने पितृ र देवताहरू खुसी हुन्छन्। जसले भनेजस्तो गरेर खान लाउन दिन्छ, त्यसले चाहेका सबै फल प्राप्त गर्दछ। अतिथिलाई पालेर राख्यो भने घर पनि सधैँ स्वर्गजस्तै हुन्छ ॥७२-७४½॥

---

१७. निर्दयमपि, इति न.सं.पु.पाठः।
१८. चार्यातीर्थमवाप्तवान्, इति न.सं.पु.पाठः।
१९. तच्छरीरम्, इति न.सं.पु.पाठः।
२०. एतां तनुं मया लब्धां लोकवन्द्यां नृपोत्तमाम्, इति न.सं.पु.पाठः।
२१. यत्र ववाह वाग्वती, इति न.सं.पु.पाठः।
२२. स्वागतेनाह्वः प्रीतिरशनेन शतक्रतुः, इति न.सं.पु.पाठः।
२३. विष्णोश्च पादशौचेन चार्चनैर्ब्रह्मशङ्करम्, इति न.सं.पु.पाठः।
२४. होमेन पितृदेवाश्च ययुः स्वर्गं विधीयते, इति न.सं.पु.पाठः।
२५. सर्वं फलं भवेत्तस्य यथोक्तं यस्तु पोषयेत्, इति न.सं.पु.पाठः।

वनेऽपि दोषाः प्रभवन्ति रागिणां गेहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्त्तते निवृत्तरागस्य गृहं तपोवनम् ॥७५॥

काम्बोज उवाच

कामः क्रोधस्तथा लोभो देहे तिष्ठन्ति तस्कराः । मुष्णन्ति ते जगत्सर्वं तद् व्यर्थं तनुपोषणम्[२६] ॥७६॥
स्नेहकामानले कुण्डे होतारो मोहविप्लुताः । नराणां तत्र हूयन्ते यौवनानि धनानि च ॥७७॥
यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम् । स्नेहमूलानि दुःखानि तानि त्यक्त्वा भवेत् सुखी ॥७८॥
शैशवे च चरेद् धर्ममनित्यं जीवनं खलु[२७] । फलानामिव पक्वानां पतनं[२८] नरके ध्रुवम् ॥७९॥
मायामोहितमर्त्याश्च[२९] पुत्रदारधनान्विताः । जायन्ते च म्रियन्ते च ह्यनन्तनिधनोद्भवाः ॥८०॥
बहुदुःखं भवेद्राज्यं[३०] लोभमोहमदाकुलम् । पुत्रादपि भयं यत्र तत् सन्त्यज्य भवेत् सुखी ॥८१॥
सहस्रेषु ह्यहं जातो मत्तः परं[३१] सहस्रशः । परम्परा सन्ततीनां[३२] पशुमायाविमोहिता ॥८२॥
जन्मसंसारभीतोऽस्मि जन्मनाशौ[३३] पुनः पुनः । जन्ममरणसंयुक्तो देहोऽयं पाञ्चभौतिकः ॥८३॥
क्षुधा तृष्णा महत् कष्टं[३४] गर्भवासेषु दारुणम् । इन्द्रियाणि तनुश्चैव[३५] दह्यन्ते जठराग्निना ॥८४॥
तस्माज्जन्म न वाञ्छामि नैव राज्यं सुतं प्रियाम्[३६] । गच्छामि शरणं तात ! पशुपतेः परात्परम् ॥८५॥

वनैमा बसे पनि वैराग्य उठेन भने अनेक दोषहरू आइलाग्छन् । घरैमा बसे पनि इन्द्रियलाई जितेका छ भने त्यो तपस्या हुन्छ । जो मानिस असल काममा प्रवृत्त हुन्छ, जसको विषयभोगप्रतिको अनुराग हटेको छ त्यसका निम्ति घर पनि तपोवन नै हो ॥७५॥

काम्बोज राजाले भने– शरीरमा काम, क्रोध, लोभ आदि चोरहरू बस्छन् । त्यसैले यो शरीरलाई पोस्नु व्यर्थ हो । समस्त जगत्को मोहमा डुबेका मानिसहरूलाई स्नेह र कामरूपी अग्निमा हवन गर्ने तिनै चोरहरू हुन् । त्यो कुण्डमा मानिसको जवानी, धन आदि सबै हवन गरिन्छ । जहाँ माया छ, त्यहाँ डर हुन्छ । स्नेह नै दुःखको कारण हो । दुःख पैदा गर्ने मूल तत्व स्नेह नै हो । त्यसैले स्नेह छोड्ने मानिस अत्यन्त सुखी हुन्छ । जीवन अनित्य छ, यो कहिले खतम हुने हो निश्चित छैन । त्यसैले सानो उमेरमा नै धर्म गर्नुपर्छ, होइन भने पाकेका फलहरू आकाशबाट भुइँमा खसेझैँ अवश्य नै नरकमा परिन्छ । छोरा, स्वास्नी र धनले युक्त भएर मायामा डुबेका मनुष्यहरूको अनन्त पटक जन्म र मृत्यु हुन्छ । तिनीहरू जन्मिरहन्छन्, मरिरहन्छन् ॥७६–८०॥

लोभ, मोह र मात्सर्यले युक्त भएको राज्य पनि अत्यन्त दुःखदायक हुन्छ । त्यहाँ छोराबाट पनि डराउनुपर्छ । त्यसैले राज्य छोड्दा सबैभन्दा सुखी हुन्छ । हजारमा म जन्मिएँ, मबाट हजार जन्मिए अर्थात् सन्तानको परम्परा चल्दै आएको छ । पशुको मायाबाट मोहित भएर छोराबाट छोरा जन्मिए । अनेक जुनी लिएर जन्मनुपर्ने यस संसारदेखि म डराएको छु । यहाँ बारम्बार जन्म र मृत्यु भइरहन्छन् । यो पाञ्चभौतिक शरीर जन्म र मृत्युले युक्त भएको छ । गर्भमा बसेका बेला भोक–तीर्खाले अत्यन्त सताउँछन् । चञ्चल इन्द्रियहरू र शरीरसमेत जठराग्निमा डढ्न पुग्छन् । त्यसैले जन्म, राज्य, छोरो, धन, पत्नी आदि कुनै पनि विषय चाहन्नँ । हे बाबु हो ! म उत्तम भगवान् श्रीपशुपतिनाथको शरणमा जान्छु ॥८१–८५॥

---

२६. तस्मात्त्यजेदिमां तनुम्, इति न.सं.पु.पाठः ।
२७. बालत्वे चरिते धर्म अनित्यं खलु जीवितम्, इति न.सं.पु.पाठः ।
२८. जायते, इति न.सं.पु.पाठः ।
२९. गगनमिव मर्त्याश्च, इति न.सं.पु.पाठः ।
३०. राज्यमपि बहुदुःखम्, इति न.सं.पु.पाठः ।
३१. मयि जातः, इति न.सं.पु.पाठः ।
३२. सुतेन हि सुतो जातः, इति न.सं.पु.पाठः ।
३३. जन्मनि च, इति न.सं.पु.पाठः ।
३४. महत्तीव्रम्, इति न.सं.पु.पाठः ।
३५. चलत्वेन, इति न.सं.पु.पाठः ।
३६. कार्यं मे राज्यं पुत्रं धनं प्रियाम्, इति न.सं.पु.पाठः ।

सिद्धर्षिरुवाच

इत्युपदिश्य तेभ्योऽसौ म्लेच्छाधिपश्च सत्त्वरम्। त्यक्त्वा तान्[३७] निशि चैकाकी जगाम हिमवद्गिरिम्॥८६॥
म्लानश्रियस्ततो भृत्याः पुरोधाय नृपात्मजम्। जग्मू राज्यञ्च ते तस्मै चाभिषेकं ददुर्मुदा॥८७॥
विलङ्घ्य हिमवन्तञ्च काम्बोजोऽसाविहाययौ। आर्यातीर्थे मुदा सस्नौ पूर्वजन्मविपाकतः॥८८॥
कार्त्तिक्यां पूर्णिमायां स सस्नौ तीर्थेषु भक्तितः। आर्यातीर्थे त्रिवेण्याञ्च खर्वरिके मृगोदके॥८९॥
स स्नात्वा विधिवत्तेषु सिद्धेश्वरं समार्चयत्[३८]। आज्ञां प्राथ्र्य ततो रुद्रात्प्रणम्यात्राययौ पुनः॥९०॥
ननाम वासुकिं लिङ्गं पञ्चवक्त्रं तु तैजसम्[३९]। दण्डवत्पातयन् देहं भूमौ भक्त्या पुनः पुनः॥९१॥
आदाय चोपदेशं स ऋतुमुनिवरान्नृपः। परिक्रम्य महालिङ्गं भक्त्यानम्य यथाविधि॥९२॥
सम्पूज्य विधिवल्लिङ्गं वाद्यैः पञ्चोपचारकैः। जजाप तन्मनुं भक्त्या स्थिरचित्तो दिवानिशम्[४०]॥९३॥
वरपुलकितदेहो ध्यायमानो हृदब्जे
स्मरहरहरमाद्यं ज्योतिरेकं हि साक्षात्।
परिकरशिखयासौ नूनमग्राहि तत्र
शलभ इव कृशानावीश्वरेण स्वकीये॥९४॥
म्लेच्छाधिपेन पूर्वञ्च प्रसादात्तीर्थलिङ्गयोः। पुरा कृतेन यल्लब्धं सायुज्यं पशुपेश्वरे॥९५॥
एवं लब्धञ्च सायुज्यं वेदगर्भेण शर्मणा। सङ्गमेषु च वाग्वत्याः स्नात्वा लिङ्गस्य दर्शनात्[४१]॥९६॥

नेमुनिले भन्नुभयो – यति कुरा भनेर म्लेच्छाधिपति ती राजा तुरुन्त तिनीहरूलाई रातमा त्यहीँ छोडेर एक्लै हिमालय पर्वतमा गए। मलिन मुख लगाएका मन्त्रीहरू राजाका छोरालाई अगाडि लगाएर राज्यतिर फर्किए। प्रसन्न भएर उनीहरूले त्यसको अभिषेक गरे। ती काम्बोज नाम गरेका राजा हिमालय पार गरेर यस ठाउँमा आए। पूर्वजन्मको कर्मले गर्दा उनले आर्यातीर्थमा आएर प्रेमपूर्वक स्नान गरे॥८६–८८॥

कार्तिक शुक्ल पूर्णिमाको दिन उनले भक्तिपूर्वक आर्यातीर्थ, त्रिवेणी, खर्वरिका र मृगोदक तीर्थमा स्नान गरे। उनले ती तीर्थमा स्नान गरेर सिद्धेश्वरको पूजा गरे र शिवलाई प्रणाम गरी उहाँसित अनुमति लिएर फेरि यहाँ आए। यसपछि उनले भक्तिपूर्वक पञ्चमुखी वासुकि र तेजस्वी लिङ्गलाई भुइँमा शरीरलाई लठ्ठीजस्तै लम्पसार पारेर प्रणाम गरे। ती राजाले ऋतुनामक मुनिवरसित उपदेश लिएर भक्ति र विधिपूर्वक त्यस महालिङ्गको परिक्रमा गरे॥८९–९२॥

हे विरूपाक्ष ! लिङ्गको विधिपूर्वक बाजा र पञ्चोपचारले पूजा गरे। रातभर भक्तिपूर्वक शिवमन्त्र जपे। त्यसपछि उनले अत्यन्त रोमाञ्चित हुँदै हृदयकमलमा बसेका कामदेवलाई भस्म गर्ने ज्योतिस्वरूप शिवजीको ध्यान गरे र बत्तीका ज्वालाले पुतलीलाई आफूमा समाहित गराएझैँ ईश्वरले आफूमा भक्तलाई लीन गराए। यसरी अघि यस तीर्थ र यस लिङ्गको अनुकम्पाले गर्दा म्लेच्छाधिपतिले पशुपतिमा मुक्ति प्राप्त गरेका थिए। यसैगरी वेदगर्भशर्मा नाम गरेका ब्राह्मणले वाग्वतीको सङ्गममा स्नान गरेर शिवलिङ्गको दर्शन गरेको हुँदा मुक्ति पाएका थिए॥९३–९६॥

---

३७. तान् त्यज्य, इति न.सं.पु.पाठः।
३८. समर्चितः, इति न.सं.पु.पाठः।
३९. सुतेजसम्, इति न.सं.पु.पाठः।
४०. यावद्विप्र हरं निशि, इति न.सं.पु.पाठः।
४१. लिङ्गप्रदर्शनात्, इति न.सं.पु.पाठः।

विरूपाक्ष उवाच

भगवञ्छ्रोतुमिच्छामि भूयोऽहं भवतो ध्रुवम् ॥९७॥

स्नातव्यं सङ्गमे भक्तैरित्युक्तं भवताऽधुना[४२]। कस्मात् तीर्थात्[४३] समारभ्य स्नातव्यं केषु केषु च ॥९८॥

एतद् ब्रूहि मुनिश्रेष्ठ ! सर्ववार्त्ताविशारद ।

सिद्धर्षिरुवाच

सेतुभिन्नं महातीर्थमारभ्य स्नायतां द्विज ॥९९॥

आवाग्मत्युद्भवं सर्वं ततः कामं च प्राप्स्यसि[४४]।

माहात्म्यं ये वरपशुपतेर्यत्र शृण्वन्ति नूनं

चाऽध्यायेऽस्मिन् सुकृतिनिपुणैर्लभ्यमैशं हि धाम ।

सम्प्राप्यार्यापरशिवपदं तत्र भक्त्येशचित्ता

मोदन्ते ते ससुखमनिशं संविहायेहलोकम् ॥१००॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां पशुपतिसिद्धेश्वरयोर्माहात्म्यं नाम एकषष्ट्युत्तरशततमोऽध्यायः ॥१६१॥

विरूपाक्षले भने – हे भगवन् ! हजुरले वाग्वतीका सङ्गममा स्नान गर्नाले वेदगर्भ शर्मा मुक्त भए भन्नुभयो। त्यो कुरा म फेरि सुन्न चाहन्छु। हे मुनिश्रेष्ठ ! वाग्वतीको स्नान गर्दा कुन तीर्थबाट सुरु गरी कुन कुन तीर्थमा स्नान गर्ने ? हजुर सम्पूर्ण कुरा जान्नुहुन्छ, यो कुरा पनि मलाई बताउनुहोस् ॥९७–९८॥

नेमुनिले भन्नुभयो – हे विरूपाक्ष ! सेतुभिन्न महातीर्थबाट सुरु गरेर वाग्द्वारसम्म स्नान गर, तिमीले इच्छा लागेका सबै फलहरू प्राप्त गर्नेछौ ॥९९॥

जुन मानिसले यस अध्यायमा वर्णन गरिएको उत्तम पशुपतिको यो माहात्म्य सुन्छन्, तिनीहरूले पुण्यशाली व्यक्तिले मात्र पाउने शिवलोकलाई प्राप्त गर्छन् । भक्तिपूर्वक ईश्वरको चिन्ता गर्ने ती मानिसहरू यस संसारलाई छाडेपछि शिवपद प्राप्त गरी सधैं सुखका साथ रमाउनेछन् ॥१००॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा पशुपति र सिद्धेश्वरको माहात्म्यनामक एकसय एकसट्ठिऔं अध्याय पूरा भयो ।

---

४२. वाग्वत्याः सङ्गमान्यन्यैरित्युक्तं भवताऽधुना, इति न.सं.पु.पाठः । ४३. किं तीर्थञ्च, इति न.सं.पु.पाठः ।
४४. लभिष्यसि, इति न.सं.पु.पाठः ।

द्विषष्ट्युत्तरशततमोऽध्यायः

अनेकतीर्थानां नैकविधवैशिष्ट्यवर्णनम्

स्कन्द उवाच

उपदेशं समाकर्ण्य विरूपाक्षश्च नेमुनेः। वाग्वत्याञ्च पुनः सस्नौ सर्वेषु सङ्गमेषु च ॥१॥
सेतुभिन्नं समारभ्य विरूपाक्षो घटोद्भव। वाग्वतीसम्भवं यावद् भक्त्या सस्नौ हि तेषु च ॥२॥
मुनिं पप्रच्छ माहात्म्यं नामधेयानि सर्वशः। सङ्गमेषु[1] च वाग्वत्यां तेषु स्नात्वा हि तत्र सः ॥३॥

विरूपाक्ष उवाच

माहात्म्यमभिधानानि तीर्थानां च मुनीश्वर। वाग्वतीसङ्गमानां हि तेषां नानापगायुजाम्[2] ॥४॥
कस्यां कस्यां तिथौ तेषु स्नातव्यं हि वद प्रभो। फलानि कानि स्नानाच्च लभ्यन्ते स्नातकैः पुनः[3] ॥५॥

नेमुनिरुवाच

तीर्थानां तिथिभावं च शृणु वक्ष्ये विरूपदृक्। स्नात्वा फलानि लभ्यन्ते स्नातकैः सकलानि च ॥६॥
सेतुभिन्ने महातीर्थे शुक्लाष्टम्यां मधोः कृतात्[4]। स्नानात् यज्ञफलं[5] प्राप्य रुद्रलोके महीयते ॥७॥
सर्वपर्वसु यत्नेन स्नातव्यं धीमताऽनिशम्। विशेषेण मधोर्मासे कोटिगुणफलं लभेत् ॥८॥
सर्वतीर्थमये तीर्थे स्नानं दानं च यत्कृतम्। तत्सर्वमक्षयं प्राप्य रुद्रलोकं वसेत्सुखी ॥९॥
वियोगः कान्तया यस्य यस्याश्च स्वामिना[6] पुनः। तद्योगं वाञ्छितं प्राप्य गच्छेतां शिवधामनि[7] ॥१०॥
ततो गोपालतीर्थे च स्नातव्यं द्वादशीतिथौ। मधोः सितेऽसिते[8] वापि गवां कोटिफलं भवेत् ॥११॥

अध्याय - १६२

अनेक तीर्थहरूका विभिन्न विशेषताहरूको वर्णन

कार्तिक स्वामीले भन्नुभयो – नेमुनिको भनाइ सुनेर विरूपाक्षले वाग्वती र त्यहाँका सबै सङ्गममा फेरि स्नान गरे। हे अगस्त्य मुनि ! सेतुभिन्नतीर्थबाट सुरु गरेर विरूपाक्षले वाग्वतीको उत्पत्तिस्थलसम्म पर्ने सबै तीर्थहरूमा भक्तिपूर्वक स्नान गरे। वाग्वतीको सङ्गम र ती तीर्थहरूमा स्नान गरेर ती विरूपाक्षले नेमुनिसित ती सबैको नाम र माहात्म्य सोधे ॥१–३॥

विरूपाक्षले भने –हे मुनिश्रेष्ठ ! ती तीर्थहरूको नाम तथा माहात्म्य, विभिन्न नदीहरू मिसिएका वाग्वतीका सङ्गमस्थलहरू, तीमध्ये कुन कुन नदीमा स्नान गर्नुपर्ने हो, त्यस स्नानबाट स्नान गर्ने व्यक्तिले के कस्तो फल पाउँछ ? त्यो सबै बताइदिनुहोस् ॥४–५॥

नेमुनिले भन्नुभयो– हे विरूपाक्ष ! तिथि अनुसार तीर्थको भाव म बताउँछु, सुन। त्यसअनुसार स्नान गर्नाले मानिसहरूले सम्पूर्ण फल पाउँछन्। चैत्र महिनाको शुक्ल अष्टमीका दिन सेतुभिन्न महातीर्थमा स्नान गर्ने व्यक्ति सम्पूर्ण यज्ञको फल प्राप्त गरेर रुद्रलोकमा सुहाउँछ। बुद्धि भएको मान्छेले प्रयास गरेर भए पनि सबै पर्वमा सधैं स्नान गर्नुपर्छ। विशेष गरी चैत्र महिनामा स्नान गर्दा करोडौं गुणा फल पाइन्छ। सम्पूर्ण तीर्थमय भएको त्यस तीर्थमा स्नान अथवा दान जे गरिन्छ, त्यसले त्यो व्यक्ति सबै अक्षय फल पाएर रुद्रलोकमा सुखसित बस्न पाउँछ। जसको पत्नीसँग वियोग छ अथवा जसको पतिसँग वियोग छ, ती दुबैको संयोग हुन्छ र दुबै शिवलोकमा बस्न पाउँछन्। त्यसपछि चैत्र महिनाको कृष्ण अथवा शुक्ल दुबै द्वादशीका दिन गोपालतीर्थमा स्नान गर्नुपर्छ। त्यसो गर्ने मानिसले करोडौं गाई दान दिएको फल पाउँछ ॥६–११॥

---

१. सङ्गमानाम्, इति न.सं.पु.पाठः।
२. वाग्वतीसङ्गमानां नानापगाभिः संयुतम्, इति न.सं.पु.पाठः।
३. फलानि कानि च स्नानाल्लभ्यन्ते स्नातकैः पुनः, इति न.सं.पु.पाठः।
४. हि सः, इति न.सं.पु.पाठः।
५. सर्वयज्ञफलम्, इति न.सं.पु.पाठः।
६. पतिना, इति न.सं.पु.पाठः।
७. उभौ शिवपुराश्रितौ, इति न.सं.पु.पाठः।
८. सितासिते, इति न.सं.पु.पाठः।

वन्यजन्तूद्भवैः पापैर्विमुक्तोऽसौ पुराकृतैः । स्नात्वा तत्र व्रजेच्छैवं लब्ध्वा गवां सहस्रकम् ॥१२॥
दामोदरमहातीर्थे तदुपरि विरूपदृक् । मधोः सितैकादश्याञ्च स्नातव्यं भक्तितो बुधैः ॥१३॥
पशुजन्मार्जितैः पापैर्विमुक्तः स्नातकस्ततः । गोमेधानां फलं प्राप्य गवां लोके महीयते ॥१४॥
सर्वौषधिरसे तीर्थे स्नातव्यं भक्तितो नरैः । सर्वे रोगाः प्रणश्यन्ति स्नातकानाञ्च तत्र वै ॥१५॥
पुराकृतैनसो जातैः पापरोगैर्विमुच्यते । स्नानात्तत्रैव पुण्यात्मा रुद्रलोके महीयते ॥१६॥
भृगुपातगणेशाख्यं महातीर्थं सुसिद्धिदम् । राधसितचतुर्थ्याञ्च तस्यां स्नातव्यमार्यकैः ॥१७॥
यः स्नात्वार्चीति विश्वेशं गाणपत्यं समाप्नुयात्[९] । अग्निष्टोमफलं प्राप्य विकिल्विषश्च सिद्धिभाक् ॥१८॥
प्रमोदाख्ये महातीर्थे द्वादश्यां स्नाति यो जनः । सितायामसितायां वा मधोस्तस्य फलं शृणु ॥१९॥
विनशने हरद्वारे स्नानाद्यावत् फलं भवेत् । तावद्दशगुणं प्राप्य विष्णुलोके महीयते ॥२०॥
यं यमिच्छन्ति कामञ्च स्त्रियो वा पुरुषाश्च वा । सद्यस्तं ते लभेरन् वै[१०] स्नानात्तत्रैव पर्वसु ॥२१॥
सर्वदानोद्भवं पुण्यं भक्त्या स्नानाच्च प्राप्नुयात्[११] । अश्वमेधफलं प्राप्य रुद्रलोकं स गच्छति ॥२२॥
पूर्वजन्मविपाकेन कुरूपो यदि निष्प्रभा । सुन्दरी सा प्रभायुक्ता निर्मलाङ्गो भवेत्[१२] पुमान् ॥२३॥
कायनिर्मलतीर्थे च स्नानान्निष्पापविग्रहः । प्रगच्छति मुदा स्वर्गं भुक्त्वा भोगान्यथेप्सितान् ॥२४॥
मधोः शुक्लतृतीयायां स्नायात्तत्रैव ना यदि[१३] । दशगवां फलं प्राप्य रुद्रलोकं स गच्छति ॥२५॥

यस तीर्थमा स्नान गर्ने व्यक्ति पहिले वन्यजन्तुहत्याजन्य पापहरूबाट मुक्त हुन्छ र हजार गोदान गरेको फल पाएर शिवलोकमा जान्छ । हे विरूपाक्ष ! त्यसभन्दा माथि दामोदरमहातीर्थ छ । बुद्धि भएका मानिसले त्यहाँ चैत्र शुक्ल एकादशीका दिन भक्तिपूर्वक स्नान गर्नुपर्छ । त्यहाँ स्नान गर्ने मानिस पशुसमान मूर्ख भई जीवनयात्रा गर्दा लागेका समस्त पापबाट मुक्त हुन्छ र गोमेधयज्ञ गरेको फल प्राप्त गरेर गोलोकमा ससम्मान रहन पाउँछ ॥१२–१४॥

सर्वौषधिरस नाम गरेको तीर्थमा भक्तिपूर्वक स्नान गर्नुपर्छ। त्यहाँ स्नान गर्ने मानिसहरूका सम्पूर्ण रोगहरू नाश हुन्छन्। त्यहाँ स्नान गर्नाले आत्मा पवित्र हुन्छ। यसरी स्नान गर्ने व्यक्ति आफूले पहिले गरेका पापबाट उत्पन्न भएका रोगबाट मुक्त हुन्छ र रुद्रलोकमा गएर ससम्मान बस्न पाउँछ। भृगुपातगणेश नाम गरेको तीर्थ अत्यन्त सिद्धिदायक छ। वैशाखकृष्ण चतुर्थीका दिन मानिसहरूले त्यस ठाउँमा स्नान गर्नुपर्छ। यसप्रकार स्नान गरेर विश्वेश्वरको पूजा गर्नाले गणपतिको पद प्राप्त हुन्छ। फेरि त्यस्ता साधक अग्निष्टोम यज्ञ गरेको फल पाएर पापबाट मुक्त हुन्छन् र सिद्ध बन्दछन् ॥१५–१८॥

प्रमोद नाम गरेको महातीर्थमा चैत्रशुक्ल अथवा कृष्ण द्वादशीका दिन स्नान गर्दा के फल प्राप्त हुन्छ त्यो कुरा सुन । सरस्वती गुप्त भएको मरुतीर्थमा र हरिद्वारमा स्नान गर्नाले जति फल प्राप्त हुन्छ त्यसको दशगुणा फल प्रमोदतीर्थमा स्नान गर्नाले प्राप्त हुन्छ र स्नान गर्ने मानिस ससम्मान विष्णुलोकमा बस्न पाउँछ। त्यस तीर्थमा पर्वहरूमा स्नान गर्नाले स्त्री अथवा पुरुषले जे जे चाहन्छन् त्यही त्यही फल पाउँछन्। भक्तिपूर्वक त्यहाँ स्नान गर्नाले सम्पूर्ण दान गर्दा जुन पुण्य हुन्छ त्यही पुण्य प्राप्त गर्दछ र अश्वमेध यज्ञ गरेको फल प्राप्त गरेर ऊ रुद्रलोक जान्छ । पूर्वजन्मको कुकृत्यले कुनै पुरुष कुरूप भएर वा कुनै स्त्री सौन्दर्यहीन भएर जन्मिएका छन् भने पनि तिनले त्यहाँ स्नान गर्दा स्त्री सुन्दरी र प्रभासम्पन्न हुन्छे भने पुरुषको शरीर निर्मल हुन्छ । कायनिर्मलतीर्थमा स्नान गर्नाले मानिस पापबाट मुक्त हुन्छ। इच्छा अनुसारको भोग भोगेर आनन्दसित ऊ स्वर्गलोकमा जान्छ। चैत्रशुक्ल तृतीयाका दिन कुनै पनि व्यक्तिले त्यहाँ स्नान गर्‍यो भने त्यस मानिसले दशवटा गाई दान गरेबराबरको फल प्राप्त गर्छ र शिवलोक जान्छ ॥१९–२५॥

---

९. लभेद् ध्रुवम्, इति न.सं.पु.पाठः ।
१०. तं लभेयुर्वै, इति न.सं.पु.पाठः ।
११. स्नानाल्लभेन्नरः, इति न.सं.पु.पाठः ।
१२. निर्मलविग्रहः, इति न.सं.पु.पाठः ।
१३. स्नानात्तत्रैव मानवः, इति न.सं.पु.पाठः ।

तदुपरीन्द्रतीर्थे च शक्रस्नाते विकिल्विषः । मनसा चेप्सितं प्राप्य स्नातो याति सुरालयम् ॥२६॥
भाद्रशुक्लस्य षष्ठ्याञ्च स्नातः षष्टिगुणं फलम् । षड्वर्षकृतपापैश्च मुक्तः शाक्रं व्रजेत् सुधीः[१४] ॥२७॥
तदुपरि महातीर्थं पञ्चनदमिति श्रुतम् । चैत्रे सितेऽसिते स्नाता चाऽष्टम्यां त्रिदिवं व्रजेत् ॥२८॥
ईषे शुक्ले च पञ्चम्यां स्नातुस्तस्य फलं शृणु । पञ्चजन्मार्जितैः पापैः स मुक्तो नाऽत्र संशयः ॥२९॥
सर्वपर्वसु यो भक्त्या संस्नाति[१५] विधिवत्पुनः । दशाश्वमेधजं प्राप्य फलं रौद्रं[१६] स गच्छति ॥३०॥
कालतीर्थे नरः स्नात्वा कालपाशैर्विमुच्यते । तत उपरि तीर्थे च स्नात्वा रौद्रं व्रजेत्सुखी[१७] ॥३१॥
मृत्युञ्जये महातीर्थे स्नातुस्तस्य फलं शृणु । सप्तजन्मार्जितं पापमपमृत्युश्च नश्यति[१८] ॥३२॥
दशगङ्गासमे पौषे स्नात्वा रुद्रालयं व्रजेत् । अश्वमेधफलं प्राप्य नवम्यामेकवत्सरात् ॥३३॥
तत उपरि तीर्थञ्च महापातकनाशनम् । सहोदरवधान्मुक्तः कश्चित्स्नानात्पुरा शृणु ॥३४॥
हत्वा भ्रातॄन् नृपो म्लेच्छो लोभात्तदग्रहीद्धनम् । तत्पापैर्लेपितः कुष्ठी प्रजात्यक्तो विनिर्ययौ ॥३५॥
भ्रान्त्वा च[१९] मेदिनीं शश्वत्प्राप्तवानत्र पार्थिवः । नारदस्य मुखाच्छ्रुत्वा सस्नौ चाऽत्रैव भक्तितः ॥३६॥
पौषशुक्लचतुर्दश्यां तज्जलस्पर्शनात्तनुः । कुष्ठव्रणैर्विनिर्मुक्ता रुग्भिस्तत्कृतसम्भवैः ॥३७॥
एकसंवत्सरं यावत्तत्र सस्नौ स नित्यशः । सोऽपि ययौ विमानेन ततो मृते त्रिविष्टपम् ॥३८॥

त्यसभन्दा माथि इन्द्रले स्नान गरेको इन्द्रतीर्थ छ । त्यहाँ स्नान गरेपछि मानिस पापबाट मुक्त हुन्छ । त्यहाँ नुहाउने व्यक्ति मनले चिताएको फल प्राप्त गरेर स्वर्गलोक जान्छ । भाद्रशुक्ल षष्ठीका दिन त्यस तीर्थमा नुहाउने व्यक्तिले साठीगुणा बढी फल पाउँछ। त्यो बुद्धिमान् मानिस काम, क्रोध आदि छवटा शत्रुलाई जितेर इन्द्रलोक जान्छ। यसभन्दा माथि पञ्चनद नाम भएको ठूलो तीर्थ छ। त्यहाँ चैत्र शुक्ल तथा चैत्र कृष्ण अष्टमीका दिन स्नान गर्ने व्यक्ति स्वर्ग जान्छ ॥२८॥

आश्विन शुक्ल पञ्चमीका दिन नुहाउने व्यक्तिले के फल पाउँछ, त्यो सुन । उसले पाँच जन्मसम्म गरेका पापहरूबाट मुक्ति पाउँछ, यसमा शङ्का छैन । जसले सबै पर्वमा विधिपूर्वक स्नान गर्छ त्यसले दशवटा अश्वमेध यज्ञ गरेको फल पाउँछ, त्यो रुद्रलोकमा जान्छ । जुन मानिसले कालतीर्थमा स्नान गर्छ त्यो कालपाशबाट मुक्त हुन्छ । यस तीर्थमा यमद्वितीयाका दिन स्नान गर्ने व्यक्ति सुखी भएर रुद्रलोकमा जान्छ । मृत्युञ्जयतीर्थमा स्नान गर्ने व्यक्तिलाई जुन फल मिल्छ, त्यो कुरा सुन । उसले सात जुनीसम्म गरेको पापबाट मुक्ति पाउँछ र उसको अकाल मृत्यु हटेर जान्छ ॥३२॥

त्यस तीर्थमा पौषमहिनामा स्नान गरी दशगङ्गा स्नान गरे बराबरको फल प्राप्त गरेर शिवलोकमा जान्छ । वर्षभरिको प्रत्येक नवमीका दिन स्नान गर्ने मानिसले अश्वमेध यज्ञ गरेको फल पाउँछ। त्यसभन्दा माथि महापापहरूलाई नाश गर्ने महापातकनाशन नामको तीर्थ छ । एउटै पेटको भाइ मार्ने कुनै व्यक्तिले समेत यस तीर्थमा स्नान गर्दा त्यो मुक्त भएको छ, त्यो कुरा सुन ॥३३-३४॥

कुनै म्लेच्छ राजाले लोभवश आफ्ना भाइहरूलाई मारेर तिनीहरूको सम्पत्ति लिएको थियो । त्यसै पापलेगर्दा ऊ कुष्ठरोगी भयो । जनताले उसलाई राज्यबाट निकालिदिए । त्यहाँबाट निक्लिएपछि सम्पूर्ण पृथ्वी घुमेर त्यो राजा यसै तीर्थमा आइपुग्यो । उसले देवर्षि नारदबाट उपदेश पाएर त्यस ठाउँमा भक्तिपूर्वक स्नान गऱ्यो । पौषशुक्ल चतुर्दशीका दिन त्यस तीर्थको जलस्पर्श गरेको हुँदा उसको शरीर कुष्ठरोगबाट पैदा भएका घाउबाट र त्यसबाट उत्पन्न भएका अन्य रोगबाट मुक्त भयो । एक वर्षसम्म उसले त्यहाँ सधैं स्नान गऱ्यो । मरेपछि त्यो पनि विमान चढेर स्वर्ग गयो ॥३५-३८॥

---

१४. षड्वर्षजेन स मुक्तः शक्रलोकं व्रजेत्सुधीः, इति न.सं.पु.पाठः । १५. स्नायते, इति न.सं.पु.पाठः ।
१६. रुद्रलोकम्, इति न.सं.पु.पाठः । १७. कालस्य च द्वितीयायां रुद्रलोकं व्रजेत्सखी, इति न.सं.पु.पाठः ।
१८. पापमपमृत्युविनश्यति, इति न.सं.पु.पाठः । १९. बभ्रम्य, इति न.सं.पु.पाठः ।

पञ्चाशद्धनुषां दूरे तीर्थराज उदाहृतः[२०]। तदुत्तरप्रयागाख्यं सर्वदुष्कृतनाशनम् ॥३९॥
शङ्खमूलं महातीर्थं सर्वतीर्थोत्तमोत्तमम्। देवर्षिदानवैः सिद्धैः सेवितं भुवि दुर्ल्लभम् ॥४०॥
वैशाखे कार्त्तिके माघे संस्नाति[२१] यो निरन्तरम्। सप्तजन्मार्जितैः पापैर्मुक्तो याति परं पदम् ॥४१॥
पञ्चभिः स महापापैस्त्रिविधैश्च विवर्जितः। ज्ञानतोऽज्ञानतो जातैः[२२] पद्मदलं जलैरिव ॥४२॥
सर्वपर्वसु यत्नेन स्नातव्यं विधिवद् बुधैः। श्रद्धया पूर्णिमायाञ्च चतुर्दश्यां कुहौ तथा ॥४३॥
शताश्वमेधजं पुण्यं वाजपेयसहस्रकम्। स्वर्णतुलाशतोद्भूतं सुस्नानाल्लभते सकृत् ॥४४॥
बालुकया सुनिर्माय लिङ्गमर्चति वै सकृत्। इहलोकं परित्यज्य व्रजेदीशं परात्परम् ॥४५॥
ईषे शुक्लमहाष्टम्यां यः स्नाति च सकृदपि। स्नानञ्च रुद्रधारायां वाग्वत्यां सङ्गमे किल[२३] ॥४६॥
सहस्रजन्मजैः पापैः मुच्यते[२४] पातकादिभिः। सर्वपर्वसु यत्नेन स्नात्वारोहति तत्स्थलीम् ॥४७॥
कोटिजन्मार्जितैः पापैर्मुच्यते चैकवत्सरे। वाजपेयसहस्राणामश्वमेधशतस्य च ॥४८॥
लिङ्गार्चकः फलं लब्ध्वा[२५] रुद्रलोके महीयते। ततोऽमरावतीतीर्थे स्नातव्यं विधिना पुनः ॥४९॥
भाद्रशुक्लचतुर्दश्यामेकादश्यां तथैव च। आजीवनं कृतैः[२६] पापैः स्नातकस्तत्र मुच्यते ॥५०॥

त्यहाँबाट पाँच धनुष यढा उत्तरप्रयाग नाम गरेको सबै पापलाई नाश गर्ने तीर्थराज छ। सबै देवता, ऋषि, दानव र सिद्धहरूले आश्रय लिएको पृथ्वीमा अन्त नपाइने शङ्खमूल तीर्थ सबै तीर्थमा उत्तम महातीर्थ छ। वैशाख, कार्तिक र माघ महिनामा जसले सधैँ यस तीर्थमा स्नान गर्छ त्यो सातै जुनीमा कमाएका पापबाट मुक्त हुन्छ, मरेपछि परमपद पाउँछ। जानी अथवा नजानीकन गरेका पञ्चमहापाप तथा आध्यात्मिक, आधिदैविक र आधिभौतिक पापहरूले पनि त्यस तीर्थमा स्नान गर्ने व्यक्तिलाई पानीले कमलको पातलाई छोडेजस्तै छोडिदिन्छन् ॥३९-४२॥

विद्वान् मानिसहरूले खासगरी सबै पर्वहरूमा, पूर्णिमा, चतुर्दशी र अमावास्या तिथिहरूमा विशेष प्रयत्न गरेरैभए पनि यस तीर्थमा श्रद्धापूर्वक विधिवत् स्नान गर्नुपर्छ। यहाँ एकपटक मात्रै स्नान गर्नाले पनि मानिसले सय अश्वमेध यज्ञ गरेको पुण्य, हजार वाजपेय यज्ञ गरेको फल र सय तोला सुन दान गरेको फल प्राप्त गर्छ। बालुवाको लिङ्ग बनाएर एकपटक मात्रै भए पनि जसले पूजा गर्छ त्यो यस लोकलाई छोडेपछि अति उत्तम ईश्वरको लोकमा जान्छ ॥४०-४५॥

आश्विन शुक्ल महाअष्टमीका दिन वाग्वतीको दोभानमा रुद्रधारानामक महातीर्थमा जसले एकपटक मात्रै पनि नुहाउँछ त्यो हजारौँ जन्मसम्म गरेका महापातकहरूबाट मुक्त हुन्छ। प्रयास गरेर त्यस तीर्थमा स्नान गरी जुन मानिस पवित्र स्थलीमा चढ्छ, त्यो करोडौँ जन्मदेखि गर्दै आएका पापहरूबाट एक वर्षभित्रै छुट्कारा पाउँछ, हजार वाजपेय यज्ञ गरेको र सय अश्वमेध यज्ञ गरेको फल पाउँछ ॥४६-४८॥

त्यस लिङ्गको पूजा गर्ने मानिस रुद्रलोकमा गएर ससम्मान बस्न पाउँछ। त्यसपछि अमरावतीतीर्थमा विधिपूर्वक स्नान गर्नुपर्छ। भाद्र शुक्ल चतुर्दशी र एकादशीका दिन त्यस तीर्थमा स्नान गर्ने मानिस बाँचुञ्जेल गरेका पापबाट मुक्त हुन्छ ॥४९-५०॥

२०. तीर्थराजमुदाहृतम्, इति न.सं.पु.पाठः।
२१. स्नायते, इति न.सं.पु.पाठः।
२२. कृत्यैः, इति न.सं.पु.पाठः।
२३. रुद्रधारामहातीर्थे वाग्वत्याः संयुगे द्विज, इति न.सं.पु.पाठः।
२४. स महा...., इति न.सं.पु.पाठः।
२५. तल्लिङ्गमर्चकः प्राप्य, इति न.सं.पु.पाठः।
२६. यावज्जीवकृतैः, इति न.सं.पु.पाठः।

मौसलमखजं प्राप्यामरावत्यां महीयते। विमलावतीतीर्थञ्च दशचापेषु वर्तते[२७] ॥५१॥
स्नातव्यं कार्त्तिके शुक्लसप्तम्यामत्र श्रद्धया[२८]। स्नान्ति श्रद्धालवो[२९] यत्र दशपापक्षयेप्सया ॥५२॥
ततो मखफलं प्राप्य यान्त्यग्निलोकमुज्ज्वलम्[३०]। तन्निर्मलावतीतीर्थे कार्त्तिकस्य सितेऽसिते ॥५३॥
षष्ठ्यां तिथौ हि स्नानस्य मुने ! शृणु महत् फलम्[३१]। भ्रूणहत्यादिभिः पापैर्मुक्तः शतगवां फलम् ॥५४॥
दशतुलाफलं प्राप्य स्नातो रौद्रं[३२] च गच्छति। वायुमतीमहातीर्थे स्नातव्यं सततं बुधैः ॥५५॥
फाल्गुनपूर्णिमायाञ्च चतुर्दश्यामथापि वा। स्नाता वायुबली भूत्वा भुनक्ति स्नानजं फलम्[३३] ॥५६॥
दशकोटिमखानाञ्च फलभाग् यात्यनिलालयम्[३४]। योगकुण्डे महातीर्थे स्नातकस्य सितस्य च ॥५७॥
कार्त्तिकस्य नवम्याञ्च योगसिद्धिर्भवेद् ध्रुवा[३५]। अष्टमीनवमीयुक्ते मूलार्के भार्गवे दिने ॥५८॥
अपि योगैर्विहीनोऽपि स्नानाद्योगीश्वरो भवेत्। सर्वकर्मोद्भवैः पापैः स मुक्तो नात्र संशयः ॥५९॥
सर्वयज्ञार्चनापुण्यं प्राप्य योगी व्रजेत्परम्। मणितीर्थे पुनः स्नात्वा तृतीयायां मधोः सिते ॥६०॥
दशगवां फलं लब्ध्वा शक्रलोकं स गच्छति। ततस्तीर्थे प्रयागाख्ये मकरस्थे रवौ सदा ॥६१॥
सङ्क्रान्त्याञ्च विशेषेण स्नातव्यं भक्तितो बुधैः। दशधा च प्रयागाख्ये स्नात्वा हि यत्फलं भवेत् ॥६२॥
तत्फलञ्च समादाय स्वर्गे कोटिसमां वसेत्। पीठिकाख्ये महातीर्थे स्नात्वा दशगवां फलम् ॥६३॥

त्यसमा स्नान गर्ने व्यक्ति मौसलयज्ञ गर्नाले जुन फल प्राप्त हुन्छ त्यो फल प्राप्त गरी अमरावतीमा पूज्य भएर बस्न पाउँछ। त्यसदेखि दश धनु टाढा विमलावती नाम गरेको तीर्थ छ, त्यस तीर्थमा कार्तिक शुक्ल सप्तमीका दिन दश किसिमका पाप नाश गर्ने विचार लिएर जसले विधिपूर्वक स्नान गर्छ त्यो व्यक्ति अग्निष्टोम यज्ञ गरेको फल प्राप्त गरेर अग्निलोकमा जान्छ ॥५१-५२॥

कार्तिक शुक्ल तथा कृष्ण दुबै पक्षको षष्ठीका दिन जसले निर्मलावती तीर्थमा स्नान गर्छ त्यो अग्निज्वालाले उजलो बनेको अग्निलोकमा जान्छ। षष्ठीतिथिमा स्नान गर्ने व्यक्तिले प्राप्त गर्ने महान् फलका विषयमा सुन्नुहोस्। त्यसरी विधिपूर्वक स्नान गर्ने मासिले भ्रूणहत्या आदि गरेका पापबाट मुक्ति पाएर सयवटा गाईदान गरेबराबरको फल पाउँछ। दशवटा तुलादान गरेसमानको फल प्राप्त गरेर त्यो मानिस रुद्रलोकमा जान्छ। विद्वान् मानिसहरूले वायुवतीतीर्थमा फाल्गुनपूर्णिमा अथवा चतुर्दशीका दिन स्नान गर्नुपर्छ। फाल्गुनपूर्णिमा र चतुर्दशीमा त्यहाँ स्नान गर्नाले वायुजस्तै बलियो होइन्छ र दशकरोड हवन गरेको पुण्य प्राप्त गरेर वायुलोकमा जान पाइन्छ ॥५३-५६॥

कार्तिकशुक्ल नवमीका दिन योगकुण्ड नाम गरेको महातीर्थमा स्नान गर्ने व्यक्तिको योगसिद्धि हुन्छ। मूलनक्षत्र, आइतबार अथवा शुक्रबार परेको अष्टमी र नवमीका दिन त्यस तीर्थमा स्नान गऱ्यो भने योगसाधना नगरेको व्यक्ति पनि योगीश्वर हुन्छ। त्यो व्यक्ति सम्पूर्ण कार्यबाट पैदा भएका पापबाट मुक्त हुन्छ। सम्पूर्ण यज्ञ र पूजा गरेको पुण्य प्राप्त गरेर त्यो योगी परमपदमा पुग्छ। चैत्र शुक्ल तृतीयाका दिन मणितीर्थमा स्नान गऱ्यो भने दश गाई दान दिएको फल प्राप्त गरेर त्यो व्यक्ति इन्द्रलोक जान्छ ॥५७-६०॥

त्यसपछि मकर राशिमा सूर्य रहेको बेला प्रयागतीर्थमा विशेषगरी सङ्क्रान्तिका दिन बुझेका मानिसले भक्तिपूर्वक स्नान गर्नुपर्छ। प्रयागमा दश पटक स्नान गर्दा जुन फल प्राप्त हुन्छ, त्यहाँ स्नान गर्दा त्यही फल प्राप्त हुन्छ। त्यस फललाई प्राप्त गरी स्नान गर्ने व्यक्ति स्वर्गमा एक करोड वर्ष बस्छ। पीठिका नाम गरेको महातीर्थमा माघ महिनाको दुबै नवमीका दिन स्नान गर्दा दशवटा गाई दान गरेको फल प्राप्त हुन्छ र त्यो व्यक्ति विष्णुलोक जान्छ ॥६१-६३॥

---

२७. धनुषां दशदूरे तत्तीर्थञ्च विपलावतीन्, इति न.सं.पु.पाठः।
२८. शुक्लसप्तम्याञ्च विशेषतः, इति न.सं.पु.पाठः।
२९. स्नायते विधिना, इति न.सं.पु.पाठः।
३०. अग्निष्टोमफलं प्राप्य अग्निलोकं स गच्छति, इति न.सं.पु.पाठः।
३१. षष्ठीदिने हि यः स्नात्वा तस्य पुण्यफलं शृणु, इति न.सं.पु.पाठः।
३२. रुद्रलोकं सः, इति न.सं.पु.पाठः।
३३. वायुतुल्यबलो भूत्वा स्नानाद्भुनक्ति वै सुखम्, इति न.सं.पु.पाठः।
३४. दशकोटिहुतं पुण्यं लब्ध्वा यात्यानिलालयम्, इति न.सं.पु.पाठः।
३५ योगसिद्धिर्भविष्यति, इति न.सं.पु.पाठः।

नवम्योश्च द्वयोर्माघे विष्णुलोकं प्रगच्छति। स्नात्वा त्रिविक्रमे नैकगोदानजफलं भवेत्[३६] ॥६४॥
एकादश्यां द्वयोर्माघे विष्णुलोकं प्रगच्छति। स्वर्णतीर्थे ततः स्नात्वा दशस्वर्णतुलोद्‌भवम्[३७] ॥६५॥
पुण्यं[३८] लब्ध्वाशु निष्पापो रुद्रलोके वसेत्सुखी। ब्रह्मतीर्थे ततः स्नात्वा माघे प्रतिपदोर्द्वयोः[३९] ॥६६॥
सर्वयज्ञफलं प्राप्य ब्रह्मलोकं स गच्छति। ततः क्षत्रियतीर्थे च मधोः षष्ठ्यां तथा द्वयोः ॥६७॥
राजसूयफलं प्राप्य स्नात्वा शक्रपुरं व्रजेत्। राजेश्वरीमहातीर्थे नवम्योराश्विने द्वयोः ॥६८॥
सप्तजन्मार्जितैः पापैः स्नाता मुक्तो न संशयः[४०]। रोहिण्यृक्षेण युक्तायां यदि स्नाति च बुद्धिमात्[४१] ॥६९॥
इहलोकं परित्यज्य देवीलोके महीयते। उमापतिमहातीर्थे ह्यमावास्यां जलाप्लुतः ॥७०॥
सोमयज्ञफलं[४२] प्राप्य रुद्रलोकं स गच्छति। यदि सोमेन युक्तायां तत्रैव स्नाति चेद्[४३] बुधः ॥७१॥
कोटिजन्मार्जितैः पापैर्मुक्तो[४४] गच्छति शाङ्करम्।
विष्णुतीर्थे च वैशाखे द्वादश्योः स्नाति चेद्[४५] द्वयोः ॥७२॥
गोसहस्रप्रदानस्य फलेन[४६] याति वैष्णवम्। तज्जयमङ्गलातीर्थे स्नातव्यं जयकाङ्‌क्षिभिः ॥७३॥
मधोः कृष्णचतुर्दश्यां सर्वपापक्षतिर्भवेत्[४७]। आकाशभैरवे तीर्थे मधोः कृष्णाष्टमीदिने ॥७४॥
ब्रह्महत्यां परित्यज्य स्नातो रुद्रपुरं व्रजेत्। श्रीवत्सलामहातीर्थे स्नातको विधिना पुनः ॥७५॥

त्रिविक्रम महातीर्थमा माघ महिनाको दुबै एकादशीका दिन स्नान गर्ने व्यक्ति हजार गाई दान गरेको फल प्राप्त गरी विष्णुलोक जान्छ। त्यसपछि स्वर्णतीर्थमा स्नान गऱ्यो भने दशवटा स्वर्णदान र तुलादानको पुण्य प्राप्त हुन्छ। अनि त्यस्तो व्यक्ति पापरहित भएर आनन्दसित रुद्रलोकमा बस्न पाउँछ। दुबै पक्षको माघ महिनाको प्रतिपदा तिथिमा ब्रह्मतीर्थमा स्नान गर्ने व्यक्ति सम्पूर्ण यज्ञको पल प्राप्त गरेर ब्रह्मलोकमा जान पाउँछ ॥६४-६६॥

त्यसैगरी चैत्र महिनाको दुबै पक्षको षष्ठी तिथिमा क्षत्रियतीर्थमा स्नान गऱ्यो भने त्यो व्यक्ति राजसूय यज्ञ गरेको फल प्राप्त गरेर इन्द्रलोक जान्छ। आश्विन महिनाको दुबै पषको नवमीका दिन राजेश्वरी महातीर्थमा स्नान गऱ्यो भने त्यो व्यक्ति सम्पूर्ण जन्ममा लागेका पापबाट मुक्त हुन्छ, यसमा शङ्का छैन। विवेकशील मानिसले रोहिणी नक्षत्रले युक्त भएको तिथिमा स्नान गऱ्यो भने ऊ यस संसारलाई छोडेपछि देवीको लोकमा ससम्मान बस्न पाउँछ। अमावास्याको दिन उमापति महातीर्थमा स्नान गर्ने व्यक्तिले हवन गरेर सोमपान गरेको फल प्राप्त गरी रुद्रलोक जान पाउँछ ॥६७-७०॥

यदि सोमवती अमावास्याका दिन बुद्धि भएको मानिसले त्यहाँ स्नान गऱ्यो भने करोडौँ जन्ममा गरेका पापहरूलाई छोडेर त्यो शिवलोक जान पाउँछ। विशाखा नक्षत्रले युक्त भएको दुबै पक्षको द्वादशीका दिन विष्णुतीर्थमा स्नान गऱ्यो भने ऊ हजार गाई दान गरेको फल प्राप्त गरी निष्पाप भएर विष्णुलोक जान्छ। विजयको कामना गर्ने व्यक्तिले चैत्र कृष्ण चतुर्दशीका दिन जयमङ्गलातीर्थमा स्नान गर्नुपर्छ। त्यसो गर्ने व्यक्ति सम्पूर्ण पापबाट मुक्त हुन्छ। चैत्र कृष्ण अष्टमीका दिन आकाशभैरवतीर्थमा स्नान गर्ने व्यक्तिले ब्रह्महत्याजस्तो पापबाट मुक्त भएर शिवलोक जान पाउँछ। ज्येष्ठ शुक्ल दशमीका दिन श्रीवत्सा नाम गरेको महातीर्थमा विधिपूर्वक स्नान गर्ने व्यक्ति दशौथरी पापबाट मुक्त हुन्छ ॥७१-७५॥

---

३६. त्रिविक्रमे महातीर्थं स्नात्वा च गोसहस्रकम्, इति न.सं.पु.पाठः।
३७. स्वर्णतुलादशोद्‌भवम्, इति न.सं.पु.पाठः।
३८. तावत्, इति न.सं.पु.पाठः।
३९. माघप्रतिपदि द्वयोः, इति न.सं.पु.पाठः।
४०. स मुक्तो नात्र संशयः, इति न.सं.पु.पाठः।
४१. स्नायते यदि धीमता, इति न.सं.पु.पाठः।
४२. सोमपानं हुतम्, इति न.सं.पु.पाठः।
४३. स्नायते, इति न.सं.पु.पाठः।
४४. कोटिजन्मार्जितान् पापान् त्यक्त्वा, इति न.सं.पु.पाठः।
४५. वैशाख्यां द्वादश्यां स्नायते, इति न.सं.पु.पाठः।
४६. गोसहस्रफलं प्राप्य निष्पापः, इति न.सं.पु.पाठः।
४७. सर्वपापैर्विमुच्यते, इति न.सं.पु.पाठः।

ज्येष्ठे सितदशम्याञ्च दशपापैर्विमुच्यते। हस्तर्क्षेण युतायाञ्च संस्नाति यदि बुद्धिमान्[४८] ॥७६॥
गोकोटिजं फलं प्राप्य दुर्गालोकं स गच्छति। कोषोदके महातीर्थे स्नातव्यं विधिना नरैः ॥७७॥
ते भवन्त्यैनसा[४९] मुक्ताः पञ्चम्योः पक्षयोर्द्वयोः। ज्येष्ठर्क्षेण युतायाञ्च यदि स्नाति जनः[५०] पुनः ॥७८॥
दशाश्वमेधजं प्राप्य रुद्रलोकं व्रजेन्मुदा। सौभाग्यदे महातीर्थे स्नानात्पापैर्विमुच्यते ॥७९॥
मधोः कृष्णत्रयोदश्यां स्नानाद् याति परां गतिम्[५१]।
भाग्यहीना च या नारी स्नानाद् भाग्यवती भवेत्[५२] ॥८०॥
पतिप्रिया सुन्दरी सा[५३] भवेज्जन्मनि जन्मनि। कुबेराख्ये महातीर्थे चतुर्दश्यां मधोर्द्वयोः ॥८१॥
स्नानाद् कुबेरतुल्यौजा भवेदिह महाधनः। पूर्णिमायाममावास्यां स्नाता तत्र त्रिमासतः ॥८२॥
इह लोके धनं भुक्त्वा रुद्रधनाधिपो भवेत्। गौरीतीर्थेऽबला श्रेष्ठा संस्नाति विधिवद्यदि ॥८३॥
ज्येष्ठे सिते तृतीयायां तस्याः पुण्यं फलं शृणु। नारीणां सा भवेच्छ्रेष्ठा सर्वपापैर्विवर्जिता ॥८४॥
पतिपुत्रान्वितेहाऽन्ते रामा गौरीपुरं व्रजेत्। गौरीतीर्थात्परं तीर्थं नास्ति ज्ञेयं सुदुर्लभम् ॥८५॥
नारीणां मनसा यद् यद् वाञ्छ्यते तत् फलप्रदम्[५४]।

हस्तानक्षत्रले युक्त भएको दशमीका दिन बुद्धि भएको जुन मानिसले यहाँ स्नान गर्छ करोडौँ गाई दान गरेको फल प्राप्त गरेर त्यो दुर्गाको लोकमा जान्छ। मानिसहरूले कोषोदक नाम गरेको महातीर्थमा दुबै पक्षको पञ्चमीका दिन स्नान गर्नुपर्छ। त्यसो गऱ्यो भने जन्मभरि गरेका पापबाट ती मुक्त हुन्छन्। ज्येष्ठानक्षत्रले युक्त भएको दशमी तिथिका दिन यदि कसैले स्नान गर्छ भने त्यसले दश अश्वमेध यज्ञ गरेको फल प्राप्त गरी आनन्दसित रुद्रलोक जान पाउँछ ॥७६-७८॥

चैत्रकृष्ण त्रयोदशीका दिन सौभाग्यद नाम गरेको महातीर्थमा स्नान गर्ने व्यक्ति पापहरूबाट मुक्त हुन्छ, त्यो परमगतिमा पुग्छ। कुनै स्त्री अभागिनी छ भने त्यस तीर्थमा स्नान गरेपछि त्यो सौभाग्यवती हुन्छे, जन्म-जन्ममा पतिको प्यारी र सुन्दरी बन्न पाउँछे। चैत्रमहिनाका दुबै चतुर्दशीका दिन कुबेर नाम गरेको महातीर्थमा स्नान गऱ्यो भने त्यसले यस संसारमा कुबेरजस्तै तेजिलो र धनी हुन पाउँछ। पूर्णिमा र अमावास्याका दिन तीन महिनासम्म त्यस तीर्थमा स्नान गऱ्यो भने त्यसले यस लोकमा धनको उपभोग गरेर शिवजीका ढुकुटीको मालिक बन्न पाउँछ ॥७९-८२॥

कुनै अबला नारीले ज्येष्ठशुक्ल तृतीयाका दिन गौरीतीर्थमा विधिपूर्वक स्नान गरी भने त्यसको फल सुन। त्यो सम्पूर्ण पापबाट मुक्त भएर श्रेष्ठ नारीका रूपमा रहन्छे। यस लोकमा पति र पुत्रले युक्त भएर अन्त्यमा गौरीको लोकमा जान पाउँछे। स्त्रीजातिहरूका निमित्त गौरीतीर्थभन्दा ठूलो अर्को तीर्थ छैन। यसले नारीहरूले मनमा चिताएको सबै कामना एकैचोटि पूर्ण गरिदिन्छ ॥८३-८५½॥

---

४८. स्नायते यदि धीमता, इति न.सं.पु.पाठः।
४९. जनार्जितैनसा, इति न.सं.पु.पाठः।
५०. संस्नायते, इति न.सं.पु.पाठः।
५१. स याति परमां गतिम्, इति न.सं.पु.पाठः।
५२. अभागिनी सदा चेत् स्त्री स्नात्वा सौभागिनी भवेत्, इति न.सं.पु.पाठः।
५३. सुन्दरी सा पतिप्रेमा, इति न.सं.पु.पाठः।
५४. नारीणां कामदं शश्वन्मनसा यद्यदीप्सितम्, इति न.सं.पु.पाठः।

तीर्थराजस्य माहात्म्यं शृणु वच्मि विरूपदृक् ॥८६॥
त्रयाणाञ्च विशेषेण आर्यातीर्थस्य वै पुनः ।
अध्यायेऽस्मिन्खलु नरवरा धीर शृण्वन्ति भक्त्या
तीर्थानां ये विपुलवरदं सन्माहात्म्यञ्च शश्वत् ।
तेषु स्नानात् फलति भुवने पुण्यराशिश्च यावान्[५५]
तं तावन्तं पशुपकृपया भाग्यवन्तो लभन्ते[५६] ॥८७॥

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालमाहात्म्ये विरूपाक्षतीर्थयात्रायां तीर्थानां माहात्म्यं नाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥१६२॥

हे विरूपाक्ष ! तीर्थराजको माहात्म्य विशेष गरी तीन किसिमका तीर्थ र आर्यातीर्थको माहात्म्य म बताउँछु, सुन ॥८६½॥

हे धैर्यशाली विरूपाक्ष ! यस अध्यायमा वर्णन गरिएको वरदायक माहात्म्य एकपटक मात्रै पनि मानिसहरूले सुने भने ती ती तीर्थमा स्नान गर्दा जे जस्तो फल प्राप्त हुन्छ, ती सबै प्राप्त गर्छन् । यो अध्याय पाठ गर्नेले पनि त्यस्तै फल पाउँछ ॥८७॥

प्रा. डा. वेणीमाधव ढकालद्वारा सम्पादित एवं नेपाली भाषामा अनूदित स्कन्दपुराणअन्तर्गतको हिमवत्खण्डमा विरूपाक्षको तीर्थयात्राप्रसङ्गमा विभिन्न तीर्थहरूको माहात्म्यनामक एकसय बैसट्ठिऔं अध्याय पूरा भयो ।

---

५५. तेषु स्नानाद्धृदयवरदं सन्ति पुण्यानि यावत्, इति न.सं.पु.पाठः ।
५६. प्राप्नोत्यार्यस्तदखिलफलं पाठकोऽस्यैव तद्वत्, इति न.सं.पु.पाठः ।